भरतमुनिविरचितं

# नाट्यशास्त्रम्

## खंड - पहिला

## अध्याय १ ते १२

( मराठी अनुवाद पदच्छेद आणि अन्वयासह )

अनुवादक

डॉ. संध्या वीरसिंह पुरेचा

श्री. श्रीहरी वासुदेव गोकर्णकर

प्रकाशक

महाराष्ट्र राज्य साहित्य आणि संस्कृती मंडळ, मुंबई

भरतमुनिविरचितं

# नाट्यशास्त्रम्

## खंड - पहिला

## अध्याय १ ते १२

(मराठी अनुवाद - पदच्छेद आणि अन्वयासह )


अनुवादक

डॉ. संध्या वीरसिंह पुरेचा
पी.एच.डी.

श्री. श्रीहरी वासुदेव गोकर्णकर
एम्.ए., बी.एड्., एम्.फिल्.



महाराष्ट्र राज्य साहित्य आणि संस्कृती मंडळ, मुंबई.

पुस्तकाचे नाव - भरतमुनिविरचितं नाट्यशास्त्रम्
खंड - पहिला अध्याय १ ते १२
(मराठी अनुवाद - पदच्छेद आणि अन्वयासह)

अनुवादक - डॉ. संध्या वीरसिंह पुरेचा
श्री. श्रीहरी वासुदेव गोकर्णकर

प्रथमावृत्ती - २०१६ (पहिला खंड).

प्रकाशक - सचिव,
महाराष्ट्र राज्य साहित्य आणि संस्कृती मंडळ,
रवींद्र नाट्यमंदिर इमारत, दुसरा मजला,
पु. ल. देशपांडे महाराष्ट्र कला अकादमी आवार,
सयानी रोड, प्रभादेवी, मुंबई ४०० ०२५.

© प्रकाशकाधीन

मुद्रण - व्यवस्थापक,
शासकीय फोटोझिंको मुद्रणालय,
५, फोटोझिंको पथ, पुणे - ४११ ००१.

किंमत - Rs 5 9 1

या पुस्तकात व्यक्त केलेली मते स्वत: अनुवादकाची असून,
या मतांशी साहित्य आणि संस्कृती मंडळ व महाराष्ट्र शासन सहमत असेलच असे नाही.

|| श्री ||

भरतमुनिविरचितं

# नाट्यशास्त्रम्



# अध्यक्षांचे निवेदन

आपल्या प्राचीन भारतीय साहित्याची परंपरा समृद्ध आहे. वेद-उपनिषदे अन् रामायण - महाभारतासारखी महाकाव्ये ही काही उदाहरणे आहेत. या संस्कृत साहित्याने जागतिक साहित्यात आपली वेगळी ओळख निर्माण केली आहे. या वैचारिक साहित्याबरोबर विविध कलासंबंधी शास्त्रशुद्ध पद्धतीने झालेले लेखनही तितकेच महत्त्वाचे आहे. 'भरतमुनिरचित नाट्यशास्त्र' हा यातील नाट्यकलासंबंधीचा महत्त्वाचा ग्रंथ आहे. 'भरतमुनीचे नाट्यशास्त्र' हा संस्कृत ग्रंथ जगभरातील नाट्यशास्त्राच्या अभ्यासकांसाठी एक मूल्यवान संदर्भग्रंथ झालेला आहे.

भरतमुनीच्या नाट्यशास्त्र या ग्रंथाची प्रमुख भाषांत भाषांतरे झाली आहेत. डॉ. संध्या पुरेचा यांनी या ग्रंथाचे मराठीत केलेले भाषांतर साहित्य आणि नाट्यकलेच्या दृष्टीने चांगले सांस्कृतिक काम आहे. भरतमुनीच्या या बृहद्ग्रंथातील ३७ अध्यायांपैकी या पहिल्या खंडात बारा अध्यायांचे डॉ. संध्या यांनी भाषांतर केले आहे. भरतमुनीच्या समग्र नाटयशास्त्राचे मराठी भाषेतील प्रकाशन मंडळाच्या वतीने होत आहे हे साहित्य-संस्कृतीच्या दृष्टीने जबाबदारीचे काम आहे.

कोणत्याही लेखनकलाकृतीचे एका भाषेतून दुसऱ्या भाषेत भाषांतर ही एक प्रकारची सृजनशील निर्मितीच असते. मराठी नाट्यकलेच्या अभ्यासकांना नाट्यशास्त्राच्या या भाषांतराची मोठी मदत होणार आहे. कोणत्याही तांत्रिक स्वरूपाच्या ग्रंथाचे भाषांतरही अवघड आणि गुंतागुंतीचे काम असते. नाट्यशास्त्र हे केवळ मनोरंजनाचे साधन नसून त्यातून तात्त्विक शिक्षणही मिळत असते. त्यामुळे अशा ग्रंथाचे भाषांतर करताना भाषा, शास्त्र आणि शास्त्रीय भाषा यात भाषांतरकारांचे कौशल्य पणास लागते. डॉ. संध्या पुरेचा यांनी हा चांगला समतोल साधला आहे. तसेच अभिनवगुप्ताच्या 'अभिनवभारती' या नाट्यशास्त्रावरील टीकाग्रंथाचा आधारही या भाषांतरासाठी घेतला आहे. त्यामुळे हे भाषांतर चांगले तर झालेच आहे. एवढेच नाही तर या ग्रंथामुळे संस्कृतविषयक मराठी साहित्यात एक प्रकारे मोलाचीच भर पडली आहे. असा ग्रंथ महाराष्ट्र राज्य साहित्य आणि संस्कृती मंडळ प्रकाशित करत असल्याचे समाधान आहे.

श्री. बाबा भांड
अध्यक्ष,
महाराष्ट्र राज्य साहित्य आणि संस्कृती मंडळ, मुंबई

# नान्दीवाक्

प्राचीन भारतीय ऋषिमुनींनी केवळ साहित्यरचनाच केल्या नाहीत तर शास्त्रीय संहिताही लिहिल्या. वेदमंत्र सूक्तकर्त्यांना दिसले आणि त्यातून ऋग्वेदीय काव्य जन्मास आले. अभिजात संस्कृत वाङ्मयाने जागतिक स्तरावर रसिकांना भुरळ घातली तर शास्त्रवाङ्मयातील विचारांची सूक्ष्मता व अचूकता पाहून आधुनिक शास्त्रज्ञही अचंबित झाले. बुद्धिवैभव प्रदर्शित करणाऱ्या ह्या भारतीय परंपरेने कलांना शास्त्ररूप देण्याचे एक मोलाचे योगदान दिले आहे. विविध कलांच्या रत्नहारातील हिरेजडित रत्नमणी म्हणजे भरतमुनींचे नाट्यशास्त्र ! साऱ्या विश्वातील कलाविद्‌विशेषत: नाट्यकलेचे उपासक एकदा तरी ह्या पुस्तकाचा संदर्भ दिल्याशिवाय राहत नाहीत. किंबहुना या संदर्भाशिवाय त्यांची प्रमेय व प्रथांग अपुरेच रहातात. भरताच्या नाट्यशास्त्राची सर्व प्रमुख भाषांमध्ये भाषांतरे झाली आहेत. काही अंशात्मक आहेत तर काही भाग्यरूप ! डॉ. संध्या पुरेचा यांनी संपूर्ण नाट्यशास्त्राचे मराठी भाषांतर करण्याचा हा प्रयत्न केलेला असून एकूण ३७ अध्यायांपैकी पहिल्या खंडात १ ते १२ अध्यायांचे पदच्छेद व अन्वयासह मराठी भाषांतर केलेला आहे जो प्रकाशित होत आहे. पूर्ण प्रकल्प अत्यंत महत्त्वाकांक्षी असून त्यांनी संस्कृतविषयक मराठी साहित्यात मोलाची भर पडणार आहे. यापूर्वी डॉ. कंगले, श्रीमती गोदावरी केतकर यांनीही यावर काम केले आहे. परंतु ते विशिष्ट अध्यायांपुरते किंवा विषयांपुरते मर्यादित आहे. समग्र नाट्यशास्त्राच्या भाषांतराचा हा मराठीतील पहिलाच प्रयत्न आहे. महाराष्ट्राची स्वयंगुणविशिष्ट नाट्यकला आणि शास्त्रीय नृत्यकलांचा विकास पाहता महाराष्ट्रातील अभ्यासकाला त्याच्या भाषेत नाट्यशास्त्र हवेच होते ही मागणी ह्या भाषांतरामुळे निश्चितच पूर्ण होईल.

पहिल्या खंडाचे भाषांतर वाचल्यावर असे लक्षात येते की, येथे केवळ संस्कृत शब्दाऐवजी मराठी प्रतिशब्द ठेवलेला नाही. दोन्ही भाषांमागे उभ्या असलेल्या दोन सांस्कृतिक परंपरांशी डॉ. संध्या पुरेचा यांचा चांगला परिचय आहे. दोन्ही भाषांच्या लकबी नीट लक्षात घेऊन त्यांच्या शब्दसंपदा, वाक्यरचना व आशय या तीनही स्तरांवर या दोन्ही भाषांना न्याय दिला आहे. नाट्यशास्त्रासारखा लोकप्रिय तरीही तांत्रिक स्वरूपाच्या पुस्तकाचे भाषांतर ही प्रक्रिया वाटते तेवढी सोपी नाही. नाटक हे मनोरंजनाचे साधन (एकं समाराधनम्) असले तरी नाट्यशास्त्र हया मनोरंजनाचे साधन नव्हे !

इंद्राच्या नेतृत्वाखाली सर्व देवांनी ब्रह्मदेवाकडे मागणी केली 'क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत्' . त्यावर ब्रह्मदेवाने पाचव्या वेदाची म्हणजे नाट्यवेदाची निर्मिती केली व देवगणांना त्यानुसार नाट्य प्रयोग करण्यास सांगितले . देवांनी असमर्थता दर्शविल्यावर हे काम भरतमुनींकडे सोपविण्यात आले . त्यावर भरताने आपल्या शंभर पुत्रांना (शिष्यांना) नाट्यवेद शिकविला आणि प्रयोगाचे तात्त्विक शिक्षणही दिले . कथारूप इतिहास सांगण्याचे कारण असे की, नाट्यवेदाला दैवी परंपरा आहे . भरतमुनींनी स्वत: नाट्यवेदाचे ग्रहण करून आपल्या पुत्रांकरवी त्याचा प्रयोग केला आहे आणि देवांनी ज्या कार्यासाठी असमर्थता व्यक्त केली ते काम भरतमुनींनी यशस्वी करून दाखविले आहे . भरतमुनींनी या विषयावर प्रचंड चिंतन, मनन करून नाट्यशास्त्राची रचना केली आहे . असे हे तंत्रमंत्रयुक्त संस्कृतात लिहिलेले नाट्यशास्त्र भाषांतरित करण्यासाठी भाषांतरकर्ता शास्त्र, भाषा आणि शास्त्रीय भाषा यात प्रवीण असायला हवा . या मराठी भाषांतरात वरील तीनही गुणांचा संगम प्रत्ययास येतो . भाषांतराच्या आशयांतर्गत पाहता, यात बारा अध्यायांच्या विषयाचा आवाकाही मोठा आहे . केवळ पहिल्या अध्यायात कथारूप मनोरंजकता आहे; परंतु तेथून पुढे मात्र दुसऱ्या अध्यायात प्रेक्षागृहाची लक्षणे हा अतिशय तांत्रिक विषय येतो . तो विविध आकृत्यांद्वारा सोपा करून मांडला आहे . तिसऱ्या अध्यायातील रंगदेवतेचे पूजन ही परंपरा आजही रंगमंचावर तेवढ्याच भक्तिभावाने सादर केली जाते . काही स्थलकालानुरूप झालेले बदल भाषांतरात मुळाबरहुकुम मांडले आहे . चौथ्या अध्यायाचे भाषांतर करीत असताना एक महत्त्वाची टीप दिली आहे . भाषांतरासाठी अभिनवगुप्ताच्या 'अभिनवभारती' हया नाट्यशास्त्रावरील टीकेचा आधार घेतल्याचे स्पष्ट केले आहे . जेथे केवळ नाट्यशास्त्राच्या आधाराने प्रात्याक्षिक करणे कठीण होते, तेथे भाषांतरासाठी व प्रयोगासाठी सुद्धा नाट्यशास्त्रावरील टीकेची मदत घेणे यातून डॉ . पुरेचा यांची संशोधकवृत्ती प्रकट होते . यातून भाषांतरालाही संशोधनाचा दर्जा प्राप्त होतो . पाचव्या अध्यायात पूर्वरंगविधीचे विवेचन आहे . हा 'पूर्वरंग' भाषांतरात महत्त्वाचा आहे तो अभ्यासकांसाठी; पण प्रत्यक्ष प्रयोगाच्या वेळी तो रसिकांसाठीही तेवढाच महत्त्वाचा आहे . हा पूर्वरंग नाटकाच्या आस्वादासाठी प्रेक्षकांची मनोभूमिका तयार करीत असतो . नाटकाच्या मूळ उद्देशाला बाधा येणार नाही अशाप्रकारे नाट्यतंत्र तयार केले जाते आणि भाषांतरकारालाही नाट्यतंत्र व मनोरंजकता विचारात घेऊनच मांडणी करावी लागते . त्यामुळे यवनिकेच्या आतील ९ व बाहेरील १० पूर्वरंगविधीच्या प्रकारांचे विवेचन करताना या भाषांतरात चांगला समतोल साधला आहे . सहावा रसाध्याय तर मुळातच रसाने ओतप्रोत भरला

आहे. रसभावविवेचनातील भरताचे श्लोक व आर्या यांना डॉ. संध्या यांनी पूर्ण न्याय दिला आहे. विभाव, अनुभाव व व्यभिचारी भावांसह स्थायीभावाचे रसापर्यंत पोहोचणे हे या अध्यायाच्या विवेचनाचे सार आहे. हे भाषांतर अतिशय 'सरस' झाले आहे. सातवा अध्याय 'भाव' पूर्ण असून भाषांतरातही तो भाव उतरला आहे. आठवा व नववा अध्याय उपांगाभिनय व अंगाभिनय याची चर्चा करतो. या विषयात डॉ. संध्या पुरेचा यांचे विशेष प्रावीण्य आहे. त्या स्वर्गीय पार्वतीकुमारांच्या शिष्या आहेत हे त्यांच्या नृत्यकौशल्यातून तर सिद्ध होतेच. परंतु नाट्यशास्त्रासारख्या संहितेचे भाषांतर म्हणजे रंगमंचावरील पदन्यास नव्हे. त्यासाठी चिंतन, मनन, निदिध्यासन हवे. भाषेवर असलेल्या प्रभुत्वाचा प्रत्यय भाषांतरात येतो. दहावा, अकरावा व बारावा अध्याय हे तीन अध्याय अनुक्रमे चारी विधान, मंडल विधान व गतिप्रचार यांची चर्चा करतात. हे पूर्णत: नृत्याशी संबंधित आहे. याविषयी दिलेली टीपही महत्त्वाची असून ती २३७ श्लोकांच्या भाषांतराचे समर्थन करते. प्रथम खंडाच्या बाराही अध्यायांचा संक्षिप्त आढावा घेण्याचे कारण असे की, जसा जसा अध्यायाचा विषय बदलतो तशा तशा भाषांतराबाबतच्या अपेक्षा बदलत जातात. एका भाषेतील ज्ञान दुसऱ्या भाषेत आणताना काही वेळा उचित शब्द शोधण्यातही वेळ जात असतो तेव्हा भाषांतरासाठी भाषाज्ञानाबरोबरच अन्य कौशल्येही आत्मसात करावी लागतात. विषयोचित आकृत्यांमुळे व चित्रांमुळे वाचनात सुलभता येते. ह्या नाट्यशास्त्राचे मराठीत भाषांतर करून डॉ. पुरेचा यांनी संस्कृतचा मान तर वाढविलाच आहे पण मराठी भाषिकांनाही अभिजात लेणे प्राप्त करून दिले आहे, त्यासाठी त्यांचे हार्दिक अभिनंदन !

हया उत्तम कामामुळे अर्थातच काही अपेक्षा निर्माण होतात. भाषांतराचा दुसरा व तिसरा खंड (अनुक्रमे अध्याय १३ ते २४ व अध्याय २५ ते ३७) त्वरित भाषांतरित करून प्रकाशित करावेत. एवढेच नव्हे तर स्वत:च्या अध्ययनातून व अनुभवातून प्राप्त ज्ञानाच्या व कौशल्याच्या आधारे नाट्यशास्त्रावर मराठीतून भाष्य लिहावे आणि ते लवकरात लवकर प्रकाशित व्हावे यासाठी शुभेच्छा व आशीर्वाद !

डॉ. उमा वैद्य
कुलगुरू,
कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय,
रामटेक, नागपूर.

# पुरोवाक्

भरतमुनि रचित 'नाट्यशास्त्र', 'नाट्यवेद' की उत्पत्ति, उसके सम्बोध्य अर्थात् पठन के अधिकारी, 'नाट्य' के अङ्ग उसकी अवगति के लिये विहित प्रमाण तथा उसके 'प्रयोग' विषयक पाँच प्रश्नों के उत्तर के रूप में व्यवस्थित, उपदेशपरक शास्त्र है | आचार्य अभिनवगुप्तपाद ने 'अभिनवभारती' नामक अपनी 'विवृति' में यह बात इन शब्दों में कही हैं - 'एवं प्रश्नपञ्चकात् कविप्रयोक्त्रोरूपदेशपरं शास्त्रमिति |"

परम्परा में अध्ययन - अनुशीलन के क्रम में नाट्यशास्त्र उपलब्ध था ही और 'नाट्य' के रचयिता कविनाटककार, उसके प्रयोक्ता सूत्रधार-नटगण तथा रसिक-समीक्षकों की परम्परा उसे सुरक्षित रखती आयी थी | महाकवि कालिदास ने उसके रचयिता मुनि भरत का नामत: उल्लेख करते हुए उनका स्मरण अपनी रचना 'विक्रमोर्वशीयम्' के द्वितीय अङ्क में किया है और परवर्ती परम्परा में सतत मुनि भरत तथा 'नाट्यशास्त्र' का अत्यन्त आदर से उल्लेख मिलता रहा है | फिर भी जब एच . एच . विल्सन जैसे आधुनिक विद्वान ने उन्नीसवीं शती ईसवीय के तृतीय दशक में नाट्यशास्त्र को खोजने का प्रयत्न किया और वह उसे प्राप्त न कर सके | तो उन्होंने यह सन्देह व्यक्त किया कि शायद नाट्यशास्त्र सदा के लिये खो गया है | पर शीघ्र ही नाट्यशास्त्र की प्राचीन पाण्डुलिपियाँ प्राप्त होती गयीं और १८८० में फ्रांसीसी विद्वान पॉल रेन्यो (Paul Regnaud) ने उसके प्रथम आंशिक, किन्तु व्यवस्थित संस्करण को फ्रांस में प्रकाशित किया | वहाँ नाट्यशास्त्र के प्रकाशन का कार्य आगे बढ़ा | प्रोफेसर सिल्वाँ लेवी ने इस कार्य को आगे बढ़ाने की प्रेरणा दी और स्वयं भारतीय नाट्य पर अनुशीलनपरक बहुमूल्य ग्रन्थ लिखा | किन्तु नाट्यशास्त्र का प्रथम पूर्ण ग्रन्थ पण्डित शिवदत्त और काशीनाथ पाण्डुरङ्ग परब नामक विद्वानों द्वारा सम्पादित होकर १८९४ ई. मे 'काव्यमाला' मे संख्या ४२ के रूप में निर्णयसागर प्रेस, बम्बई से प्रकाशित हुआ | तब से अब तक आधुनिक युग में नाट्यशास्त्र ग्रन्थ के अनेक संस्करण और उस पर विपुल अनुशीलनात्मक साहित्य भारत और विदेशों में प्रकाशित होता रहा है | नाट्यशास्त्र केवल भारतीय 'नाट्य' ही नहीं, अपितु समस्त काव्यशास्त्र, सौन्दर्यमीमांसा, वादन, गायन, नर्तन के साथ साथ मूर्ति, चित्र, स्थापत्य कलाओं एवं छन्द:शास्त्र तथा नाट्यसम्बद्ध सभी विधाओं का आकार ग्रन्थ है | अत: कालक्रम में उसके प्रति लोगों की सतत रूचि बढ़ती गयी है |

पिछली शताब्दी में अंग्रेजी तथा नेपाली के साथ-साथ अनेक भारतीय भाषाओं में उसके अनुवाद का प्रयास हुआ है | मलयालम से लेकर हिन्दी तक की भाषाओं में उसके अनेक अनुवाद हो चुके है | मराठी में भी उसका अनुवाद हुआ है | फिर भी उसके संस्कृत श्लोकों के पदच्छेदपूर्वक सान्वय सरलतया बोधगम्य एक अनुवाद की आवश्यकता थी | मराठी में यह कार्य सुप्रसिद्ध विदुषी डाक्टर सन्ध्या पुरेचा कर रही है | उनका 'थियरी एण्ड प्रैक्टिस ऑफ आङ्गिकाभिनय इन भरतनाट्यम्' नामक विद्वत्तापूर्ण ग्रन्थ 'भवन्स बुक युनिवर्सिटी' श्रृङ्खला के अन्तर्गत भारतीय विद्याभवन, मुम्बई से २००३ में प्रकाशित हो चुका है | आधुनिक एवं पारम्परिक पद्धति से शास्त्र तथा प्रयोग - दोनों ही पक्षों में निष्णात विदुषी डाक्टर पुरेचा का मराठी में किया गया यह सुगम, सरल अनुवाद नाट्यशास्त्र के अध्ययन को मराठीभाषी और मराठी विद्समाज में दूर-दूर तक प्रसारित करेगा - यह विश्वास है | मेरी शुभकामना है कि डाक्टर सन्ध्या पुरेचा नाट्यशास्त्रीय अध्ययन को अग्रसर करने के अपने इस श्लाघनीय प्रयास में उत्तरोत्तर नयी सफलताएँ प्राप्त करें और नाट्यशास्त्रीय अनुशीलन को अधिकाधिक समृद्ध करें |

कमलेशदत्त त्रिपाठी
वाराणसी

## || प्रास्ताविकम् ||

प्रणम्य पार्वतीपुत्रमुमानन्दं नटेश्वरम् |
प्रारभ्यतेऽनुवादश्च बालेभ्य: सुखदायक: || १ ||
लिखितं भरतेनैव नाट्यशास्त्रं पुरातनम् |
अद्यापि तन्नवीनं हि पुनर्योज्यं प्रयोक्तृभि: || २ ||
हिन्द्याङ्ग्लादिषु भाषासु यद्यपि प्राप्यते बहु |
नाट्यशास्त्रानुवादश्च तर्हि किं तत्प्रयोजनम् || ३ ||
ये केऽपि विदुषां मान्या अनुवादप्रिया भुवि |
वन्देऽहं विप्रवर्यांस्तान् भूयो भूयो नमाम्यहम् || ४ ||
नाट्यशास्त्रप्रवचने स्वाध्याये बहवो रता: |
तेषु साक्षात्प्रयोगं च कुर्वाणा विरला जना: || ५ ||
यथाशास्त्रं प्रयोगे च दृढो विश्वास एव हि |
अधुना दशलक्षेषु प्रायो भवति स एक: || ६ ||
शास्त्रज्ञाश्च प्रयोगज्ञा भाषज्ञा: सम्मिलन्ति चेत् |
यज्ज्ञानं संस्कृते तस्य पुनरुज्जीवनं भवेत् || ७ ||
इत्येव मनसि धृत्वा कार्यमारब्धमेव यत् |
तद्यातु पूर्णतामेवं प्रार्थना हि गुरून् प्रति || ८ ||
साधिका भारतस्यैव भारतस्यैव राधिका |
प्रेरिता भारतेनैव भारस्तेनैव मा भवेत् || ९ ||
सामान्यानां कृते यस्य ब्रह्मणा निर्मिति: कृता |
अस्मिन् कालेऽपि सामान्या अज्ञा: शास्त्रं प्रति च तम् || १० ||

नाट्यशास्त्रपदच्छेद: सान्वयो न कृत: कदा |
अर्थो मराठीभाषायां शब्दशो नैव प्राप्यते || ११ ||
प्रयासोऽभूतपूर्वोऽयं सामान्यानां कृते भवेत् |
पदच्छेदोऽन्वयोऽर्थश्च स्वरूपमस्य विद्यते || १२ ||
नात्र दत्ता: पाठभेदा: स्वीकृतास्ते प्रयोगत: |
भाषादृष्ट्या योग्यशब्दा ज्ञानसारल्यकारणम् || १३ ||
अभ्यासो नाट्यशास्त्रस्य सर्वज्ञानाकरो ननु |
जीवनेऽद्योपयुक्तं च नास्ति कापि विचारणा || १४ ||
भरतेन सूक्तमित्यत्र -
न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला |
न तद्योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते ||
अत एवोच्यते चान्ते -
यथा दुस्तरं सागरं चोडुपेन
यथा शैवचापस्य भारो न सह्य: |
तथाप्येकसारं महत्कार्यमेतत्
गुरूणां प्रभावेण यात्वेव पूर्णम् || १५ ||

डॉ. संध्या वीरसिंह पुरेचा
श्री. श्रीहरी वासुदेव गोकर्णकर

# मनोगत

दृश्य श्राव्यरूपी भरताच्या नाट्यशास्त्राचे संपूर्ण मराठी भाषांतर व्हावे हा विचार मुळात माझे गुरू आचार्य पार्वतीकुमार यांना खूप वर्षांपूर्वीच आला होता. त्यामुळे इ.स.१९६० पासून त्यांनी स्वत:च्या मुलीकडून म्हणजेच अनसूया (अनुताई) कडून नाट्यशास्त्रातील रोजच्या उपयोगात येणाऱ्या पाचशे श्लोकांचे मराठीत भाषांतर करवून घेतले आणि त्यानुसार ते त्यांच्या विद्यार्थ्यांना शिकवू लागले. १९७८ रोजी मी आचार्य पार्वतीकुमारांची शिष्या झाले. तेव्हापासूनच गुरूजींनी मला नाट्यशास्त्राच्या विविध अध्यायातील, नृत्याला उपयोगी असणारे अनेक श्लोक अनुवादासह शिकवायला सुरूवात केली. दहावीपर्यंत संस्कृत हा विषय नसतानाही पुढे संस्कृत हा विषय अनिवार्यपणे घ्यायला लावून संस्कृतमधून बी.ए. आणि एम.ए. करावे असी गुरूजींनी मला सक्ती केली. त्यावेळी संस्कृतचे अध्ययन करण्यासाठी कै. श्री. रमेश खेर, डॉ.उमा वैद्य आणि कै. डॉ. शांताराम मोघे यांचे अमूल्य मार्गदर्शन मला लाभले. सन १९८१ ते १९८६ पर्यंत गुरूजींनी माझ्याकडून बाराव्या शतकातील नंदिकेश्वर रचित अभिनयदर्पण संपूर्णपणे पाठ करवून घेतले आणि ते दृश्य-श्राव्य स्वरूपात माझ्या माध्यमातून रंगमंचावर आणले. त्यामुळे मी स्वत:ला अत्यंत भाग्यशाली समजते. त्याकाळी केलेला हा प्रयोग म्हणजे एक विश्वविक्रमच होता जो आजतागायत कायम आहे.

त्यानंतर गुरूजींनी नाट्यशास्त्राचा 'रसाध्याय' (अध्याय ६) आणि 'भावाध्याय' (अध्याय ७) माझ्याकडून मुखोद्गत करवून घेतला आणि बक्षिसदेखील दिले. पुढील दोन वर्षात संपूर्ण नाट्यशास्त्राचे भाषांतरासह पाच वेळा वाचन करून घेतले. भारत सरकारच्या ज्युनियर फेलोशिपसाठी नाट्यशास्त्रातील सामान्याभिनयातील (अध्याय २४) शास्त्र आणि संप्रदायाचा संबंध मला समजावून सांगितला आणि नृत्यमंचन तयार केले. सन २००१ मध्ये पी.एच.डी. मिळाल्यानंतर गुरूजींनी अशी इच्छा व्यक्त केली की 'नाट्यशास्त्रावर आधारित ३८ संस्कृत ग्रंथांचा अभ्यास करून पी.एच.डी. मिळवलीस. आता अन्य संशोधनकार्याबरोबरच संपूर्ण नाट्यशास्त्राचा मराठीत अनुवाद करून महाराष्ट्राच्या नाट्यकर्मींना अर्पण कर.'

सन २००५ मध्ये भरत कॉलेज ऑफ फाईन आर्टस् ची प्राचार्या असताना संस्कृतचे विझिटींग प्रोफेसर म्हणून श्री. श्रीहरी गोकर्णकर यांच्याशी परिचय झाला. त्यांच्या सहयोगाने कुंभराजविरचित 'नृत्यरत्नकोषातील कलास करण' आणि शिवदासविरचित 'अभिनयलक्षण' या दोन ग्रंथांवर कार्य केले. परंतु मनात खंत होती ती गुरूजींनी सांगितलेल्या संपूर्ण नाट्यशास्त्राच्या मराठी अनुवादाची. एकदा मी हळूच त्याविषयी बोलले. आश्चर्याच्या उद्गाराने श्रीहरी म्हणाले, की नाट्यशास्त्राचे भाषांतर म्हणजे संपूर्ण नाट्याच्या विश्वकोषाचेच जणू हे कार्य आहे. केवळ दोघांना कसे शक्य होईल? त्यावर मी 'एकला चलो रे' हे गुरूजींचेच वाक्य सांगितले आणि आम्ही कामाला सुरूवात केली. नाट्यशास्त्राचे दोन अध्याय पूर्ण झाल्यावर गुरूजींना ते दाखवले. त्यांना अत्यंत आनंद झाला; परंतु श्रीहरी म्हणाले, की आपण अन्वयासह भाषांतर देऊया म्हणजे सर्व विद्यार्थ्यांना ते कळेल. विद्यार्थ्यांना सोपे जावे म्हणून पुढे त्यांनी पदच्छेदही

जोडण्याचा आग्रह केला. अशा रीतीने भरतमुनिविरचित नाट्यशास्त्राच्या मराठी अनुवादाला प्रत्यक्षात सुरुवात झाली.

अनुवाद करताना अनेक अडचणी आल्या. त्यात सर्वप्रथम अशी समस्या होती, की नाट्यशास्त्राच्या कुठल्या आवृत्तीचे भाषांतर करावे? चर्चेनंतर असे ठरले, की गायकवाड ओरियण्टल सीरिज, बडोदा यांनी प्रकाशित केलेल्या नाट्यशास्त्राचाच मराठी अनुवाद करावा. दुसरी समस्या अशी होती, की अन्य संस्करणांप्रमाणेच नाट्यशास्त्राच्या या संहितेमध्येही पाठभेद दिलेले आहेत. असे असताना पाठभेद स्वीकारावे की टाळावे? तेव्हा असे ठरले की, अर्थाच्या बाबतीत संभ्रम होऊ नये आणि प्रात्यक्षिक करताना अडचणी येऊ नयेत, म्हणून तर्कसंगत असाच पाठभेद गृहीत धरून अनुवाद करावा. भाषांतर करताना डॉ.पारसनाथ द्विवेदी संपादित आणि संपूर्णानंद संस्कृत विश्वविद्यालय, वाराणसी यांच्याद्वारे प्रकाशित नाट्यशास्त्राच्या आवृत्तीची अर्थाशी असणारी सयुक्तिकता आम्हांस अधिक भावली. त्यामुळे अनुवाद करताना या आवृत्तीचा प्रमुख आधार घेतला आहे. अनुवादासोबतच पदच्छेद आणि अन्वयही दिले आहेत. ज्याठिकाणी गद्य भाग आहे आणि केवळ नामावलीचा उल्लेख आहे तिथे अन्वय दिलेला नाही.जेव्हा जेव्हा अर्थ समजताना अडचण आली तेव्हा तेव्हा अभिनवगुप्ताचार्यविरचित 'अभिनवभारती' टीकेचा आधार घेतला आहे, त्यामुळे शास्त्राचा प्रयोगाशी संबंध जोडणे शक्य झाले आहे.

या ग्रंथाच्या प्रकाशनासाठी कविकुलगुरू कालिदास संस्कृत विश्वविद्यालयाच्या कुलगुरू डॉ. उमा वैद्य यांनी पुरोवाक् आणि इंदिरा गांधी नॅशनल सेंटर फॉर आर्टस् वाराणसीचे सल्लागार डॉ. के.डी.त्रिपाठी यांनी नान्दीवाक् लिहून आम्हांस प्रोत्साहन आणि आशीर्वाद दिल्याबद्दल आम्ही त्यांचे ऋणी आहोत. सोमैय्या कॉलेजच्या मराठी विभागप्रमुख डॉ. वीणा सानेकर यांनी मराठी भाषांतराच्या तपासणीची जबाबदारी स्वीकारली. श्री.उमेश जोशी व कु.अपूर्वा गोखले यांनी संस्कृत संहिता तपासणीची जबाबदारी चोख पार पाडली. श्रीमती सुनीता हिने मराठी टंकलेखनासाठी व श्रीमती भाग्यश्री पटेल यांनी अक्षरजुळवणीसाठी आम्हांस मदत केली. श्री. गौरव सावंत यांनी मुखपृष्ठ व रेखाचित्र काढण्याचे महत्त्वाचे कार्य करून आम्हांस सहयोग दिला. श्री.सरफोजी राजे भोसले रिसर्च सेंटरच्या व्यवस्थापक श्रीमती भावना शहा यांनी वेळोवेळी जशी गरज भासली तशा स्वरूपाची मदत त्वरित उपलब्ध करून दिली. त्याबद्दल आम्ही त्यांचे आभारी आहोत. भरत कॉलेज ऑफ फाईन आर्टस् ॲण्ड कल्चरचे सर्व कर्मचारी आणि सर्व विद्यार्थीसमूह यांच्या मदतीने नाट्यशास्त्राची प्रथम आवृत्ती आम्ही आपणांस उपलब्ध करून देत आहोत. या कार्यात ज्यांनी ज्यांनी प्रत्यक्ष वा अप्रत्यक्षपणे आम्हांस मदत केली त्या सर्वांना मन:पूर्वक धन्यवाद.

प्रस्तुत ग्रंथ प्रकाशित करण्याची स्वीकृती ज्यांनी दिली ते महाराष्ट्र राज्य साहित्य आणि संस्कृती मंडळाचे अध्यक्ष ज्येष्ठ साहित्यिक व प्रकाशक श्री.बाबा भांड यांचे आणि सचिव श्रीमती मिनल पाटील यांचे शतश: आभार.

डॉ. संध्या वीरसिंह पुरेचा

श्री. श्रीहरी वासुदेव गोकर्णकर

# नाट्यशास्त्राविषयी थोडेसे . . .

भारतीय साहित्यामध्ये नाट्यशास्त्रास महत्त्वपूर्ण स्थान आहे . या ग्रंथामध्ये नाट्याच्या विविध अंगांवर जितके सखोल विवेचन दिले आहे तितके कुठल्याही ग्रंथात सापडत नाही .

भरताने नाट्याला 'वेद' अशी संज्ञा दिली आहे . हा वेद सर्ववर्णीयांसाठी आहे . यामध्ये सर्व ज्ञान, कर्म, शिल्प, विद्या आणि कला समाविष्ट आहेत . भरताने नृत्य, गीत, वाद्य आणि अभिनय यांच्या एकत्रित सादरीकरणास 'नाट्य' ही संज्ञा दिली आहे . नाट्याच्या स्वरूपाचे विवेचन करताना भरताने अनुकरण (अनुकृती), अनुकीर्तन आणि अनुदर्शन या शब्दांचा वापर केला आहे . तीनही लोकातील भावांचे अनुकरण नाट्यात आहे म्हणून नाट्य हे अनुकीर्तन रूप आहे असे सांगितले आहे . यापुढे भरताने नाट्याची व्याख्या करताना सांगितले आहे, की अंग इ. चार अभिनयांनी (आंगिक-वाचिक-आहार्य-सात्त्विक यांनी) युक्त, लोकांच्या सुखदु:खात्मक स्वभावालाच 'नाट्य' असे म्हणतात .

नाट्यशास्त्राच्या सहाव्या अध्यायात कोहल मतानुसार नाट्याची ११ अंगे सांगितली आहेत . रस, भाव, अभिनय, धर्मी, वृत्ती, प्रवृत्ती, सिद्धी, स्वर, आतोद्य, गान आणि रंग हा नाट्यसंग्रह दिला आहे . नाट्यशास्त्राच्या ६ ते ३६ अध्यायांमध्ये या ११ नाट्य अंगांचे सविस्तर वर्णन दिले आहे . वस्तुत: नाट्याशी निगडित अशा सर्व विषयांचे विस्तृत विवेचन करणारे शास्त्र म्हणजे 'नाट्यशास्त्र' . भावार्थ असा, की नाट्यकलेविषयी संपूर्ण मार्गदर्शन देणारे शास्त्र म्हणजे 'नाट्यशास्त्र' होय . या नाट्यशास्त्राच्या निर्मितीसाठी अनेक देवता ऋषी, मुनी, आचार्यांचे योगदान आहे . हे विसरून चालणार नाही .

नाट्यशास्त्रकार भरतमुनींनी स्वत: नाट्यशास्त्रामध्ये अनेक वेळा दुसऱ्या नाट्याचार्यांचा उल्लेख केला आहे . 'नाट्योत्पत्ती' नावाच्या पहिल्या अध्यायात ब्रह्मा, शिव, पार्वती, स्वाती, नारद, कोहल, वात्स्य, शांडिल्य, दत्तिल यांचा उल्लेख आहे . करण आणि अंगहाराच्या निरूपणामध्ये तंडू आणि नंदी व इतर प्रसंगी कश्यप, बृहस्पती, बादरायण इ . नाट्याचार्यांचा उल्लेख सापडतो .

नाट्यशास्त्रामध्ये काही परंपरागत श्लोक आणि आर्या दिल्या आहेत . याचाच अर्थ भरताच्या आधी देखील नाट्याची परंपरा होती आणि त्याच्याच आधारे हे श्लोक नाट्यशास्त्रात उद्धृत केले आहेत .

- नाट्यशास्त्र रचणाऱ्या 'भरता' विषयी थोडेसे...

प्राचीन भारतीय साहित्यामध्ये 'भरत' शब्द जातिवाचक मानला गेला आहे . वैदिक काळामध्ये भरतांची वंशपरंपरा होती असे सांगतात . अमरकोष व अभिनवगुप्ताचार्यांच्या मते 'भरत' हा 'नट' या

शब्दाचा पर्यायवाची आहे जो वंशपरंपरेचा वाचक आहे. नाट्यशास्त्रामध्ये शेवटच्या अध्यायात भरतवंशाचा उल्लेख आढळतो. त्याच अध्यायात पुढे 'भरत' शब्दाची व्याख्या करताना असे सांगितले आहे, की विविध प्रकारच्या भूमिका करणारा तो 'भरत' होय. पुराण व इतिहासानुसार काही भरत होऊन गेले ते म्हणजे वृद्धभरत, नंदिभरत, कोहलभरत, दत्तिलभरत आणि मत्तंगभरत. तमिळ भाषेमध्ये 'पंचभरतम्' नावाची एक रचना आहे ज्यामध्ये असे नमूद केले आहे, की 'आदिभरत (वृद्धभरत), नंदिभरत, मत्तंगभरत, हनुमद्भरत आणि अर्जुनभरत असे पाच भरत होऊन गेले. हे सर्व नाट्य आणि संगीताचे आचार्य होते ज्यांनी नाट्य व संगीताविषयीचे ग्रंथ लिहिले आहेत.' थोडक्यात, 'नट' म्हणजेच 'भरत' होय. अशा नटाला किंवा भरताला नाट्यप्रयोगासाठी प्रशिक्षण देणारे शास्त्र म्हणजेच नाट्यशास्त्र ज्याला 'नटशास्त्र' किंवा 'भरतशास्त्र' असेही म्हटले जाते. 'नाट्यस्य नटवृत्तस्य शास्त्रं शासनोपायं ग्रन्थं नाट्यशास्त्रम्|' (नाट्यशास्त्र का इतिहास - पान क्र. ८७ - पारसनाथ द्विवेदी.)

- नाट्यशास्त्राचे स्वरूप आणि संस्करणे -

प्राचीन ग्रंथांमध्ये नाट्यशास्त्राच्या दोन प्रतींचा उल्लेख सापडतो. पहिल्या प्रतीमध्ये १२००० श्लोक आणि दुसऱ्या प्रतीमध्ये ६००० श्लोक आढळतात. प्राचीन ग्रंथांमध्ये असा उल्लेख सापडतो की १२००० श्लोकांचे नाट्यशास्त्र अस्तित्वात होते. परंतु सध्या ते उपलब्ध नाही. उपलब्ध नाट्यशास्त्रातील ३६ अध्यायामध्ये ६००० श्लोक आहेत. ह्यावर अभिनवगुप्ताचार्यांनी 'अभिनवभारती' नावाची टीका लिहिली आहे. नाट्यशास्त्राच्या वेगवेगळ्या हस्तलिखित प्रतींमध्ये अध्यायांची संख्या, श्लोकसंख्या आणि त्याचा क्रम यांत साम्यता दिसत नाही. नाट्यशास्त्राच्या काशी संस्करणामध्ये ३६ अध्याय आणि काव्यमाला संस्करणात ३७ अध्याय दिले आहेत. अभिनवगुप्ताच्या टीकेसह प्रकाशित गायकवाड ओरिएण्टल संस्करणात ३७ अध्याय दिले आहेत.

१८२६ ते १९२० पर्यंत पाश्चात्य विद्वान डॉ. एच.एच. विल्सन, जर्मन विद्वान हेमान, फ्रेंच विद्वान रेग्नो, ग्रोसे व सिल्वालेवी इत्यादींनी नाट्यशास्त्राचे काही अध्याय संस्कृतमध्ये प्रकाशित केले आणि नाट्यशास्त्र लोकांच्या दृष्टीस आणले.

१८९४ मध्ये काव्यमाला निर्णयसागर प्रेस, मुंबईहून ३७ अध्यायाचे पहिले भारतीय संस्करण प्रकाशित झाले. त्यानंतर १९४३ मध्ये निर्णयसागर प्रेस मुंबईद्वारे ३६ अध्याय असणाऱ्या नाट्यशास्त्राचे दुसरे संस्करण प्रकाशित झाले. १९२९-३० मध्ये चौखम्बा संस्कृत सीरिज, बनारस येथून ३६ अध्यायाचे नाट्यशास्त्र प्रसिद्ध झाले. १९२६ ते १९५४ मध्ये गायकवाड ओरिएण्टल संस्करण, बडोदा येथून 'अभिनवभारती' टीकेसह ३७ अध्याय असणाऱ्या नाट्यशास्त्राचे चार खंड प्रकाशित झाले.

१९५१ मध्ये डॉ.मनमोहन घोष यांचा अंग्रजी अनुवाद प्रकाशित झाला. त्यानंतर आचार्य विश्वेश्वर, के.डी. वाजपेयी, रघुवंश इ. विद्वानांनी नाट्यशास्त्राचा हिंदी अनुवाद प्रकाशित केला.

त्यापाठोपाठ, बाबुलाल शुक्ल शास्त्री, मधुसूदन शास्त्री, रेवाप्रसाद द्विवेदी यांचे हिंदी भाषांतर प्रकाशित झाले . श्री . आड्यारंगाचार्य, पुष्पेंद्र कुमार, डॉ . एन् . पी . उन्नी यांचे इंग्रजी भाषांतरही आढळते . या सर्व विद्वानांच्या मांदियाळीमध्ये श्री . पारसनाथ द्विवेदी यांनी केलेले कार्य उल्लेखनीयच म्हणावे लागेल कारण त्यांनी संपूर्ण नाट्यशास्त्राच्या अनुवादासह अभिनवगुप्ताचार्यरचित अभिनवभारतीचादेखील हिंदी अनुवाद 'मनोरमा' नामक स्वव्याख्येसह दिला आहे . त्यामुळे नाट्यशास्त्राचा मराठी अनुवाद करताना या त्रिवेणी संगम असणाऱ्या ग्रंथाचा प्रमुख आधार घेतला आहे .

प्रो . भानु, प्रा . र . प . कंगले, श्रीमती गोदावरी केतकर इ . विद्वानांनी नाट्यशास्त्राच्या काही अध्यायांचा मराठी अनुवाद आणि सारांश दिला आहे . परंतु संपूर्ण नाट्यशास्त्रातील श्लोकांचा शब्दश: मराठी अनुवाद कुठेच आढळत नाही . म्हणूनच विश्वातील सर्व नाट्यप्रेमी जनतेला हा अनुवाद समर्पित करीत आहोत .

- नाट्यशास्त्राची शैली आणि विषय

नाट्यशास्त्रामध्ये सूत्र, भाष्य, श्लोक, कारिका, निरूक्ती इ . सर्व प्राचीन लेखनपद्धती आढळतात . संपूर्ण नाट्यशास्त्र गद्य आणि पद्य ह्या दोन्ही प्रकारांत लिहिले गेले आहे . पद्यामध्ये मुख्यत: अनुष्टुप छंदांचा वापर आहे ; परंतु आर्या आणि उपजाती छंद हे थोड्या फार प्रमाणात दिसून येतात .

नाट्यशास्त्राच्या प्रथम अध्यायात नाट्योत्पत्तीचे वर्णन केले आहे . त्यात नाट्याचे स्वरूप आणि महत्त्व विशद केले आहे . दुसऱ्या अध्यायामध्ये नाट्यमंडप निर्मितीचे विधी आणि त्याचे विविध अंग तसेच नेपथ्यगृह, रंगपीठ, मत्तवारणी, स्तंभ इ . चे विवेचन आहे . तिसऱ्या अध्यायामध्ये, नाट्यमंडपाच्या रक्षणासाठी विविध देवतांचा पूजाविधी सांगितला आहे . चौथ्या अध्यायामध्ये तण्डूद्वारे ताण्डवनृत्याचे वर्ण न, १०८ करणे, अंगहारे व रेचकांची लक्षणे दिली आहेत . पूर्वरंगविधान नावाच्या पाचव्या अध्यायामध्ये नांदी, प्रस्तावना, ध्रुवा इ . विधींचे सांगोपांग वर्णन आहे . सहाव्या अध्यायात 'रस' या विषयाचे सविस्तर शास्त्रीय विवेचन आहे . सातव्या अध्यायात ४९ भावांचे स्पष्टीकरण दिले आहे . आठव्या अध्यायात, आंगिक, वाचिक, आहार्य व सात्त्विक असे अभिनयाचे चार भेद सांगितले आहेत . आंगिक अभिनयातील डोके, डोळे, भुवया, गाल, ओठ, तोंड, नाक, मान इ . उपांगांची लक्षणे सांगून त्यांचे सविस्तर विनियोग दिले आहेत . नवव्या अध्यायामध्ये, संयुत, असंयुत आणि नृत्तहस्तांचे विस्तृत विवेचन केले आहे . तसेच छाती, बाजू, कंबर, खांदा, पोटऱ्या तसेच पायांचे प्रकार व त्याचा अभिनयातील उपयोग समजावून सांगितला आहे . दहाव्या अध्यायामध्ये, आकाशी आणि भौमीचारींसह स्थानकांचे वर्णन केले आहे . अकराव्या अध्यायामध्ये चारींच्या संयोगाने निर्माण होणाऱ्या मंडलांची व्याख्या, त्यांचे विविध प्रकार आणि प्रयोगांची माहिती दिली आहे . बाराव्या अध्यायात, गतिप्रचारांचे वर्णन आहे. ह्यात पात्रांच्या विविध गतींचे वर्णन दिसून येते .

तेराव्या अध्यायामध्ये, कक्ष्याविभाग, प्रवृत्तिविधान आणि लोकधर्मी व नाट्यधर्मींचे स्पष्टीकरण केले आहे . चौदा ते एकोणीसाव्या अध्यायापर्यंत वाचिक अभिनयाचे संपूर्ण विवरण दिले आहे . चौदाव्या आणि पंधराव्या अध्यायात वाचिकाभिनयास उपयोगी व्याकरण, छंद व त्यांच्या प्रकारांचे वर्णन आहे . सोळाव्या अध्यायात, काव्य-लक्षण, अलंकार, दोष आणि गुणांची व्याख्या आढळते . सतराव्या अध्यायामध्ये, चार प्रकारच्या भाषा आणि सात प्रकारच्या विभाषांचे वर्णन केले आहे . यामध्ये काकू, स्वर, त्याचे प्रकार आणि पठनाच्या गुण-दोषांचे सूक्ष्म विवेचन केले आहे . अठराव्या अध्यायात दहा रूपकांचे विस्तृत वर्णन व दहा लास्यांगांविषयी माहिती दिली आहे . एकोणीसाव्या अध्यायामध्ये इतिवृत्त, संधि, पंच अवस्था, अर्थप्रकृती आणि अर्थोपक्षेकांची चर्चा केली आहे . विसाव्या अध्यायात वृत्ती आणि त्यांचा विनियोग याविषयी सांगितले आहे . एकविसाव्या 'आहार्याभिनय' नावाच्या अध्यायामध्ये नेपथ्य व त्यांचे प्रकार यांविषयीची माहिती आहे . बावीसाव्या अध्यायात सामान्य अभिनय सांगितला आहे . यामध्ये सात्त्विक भावांतर्गत स्त्रियांचे स्वभावज आणि अयत्नज अलंकार आणि हाव भाव हेला इ . अंगज अलंकर आणि शरीराभिनयाचे विस्तृत वर्णन केले आहे . यात कामाच्या दहा अवस्था, दूतीलक्षण आणि नायिकाभेदांचेही वर्णन आढळते . तेविसाव्या अध्यायात वैशिक पुरुषांची लक्षणे, त्यांचे मित्र आणि दूतींच्या शारिरीक चेष्टा, स्त्रियांच्या यौवनातील चार अवस्था, प्रेमीयुगुलांचे प्रकार, स्त्रियांना वश करण्याच्या युक्त्या याविषयी सविस्तर वर्णन केले आहे . चोविसाव्या अध्यायात स्त्रीपुरुषांच्या विविध शारिरीक हालचालींचे स्पष्टीकरण केले आहे .

पूर्वोक्त आंगिक अभिनयाच्या वेळी राहिलेल्या गोष्टींचे विवेचन 'चित्राभिनय' नावाच्या पंचविसाव्या अध्यायात केले आहे . सव्वीसाव्या अध्यायात पात्रांच्या विविध प्रकृती आणि विकृती यांविषयी सांगितले आहे . सत्तावीसाव्या अध्यायात दैवी आणि मानसी सिद्धींचे विवेचन आहे . अठ्ठावीस ते चौतीस अध्यायांमध्ये संगीतशास्त्राचे विस्तृत विवरण विशद केले आहे . त्यातील अठ्ठावीसाव्या अध्यायात चार प्रकारची वाद्ये, ग्राम, मूर्च्छना, श्रुती आणि जातींचे विवेचन केले आहे . एकोणतीसाव्या अध्यायात ततवाद्ये, वर्ण, अलंकार, गीत, धातू आणि वीणावादनाचे भेद सांगितले आहेत . तिसाव्या अध्यायात सुषिरवाद्यांचे विधिवत्वर्णन केले आहे . एकतिसाव्या अध्यायात ताल आणि लय यांच्या माहितीबरोबरच आसारित, वर्ध मानक आणि गीतविधींचे स्पष्टीकरण केले आहे . बत्तीसाव्या अध्यायात ध्रुवांचे विस्तृत वर्णन आहे . तेहतीसाव्या अध्यायात गायक आणि वादकांचे गुणदोष सांगितले आहेत . चौतीसाव्या अध्यायात चर्म वाद्यांचे वर्णन आहे . पस्तीसाव्या अध्यायात विविध भूमिका आणि भरत यांविषयी सांगितले आहे . छत्तीसाव्या आणि सदतीसाव्या अध्यायात नाट्याचे गुह्यतत्त्व विशद केले आहे .

***********

॥ श्री: ॥

# विषयानुक्रमणिका

## प्रथम अध्याय


| | श्लोक संख्या | पृष्ठ संख्या |
|---|---|---|
| सारांश | | **i – xvi** |
| नाट्याचा उगम | १ - १२७ | १-४२ |
| प्रतिज्ञा | १ | १ |
| नाट्यवेदाची उत्पत्ती, लक्षणे व प्रयोगाविषयी मुनींचे प्रश्न | २ - ५ | १ |
| भरतमुनींचे उत्तर - नाट्यवेदाच्या उत्पत्तीची कथा | ६ - १२ | २ |
| ब्रह्माद्वारे नाट्यवेदाची निर्मिती | १३ - २० | ५ |
| ब्रह्मा-इंद्र संवाद | २१ - २५ | ८ |
| शंभर पुत्रांची नावे | २६ - ४० | १० |
| तीन वृत्तींचा वापर | ४१ - ४४ | १४ |
| कैशिकीवृत्तीचा वापर | ४५ | १४ |
| अप्सरांची उत्पत्ती | ४६ | १५ |
| अप्सरांची नावे | ४७ - ४९ | १६ |
| नारद इ.ची गायनवादनासाठी नियुक्ती | ५० - ५२ | १७ |
| इंद्रध्वज महोत्सवात नाट्यवेदाचा प्रयोग | ५३ - ५८ | १७ |
| देवतांद्वारे साधनसामग्री देणे | ५९ - ६३ | १९ |
| विरूपाक्ष इ.द्वारे विघ्नांची निर्मिती | ६४ - ६८ | २१ |
| जर्जराची उत्पत्ती | ६९ - ७५ | २२ |
| विघ्नांच्या शांतीसाठी भरताची प्रार्थना | ७६ - ७८ | २४ |
| विश्वकर्म्याद्वारे नाट्यगृहाची निर्मिती | ७९ - ८२ | २५ |
| नाट्यमंडपाच्या रक्षणासाठी देवतादींची स्थापना | ८३ - ९८ | २६ |
| विघ्नांवर ब्रह्माने केलेला सामप्रयोग | ९९ - १०६ | ३१ |
| नाट्याचे स्वरूप आणि प्रयोजन | १०७ - १२४ | ३४ |
| रंगपूजेचे महत्त्व | १२५ - १२७ | ४१ |

## दुसरा अध्याय


| | श्लोक संख्या | पृष्ठ संख्या |
|---|---|---|
| प्रेक्षागृहाची लक्षणे | १ - १०५ | ४५-८२ |
| प्रेक्षागृहाविषयी मुनींनी विचारलेले प्रश्न | १ - ३ | ४५ |
| नाट्यगृहाची लक्षणे | ४ - ७ | ४६ |
| नाट्यगृहाचे तीन प्रकार | ८ - ११ | ४७ |
| नाट्यगृहाचे मोजमाप | १२ - २४ | ४९ |
| जमिनीचे विविध प्रकार | २५ - २६ | ५४ |
| दोरा हाताळण्यासंबंधीचे नियम | २७ - ३२ | ५५ |
| नाट्यगृहाचे विभाग | ३३ - ३४ | ५७ |
| मंडपाची स्थापना आणि भिंती उभारणे | ३५ - ४३ | ५८ |
| स्तंभस्थापनेचा विधी | ४४ - ६२ | ६१ |
| मत्तवारणी | ६३ - ६७ | ६७ |
| रंगपीठ आणि रंगशीर्ष | ६८ - ७४ | ६९ |
| लाकडाचे कोरीव काम | ७५ - ७८ | ७१ |
| भिंत उभारणे आणि तिचे सुशोभीकरण | ७९ - ८५ | ७३ |
| चतुरश्र नाट्यगृहाची लक्षणे | ८६ - १०० | ७५ |
| त्र्यश्र नाट्यगृहाची लक्षणे | १०१ - १०५ | ८० |


## तिसरा अध्याय


| | श्लोक संख्या | पृष्ठ संख्या |
|---|---|---|
| रंगदेवतेचे पूजन | १ - १०२ | ८५-११८ |
| देवतांना आवाहन | १ - ११ | ८५ |
| जर्जराची पूजा | १२ - १४ | ८८ |
| पूजाविधी | १५ - १७ | ८९ |
| देवतांची स्थापना व मंडलनिर्मिती | १८ - ३४ | ९० |
| देवतांचे पूजन आणि आहुती | ३५ - ७५ | ९५ |
| वाद्यपूजा | ७६ | १०९ |
| जर्जरपूजा | ७७ - ८१ | ११० |
| हवनाचा विधी | ८२ - ८७ | १११ |
| कुंभभेदनविधी | ८८ - ८९ | ११३ |
| रंगमंचप्रदीपनविधी | ९० - ९१ | ११४ |
| रंगपूजेची फलश्रुती | ९२ - १०२ | ११५ |

## चौथा अध्याय


| | श्लोक संख्या | पृष्ठ संख्या |
|---|---|---|
| तांडवलक्षणे | १ - ३२० | १२१-२३० |
| 'अमृतमंथन'- समवकाराचा प्रयोग | १ - ८ | १२१ |
| 'त्रिपुरादाह'- डिमचा प्रयोग | ९ - १२ | १२३ |
| शिव आणि ब्रह्माचा संवाद | १३ - १६ | १२५ |
| शिवाचा तंडूला आदेश | १७ - १८ | १२६ |
| अंगहारांची नावे | १९ - २७ | १२७ |
| अंगहार आणि करण | २८ - ३३ | १२९ |
| १०८ करणांची नावे | ३४ - ५५ | १३१ |
| करणांचा वापर | ५६ - ५९ | १३६ |
| सौष्ठव | ६० | १३७ |
| १. तलपुष्पपुट | ६१ | १३७ |
| २. वर्तित | ६२ | १३८ |
| ३. वलितोरूक | ६३ | १३८ |
| ४. अपविद्ध | ६४ | १३९ |
| ५. समनख | ६५ | १३९ |
| ६. लीन | ६६ | १३९ |
| ७. स्वस्तिकरेचित | ६७ | १४० |
| ८. मंडलस्वस्तिक | ६८ | १४० |
| ९. निकुट्टक | ६९ | १४१ |
| १०. अर्धनिकुट्टक | ७० | १४१ |
| ११. कटिच्छिन्न | ७१ | १४१ |
| १२. अर्धरेचित | ७२ | १४२ |
| १३. वक्ष:स्वस्तिक | ७३ | १४२ |
| १४. उन्मत्त | ७४ | १४३ |
| १५. स्वस्तिक | ७५ | १४३ |
| १६. पृष्ठस्वस्तिक | ७६ | १४३ |
| १७. दिक्स्वस्तिक | ७७ | १४४ |
| १८. अलातक | ७८ | १४४ |
| १९. कटीसम | ७९ | १४५ |

| | | | |
|---|---|---|---|
| २०. | आक्षिप्तरेचित | ८० | १४५ |
| २१. | विक्षिप्ताक्षिप्तक | ८१ | १४५ |
| २२. | अर्धस्वस्तिक | ८२ | १४६ |
| २३. | अंचित | ८३ | १४६ |
| २४. | भुजंगत्रासित | ८४ | १४७ |
| २५. | ऊर्ध्वजानु | ८५ | १४७ |
| २६. | निकुंचित | ८६ | १४७ |
| २७. | मत्तल्ली | ८७ | १४८ |
| २८. | अर्धमत्तल्ली | ८८ | १४८ |
| २९. | रेचितनिकुट्टित | ८९ | १४९ |
| ३०. | पादापविद्धक | ९० | १४९ |
| ३१. | वलित | ९१ | १४९ |
| ३२. | घूर्णित | ९२ | १५० |
| ३३. | ललित | ९३ | १५० |
| ३४. | दंडपक्ष | ९४ | १५१ |
| ३५. | भुजंगत्रस्तरेचित | ९५ | १५१ |
| ३६. | नूपुर | ९६ | १५१ |
| ३७. | वैशाखरेचित | ९७ | १५२ |
| ३८. | भ्रमरक | ९८ | १५२ |
| ३९. | चतुर | ९९ | १५३ |
| ४०. | भुजंगांचितक | १०० | १५३ |
| ४१. | दंडकरेचित | १०१ | १५३ |
| ४२. | वृश्चिककुट्टित | १०२ | १५४ |
| ४३. | कटिभ्रांत | १०३ | १५४ |
| ४४. | लतावृश्चिक | १०४ | १५५ |
| ४५. | छिन्न | १०५ | १५५ |
| ४६. | वृश्चिकरेचित | १०६ | १५५ |
| ४७. | वृश्चिक | १०७ | १५६ |
| ४८. | व्यंसित | १०८ | १५६ |
| ४९. | पार्श्वनिकुट्टित | १०९ | १५७ |
| ५०. | ललाटतिलक | ११० | १५७ |
| ५१. | क्रांतक | १११ | १५७ |

| | | | |
|---|---|---|---|
| ५२. | कुंचित | ११२ | १५८ |
| ५३. | चक्रमंडल | ११३ | १५८ |
| ५४. | उरोमंडल | ११४ | १५९ |
| ५५. | आक्षिप्त | ११५ | १५९ |
| ५६. | तलविलसित | ११६ | १५९ |
| ५७. | अर्गल | ११७ | १६० |
| ५८. | विक्षिप्त | ११८ | १६० |
| ५९. | आवर्त | ११९ | १६१ |
| ६०. | डोलापाद | १२० | १६१ |
| ६१. | विवृत्त | १२१ | १६१ |
| ६२. | विनिवृत्त | १२२ | १६२ |
| ६३. | पार्श्वक्रांत | १२३ | १६२ |
| ६४. | निस्तंभित | १२४ | १६३ |
| ६५. | विद्युद्भ्रांत | १२५ | १६३ |
| ६६. | अतिक्रांत | १२६ | १६३ |
| ६७. | विवर्तितक | १२७ | १६४ |
| ६८. | गजक्रीडितक | १२८ | १६४ |
| ६९. | तलसंस्फोटित | १२९ | १६५ |
| ७०. | गरुडप्लुत | १३० | १६५ |
| ७१. | गंडसूची | १३१ | १६५ |
| ७२. | परिवृत्त | १३२ | १६६ |
| ७३. | पार्श्वजानु | १३३ | १६६ |
| ७४. | गृध्रावलीनक | १३४ | १६७ |
| ७५. | सन्नत | १३५ | १६७ |
| ७६. | सूची | १३६ | १६७ |
| ७७. | अर्धसूची | १३७ | १३८ |
| ७८. | सूचीविद्ध | १३८ | १६८ |
| ७९. | अपक्रांत | १३९ | १६९ |
| ८०. | मयूरललित | १४० | १६९ |
| ८१. | सर्पित | १४१ | १६९ |
| ८२. | दंडपाद | १४२ | १७० |
| ८३. | हरिणप्लुत | १४३ | १७० |

| | | | |
|---|---|---|---|
| ८४. | प्रेंखोलित | १४४ | १७१ |
| ८५. | नितंब | १४५ | १७१ |
| ८६. | स्खलित | १४६ | १७१ |
| ८७. | करिहस्तक | १४७ | १७२ |
| ८८. | प्रसर्पितक | १४८ | १७२ |
| ८९. | सिंहविक्रीडित | १४९ | १७३ |
| ९०. | सिंहाकर्षित | १५० | १७३ |
| ९१. | उद्वृत्त | १५१ | १७३ |
| ९२. | उपसृतक (अपसृत) | १५२ | १७४ |
| ९३. | तलसंघट्टित | १५३ | १७४ |
| ९४. | जनित | १५४ | १७५ |
| ९५. | अवहित्थ | १५५ | १७५ |
| ९६. | निवेश | १५६ | १७५ |
| ९७. | एलकाक्रीडित | १५७ | १७६ |
| ९८. | ऊरूद्वृत्त | १५८ | १७६ |
| ९९. | मदस्खलित | १५९ | १७७ |
| १००. | विष्णुक्रांत | १६० | १७७ |
| १०१. | संभ्रांत | १६१ | १७७ |
| १०२. | विष्कंभ | १६२ | १७८ |
| १०३. | उद्घट्टित | १६३ | १७८ |
| १०४. | वृषभक्रीडित | १६४ | १७९ |
| १०५. | लोलित | १६५ | १७९ |
| १०६. | नागापसर्पित | १६६ | १७९ |
| १०७. | शकटास्य | १६७ | १८० |
| १०८. | गंगावतरण | १६८ | १८० |
| अंगहार व त्यांची लक्षणे | | १६९-१७३ | १८१ |
| १. | स्थिरहस्त | १७४-१७६ | १८२ |
| २. | पर्यस्तक | १७७-१७८ | १८३ |
| ३. | सूचीविद्ध | १७९-१८० | १८४ |
| ४. | अपविद्ध | १८१-१८२ | १८४ |
| ५. | आक्षिप्तक | १८३-१८४ | १८५ |
| ६. | उद्घट्टित | १८५-१८६ | १८६ |
| ७. | विष्कंभ | १८७-१८९ | १८६ |

| | | | |
|---|---|---|---|
| ८. | अपराजित | १९०-१९१ | १८७ |
| ९. | विष्कंभापसृत | १९२-१९३ | १८८ |
| १०. | मत्ताक्रीड | १९४-१९६ | १८८ |
| ११. | स्वस्तिकरेचित | १९७-१९८ | १८९ |
| १२. | पार्श्वस्वस्तिक | १९९-२०१ | १९० |
| १३. | वृश्चिकापसृत | २०२-२०३ | १९१ |
| १४. | भ्रमर | २०४-२०५ | १९१ |
| १५. | मत्तस्खलित | २०६-२०७ | १९२ |
| १६. | मदविलसित | २०८-२०९ | १९३ |
| १७. | गतिमंडल | २१०-२११ | १९३ |
| १८. | परिच्छिन्न | २१२-२१३ | १९४ |
| १९. | परिवृत्तकरेचित | २१४-२१७ | १९५ |
| २०. | वैशाखरेचित | २१८-२२० | १९६ |
| २१. | परावृत्त | २२१-२२२ | १९७ |
| २२. | अलातक | २२३-२२४ | १९७ |
| २३. | पार्श्वच्छेद | २२५-२२६ | १९८ |
| २४. | विद्युद्भ्रांत | २२७-२२८ | १९९ |
| २५. | उद्वृत्तक | २२९-२३० | १९९ |
| २६. | आलीढ | २३१-२३२ | २०० |
| २७. | रेचित | २३३-२३४ | २०१ |
| २८. | आच्छुरित | २३५-२३६ | २०१ |
| २९. | आक्षिप्तरेचित | २३७-२३९ | २०२ |
| ३०. | संभ्रांत | २४०-२४२ | २०३ |
| ३१. | अपसर्पित | २४३-२४४ | २०४ |
| ३२. | अर्धनिकुट्टक | २४५-२४७ | २०४ |
| रेचकाचे प्रकार | | २४८-२४९ | २०५ |
| पादरेचक | | | |
| कटिरेचक | | | |
| हस्तरेचक | | | |
| कंठरेचक (ग्रीवारेचक) | | | |
| पिंडीबंधांचा क्रम, नावे आणि लक्षणे | | २४९-२५८ | २०७ |
| तांडवलक्षण | | २५९-२६० | २१० |
| ऋषींचे प्रश्न | | २६१-२६२ | २११ |

| | | |
|---|---|---|
| नृत्ताचे प्रयोजन आणि प्रयोग | २६३-२६८ | २११ |
| वर्धमानकाचे लक्षण | २६९-२७० | २१३ |
| आसारिताचा प्रयोग आणि नर्तकी कर्म | २७१-२८० | २१४ |
| पिंडीबंधांचा प्रयोग | २८१-२९१ | २१७ |
| गीतछंदकविधी आणि लक्षणे | २९२-२९७ | २२० |
| वाद्यविधी | २९८-३०१ | २२२ |
| सुकुमारनृत्तविधी | ३०२-३१२ | २२५ |
| भांडवाद्यविधी | ३१३-३२० | २२८ |


## पाचवा अध्याय


| | श्लोक संख्या | पृष्ठ संख्या |
|---|---|---|
| पूर्वरंगविधी | १-१७४ | २३३-३०८ |
| ऋषींचे प्रश्न | १-५ | २३३ |
| पूर्वरंगाची लक्षणे | ६-७ | २३४ |
| पूर्वरंगाची विविध अंगे | ८-१६ | २३५ |
| प्रत्याहार | १७ | २३८ |
| अवतरण | १७ | २३८ |
| आरंभ | १८ | २३८ |
| आश्रावणा | १८ | २३८ |
| वक्त्रपाणि | १९ | २३८ |
| परिघट्टना | १९ | २३८ |
| संघोटना | २० | २३९ |
| मार्गासारित | २० | २३९ |
| आसारित | २१ | २३९ |
| गीतक | २१ | २३९ |
| उत्थापन | २२ | २४० |
| परिवर्तन | २३ | २४० |
| नांदी | २४ | २४० |
| शुष्कावकृष्टा | २५ | २४१ |
| रंगद्वार | २६ | २४१ |
| चारी | २७ | २४२ |
| महाचारी | २७ | २४२ |
| त्रिगत | २८ | २४२ |

| | | |
|---|---|---|
| प्ररोचना | २९ | २४२ |
| निर्गीतोत्पत्ति आणि प्रयोजन | ३०-४४ | २४३ |
| देव-दानव-दैत्यादींची संतुष्टी | ४५-५६ | २४७ |
| ध्रुवा | ५७-५९ | २५१ |
| उत्थापनी ध्रुवा | ५९-६३ | २५२ |
| परिवर्त | ६४-८७ | २५४ |
| परिवर्तिनी ध्रुवा | ८८-९८ | २६१ |
| चौथे परिवर्त करणाऱ्याचा प्रवेश | ९९-१०२ | २६५ |
| अवकृष्टा ध्रुवा | १०३-१०५ | २६६ |
| नांदीपठण | १०४-१०९ | २६७ |
| शुष्कावकृष्टा | ११०-११५ | २६९ |
| अड्डिता ध्रुवा | ११६-१२३ | २७१ |
| महाचारी | १२४ | २७४ |
| चतुरश्रा ध्रुवा | १२५-१३२ | २७४ |
| त्रिगत | १३३-१३४ | २७७ |
| प्ररोचना | १३५-१३७ | २७८ |
| शुद्ध त्र्यश्र पूर्वरंग | १३८-१३९ | २७९ |
| उत्थापन आणि उत्थापनी ध्रुवा | १४०-१४८ | २८० |
| चित्रपूर्वरंग | १४९-१६१ | २८३ |
| स्थापक | १६२-१६९ | २८९ |
| पूर्वरंगविधीची फलश्रुती | १७०-१७४ | २९१ |
| प्रक्षिप्त-भाग | | २९४-२९७ |
| ध्रुवांचे नियम, भेद आणि उदाहरणे | | २९४ |
| उपोहनविधिक्रिया | | २९५ |
| कलांचा प्रयोग | | २९६ |
| गीतिंचा प्रयोग | | २९७ |
| मिश्रपूर्वरंग | | २९७ |
| उत्थापनी ध्रुवा | | २९९ |
| परिवर्तिनी ध्रुवा | | ३०० |
| अवकृष्टा ध्रुवा | | ३०२ |
| अड्डिता ध्रुवा | | ३०४ |
| विक्षिप्तका ध्रुवा | | ३०६ |
| उपसंहार | | ३०८ |

## सहावा अध्याय


| | श्लोक संख्या | पृष्ठ संख्या |
|---|---|---|
| रसाध्याय | १-८३ | ३११-३५८ |
| मुनींचे प्रश्न | १-३ | ३११ |
| भरतमुनींचे उत्तर | ४-७ | ३१२ |
| संग्रह | ८- १० | ३१३ |
| कारिका | ११ | ३१४ |
| निरूक्त | १२-१४ | ३१५ |
| रस | १५ - १६ | ३१६ |
| स्थायी भाव | १७ | ३१६ |
| व्यभिचारी भाव | १८-२१ | ३१७ |
| सात्त्विक भाव | २२ | ३१८ |
| चतुर्विध अभिनय | २३ | ३१८ |
| धर्मी | २४ | ३१९ |
| वृत्ती | २५ | ३१९ |
| प्रवृत्ती | २६ | ३१९ |
| सिद्धि | २६ | ३१९ |
| स्वर | २७ | ३२० |
| चार प्रकारची वाद्ये | २८ | ३२० |
| पाच प्रकारची गीते | २९ | ३२१ |
| नाट्य गृह | ३० | ३२१ |
| 'रस' संकल्पनेचे विवेचन | ३२-३३ | ३२२ |
| रससूत्र | ३४ | ३२४ |
| रस आणि भावांचा संबंध | ३५-३८ | ३२५ |
| रसांचा उत्पाद्य-उत्पादकभाव | ३९-४१ | ३२७ |
| रसांचे रंग | ४२-४३ | ३२८ |
| रसांच्या देवता | ४४-४५ | ३२८ |
| शृंगार रस | ४६-४८ | ३२९ |
| हास्य रस | ४९-६१ | ३३४ |
| करूण रस | ६२-६३ | ३४० |
| रौद्र रस | ६४-६६ | ३४२ |
| वीर रस | ६७ -६८ | ३४६ |
| भयानक रस | ६९-७२ | ३४७ |

| | | |
|---|---|---|
| बीभत्स रस | ७३-७४ | ३५० |
| अद्भुत रस | ७५-७६ | ३५२ |
| रसांचे विविध प्रकार | ७७-८२ | ३५३ |
| शांतरस | -- | ३५५ |
| उपसंहार | ८३ | ३५८ |


## सातवा अध्याय


| | श्लोक संख्या | पृष्ठ संख्या |
|---|---|---|
| भावाध्याय | १-१२१ | ३६१-४४६ |
| भावांचे स्वरूप | १-३ | ३६१ |
| विभाव आणि अनुभाव | ४ - ६ | ३६३ |
| भावांचे प्रकार | ७ | ३६६ |
| स्थायी भाव | ८ | ३६७ |
| रती | ९ | ३६९ |
| हास | १० | ३७० |
| शोक | ११-१४ | ३७१ |
| क्रोध | १५-२० | ३७३ |
| उत्साह | २१ | ३७६ |
| भय | २२-२५ | ३७७ |
| जुगुप्सा | २६ | ३७९ |
| विस्मय | २७ | ३८० |
| व्यभिचारी भाव | | ३८१ |
| निर्वेद | २८-३० | ३८२ |
| ग्लानी | ३१-३२ | ३८४ |
| शंका | ३३-३५ | ३८५ |
| असूया | ३६-३७ | ३८८ |
| मद | ३८-४६ | ३८९ |
| श्रम | ४७ | ३९३ |
| आलस्य | ४८ | ३९४ |
| दैन्य | ४९ | ३९५ |
| चिंता | ५०-५१ | ३९६ |
| मोह | ५२-५३ | ३९७ |
| स्मृती | ५४-५५ | ३९८ |

| | | |
|---|---|---|
| धृती | ५६-५७ | ३९९ |
| व्रीडा | ५८-५९ | ४०१ |
| चपलता | ६० | ४०२ |
| हर्ष | ६१-६२ | ४०३ |
| आवेग | ६३-६५ | ४०४ |
| जडता | ६६ | ४०८ |
| गर्व | ६७ | ४०९ |
| विषाद | ६८-६९ | ४१० |
| औत्सुक्य | ७० | ४११ |
| निद्रा | ७१-७२ | ४१२ |
| अपस्मार | ७३-७४ | ४१४ |
| सुप्त | ७५-७६ | ४१५ |
| विबोध | ७७ | ४१६ |
| अमर्ष | ७८-७९ | ४१७ |
| अवहित्थ | ८० | ४१९ |
| उग्रता | ८१ | ४२० |
| मती | ८२ | ४२० |
| व्याधि | ८३ | ४२१ |
| उन्माद | ८४-८५ | ४२३ |
| मरण | ८६-९० | ४२४ |
| त्रास | ९१ | ४२८ |
| वितर्क | ९२ | ४२९ |
| सात्त्विक भाव | ९३ | ४३० |
| सात्त्विक भावांचे प्रकार | ९४ | ४३२ |
| स्वेद | ९५ | ४३२ |
| स्तंभ | ९६ | ४३३ |
| कंप | ९६ | ४३३ |
| अश्रु | ९७ | ४३३ |
| वैवर्ण्य | ९८ | ४३४ |
| रोमांच | ९८ | ४३४ |
| स्वरभेद | ९९ | ४३४ |
| प्रलय | ९९ | ४३४ |
| सात्त्विकभावांचे विनियोग | १००-१०७ | ४३५ |

| | | |
|---|---|---|
| एकूण भाव | १०८ | ४३७ |
| भावांचा रसामध्ये विनियोग | १०९ -११८ | ४३९ |
| रस आणि भाव यांचा प्रयोगविधि | ११९-१२१ | ४४२ |


## आठवा अध्याय


| | श्लोक संख्या | पृष्ठ |
|---|---|---|
| उपांगाभिनय | १-१७९ | ४४९-५१४ |
| ऋषींचे प्रश्न आणि भरतमुनींचे उत्तर | १-५ | ४४९ |
| अभिनय शब्दाची निरुक्ती | ६-७ | ४५० |
| अभिनयाचे प्रकार | ८-१० | ४५२ |
| आंगिक अभिनयाचे तीन प्रकार | ११ | ४५३ |
| अंग आणि उपांगे | १२ - १३ | ४५३ |
| अभिनयातील शाखा, नृत्त आणि अंकुर | १४ - १५ | ४५४ |
| शीर्षाभिनयाचे प्रकार | १६-१८ | ४५५ |
| आकंपित आणि कंपिताचे लक्षण | १९-२० | ४५६ |
| आकंपिताचा विनियोग | २१ | ४५७ |
| कंपिताचा विनियोग | २२ | ४५७ |
| धुत आणि विधुताचे लक्षण | २३ | ४५७ |
| धुत शीर्षाचे विनियोग | २४ | ४५८ |
| विधुत शीर्षाचे विनियोग | २५ | ४५८ |
| परिवाहित आणि आधूत शीर्षाचे लक्षण | २६ | ४५८ |
| परिवाहित शीर्षाचा विनियोग | २७ | ४५९ |
| आधूत शीर्षाचा विनियोग | २८ | ४५९ |
| अवधूत शीर्षाचे लक्षण आणि विनियोग | २९ | ४६० |
| अंचित शीर्षाचे लक्षण आणि विनियोग | ३० | ४६० |
| निहंचित शीर्षाचे लक्षण आणि विनियोग | ३१-३२ | ४६१ |
| परावृत्त शीर्षाचे लक्षण आणि विनियोग | ३३ | ४६१ |
| उत्क्षिप्त शीर्षाचे लक्षण आणि विनियोग | ३४ | ४६२ |
| अधोगत शीर्षाचे लक्षण आणि विनियोग | ३५ | ४६२ |
| लोलित शीर्षाचे लक्षण आणि विनियोग | ३६ | ४६२ |
| स्वभावज शीर्षाचे लक्षण आणि विनियोग | ३७-३८ | ४६३ |
| दृष्टींचे प्रकार आणि लक्षणे | ३९- ४४ | ४६४ |
| रसदृष्टी | ४० | ४६४ |
| स्थायिभावदृष्टी | ४१ | ४६४ |

| | | |
|---|---|---|
| व्यभिचारिभाव दृष्टी | ४२-४४ | ४६५ |
| रसदृष्टींची लक्षणे | ४५ | ४६६ |
| शृंगार दृष्टी | ४६ | ४६६ |
| भीता दृष्टी | ४७ | ४६६ |
| हास्या दृष्टी | ४८ | ४६७ |
| करुणा दृष्टी | ४९ | ४६७ |
| अद्भुता दृष्टी | ५० | ४६८ |
| रौद्री दृष्टी | ५१ | ४६८ |
| वीरा दृष्टी | ५२ | ४६८ |
| बीभत्सा दृष्टी | ५३ | ४६९ |
| शान्ता दृष्टी | ५४ | ४६९ |
| स्थायिभाव दृष्टी | ५५ | ४७० |
| स्निग्धा दृष्टी | ५६ | ४७० |
| हृष्ता दृष्टी | ५७ | ४७१ |
| दीना दृष्टी | ५८ | ४७१ |
| क्रुद्धा दृष्टी | ५९ | ४७१ |
| दृप्ता दृष्टी | ६० | ४७२ |
| भयान्विता दृष्टी | ६१ | ४७२ |
| जुगुप्सिता दृष्टी | ६२ | ४७३ |
| विस्मिता दृष्टी | ६३ | ४७३ |
| व्यभिचारिभाव दृष्टी | ६४ | ४७४ |
| शून्या दृष्टी | ६५ | ४७४ |
| मलिना दृष्टी | ६६ | ४७४ |
| श्रांता दृष्टी | ६७ | ४७५ |
| लज्जान्विता दृष्टी | ६८ | ४७५ |
| ग्लाना दृष्टी | ६९ | ४७६ |
| शंकिता दृष्टी | ७० | ४७६ |
| विषादिनीदृष्टी | ७१ | ४७६ |
| मुकुला दृष्टी | ७२ | ४७७ |
| कुंचिता दृष्टी | ७३ | ४७७ |
| अभितप्ता दृष्टी | ७४ | ४७८ |
| जिह्मा दृष्टी | ७५ | ४७८ |
| ललिता दृष्टी | ७६ | ४७९ |

| | | |
|---|---|---|
| वितर्किता दृष्टी | ७७ | ४७९ |
| अर्धमुकुला दृष्टी | ७८ | ४७९ |
| विभ्रांता दृष्टी | ७९ | ४८० |
| विप्लुता दृष्टी | ८० | ४८० |
| आकेकरा दृष्टी | ८१ | ४८१ |
| विकोशा दृष्टी | ८२ | ४८१ |
| त्रस्ता दृष्टी | ८३ | ४८१ |
| तरुणमदातील मदिरा दृष्टी | ८४ | ४८२ |
| मध्यमदातील मदिरा दृष्टी | ८५ | ४८२ |
| अधममदातील मदिरा दृष्टी | ८६-८७ | ४८३ |
| शून्यादी दृष्टींचा रसादींमध्ये विनियोग | ८८-९६ | ४८३ |
| बुबुळांचे नऊ प्रकार | ९७-९८ | ४८७ |
| बुबुळांची लक्षणे | ९९-१०१ | ४८८ |
| बुबुळांचे विनियोग | १०२-१०५ | ४८९ |
| दर्शनांचे प्रकार आणि लक्षणे | १०६-११० | ४९० |
| पापण्यांचे प्रकार | १११-११४ | ४९२ |
| पापण्यांचे विनियोग | ११५-११८ | ४९३ |
| भुवयांचे प्रकार | ११९-१२३ | ४९४ |
| भुवयांचे विनियोग | १२४-१३० | ४९६ |
| नाकाचे विविध प्रकार | १३१-१३३ | ४९८ |
| नाकाचे विनियोग | १३४-१३६ | ४९९ |
| गालाचे प्रकार | १३७-१३९ | ५०० |
| गालाचे विनियोग | १४०-१४१ | ५०१ |
| अधरोष्ठाचे प्रकार | १४२-१४४ | ५०२ |
| अधरोष्ठाचे विनियोग | १४५-१४७ | ५०३ |
| हनुवटीचे प्रकार | १४८-१५० | ५०३ |
| हनुवटीचे विनियोग | १५१-१५३ | ५०५ |
| मुखजाचे प्रकार | १५४-१५६ | ५०६ |
| मुखजाचे विनियोग | १५७-१६१ | ५०७ |
| मुखरागाचे प्रकार | १६२ | ५०८ |
| मुखरागाचे विनियोग | १६३-१६५ | ५०९ |
| मुखरागाचे महत्त्व | १६६-१७० | ५१० |
| ग्रीवाप्रकार, लक्षणे व विनियोग | १७१-१७७ | ५११ |

## नववा अध्याय


| | श्लोक संख्या | पृष्ठ |
|---|---|---|
| अंगाभिनय | १-२८३ | ५१७-६२० |
| हस्ताभिनय | १-३ | ५१७ |
| असंयुतहस्ताचे प्रकार | ४-७ | ५१८ |
| संयुतहस्ताचे प्रकार | ८-१० | ५१९ |
| नृत्तहस्ताचे प्रकार | ११-१७ | ५१९ |
| असंयुतहस्ताची लक्षणे आणि विनियोग | | ५२१ |
| पताकहस्ताचे लक्षण | १८ | ५२१ |
| पताकहस्ताचे विनियोग | १९-२७ | ५२२ |
| त्रिपताकहस्ताचे लक्षण | २८ | ५२५ |
| त्रिपताकहस्ताचे विनियोग | २९-३८ | ५२५ |
| कर्त्तरीमुखहस्ताचे लक्षण | ३९ | ५२८ |
| कर्त्तरीमुखहस्ताचे विनियोग | ४०-४२ | ५२९ |
| अर्धचंद्रहस्ताचे लक्षण | ४३ | ५३० |
| अर्धचंद्रहस्ताचे विनियोग | ४४-४५ | ५३० |
| अरालहस्ताचे लक्षण | ४६ | ५३१ |
| अरालहस्ताचे विनियोग | ४७-५२ | ५३२ |
| शुकतुंडहस्ताचे लक्षण | ५३ | ५३३ |
| शुकतुंडहस्ताचे विनियोग | ५४ | ५३४ |
| मुष्टिहस्ताचे लक्षण | ५५ | ५३४ |
| मुष्टिहस्ताचे विनियोग | ५६ | ५३५ |
| शिखरहस्ताचे लक्षण | ५७ | ५३५ |
| शिखरहस्ताचे विनियोग | ५८ | ५३६ |
| कपित्थहस्ताचे लक्षण | ५९ | ५३६ |
| कपित्थहस्ताचे विनियोग | ६० | ५३६ |
| खटकामुखहस्ताचे लक्षण | ६१ | ५३७ |
| खटकामुखहस्ताचे विनियोग | ६२-६४ | ५३७ |
| सूचीमुखहस्ताचे लक्षण | ६५ | ५३८ |
| सूचीमुखहस्ताचे विनियोग | ६६-७९ | ५३८ |
| पद्मकोशहस्ताचे लक्षण | ८० | ५४४ |
| पद्मकोशहस्ताचे विनियोग | ८१-८४ | ५४४ |

| | | |
|---|---|---|
| सर्पशीर्षहस्ताचे लक्षण | ८५ | ५४५ |
| सर्पशीर्षहस्ताचे विनियोग | ८६ | ५४६ |
| मृगशीर्षकहस्ताचे लक्षण | ८७ | ५४६ |
| मृगशीर्षकहस्ताचे विनियोग | ८८ | ५४६ |
| कांगुलहस्ताचे लक्षण | ८९ | ५४७ |
| कांगुलहस्ताचे विनियोग | ९०-९१ | ५४७ |
| अलपल्लवहस्ताचे लक्षण | ९२ | ५४८ |
| अलपल्लवहस्ताचे विनियोग | ९३ | ५४८ |
| चतुरहस्ताचे लक्षण | ९४ | ५४९ |
| चतुरहस्ताचे विनियोग | ९५-१०१ | ५४९ |
| भ्रमरहस्ताचे लक्षण | १०२ | ५५२ |
| भ्रमरहस्ताचे विनियोग | १०३-१०४ | ५५२ |
| हंसवक्त्रहस्ताचे लक्षण | १०५ | ५५३ |
| हंसवक्त्रहस्ताचे विनियोग | १०६ | ५५३ |
| हंसपक्षहस्ताचे लक्षण | १०७ | ५५४ |
| हंसपक्षहस्ताचे विनियोग | १०८-११० | ५५४ |
| संदंशहस्ताचे लक्षण | १११ | ५५५ |
| संदंशहस्ताचे विनियोग | ११२-११७ | ५५५ |
| मुकुलहस्ताचे लक्षण | ११८ | ५५८ |
| मुकुलहस्ताचे विनियोग | ११९-१२० | ५५८ |
| ऊर्णनाभहस्ताचे लक्षण | १२१ | ५५९ |
| ऊर्णनाभहस्ताचे विनियोग | १२२ | ५५९ |
| ताम्रचूडहस्ताचे लक्षण | १२३ | ५६० |
| ताम्रचूडहस्ताचे विनियोग | १२४-१२५ | ५६० |
| अन्यमतानुसार ताम्रचूडहस्ताचे लक्षण आणि विनियोग | १२६-१२७ | ५६१ |
| संयुतहस्ताची लक्षणे आणि विनियोग | १२८ | ५६२ |
| अंजलिहस्ताचे लक्षण | १२९ | ५६२ |
| अंजलिहस्ताचे विनियोग | १२९-१३० | ५६२ |
| कपोतहस्ताचे लक्षण | १३१ | ५६३ |
| कपोतहस्ताचे विनियोग | १३२-१३३ | ५६३ |
| कर्कटहस्ताचे लक्षण | १३४ | ५६४ |
| कर्कटहस्ताचे विनियोग | १३५ - अ | ५६४ |

| | | |
|---|---|---|
| स्वस्तिकहस्ताचे लक्षण | १३५ - ब | ५६५ |
| स्वस्तिकहस्ताचे विनियोग | १३६ | ५६५ |
| खटकावर्धमानकाचे लक्षण आणि विनियोग | १३७ - १३८ | ५६६ |
| उत्संगहस्ताचे लक्षण | १३९ | ५६६ |
| उत्संगहस्ताचे विनियोग | १४० | ५६७ |
| निषधहस्ताचे लक्षण | १४१ | ५६७ |
| निषधहस्ताचे विनियोग | १४२-१४७ | ५६७ |
| दोलाहस्ताचे लक्षण | १४८ | ५७० |
| दोलाहस्ताचे विनियोग | १४९ | ५७० |
| पुष्पपुटहस्ताचे लक्षण | १५० | ५७० |
| पुष्पपुटहस्ताचे विनियोग | १५१ | ५७१ |
| मकरहस्ताचे लक्षण | १५२ | ५७१ |
| मकरहस्ताचे विनियोग | १५३ | ५७२ |
| गजदंतहस्ताचे लक्षण | १५४ | ५७२ |
| गजदंतहस्ताचे विनियोग | १५५ | ५७२ |
| अवहित्थहस्ताचे लक्षण | १५६ | ५७३ |
| अवहित्थहस्ताचे विनियोग | १५७ | ५७३ |
| वर्धमानहस्ताचे लक्षण | १५८ | ५७४ |
| वर्धमानहस्ताचे अन्य लक्षण | – | ५७४ |
| वर्धमानहस्ताचे विनियोग | १५९ | ५७५ |
| उपसंहार | १६० | ५७५ |
| हस्ताभिनयाविषयी थोडेसे | १६१-१६४ | ५७५ |
| हस्तांच्या विविध क्रिया | १६५-१६८ | ५७७ |
| हस्तप्रचार | १६९-१७० | ५७८ |
| हस्तांची कार्यस्थाने | १७१ | ५७९ |
| हस्ताभिनयाचे विधी | १७२ - १८१ | ५७९ |
| नृत्तहस्ताची लक्षणे आणि विनियोग | १८२-१८३ | ५८३ |
| चतुरश्र नृत्तहस्ताचे लक्षण | १८४ | ५८३ |
| उद्वृत्त नृत्तहस्ताचे लक्षण | १८५ | ५८४ |
| तलमुख नृत्तहस्ताचे लक्षण | १८६ | ५८४ |
| स्वस्तिक नृत्तहस्ताचे लक्षण | १८७ | ५८५ |
| विप्रकीर्ण नृत्तहस्ताचे लक्षण | १८७ | ५८५ |

| | | |
|---|---|---|
| अरालखटकामुखचे लक्षण | १८८ | ५८५ |
| अन्यमतानुसार अरालखटकामुखाचे लक्षण | १८९ | ५८५ |
| आविद्धवक्र नृत्तहस्ताचे लक्षण | १९० | ५८६ |
| सूचीमुख नृत्तहस्ताचे लक्षण | १९१ | ५८६ |
| अन्यमतानुसार सूचीमुखाचे लक्षण | १९२ | ५८७ |
| रेचित नृत्तहस्ताचे लक्षण | १९३ | ५८७ |
| अर्धरेचित हस्ताचे लक्षण | १९४ | ५८८ |
| उत्तानवंचित नृत्तहस्ताचे लक्षण | १९५ | ५८८ |
| पल्लव नृत्तहस्ताचे लक्षण | १९६ | ५८८ |
| नितंब नृत्तहस्ताचे लक्षण | १९६ | ५८८ |
| केशबंध नृत्तहस्ताचे लक्षण | १९७ | ५८९ |
| लताहस्ताचे लक्षण | १९८ | ५८९ |
| करिहस्ताचे लक्षण | १९९ | ५९० |
| पक्षवंचितकहस्ताचे लक्षण | २०० | ५९० |
| पक्षप्रद्योतकहस्ताचे लक्षण | २०१ | ५९० |
| गरुडपक्षहस्ताचे लक्षण | २०१ | ५९० |
| दंडपक्षहस्ताचे लक्षण | २०२ | ५९१ |
| ऊर्ध्वमंडलिहस्ताचे लक्षण | २०३ | ५९१ |
| पार्श्वमंडलिहस्ताचे लक्षण | २०३ | ५९१ |
| उरोमंडलिहस्ताचे लक्षण | २०४ | ५९२ |
| उर:पार्श्वार्धमंडलहस्ताचे लक्षण | २०५ | ५९२ |
| मुष्टिकस्वस्तिकहस्ताचे लक्षण | २०६ | ५९२ |
| नलिनीपद्मकोशहस्ताचे लक्षण | २०७ | ५९३ |
| उल्बणहस्ताचे लक्षण | २०८ | ५९३ |
| ललित आणि वलितहस्ताचे लक्षण | २०९ | ५९४ |
| नृत्तहस्तांचे विनियोग | २१०-२१२ | ५९४ |
| हस्तकरणांचे प्रकार | २१३-२१४ | ५९५ |
| आवेष्टित हस्तकरणाचे लक्षण | २१५ | ५९६ |
| उद्वेष्टित हस्तकरणाचे लक्षण | २१६ | ५९६ |
| व्यावर्तित हस्तकरणाचे लक्षण | २१७ | ५९६ |
| परिवर्तित हस्तकरण | २१८ | ५९७ |
| हस्तकरणांचे विनियोग | २१९ | ५९७ |

| | | |
|---|---|---|
| बाहुंचे प्रकार | २२०-२२१ | ५९८ |
| छाती, पोट आणि पार्श्व यांचे प्रकार आणि विनियोग | २२२ | ५९८ |
| वक्ष:स्थलाचे पाच प्रकार | २२३ | ५९९ |
| आभुग्न वक्षाचे लक्षण आणि विनियोग | २२४ - २२५ | ५९९ |
| निर्भुग्न वक्षाचे लक्षण आणि विनियोग | २२६-२२८ | ६०० |
| प्रकंपित वक्षाचे लक्षण आणि विनियोग | २२९ -२३० | ६०१ |
| उद्वाहित वक्षाचे लक्षण आणि विनियोग | २३१ | ६०२ |
| सम वक्षाचे लक्षण आणि विनियोग | २३२ | ६०२ |
| पार्श्वाची लक्षणे आणि प्रकार | २३३ -२३४ | ६०३ |
| नत पार्श्वाचे लक्षण | २३५ | ६०३ |
| समुन्नत पार्श्वाचे लक्षण | २३६ | ६०४ |
| प्रसारित आणि विवर्तित पार्श्वाचे लक्षण | २३७ | ६०४ |
| अपसृत पार्श्वाचे लक्षण | २३८ | ६०५ |
| नत इ. पार्श्वाचे विनियोग | २३९-२४० | ६०५ |
| उदराचे प्रकार आणि लक्षणे | २४१ | ६०६ |
| उदराचे विनियोग | २४२-२४३ | ६०६ |
| कटीचे प्रकार आणि लक्षणे | २४४-२४७ | ६०७ |
| कटीचे विनियोग | २४८-२५० | ६०८ |
| ऊरूचे प्रकार आणि लक्षणे | २५१-२५३ | ६०९ |
| ऊरूचे विनियोग | २५४-२५७ | ६१० |
| जंघाचे / पोटऱ्यांचे प्रकार | २५८ - २६१ | ६११ |
| जंघाचे / पोटऱ्यांचे विनियोग | २६२- २६४ | ६१३ |
| पादप्रचार (पायाचे प्रकार) | २६५ | ६१४ |
| उद्घटित पादाचे लक्षण आणि विनियोग | २६६ - २६७ | ६१४ |
| समपादाचे लक्षण आणि विनियोग | २६८-२६९ | ६१५ |
| त्र्यश्रपादाचे लक्षण आणि विनियोग | २७०-२७२ | ६१६ |
| अग्रतलसंचर पादाचे लक्षण आणि विनियोग | २७३-२७४ | ६१७ |
| अंचितपादाचे लक्षण आणि विनियोग | २७५-२७६ | ६१८ |
| कुंचितपादाचे लक्षण आणि विनियोग | २७७ | ६१८ |
| सूचीपादाचे लक्षण आणि विनियोग | २७८ -२७९ | ६१९ |
| पाय, पोटऱ्या आणि मांड्या यांचा प्रयोग आणि पादचारी | २८०-२८३ | ६२० |

## दहावा अध्याय


| | श्लोक संख्या | पृष्ठ |
|---|---|---|
| चारीविधान | १-१०३ | ६२३-६६० |
| ‘चारी’चे लक्षण | १ | ६२३ |
| व्यायाम | २ | ६२३ |
| चारी-करण-खंड-मंडल यांची लक्षणे | ३-४ | ६२४ |
| चारींचे महत्त्व आणि उपयुक्तता | ५-७ | ६२४ |
| भौमी चारी | ८-१० | ६२५ |
| आकाशिकी चारी | ११-१३ | ६२६ |
| भौमी चारींची लक्षणे | | ६२७ |
| समपादाचारी | १४ | ६२७ |
| स्थितावर्ताचारी | १५ | ६२८ |
| शकटास्याचारी | १६ | ६२८ |
| अध्यर्धिकाचारी | १७ | ६२८ |
| चाषगतिचारी | १८ | ६२९ |
| विच्यवाचारी | १९ | ६२९ |
| एडकाक्रीडिताचारी | २० | ६३० |
| बद्धाचारी | २१ | ६३० |
| ऊरूद्वृत्ताचारी | २२ | ६३० |
| अड्डिताचारी | २३ | ६३१ |
| उत्स्पंदिताचारी | २४ | ६३१ |
| जनिताचारी | २५ | ६३१ |
| स्यंदिताचारी | २६ | ६३२ |
| अपस्यंदिताचारी | २६ | ६३२ |
| समोत्सारितमत्तल्लीचारी | २७ | ६३२ |
| मत्तल्लीचारी | २८ | ६३३ |
| आकाशिकी चारींची लक्षणे | २९ | ६३३ |
| अतिक्रांताचारी | ३० | ६३३ |
| अपक्रांताचारी | ३१ | ६३४ |
| पार्श्वक्रांताचारी | ३२ | ६३४ |
| ऊर्ध्वजानुचारी | ३३ | ६३५ |
| सूचीचारी | ३४ | ६३५ |

| | | |
|---|---|---|
| नूपुरपादिकाचारी | ३५ | ६३५ |
| दोलपादाचारी | ३६ | ६३६ |
| आक्षिप्ताचारी | ३७ | ६३६ |
| आविद्धाचारी | ३८ | ६३६ |
| उद्वृत्ताचारी | ३९ | ६३७ |
| विद्युद्भ्रांताचारी | ४० | ६३७ |
| अलाताचारी | ४१ | ६३८ |
| भुजंगत्रासिताचारी | ४२ | ६३८ |
| हरिणप्लुताचारी | ४३ | ६३८ |
| दंडपादाचारी | ४४ | ६३९ |
| भ्रमरीचारी | ४५ | ६३९ |
| चारीविधान | ४६-५० | ६३९ |
| स्थानांचे प्रकार | ५१ | ६४१ |
| वैष्णव स्थानाचे लक्षण आणि विनियोग | ५२-५७ | ६४२ |
| समपाद स्थानाचे लक्षण आणि विनियोग | ५८ - ६० | ६४३ |
| वैशाख स्थानाचे लक्षण आणि विनियोग | ६१-६४ | ६४४ |
| मंडल स्थानाचे लक्षण आणि विनियोग | ६५-६६ | ६४६ |
| आलीढ स्थानाचे लक्षण आणि विनियोग | ६७-६९ | ६४६ |
| प्रत्यालीढ स्थानाचे लक्षण आणि विनियोग | ७०-७१ | ६४७ |
| न्यायाचे प्रकार | ७२-७४ | ६४८ |
| न्याय शब्दाची व्याख्या | ७५ | ६४९ |
| भारतन्याय | ७६-८० | ६५० |
| सात्वतन्याय | ८१ | ६५१ |
| वार्षगण्यन्याय | ८२-८३ | ६५२ |
| कैशिकन्यायानुसार शस्त्रमोक्षणाचा विधी | ८४-८५ | ६५२ |
| युद्धामध्ये वर्जित कार्य | ८६-८७ | ६५३ |
| सौष्ठवाचे महत्त्व आणि लक्षण | ८८-९३ | ६५४ |
| चतुरश्राचे लक्षण | ९४ | ६५६ |
| धनुष्यासंबंधीची चार करणे | ९५ -९६ | ६५६ |
| व्यायामविधान | ९७-९८ | ६५७ |
| नस्य आणि बस्ती | ९९ | ६५८ |
| आहार | १०० | ६५८ |
| व्यायामाचे नियम | १०१ - १०३ | ६५९ |

## अकरावा अध्याय


| | श्लोक संख्या | पृष्ठ |
|---|---|---|
| मंडलविधान | १-७० | ६६३-६८६ |
| आकाशगामी मंडल | २-३ | ६६३ |
| भौममंडल | ४-६ | ६६४ |
| अतिक्रांतमंडल | ७-१० | ६६४ |
| विचित्रमंडल | ११-१५ | ६६६ |
| ललितसंचरमंडल | १६-१९ | ६६७ |
| सूचीविद्धमंडल | २०-२१ | ६६९ |
| दंडपादमंडल | २२-२४ | ६६९ |
| विहृतमंडल | २५-२८ | ६७० |
| अलातकमंडल | २९-३१ | ६७२ |
| वामविद्धमंडल | ३२-३५ | ६७३ |
| ललितमंडल | ३६-३९ | ६७४ |
| क्रांतमंडल | ४०-४२ | ६७६ |
| भ्रमरमंडल | ४४-४६ | ६७७ |
| आस्पंदितमंडल | ४७-४९ | ६७८ |
| आवर्तमंडल | ५०-५२ | ६७९ |
| समोत्सारितमंडल | ५३-५५ | ६८० |
| एडकाक्रीडितमंडल | ५६-५७ | ६८१ |
| अड्डितमंडल | ५८-६० | ६८२ |
| शकटास्यमंडल | ६१-६२ | ६८३ |
| अध्यर्धमंडल | ६३-६४ | ६८३ |
| पिष्टकुट्टमंडल | ६५-६६ | ६८४ |
| चाषगतमंडल | ६७ | ६८५ |
| सममंडल | ६९ | ६८५ |
| मंडलप्रयोगविधि | ७० | ६८६ |


## बारावा अध्याय


| | श्लोक संख्या | पृष्ठ |
|---|---|---|
| गतिप्रचार | १-२३६ | ६८९-७६५ |
| पात्रांचा प्रवेश | १-७ | ६८९ |

| | | |
|---|---|---|
| पाय ठेवण्याचे नियम | ८-११ | ६९१ |
| लयानुसार गती | १२ | ६९२ |
| उत्तम नटांची स्वाभाविक गती | १३-२१ | ६९२ |
| मध्यम आणि अधम नटांची गती | २२ | ६९५ |
| देव, दानव, पन्नग यांची गती | २३ | ६९६ |
| आकाशात राहणाऱ्यांची गती | २४ | ६९६ |
| ऋषींचे प्रश्न आणि भरताचे उत्तर | २५-२९ | ६९७ |
| जड व्यक्तींची गती | ३०-३३ | ६९८ |
| रोगी, तप:श्रांत इ.ची गती | ३४-३५ | ७०० |
| विविध भावांमधील गती | ३६ - ३८ | ७०१ |
| गतींचे नियम | ३९ | ७०२ |
| शृंगाररसातील गती | ४०-४४ | ७०२ |
| कामी जनांची गती | ४५-४७ | ७०३ |
| रौद्र रसातील गती | ४८-५४ | ७०४ |
| बीभत्स रसातील गती | ५५-५६ | ७०६ |
| वीररसातील गती | ५७-५९ | ७०७ |
| अद्‌भुत रसातील गती | ६० | ७०८ |
| करुण रसातील गती | ६१-६७ | ७०९ |
| थंडी आणि वर्षा ऋतूतील गती | ६८-७० | ७११ |
| भयानक रसातील गती | ७१-७६ | ७१२ |
| व्यापारी आणि सचिव यांची गती | ७७-७८ | ७१३ |
| संन्यासी इ.ची गती | ७९-८६ | ७१४ |
| अंधारातून जाणारे आणि आंधळे यांची गती | ८७ - ८८ | ७१७ |
| रथावर असलेल्याची गती | ८९-९१ | ७१७ |
| विमानामध्ये असलेल्याची गती | ९२ | ७१८ |
| आकाशगती | ९३-९६ | ७१८ |
| महाल इ.मध्ये आरोहण, अवरोहण करतानाची गती | ९७-९९ | ७१९ |
| पाण्यातील गती | १००-१०२ | ७२० |
| बोटीमध्ये असलेल्याची गती | १०३ | ७२१ |
| पर्वत चढणाऱ्यांची गती | १०४ | ७२२ |
| वृक्षावर चढणाऱ्यांची गती | १०५ | ७२२ |
| नदीत उतरतानाची गती | १०६ | ७२२ |

| | | |
|---|---|---|
| प्रतिकात्मक अभिनय | १०७-१०८ | ७२३ |
| घोडेस्वाराची गती | १०९ | ७२३ |
| सापाची गती | ११० | ७२४ |
| वीटाची गती | १११-११२ | ७२४ |
| कंचुकीची गती | ११३-११५ | ७२५ |
| दुबळ्या आणि रोगी व्यक्तीची गती | ११६-११८ | ७२६ |
| लांबचा प्रवास करून येणाऱ्याची गती | ११९ | ७२७ |
| स्थूल माणसाची गती | १२०-१२१ | ७२७ |
| मदमस्त पुरुषाची गती | १२२-१२३ | ७२८ |
| उन्मत्त पात्राची गती | १२४-१३१ | ७२८ |
| अपंग पात्रांची गती | १३२-१३७ | ७३१ |
| विदूषकाची गती | १३८-१४६ | ७३२ |
| चेट आणि शकाराची गती | १४७-१५० | ७३६ |
| म्लेंच्छ इ. व्यक्तींची गती | १५१-१५२ | ७३७ |
| पशुपक्षी इ. ची गती | १५३-१५९ | ७३७ |
| स्त्रियांची स्थाने आणि गती | १६०-१६१ | ७३९ |
| आयतस्थान आणि विनियोग | १६२-१६४ | ७४० |
| अवहित्थस्थान आणि विनियोग | १६५-१७२ | ७४१ |
| अश्वक्रांतस्थान आणि विनियोग | १७३-१७६ | ७४४ |
| स्थान आणि गती यांचा परस्परसंबंध | १७७ | ७४५ |
| स्वभावानुसार स्त्रियांची गती | १७८-१८५ | ७४५ |
| प्रौढा स्त्रियांची गती | १८६-१८८ | ७४८ |
| दासींची गती | १८९-१९० | ७४९ |
| नपुंसकांची गती | १९१-१९३, १९५ | ७४९, ७५१ |
| बालकांची गती | १९४ | ७५० |
| स्त्रीपुरुषांचा परस्पर अभिनय | १९६-१९९ | ७५१ |
| पुलिंद इ. ची गती | २०० | ७५२ |
| व्रतस्थ इ. लोकांची गती | २०१ | ७५३ |
| उद्धत अंगहार, चारी आणि मंडल | २०२ | ७५३ |
| आसनविधी | २०३ | ७५४ |
| विविध अवस्थेतील आसने | २०४-२०८ | ७५४ |
| उत्कटिकस्थान | २०९-२१३ | ७५६ |

| | | |
|---|---|---|
| बाह्य आणि आभ्यंतर आसनविधी | २१४-२१५ | ७५७ |
| पुरुषांसाठीची आसने | २१६-२१७ | ७५८ |
| स्त्रियांची आसने | २१८-२२१ | ७५९ |
| सामान्य आसनविधी आणि नियम | २२२-२२८ | ७६० |
| शयनविधी | २२९ | ७६२ |
| आकुंचितस्थान | २३० | ७६२ |
| समस्थान | २३१ | ७६३ |
| प्रसारितस्थान | २३२ | ७६३ |
| विवर्तितस्थान | २३३ | ७६३ |
| उद्वाहितस्थान | २३४ | ७६४ |
| नतस्थान | २३५ | ७६४ |
| श्लोकार्धानुक्रम : | | ७६७-८३२ |

## पहिला अध्याय - नाट्याचा उगम

नाट्यशास्त्राच्या प्रथम अध्यायामध्ये नाट्याच्या उत्पत्तीविषयी सांगितले आहे. नाट्यशास्त्रावरील प्राचीन आणि अर्वाचीन सर्व अभ्यासकांनी नाट्याच्या उगमावर विवेचन केले आहे. परंतु अजूनपर्यंत कुठल्याही सिद्धांताला मान्यता मिळाली नाही. काही शिलालेखांमध्ये इतिहासाचे मूळ दिसून येते; परंतु नाट्याविषयी ते देखील मूकच आहेत.

भारतीयपरंपरेनुसार, सर्वशास्त्रांचा उगम वेदातून झाला आहे. त्याचप्रमाणे भरताच्या नाट्यशास्त्रामध्ये नाट्याच्या उत्पत्तीचा इतिहास चार वेदांमधून सांगितला आहे. नाट्याच्या उत्पत्तीचा हा इतिहास विश्वातील सर्वात प्राचीन आहे, असे सांगितले तर अतिशयोक्ती होणार नाही.

नाट्यशास्त्रानुसार, वैवस्वत मन्वंतराच्या त्रेतायुगाच्या सुरूवातीस जेव्हा लोक काम, क्रोध, लोभ, मोह, ईर्ष्या, सुख आणि दु:ख यांमध्ये बुडून गेले, तेव्हा इंद्र इ. देवांनी ब्रह्मदेवाकडे जाऊन सांगितले, की हे भगवन् आम्हांस अशा मनोरंजनाचे साधन देण्यात यावे, ज्यात दृश्य आणि श्राव्य दोन्ही असेल. तेव्हा ब्रह्मदेवाने योगाच्या साहाय्याने चारही वेदांचे स्मरण करून सांगितले की, "मी इतिहासासह, नाट्य नावाच्या पाचव्या वेदाची रचना करतो जे धर्म, अर्थ आणि यश प्राप्त करून देणारे असेल, जे उपदेश देणारे असेल, ज्ञान-संग्रहाने युक्त असेल आणि भविष्यात सर्वकर्मांचे दर्शन घडविणारे असेल.

असा संकल्प करून ब्रह्मदेवाने ऋग्वेदातून पाठ्य, सामवेदातून गीत, यजुर्वेदातून अभिनय आणि अथर्ववेदातून रस घेऊन पाचव्या वेदाची निर्मिती केली जे सर्ववर्णीयांसाठी होते. तेव्हा ब्रह्मदेवाने भरतमुनींना नाट्याविषयीचे शिक्षण देऊन स्वत:च्या पुत्रांसह नाट्यप्रयोग करण्याचा आदेश दिला. तेव्हा सर्वपुत्रांना नाट्याचे शिक्षण देऊन भरताने ब्रह्मदेवासमोर तीन वृत्तींच्या आश्रयाने अभिनय केला. तेव्हा ब्रह्माने त्यांना 'कैशिकी वृत्तीचा' वापर करायला सांगितले; परंतु नारीपात्र नसल्याने भरताने आपण असमर्थ आहोत असे सांगितल्यावर, ब्रह्माने अप्सरांची निर्मिती केली व कैशिकी वृत्तीसह नाट्य करावे असे भरताला सांगितले. त्यानंतर इंद्रध्वज महोत्सवाच्या शुभ दिवशी, भरताने दैत्य आणि दानव यांच्या नाशाची अनुकृती असणारे नाट्य प्रस्तुत केले. ते पाहून दैत्य-दानव प्रचंड रागावले आणि त्यांनी नाट्याच्या अभिनयामध्ये विघ्ने निर्माण केली. तेव्हा ब्रह्मदेवाने

विश्वकर्म्याला सांगून सर्वलक्षणसंपन्न अशा नाट्यमंडपाची निर्मिती करायला सांगितले, त्यांनी एक भव्य नाट्यमंडप निर्माण केले आणि नाट्यमंडपाच्या रक्षणासाठी विविधदेवतांची नियुक्ती केली. त्यानंतर भरताने 'अमृतमंथन' नावाचे समवकार प्रदर्शित केले व नंतर शिवाच्या आज्ञेने भरताने 'त्रिपुरदाह' नावाचे 'डिम' दाखविले. हा प्रयोग पाहून शिव अत्यंत प्रसन्न झाले व त्यांनी भरताला सांगितले की विविध करण आणि अंगहारयुक्त माझ्या नृत्याचा पूर्वरंगामध्ये प्रयोग करावा. तेव्हा शिवाने आदेश केल्याप्रमाणे तंडूने अंगहार सांगितले व पार्वतीने लास्य दाखविले. याप्रमाणे नाट्यामध्ये नृत्य, गायन आणि वादनाचा वापर झाला.

नाट्योत्पत्तीची आणखी एक गोष्ट नाट्यशास्त्राच्या शेवटच्या अध्यायातदेखील सांगितली आहे, जिच्याविषयी आम्ही शेवटच्या अध्यायात सांगू.

नाट्यशास्त्रानंतरच्या नंदीकेश्वररचित अभिनयदर्पणम्, भावप्रकाशन, रसार्णवसुधाकर, दशरूपक, नाटकलक्षणरत्नकोश, नाट्यदर्पण इत्यादी ग्रंथांमध्ये थोड्या फार फरकाने नाट्योत्पत्तीच्या कथेचे वर्णन सापडते. परंतु मौलिक दृष्ट्या कथेच्या विचारामध्ये काही मोठा फरक आढळत नाही. सर्वांचे विवरण हे भरतसंमत आहे.

वैदिक संवादसूक्त, वैदिक कर्मकांड, शैवसंप्रदायातील शिवाद्वारे नाट्याची उत्पत्ती, नृत्यातून नाट्याची उत्पत्ती, कठपुतलीनृत्यातून नाट्याचा उगम, छायानाट्यातून नाट्यनिर्मिती, वीरपूजेतून नाट्यलोकपरंपरा, लोकोत्सव आणि लोकनृत्याच्या आधारे नाट्याची निर्मिती अशी नाट्योत्पत्तिविषयीची विविध आधुनिक मते आढळतात. यावरून नाट्यकलेचा उगम हा अतिप्राचीन आदियुगापासून आहे, असे मानावे लागेल. जेव्हा भाषेचाही उगम झाला नव्हता तेव्हा मानवी अंगचेष्टांद्वारे स्वत:चे भाव व्यक्त करीत असेल आणि जेव्हा त्यात गती आणि भाव जोडले गेले, तेव्हा त्यास 'नृत्य' संज्ञा मिळाली असावी. त्यानंतर त्यात संवाद-कथा जोडली गेली आणि संगीताचा समावेश होऊन अभिनयनाट्याचे स्वरूप तयार झाले. म्हणजे वैदिक काळाच्याही पूर्वी नाट्यकलेचा उगम सर्व प्रथम या लोकाभिनय लोकनृत्यातून झाला असावा असे सर्वसामान्य साधारण विधान करता येईल.

थोडक्यात, नाट्यकलेचा इतिहास हा मानवी-जीवनाच्या इतिहासाशी निगडीत आहे. जसजसा मानवी जीवनाचा उत्कर्ष झाला तसा तसा नाट्यकलेचा देखील विकास झाला. उदा. मोहेंजोदडो आणि

हडप्पा संस्कृतीतील मूर्ती, भीमबेटका गुहेतील नृत्यचित्रे, नृत्यात मुखवटांचा वापर, अंजठा, वाघगुफा आणि अमरावतीतील नृत्य आणि संगीतात मग्न असलेले यक्ष, किन्नर, गंधर्व इत्यादींची चित्रे इ. पाहून असे सांगता येणे शक्य आहे की, त्यावेळीही नाट्य व नृत्यकलेचा विकास झालेला होता आणि समाजात ते प्रचलित होते.

म्हणजेच, नाट्याचा विकास वृत्त, नृत्य आणि संवादाद्वारे झाला. हा विकासक्रम प्रागैतिहासिक काळापासून सुरू होऊन भरताच्या वेळेपर्यंत पूर्ण झाला असावा. त्याचप्रमाणे क्रमश: नृत्य, भावप्रदर्श न, संवाद आणि रसनिष्पत्तीद्वारे नाट्याचा विकास होऊन रूपक, उपरूपक किंवा नृत्यरूपक रंगमंचावर अवतरले असावे.

## दुसरा अध्याय - प्रेक्षागृहाची लक्षणे

नाट्यशास्त्राच्या दुसऱ्या अध्यायामध्ये नाट्य प्रदर्शित करण्यासाठी तीन प्रकारचे प्रेक्षागृह सांगितले आहेत - विकृष्ट, चतुरश्र आणि त्र्यश्र. हे तीन नाट्यमंडप क्रमाने ज्येष्ठ, मध्यम आणि कनिष्ठ म्हणजेच उत्तम, मध्यम व निकृष्ट स्वरूपाचे सांगितले आहेत. यातील ज्येष्ठ नाट्यमंडप १०८ X ६४ हातांचा असतो आणि तो देवतांसाठी सांगितला गेला आहे. मध्यम प्रेक्षागृह ६४ X ३२ हातांचा असतो आणि तो राजांसाठी वापरला जातो. तसेच कनिष्ठ प्रेक्षागृह ३२ X १६ हातांचा असतो आणि तो साधारण प्रजेसाठी सांगितला आहे. थोडक्यात,

१) विकृष्ट प्रेक्षागृह -

१. ज्येष्ठ (उत्तम) - १०८ X ६४ हात

२. मध्यम - ६४ X ३२ हात

३. कनिष्ठ - ३२ X १६ हात

२) चतुरश्र प्रेक्षागृह -

१. ज्येष्ठ - १०८ X ६४ हात

२. मध्यम - ६४ X ६४ हात

३. कनिष्ठ - ३२ X ३२ हात

३) त्र्यश्र प्रेक्षागृह -

१. १०८ हात त्रिकोणाकार


२. ६४ हात त्रिकोणाकार

३. ३२ हात त्रिकोणाकार

भरताने वरीलप्रमाणे तीन प्रकारच्या प्रेक्षागृहापैकी विकृष्ट मध्यम आकाराचे प्रेक्षागृह सर्वोत्तम मानले आहे आणि नाट्यशास्त्रामध्ये या प्रेक्षागृहांचे विस्तृत वर्णन आहे. विकृष्ट मध्यम प्रेक्षागृह ६४ हात लांब व ३२ हात रूंद असावे. प्रथम संपूर्ण भूमीचे ३२ x ३२ चे दोन विभाग करावे. त्यात पुढच्या अर्ध्या विभागात प्रेक्षकांसाठी बसण्याची जागा व मागच्या अर्ध्या भागाचे परत दोन विभाग १६ x ३२ चे करावे व एक भाग रंगशीर्ष आणि शेवटच्या मागच्या भागात नेपथ्यगृह बनवावे.

- भरतमतानुसार विकृष्ट आयताकार मध्यम नाट्यमंडपाचे (६४ x ३२) स्वरूप -


चित्र १




बहुधा सर्वानुमते रंगपीठ आणि रंगशीर्ष हे समानार्थी मानले आहेत. परंतु अभिनव गुप्ताचार्यांनी रंगपीठ आणि रंगशीर्ष दोन्ही भिन्न मानले आहेत.

- अभिनवगुप्ताच्या मते, आयाताकार मत्तवारणी सह विकृष्ट मध्यम नाट्यमंडपाचे स्वरूप

चित्र २





चित्र ३ चतुरश्र मत्तवारणी

- डॉ. मनमोहन घोष यांच्या मते विकृष्ट मध्यम नाट्यमंडपाचे स्वरूप

चित्र ४





दुसऱ्या अध्यायात भरताने प्रथम जमिनीचे परीक्षण व स्वच्छता आणि त्यानंतर वास्तूचे मोजमाप, व योग्य उत्तम नक्षत्राचा उल्लेख करून जमीन मापायचा दोरा कसा हवा हे सर्व सांगितले आहे. त्यानंतर भूमीचे विधिपूर्वक विविध विभाग करून आधारशिला स्थापन करावी असा निर्देश केला आहे.

प्रथम विधिपूर्वक स्तंभ उभारून मग भिंती बनविण्याचे कार्य करावे असेही सांगितले आहे. यांग्य विधिनुसार स्तंभ उभारून नंतर दरवाजा, भिंती व नेपथ्यगृह उचलावे. त्यानंतर रंगपीठाच्या दोन्ही बाजूस मापानुसार मत्तवारणीची रचना करावी (चित्र २, चित्र ४ पहा) असे सांगितले आहे.


- भरतमतानुसार आयताकार मत्तवारणी -

चित्र ५




समचतुरश्र मत्तवारणी सह विकृष्ट मध्य मंडप


चित्र ६.



त्यानंतर रंगशीर्ष हे षड्दारुकाने युक्त कसे असावे त्याचे वर्णन दिले आहे. चुना किंवा भिंती झाल्यावर त्याच्यावर लेप लावून कुठली चित्रे काढावी त्याची माहिती आहे.


त्यापुढे चतुरश्र व त्र्यश्र मंडपाची बांधणी आणि विधी सांगितल्या आहेत. (चित्र ५ आणि चित्र ६ पहा.)

चित्र ७





चित्र ८

त्र्यश्र मंडप



चित्र ९ आणि १०




त्यापुढे जर्जरपूजा, देवीची स्थापना, देवांची पूजा, संमत आहुती कर्म, हवनविधी, कुंभ फोडण्याचा विधी, रंगप्रदीप (दिवा घेऊन रंगमंच प्रकाशित करणे) व रंगपूजेचे फळ इत्यादींचे सविस्तर वर्णन या अध्यायात सांगितले आहे.

## तिसरा अध्याय - रंगदेवतेचे पूजन

'रंगमंडप' नावाच्या दुसऱ्या अध्यायानंतर भरताने रंगपीठावरील देवतांना अधिष्ठित करून, त्यांचे आवाहन करून पूजाविधी कसा करावा हे तिसऱ्या अध्यायात सांगितले आहे.

भरतानुसार रंगभूमीच्या अधिष्ठात्री देवीला नमस्कार करून नर्तक-नर्तकी यांनी/नटांनी विघ्ने दूर करण्यासाठी, सर्वांच्या संरक्षणासाठी, देवतांना प्रसन्न करण्यासाठी, प्रेक्षकांच्या ऐश्वर्यवृद्धीसाठी आणि नायक इत्यादी पात्रांच्या भल्यासाठी तसेच नाट्याच्या यशासाठी पुष्पांजली अर्पण करावी. प्रथम दिक्पालांची पूजा करून शिव, पार्वती, विघ्नेश, स्कंद, सप्त मातृका, यांना फुले अर्पण करावीत. लक्ष्मी आणि विष्णूला लतापुष्प, सरस्वती आणि ब्रह्माला कमळाचे फूल, आणि दिक्पालांसाठी मंदार, पारिजात, बिल्व, दूर्वा, चंपा, कदंब, इंदीवर, करवीर, जपापुष्प, कुमुद, मल्लिका, जाती, बकुल, कमळ, कुंद, आणि धत्तुर इत्यादी फुलांनी पुष्पांजली वाहावी.

विधिपूर्वक पूजा केलेला रंगमंच राजाला शुभ देणारा ठरतो आणि रंगमंचाची विधिवत् पूजा न केल्याने व देवगणांची व्यवस्थित स्थापना न केल्याने नाट्याचा विध्वंस होईल असे या अध्यायात सांगितले आहे.

## चौथा अध्याय - तांडवाची लक्षणे

चौथ्या अध्यायाच्या सुरुवातीस समवकार आणि डिम प्रयोगाचा उल्लेख आहे. तो पाहून महादेव शिवाला त्यांनी संध्याकाळी केलेले नृत्य आठवले जे विविध करणांनी युक्त अशा अंगहारांनी विभूषित होते. त्याचा वापर तुम्ही पूर्वरंग विधीमध्ये करा असे शिवाने सांगितले.

पुढे ह्या अध्यायात सांगितले आहे की, नृत्य हे स्वाभाविकरीत्या आह्लादक, मनोरंजक, मंगलकारी, शोभा देणारे असते. विवाह, जन्म व अभ्युदय इत्यादी शुभ समयी नृत्य प्रदर्शित केले जाते. पूर्वी सांगितलेले स्थान, चारी व नृत्तहस्तांना 'मातृका' म्हणतात आणि त्याच्या विविध क्रियांना 'करण' म्हणतात. यात एका पायाच्या क्रियेला 'चारी' व दोन पायांच्या क्रियेस 'करण' अशी संज्ञा दिली आहे. सर्व अंगहारांची उत्पत्ती करणांतून झाली आहे. म्हणून येथे ३२ अंगहार व १०८ करणांचे विवेचन केले आहे. हात आणि पायांच्या मिळून केलेल्या हालचालींना 'करण' म्हटले आहे. दोन करण मिळून नृत्यमातृका आणि दोन, तीन किंवा चार मातृका मिळून एक अंगहार तयार होते. तीन करण मिळून कलापक, चार करणे मिळून मंडक तसेच पाच करणे मिळून संघातक तयार होतो आणि सहा, सात, आठ आणि नऊ करणांनी अंगहार तयार होतो.

करण व अंगहारांच्या सविस्तर व्याख्येनंतर भरत हस्त, पाद, कटी, आणि ग्रीवा रेचक सांगून, शिवाच्या तांडव व पार्वतीच्या लास्य नृत्याचे वर्णन करतो. त्यानंतर विविध पिंडीबंधाच्या नावांचा उल्लेख आहे. हे पिंडीबंध विविध देवगण व देवींच्या नावांच्या आधारे ठेवली आहेत.

त्यानंतर वर्धमानक, आसारित इ. गीतांसह नृत्तप्रयोगविधीचे वर्णन केले आहे.

(टीप): या अध्यायात भाषांतर करताना अभिनवगुप्ताचार्यरचित 'अभिनवभारती' या टीकेचा आधार घेतलेला आहे. कारण केवळ नाट्यशास्त्रातील श्लोकांच्या आधाराने करणांचे प्रात्यक्षिक करणे अशक्य आहे. म्हणून नृत्याचा अभ्यास करणाऱ्यांनी करणांचे प्रात्यक्षिक करताना नाट्यशास्त्र आणि अभिनवभारती या दोन्ही ग्रंथांचे सखोल अध्ययन करावे.

## पाचवा अध्याय - पूर्वरंगविधी

नाट्यप्रयोगाच्या पूर्वी नाटकाच्या यशासाठी, निर्विघ्न समाप्तीसाठी जो मंगलमय विधी केला

जातो त्याला 'पूर्वरंग' असे म्हटले आहे. भरताच्या मते, हा विधी नाट्यप्रयोगाच्या आधी केला जातो म्हणून त्यास 'पूर्वरंग' असे म्हटले आहे. (पूर्वे रङ्ग: इति पूर्वरङ्ग:). भरताने पूर्व रंगाच्या एकोणीस अंगांचे विवरण केले आहे. ह्या पूर्वरंगाचे दोन विभाग आहेत. प्रथम यवनिका म्हणजेच पडद्याच्या आतमध्ये करायचे नऊप्रकार आणि नंतर यवनिकेच्या बाहेर करायचे दहा प्रकार दिले आहेत.

१) प्रत्याहार - वाद्यांची विधिपूर्वक स्थापना.
२) अवतरण — गायक व गायिकांचा प्रवेश.
३) आरंभ - परिगीताची सुरुवात.
४) वक्त्रपाणि — वादकांनी वाद्यांना सूरात लावणे.
५) परिघटना — वीणा इत्यादी तंत्री वाद्यांना स्वरबद्ध करणे.
६) संघटना - हातांचे वाद्यांवर (चर्म) प्रहार करणे.
७) मार्गासारित — विविध वाद्यांचा एकत्रित प्रयोग.
८) आसारित — कला आणि पाताचा वापर.
९) आश्रवणा — वाद्यांमध्ये एकरूपता आणणे.

पडदा सरकवून प्रेक्षकांसमोर करायचे १० विधी -

१) गीतक - देवीदेवतांच्या कीर्तनासाठीचे गीत
२) उत्थापन - नांदी पाठकांद्वारे प्रयोगाचे उत्थान
३) परिवर्तन - सूत्रधाराद्वारे वारंवार फिरून इंद्र इ. देवतांना वंदन.
४) नांदी - देवता, ब्राह्मण, राजा इत्यादींची आशीर्वादयुक्त स्तुती.
५) शुष्कावकृष्ट- शुष्काक्षरांद्वारे जर्जर इ. श्लोकांचे पठन.
६) रंगद्वार - आंगिक, वाचिक अभिनयाचा प्रथम प्रयोग.
७) चारी - शृंगार रसाचा प्रसार (वापर).
८) महाचारी - रौद्र रसाचा प्रसार (वापर).
९) त्रिगत - सूत्रधार, पारिपार्श्वक आणि विदूषकांचा एकमेकांशी संवाद.
१०) प्ररोचना - नाट्यवस्तूचे कथन करून, नाट्यसिद्धीसाठी प्रार्थना करून प्रेक्षकांना निमंत्रण.

## सहावा अध्याय - रस अध्याय

पूर्वरंगविधीनंतर सर्वश्रेष्ठ मुनींनी विचारलेल्या पाच प्रश्नांवरुन, भरताने रस आणि भावांचे विवरण क्रमश: सहाव्या आणि सातव्या अध्यायात केले आहे.

नाट्याचे सर्वात महत्त्वाचे तत्त्व म्हणजे रस. 'रस' या संकल्पनेचे आदिप्रणेता म्हणून भरतमुनी

मानले जातात. परंतु नाट्यशास्त्रात असे आढळून येते की, भरताच्या पूर्वीदेखील रसपरंपरा अस्तित्वात होती. नाट्यशास्त्राच्या सहाव्या व सातव्या अध्यायामध्ये रस व भाव यांचे विवेचन करताना भरताने स्वत:चे श्लोक व आर्या सांगितल्या आहेत. परंतु नाट्यशास्त्रापूर्वीचे रसविषयक ग्रंथ आज उपलब्ध नाहीत.

नाट्यशास्त्रातील सहाव्या अध्यायात रसाचे मार्मिक विश्लेषण हे अत्यंत मौलिक आणि मनोहर आहेत. कारण भरताच्या मते, रसाशिवाय काव्यार्थ शक्य नाही. नाट्याच्या सर्व अंगांपैकी रसाभिव्यक्ती हे प्रधान आणि बाकी सर्व गौण किंवा सहकारी मानले आहेत.

भरताने ज्या ज्या विषयांचे निरूपण केले आहे, त्या सर्वांचा संबंध प्रत्यक्ष किंवा परोक्ष रूपाने रसाशी आहे; कारण रसाभिव्यक्तीच्या संदर्भानेच त्यांची चर्चा भरताने केली आहे. उदा. भाव, चतुर्विध अभिनय, धर्मी, वृत्ती, प्रवृत्ती, गान, रंग, सिद्धी, स्वर, आतोद्य, पूर्वरंग इत्यादी.

भरताच्या मते, ज्याप्रकारे गूळ इत्यादी द्रव्य, व्यंजन आणि औषधीच्या योगाने मधुर इ. रस उत्पन्न होतात. त्याचप्रमाणे विविध भावांनी पुष्ट असा स्थायी भाव रसत्वाला पोचतो आणि ते आस्वाद्य असल्याकारणाने त्याला 'रस' असे म्हटले आहे. या रसाचे आस्वादन कसे करायचे त्या विषयी भरतमुनी असे सांगतात, की ज्याप्रमाणे विविध प्रकारच्या व्यंजनाने युक्त अन्न खाणारा व्यक्ती रसाचा आस्वाद घेतो आणि प्रसन्न होतो. त्याचप्रमाणे सहृदय प्रेक्षक विविध भावांचा म्हणजेच विभाव, अनुभाव आणि व्यभिचारी भावांचा आणि चतुर्विध अभिनयाने युक्त अशा स्थायी भावांचा रसास्वाद घेतो व आनंदित होतो. नाट्याच्या या अनुभूतीलाच 'रस' असे म्हटले आहे.

ह्या अध्यायामध्ये भरताने नाट्यातील आठ रसांची व्याख्या दिली आहे. यानंतर पुढे गा. ओ. सि. च्या नाट्यशास्त्रामध्ये नवव्या शांत रसाचे विवरणदेखील दिले आहे.

शृंगार = संभोग आणि विप्रलंभ शृंगार.
हास्य = स्वयम् आणि परम (वाक्य, क्रिया आणि नेपथ्य यातून निर्माण झालेले).
करुण = धर्मोपघातज, वित्तनाशजन्य आणि शोकजन्य.
रौद्र = आंगिक, वाचिक आणि नेपथ्यज.
वीर = दानवीर, धर्मवीर आणि युद्धवीर.
भयानक = कृत्रिम, अपराधजन्य आणि वित्रासिक.
बीभत्स = कायिक, वाचिक आणि मानसिक.
अद्‌भुत = दिव्यज आणि आनंदज.

## सातवा अध्याय - भाव अध्याय

सातव्या अध्यायाच्या सुरुवातीस भरत 'भाव' शब्दाची व्याख्या करतो . ती अशी - वाणी, अंग आणि सत्त्वाने युक्त अशा काव्याच्या अर्थाला जे व्यक्त करतात ते भाव होत . तसेच जो अर्थ विभावांद्वारे उत्पन्न होऊन अनुभाव तसेच वाचिक, आंगिक आणि सात्त्विक अभिनयाद्वारे प्रतीतियोग्य बनतो त्याला 'भाव' अशी संज्ञा आहे .

भरताच्या मतानुसार, भावातून रसाची निर्मिती सांगितली आहे . भाव आणि रस हे एकमेकांना पूरक तसेच आश्रित आहेत . रसहीन भाव व भावहीन रसाची कल्पना होऊच शकत नाही . 'भाव' रसाला व्यक्त करतात आणि रसाची उत्पत्ती भावातून आहे . विभाव, अनुभाव आणि व्यभिचारीभावांनी युक्त असणारे हे भावच प्रेक्षकांना रसाची प्रतीती करून देतात . म्हणून भरताने सातव्या अध्यायात विभावाचे विज्ञान, कारण, निमित्त, हेतू इ . अर्थ सांगितले आहे . त्याचे दोन प्रकार आहेत आलंबन आणि उद्दीपन .

नाट्यामध्ये वाचिक, आंगिक, सात्त्विक अभिनयाद्वारे शाखा, अंग आणि उपांगाने युक्त अर्थ अनुभावित होतो म्हणजेच व्यक्त होतो त्यास 'अनुभाव' म्हटले आहे . विभाव आणि अनुभाव हे जसे जगामध्ये दिसतात तसेच ते नाट्यामध्येही आहेत . नाट्यप्रदर्शनामध्ये हे विभाव, अनुभाव लोकस्वभावानुसार असतात . भरताने एकूण ४९ भाव सांगितले आहेत . त्यात आठ स्थायी व ३३ व्यभिचारी भाव आणि आठ सात्त्विक भाव आहेत .

यांप्रमाणे विभाव, अनुभाव व व्यभिचारी भावांसह सर्व भावांचे विवेचन येथे केले आहे .

## आठवा अध्याय - उपांगाभिनय

या अध्यायामध्ये भरताने प्रथम 'अभिनय' शब्दाची व्याख्या व्याकरणशास्त्राच्या आधाराने दिली आहे . 'अभि' हा उपसर्ग आणि 'णीञ् प्रापणे' (नी) हा धातू यांना ' अच्' प्रत्यय लागून 'अभिनय' शब्द तयार होतो . नाट्याच्या कथावस्तूतील अर्थाला प्रेक्षकांसमोर आणणे म्हणजे अभिनय होय . भरताने पुढे स्पष्टीकरण देताना असे म्हटले आहे की, नाट्यातील विविध अर्थाचे, तसेच शाखा, अंग-उपांगांनी युक्त असे सादरीकरण, जे प्रेक्षकांना रसास्वादाची अनुभूती करून देतात त्यास 'अभिनय' असे म्हणावे .

पुढे भरताने अभिनयाचे चार प्रकार सांगितले आहेत -

१ ) आंगिक - अंग, प्रत्यंग, उपांगाद्वारे होणाऱ्या क्रिया

२ ) वाचिक - वाणीद्वारे वाच्य आणि संवाद इ . चा अभिनय

३) आहार्य - वेशभूषा इ. नेपथ्याशी निगडित अभिनय
४) सात्त्विक - सुख, दु:ख इ. मानसिक वृत्तींचा अभिनय

याशिवाय भरताने पुढे सामान्याभिनय आणि चित्राभिनयाचा देखील उल्लेख केला आहे. या अध्यायात अंगाभिनयाचे तीन प्रकार सांगितले आहेत. शरीरज, मुखज आणि चेष्टाकृत. त्यानंतर आंगिक अभिनयाचे सहा अंग सांगितले आहेत. ते म्हणजे शिर, हस्त, वक्ष, पार्श्व, कंबर आणि पाय आणि सहा उपांगे डोके, भुवया, नाक, ओठ, गाल आणि हनुवटी ही होत.

पुढे १३ प्रकारच्या शिरोभेदांची व्याख्या करून त्याचे विनियोग दिले आहेत. आठ रसदृष्टी, आठ स्थायीभावदृष्टी व छत्तीस व्यभिचारीदृष्टींची देखील विनियोगासह व्याख्या दिली आहे. डोळ्यांच्या बुबुळांचे नऊ प्रकार आणि रसानुसार त्यांचा वापर सांगितला आहे. आठ दर्शनप्रकार, सात भुवयांचे प्रकार, सहा नाकाची कर्मे, सहा गालाचे प्रकार आणि सहा हनुवटीची लक्षणे भरताने सविस्तर सांगितली आहेत. अध्यायाच्या शेवटी, चार प्रकारचे मुखराग व नऊ प्रकारांच्या ग्रीवाभेदाची लक्षणेही सांगितली आहेत.

भरताने नाट्यशास्त्रामध्ये यथायोग्य विनियोगांचा उल्लेख केलेला आहेच. तरीही सर्व ठिकाणी, भरताने सांगितले आहे की, आत्तापर्यंत जे मी सांगितले आहे त्याच्या व्यतिरिक्त अनेक भेद जर करायचे असेल तर ते सामान्य लोकाभिनयाच्या आधारे निर्माण होऊ शकतात आणि ते निर्माण करा. (उदा. शिरोभेद, हस्तभेद इ.) म्हणजेच भरतदेखील नाविन्यपूर्ण क्रियात्मक सृजनाला, परंपरेला मान्यता देतो. यावरून 'शास्त्र तुमचे हात बांधून ठेवतात' ही जी समजूत पसरली आहे ती पूर्ण पणे चुकीची ठरते. याउलट शास्त्राचा आधार घेऊन नवीनतम, श्रेष्ठ, उत्कृष्ट व उत्तम दर्जाची निर्मिती करण्याची परवानगी नाट्यशास्त्राच्या काळापासून असल्याचे स्पष्ट दिसून येते.

## नववा अध्याय - अंगाभिनय

नाट्य, नृत्त व नृत्यामध्ये सर्वाधिक महत्त्व हस्ताभिनयाला आहे. आंगिक अभिनयातील विविध भेद व विनियोगामध्ये हस्ताभिनयाला सर्वोपरि स्थान दिले गेले आहे आणि म्हणूनच भरतमुनींनी दुसऱ्या आंगिक अभिनयापेक्षाही हस्ताभिनयाचे सविस्तर विवेचन केले आहे. या अध्यायाच्या नवव्या श्लोकात सांगितले आहे, की असा नाट्याचा कुठलाही अर्थ नाही जो हस्ताभिनयाने सादर होऊ शकत नाही. मानवी मनातील सुखदु:खे, विविध मानवीय भावनांची अभिव्यक्ती हातांच्या अनेक हालचालींनी होत असते. परंतु त्यात महत्त्वाचे म्हणजे हाताच्या प्रत्येक क्रियेच्या मुळाशी भाव आणि रसाची आंतरिक प्रेरणा देणारे काव्यार्थ आवश्यक आहे. नाट्य आणि नृत्यामध्ये पात्र किंवा नर्तक हस्तांद्वारे कित्येक लक्ष्यार्थ आणि व्यंग्यार्थ दाखवित असतात आणि म्हणूनच हस्ताभिनयासाठी अर्थयुक्तीचे ज्ञान

अत्यंत आवश्यक आहे. कारण त्याद्वारेच अनंत मार्मिक व चमत्कारपूर्ण अर्थपरंपराचे सृजन होते.

आकृति, चेष्टा (क्रिया), चिह्न आणि जाती यांना जाणून तसेच विविध तर्क-वितर्क करून विद्वानांनी हस्ताभिनय करावा. देश, काल, प्रयोग, अर्थयुक्ती इ. समजून पुरुषांनी व स्त्रियांनी हस्ताभिनय करावा असे भरताने सांगितले आहे.

नाट्यसंग्रहातील चवथे तत्त्व म्हणजे 'धर्मी' होय. या धर्मीचे दोन प्रकार आहेत. लोकधर्मी आणि नाट्यधर्मी. भरताने हस्ताभिनयाच्या या अध्यायामध्ये हस्तांची लक्षणे, विनियोग, क्रिया, अभिनय इत्यादींचे जे विस्तृत विवेचन केले आहे, त्यामध्ये त्याने लोकधर्मी आणि नाट्यधर्मी या दोन्ही परंपरांचा समन्वय केला आहे.

भरताने हस्ताभिनयाचे तीन भेद सांगितले आहेत. असंयुत, संयुत आणि नृत्त हस्त. यातील असंयुत हस्त चोवीस, संयुत हस्त तेरा आणि नृत्तहस्ताचे तीस प्रकार सांगितले आहेत. यातील एका हाताने अभिनय करण्यास योग्य असे चोवीस असंयुत हस्त होत. दोन्ही हाताने अभिनय करण्यास योग्य असे तेरा संयुत हस्त होतात आणि हात व पायांच्या सामंजस्याने सौंदर्य उत्पन्न करणारे तीस नृत्त हस्त सांगितले आहेत. नाट्यशास्त्रामध्ये नाट्य आणि नृत्यामध्ये वापरण्यासाठी वीस हस्तक्रिया, तीन हस्तप्रचार, चार हस्तकरण, पाच हस्तप्रकार इ. सांगितले आहे.

अशा रीतीने नट स्वत:च्या मानसिक विचारांची अभिव्यक्ती हस्ताभिनयाने करत असतो. हात आणि बोटांद्वारे स्वीकार-नकार, प्रकाशन-लपवणे, धरणे-सोडणे, विश्वास-अविश्वास, इ. भाव प्रकट करीत असतो व म्हणूनच विविध भावरसांनी आश्रित अभिनयासाठी हस्ताभिनयाचा हा अध्याय अत्यंत महत्त्वाचा मानला गेला आहे.

त्याच अध्यायामध्ये पुढे उर:कर्म म्हणजे छातीचे पाच प्रकार, पार्श्व म्हणजे बाजूंचे पाच प्रकार, उदर म्हणजे पोटाचे तीन प्रकार, कटी म्हणजे कंबरेचे पाच प्रकार, पाच ऊरूकर्मे , जंघांचे (पोटऱ्यांचे) पाच प्रकार आणि पायांचे पाच भेद सांगितले आहेत.

## दहावा अध्याय - चारीविधान

नाट्यशास्त्राच्या दहाव्या अध्यायात भरताने नाट्य आणि नृत्यामध्ये वापरण्यात येणाऱ्या चारींविषयी सांगितले आहे. भरताच्या मतानुसार कटी, पार्श्व, ऊरू, जंघा आणि पादांचा समान वापर करून केलेल्या क्रियेला 'चारी' असे म्हणतात. यामध्ये शिर, हस्त आणि वक्षाचा वापर अध्याहृत आहे. भरताच्या मते, नाट्यामध्ये चारींशिवाय दुसरे कुठलेही अंग शक्य नाही. चारींद्वारे नृत्त केले जाते. सर्व (आंगिक) क्रिया चारींमुळे होतात. चारींद्वारे शस्त्र सोडले जातात त्यामुळे युद्धामध्ये

चारींचा वापर होतो. नाट्यामध्ये चारींचे विशेष महत्त्व आहे, कारण चारींद्वारे अभिनय केला जातो. संपूर्ण नाट्यप्रयोग हा चारींवर आधारित असतो.

भरताच्या मते, एका पायाने जो अभिनय होतो ती चारी. दोन पायांनी जे केले जाते ते 'करण'. करणाच्या संयोगाने खंड, आणि तीन ते चार खंड मिळून 'मंडलाची' निर्मिती होते. नाट्याशास्त्रामध्ये 'चारी' दोन प्रकारच्या सांगितल्या आहेत. सोळा भौमी चारी आणि सोळा आकाशिकी चारी असे एकूण बत्तीस चारीभेद सांगितले आहेत.

जमिनीवर केलेल्या पादसंचाराला 'भौमीचारी' आणि जमिनीपासून वर आकाशात उंचावलेल्या पादसंचाराला 'आकाशिकी चारी' अशी संज्ञा दिली आहे. भौमीचारींचा वापर विनियोगासह दिला आहे. त्यानंतर भरत चार प्रकाराचे शस्त्रमोक्षणविधी, सौष्ठवाची लक्षणे, व्यायामविधी, आहारविधी आणि व्यायामातील नियमांची व्याख्या करतो.

## अकरावा अध्याय - मंडलविधान

चारींच्या संयोगाने मंडलाची उत्पत्ती होते असे भरताने नाट्यशास्त्रामध्ये सांगितले आहे. या अकराव्या अध्यायामध्ये भौमीचारींवर आधारित दहा भूमिमंडले आणि दहा आकाशी मंडलांचे वर्णन केले आहे. हया मंडलांचा वापर युद्ध इ. साठी करावा असे विधान आहे.

## बारावा अध्याय - गतिप्रचार

या अध्यायामध्ये, विविध पात्रांच्या रंगमंचावर प्रवेश करण्याविषयीचा विधी सांगितला आहे. पात्रांच्या पाऊल ठेवण्याच्या त्रिविध गतींचे सविस्तर वर्णन यात केले आहे. उत्तम-मध्यम-अधम पात्रांच्या गती, मिश्रगती, देव-दानव-यक्ष-राक्षस-गंधर्व-पन्नग इ.च्या गती, अष्टरसांच्या गती, यती- श्रमण-अंधारातून जाणाऱ्यांची गती, रथ-विमान-अश्व-नौका इ. यानांवर बसलेल्यांची गती, वीट- कंचुकी-शकार-चेट-विदूषक इ. ची गती, पशुपक्षी इ. ची गती, स्त्री-पुरुष-बालक-नपुंसकाची गती कृश-स्थूल-व्याधिग्रस्त इ. ची गती अशा विविध सखोल पात्रांच्या विविध गतींचे वर्णन या अध्यायात आढळते. त्याशिवाय, स्त्रियांची त्रिविध स्थाने आणि पुरुषांचे आसनविधी व शयनकर्मे सांगितली आहेत. याच अध्यायाचे बारा-अ आणि बारा-ब असे दोन विभाग नाट्यशास्त्राच्या नवीन आवृत्तीत सापडतात. त्यांची एकूण श्लोकसंख्या २५७ इतकी आहे. यामध्ये अनेक ठिकाणी श्लोकांचा क्रम बदलल्याचे दिसते तसेच काही ठिकाणी श्लोकांची पुनरावृत्तीही झाली आहे. म्हणून प्रस्तुत अनुवादात गा.ओ.सि. नुसार २३७ श्लोकांचेच भाषांतर केले आहे.

# पहिला अध्याय

## नाट्याचा उगम



॥ श्री: ॥

# भरतमुनिविरचितं नाट्यशास्त्रम्

## पहिला अध्याय

## नाट्याचा उगम

❖ प्रतिज्ञा ❖

प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् ॥ १ ॥

पदच्छेद: - प्रणम्य शिरसा देवौ पितामह-महेश्वरौ ।
नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यत् उदाहृतम् ॥ १ ॥

अन्वय: - पितामहमहेश्वरौ देवौ शिरसा प्रणम्य ब्रह्मणा यत् उदाहृतं (तत्) नाट्यशास्त्रम् (अहम् अधुना) प्रवक्ष्यामि ।

अर्थ - ब्रह्मदेव आणि महादेव या देवतांना शिरसाष्टांग वंदन करून ब्रह्माने जे नाट्यशास्त्र सांगितले ते (मी आता) पूर्णपणे सांगणार आहे .

❖ नाट्यवेदाची उत्पत्ती, लक्षणे व प्रयोगाविषयी मुनींचे प्रश्न ❖

समाप्तजप्यं व्रतिनं स्वसुतै: परिवारितम् ।
अनध्याये कदाचित्तु भरतं नाट्यकोविदम् ॥ २ ॥
मुनय: पर्युपास्यैनमात्रेयप्रमुखा: पुरा ।
पप्रच्छुस्ते महात्मानो नियतेन्द्रियबुद्धय: ॥ ३ ॥

पदच्छेद: - समाप्त-जप्यं व्रतिनं स्वसुतै: परिवारितम् ।
अनध्याये कदाचित् तु भरतं नाट्य-कोविदम् ॥ २ ॥
मुनय: पर्युपास्य एनम् आत्रेय-प्रमुखा: पुरा ।
पप्रच्छु: ते महा-आत्मान: नियत-इन्द्रिय-बुद्धय: ॥ ३ ॥

अन्वय: - पुरा कदाचित् तु अनध्याये (सति) आत्रेयप्रमुखा: नियतेन्द्रियबुद्धय: ते महात्मान: मुनय: स्वसुतै: परिवारितं समाप्तजप्यं व्रतिनं नाट्यकोविदम् एनं भरतं पर्युपास्य पप्रच्छु:|

अर्थ - अत्रिपुत्र प्रमुख असलेले, इंद्रिय व बुद्धी यांवर नियंत्रण असणारे ते महान ऋषी पूर्वी एकदा विश्रांतीच्या वेळी स्वशिष्यांनी घेरलेल्या, जप संपविलेल्या, व्रताचे आचरण करणाऱ्या आणि नाट्य जाणणाऱ्या भरतमुनींच्या जवळ गेले आणि त्यांनी विचारले .

योऽयं भगवता सम्यग्ग्रथितो वेदसम्मित:|
नाट्यवेद: कथं ब्रह्मन्नुत्पन्न: कस्य वा कृते ॥ ४ ॥
कत्यङ्ग: किंप्रमाणश्च प्रयोगश्चास्य कीदृश:|
सर्वमेतद्यथातत्त्वं भगवन्वक्तुमर्हसि ॥ ५ ॥

पदच्छेद: - य: यं भगवता सम्यक् ग्रथित: वेदसम्मित:|
नाट्यवेद: कथं ब्रह्मन् उत्पन्न: कस्य वा कृते ॥ ४ ॥
कति अङ्ग: किंप्रमाण: च प्रयोग: च अस्य कीदृश:|
सर्वम् एतत् यथातत्त्वं भगवन् वक्तुम् अर्हसि ॥ ५ ॥

अन्वय: - हे ब्रह्मन्, भगवता (भवता) य: अयं वेदसम्मित: नाट्यवेद: सम्यक् ग्रथित: (स:) कथं, कस्य कृते वा उत्पन्न:? (स:) कत्यङ्ग: किम्प्रमाण: च ? अस्य प्रयोग: च कीदृश: ? हे भगवन् (त्वम्) एतत् सर्व यथातत्त्वं वक्तुम् अर्हसि ?

अर्थ - हे ब्रह्मदेवा, ऐश्वर्यसंपन्न (अशा आपण) हा जो वेदतुल्य नाट्यवेद चांगल्या प्रकारे रचला आहे (तो) कसा आणि कोणासाठी निर्माण झाला? त्याचे अंग (विभाग) किती? त्याचे प्रमाण काय? आणि त्याचा प्रयोग कसा करावा? भगवन् , हे सर्व आपण (प्रत्येक) तत्त्वानुसार विस्तारपूर्वक सांगावे .

❖ भरतमुनींचे उत्तर - नाट्यवेदाच्या उत्पत्तीची कथा ❖

तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनि:|
प्रत्युवाच ततो वाक्यं नाट्यवेदकथां प्रति ॥ ६ ॥

भवद्भि: शुचिभिर्भूत्वा तथाऽवहितमानसै: |
श्रूयतां नाट्यवेदस्य सम्भवो ब्रह्मनिर्मित: || ७ ||

पदच्छेद: - तेषां तु वचनं श्रुत्वा मुनीनां भरत: मुनि: |
प्रत्युवाच तत: वाक्यं नाट्यवेद-कथां प्रति || ६ ||
भवद्भि: शुचिभि: भूत्वा तथा अवहित-मानसै: |
श्रूयतां नाट्यवेदस्य सम्भव: ब्रह्म-निर्मित: || ७ ||

अन्वय: - तत: तेषां मुनीनां वचनं श्रुत्वा भरत: मुनि: नाट्यवेदकथां प्रति वाक्यं प्रत्युवाच | भवद्भि: शुचिभि: तथा अवहितमानसै: भूत्वा ब्रह्मनिर्मित: नाट्यवेदस्य सम्भव: श्रूयताम् |

अर्थ - त्यानंतर त्या मुनींचे वचन ऐकून भरतमुनींनी नाट्यवेदाच्या कथेविषयी म्हटले- (हे मुनिगणहो!) आपण सर्व पवित्र व एकाग्रचित्त होऊन ब्रह्माद्वारे निर्मित अशा नाट्यवेदाची उत्पत्ती ऐकावी .

पूर्वं कृतयुगे विप्रा वृत्ते स्वायम्भुवेऽन्तरे |
त्रेतायुगेऽथ सम्प्राप्ते मनोर्वैवस्वतस्य तु || ८ ||
ग्राम्यधर्मप्रवृत्ते तु कामलोभवशं गते |
ईर्ष्याक्रोधादिसंमूढे लोके सुखितदु:खिते || ९ ||
देवदानवगन्धर्वयक्षरक्षोमहोरगै: |
जम्बूद्वीपे समाक्रान्ते लोकपालप्रतिष्ठिते || १० ||
महेन्द्रप्रमुखैर्देवैरुक्त: किल पितामह: |
क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत् || ११ ||
न वेदव्यवहारोऽयं संश्राव्य: शूद्रजातिषु |
तस्मात्सृजापरं वेदं पञ्चमं सार्ववर्णिकम् || १२ ||

पदच्छेद : - पूर्वं कृतयुगे विप्रा : वृत्ते स्वायम्भुवे अन्तरे |
त्रेतायुगे अथ सम्प्राप्ते मनो : वैवस्वतस्य तु || ८ ||
ग्राम्यधर्म-प्रवृत्ते तु काम-लोभ-वशं गते |
ईर्ष्या-क्रोध-आदि-संमूढे लोके सुखित-दु :खिते || ९ ||
देव-दानव-गन्धर्व-यक्ष-रक्षो-महोरगै : |
जम्बूद्वीपे समाक्रान्ते लोकपाल-प्रतिष्ठिते || १० ||
महेन्द्र-प्रमुखै : देवै : उक्त : किल पितामह : |
क्रीडनीयकम् इच्छाम : दृश्यं श्रव्यं च यत् भवेत् ||११ ||
न वेद-व्यवहार : अयं संश्राव्य : शूद्र-जातिषु |
तस्मात् सृज अपरं वेदं पञ्चमं सार्ववर्णिकम् || १२ ||

अन्वय : - हे विप्रा :, पूर्वं स्वायम्भुवे अन्तरे कृतयुगे वृत्ते, वैवस्वतस्य मनो : त्रेतायुगे सम्प्राप्ते, लोके कामलोभवशंगते, ग्राम्यधर्मप्रवृत्ते, ईर्ष्याक्रोधादिसंमूढे सुखितदु :खिते (सति), लोकपालप्रतिष्ठिते जम्बूद्वीपे देवदानवगन्धर्वयक्षरक्षोमहोरगै : समाक्रान्ते महेन्द्रप्रमुखै : देवै : पितामह : किल उक्त : (भगवन्, वयं) क्रीडनीयकम् इच्छाम : यत् दृश्यं श्रव्यं च भवेत् | शूद्रजातिषु अयं वेदव्यवहार : न संश्राव्य : | तस्मात् पञ्चमं सार्ववर्णिकम् अपरं वेदं सृज |

अर्थ - हे ब्राह्मणजनहो ! अतिप्राचीनकाळी जेव्हा स्वायंभुव मनुच्या मन्वंतरातील सत्ययुग संपून वैवस्वत मनुचा त्रेतायुग सुरू झाला होता, (त्यावेळी) सर्व प्रजाजन काम व लोभाने वशीभूत होऊन ग्राम्यधर्माने प्रवृत्त झाले होते व ईर्ष्या, क्रोधादींच्या आहारी गेल्याने (आपआपल्या कर्माच्या फळानुसार) सुखी व दु:खी झाले होते . तेव्हा अष्ट लोकपालांनी निर्माण केलेल्या जम्बुद्वीपावर सर्व देव, दानव, गंधर्व, यक्ष, राक्षस, सर्पाधिपती एकत्र गोळा झाले असताना, महेंद्रप्रमुख असलेल्या देवतांनी पितामह ब्रह्माकडे प्रार्थना केली, " (हे परमेश्वरा, ) आम्हाला असे मनोरंजनाचे साधन हवे आहे, जे आम्ही बघू आणि ऐकू शकू . शूद्रजातींना वेदव्यवहार निषिद्ध असल्याने सर्व वर्णियांसाठी योग्य असा अन्य पाचवा वेद निर्माण करावा . "

## ❖ ब्रह्माद्वारे नाट्यवेदाची निर्मिती ❖

एवमस्त्विति तानुक्त्वा देवराजं विसृज्य च |
सस्मार चतुरो वेदान्योगमास्थाय तत्त्ववित् || १३ ||
नेमे वेदा यत: श्राव्या: स्त्रीशूद्राद्यासु जातिषु |
वेदमन्यत्तत: स्रक्ष्ये सर्वश्राव्यं तु पञ्चमम् ||१४||

पदच्छेद: - एवम् अस्तु इति तान् उक्त्वा देवराजं विसृज्य च |
सस्मार चतुर: वेदान् योगम् आस्थाय तत्त्ववित् || १३ ||
न इमे वेदा: यत: श्राव्या: स्त्री-शूद्र-आद्यासु जातिषु |
वेदम् अन्यत् तत: स्रक्ष्ये सर्व-श्राव्यं तु पञ्चमम् ||

अन्वय: - "एवम् अस्तु इति" तान् उक्त्वा देवराजं च विसृज्य तत्त्ववित् (स्वयम्भू:) योगम् आस्थाय चतुर: वेदान् सस्मार | "यत: इमे वेदा: स्त्रीशूद्राद्यासु जातिषु न श्राव्या: तत: सर्वश्राव्यं अन्यत् पञ्चमं वेदम् (अहं) स्रक्ष्ये |"

अर्थ - त्या (सर्व देवतांना) "असेच होवो" असे सांगून आणि देवराज इंद्राला परत पाठवून तत्त्ववेत्त्या (ब्रह्मदेवाने) समाधी लावून त्या चारही वेदांचे स्मरण केले आणि (मनात म्हणाले), "वेद हे प्रामुख्याने स्त्री, शूद्र जातींना ऐकवणे योग्य नाही, त्यामुळे सर्वांना ऐकविण्यास योग्य असा अन्य पाचवा वेद मी निर्माण करीन ."

धर्म्यमर्थ्यं यशस्यं च सोपदेश्यं ससङ्ग्रहम् |
भविष्यतश्च लोकस्य सर्वकर्मानुदर्शकम् || १४ ||
सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकम् |
नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम् || १५ ||

पदच्छेद: - धर्म्यम् अर्थ्यं यशस्यं च स-उपदेशं ससङ्ग्रहम् |
भविष्यत: च लोकस्य सर्व-कर्म-अनुदर्शकम् || १४ ||
सर्व-शास्त्रार्थ-सम्पन्नं सर्व-शिल्प-प्रवर्तकम् |
नाट्य-आख्यं पञ्चमं वेदं स-इतिहासं करोमि अहम् || १५ ||

अन्वय: - अहं नाट्याख्यं पञ्चमं वेदं सेतिहासं करोमि (यत्) धर्म्यम् अर्थ्यं यशस्यं सोपदेशं ससङ्ग्रहम् (अस्ति)| भविष्यत: (भाविन:) लोकस्य (तत्) सर्वकर्मानुदर्शकं (भवेत्)|(तत्) सर्वशास्त्रार्थसंपन्नं सर्वशिल्पप्रवर्तकम् (अस्ति)|

अर्थ - (ब्रह्मदेवाने सर्व वेदांचे स्मरण करून सांगितले की,) "मी नाट्य नामक पाचव्या वेदाची इतिहासासहित निर्मिती करीत आहे, जो धर्म, अर्थ आणि यशाची प्राप्ती करून देणारा असेल, जो उपदेश व संग्रहाने युक्त असेल, भविष्यात लोकांच्या सर्वकर्मांचे मार्गदर्शन करणारा असेल, सर्व शास्त्रार्थाने परिपूर्ण व संपूर्ण शिल्पकलेचे दर्शन घडविणारा असेल."

एवं सङ्कल्प्य भगवान् सर्ववेदाननुस्मरन् |
नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसम्भवम् || १६ ||

पदच्छेद: - एवं संकल्प्य भगवान् सर्ववेदान् अनुस्मरन्|
नाट्यवेदं तत: चक्रे चतुर्वेद-अङ्ग-सम्भवम्|| १६ ||

अन्वय: - एवं सङ्कल्प्य सर्व वेदान् अनुस्मरन् तत: भगवान् (ब्रह्मा) चतुर्वेदाङ्गसम्भवं नाट्यवेदं चक्रे|

अर्थ - अशा प्रकारे संकल्प करून सर्व वेदांचे स्मरण करत त्यानंतर भगवान् ब्रह्माने चारही वेदांपासून नाट्यवेदाची निर्मिती केली.

जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च |
यजुर्वेदादभिनयान् रसानथर्वणादपि || १७ ||
धर्मकर्मार्थसंयुक्तं सापदेशं ससंग्रहम् |
रुचिभि: सर्वलोकस्य सर्वकर्मानुदर्शकम् ||
सर्वशास्त्रार्थसंपन्नं सर्वशिल्पसमन्वितम् |
नाट्याख्यं पञ्चमं वेदमितिहासमचिन्तयत् |
वेदोपवेदै: सम्बद्धो नाट्यवेदो महात्मना |
एवं भगवता सृष्टो ब्रह्मणा सर्ववेदिना || १८ ||

पदच्छेद : - जग्राह पाठ्यम् ऋग्वेदात् सामभ्य : गीतम् एव च |
यजुर्वेदात् अभिनयान् रसान् अथर्वणात् अपि || १७ ||
धर्म-कर्म-अर्थ-संयुक्तं स-उपदेशं ससंग्रहम् |
रुचिभि : सर्वलोकस्य सर्व-कर्म-अनुदर्शकम् ||
सर्व-शास्त्रार्थ-संपन्नं सर्व-शिल्प-समन्वितम् |
नाट्य-आख्यं पञ्चमं वेदम् इतिहासम् अचिन्तयत् ||
वेद-उपवेदै : सम्बद्ध : नाट्यवेद : महात्मना |
एवं भगवता सृष्ट : ब्रह्मणा सर्ववेदिना || १८ ||

अन्वय : - (स : ब्रह्मा) ऋग्वेदात् पाठ्यं, सामभ्य : गीतं, यजुर्वेदात् अभिनयान् अथर्वणात् रसान् जग्राह | धर्मकर्मार्थसंयुक्तं सोपदेशं ससंग्रहं सर्वलोकस्य रुचिभि: सर्वकर्मानुदर्शकं सर्वशास्त्रार्थसंपन्नं सर्वशिल्पसमन्वितं नाट्याख्यं पञ्चमं वेदं (नाम) इतिहासम् अचिन्तयत् | एवं महात्मना भगवता सर्ववेदिना ब्रह्मणा वेदोपवेदै : सम्बद्ध : नाट्यवेद : सृष्ट : |

अर्थ - (त्या ब्रह्माने) ऋग्वेदातून पाठ्य, सामवेदातून गीत, यजुर्वेदातून अभिनय व अथर्व वेदातून रस (हे घटक) घेतले . (त्यानंतर त्याने) धर्म, कर्म, अर्थ यांनी युक्त असलेला, उपदेश असणारा, संग्रह असलेला, सर्व जगताच्या आवडींप्रमाणे सगळ्या कर्मांना दर्शविणारा, सर्वशास्त्रांचे सार असलेला, सर्व प्रकारच्या शिल्पांचा अंतर्भाव असलेला, नाट्य नावाचा पाचवा वेद, ज्याला इतिहास असेही म्हटले जाते, त्याचे चिंतन केले . अशाप्रकारे, तत्त्ववेत्त्या ब्रह्मदेवाने वेद व उपवेदांच्या साहाय्याने (वेद व उपवेदांतील त्या त्या आवश्यक तत्त्वांचा वापर करून) 'नाट्यवेदाची' रचना केली .

सर्वलोकहितार्थं तु नाट्यवेदो महात्मना |
उत्पाद्य नाट्यवेदं तु ब्रह्मोवाच सुरेश्वरम् |
इतिहासो मया सृष्ट: स सुरेषु नियुज्यताम् || १९ ||
कुशला ये विदग्धाश्च प्रगल्भाश्च जितश्रमा: |
तेष्वयं नाट्यसंज्ञो हि वेद: संक्राम्यतां त्वया || २० ||

पदच्छेद : - सर्व-लोक-हितार्थं तु नाट्यवेद : महात्मना |
उत्पाद्य नाट्यवेदं तु ब्रह्मा उवाच सुरेश्वरम् |
इतिहास : मया सृष्ट : स : सुरेषु नियुज्यताम् || १९ ||
कुशला : ये विदग्धा : च प्रगल्भा : च जितश्रमा : |
तेषु अयं नाट्यसंज्ञ : हि वेद : संक्राम्यतां त्वया || २० ||

अन्वय : - महात्मना सर्वलोकहितार्थं नाट्यवेद : ( सृष्ट : ) | नाट्यवेदम् उत्पाद्य ब्रह्मा सुरेश्वरम् उवाच, "इतिहास : सृष्ट : मया | (अधुना) स : सुरेषु नियुज्यताम् | ये कुशला : विदग्धा : प्रगल्भा : जितश्रमा : तेषु अयं नाट्यसंज्ञ : वेद : त्वया संक्राम्यताम् |"

अर्थ - महात्मा ब्रह्मदेवाने सर्व जगाच्या कल्याणासाठी नाट्यवेदाची रचना केली . नाट्यवेदाची निर्मिती केल्यानंतर ब्रह्मदेव इंद्राला म्हणाले की, "माझ्याकडून ह्या इतिहासाची (नाट्यवेदाची) निर्मिती झाली आहे, आता देवतांना घेऊन आपण ह्याचा प्रयोग करावा . जे कुशल, विद्वान, प्रौढ आणि अत्यंत परिश्रम करणारे त्यांनाच ह्या नाट्य नामक वेदाचे शिक्षण द्यावे ."

### ❖ ब्रह्मा-इंद्र संवाद ❖

तच्छ्रुत्वा वचनं शक्रो ब्रह्मणा यदुदाहृतम् |
प्राञ्जलि: प्रणतो भूत्वा प्रत्युवाच पितामहम् || २१ ||
ग्रहणे धारणे ज्ञाने प्रयोगे चास्य सत्तम |
अशक्ता भगवन् देवा अयोग्या नाट्यकर्मणि || २२ ||
य इमे वेदगुह्यज्ञा ऋषय: संशितव्रता: |
एतेऽस्य ग्रहणे शक्ता: प्रयोगे धारणे तथा || २३ ||

पदच्छेद : - तत् श्रुत्वा वचनं शक्र : ब्रह्मणा यत् उदाहृतम् |
प्राञ्जलि : प्रणत : भूत्वा प्रत्युवाच पितामहम् || २१ ||
ग्रहणे धारणे ज्ञाने प्रयोगे च अस्य सत्तम |
अशक्ता : भगवन् देवा : अयोग्या : नाट्यकर्मणि || २२ ||
ये इमे वेद-गुह्यज्ञा : ऋषय : संशितव्रता : |
एते अस्य ग्रहणे शक्ता : प्रयोगे धारणे तथा || २३ ||

अन्वय: - ब्रह्मणा यत् उदाहृतं तत् वचनं श्रुत्वा प्राञ्जलि: प्रणत: भूत्वा शक्र: पितामहं प्रत्युवाच | हे सत्तम, अस्य ग्रहणे, धारणे, ज्ञाने, प्रयोगे च देवा: अशक्ता: | भगवन्, (ते) नाट्यकर्मणि अयोग्या: | ये इमे संशितव्रता: वेदगुह्यज्ञा: ऋषय: एते (एव) अस्य ग्रहणे, प्रयोगे तथा धारणे शक्ता: |

अर्थ - ब्रह्मदेवाने जे सांगितले त्या वचनांना ऐकून अगदी विनम्रतेने हात जोडून नमस्कार करत इंद्र ब्रह्मदेवाला म्हणाला, "हे सज्जनश्रेष्ठा, नाट्याचा विषय ग्रहण करण्यास, धारण करण्यास, संपादन करण्यास आणि त्यांचा प्रयोग करण्यास देवगण असमर्थ आहेत. त्यामुळे हे भगवन्, सर्व देवता नाट्यकर्म करण्यास अयोग्य आहेत. परंतु जे वेदांचे रहस्य जाणणारे आणि व्रताचे पालन करणारे ऋषिमुनी आहेत, ते ह्या नाट्यवेदाचे ग्रहण, धारण आणि प्रयोग करण्यास समर्थ आहेत."

श्रुत्वा तु शक्रवचनं मामाहाम्बुजसम्भव: |
त्वं पुत्रशतसंयुक्त: प्रयोक्ताऽस्य भवानघ || २४ ||
आज्ञापितो विदित्वाऽहं नाट्यवेदं पितामहात् |
पुत्रानध्यापयामास प्रयोगं चापि तत्त्वत: || २५ ||

पदच्छेद: - श्रुत्वा तु शक्र-वचनं माम् आह अम्बुज-सम्भव: |
त्वं पुत्र-शत-संयुक्त: प्रयोक्ता अस्य भव अनघ || २४ ||
आज्ञापित: विदित्वा अहं नाट्यवेदं पितामहात् |
पुत्रान् अध्यापयामास प्रयोगं च अपि तत्त्वत: || २५ ||

अन्वय: - शक्रवचनं श्रुत्वा अम्बुजसम्भव: तु माम् आह - 'हे अनघ, पुत्रशतसंयुक्त: त्वम् अस्य (नाट्यस्य) प्रयोक्ता भव |" पितामहात् आज्ञापित: अहं नाट्यवेदं विदित्वा पुत्रान् (तत्) अध्यापयामास | अपि च तत्त्वत: अस्य प्रयोगम् (अपि) (अध्यापयामास) |

अर्थ - इंद्राचे हे बोलणे ऐकून कमलोत्पन्न ब्रह्मदेवाने मला सांगितले की, "हे पुण्यवान भरता! तू तुझ्या शंभर पुत्रांना घेऊन ह्या नाट्याचा प्रयोग कर." अशाप्रकारे पितामहाकडून आज्ञा मिळाल्यावर मी नाट्यवेद जाणून तो माझ्या पुत्रांना शिकवला आणि याच्या प्रयोगाचे तात्त्विक शिक्षणही दिले.

### ❖ शंभर पुत्रांची नावे ❖

शाण्डिल्यं चैव वात्स्यं च कोहलं दत्तिलं तथा |
जटिलाम्बष्टकौ चैव तण्डुमग्निशिखं तथा || २६ ||

पदच्छेद :- शाण्डिल्यं च एव वात्स्यं च कोहलं दत्तिलं तथा |
जटिलाम्बष्टकौ च एव तण्डुम् अग्निशिखं तथा || २६ ||

सैन्धवं सपुलोमानं शाड्वलिं विपुलं तथा |
कपिञ्जलिं बादिरं च यमधूम्रायणौ तथा || २७ ||

पदच्छेद :- सैन्धवं सपुलोमानं शाड्वलिं विपुलं तथा |
कपिञ्जलिं बादिरं च यमधूम्रायणौ तथा || २७ ||

जम्बुध्वजं काकजङ्घं स्वर्णकं तापसं तथा |
कैदारिं शालिकर्णं च दीर्घगात्रं च शालिकम् || २८ ||

पदच्छेद :- जम्बुध्वजं काकजङ्घं स्वर्णकं तापसं तथा |
कैदारिं शालिकर्णं च दीर्घगात्रं च शालिकम् || २८ ||

कौत्सं ताण्डायनिं चैव पिङ्गलं चित्रकं तथा |
बन्धुलं भल्लकं चैव मुष्ठिकं सैन्धवायनम् || २९ ||

पदच्छेद :- कौत्सं ताण्डायनिं च एव पिङ्गलं चित्रकं तथा |
बन्धुलं भल्लकं च एव मुष्ठिकं सैन्धवायनम् || २९ ||

तैतिलं भार्गवं चैव शुचिं बहुलमेव च |
अबुधं बुधसेनं च पाण्डुकर्णं सुकेरलम् || ३० ||

पदच्छेद :- तैतिलं भार्गवं च एव शुचिं बहुलम् एव च |
अबुधं बुधसेनं च पाण्डुकर्णं सुकेरलम् || ३० ||

ऋजुकं मण्डकं चैव शम्बरं वञ्जुलं तथा |
मागधं सरलं चैव कर्तारं चोग्रमेव च || ३१ ||

पदच्छेद : - ऋजुकं मण्डकं च एव शम्बरं वञ्जुलं तथा |
मागधं सरलं च एव कर्तारं च उग्रम् एव च || ३१ ||

तुषारं पार्षदं चैव गौतमं बादरायणम् |
विशालं शबलं चैव सुनाभं मेषमेव च || ३२ ||

पदच्छेद : - तुषारं पार्षदं च एव गौतमं बादरायणम् |
विशालं शबलं च एव सुनाभं मेषम् एव च || ३२ ||

कालियं भ्रमरं चैव तथा पीठमुखं मुनिम् |
नखकुट्टाश्मकुट्टौ च षट्पदं सोत्तमं तथा || ३३ ||

पदच्छेद : - कालियं भ्रमरं च एव तथा पीठमुखं मुनिम् |
नखकुट्टाश्मकुट्टौ च षट्पदं सोत्तमं तथा || ३३ ||

पादुकोपानहौ चैव श्रुतिं चाषस्वरं तथा |
अग्निकुण्डाज्यकुण्डौ च वितण्ड्यं ताण्ड्यमेव च || ३४ ||

पदच्छेद : - पादुकोपानहौ च एव श्रुतिं चाषस्वरं तथा |
अग्निकुण्डाज्यकुण्डौ च वितण्ड्यं ताण्ड्यम् एव च || ३४ ||

कर्तराक्षं हिरण्याक्षं कुशलं दुस्सहं तथा |
लाजं भयानकं चैव बीभत्सं सविचक्षणम् || ३५ ||

पदच्छेद : - कर्तराक्षं हिरण्याक्षं कुशलं दुस्सहं तथा |
लाजं भयानकं च एव बीभत्सं सविचक्षणम् || ३५ ||

पुण्ड्राक्षं पुण्ड्रनासं चाप्यसितं सितमेव च |
विद्युज्जिह्वं महाजिह्वं शालङ्कायनमेव च || ३६ ||

पदच्छेद: - पुण्ड्राक्षं पुण्ड्रनासं च अपि असितं सितम् एव च |
विद्युज्जिह्वं महाजिह्वं शालङ्कायनम् एव च || ३६ ||

श्यामायनं माठरं च लोहिताङ्गं तथैव च |
संवर्तकं पञ्चशिखं त्रिशिखं शिखमेव च || ३७ ||

पदच्छेद: - श्यामायनं माठरं च लोहिताङ्गं तथा एव च |
संवर्तकं पञ्चशिखं त्रिशिखं शिखम् एव च || ३७ ||

(शङ्खवर्णमुखं षण्डं शङ्कुकर्णमथापि च |
शक्रनेमिं गभस्तिं चाप्यंशुमालिं शठं तथा || ३८ ||)

पदच्छेद: - शङ्ख-वर्ण-मुखं षण्डं शङ्कु-कर्णम् अथ अपि च |
शक्रनेमिं गभस्तिं च अपि अंशुमालिं शठं तथा || ३८ ||

विद्युतं शातजङ्घं च रौद्रं वीरमथापि च |
पितामहाज्ञयाऽस्माभिर्लोकस्य च गुणेप्सया || ३९ ||

पदच्छेद: - विद्युतं शातजङ्घं च रौद्रं वीरम् अथ अपि च |
पितामह-आज्ञया अस्माभि: लोकस्य च गुण-ईप्सया || ३९ ||

प्रयोजितं पुत्रशतं यथाभूमिविभागश: |
यो यस्मिन्कर्मणि यथा योग्यस्तस्मिन् स योजित: || ४० ||

पदच्छेद: - प्रयोजितं पुत्रशतं यथाभूमि-विभागश: |
य: यस्मिन् कर्मणि यथा योग्य: तस्मिन् स: योजित: || ४० ||

अन्वय: - शाण्डिल्यं, वात्स्यं, कोहलं, दत्तिलं, जटिलाम्बष्टकौ, तण्डुम्, अग्निशिखं, सैन्धवं, संपुलोमानं, शाड्वलिं, विपुलं, कपिञ्जलिं, बादिरं, यमधूम्रायणौ, जम्बुध्वजं, काकजङ्घं,

स्वर्णकं, तापसं, कैदारिं, शालिकर्णं, दीर्घगात्रं, शालिकं, कौत्सं, ताण्डायनिं, पिङ्गलं, चित्रकं, बन्धुलं, भल्लकं, मुष्ठिकं, सैन्धवायनं, तैतिलं, भार्गवं, शुचिं, बहुलं, अबुधं, बुधसेनं, पाण्डुकर्णं, सुकेरलं, ऋजुकं, मण्डकं, शम्बरं, वञ्जुलं, मागधं, सरलं, कर्तारं, उग्रं, तुषारं, पार्षदं, गौतमं, बादरायणं, विशालं, शबलं, सुनाभं, मेषं, कालियं, भ्रमरं, पीठमुखं, मुनिं, नखकुट्ट-अश्मकुट्टौ, षट्पदं, सोत्तमं, पादुकोपानहौ, श्रुतिं, चाषस्वरं, अग्निकुण्डाज्यकुण्डौ, वितण्ड्यं, ताण्ड्यं, कर्तराक्षं, हिरण्याक्षं, कुशलं, दुस्सहं, लाजं, भयानकं, बीभत्सं, सविचक्षणं, पुण्ड्राक्षं, पुण्ड्रनासम्, असितं, सितं, विद्युज्जिह्वं, महाजिह्वं, शालङ्कायनं, श्यामायनं, माठरं, लोहिताङ्गं, संवर्तकं, पञ्चशिखं, त्रिशिखं, शिखं, शङ्खवर्णमुखं, षण्डं, शङ्कुकर्णं, शक्रनेमिं, गभस्तिं, अंशुमालिं, शठं, विद्युतं, शातजङ्घं, रौद्रं, वीरम् (च एतं) पुत्रशतं पितामहाज्ञया अस्माभिः लोकस्य गुणेप्सया यथाभूमिविभागशः प्रयोजितम् | यः यस्मिन् कर्मणि यथा योग्यः(तथा) सः तस्मिन् (कर्मणि) योजितः|

अर्थ - त्यानंतर ब्रह्मदेवाच्या आज्ञेनुसार व लोकांची गुणाभिलाषा जाणून माझ्या शतपुत्रांना भूमिकेच्या विभागानुसार जो ज्या कार्यासाठी योग्य होता, त्याला ते कार्य सोपविले . ह्या शंभर पुत्रांची नावे - शांडिल्य, वात्स्य, कोहल, दत्तिल, जटिल, अंबष्टक, तंडू, अग्निशिख, सैंधव, सपुलोमा, शाड्वली, विपुल, कपिंजली, बादिर, यम, धूम्रायण, जंबुध्वज, काकजंघ, स्वर्णक, तापस, कैदारी, शालिकर्ण, दीर्घगात्र, शालिकं, कौत्स, तांडायनी, पिंगल, चित्रक, बंधुल, भल्लक, मुष्ठिक, सैंधवायन, तैतिल, भार्गव, शुची, बहुल, अबुध, बुधसेन, पांडुकर्ण, सुकेरल, ऋजुक, मण्डक, शंबर, वंजुल, मागध, सरल, कर्ता, उग्र, तुषार, पार्षद, गौतम, बादरायण, विशाल, शबल, सुनाभ, मेष, कालिय, भ्रमर, पीठमुख, मुनी, नखकुट्ट, अश्मकुट्ट, षट्पद, सोत्तम, पादुक, उपानह, श्रुती, चाषस्वर, अग्निकुंड, आज्यकुंड, वितांड्य, तांड्य, कर्तराक्ष, हिरण्याक्ष, कुशल, दुस्सह, लाज, भयानक, बीभत्स, विचक्षण, पुंड्राक्ष, पुंड्रनास, असित, सित , विद्युज्जिह्व, महाजिह्व, शालंकायन, श्यामायन, माठर, लोहितांग, संवर्तक, पंचशिख, त्रिशिख, शिख, शंखवर्णमुख, षंड, शंकुकर्ण, शक्रनेमी, गभस्ती, अंशुमाली, शठ, विद्युत, शातजंघ, रौद्र आणि वीर .

### ❖ तीन वृत्तींचा वापर ❖

भारतीं सात्वतीं चैव वृत्तिमारभटीं तथा |
समाश्रित: प्रयोगस्तु प्रयुक्तो वै मया द्विजा: || ४१ ||

पदच्छेद: - भारतीं सात्वतीं च एव वृत्तिम् आरभटीं तथा |
समाश्रित: प्रयोग: तु प्रयुक्त: वै मया द्विजा: || ४१ ||

परिगृह्य प्रणम्याथ ब्रह्मा विज्ञापितो मया |
अथाह मां सुरगुरु: कैशिकीमपि योजय || ४२ ||

पदच्छेद: - परिगृह्य प्रणम्य अथ ब्रह्मा विज्ञापित: मया |
अथ आह मां सुरगुरु: कैशिकीम् अपि योजय || ४२ ||

यच्च तस्या: क्षमं द्रव्यं तद्ब्रूहि द्विजसत्तम |
एवं तेनास्म्यभिहित: प्रयुक्तश्च मया प्रभु: || ४३ ||

पदच्छेद: - यत् च तस्या: क्षमं द्रव्यं तत् ब्रूहि द्विजसत्तम |
एवं तेन अस्मि अभिहित: प्रत्युक्त: च मया प्रभु: || ४३ ||

दीयतां भगवन्द्रव्यं कैशिक्या: सम्प्रयोजकम् |
नृत्ताङ्गहारसम्पन्ना रसभावक्रियात्मिका || ४४||

पदच्छेद: - दीयतां भगवन् द्रव्यं कैशिक्या: सम्प्रयोजकम् |
नृत्त-अङ्गहार-सम्पन्ना रस-भाव-क्रियात्मिका || ४४ ||

### ❖ कैशिकीवृत्तीचा वापर ❖

दृष्टा मया भगवतो नीलकण्ठस्य नृत्यत: |
कैशिकी श्लक्ष्णनैपथ्या शृङ्गाररससम्भवा || ४५ ||

पदच्छेद : - दृष्टा मया भगवत : नीलकण्ठस्य नृत्यत : |
कैशिकी श्लक्ष्ण-नैपथ्या शृङ्गार-रस-सम्भवा || ४५ ||

❖ अप्सरांची उत्पत्ती ❖

अशक्या पुरुषै : सा तु प्रयोक्तुं स्त्रीजनादृते |
ततोऽसृजन्महातेजा मनसाऽप्सरसो विभु : || ४६ ||
नाट्यालङ्कारचतुरा : प्रादान्मह्यं प्रयोगत : |

पदच्छेद : - अशक्या पुरुषै : सा तु प्रयोक्तुं स्त्रीजनात् ऋते |
तत : असृजन् महातेजा : मनसा अप्सरस : विभु : || ४६ ||
नाट्य-अलङ्कार-चतुरा : प्रादात् मह्यं प्रयोगत : |

अन्वय : - हे द्विजा : , भारतीं सात्वतीम् आरभटीं च वृत्तिं समाश्रित : प्रयोग : मया प्रयुक्त : | अथ परिगृह्य प्रणम्य मया ब्रह्मा विज्ञापित : | अथ 'कैशिकीम् अपि योजय' (इति) सुरगुरु : माम् आह | 'हे द्विजसत्तम (भरत), तस्या : (कृते) यत् क्षमं द्रव्यं तत् (अपि) ब्रूहि |' एवं तेन अभिहित : अस्मि | (तदा) मया प्रभु : (ब्रह्मा) प्रयुक्त : | "भगवन् (यदि एवं, तर्हि) कैशिक्या : संप्रयोजकं द्रव्यं (कृपया) दीयताम् | भगवत : नीलकण्ठस्य नृत्यत : नृत्ताङ्गहारसम्पन्ना रसभावक्रियात्मका शृङ्गाररससम्भवा श्लक्ष्णनैपथ्या कैशिकी मया दृष्टा | स्त्रीजनात् ऋते पुरुषै : साधु प्रयोक्तुम् अशक्या |" तत : महातेजा : विभु : मनसा नाट्यालङ्कारचतुरा : अप्सरस : असृजन् प्रयोगत : मह्यं प्रादात् (च) |

अर्थ - हे मुनिजनांनो ! भारती, सात्वती आणि आरभटी वृत्तींवर आधारित असा प्रयोग मी तयार केला . त्यानंतर ब्रह्मदेवाकडे जाऊन त्यांना प्रणाम करून केलेल्या तयारीविषयी त्यांना सविस्तर सांगितले . तेव्हा ब्रह्मा मला म्हणाले की, "हे उत्तम ब्राह्मणा (भरता), ह्याबरोबर कैशिकी वृत्तीचा देखील उपयोग करा आणि तसेच त्यासाठी लागणारे जे अपेक्षित द्रव्य असेल तेही सांगावे ." असे त्यांनी मला सांगितले . तेव्हा मी परमेश्वर (ब्रह्मदेवास) म्हटले, "हे भगवन् ! जर असे असेल तर कृपया आपण कैशिकी वृत्तीसाठी लागणारे द्रव्य द्यावे . नृत्त अंगहाराने पूर्ण, रस आणि भाव व्यक्त करणारी, शृंगार रसातून उत्पन्न होणारी आणि सुंदर वेषभूषेने सज्जित अशी ही कैशिकी वृत्ती भगवान

शंकराच्या नृत्याच्या वेळी मी बघितली होती. स्त्रीपात्रांविना पुरुषांनी या वृत्तीचा योग्य प्रयोग करणे अशक्य आहे." त्यामुळे महातेजस्वी ब्रह्माने मानसिक संकल्पाद्वारे नाट्य अलंकारांमध्ये चतुर अशा अप्सरांची निर्मिती केली आणि प्रयोगासाठी त्यांना माझ्याकडे सोपविले.

### ❖ अप्सरांची नावे ❖

मञ्जुकेशीं सुकेशीं च मिश्रकेशीं सुलोचनाम् ॥ ४७ ॥
सौदामिनीं देवदत्तां देवसेनां मनोरमाम् ।
सुदतीं सुन्दरीं चैव विदग्धां विपुलां तथा ॥ ४८ ॥
सुमालां सन्ततिं चैव सुनन्दां सुमुखीं तथा ।
मागधीमर्जुनीं चैव सरलां केरलां धृतिम् ॥ ४९ ॥
नन्दां सपुष्कलां चैव कलमां चैव मे ददौ ।

पदच्छेद :- मञ्जुकेशीं सुकेशीं च मिश्रकेशीं सुलोचनाम् ॥ ४७ ॥
सौदामिनीं देवदत्तां देवसेनां मनोरमाम् ।
सुदतीं सुन्दरीं च एव विदग्धां विपुलां तथा ॥ ४८ ॥
सुमालां सन्ततिं च एव सुनन्दां सुमुखीं तथा ।
मागधीम् अर्जुनीं च एव सरलां केरलां धृतिम् ॥ ४९ ॥
नन्दां सपुष्कलां च एव कलमां च एव मे ददौ ।

अन्वय : - मञ्जुकेशीं सुकेशीं मिश्रकेशीं सुलोचनां सौदामिनीं देवदत्तां देवसेनां मनोरमां सुदतीं सुन्दरीं विदग्धां विपुलां सुमालां सन्ततिं सुनन्दां सुमुखीं मागधीम् अर्जुनीं सरलां केरलां धृतिं नन्दां सपुष्कलां कलमां च मे ददौ ।

अर्थ - मंजुकेशी, सुकेशी, मिश्रकेशी, सुलोचना, सौदामिनी, देवदत्ता, देवसेना, मनोरमा, सुदती, सुंदरी, विदग्धा, विपुला, सुमाला, संतती, सुनंदा, सुमुखी, मागधी, अर्जुनी, सरला, केरला, धृती, नंदा, सपुष्कला आणि कलमा ह्या अप्सरांना प्रयोगासाठी माझ्याकडे सोपविण्यात आले.

### ❖ नारद इ. ची गायनवादनासाठी नियुक्ती ❖

स्वातिर्भाण्डनियुक्तस्तु सह शिष्यै: स्वयम्भुवा ‖ ५० ‖
नारदाद्याश्च गन्धर्वा गानयोगे नियोजिता: |
एवं नाट्यमिदं सम्यग्बुद्ध्वा सर्वै: सुतै: सह ‖ ५१ ‖
स्वातिनारदसंयुक्तो वेदवेदाङ्गकारणम् |
उपस्थितोऽहं ब्रह्माणं प्रयोगार्थं कृताञ्जलि: ‖ ५२ ‖

पदच्छेद: - स्वाति: भाण्डनियुक्त: तु सह शिष्यै: स्वयम्भुवा ‖ ५० ‖
नारदाद्या: च गन्धर्वा: गानयोगे नियोजिता: |
एवं नाट्यम् इदं सम्यक् बुद्ध्वा सर्वै: सुतै: सह ‖ ५१ ‖
स्वाति-नारद-संयुक्त: वेद-वेदाङ्ग-कारणम् |
उपस्थित: अहं ब्रह्माणं प्रयोगार्थं कृताञ्जलि: ‖ ५२ ‖

अन्वय: - स्वयंभुवा शिष्यै: सह स्वाति: (मुनि:) भाण्डनियुक्त: | नारदाद्या: गन्धर्वा: च गानयोगे नियोजिता: | एवं इदं नाट्यं सम्यक् बुद्ध्वा स्वातिनारदसंयुक्त: कृताञ्जलि: अहं सर्वै: सुतै: सह वेदवेदाङ्गकारणं ब्रह्माणं प्रयोगार्थम् उपस्थित: |

अर्थ - ब्रह्मादेवाने स्वाती मुनी यांना त्यांच्या शिष्यांसह वाद्यवृंदासाठी नियुक्त केले आणि नारदप्रमुख असलेल्या गंधर्वांना गायनासाठी निवडले. अशा प्रकारे हे नाट्य पूर्णपणे जाणून घेऊन स्वाती आणि नारद यांच्या समवेत मी हात जोडून सर्व पुत्रांसह (शिष्यांसह) वेदवेदांगांना कारणीभूत असलेल्या ब्रह्मदेवासमोर प्रयोगासाठी उपस्थित राहिलो.

### ❖ इंद्रध्वज महोत्सवात नाट्यवेदाचा प्रयोग ❖

नाट्यस्य ग्रहणं प्राप्तं ब्रूहि किं करवाण्यहम् |
एतत्तु वचनं श्रुत्वा प्रत्युवाच पितामह: ‖ ५३ ‖
महानयं प्रयोगस्य समय: प्रत्युपस्थित: |
अयं ध्वजमह: श्रीमान् महेन्द्रस्य प्रवर्तते ‖ ५४ ‖
अत्रेदानीमयं वेदो नाट्यसंज्ञ: प्रयुज्यताम् |

पदच्छेद: - नाट्यस्य ग्रहणं प्राप्तं ब्रूहि किं करवाणि अहम्|
एतत् तु वचनं श्रुत्वा प्रत्युवाच पितामह:|५३||
महान् अयं प्रयोगस्य समय: प्रत्युपस्थित:|
अयं ध्वजमह: श्रीमान् महेन्द्रस्य प्रवर्तते||५४||
अत्र इदानीम् अयं वेद: नाट्यवेद: प्रयुज्यताम्||

अन्वय: - (अहम् उक्तवान्), "नाट्यस्य ग्रहणं (ज्ञानं) प्राप्तम्|(अधुना) अहं किं करवाणि (तद्) ब्रूहि|" एतत् तु वचनं श्रुत्वा पितामह: प्रत्युवाच, "प्रयोगस्य अयं महान् समय: प्रत्युपस्थित:| महेन्द्रस्य अयं श्रीमान् ध्वजमह: प्रवर्तते| इदानीम् अत्र नाट्यसंज्ञ: वेद: प्रयुज्यताम्|"

अर्थ - मी म्हटले, "हे भगवन! नाट्याचे अध्ययन पूर्ण झाले आहे. आता पुढे काय करायचे ते आपण सांगावे" हे शब्द ऐकल्यानंतर पितामह (ब्रह्मा) म्हणाले, "प्रयोगासाठी ही उत्तम वेळ आहे. इंद्राचा हा सौभाग्यशाली ध्वजमहोत्सव होणार आहे. इथेच या नाट्य नामक वेदाचा प्रयोग करावा."

ततस्तस्मिन्ध्वजमहे निहतासुरदानवे || ५५ ||
प्रहृष्टामरसंकीर्णे महेन्द्रविजयोत्सवे |
पूर्वं कृता मया नान्दी ह्याशीर्वचनसंयुता || ५६ ||
अष्टाङ्गपदसंयुक्ता विचित्रा वेदनिर्मिता |
तदन्तेऽनुकृतिर्बद्धा यथा दैत्या: सुरैर्जिता: || ५७ ||
सम्फेटविद्रवकृता च्छेद्यभेद्याहवात्मिका |
ततो ब्रह्मादयो देवा: प्रयोगपरितोषिता: || ५८ ||
प्रददुर्मत्सुतेभ्यस्तु सर्वोपकरणानि वै |

पदच्छेद: - तत: तस्मिन् ध्वजमहे निहत-असुर-दानवे||५५||
प्रहृष्ट-अमर-संकीर्णे महेन्द्र-विजय-उत्सवे|
पूर्वं कृता मया नान्दी हि आशीर्वचन-संयुता||५६||
अष्ट-अङ्ग-पद-संयुक्ता विचित्रा वेद-निर्मिता|

तदन्ते अनुकृति: बद्धा यथा दैत्या: सुरै: जिता: ‖५७‖
सम्फेट-विद्रव-कृता छेद्य-भेद्य-आहवात्मिका |
तत: ब्रह्मा-आदय: देवा: प्रयोग-परितोषिका: ‖५८‖
प्रददु: मत्सुतेभ्य: तु सर्व-उपकरणानि वै ‖

अन्वय: - (भरतेन उक्तम्), “तत: तस्मिन् निहतासुरदानवे प्रहृष्टामरसंकीर्णे महेन्द्रविजयोत्सवे ध्वजमहे पूर्वं मया नान्दी कृता | (एषा नान्दी)आशीर्वचनसंयुता, वेदनिर्मिता, विचित्रा, अष्टांगपदसंयुक्ता (आसीत्) | तदन्ते यथा सुरै: दैत्या: जिता: (तादृशी) अनुकृति: बद्धा | (एषा अनुकृति:) सम्फेटविद्रवकृता छेद्यभेद्याहवात्मिका (आसीत्)| तत: ब्रह्मादय: देवा: प्रयोगपरितोषिता: | हृष्टमनस: (देवा:) सर्वोपकरणानि न: प्रददु: |”

अर्थ - तेव्हा भरताने म्हटले, “दानवांना मारून इंद्राने मिळवलेल्या विजयप्रीत्यर्थ होणाऱ्या आणि जिथे देवगण खूप आनंदी होते, अशा त्या ध्वजमहोत्सवामध्ये नाट्यप्रयोगाची सुरूवात नांदीने केली. आशीर्वचनांनी युक्त, वेदनिर्मित, आठ-पदांनी युक्त अशी ‘विचित्र नांदी’ मी म्हटली. नांदी संपल्यावर मी देवतांनी दानवांवर मिळविलेल्या विजयाची एक अनुकृती सादर केली. यामध्ये क्रोधपूर्ण संवाद (संफेट), मारधाड इ. युद्धासाठी केली जाणारी आह्वाने होती. या प्रयोगामुळे ब्रह्मादी देव संतुष्ट झाले आणि प्रसन्नमनाने त्यांनी अनेक वस्तू सर्वांना पुरस्कार म्हणून दिल्या.”

### ❖ देवतांद्वारे साधनसामग्री देणे ❖

प्रीतस्तु प्रथमं शक्रो दत्तवान्स्वं ध्वजं शुभम् ‖ ५९ ‖
ब्रह्मा कुटिलकं चैव भृङ्गारं वरुण: शुभम् |
सूर्यश्छत्रं शिवस्सिद्धिं वायुर्व्यजनमेव च ‖ ६० ‖
विष्णु: सिंहासनं चैव कुबेरो मकुटं तथा |
श्राव्यत्वं प्रेक्षणीयस्य ददौ देवी सरस्वती ‖ ६१ ‖

पदच्छेद: - प्रीत: तु प्रथमं शक्र: दत्तवान् स्वं ध्वजं शुभम् |५९‖
ब्रह्मा कुटिलकं च एव भृङ्गारं वरुण: शुभम् |

सूर्य: छत्रं शिव: सिद्धिं वायु: व्यजनम् एव च ||६० ||
विष्णु: सिंहासनं च एव कुबेर: मकुटं तथा |
श्राव्यत्वं प्रेक्षणीयस्य ददौ देवी सरस्वती || ६१ ||

अन्वय: - प्रथमं प्रीत: शक्र: स्वं शुभं ध्वजं दत्तवान् | ब्रह्मा कुटिलकं (दत्तवान्) | वरुण: भृङ्गारं, सूर्य: छत्रं, शिव: सिद्धिं, वायु: व्यजनं, विष्णु: सिंहासनं, कुबेर: मकुटं, देवी सरस्वती प्रेक्षणीयस्य (नाटकस्य) श्राव्यत्वं ददौ |

अर्थ - प्रसन्न झालेल्या इंद्राने सर्वप्रथम स्वत:चा शुभ ध्वज दिला. ब्रह्माने कुटिलक (वक्रदण्ड) दिला. वरुणाने झारी, सूर्याने छत्र, शिवाने सिद्धी, वायूने पंखा दिला. विष्णूने सिंहासन, कुबेराने मुकुट, सरस्वतीने प्रेक्षणीय (नाटकादी) ऐकण्यासाठी क्षमता दिली.

शेषा ये देवगन्धर्वा यक्षराक्षसपन्नगा: |
तस्मिन्सदस्यभिप्रेतान्नानाजातिगुणाश्रयान् || ६२ ||
अंशांशैर्भाषितं भावान् रसान् रूपं बलं तथा |
दत्तवन्तः प्रहृष्टास्ते मत्सुतेभ्यो दिवौकसः || ६३ ||

पदच्छेद: - शेषा: ये देव-गन्धर्वा: यक्ष-राक्षस-पन्नगा: |
तस्मिन् सदसि अभिप्रेतान् नाना-जाति-गुण-आश्रयान् || ६२ ||
अंशांशै: भाषितं भावान् रसान् रूपं बलं तथा |
दत्तवन्त: प्रहृष्टा: ते मत्सुतेभ्य: दिवौकस: || ६३ ||

अन्वय: - तस्मिन् सदसि ये शेषा: दिवौकस: देवगन्धर्वा: यक्षराक्षसपन्नगा: प्रहृष्टा: ते अभिप्रेतान् नानाजातिगुणाश्रयान् भाषितं भावान् रसान् रूपं तथा बलम् अंशांशै: मत्सुतेभ्य: दत्तवन्त: |

अर्थ - याशिवाय त्या सभेमध्ये स्वर्गात राहणारे जे शेष देव, गंधर्व, यक्ष, राक्षस आणि पन्नग होते त्या देवतांनी प्रसन्न होऊन विविध जाती आणि मान्यताप्राप्त गुणांच्या आश्रयी असणारे संवाद, भाव, रस, रूप, क्रिया तसेच बळ इ. साधनसामग्री अंशरूपाने माझ्या पुत्रांना दिली.

## ❖ विरूपाक्ष इ. द्वारे विघ्नांची निर्मिती ❖

एवं प्रयोगे प्रारब्धे दैत्यदानवनाशने |
अभवन्क्षुभिता: सर्वे दैत्या ये तत्र सङ्गता: || ६४ ||
विरूपाक्षपुरोगांश्च विघ्नाान्प्रोत्साह्य तेऽब्रुवन् |
न क्षमिष्यामहे नाट्यमेतदागम्यतामिति || ६५ ||

पदच्छेद: - एवं प्रयोगे प्रारब्धे दैत्य-दानव-नाशने |
अभवन् क्षुभिता : सर्वे दैत्या : ये तत्र सङ्गता : || ६४ ||
विरूपाक्ष-पुरोगान् च विघ्नान् प्रोत्साह्य ते अब्रुवन् |
न क्षमिष्यामहे नाट्यम् एतत् आगम्यताम् इति || ६५ ||

अन्वय: - एवं दैत्यदानवनाशने प्रयोगे प्रारब्धे सर्वे ये दैत्या : तत्र संगता : (ते) क्षुभिता : अभवन् | ते विरूपाक्षपुरोगान् विघ्नान् प्रोत्साह्य अब्रुवन्, "एतत् नाट्यं न क्षमिष्यामहे |(तर्हि) आगम्यताम् इति |"

अर्थ - अशा प्रकारे दैत्य व दानवांचा नाश दाखविणारा प्रयोग सुरू झाल्यावर तेथे उपस्थित असलेले सर्व दानव भडकले. तेथे असलेल्या विरूपाक्ष नामक दैत्याला पुढे करून आणि विघ्नकारी तत्त्वांना निर्माण करून ते दैत्य या सर्वांना म्हणाले, "अशा प्रकारच्या नाट्याचे प्रयोग आम्ही सहन करणार नाही तेव्हा सर्वांनी इकडे यावे."

ततस्तैरसुरै: सार्धं विघ्ना मायामुपाश्रिता: |
वाचश्चेष्टां स्मृतिं चैव स्तम्भयन्ति स्म नृत्यताम् || ६६ ||
तथा विध्वंसनं दृष्ट्वा सूत्रधारस्य देवराट् |
कस्मात्प्रयोगवैषम्यमित्युक्त्वा ध्यानमाविशत् || ६७ ||
अथापश्यत्सदो विघ्नै: समन्तात्परिवारितम् |
सहेतरै: सूत्रधारं नष्टसंज्ञं जडीकृतम् || ६८ ||

पदच्छेद: - तत: तै: असुरै: सार्धं विघ्ना: मायाम् उपाश्रिता: |
वाच: चेष्टां स्मृतिं च एव स्तम्भयन्ति स्म नृत्यताम् || ६६ ||

तथा विध्वंसनं दृष्ट्वा सूत्रधारस्य देवराट्।
कस्मात् प्रयोग-वैषम्यम् इति उक्त्वा ध्यानम् आविशत् ॥६७॥
अथ अपश्यत् सद: विघ्नै: समन्तात् परिवारितम्।
सहेतरै: सूत्रधारं नष्टसंज्ञं जडीकृतम् ॥६८॥

अन्वय: - तत: मायाम् उपाश्रिता: विघ्ना: तै: असुरै: सार्धं नृत्यतां (नटानां) वाच: चेष्टां स्मृतिम् एव च स्तम्भयन्ति स्म। सूत्रधारस्य तथा विध्वंसनं दृष्ट्वा स: देवराट् "कस्मात् प्रयोगवैषम्यम्" इति उक्त्वा ध्यानम् आविशत्। अथ तदा (स:) विघ्नै: समन्तात् परिवारितं सद:, सहेतरै: जडीकृतं नष्टसंज्ञं सूत्रधारं (च) अपश्यत्।

अर्थ - त्यानंतर मायेचा आश्रय घेतलेल्या विघ्नकारी तत्त्वांनी त्या सर्व असुरांच्या साहाय्याने नृत्य करीत असलेल्या अभिनेत्यांची वाणी, चेष्टा (हालचाली) व स्मृती निष्क्रिय केली. सूत्रधाराची तशी दुर्दशा पाहून इंद्र "का बरे प्रयोगात बाधा निर्माण झाली?" असे म्हणून ध्यानस्थ बसला. त्यानंतर त्याने पाहिले की, विघ्नांनी सर्व बाजूंनी सभेला घेरले आहे आणि इतर नटांसह सूत्रधार निश्चेष्ट व चेतनारहित झाला आहे.

### ❖ जर्जराची उत्पत्ती ❖

उत्थाय त्वरितं शक्र: गृहीत्वा ध्वजमुत्तमम्।
सर्वरत्नोज्ज्वलतनु: किञ्चिदुद्वृत्तलोचन: ॥ ६९ ॥
रङ्गपीठगतान्विघ्नानसुरांश्चैव देवराट्।
जर्जरीकृतदेहांस्तानकरोज्जर्जरेण स: ॥ ७० ॥

पदच्छेद: - उत्थाय त्वरितं शक्र: गृहीत्वा ध्वजम् उत्तमम्।
सर्व-रत्न-उज्ज्वल-तनु: किञ्चित् उद्वृत्त-लोचन: ॥६९॥
रङ्गपीठ-गतान् विघ्नान् असुरान् च एव देवराट्।
जर्जरीकृत-देहान् तान् अकरोत् जर्जरेण स: ॥७०॥

अन्वय: - सर्वरत्नोज्ज्वलतनु: किञ्चित् उद्वृत्तलोचन: स: देवराट् शक्र: त्वरितम् उत्थाय उत्तमं ध्वजं गृहीत्वा रङ्गपीठगतान् तान् विघ्नान् असुरान् च जर्जरेण (ध्वजेन) जर्जरीकृतदेहान् अकरोत्।

अर्थ - (हे पाहून) सर्व रत्नांपेक्षाही तेज:पुंज शरीर असलेल्या, रागामुळे डोळे किंचित वरच्या बाजूस चढलेल्या, देवांचा राजा असलेल्या त्या इंद्राने लगेचच उठून आपला उत्तम ध्वज (जर्जर) घेऊन रंगपीठावरील सर्व विघ्नांना व असुरांना जर्जर ध्वजाद्वारे घायाळ करून नष्ट केले .

निहतेषु च सर्वेषु विघ्नेषु सह दानवै: |
सम्प्रहृष्य ततो वाक्यमाहु: सर्वे दिवौकस: ‖ ७१ ‖
अहो प्रहरणं दिव्यमिदमासादितं त्वया |
जर्जरीकृतसर्वाङ्गा येनैते दानवा: कृता: ‖ ७२ ‖

पदच्छेद: - निहतेषु च सर्वेषु विघ्नेषु सह दानवै: |
सम्प्रहृष्य तत: वाक्यम् आहु: सर्वे दिवौकस: ‖ ७१‖
अहो प्रहरणं दिव्यम् इदम् आसादितम् त्वया |
जर्जरीकृत-सर्वाङ्गा: येन एते दानवा: कृता: ‖ ७२ ‖

अन्वय: - दानवै: सह सर्वेषु विघ्नेषु निहतेषु तत: सम्प्रहृष्य सर्वे दिवौकस: वाक्यम् आहु: "अहो, त्वया इदं दिव्यं प्रहरणम् आसादितं येन एते दानवा: जर्जरीकृतसर्वाङ्गा: कृता: |

अर्थ - दानवांसहित सर्व विघ्नांना नष्ट झालेले पाहून प्रसन्न झालेले सर्व देव बोलू लागले, "आज तुम्हांला हे दिव्य अस्त्र प्राप्त झाले आहे, ज्याच्याद्वारे दानव जर्जरीत झाले आहेत...

यस्मादनेन ते विघ्ना सासुरा जर्जरीकृता: |
तस्माज्जर्जर एवेति नामतोऽयं भविष्यति ‖ ७३ ‖
शेषा ये चैव हिंसार्थमुपयास्यन्ति हिंसका: |
दृष्ट्वैव जर्जरं तेऽपि गमिष्यन्त्येवमेव तु ‖ ७४ ‖
एवमेवास्त्विति तत: शक्र: प्रोवाच तान्सुरान् |
रक्षाभूतश्च सर्वेषां भविष्यत्येष जर्जर: ‖ ७५ ‖

पदच्छेद: - यस्मात् अनेन ते विघ्ना: सासुरा: जर्जरीकृता: |
तस्मात् जर्जर एव इति नामत: अयं भविष्यति ‖ ७३ ‖

शेषा : ये च एव हिंसार्थम् उपयास्यन्ति हिंसका :|
दृष्ट्वा एव जर्जरं ते अपि गमिष्यन्ति एवम् एव तु ||७४||
एवम् एव अस्तु इति तत : शक्र : प्रोवाच तान् सुरान्|
रक्षाभूत : च सर्वेषां भविष्यति एष : जर्जर :|| ७५ ||

अन्वय: - यस्मात् अनेन ते सासुरा: विघ्ना: जर्जरीकृता: तस्मात् अयं जर्जर: एव इति नामत: भविष्यति| शेषा : च ये हिंसका : हिंसार्थम् उपयास्यन्ति ते अपि जर्जरं दृष्ट्वा एव एवम् एव गमिष्यन्ति|" तत : "एवम् एव अस्तु" इति शक्र : तान् सुरान् प्रोवाच| एष : जर्जर : तु सर्वेषां रक्षाभूत : भविष्यति|

अर्थ - ज्या अर्थी याच्यामुळे सर्व असुरांसहित विघ्न जर्जरीत झाले त्या अर्थी पुढे भविष्यात हा 'जर्जर' ह्या नावाने प्रसिद्ध होईल आणि शिल्लक राहिलेले जे विघ्न भविष्यात नाट्यप्रयोगाच्या वेळी उपस्थित होतील, त्यांचीसुद्धा जर्जराला पाहून अशीच अवस्था होईल." तेव्हा त्या सर्व देवतांना इंद्राने "असेच होवो" असे सांगितले व पुढे असे म्हणाला की, "खरोखरच हा जर्जर सर्वांचा रक्षणकर्ता होईल."

### ❖ विघ्नांच्या शांतीसाठी भरताची प्रार्थना ❖

प्रयोगे प्रस्तुते ह्येवं स्फीते शक्रमहे पुन:|
त्रासं सञ्जनयन्ति स्म विघ्ना शेषास्तु नृत्यताम्|| ७६ ||
दृष्ट्वा तेषां व्यवसितं दैत्यानां विघ्नकारकम्|
उपस्थितोऽहं ब्रह्माणं सुतै: सर्वै: समन्वित:|| ७७ ||

पदच्छेद: - प्रयोगे प्रस्तुते हि एवं स्फीते शक्रमहे पुन:|
त्रासं सञ्जनयन्ति स्म विघ्ना : शेषा : तु नृत्यताम्|| ७६ ||
दृष्ट्वा तेषां व्यवसितं दैत्यानां विप्रकारजम्|
उपस्थित : अहं ब्रह्माणं सुतै : सर्वै : समन्वित :|| ७७ ||

अन्वय: - एवं हि स्फीते शक्रमहे प्रयोगे प्रस्तुते शेषा: विघ्ना: पुन: नृत्यतां त्रासं सञ्जनयन्ति स्म| तेषां विप्रकारजं व्यवसितं दृष्ट्वा सर्वै: सुतै: समन्वित: अहं (भरत:) ब्रह्माणम् उपस्थित: ।

अर्थ - इंद्रध्वजमहोत्सवाच्या प्रसंगी नाट्याभिनय सादर करीत असताना ते शिल्लक राहिलेले विघ्न पुन्हा नटांना त्रास देऊ लागले. तेव्हा त्या दैत्यांचे विघ्नकारक उद्योग जाणून मी माझ्या सर्व पुत्रांसह (शिष्यांसह) ब्रह्मदेवासमोर उपस्थित झालो व त्यांना म्हणालो,

निश्चिता भगवन्विघ्ना नाट्यस्यास्य विनाशने |
अस्य रक्षाविधिं सम्यगाज्ञापय सुरेश्वर || ७८ ||

पदच्छेद:- निश्चिता: भगवन् विघ्ना: नाट्यस्य अस्य विनाशने |
अत: रक्षाविधिं सम्यक् आज्ञापय सुरेश्वर || ७८ ||

अन्वय: - "भगवन्, अस्य नाट्यस्य विनाशिने विघ्ना: निश्चिता: | अत: हे सुरेश्वर (ब्रह्मन्), (अस्य) सम्यक् रक्षाविधिं आज्ञापय |"

अर्थ - "हे भगवन्! ह्या विघ्नांनी नाट्याचा विनाश करण्याचे निश्चित केले आहे. त्यामुळे हे सुरेश्वरा! ह्याच्या रक्षणासाठी योग्य तो विधी सांगा."

❖ विश्वकर्म्याद्वारे नाट्यगृहाची निर्मिती ❖

ततश्च विश्वकर्माणं ब्रह्मोवाच प्रयत्नत: |
कुरु लक्षणसम्पन्नं नाट्यवेश्म महामते || ७९ ||

पदच्छेद:- तत: च विश्वकर्माणं ब्रह्मा उवाच प्रयत्नत: |
कुरु लक्षण-सम्पन्नं नाट्यवेश्म महामते || ७९ ||

अन्वय: - तत: स: ब्रह्मा विश्वकर्माणम् उवाच, "हे महामते, प्रयत्नत: लक्षणसम्पन्नं नाट्यवेश्म कुरु |"

अर्थ - तेव्हा माझी प्रार्थना ऐकून ब्रह्मा विश्वकर्म्याला म्हणाले, "हे बुद्धिमान! तुम्ही सर्व लक्षणांनी युक्त अशा एका नाट्यगृहाची निर्मिती करा."

ततोऽचिरेण कालेन विश्वकर्मा महच्छुभम् |
सर्वलक्षणसंपन्नं कृत्वा नाट्यगृहं तु स: || ८० ||

प्रोक्तवान्द्रुहिणं गत्वा सभायान्तु कृताञ्जलिः |
सज्जं नाट्यगृहं देव तदवेक्षितुमर्हसि || ८१ ||
ततः सह महेन्द्रेण सुरैः सर्वैश्च सेतरैः |
आगतस्त्वरिता द्रष्टुं द्रुहिणो नाट्यमण्डपम् || ८२ ||

पदच्छेदः - ततः अचिरेण कालेन विश्वकर्मा महत् शुभम् |
सर्वलक्षण-संपन्नं कृत्वा नाट्यगृहं तु सः || ८० ||
प्रोक्तवान् द्रुहिणं गत्वा सभायां तु कृत-अञ्जलिः |
सज्जं नाट्यगृहं देव तत् अवेक्षितुम् अर्हसि || ८१ ||
ततः सह महेन्द्रेण सुरैः सर्वैः च सेतरैः |
आगतः त्वरिता द्रष्टुं द्रुहिणः नाट्यमण्डपम् || ८२ ||

अन्वयः - ततः अचिरेण कालेन विश्वकर्मा सर्वलक्षणसंपन्नं महत् शुभं नाट्यगृहं कृत्वा सभायां गत्वा कृताञ्जलिः सः द्रुहिणं प्रोक्तवान्, "देव, नाट्यगृहं सज्जम्। तत् अवेक्षितुम् अर्हसि |" ततः महेन्द्रेण, सेतरैः सर्वैः सुरैः सह द्रुहिणः त्वरिता (गत्या) नाट्यमण्डपं द्रष्टुम् आगतः।

अर्थ - तेव्हा थोड्याच अवधीमध्ये विश्वकर्म्याने सर्व लक्षणांनी संपन्न, मोठे, शुभकारक असे नाट्यगृह तयार केले आणि सभेत जाऊन हात जोडून त्याने ब्रह्माला म्हटले - "हे देव! नाट्यगृह तयार झाले आहे, तरी आपण ते पाहून घ्यावे." तेव्हा, इंद्र व इतर सर्व देवतांसह ब्रह्मदेव लगेचच नाट्यमंडप पाहण्यास आले.

### ❖ नाट्यमंडपाच्या रक्षणासाठी देवतादींची स्थापना ❖

दृष्ट्वा नाट्यगृहं ब्रह्मा प्राह सर्वान्सुरांस्ततः |
अंशभागैर्भवद्भिस्तु रक्ष्योऽयं नाट्यमण्डपः || ८३ ||
रक्षणो मण्डपस्याथ विनियुक्तस्तु चन्द्रमाः |
लोकपालास्तथा दिक्षु विदिक्ष्वपि च मारुताः || ८४ ||

पदच्छेद : - दृष्ट्वा नाट्यगृहं ब्रह्मा प्राह सर्वान् सुरान् तत : |
अंशभागै : भवद्भि : तु रक्ष्य : अयं नाट्यमण्डप : || ८३ ||
रक्षणे मण्डपस्य अथ विनियुक्त : तु चन्द्रमा : |
लोकपाला : तथा दिक्षु विदिक्षु अपि च मारुता : || ८४ ||

अन्वय : - ततः नाट्यगृहं दृष्ट्वा ब्रह्मा सर्वान् सुरान् प्राह, "अयं नाट्यमण्डपः भवद्भिः अंशभागैः रक्ष्यः |" अस्य मण्डपस्य रक्षणे रजनीकरः नियुक्तः | दिक्षु लोकपालाः, विदिक्षु मारुता : (नियुक्ताः ) |

अर्थ - तेव्हा नाट्यगृह पाहून ब्रह्मदेव सर्व देवांना म्हणाले, "तुम्ही आपआपल्या अंशरूपाने ह्या नाट्यमंडपाचे रक्षण करावे ." या नाट्यमंडपाच्या रक्षणासाठी (विशेष रूपाने) चंद्राची नियुक्ती केली . (चार मुख्य) दिशांच्या रक्षणासाठी त्या त्या लोकपालांची नियुक्ती केली तर उपदिशांच्या रक्षणासाठी मरुद्‌गणांना नियुक्त केले .

नेपथ्यभूमौ मित्रस्तु निक्षिप्तो वरुणोऽम्बरे |
वेदिकारक्षणे वह्निर्भाण्डे सर्वदिवौकस : || ८५ ||
वर्णाश्चत्वार एवाथ स्तम्भेषु विनियोजिता : |
आदित्याश्चैव रुद्राश्च स्थिता : स्तम्भान्तरेष्वथ || ८६ ||

पदच्छेद : - नेपथ्यभूमौ मित्र : तु निक्षिप्त : वरुण : अम्बरे |
वेदिका-रक्षणे वह्नि : भाण्डे सर्व-दिवौकस : || ८५ ||
वर्णा : चत्वार : एव अथ स्तम्भेषु विनियोजिता : |
आदित्या : च एव रुद्रा : च स्थिता : स्तम्भान्तरेषु अथ || ८६ ||

अन्वय : - नेपथ्यभूमौ मित्र :, अम्बरे वरुण :, वेदिकारक्षणे वह्नि : निक्षिप्त : | भाण्डे सर्वदिवौकस : (निक्षिप्ता :)| अथ चत्वार : वर्णा : एव स्तम्भेषु विनियोजिता : | आदित्या : रुद्रा : च स्तम्भान्तरेषु स्थिता : |

अर्थ - नेपथ्यभूमीवर रक्षणासाठी सूर्याची, आकाशामध्ये वरुणाची आणि वेदिकेच्या रक्षणासाठी अग्नीची नियुक्ती केली . वाद्यांच्या रक्षणासाठी मेघांची निवड झाली. स्तंभांजवळ चार वर्णांना विशेषरूपाने नियुक्त करण्यात आले . स्तंभांच्या मध्यभागी आदित्य व रुद्रदेवांची स्थापना केली .

धारणीष्वथ भूतानि शालास्वप्सरसस्तथा |
सर्ववेश्मसु यक्षिण्यो महीपृष्ठे महोदधिः || ८७ ||
द्वारशालानियुक्तौ तु कृतान्तः काल एव च |
स्थापितौ द्वारपत्रेषु नागमुख्यौ महाबलौ || ८८ ||

पदच्छेदः - धारणीषु अथ भूतानि शालासु अप्सरसः तथा |
सर्व-वेश्मसु यक्षिण्यः महीपृष्ठे महोदधिः || ८७ ||
द्वारशाला-नियुक्तौ तु कृतान्तः कालः एव च |
स्थापितौ द्वारपत्रेषु नागमुख्यौ महाबलौ || ८८ ||

अन्वयः - धारणीषु भूतानि तथा शालासु अप्सरसः, सर्ववेश्मसु यक्षिण्यः महोदधिः (निक्षिप्तः) | कृतान्तः कालः एव द्वारशालानियुक्तौ | द्वारपत्रेषु महाबलौ नागराजौ स्थापितौ |

अर्थ - दोन खांबांच्या वरच्या बाजूचा मध्यभाग झाकण्यासाठी ज्या शिळांचा वापर होतो त्यास धारणी असे म्हणतात. धारणीचे रक्षण करण्यासाठी भूतगणांची आणि वरील सभागृहासाठी अप्सरांची नियुक्ती केली. खिडक्या आणि नेपथ्यगृहाच्या रक्षणासाठी यक्षिणींची तर जमिनीच्या रक्षणासाठी समुद्राची नियुक्ती केली. नाट्यगृहाच्या दरवाजांवर यमराज आणि काळ यांची निवड केली तर दरवाजांच्या दोन्ही कवाडांमध्ये महाबलवान अशा दोन नागांना (अनंत आणि गुलिक यांना) नियुक्त केले.

देहल्यां यमदण्डस्तु शूलं तस्योपरि स्थितम् |
द्वारपालौ स्थितौ चोभौ नियतिर्मृत्युरेव च || ८९ ||
पार्श्वे च रङ्गपीठस्य महेन्द्रः स्थितवान्स्वयम् |
स्थापिता मत्तवारण्यां विद्युद्दैत्यनिषूदनी || ९० ||

पदच्छेदः - देहल्यां यमदण्डः तु शूलं तस्य उपरि स्थितम् |
द्वारपालौ स्थितौ च उभौ नियतिः मृत्युः एव च || ८९ ||
पार्श्वे च रङ्गपीठस्य महेन्द्रः स्थितवान् स्वयम् |
स्थापिता मत्तवारण्यां विद्युत् दैत्य-निषूदनी || ९० ||

अन्वय : - देहल्यां यमदण्ड :, तस्य उपरि तु शूलं स्थितम् | नियति : मृत्यु : च उभौ द्वारपालौ स्थितौ |
रङ्गपीठस्य पार्श्वे स्वयं महेन्द्र : स्थितवान्। दैत्यनिषूदनी विद्युत् मत्तवारण्यां स्थापिता |

अर्थ - उंबरठ्यावर यमदंडाची स्थापना झाली तर उंबरठ्याच्या अगदी वरच्या बाजूला शूल स्थापित करण्यात आले . दोन्ही बाजूला नियती व मृत्यू हे दोन द्वारपाल म्हणून नियुक्त झाले . रंगमंचाच्या बाजूला स्वत: इंद्र स्थित झाले, तर मत्तवारणीमध्ये दैत्यनाशक विजेची स्थापना केली .

स्तम्भेषु मत्तवारण्या : स्थापिता : परिपालने |
भूतयक्षपिशाचाश्च गुह्यकाश्च महाबला : || ९१ ||
जर्जरे तु विनिक्षिप्तं वज्रं दैत्यनिबर्हणम् |
तत्पर्वसु विनिक्षिप्ता : सुरेन्द्रा ह्यमितौजस : || ९२ ||

पदच्छेद : - स्तम्भेषु मत्तवारण्या : स्थापिता : परिपालने |
भूत-यक्ष-पिशाचा : च गुह्यका : च महाबला : || ९१ ||
जर्जरे तु विनिक्षिप्तं वज्रं दैत्य-निबर्हणम् |
तत्-पर्वसु विनिक्षिप्ता : सुरेन्द्रा : हि अमितौजस : || ९२ ||

अन्वय : - मत्तवारिण्या : स्तम्भेषु परिपालने महाबला : भूताः यक्षाः पिशाचाः गुह्यकाः च स्थापिताः।
जर्जरे दैत्यनिबर्हणं वज्रं निक्षिप्तम्। अमितौजस : सुरेन्द्रा : तत्पर्वसु निक्षिप्ता : |

अर्थ - मत्तवारणीच्या (चार) स्तभांच्या रक्षणासाठी अतिशय बलशाली भूत, यक्ष, पिशाच व गुह्यकांना नियुक्त केले . जर्जरावर दैत्यनाशक वज्र ठेवले गेले व त्या जर्जराच्या आऱ्यांमध्ये अपार शक्ती असलेल्या श्रेष्ठ देवता स्थापित झाल्या .

शिर :पर्वस्थितो ब्रह्मा द्वितीये शङ्करस्तथा |
तृतीये च स्थितो विष्णुश्चतुर्थे स्कन्द एव च || ९३ ||
पञ्चमे च महानागा : शेषवासुकितक्षका : |
एवं विघ्नविनाशाय स्थापिता जर्जरे सुरा : || ९४ ||

पदच्छेद: - शिर:पर्वस्थित: ब्रह्मा द्वितीये शङ्कर: तथा |
तृतीये च स्थित: विष्णु: चतुर्थे स्कन्द: एव च ||९३ ||
पञ्चमे च महानागा: शेष-वासुकि-तक्षका: |
एवं विघ्न-विनाशाय स्थापिता: जर्जरे सुरा: || ९४ ||

अन्वय: - ब्रह्मा शिर:पर्वस्थित:, तथा द्वितीये शङ्कर: तृतीये भगवान् विष्णु: स्थित: | चतुर्थे स्कन्द: एव ( स्थित: ) | पञ्चमे शेषवासुकितक्षका: महानागा: ( स्थिता: ) | एवं विघ्नविनाशाय सुरा: जर्जरे स्थापिता: |

अर्थ - जर्जराच्या सर्वात पहिल्या वरच्या भागात (पर्वात) ब्रह्माची, दुसऱ्यात शिवाची, तिसऱ्यात विष्णुची, चौथ्यात स्कंदाची व पाचव्यात शेष, वासुकी व तक्षक नामक महासर्पाची स्थापना झाली . अशा प्रकारे विघ्नांच्या नाशासाठी जर्जरामध्ये देवगणांची स्थापना केली गेली .

रङ्गपीठस्य मध्ये तु स्वयं ब्रह्मा प्रतिष्ठित: |
इष्ट्यर्थ रङ्गमध्ये तु क्रियते पुष्पमोक्षणम् || ९५ ||
पातालवासिनो ये च यक्षगुह्यकपन्नगा: |
अधस्ताद्रङ्गपीठस्य रक्षणे ते नियोजिता: || ९६ ||

पदच्छेद: - रङ्गपीठस्य मध्ये तु स्वयं ब्रह्मा प्रतिष्ठित: |
इष्टि-अर्थ रङ्गमध्ये तु क्रियते पुष्प-मोक्षणम् || ९५ ||
पाताल-वासिन: ये च यक्ष-गुह्यक-पन्नगा: |
अधस्तात् रङ्गपीठस्य रक्षणे ते नियोजिता: || ९६ ||

अन्वय: - स्वयं ब्रह्मा रङ्गपीठस्य मध्ये प्रतिष्ठित: | (अत:) रङ्गमध्ये इष्ट्यर्थं पुष्पमोक्षणं क्रियते | ये पातालवासिन: यक्षगुह्यकपन्नगा: (ते) रङ्गपीठस्य अधस्तात् रक्षणे नियोजिता: |

अर्थ - रंगपीठाच्या मध्यभागी स्वत: ब्रह्मा स्थित झाले . म्हणून रंगपीठाच्या मध्यभागी इष्टकार्य सिद्धीसाठी पुष्पांजली अर्पण केली जाते आणि रंगपीठाचा जो खालचा भाग आहे त्याच्या रक्षणासाठी पाताळात राहणाऱ्या यक्ष, गुह्यक व सर्पगण आहेत यांना नियुक्त केले गेले .

नायकं रक्षतीन्द्रस्तु नायिकां च सरस्वती ।
विदूषकमथौङ्कार: शेषास्तु प्रकृतीर्हर: ॥ ९७ ॥

पदच्छेद: - नायकं रक्षति इन्द्र: तु नायिकां च सरस्वती ।
विदूषकम् अथ ओङ्कार: शेषा: तु प्रकृती: हर: ॥ ९७ ॥

अन्वय: - इन्द्र: नायकं रक्षति सरस्वती तु नायिकां (रक्षति)। अथ ओङ्कार: विदूषकं, हर: शेषा: प्रकृती: (रक्षति)।

अर्थ - इंद्र नायकाचे रक्षण करतो. सरस्वती नायिकेचे रक्षण करते. ओंकार विदूषकाचे रक्षण करतो आणि इतर पात्रांचे रक्षण भगवान शिव करतात.

यान्येतानि नियुक्तानि दैवतानीह रक्षणे ।
एतान्येवाधिदैवानि भविष्यन्तीत्युवाच स: ॥ ९८ ॥

पदच्छेद: - यानि एतानि नियुक्तानि दैवतानि इह रक्षणे ।
एतानि एव अधिदैवानि भविष्यन्ति इति उवाच स: ॥ ९८ ॥

अन्वय: - "यानि एतानि दैवतानि रक्षणे नियुक्तानि एतानि एव (एतेषां स्थानानाम्) अधिदैवानि भविष्यन्ति" इति स: उवाच ।

अर्थ - अशा प्रकारे नियुक्ती झाल्यावर ब्रह्मदेव म्हणाले की, "रक्षण करण्यासाठी या देवतांची ज्या स्थानांवर नियुक्ती झाली आहे, त्या देवता भविष्यात त्या त्या स्थानांच्या अधिदेवता म्हणून ओळखल्या जातील."

## ❖ विघ्नांवर ब्रह्माने केलेला सामप्रयोग ❖

एतस्मिन्नन्तरे देवै: सर्वैरुक्त: पितामह: ।
साम्ना तावदिमे विघ्ना: स्थाप्यन्तां वचसा त्वया ॥ ९९ ॥
पूर्वं साम प्रयोक्तव्यं द्वितीयं दानमेव च ।
तयोरुपरि भेदस्तु ततो दण्ड: प्रयुज्यते ॥ १०० ॥

पदच्छेद: - एतस्मिन् अन्तरे देवै: सर्वै: उक्त: पितामह: ।
साम्ना तावत् इमे विघ्ना: स्थाप्यन्तां वचसा त्वया ॥ ९९ ॥

पूर्वं साम प्रयोक्तव्यं द्वितीयं दानम् एव च।
तयो: उपरि भेद: तु तत: दण्ड: प्रयुज्यते ॥ १०० ॥

अन्वय: - एतस्मिन् अन्तरे सर्वै: देवै: पितामह: उक्त:, "तावत् इमे विघ्ना: त्वया साम्ना वचसा स्थाप्यन्ताम्। पूर्वं साम द्वितीयं दानम् एव प्रयोक्तव्यम्। तयो: उपरि भेद:, तत: दण्ड: प्रयुज्यते।"

अर्थ - याच वेळी देवतांनी ब्रह्माला म्हटले की, "तोपर्यंत तुम्ही गोड वाणीने ह्या विघ्नांना थोपवून धरा . प्रथम साम, मग दानाचा प्रयोग करा . त्यानंतर भेद व नंतर दंडाचा वापर करा ."

देवानां वचनं श्रुत्वा ब्रह्मा विघ्नानुवाच ह।
कस्माद्भवन्तो नाट्यस्य विनाशाय समुत्थिता: ॥ १०१ ॥

पदच्छेद: - देवानां वचनं श्रुत्वा ब्रह्मा विघ्नान् उवाच ह।
कस्मात् भवन्त: नाट्यस्य विनाशाय समुत्थिता: ॥ १०१ ॥

अन्वय: - देवानां वचनं श्रुत्वा ब्रह्मा विघ्नान् उवाच, "कस्मात् भवन्त: नाट्यस्य विनाशाय समुत्थिता:?"

अर्थ - देवांचे बोलणे ऐकून ब्रह्माने विघ्नांना विचारले, "तुम्ही नाट्याचा विनाश करण्यासाठी का बरे उद्युक्त झाला आहात?"

ब्रह्मणो वचनं श्रुत्वा विरूपाक्षोऽब्रवीद्वच:।
दैत्यैर्विघ्नगणै: सार्धं सामपूर्वमिदं तत: ॥ १०२ ॥

पदच्छेद: - ब्रह्मण: वचनं श्रुत्वा विरूपाक्ष: अब्रवीत् वच:।
दैत्यै: विघ्नगणै: सार्धं सामपूर्वम् इदं तत: ॥ १०२ ॥

अन्वय: - तत: ब्रह्मण: वचनं श्रुत्वा विरूपाक्ष: दैत्यै: विघ्नगणै: सार्धं इदं सामपूर्वं वच: अब्रवीत्।

अर्थ - ब्रह्माचे हे बोल ऐकून विरूपाक्ष इतर राक्षसांसह आणि विघ्नांसह येऊन शांतपणे असे बोलू लागला .

योऽयं भगवता सृष्टो नाट्यवेद: सुरेच्छया।
प्रत्यादेशोऽयमस्माकं सुरार्थं भवता कृत: ॥ १०३ ॥

तन्नैतदेवं कर्तव्यं त्वया लोकपितामह |
यथा देवास्तथा दैत्यास्त्वत्तः सर्वे विनिर्गताः || १०४ ||

पदच्छेदः - यः अयं भगवता सृष्टः नाट्यवेदः सुरेच्छया |
प्रत्यादेशः अयम् अस्माकं सुरार्थं भवता कृतः || १०३ ||
तत् न एतत् एवं कर्तव्यं त्वया लोकपितामह |
यथा देवाः तथा दैत्याः त्वत्तः सर्वे विनिर्गताः || १०४ ||

अन्वयः - "सुरेच्छया भगवता यः अयं नाट्यवेदः सृष्टः (सः) भवता सुरार्थम् अयम् अस्माकं प्रत्यादेशः कृतः | तत् हे लोकपितामह, त्वया न एतत् एवं कर्तव्यम् | यथा देवाः तथा सर्वे दैत्याः त्वत्तः विनिर्मिताः |"

अर्थ - "देवतांच्या इच्छेनुसार ऐश्वर्यसंपन्न अशा तुम्ही ज्या नाट्यवेदाची रचना केली आहे, त्यात देवतांच्या भल्यासाठी आम्हा (दैत्यांचा) तुम्ही तिरस्कार केला आहे. तेव्हा हे लोकपितामह, तुम्ही असे करणे योग्य नाही, कारण जसे देव तसेच दैत्यही तुमच्यापासूनच उत्पन्न झाले आहेत."

विघ्नानां वचनं श्रुत्वा ब्रह्मा वचनमब्रवीत् |
अलं वो मन्युना दैत्या विषादं त्यजतानघाः || १०५ ||

पदच्छेदः - विघ्नानां वचनं श्रुत्वा ब्रह्मा वचनम् अब्रवीत् |
अलं वः मन्युना दैत्याः विषादं त्यजत अनघाः || १०५ ||

अन्वयः - विघ्नानां वचनं श्रुत्वा ब्रह्मा वचनम् अब्रवीत्, "दैत्याः, अलं वः मन्युना | अनघाः, विषादं त्यजताम् |

अर्थ - विघ्नांचे हे बोलणे ऐकून ब्रह्मा असे म्हणाले, "हे दैत्यांनो, राग आवरा. हे निष्पाप दानवांनो, नैराश्य सोडा.

भवतां देवतानां च शुभाशुभविकल्पकः |
कर्मभावान्वयापेक्षी नाट्यवेदो मया कृतः || १०६ ||

पदच्छेद :- भवतां दैवतानां च शुभ-अशुभ-विकल्पक :|
कर्म-भाव-अन्वय-अपेक्षी नाट्यवेद : मया कृत :|| १०६ ||

अन्वय : - मया कर्मभावान्वयापेक्षी नाट्यवेद: कृत: (य:) भवतां दैवतानां च शुभाशुभविकल्पक : (अस्ति) |

अर्थ - मी कर्म, भाव आणि वंश यांना प्रकट करणारा नाट्यवेद निर्माण केला आहे, जो तुमच्या आणि देवतांच्या शुभ आणि अशुभ कर्माचा परिणाम दर्शविणारा आहे .

## ❖ नाट्याचे स्वरूप आणि प्रयोजन ❖

नैकान्ततोऽत्र भवतां देवानां चानुभावनम् |
त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् || १०७ ||

पदच्छेद :- न एकान्तत : अत्रभवतां देवानां च अनुभावनम् |
त्रैलोक्यस्य अस्य सर्वस्य नाट्यं भाव-अनुकीर्तनम् || १०७ |

अन्वय : - (अत्र) देवानाम् अत्रभवतां च एकान्तत: न अनुभावनम् | नाट्यम् अस्य सर्वस्य त्रैलोक्यस्य भावानुकीर्तनम् (अस्ति) |

अर्थ - (इथे) केवळ देवतांच्या व तुमच्या चरित्राचे अनुकरण नाही . तर नाट्य हे त्रिलोकामध्ये असलेल्या सर्व भावांचे सादरीकरण करणारे असते .

क्वचिद्धर्म : क्वचित्क्रीडा क्वचिदर्थ : क्वचिच्छम : |
क्वचिद्धास्यं क्वचिद्युद्धं क्वचित्काम : क्वचिद्वध : || १०८ ||

पदच्छेद :- क्वचित् धर्म : क्वचित् क्रीडा क्वचित् अर्थ : क्वचित् शम : |
क्वचित् हास्यं क्वचित् युद्धं क्वचित् काम : क्वचित् वध : || १०८ ||

अन्वय : - क्वचित् धर्म : क्वचित् क्रीडा, क्वचित् अर्थ : (राजनीति : अर्थनीति : च), क्वचित् हास्यं, क्वचित् युद्धं, क्वचित् काम :, क्वचित् वध : (अस्ति)|

अर्थ - ह्या नाट्यात कोठे धर्म आहे, तर कधी क्रीडा, कोठे अर्थ (राजनीती आणि अर्थनीती) तर कधी शांती आहे . कोठे हास्य तर कोठे युद्ध, कोठे काम (वासना) तर कोठे वध आहे .

धर्मो धर्मप्रवृत्तानां काम: कामोपसेविनाम् |
निग्रहो दुर्विनीतानां विनीतानां दमक्रिया || १०९ ||

पदच्छेद: - धर्म: धर्मप्रवृत्तानां काम: काम-उपसेविनाम् |
निग्रह: दुर्विनीतानां विनीतानां दमक्रिया || १०९ ||

अन्वय: - (अत्र) धर्मप्रवृत्तानां (कृते) धर्म: (अस्ति) | कामोपसेविनां (कृते) काम:, दुर्विनीतानां (कृते) निग्रह:, विनीतानां (कृते) दमक्रिया (अस्ति)|

अर्थ - ह्या नाट्यात धार्मिक लोकांसाठी धर्म आहे, कामोपासकांसाठी काम आहे. ह्यात दुष्टांसाठी दंड आहे तर सज्जनांसाठी आत्मनियंत्रणासंबंधित अनेक क्रिया आहेत.

क्लीबानां धाष्ट्र्यजननमुत्साह: शूरमानिनाम् |
अबुधानां विबोधश्च वैदुष्यं विदुषामपि || ११० ||

पदच्छेद: - क्लीबानां धाष्ट्र्य-जननम् उत्साह: शूरमानिनाम् |
अबुधानां विबोध: च वैदुष्यं विदुषाम् अपि || ११० ||

अन्वय: - (एतत् नाट्यं) क्लीबानां (कृते) धाष्ट्र्यकरणं, शूरमानिनां (कृते) उत्साह:, अबुधानां (कृते) विबोध:, विदुषाम् (कृते) अपि वैदुष्यम् (अस्ति) |

अर्थ - हे नाट्य नपुंसकांमध्ये धाडस व स्वत:ला वीर समजणाऱ्यांमध्ये उत्साह निर्माण करणारे आहे. तसेच नाट्य हे अज्ञानांना विशेष ज्ञान देणारे आणि विद्वानांचे ज्ञान वाढविणारे आहे.

ईश्वराणां विलासश्च स्थैर्य दु:खार्दितस्य च |
अर्थोपजीविनामर्थो धृतिरुद्विग्नचेतसाम् || १११ ||

पदच्छेद: - ईश्वराणां विलास: च स्थैर्य दु:ख-आर्दितस्य च |
अर्थ-उपजीविनाम् अर्थ: धृति: उद्विग्न-चेतसाम् || १११ ||

अन्वय: - (एतत् नाट्यं नाम) ईश्वराणां (कृते) विलास:, दु:खार्दितस्य (कृते) स्थैर्यम्, अर्थोपजीविनां (कृते) अर्थ:, उद्विग्नचेतसां (कृते) धृति: (अस्ति) |

अर्थ - नाट्य हे राजांना विलास देणारे, दु:खाने पीडित व्यक्तींना स्थिरता देणारे, पैसा कमविणाऱ्यांना पैसा देणारे व उद्विग्न मन असलेल्या लोकांना धीर देणारे आहे.

नानाभावोपसंपन्नं नानावस्थान्तरात्मकम् |
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम् || ११२ ||

पदच्छेद : - नाना-भाव-उपसंपन्नं नाना-अवस्था-अन्तरात्मकम् |
लोकवृत्त-अनुकरणं नाट्यम् एतत् मया कृतम् || ११२ ||

अन्वय : - नानाभावोपसंपन्नं नानावस्थान्तरात्मकं लोकवृत्तानुकरणं एतत् नाट्यं मया कृतम् |

अर्थ - अनेक प्रकारच्या भावांनी युक्त, विविध अवस्था असणारे आणि लोक व्यवहाराचे अनुकरण करणारे हे नाट्य मी निर्माण केले आहे.

उत्तमाधममध्यानां नराणां कर्मसंश्रयम् |
हितोपदेशजननं धृतिक्रीडासुखादिकृत् || ११३ ||

पदच्छेद : - उत्तम-अधम-मध्यानां नराणां कर्म-संश्रयम् |
हित-उपदेश-जननम् धृति-क्रीडा-सुख-आदि-कृत् || ११३ ||

अन्वय : - नाट्यम् एतत् उत्तमाधममध्यानां नराणां कर्मसंश्रयम्, हितोपदेशजननं धृतिक्रीडासुखादिकृत् (अस्ति) |

अर्थ - नाट्य हे उत्तम, मध्यम व अधम मनुष्यांच्या कर्मावर आधारित असते व हिताचा उपदेश करणारे आणि धृती, क्रीडा, सुख इ. देणारे असते.

एतद्रसेषु भावेषु सर्वकर्मक्रियास्वथ |
सर्वोपदेशजननं नाट्यं लोके भविष्यति ||

पदच्छेद : - एतत् रसेषु भावेषु सर्व-कर्म-क्रियासु अथ |
सर्व-उपदेश-जननं नाट्यं लोके भविष्यति ||

अन्वय : - (अपि च) रसेषु भावेषु सर्वकर्मक्रियासु सर्वोपदेशजननम् एतत् नाट्यं लोके भविष्यति |

अर्थ - हे नाट्य जगामध्ये रस, भाव, त्यांचे कार्य व क्रिया यांद्वारे सर्वांना उपदेश करणारे असेल .

दु:खार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम् |
विश्रामजननं काले नाट्यमेतद्भविष्यति || ११४ ||

पदच्छेद: - दु:ख-आर्तानां श्रम-आर्तानां शोक-आर्तानां तपस्विनाम् |
विश्राम-जननं काले नाट्यम् एतत् भविष्यति || ११४ ||

अन्वय: - मया कृतम् एतत् नाट्यं लोके दु:खार्तानां श्रमार्तानां शोकार्तानां तपस्विनां (कृते) विश्रामजननम् (अस्ति)|

अर्थ - मी रचलेले हे नाट्य जगातील दु:खी, कष्टी व शोकाने व्याकुळ झालेल्या आणि तपस्वी लोकांना आराम देणारे असेल .

धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम् |
लोकोपदेशजननं नाट्यमेतद्भविष्यति || ११५ ||

पदच्छेद: - धर्म्यं यशस्यम् आयुष्यं हितं बुद्धि-विवर्धनम् |
लोक-उपदेश-जननं नाट्यम् एतत् भविष्यति || ११५ ||

अन्वय: - एतत् नाट्यं धर्म्यं यशस्यम् आयुष्यं हितं बुद्धिविवर्धनं लोकोपदेशजननं भविष्यति |

अर्थ - हे नाट्य धर्म, यश व आयुष्य देणारे व वाढविणारे, हितकारी, बुद्धीचा विकास करणारे व संसाराला उपदेश करणारे असेल .

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला |
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते || ११६ ||

पदच्छेद: - न तत् ज्ञानं न तत् शिल्पं न सा विद्या न सा कला |
न असौ योग: न तत् कर्म नाट्ये अस्मिन् यत् न दृश्यते || ११६ ||

अन्वय: - न तत् ज्ञानं न तत् शिल्पं न सा विद्या न सा कला न असौ योग: न तत् कर्म यत् अस्मिन् नाट्ये न दृश्यते |

अर्थ - असे कोणतेही ज्ञान, शिल्प, विद्या, कला, योग व कार्य नाही जे या नाट्यामध्ये नाही .

तन्नात्र मन्यु: कर्तव्यो भवद्भिरमरान्प्रति |
सप्तद्वीपानुकरणं नाट्यमेतद्भविष्यति || ११७ ||

पदच्छेद: - तत् न अत्र मन्यु: कर्तव्य: भवद्भि: अमरान् प्रति |
सप्तद्वीप-अनुकरणं नाट्यम् एतत् भविष्यति || ११७ ||

अन्वय: - तत् भवद्भि: अमरान् प्रति मन्यु: न कर्तव्य: (यत:) एतत् नाट्यं सप्तद्वीपानुकरणं भविष्यति |

अर्थ - म्हणून देवतांवर तुम्ही रागावू नये कारण हे नाट्य सातही खंडांमधील लोकांच्या भावांचे अनुकरण करणारे आहे .

(येनानुकरणं नाट्यमेतत्तद्यन्मया कृतम्)
देवानामसुराणां च राज्ञामथ कुटुम्बिनाम् |
(कृतानुकरणं लोके नाट्यमित्यभिधीयते|)
ब्रह्मर्षीणां च विज्ञेयं नाट्यं वृत्तान्तदर्शकम् || ११८||

पदच्छेद: - येन अनुकरणं नाट्यम् एतत् तत् यत् मया कृतम् |
देवानाम् असुराणां च राज्ञाम् अथ कुटुम्बिनाम् |
कृत-अनुकरणं लोके नाट्यम् इति अभिधीयते |
ब्रह्मर्षीणां च विज्ञेयं नाट्यं वृत्तान्त-दर्शकम् ||११८||

अन्वय: - येन मया यत् कृतम् तत् एतत् नाट्यम् अनुकरणम् अस्ति | देवानाम् असुराणां च राज्ञाम् अथ कुटुम्बिनाम् कृतानुकरणं लोके नाट्यम् इति अभिधीयते | ब्रह्मर्षीणां च वृत्तान्तदर्शकम् (एतत्) नाट्यं (सर्वै:) विज्ञेयम् |

अर्थ - मी रचलेले आहे हे नाट्य म्हणजे अनुकरणच आहे . देवांचे , असुरांचे, राजांचे तसेच गृहस्थजनांचे अनुकरण ज्यात केले जाते त्यास नाट्य असे म्हणतात . तसेच ब्रह्मर्षींच्या चरित्राचे दर्शन घडविणारे हे नाट्य सर्वांनी जाणून घ्यावे .

योऽयं स्वभावो लोकस्य सुखदु:खसमन्वित: |
सोऽङ्गाद्यभिनयोपेतो नाट्यमित्यभिधीयते || ११९ ||

पदच्छेद: - य: अयं स्वभाव: लोकस्य सुख-दु:ख-समन्वित: |
स: अङ्ग-आदि-अभिनय-उपेत: नाट्यम् इति अभिधीयते ||११९||

अन्वय: - लोकस्य अयं य: सुखदु:खसमन्वित: स्वभाव: स (यदि) अङ्गाद्यभिनयोपेत: (तर्हि तत्) नाट्यम् इति अभिधीयते |

अर्थ - सुख आणि दु:ख मिश्रित असे लोकांचे जे स्वभाव आहेत त्यांना आंगिक, वाचिक, आहार्य, सात्त्विक इ. अभिनयाद्वारे प्रस्तुत केले तर त्यास 'नाट्य' म्हटले जाते.

(वेदविद्येतिहासानामाख्यानपरिकल्पनम् |
विनोदकरणं लोके नाट्यमेतद्भविष्यति ||

पदच्छेद: - वेद-विद्या-इतिहासानाम् आख्यान-परिकल्पनम् |
विनोद-करणं लोके नाट्यम् एतत् भविष्यति ||

अन्वय: - वेदविद्येतिहासानाम् आख्यानपरिकल्पनं एतत् नाट्यं लोके विनोदकरणं भविष्यति |

अर्थ - संसारातील वेद, विद्या व इतिहासातील कथानकांची प्रस्तुती करणारे हे नाट्य लोकांची करमणूक करणारे असेल.

श्रुतिस्मृतिसदाचारपरिशेषार्थकल्पनम् |
विनोदजननं लाके नाट्यमेतद्भविष्यति ||)

पदच्छेद: - श्रुति-स्मृति-सदाचार-परिशेष-अर्थ-कल्पनम् |
विनोद-जननं लोके नाट्यम् एतत् भविष्यति ||

अन्वय: - श्रुतिस्मृतिसदाचारपरिशेषार्थकल्पनम् एतत् नाट्यं लोके विनोदकरणं भविष्यति |

अर्थ - आणि तसेच श्रुती, स्मृती, सदाचार व इतर सर्व अर्थांची प्रस्तुती करणारे हे नाट्य लोकांचे मनोरंजन करणारे असेल.

एतस्मिन्नतरे देवान् सर्वानाह पितामहः|
क्रियतामद्य विधिवद्यजनं नाट्यमण्डपे || १२० ||

पदच्छेदः - एतस्मिन् अन्तरे देवान् सर्वान् आह पितामहः|
क्रियताम् अद्य विधिवत् यजनं नाट्यमण्डपे || १२० ||

अन्वयः - एतस्मिन् अन्तरे पितामहः सर्वान् देवान् आह, “नाट्यमण्डपे अद्य विधिवत् यजनं क्रियताम्|”

अर्थ - या दरम्यान ब्रह्मा सर्व देवतांना म्हणाले, “तुम्ही आज ह्या नाट्यमंडपामध्ये विधिपूर्वक यज्ञ करा.”

बलिप्रदानैर्होमैश्च मन्त्रौषधिसमन्वितैः|
भोज्यैर्भक्ष्यैश्च पानैश्च बलिः समुपकल्प्यताम् || १२१ ||

पदच्छेदः - बलि-प्रदानैः होमैः च मन्त्र-औषधि-समन्वितैः|
भोज्यैः भक्ष्यैः च पानैः च बलिः समुपकल्प्यताम् || १२१ ||

अन्वयः - बलिप्रदानैः मन्त्रौषधिसमन्वितैः च होमैः, भोज्यैः, भक्ष्यैः पानैः च बलिः समुपकल्प्यताम्|

अर्थ - आहुती देऊन व मंत्र-औषधांनी युक्त असा होम करून यज्ञाचे अनुष्ठान करावे आणि भक्ष्य, भोज्य व पेय पदार्थांनी आहुती द्यावी.

मर्त्यलोकगताः सर्वे शुभां पूजामवाप्स्यथ|
अपूजयित्वा रङ्गं तु नैव प्रेक्षां प्रवर्तयेत् || १२२||

पदच्छेदः - मर्त्यलोक-गताः सर्वे शुभां पूजाम् अवाप्स्यथ|
अपूजयित्वा रङ्गं तु न एव प्रेक्षां प्रवर्तयेत् || १२२ ||

अन्वयः - मर्त्यलोकगताः (यूयं) सर्वे शुभां पूजाम् अवाप्स्यथ| रङ्गम् अपूजयित्वा तु प्रेक्षां नैव प्रवर्तयेत्|

अर्थ - मृत्युलोकामध्ये जाऊन तुम्ही सर्वजण ही शुभ पूजा करा. रंगमंडपाच्या पूजेशिवाय प्रयोगाला आरंभ करू नये.

अपूजयित्वा रङ्गं तु य: प्रेक्षां कल्पयिष्यति |
निष्फलं तस्य तत् ज्ञानं तिर्यग्योनिं च यास्यति || १२३ ||

पदच्छेद: - अपूजयित्वा रङ्गं तु य: प्रेक्षां कल्पयिष्यति |
निष्फलं तस्य तत् ज्ञानं तिर्यक् योनिं च यास्यति || १२३ ||

अन्वय: - रङ्गम् अपूजयित्वा तु य: प्रेक्षां कल्पयिष्यति तस्य तत् ज्ञानं (नाट्यज्ञानं) निष्फलं (भविष्यति) (अपि च) (स:) तिर्यग्योनिं च यास्यति |

अर्थ - जो कोणी रंगमंडपाच्या पूजेशिवाय प्रयोग सुरू करील त्याचे ज्ञान निष्फळ होऊन त्याला पशुयोनी प्राप्त होईल .

यज्ञेन संमितं ह्येतद्रङ्गदैवतपूजनम् |
तस्मात्सर्वप्रयत्नेन कर्तव्यं नाट्ययोक्तृभि: || १२४ ||

पदच्छेद: - यज्ञेन सम्मितं हि एतत् रङ्गदैवत-पूजनम् |
तस्मात् सर्व-प्रयत्नेन कर्तव्यं नाट्ययोक्तृभि: || १२४ ||

अन्वय: - एतत् रङ्गदैवतपूजनं यज्ञेन हि संमितम् (अस्ति) | तस्मात् नाट्ययोक्तृभि: (तत्) सर्वप्रयत्नेन कर्तव्यम् |

अर्थ - रंगमंडपातील देवतांचे पूजन हे यज्ञासमान आहे, म्हणून नाट्याचा प्रयोग करणाऱ्यांनी हे पूजन प्रयत्नपूर्वक केले पाहिजे .

### ❖ रंगपूजेचे महत्त्व ❖

नर्तकोऽर्थपतिर्वापि य: पूजां न करिष्यति |
न कारयिष्यत्यन्यैर्वा प्राप्नोत्यपचयं तु स: || १२५ ||

पदच्छेद: - नर्तक: अर्थपति: वा अपि य: पूजां न करिष्यति |
न कारयिष्यति अन्यै: वा प्राप्नोति अपचयं तु स: || १२५ ||

अन्वय: - य: नर्तक: अर्थपति: वा पूजां न करिष्यति न वा अन्यै: कारयिष्यति, स: तु अपचयं प्राप्स्यति |

अर्थ - जो नट, किंवा अर्थपती रंगमंडपाची पूजा करणार नाही किंवा दुसऱ्या व्यक्तींकडून करवून घेणार नाही तो अधोगतीला जाईल .

यथाविधि यथादृष्टं यस्तु पूजां करिष्यति ।
स लप्स्यते शुभानर्थान् स्वर्गलोकं च यास्यति ॥ १२६ ॥

पदच्छेद : - यथाविधि यथादृष्टं य: तु पूजां करिष्यति ।
स: लप्स्यते शुभान् अर्थान् स्वर्गलोकं च यास्यति ॥ १२६ ॥

अन्वय : - य: तु यथाविधि यथाशास्त्रं पूजां करिष्यति स: शुभान् अर्थान् लप्स्यते स्वर्गलोकं च यास्यति ।

अर्थ - परंतु जो यथाविधी व यथाशास्त्र (रंगदेवतेची) पूजा-अर्चना करील त्या व्यक्तिला शुभ संपत्ती (धन, वस्तु इत्यादी इष्ट पदार्थ) प्राप्त होतील आणि तो स्वर्गाला जाईल .

एवमुक्त्वा तु भगवान्द्रुहिण: सह दैवतै: ।
रङ्गपूजां कुरुष्वेति मामेवं समचोदयत् ॥ १२७ ॥

पदच्छेद : - एवम् उक्त्वा तु भगवान् द्रुहिण: सह दैवतै: ।
रङ्गपूजां कुरुष्व इति माम् एवं समचोदयत् ॥ १२७ ॥


अन्वय : - एवम् उक्त्वा भगवान् द्रुहिण: "दैवतै : सह रङ्गपूजां कुरुष्व" इति एवं मां समचोदयत् ।

अर्थ - असे सांगून ब्रह्मदेवाने मला "अधिष्ठित देवतांसह रंगपूजा कर" असे म्हणून मला विधिनुसार रंगपूजा करण्याची प्रेरणा दिली .

॥ इति भारतीये नाट्यशास्त्रे 'नाट्योत्पत्तिर्नाम' प्रथमोऽध्याय: ॥

॥ अशाप्रकारे भारतीय नाट्यशास्त्रातील 'नाट्योत्पत्ती' म्हणजेच 'नाट्याचा उगम' नावाचा पहिला अध्याय समाप्त ॥

# दुसरा अध्याय
# प्रेक्षागृहाची लक्षणे



# दुसरा अध्याय

## प्रेक्षागृहाची लक्षणे

### ❖ प्रेक्षागृहाविषयी मुनींनी विचारलेले प्रश्न ❖

भरतस्य वच: श्रुत्वा पप्रच्छुर्मुनयस्तत:|
भगवन् श्रोतुमिच्छामो यजनं रङ्गसंश्रयम् ‖ १ ‖
अथ वा या: क्रियास्तत्र लक्षणं यच्च पूजनम्|
भविष्यद्भिर्नरै: कार्यं कथं तन्नाट्यवेश्मनि ‖ २ ‖

पदच्छेद: - भरतस्य वच: श्रुत्वा पप्रच्छु: मुनय: तत:|
भगवन् श्रोतुम् इच्छाम: यजनं रङ्गसंश्रयम् ‖ १ ‖
अथ वा या: क्रिया: तत्र लक्षणं यत् च पूजनम्|
भविष्यद्भि: नरै: कार्यं कथं तत् नाट्यवेश्मनि ‖ २ ‖

अन्वय: - भरतस्य वच: श्रुत्वा तत: मुनय: पप्रच्छु: "भगवन्, रङ्गसंश्रयं यजनं श्रोतुम् इच्छाम:| अथवा भविष्यद्भि: नरै: नाट्यवेश्मनि या: क्रिया:, तत्र लक्षणं, यत् पूजनं च (तत्) कथं वै कार्यम्? . . .

अर्थ - भरतमुनींचे बोलणे ऐकून त्यानंतर मुनींनी विचारले, "भगवन्! रंगमंचावर होणाऱ्या पूजाविधीबद्दल आम्हांला ऐकायचे आहे. तेव्हा भविष्यातील मनुष्यांनी (म्हणजेच पुढच्या पिढीने) नाट्यगृहाच्या निर्मितीची क्रिया, त्यांची लक्षणे, त्यांचा पूजाविधी कसा करावा? हे सांगावे . . .

इहादिर्नाट्ययोगस्य नाट्यमण्डप एव हि|
तस्मात्तस्यैव तावत्त्वं लक्षणं वक्तुमर्हसि ‖ ३ ‖

पदच्छेद: - इह आदि: नाट्ययोगस्य नाट्यमण्डप: एव हि|
तस्मात् तस्य एव तावत् त्वं लक्षणं वक्तुम् अर्हसि ‖ ३ ‖

अन्वय: - इह नाट्ययोगस्य आदि: नाट्यमण्डप: एव (कीर्तित:)| तस्मात् तस्य एव तावत् लक्षणं त्वं वक्तुम् अर्हसि|"

अर्थ - इथे नाट्यप्रयोगाचे मुख्य तत्त्व नाट्यगृह आहे . तेव्हा त्याचेच लक्षण प्रथम सांगणे योग्य आहे ."

❖ नाट्यगृहाची लक्षणे ❖

तेषां तु वचनं श्रुत्वा मुनीनां भरतोऽब्रवीत्|
लक्षणं पूजनं चैव श्रूयतां नाट्यवेश्मन:॥ ४॥

पदच्छेद: - तेषां तु वचनं श्रुत्वा मुनीनां भरत: अब्रवीत्|
लक्षणं पूजनं च एव श्रूयतां नाट्यवेश्मन:॥४॥

अन्वय: - तेषां मुनीनां वचनं श्रुत्वा भरत: अब्रवीत्, "नाट्यवेश्मन: लक्षणं पूजनं च श्रूयताम्|"

अर्थ - त्या मुनींचे बोलणे ऐकून भरतमुनी त्यांना म्हणाले, "तुम्ही आता नाट्यगृहाची लक्षणे आणि पूजाविधी ऐकावा ."

दिव्यानां मानसी सृष्टिर्गृहेषूपवनेषु च
(यथाभावाभिनिर्वर्त्या: सर्वे भावास्तु मानुषा:) |
नराणां यत्नत: कार्या लक्षणाभिहिता क्रिया॥ ५॥
श्रूयतां तद्यथा यत्र कर्तव्यो नाट्यमण्डप:|
तस्य वास्तु च पूजा च यथा योज्या प्रयत्नत:॥ ६॥
इह प्रेक्षागृहं दृष्ट्वा धीमता विश्वकर्मणा |
त्रिविध: सन्निवेशश्च शास्त्रत: परिकल्पित:॥ ७॥

पदच्छेद: - दिव्यानां मानसी सृष्टि: गृहेषु उपवनेषु च|
(यथाभाव-अभिनिर्वर्त्या: सर्वे भावा: तु मानुषा:)
नराणां यत्नत: कार्या लक्षण-अभिहिता क्रिया॥५॥
श्रूयतां तत् यथा यत्र कर्तव्य: नाट्यमण्डप:|
तस्य वास्तु च पूजा च यथा योज्या प्रयत्नत:॥ ६॥
इह प्रेक्षागृहं दृष्ट्वा धीमता विश्वकर्मणा|
त्रिविध: सन्निवेश: च शास्त्रत: परिकल्पित:॥७॥

अन्वय: - गृहेषु उपवनेषु च दिव्यानां मानसी सृष्टि: अस्ति | नराणां (तु) लक्षणाभिहिता क्रिया यत्नत: कार्या | यत्र यथा नाट्यमण्डप: कर्तव्य: तस्य वास्तु पूजा च तत् (सर्व) श्रूयताम् | इह प्रेक्षागृहं दृष्ट्वा धीमता विश्वकर्मणा शास्त्रत: त्रिविध: सन्निवेश: च परिकल्पित:|

अर्थ - देव मानसिक संकल्पाद्वारे गृह व उद्यानांची निर्मिती करू शकतात . परंतु मानवांनी शास्त्रात (लक्षणग्रंथात) सांगितल्याप्रमाणे प्रयत्नपूर्वक ते कार्य करावे . ज्याठिकाणी जसे नाट्यगृह तयार करायचे आहे त्याची वास्तू (नाट्यगृहाचा आकार, परिमाण इ . ) तसेच पूजा इ . सर्व ऐकावे . या नाट्यगृहाचा विचार करून बुद्धिमान विश्वकर्म्यांनि शास्त्रानुसार तीन प्रकारचे नाट्यगृह प्रमाणानुसार सांगितले आहेत .

## ❖ नाट्यगृहाचे तीन प्रकार ❖

विकृष्टश्चतुरश्रश्च त्र्यश्रश्चैव तु मण्डप:|
तेषां त्रीणि प्रमाणानि ज्येष्ठं मध्यं तथाऽवरम् || ८ ||

पदच्छेद: - विकृष्ट: चतुरश्र: च त्र्यश्र: च एव तु मण्डप:|
तेषां त्रीणि प्रमाणानि ज्येष्ठं मध्यं तथा अवरम् || ८ ||

अन्वय: - मण्डप: हि विकृष्ट:, चतुरश्र:, त्र्यश्र: च | तेषां ज्येष्ठं, मध्यं तथा अवरम् इति त्रीणि प्रमाणानि |

अर्थ - नाट्यगृहाचे विकृष्ट, चतुरश्र व त्र्यश्र असे तीन प्रकार असून त्यांचे मापानुसार ज्येष्ठ, मध्य व कनिष्ठ असे प्रकार आहेत .

प्रमाणमेषां निर्दिष्टं हस्तदण्डसमाश्रयम् |
शतं चाष्टौ चतु:षष्टिर्हस्ता द्वात्रिंशदेव च || ९ ||

पदच्छेद: - प्रमाणम् एषां निर्दिष्टं हस्तदण्ड-समाश्रयम् |
शतं च अष्टौ चतु:षष्टि: हस्ता: द्वात्रिंशत् एव च || ९ ||

अन्वय: - एषां हस्तदण्डसमाश्रयं प्रमाणं निर्दिष्टम् | (तत्) शतम् अष्टौ, चतुष्षष्टि:, द्वात्रिंशत् च इति निश्चितम् |

अर्थ - यांचे मोजमाप हस्तदंडांवर आधारित असते. त्यांचा निर्देश इथे केलेला आहे. ते (मोजमाप) एकशे आठ, चौसष्ट आणि बत्तीस हात असे निश्चित केलेले आहे.

अष्टाधिकं शतं ज्येष्ठं चतु:षष्टिस्तु मध्यमम् |
कनीयस्तु तथा वेश्म हस्ता द्वात्रिंशदिष्यते || १० ||

पदच्छेद: - अष्टाधिकं शतं ज्येष्ठं चतु:षष्टि: तु मध्यमम् |
कनीय: तु तथा वेश्म हस्ता: द्वात्रिंशत् इष्यते || १० ||

अन्वय: - अष्टाधिकं शतं करं वेश्म (तत्) ज्येष्ठम् | चतुष्षष्टि: (करं वेश्म तत्) मध्यमम् | तथा कनीय: (वेश्म) द्वात्रिंशत् (करम्) इष्यते |

अर्थ - एकशे आठ हात असलेले गृह 'ज्येष्ठ' होय. चौसष्ट (हात असलेले) 'मध्यम' होय व बत्तीस हातांचे नाट्यगृह 'कनिष्ठ' होय.

देवानां तु भवेज्ज्येष्ठं नृपाणां मध्यमं भवेत् |
शेषाणां प्रकृतीनां तु कनीय: संविधीयते || ११ ||

पदच्छेद: - देवानां तु भवेत् ज्येष्ठं नृपाणां मध्यमं भवेत् |
शेषाणां प्रकृतीनां तु कनीय: संविधीयते || ११ ||

अन्वय: - देवानां ज्येष्ठं (नाट्यगृहं भवेत्)| नृपाणां मध्यमं (भवेत्) | शेषाणां प्रकृतीनां कनीय:(नाट्यगृहं ) संविधीयते |

अर्थ - देवांसाठी ज्येष्ठ ( नाट्यगृह असावे), राजांसाठी मध्यम (असावे) व अन्य सामान्य लोकांसाठी कनिष्ठ ( नाट्यगृह) सांगितले आहे.

(प्रेक्षागृहाणां सर्वेषां प्रशस्तं मध्यमं स्मृतम् |
तत्र पाठ्यं च गेयं च सुखश्राव्यतरं भवेत् ||
प्रेक्षागृहाणां सर्वेषां त्रिप्रकारो विधि: स्मृत: |
विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव प्रयोक्तृभि: ||
कनीयस्तु स्मृतं त्र्यश्रं चतुरश्रं तु मध्यमम् |
ज्येष्ठं विकृष्टं विज्ञेयं नाट्यवेदप्रयोक्तृभि: ||)

पदच्छेद : - (प्रेक्षागृहाणां सर्वेषां प्रशस्तं मध्यमं स्मृतम् |
तत्र पाठ्यं च गेयं च सुखश्राव्यतरं भवेत् ||
प्रेक्षागृहाणां सर्वेषां त्रिप्रकार : विधि : स्मृत : |
विकृष्ट : चतुरश्र : च त्र्यश्र : च एव प्रयोक्तृभि : ||
कनीय : तु स्मृतं त्र्यश्रं चतुरश्रं तु मध्यमम् |
ज्येष्ठं विकृष्टं विज्ञेयं नाट्यवेदप्रयोक्तृभि : ||)

अन्वय : - सर्वेषां प्रेक्षागृहाणां मध्यमं प्रशस्तं स्मृतम् (अस्ति) | तत्र पाठ्यं गेयं च सुखश्राव्यतरं भवेत् | प्रयोक्तृभि : सर्वेषां प्रेक्षागृहाणां त्रिप्रकार : विधि : स्मृत : - विकृष्ट : चतुरश्र : त्र्यश्र : च | नाट्यवेदप्रयोक्तृभि : त्र्यश्रं कनीय : स्मृतं, चतुरश्रं मध्यमं, विकृष्टं ज्येष्ठं (इति) विज्ञेयम् |

अर्थ - सर्व नाट्यगृहांमध्ये मध्यम नाट्यगृह प्रशंसनीय मानले गेले आहे, कारण तेथे संवाद आणि गाणी व्यवस्थित ऐकू येतात. प्रयोगकर्त्यांनी सर्व नाट्यगृहांचे तीन प्रकार मानले आहेत. विकृष्ट, चतुरश्र आणि त्र्यश्र. नाट्यवेदाचा प्रयोग करणाऱ्यांनी त्र्यश्र नाट्यगृहास कनिष्ठ मानले आहे. चतुरश्र नाट्यगृहास मध्यम आणि विकृष्ट नाट्यगृहास ज्येष्ठ मानले आहे.

## ❖ नाट्यगृहाचे मोजमाप ❖

प्रमाणं यच्च निर्दिष्टं लक्षणं विश्वकर्मणा |
प्रेक्षागृहाणां सर्वेषां तच्चैव हि निबोधत || १२ ||

पदच्छेद : - प्रमाणं यत् च निर्दिष्टं लक्षणं विश्वकर्मणा |
प्रेक्षागृहाणां सर्वेषां तत् च एव हि निबोधत || १२ ||

अन्वय : - विश्वकर्मणा सर्वेषां प्रेक्षागृहाणाम् प्रमाणं लक्षणं च यत् निर्दिष्टं तत् निबोधत |

अर्थ - विश्वकर्म्याने सर्व नाट्यगृहांची जी मापं आणि लक्षणे सांगितली आहेत ती (आपण सर्वांनी) जाणून घ्यावी.

अणू रजश्च वालश्च लिक्षा यूका यवस्तथा |
अङ्गुलं च तथा हस्तो दण्डश्चैव प्रकीर्तितः || १३ ||

पदच्छेदः - अणुः रजः च वालः च लिक्षाः यूकाः यवः तथा |
अङ्गुलं च तथा हस्तः दण्डः च एव प्रकीर्तितः || १३ ||

अन्वयः - अणुः, रजः, वालः, लिक्षा, यूका, तथा यवः, अङ्गुलं, हस्तः, दण्डः च इति परिकीर्तितः |

अर्थ - अणू, रज, वाल, लिक्षा (लिखा), यूका (ऊ), यव (सातू, जव), अंगुली, हस्त व दंड ही नऊ वाढत्या क्रमाने परिमाणे सांगितली गेली आहेत.

अणवोऽष्टौ रजः प्रोक्तं तान्यष्टौ वाल उच्यते |
वालास्त्वष्टौ भवेल्लिक्षा यूका लिक्षाष्टकं भवेत् || १४ ||

पदच्छेदः - अणवः अष्टौ रजः प्रोक्तं तानि अष्टौ वालः उच्यते |
वालाः तु अष्टौ भवेत् लिक्षा यूका लिक्षाष्टकं भवेत् || १४ ||

अन्वयः - अष्टौ अणवः रजः प्रोक्तम् | अष्टौ तानि (रजांसि) वालः उच्यते | अष्टौ वालाः लिक्षा भवेत्, लिक्षाष्टकं यूका भवेत् |

अर्थ - आठ अणूंचा एक रज, आठ रजांचा एक केस होतो, आठ केसांची एक लिखा व आठ लिखांची एक यूका (ऊ)असे माप होते.

यूकास्त्वष्टौ यवो ज्ञेयो यवास्त्वष्टौ तथाङ्गुलम् |
अङ्गुलानि तथा हस्तश्चतुर्विंशतिरुच्यते || १५ ||

पदच्छेदः - यूकाः अष्टौ यवः ज्ञेयः यवाः तु अष्टौ तथा अङ्गुलम् |
अङ्गुलानि तथा हस्तः चतुर्विंशतिः उच्यते || १५ ||

अन्वयः - अष्टौ यूकाः यवः ज्ञेयः | अष्टौ यवाः अङ्गुलं (भवेत्) | तथा चतुर्विंशतिः अङ्गुलानि हस्तः उच्यते |

अर्थ - आठ उवांचे एक यव, आठ यवांचा एक बोट तर चोवीस बोटांचा एक हात असे माप सांगितले जाते.

चतुर्हस्तो भवेद्दण्डो निर्दिष्टस्तु प्रमाणतः|
अनेनैव प्रमाणेन वक्ष्याम्येषां विनिर्णयम् ॥ १६ ॥

पदच्छेदः - चतुर्हस्तः भवेत् दण्डः निर्दिष्टः तु प्रमाणतः|
अनेन एव प्रमाणेन वक्ष्यामि एषां विनिर्णयम् ॥ १६ ॥

अन्वयः - चतुर्हस्तः दण्डः भवेत् (यः) प्रमाणतः निर्दिष्टः| अनेन एव प्रमाणेन एषां विनिर्णयं वक्ष्यामि|

अर्थ - चार हात मिळून एक दंड होतो जे प्रमाणांनुसार सांगण्यात आलेले आहे. याच प्रमाणांनुसार या (नाट्यगृहांच्या) आकाराविषयी सांगतो.

चतु:षष्टिकरान्कुर्याद्दीर्घत्वेन तु मण्डपम् |
द्वात्रिंशतं च विस्तारान्मर्त्यानां यो भवेदिह ॥ १७ ॥

पदच्छेदः - चतु:षष्टि-करान् कुर्यात् दीर्घत्वेन तु मण्डपम्|
द्वात्रिंशतं च विस्तारात् मर्त्यानां यो भवेत् इह ॥ १७ ॥

अन्वयः - इह मर्त्यानां यः मण्डपः भवेत् तं मण्डपं दीर्घत्वेन चतुष्षटिकरान् विस्तारं च द्वात्रिंशतं कुर्यात्|

अर्थ - मनुष्यांसाठी चौसष्ट हात लांब आणि बत्तीस हात रुंद नाट्यगृह निर्माण करावे.

अत ऊर्ध्वं न कर्तव्यः कर्तृभिर्नाट्यमण्डपः |
यस्मादव्यक्तभावं हि तत्र नाट्यं व्रजेदिति ॥ १८ ॥

पदच्छेदः - अतः ऊर्ध्वं न कर्तव्यः कर्तृभिः नाट्यमण्डपः|
यस्मात् अव्यक्तभावं हि तत्र नाट्यं व्रजेत् इति ॥ १८ ॥

अन्वयः - कर्तृभिः नाट्यमण्डपः अतः ऊर्ध्वं न कर्तव्यः, यस्मात् तत्र अव्यक्तभावं नाट्यं व्रजेत्|

अर्थ - नाट्यगृह निर्माण करणाऱ्यांनी ह्यापेक्षा अधिक मोठे (नाट्यगृह) निर्माण करू नये अन्यथा नाटक स्पष्ट कळणार नाही.

मण्डपे विप्रकृष्टे तु पाठ्यमुच्चारितस्वरम्।
अनिस्सरणधर्मत्वाद्विस्वरत्वं भृशं व्रजेत्॥ १९ ॥

पदच्छेद : - मण्डपे विप्रकृष्टे तु पाठ्यम् उच्चारित-स्वरम्।
अनिस्सरण-धर्मत्वात् विस्वरत्वं भृशं व्रजेत्॥ १९॥

अन्वय : - मण्डपे विप्रकृष्टे (सति) उच्चारितस्वरं पाठ्यम् अनिस्सरणधर्मत्वात् भृशं विस्वरत्वं भवेत्।

अर्थ - तसेच नाट्यगृह मोठे असेल तर त्यात उच्चारले जाणारे संवादाचे स्वर वाणीच्या (ध्वनीच्या) धर्मानुसार दूरवर न पोहोचू शकल्याने अश्राव्य राहतील. (अर्थात लांब बसणाऱ्या प्रेक्षकांना संवाद ऐकूच येणार नाहीत.)

यश्चाप्यास्यगतो भावो नानादृष्टिसमन्वित:।
स वेश्मन: प्रकृष्टत्वाद्व्रजेदव्यक्ततां पराम्॥ २०॥

पदच्छेद : - य: च अपि आस्य-गत: भाव: नाना-दृष्टि-समन्वित:।
स: वेश्मन: प्रकृष्टत्वात् व्रजेत् अव्यक्ततां पराम्॥२०॥

अन्वय : - अपि च य: नानादृष्टिसमन्वित: आस्यगत: भाव: स: वेश्मन: प्रकृष्टत्वात् पराम् अव्यक्ततां व्रजेत्।

अर्थ - आणि तसेच विविध दृष्टींनी युक्त असा जो चेहऱ्यावरचा भाव आहे, तो नाट्यगृहाच्या विस्तृतपणामुळे अत्यंत अस्पष्ट राहील.

प्रेक्षागृहाणां सर्वेषां तस्मान्मध्यममिष्यते।
यावत्पाठ्यं च गेयं च तत्र श्रव्यतरं भवेत्॥ २१॥

पदच्छेद : - प्रेक्षागृहाणां सर्वेषां तस्मात् मध्यमम् इष्यते।
यावत् पाठ्यं च गेयं च तत्र श्रव्यतरं भवेत्॥ २१॥

अन्वय : - तस्मात् सर्वेषां प्रेक्षागृहाणां मध्यमम् इष्यते। यावत् पाठ्यं च गेयं च सुखं श्राव्यतरं भवेत्।

अर्थ - तेव्हा सर्व प्रकारच्या नाट्यगृहांमध्ये मध्यम नाट्यगृह योग्य आहे, जिथे संवाद आणि गीत इ. आनंदाने ऐकता येतात.

(प्रेक्षागृहाणां सर्वेषां त्रिप्रकारो विधिः स्मृतः |
विकृष्टश्चतुरश्रश्च त्र्यश्रश्चैव प्रयोक्तृभिः ||

पदच्छेद: - प्रेक्षागृहाणां सर्वेषां त्रिप्रकारः विधिः स्मृतः |
विकृष्टः चतुरश्रः च त्र्यश्रः च एव प्रयोक्तृभिः ||

अन्वय: - सर्वेषां प्रेक्षागृहाणां विकृष्टः चतुरश्रः च त्र्यश्रः च एव त्रिप्रकारः विधिः प्रयोक्तृभिः स्मृतः |

अर्थ - प्रयोग करणाऱ्यांनी सर्व प्रकारच्या नाट्यगृहांचे तीन विधी सांगितले आहेत . ते म्हणजे - विकृष्ट, चतुरश्र आणि त्र्यश्र .

कनीयस्तु स्मृतं त्र्यश्रं चतुरश्रं च मध्यमम् |
ज्येष्ठं विकृष्टं विज्ञेयं नाट्यवेदप्रयोक्तृभिः || )

पदच्छेद: - कनीयः तु स्मृतं त्र्यश्रं चतुरश्रं च मध्यमम् |
ज्येष्ठं विकृष्टं विज्ञेयं नाट्यवेद-प्रयोक्तृभिः ||)

अन्वय: - नाट्यवेदप्रयोक्तृभिः त्र्यश्रं कनीयः तु स्मृतम् | चतुरश्रं मध्यमं, विकृष्टं च ज्येष्ठं विज्ञेयम् |

अर्थ - नाट्यवेदाचा प्रयोग करणाऱ्यांनी त्र्यश्र नाट्यमंडपास छोटे, चतुरश्रास मध्यम आणि विकृष्ट नाट्यमंडपास मोठे असे म्हटले आहे .

देवानां मानसी सृष्टिर्गृहेषूपवनेषु च |
यत्नभावाभिनिष्पन्नाः सर्वे भावा हि मानुषाः || २२ ||

पदच्छेद: - देवानां मानसी सृष्टिः गृहेषु उपवनेषु च |
यत्न-भाव-अभिनिष्पन्नाः सर्वे भावा हि मानुषाः || २२ ||

अन्वय: - गृहेषु उपवनेषु च देवानां सृष्टिः मानसी (अस्ति) | (किन्तु)सर्वे मानुषाः भावाः यत्नभावात् हि विनिष्पन्नाः |

अर्थ - देव मानसिक संकल्पाने गृह व उद्यानांची निर्मिती करू शकतात . परंतु मनुष्यांचे सर्व भाव हे प्रयत्नपूर्वकच सिद्ध होतात .

तस्माद्देवकृतैर्भावैर्न विस्पर्धेत मानुषः|
मानुषस्य तु गेहस्य सम्प्रवक्ष्यामि लक्षणम् || २३ ||

पदच्छेदः - तस्मात् देवकृतैः भावैः न विस्पर्धेत मानुषः|
मानुष्यस्य तु गेहस्य सम्प्रवक्ष्यामि लक्षणम् || २३ ||

अन्वयः - तस्मात् देवकृतैः भावैः मानुषः न विस्पर्धेत | (अधुना) मनुष्यस्य गेहस्य लक्षणं संप्रवक्ष्यामि |

अर्थ - म्हणून मनुष्याने देवांच्या रचनाशक्तीशी प्रतिस्पर्धा करू नये. आता मी मनुष्यांसाठी असणाऱ्या नाट्यगृहाचे लक्षण सांगतो.

भूमेर्विभागं पूर्वं तु परीक्षेत प्रयोजकः|
ततो वास्तु प्रमाणेन प्रारभेत शुभेच्छया || २४ ||

पदच्छेदः - भूमेः विभागं पूर्वं तु परीक्षेत प्रयोजकः|
ततः वास्तु प्रमाणेन प्रारभेत शुभ-इच्छया || २४ ||

अन्वयः - प्रयोजकः पूर्वं भूमेः विभागं परीक्षेत | ततः शुभेच्छया वास्तुप्रमाणेन प्रारभेत |

अर्थ - नाट्यगृह निर्माण करणाऱ्या वास्तुविशारदाने प्रथम जमिनीचे परीक्षण करावे. त्यानंतर शुभ रीतीने वास्तुशास्त्राप्रमाणे मोजमाप सुरू करावे.

❖ जमिनीचे विविध प्रकार ❖

समा स्थिरा तु कठिना कृष्णा गौरी च या भवेत् |
भूमिस्तत्रैव कर्तव्यः कर्तृभिर्नाट्यमण्डपः || २५ ||

पदच्छेदः - समा स्थिरा तु कठिना कृष्णा गौरी च या भवेत्|
भूमिः तत्र एव कर्तव्यः कर्तृभिः नाट्यमण्डपः || २५ ||

अन्वयः - या भूमिः समा, स्थिरा, कठिना, कृष्णा, गौरी च भवेत् तत्र कर्तृभिः नाट्यमण्डपः कर्तव्यः|

अर्थ - जी जमीन सम, स्थिर, कठीण (टणक), काळी किंवा शुभ्र असेल त्या भूमीवरच वास्तुविशारदांनी नाट्यगृहाची निर्मिती करावी.

प्रथमं शोधनं कृत्वा लाङ्गलेन समुत्कृषेत्।
अस्थिकीलकपालानि तृणगुल्मांश्च शोधयेत्॥ २६॥
शोधयित्वा वसुमतीं प्रमाणं निर्दिशेत्ततः।

पदच्छेदः - प्रथमं शोधनं कृत्वा लाङ्गलेन समुत्कृषेत्।
अस्थि-कील-कपालानि तृण-गुल्मान् च शोधयेत्॥ २६॥
शोधयित्वा वसुमतीं प्रमाणं निर्दिशेत् ततः।

अन्वयः - प्रथमं (भूम्याः) शोधनं कृत्वा लाङ्गलेन समुत्कृषेत् अस्थिकीलकपालानि तृणगुल्मान् च शोधयेत्। वसुमतीं शोधयित्वा ततः प्रमाणं निर्दिशेत्।

अर्थ - सर्वप्रथम जमीन स्वच्छ करून त्यावर नांगर फिरवावा आणि त्यात असलेली हाडे, खिळे, कवटी, गवत, झुडुपे इत्यादी काढून जमीन साफ करून घ्यावी. अशाप्रकारे भूमी स्वच्छ करून मग त्यावर मोजमाप करावे.

❖ दोरा हाताळण्यासंबंधीचे नियम ❖

(त्रीण्युत्तराणि सौम्यं च विशाखापि च रेवती॥
हस्ततिष्यानुराधाश्च प्रशस्ता नाट्यकर्मणि)।)
पुष्यनक्षत्रयोगेन शुक्लं सूत्रं प्रसारयेत्॥ २७॥

पदच्छेदः - (त्रीणि उत्तराणि सौम्यं च विशाखा अपि च रेवती॥
हस्त-तिष्य-अनुराधाः च प्रशस्ता नाट्यकर्मणि)।
पुष्य-नक्षत्र-योगेन शुक्लं सूत्रं प्रसारयेत्॥ २७॥

अन्वयः - त्रीणि उत्तराणि, सौम्यं, विशाखा, रेवती, हस्ततिष्यानुराधाः च नाट्यकर्मणि प्रशस्ता। पुष्यनक्षत्रयोगे तु शुक्लं सूत्रं प्रसारयेत्।

अर्थ - नाट्यगृहाची रचना करण्यासाठी तीन उत्तरा नक्षत्र (उत्तराषाढ, उत्तराफाल्गुनी, उत्तरा भाद्रपद), सौम्य (मृगशीर्ष), विशाखा, रेवती, हस्त, तिष्य (पुष्य) व अनुराधा ह्यातील कोणत्याही नक्षत्राचा योग प्रशंसनीय आहे. पुष्य नक्षत्राचा योग असताना पांढरा दोरा पसरवावा.

कार्पासं बाल्बजं वापि मौञ्जं वाल्कलमेव च |
सूत्रं बुधैस्तु कर्तव्यं यस्य च्छेदो न विद्यते || २८ ||

पदच्छेद: - कार्पासं बाल्बजं वा अपि मौञ्जं वाल्कलम् एव च |
सूत्रं बुधै: तु कर्तव्यं यस्य छेद: न विद्यते || २८ ||

अन्वय: - बुधै: कार्पासं, बादरं, वाल्कलं, मौञ्जं, सूत्रं कर्तव्यं यस्य छेद: न विद्यते |

अर्थ - बुद्धिमान लोकांनी कापूस,रेशीम, वल्कल किंवा मुंज नावाच्या गवतापासून असा दोरा बनवावा जेणेकरून तो तुटणार नाही .

अर्धच्छिन्ने भवेत्सूत्रे स्वामिनो मरणं ध्रुवम् |
त्रिभागच्छिन्नया रज्ज्वा राष्ट्रकोपो विधीयते || २९ ||

पदच्छेद: - अर्धच्छिन्ने भवेत् सूत्रे स्वामिन: मरणं ध्रुवम् |
त्रिभाग-छिन्नया रज्ज्वा राष्ट्रकोप: विधीयते || २९ ||

अन्वय: - अर्धच्छिन्ने सूत्रे स्वामिन: मरणं ध्रुवं भवेत् | त्रिभागच्छिन्नया रज्ज्वा राष्ट्रकोपो विधीयते |

अर्थ - जर तो मध्यभागी तुटला तर स्वामीचा (प्रमुख व्यक्तीचा) मृत्यू निश्चित होऊ शकतो . जर तो तीन भागात तुटला तर राष्ट्राचा कोप होऊ शकतो . ( म्हणजेच राजाचा कोप, राष्ट्रामध्ये क्षोभनिर्माण आणि राष्ट्राची कोषहानी होऊ शकते . )

छिन्नायां तु चतुर्भागे प्रयोक्तुर्नाश उच्यते |
हस्तात्प्रभ्रष्टया वापि कश्चित्त्वपचयो भवेत् || ३० ||

पदच्छेद: - छिन्नायां तु चतुर्भागे प्रयोक्तु: नाश: उच्यते |
हस्तात् प्रभ्रष्टया वा अपि कश्चित् तु अपचय: भवेत् || ३० ||

अन्वय: - छिन्नायां चतुर्भागे प्रयोक्तु: नाश: उच्यते | हस्तात् प्रभ्रष्टया वा कश्चित् अपचय: भवेत् |

अर्थ - जर चार भागात तुटला तर प्रयोग करणाऱ्याचा नाश होऊ शकतो किंवा जर तो हातातून निसटून पडला तर काही ना काही हानी निश्चितच होते .

तस्मान्नित्यं प्रयत्नेन रज्जुग्रहणमिष्यते |
कार्यं चैव प्रयत्नेन मानं नाट्यगृहस्य तु || ३१ ||

पदच्छेद : - तस्मात् नित्यं प्रयत्नेन रज्जुग्रहणम् इष्यते |
कार्यं च एव प्रयत्नेन मानं नाट्यगृहस्य तु || ३१ ||

अन्वय : - तस्मात् प्रयत्नेन नित्यं रज्जुग्रहणम् इष्यते | (एवं) प्रयत्नेन नाट्यगृहस्य मानं कार्यम् |

अर्थ - त्यामुळे दोरा नेहमी अत्यंत सावधगिरीने हाताळला पाहिजे आणि प्रयत्नपूर्वक नाट्यगृहाचे मोजमाप केले पाहिजे .

मुहूर्तेनानुकूलेन तिथ्या सुकरणेन च |
ब्राह्मणांस्तर्पयित्वा तु पुण्याहं वाचयेत्ततः|| ३२ ||
शान्तितोयं ततो दत्त्वा ततः सूत्रं प्रसारयेत् |

पदच्छेद : - मुहूर्तेन अनुकूलेन तिथ्या सुकरणेन च |
ब्राह्मणान् तर्पयित्वा तु पुण्याहं वाचयेत् ततः|| ३२ ||
शान्तितोयं ततः दत्त्वा ततः सूत्रं प्रसारयेत् |

अन्वय : - अनुकूलेन मुहूर्तेन तिथ्या करणेन च ब्राह्मणान् तर्पयित्वा ततः पुण्याहं वाचयेत् | ततः शान्तितोयं दत्त्वा ततः सूत्रं प्रसारयेत् |

अर्थ - अनुकूल मुहूर्त, योग्य तिथी, शुभ करण पाहून ब्राह्मणांना तृप्त करून पुण्याहवाचन करावे . त्यानंतर शांतीपाठाचे उदक शिंपडवून तो धागा पसरवून ठेवावा .

### ❖ नाट्यगृहाचे विभाग ❖

चतुष्षष्टिकरान्कृत्वा द्विधा कुर्यात्पुनश्च तान् || ३३ ||
पृष्ठतो यो भवेद्भागो द्विधाभूतस्य तस्य तु |
सममर्धविभागेन रङ्गशीर्षं प्रकल्पयेत् || ३४ ||
पश्चिमे च विभागेऽथ नेपथ्यगृहमादिशेत् |

पदच्छेद: - चतुष्षष्टि-करान् कृत्वा द्विधा कुर्यात् पुन: च तान् ॥ ३३ ॥
पृष्ठत: य: भवेत् भाग: द्विधा-भूतस्य तस्य तु।
समम् अर्धविभागेन रङ्गशीर्षं प्रकल्पयेत् ॥ ३४ ॥
पश्चिमे च विभागे अथ नेपथ्यगृहम् आदिशेत्।

अन्वय: - चतुष्षटिकरान् (भागान्) कृत्वा पुन: तान् द्विधा कुर्यात्। पृष्ठत: य: भाग: भवेत् तस्य द्विधाभूतस्य अर्धविभागेन समं रङ्गशीर्षं प्रयोजयेत्। अथ पश्चिमे च विभागे नेपथ्यगृहम् आदिशेत्।

अर्थ - चौसष्ट हात लांब भूमी मापून त्याचे दोन भाग करावेत. त्यातील मागच्या अर्ध्या भागाचे पुन्हा दोन विभाग करून त्यातील (पुढच्या) अर्ध्या भागात रंगशीर्ष बांधावे. तर पश्चिमेकडील म्हणजे रंगशीर्षाच्याही मागच्या भागात नेपथ्यगृह निर्माण करावे.

## ❖ मंडपाची स्थापना आणि भिंती उभारणे ❖

विभज्य भागान्विधिवद्यथावदनुपूर्वश: ॥ ३५ ॥
शुभे नक्षत्रयोगे च मण्डपस्य निवेशनम्।
शङ्खदुन्दुभिनिर्घोषैर्मृदङ्गपणवादिभि: ॥ ३६ ॥
सर्वातोद्यै: प्रणुदितै: स्थापनं कार्यमेव तु।

पदच्छेद: - विभज्य भागान् विधिवत् यथावत् अनुपूर्वश: ॥ ३५ ॥
शुभे नक्षत्रयोगे च मण्डपस्य निवेशनम्।
शङ्ख-दुन्दुभि-निर्घोषै: मृदङ्ग-पणव-आदिभि: ॥३६॥
सर्व-आतोद्यै: प्रणुदितै: स्थापनं कार्यम् एव तु।

अन्वय: - (एवं) विधिवत् यथावत् अनुपूर्वश: भागान् विभज्य शुभे नक्षत्रयोगे मण्डपस्य निवेशनं (कार्यम्)। शङ्खदुन्दुभिघोषै: मृदङ्गपणवादिभि: सर्वातोद्यै: प्रणुदितै: स्थापनं कार्यम्।

अर्थ - अशाप्रकारे पूर्वी सांगितलेल्या विधिनुसार भूमीचे विभाजन करून शुभ नक्षत्राचा योग असताना नाट्यगृहाची आधारशिला ठेवावी. शंख, दुंदुभी यांच्या नादघोषात तसेच मृदंग, पणव इ. सर्व प्रकारच्या वाद्यघोषात त्याची स्थापना करावी. (शिलान्यासविधी पूर्ण करावा.)

उत्सार्याणि त्वनिष्टानि पाषण्ड्याश्रमिणस्तथा ‖ ३७ ‖
कषायवसनाश्चैव विकलाश्चैव ये नरा: |

पदच्छेद :- उत्सार्याणि तु अनिष्टानि पाषण्ड्य-आश्रमिण : तथा ‖ ३७ ‖
कषाय-वसना : च एव विकला : च एव ये नरा : |

अन्वय : - (मङ्गलकार्येऽस्मिन्) अनिष्टानि उत्सार्याणि तथा च ये नरा: पाषण्ड्य-आश्रमिण:, कषायवसना:, विकला: (तेऽपि उत्सार्या:) |

अर्थ - (ह्या मंगल प्रसंगी) अनिष्टकारक गोष्टींना दूर ठेवावे. नास्तिक, आश्रमात राहणारे (ब्रह्मचारी, वानप्रस्थाश्रमी), भगवे वस्त्र परिधान केलेले (संन्यासी इ.), तसेच विकलांग मनुष्यांना त्या स्थानी ठेवू नये अथवा त्यांना तिथून बाजूला करावे.

निशायां च बलि: कार्यो नानाभोजनसंयुत: ‖ ३८ ‖
गन्धपुष्पफलोपेतो दिशो दश समाश्रित: |

पदच्छेद :- निशायां च बलि : कार्य : नाना-भोजन-संयुत : ‖ ३८ ‖
गन्ध-पुष्प-फल-उपेत : दिश : दश समाश्रित : |

अन्वय : - निशायां नानाभोजनसंयुत : गन्धपुष्पफलोपेत : दश दिश : समाश्रित : बलि : कार्य : |

अर्थ - त्या रात्री दहा दिशांना (त्या दिशांच्या अधिष्ठात्री देवतांना)अनेक प्रकारचे भोजन, गंध, पुष्प आणि फळांनी युक्त अशी आहुती द्यावी.

पूर्वेण शुक्लान्नयुतो नीलान्नो दक्षिणेन च ‖ ३९ ‖
पश्चिमेन बलि: पीतो रक्तश्चैवोत्तरेण तु |

पदच्छेद :- पूर्वेण शुक्ल-अन्न-युत : नील-अन्न : दक्षिणेन च ‖ ३९ ‖
पश्चिमेन बलि : पीत : रक्त : च एव उत्तरेण तु |

अन्वय : - पूर्वेण शुक्लान्नयुत: (बलि:) दक्षिणेन च नीलान्न: (बलि:) पश्चिमेन पीत: बलि: उत्तरेण तु रक्त : एव (बलि : स्यात्) |

अर्थ - पूर्व दिशेला पांढऱ्या अन्नाची, दक्षिणेला निळ्या अन्नाची, पश्चिमेला पिवळ्या अन्नाची व उत्तरेला लाल अन्नाची आहुती द्यावी.

यादृशं दिशि यस्यां तु दैवतं परिकल्पितम् ॥ ४० ॥
तादृशस्तत्र दातव्यो बलिर्मन्त्रपुरस्कृतः।

पदच्छेदः - यादृशं दिशि यस्यां तु दैवतं परिकल्पितम् ॥ ४० ॥
तादृशः तत्र दातव्यः बलिः मन्त्र-पुरस्कृतः।

अन्वयः - यस्यां दिशि यादृशं दैवतं परिकल्पितं तादृशः मन्त्रपुरस्कृतः बलिः तत्र दातव्यः।

अर्थ - ज्या दिशेचे जे दैवत सांगितले आहे, त्याप्रमाणे त्यांचे तसे मंत्र उच्चारून तशा प्रकारची आहुती प्रदान करावी.

स्थापने ब्राह्मणेभ्यश्च दातव्यं घृतपायसम् ॥ ४१ ॥
मधुपर्कस्तथा राज्ञे कर्तृभ्यश्च गुडौदनम्।

पदच्छेदः - स्थापने ब्राह्मणेभ्यः च दातव्यं घृत-पायसम् ॥ ४१ ॥
मधुपर्कः तथा राज्ञे कर्तृभ्यः च गुड-ओदनम्।

अन्वयः - स्थापने ब्राह्मणेभ्यः घृतपायसं च दातव्यं तथा राज्ञे मधुपर्कः, कर्तृभ्यः च गुडौदनं (दातव्यम्)।

अर्थ - स्थापनेच्या वेळी ब्राह्मणांना साजूक तूप घालून केलेली खीर, राजाला मधुपर्क व काम करणाऱ्यांना गूळभात द्यावा.

नक्षत्रेण तु कर्तव्यं मूलेन स्थापनं बुधैः ॥ ४२ ॥
मुहूर्तेनानुकूलेन तिथ्या सुकरणेन च।
एवं तु स्थापनं कृत्वा भित्तिकर्म प्रयोजयेत् ॥ ४३ ॥

पदच्छेदः - नक्षत्रेण तु कर्तव्यं मूलेन स्थापनं बुधैः ॥ ४२ ॥
मुहूर्तेन अनुकूलेन तिथ्या सुकरणेन च।
एवं तु स्थापनं कृत्वा भित्तिकर्म प्रयोजयेत् ॥ ४३ ॥

अन्वयः - बुधैः मूलेन नक्षत्रेण, अनुकूलेन मुहूर्तेन तिथ्या सुकरणेन च स्थापनं कर्तव्यम्। एवं स्थापनं कृत्वा भित्तिकर्म प्रयोजयेत्।

अर्थ - बुद्धिमान लोकांनी मूळ नक्षत्रावर अनुकूल मुहूर्त, तिथी आणि करण पाहून (नाट्यगृहाची) पायाभरणी करावी. अशाप्रकारे पायाभरणी केल्यावर भिंती उभारण्याचे कार्य करावे.

### ❖ स्तंभस्थापनेचा विधी ❖

भित्तिकर्मणि निर्वृत्ते स्तम्भानां स्थापनं ततः।
तिथिनक्षत्रयोगेन शुभेन करणेन च॥ ४४॥
स्तम्भानां स्थापनं कार्यं रोहिण्या श्रवणेन वा।
आचार्येण सुयुक्तेन त्रिरात्रोपोषितेन च॥ ४५॥
स्तम्भानां स्थापनं कार्यं प्राप्ते सूर्योदये शुभे।

पदच्छेदः - भित्ति-कर्मणि निर्वृत्ते स्तम्भानां स्थापनं ततः।
तिथि-नक्षत्र-योगेन शुभेन करणेन च॥४४॥
स्तम्भानां स्थापनं कार्यं रोहिण्या श्रवणेन वा।
आचार्येण सुयुक्तेन त्रिरात्र-उपोषितेन च॥ ४५॥
स्तम्भानां स्थापनं कार्यं प्राप्ते सूर्योदये शुभे।

अन्वयः - भित्तिकर्मणि निर्वृत्ते स्तम्भानां स्थापनं कर्तव्यम्। ततः शुभेन तिथिनक्षत्रयोगेन करणेन रोहिण्या श्रवणेन वा नक्षत्रेण स्तम्भानां स्थापनं कार्यम्। त्रिरात्रोपोषितेन सुयुक्तेन आचार्येण शुभे सूर्योदये प्राप्ते च स्तम्भानां स्थापनं कार्यम्।

अर्थ - भिंती उभारण्याचे कार्य पूर्ण झाल्यानंतर खांबांची स्थापना करावी. तेव्हा शुभ तिथी, नक्षत्र, योग व करण पाहूनच रोहिणी किंवा श्रवण नक्षत्रामध्ये स्तंभस्थापना करावी. तीन रात्र उपवास केलेल्या अत्यंत योग्य नाट्याचार्यांकडून सूर्योदयाच्या शुभ वेळी स्तंभांच्या स्थापनेचे कार्य करून घ्यावे.

चन्दनं च भवेद्ब्राह्मं क्षात्रं खादिरमेव च।
धावाख्यं वैश्यवर्णं स्याच्छत्रं सर्वद्रुमैः स्मृतम्॥

पदच्छेद: - चन्दनं च भवेत् ब्राह्मं क्षात्रं खादिरम् एव च ।
धाव-आख्यं वैश्यवर्णं स्यात् छत्रं सर्व-द्रुमै: स्मृतम् ॥

अन्वय: - ब्राह्मं चन्दनं च भवेत् । क्षात्रं खादिरम् एव च । धावाख्यं वैश्यवर्णं स्यात् । छत्रं सर्वद्रुमै: स्मृतम् ।

अर्थ - ब्राह्मण स्तंभ चंदनाचा असावा. क्षत्रिय स्तंभ खादिर वृक्षाचा असावा. वैश्य स्तंभ धावाच्या लाकडाचा असावा आणि शूद्रासाठीचा स्तंभ सर्व प्रकारच्या लाकडापासून तयार करावा.

प्रथमे ब्राह्मणस्तम्भे सर्पिस्सर्षपसंस्कृत: ॥ ४६ ॥
सर्वशुक्लो विधि: कार्यो दद्यात्पायसमेव च ।

पदच्छेद: - प्रथमे ब्राह्मण-स्तम्भे सर्पिस्-सर्षप-संस्कृत: ॥ ४६ ॥
सर्वशुक्ल: विधि: कार्य: दद्यात् पायसम् एव च ।

अन्वय: - प्रथमे ब्राह्मणस्तम्भे सर्पिस्सर्षपसंस्कृत: (करणीय:), (तदा) सर्वशुक्ल: विधि: कार्य: । (ब्राह्मणेभ्य: च) पायसम् एव दद्यात् ।

अर्थ - सर्वप्रथम ब्राह्मणस्तंभावर तूप आणि मोहरीचा संस्कार करावा. यावेळी केले जाणारे सर्व विधी शुभ्र वर्णाचे असावेत. (त्यावेळी ब्राह्मणांना) खीर द्यावी.

ततश्च क्षत्रियस्तम्भे वस्त्रमाल्यानुलेपनम् ॥ ४७ ॥
सर्वं रक्तं प्रदातव्यं द्विजेभ्यश्च गुडौदनम् ।

पदच्छेद: - तत: च क्षत्रिय-स्तम्भे वस्त्र-माल्य-अनुलेपनम् ॥ ४७ ॥
सर्वं रक्तं प्रदातव्यं द्विजेभ्यश्च गुडौदनम् ।

अन्वय: - तत: क्षत्रियस्तम्भे वस्त्रमाल्यानुलेपनं सर्वं रक्तं (भवेत्) द्विजेभ्य: च गुडौदनं प्रदातव्यम् ।

अर्थ - त्यानंतर (आग्नेय दिशेला) क्षत्रियस्तंभाची स्थापना करताना वस्त्र, पुष्प व चंदन हे सर्व लाल रंगाचे असावे आणि ब्राह्मणांना त्यावेळी गूळभात द्यावा.

वैश्यस्तम्भे विधि: कार्यो दिग्भागे पश्चिमोत्तरे ॥ ४८ ॥
सर्व पीतं प्रदातव्यं द्विजेभ्यश्च घृतौदनम्।

पदच्छेद :- वैश्य-स्तम्भे विधि : कार्य : दिग्-भागे पश्चिम-उत्तरे ॥ ४८ ॥
सर्व पीतं प्रदातव्यं द्विजेभ्य : च घृत-ओदनम्।

अन्वय : - वैश्यस्तम्भे पश्चिमोत्तरे दिग्भागे विधि: कार्य: । (तदा) सर्व पीतं (भवेत्) द्विजेभ्य: घृतौदनं च प्रदातव्यम्।

अर्थ - नाट्यगृहाच्या पश्चिमोत्तर (वायव्य) दिशेमध्ये वैश्य स्तंभाची स्थापना करावी. यावेळी सर्व काही पिवळ्या रंगाचे असावे आणि ब्राह्मणांना तूप व भात द्यावा.

शूद्रस्तम्भे विधि: कार्य: सम्यक्पूर्वोत्तराश्रये ॥ ४९ ॥
नीलप्रायं प्रयत्नेन कृसरं च द्विजाशनम्।

पदच्छेद :- शूद्र-स्तम्भे विधि : कार्य : सम्यक् पूर्व-उत्तर-आश्रये ॥ ४९ ॥
नीलप्रायं प्रयत्नेन कृसरं च द्विज-अशनम्।

अन्वय : - पूर्वोत्तराश्रये शूद्रस्तम्भे सम्यक् विधि: कार्य: । (तत्र) प्रयत्नेन नीलप्रायं (सर्व भवेत्)। (अपि च) द्विजाशनं कृसरं (प्रदातव्यम्)।

अर्थ - पूर्वोत्तर (ईशान्य) दिशेमध्ये शूद्रस्तंभ स्थापना करताना योग्य असा विधी करावा. त्यात प्रयत्नपूर्वक निळ्या रंगाची सर्व सामग्री असावी व ब्राह्मणांना खिचडी द्यावी.

पूर्वोक्तब्राह्मणस्तम्भे शुक्लमाल्यानुलेपने ॥ ५० ॥
निक्षिपेत्कनकं मूले कर्णाभरणसंश्रयम्।
ताम्रं चाध: प्रदातव्यं स्तम्भे क्षत्रियसंज्ञके ॥ ५१ ॥
वैश्यस्तम्भस्य मूले तु रजतं सम्प्रदापयेत्।
शुद्रस्तम्भस्य मूले तु दद्यादायसमेव च ॥ ५२ ॥
सर्वेष्वेव तु निक्षेप्यं स्तम्भमूलेषु काञ्चनम्।

पदच्छेद :- पूर्व-उक्त-ब्राह्मण-स्तम्भे शुक्ल-माल्य-अनुलेपने ॥ ५० ॥
निक्षिपेत् कनकं मूले कर्ण-आभरण-संश्रयम्।

ताम्रं च अथ: प्रदातव्यं स्तम्भे क्षत्रिय-संज्ञके ॥ ५१ ॥
वैश्य-स्तम्भस्य मूले तु रजतं सम्प्रदायेत् ।
शूद्र-स्तम्भस्य मूले तु दद्यात् आयसम् एव च ॥ ५२ ॥
सर्वेषु एव तु निक्षेप्यं स्तम्भ-मूलेषु काञ्चनम् ।

अन्वय: - पूर्वोक्तब्राह्मणस्तम्भे शुक्लमाल्यानुलेपने कर्णाभरणसंश्रयं कनकं मूले निक्षिपेत् । क्षत्रियसंज्ञके स्तम्भे च ताम्रं प्रदातव्यम् । वैश्यस्तम्भस्य मूले तु रजतं सम्प्रदायेत् । शूद्रस्तम्भस्य मूले तु आयसम् एव दद्यात् । सर्वेषु स्तम्भमूलेषु एव काञ्चनं तु निक्षेप्यम् (एव) ।

अर्थ - पूर्वी सांगितलेल्या शुभ्र वस्त्र, माळा, चंदन अर्पण केलेल्या ब्राह्मणस्तंभाच्या मुळाशी कानात घालायचे सोन्याचे अलंकार समर्पित करावे. क्षत्रिय स्तंभाच्या मुळाशी तांबे व वैश्य स्तंभाच्या मुळाशी चांदी अर्पण करावी. शूद्र स्तंभाच्या मुळाशी लोह व इतर सर्व स्तंभांच्या मुळाशी सोने अर्पण करावे.

स्वस्तिपुण्याहघोषेण जयशब्देन चैव हि ॥ ५३ ॥
स्तम्भानां स्थापनं कार्यं पुष्पमालापुरस्कृतम् ।
रत्नदानै: सगोदानैर्वस्त्रदानैरनल्पकै: ॥ ५४ ॥
ब्राह्मणांस्तर्पयित्वा तु स्तम्भानुत्थापयेत्तत: ।

पदच्छेद: - स्वस्ति-पुण्याह-घोषेण जय-शब्देन च एव हि ॥ ५३ ॥
स्तम्भानां स्थापनं कार्यं पुष्प-माला-पुरस्कृतम् ।
रत्नदानै: सगोदानै: वस्त्रदानै: अनल्पकै: ॥ ५४ ॥
ब्राह्मणान् तर्पयित्वा तु स्तम्भान् उत्थापयेत् तत: ।

अन्वय: - स्वस्तिपुण्याहघोषेण जयशब्देन च स्तम्भानां पुष्पमालापुरस्कृतं स्थापनं कार्यम् । रत्नदानै: सगोदानै: अनल्पकै: वस्त्रदानै: ब्राह्मणान् तर्पयित्वा तत: स्तम्भान् उत्थापयेत् ।

अर्थ - स्वस्तिवाचन, पुण्याहवाचन व जयघोषात पुष्प आणि माळांनी सजविलेल्या स्तंभांची स्थापना करावी. ब्राह्मणांना रत्नदान, गोदान व वस्त्रदान केल्यानंतरच स्तंभ उभे करावेत.

अचलं चाप्यकम्पञ्च तथैवावलितं पुन: ‖ ५५ ‖
स्तम्भस्योत्थापने सम्यग्दोषा ह्येते प्रकीर्तिता: |

पदच्छेद: - अचलं च अपि अकम्पं च तथा एव अवलितं पुन: ‖ ५५ ‖
स्तम्भस्य उत्थापने सम्यक् दोषा: हि एते प्रकीर्तिता: |

अन्वय: - स्तम्भस्य सम्यक् उत्थापने अचलम्, अकम्पं तथैव अवलितम् एते दोषा: प्रकीर्तिता: |

अर्थ - स्तंभ व्यवस्थित उभे करताना ते अचल, अकंप व अवलित असावे, तसे न केल्यास दोष लागतो.

अवृष्टिरुक्ता चलने वलने मृत्युतो भयम् ‖ ५६ ‖
कम्पने परचक्रात्तु भयं भवति दारुणम् |
दोषैरेतैर्विहीनं तु स्तम्भमुत्थापयेच्छिवम् ‖ ५७ ‖

पदच्छेद: - अवृष्टि: उक्ता चलने वलने मृत्युत: भयम् ‖ ५६ ‖
कम्पने परचक्रात् तु भयं भवति दारुणम् |
दोषै: एतै: विहीनं तु स्तम्भम् उत्थापयेत् शिवम् ‖ ५७ ‖

अन्वय: - चलने अवृष्टि: उक्ता | वलने मृत्युत: भयम् | कम्पने परचक्रात् तु दारुणं भयं भवति | एतै: दोषै: विहीनं शिवं स्तम्भम् उत्थापयेत् |

अर्थ - जर ते हलले झाले तर अवर्षण होते, फिरले तर मृत्युचे भय असते, कंपित झाले तर शत्रूपक्षाकडून दारुण भीती संभवते. म्हणूनच ह्या दोषांना टाळण्यासाठी मंगलकारी स्तंभांना उभे केले पाहिजे.

पवित्रे ब्राह्मणस्तम्भे दातव्या दक्षिणा च गौ: |
शेषाणां भोजनं कार्यं स्थापने कर्तृसंश्रयम् ‖ ५८ ‖

पदच्छेद: - पवित्रे ब्राह्मण-स्तम्भे दातव्या दक्षिणा च गौ: |
शेषाणां भोजनं कार्य स्थापने कर्तृसंश्रयम् ‖ ५८ ‖

अन्वय: - पवित्रे ब्राह्मणस्तम्भे गौ: दक्षिणा दातव्या | शेषाणां स्थापने कर्तृसंश्रयं भोजनं कार्यम् |

अर्थ - पवित्र ब्राह्मणस्तंभाच्या स्थापनेच्या वेळी गाईचे दान करावे व इतर स्तंभांच्या स्थापनेच्या वेळी वास्तू निर्माण करणाऱ्यांना भोजन द्यावे .

मन्त्रपूतं च तद्देयं नाट्याचार्येण धीमता |
पुरोहितं नृपं चैव भोजयेन्मधुपायसैः || ५९ ||

पदच्छेदः - मन्त्र-पूतं च तत् देयं नाट्याचार्येण धीमता |
पुरोहितं नृपं च एव भोजयेत् मधु-पायसैः || ५९ ||

कर्तॄनपि तथा सर्वान्कृसरां लवणोत्तराम् |
सर्वमेव विधिं कृत्वा सर्वातोद्यैः प्रवादितैः || ६० ||
अभिमन्त्र्य यथान्यायं स्तम्भानुत्थापयेच्छुचिः |

पदच्छेदः - कर्तॄन् अपि तथा सर्वान् कृसरां लवण-उत्तराम् |
सर्वम् एव विधिं कृत्वा सर्व-आतोद्यैः प्रवादितैः || ६० ||
अभिमन्त्र्य यथान्यायं स्तम्भान् उत्थापयेत् शुचिः |

अन्वयः - मन्त्रपूतं च तत् (भोजनं) धीमता नाट्याचार्येण देयम् | पुरोहितं नृपं च मधुपायसैः भोजयेत् | तथा सर्वान् कर्तॄन् लवणोत्तरं कृसरं (भोजयेत्) | एवं सर्वम् एव विधिं कृत्वा सर्वातोद्यैः प्रवादितैः यथान्यायं अभिमन्त्र्य शुचिः स्तम्भम् उत्थापयेत् |

अर्थ - बुद्धिमान नाट्याचार्याने मंत्रोच्चारासहित हे भोजन द्यावे . राजा व पुरोहित ह्यांना मधुयुक्त पायस (खीर) युक्त भोजन द्यावे व इतर कार्यकर्त्यांना मीठयुक्त खिचडी खायला द्यावी . अशाप्रकारे सर्व विधी योग्य पद्धतीने करून सर्व वाद्यांच्या घोषात वास्तुशास्त्राच्या नियमांनुसार, मंत्रोच्चारासहित स्तंभांना उभे करावे .

यथाऽचलो गिरिर्मेरुर्हिमवांश्च महाबलः || ६१ ||
जयावहो नरेन्द्रस्य तथा त्वमचलो भव |

पदच्छेदः - यथा अचलः गिरिः मेरुः हिमवान् च महाबलः || ६१ ||
जयावहः नरेन्द्रस्य तथा त्वम् अचलः भव |

अन्वय: - यथा अचल: गिरि: मेरु: महाबल: हिमवान् च तथा अचलं त्वं नरेन्द्रस्य जयावह: भव (वह)।

अर्थ - ज्याप्रमाणे मेरु पर्वत स्थिर व अचल आहे आणि हिमालय महाबलवान आहे त्याप्रमाणे हे स्तंभा, तू सुद्धा अचल होऊन राजाला विजय प्राप्त करून देणारा हो . (अशाप्रकारे मंत्रोच्चारण करावे . )

स्तम्भद्वारं च भित्तिं च नेपथ्यगृहमेव च ॥ ६२ ॥
एवमुत्थापयेत्तज्ज्ञो विधिदृष्टेन कर्मणा ।

पदच्छेद: - स्तम्भद्वारं च भित्तिं च नेपथ्यगृहम् एव च ॥ ६२ ॥
एवम् उत्थापयेत् तज्ज्ञ: विधिदृष्टेन कर्मणा ।

अन्वय: - एवं विधिदृष्टेन कर्मणा तज्ज्ञ: स्तम्भद्वारं भित्तिं नेपथ्यगृहं च उत्थापयेत् ।

अर्थ - अशाप्रकारे सांगितलेल्या विधिनुसार ( शिल्प जाणणाऱ्या) तज्ज्ञ विद्वानांकडून स्तंभ, दरवाजे, भिंती व नेपथ्यगृह उभे करावे .

## ❖ मत्तवारणी ❖

रङ्गपीठस्य पार्श्वे तु कर्तव्या मत्तवारणी ॥ ६३ ॥
चतु:स्तम्भसमायुक्ता रङ्गपीठप्रमाणत: ।
अध्यर्धहस्तोत्सेधेन कर्तव्या मत्तवारणी ॥ ६४ ॥
ऊत्सेधेन तयोस्तुल्यं कर्तव्यं रङ्गमण्डपम् ।

पदच्छेद: - रङ्गपीठस्य पार्श्वे तु कर्तव्या मत्तवारणी ॥ ६३ ॥
चतु:स्तम्भ-समायुक्ता रङ्गपीठ-प्रमाणत: ।
अध्यर्ध-हस्त-ऊत्सेधेन कर्तव्या मत्तवारणी ॥ ६४ ॥
ऊत्सेधेन तयो: तुल्यं कर्तव्यं रङ्गमण्डपम् ।

अन्वय: - रङ्गपीठस्य पार्श्वे रङ्गपीठप्रमाणत: चतु:स्तम्भसमायुक्ता मत्तवारणी कर्तव्या । मत्तवारणी अध्यर्धहस्तोत्सेधेन कर्तव्या । तयो: ऊत्सेधेन तुल्यं रङ्गमण्डपं कर्तव्यम् ।

अर्थ - रंगपीठाच्या दोन्ही बाजूस त्याच्या मापानुसार चार खांबांनी युक्त अशा मत्तवारणीची रचना केली जावी. मत्तवारणीची उंची दीड हात असावी व तिच्या उंचीनुसार रंगमंडप उभारावा.

तस्यां माल्यं च धूपं च गन्धं वस्त्रं तथैव च ॥ ६५ ॥
नानावर्णानि देयानि तथा भूतप्रियो बलिः।

पदच्छेदः - तस्यां माल्यं च धूपं च गन्धं वस्त्रं तथा एव च ॥ ६५ ॥
नानावर्णानि देयानि तथा भूतप्रियः बलिः।

अन्वयः - तस्यां माल्यं, धूपं, वस्त्रं, गन्धं, नानावर्णानि (वस्तूनि) देयानि तथा भूतप्रियः बलिः (अपि) (दातव्यः)।

अर्थ - (मत्तवारणीवर) त्यावेळी माळा, वस्त्र, गंध, विविध वर्णांची फुले अर्पण करावीत. तसेच भूतगणांना प्रिय खाद्यपदार्थांची आहुती देखील द्यावी.

आयसं तत्र दातव्यं स्तम्भानां कुशलैरधः ॥ ६६ ॥
भोजने कृसराश्चैव दातव्यं ब्राह्मणाशनम्।
एवं विधिपुरस्कारैः कर्तव्या मत्तवारणी ॥ ६७ ॥

पदच्छेदः - आयसं तत्र दातव्यं स्तम्भानां कुशलैः अधः ॥ ६६ ॥
भोजने कृसराः च एव दातव्यं ब्राह्मण-अशनम्।
एवं विधि-पुरस्कारैः कर्तव्या मत्तवारणी ॥ ६७ ॥

अन्वयः - तत्र कुशलैः स्तम्भानाम् अधः आयसं दातव्यम्। भोजने कृसराः ब्राह्मणाशनं च दातव्यम्। एवं विधिपुरस्कारैः मत्तवारणी कर्तव्या।

अर्थ - कुशल व्यक्तींनी खांबांच्या मुळाशी लोखंड ठेवावे. ब्राह्मणांना भोजनामध्ये विविध प्रकारच्या खिचड्या द्याव्यात. अशाप्रकारे, सर्व विधींद्वारे मत्तवारणीची निर्मिती करावी.

## ❖ रंगपीठ आणि रंगशीर्ष ❖

रङ्गपीठं ततः कार्यं विधिदृष्टेन कर्मणा |
रङ्गशीर्षन्तु कर्तव्यं षड्दारुकसमन्वितम्|| ६८ ||

पदच्छेद :- रङ्गपीठं ततः कार्यं विधिदृष्टेन कर्मणा |
रङ्गशीर्षं तु कर्तव्यं षड्-दारुक-समन्वितम् || ६८ ||

अन्वय : - ततः विधिदृष्टेन कर्मणा रङ्गपीठं कार्यम् | षड्दारुकसमन्वितं रङ्गशीर्षं तु कर्तव्यम् |

अर्थ - त्यानंतर विधिनुसार रंगपीठाची निर्मिती करावी . रंगशीर्ष हे षड्दारुकाने युक्त असावे . (अ . भा . = ऊह, प्रत्यूह, निर्व्यूह, व्यूह=संजवन, संव्यूह आणि कुहर नावाचे सहा लाकडी आधार आहेत .

स्तंभाच्या मस्तकापासून दूरवर बाहेर आलेले लाकूड म्हणजे ऊह .

या लाकडापासून बाहेर आलेली तुला म्हणजे प्रत्यूह .

तुलेच्या बाहेरच्या बाजूला दोन खांबांच्या मध्ये भिंतीसारखी जी चौकट होते तिला निर्व्यूह असे म्हणतात .

वरच्या दिशेला भिंतीसारखा चौसोपी आकार होतो त्यास संजवन किंवा व्यूह असे म्हणतात .

खांबांवर सिंह, हत्ती, सर्प इ . ची चित्रे असतील तर त्यास अनुबंध किंवा संव्यूह असे म्हणतात .

पर्वत, शहर, लताकुंजांनी सजलेले उद्यान, गुहा इ . आतल्या बाजूस कोरलेल्या लाकडास कुहर असे म्हणतात . )

कार्यं द्वारद्वयं चात्र नेपथ्यगृहकस्य तु |
पूरणे मृत्तिका चात्र कृष्णा देया प्रयत्नतः || ६९ ||

पदच्छेद :- कार्यं द्वारद्वयं च अत्र नेपथ्य-गृहकस्य तु |
पूरणे मृत्तिका च अत्र कृष्णा देया प्रयत्नतः || ६९ ||

अन्वय : - अत्र च नेपथ्यगृहस्य तु द्वारद्वयं कार्यम् | पूरणे च अत्र प्रयत्नतः कृष्णा मृत्तिका देया |

अर्थ - नेपथ्यगृहाला दोन दरवाजे असावेत आणि भरणासाठी प्रयत्नपूर्वक काळी माती वापरावी .

लाङ्गलेन समुत्कृष्य निर्लोष्टतृणशर्करम् |
लाङ्गले शुद्धवर्णौ तु धुर्यौ योज्यौ प्रयत्नत: || ७० ||

पदच्छेद: - लाङ्गलेन समुत्कृष्य निर्लोष्ट-तृण-शर्करम् |
लाङ्गले शुद्धवर्णौ तु धुर्यौ योज्यौ प्रयत्नत: || ७० ||

अन्वय: - लाङ्गलेन (हलेन) निर्लोष्टतृणशर्करं (शर्कर:=लघुपाषाणं) समुत्कृष्य लाङ्गले प्रयत्नत: शुद्धवर्णौ धुर्यौ योज्यौ |

अर्थ - नांगर चालवून जमिनीतील गवत व लहान दगड बाजूला करावेत . त्यासाठी नांगराला बलवान असे पांढरेशुभ्र बैल जोडावे .

कर्तार: पुरुषाश्चात्र येऽङ्गदोषविवर्जिता: |
अहीनाङ्गैश्च वोढव्या मृत्तिका पीवरैर्नवै: || ७१ ||

पदच्छेद: - कर्तार: पुरुषा: च अत्र ये अङ्ग-दोष-विवर्जिता: |
अ-हीन-अङ्गै: च वोढव्या मृत्तिका पीवरै: नवै: || ७१ ||

अन्वय: - अत्र हलकार्ये ये कर्तार: पुरुषा: ते अङ्गदोषविवर्जिता: भवेयु: | अहीनाङ्गै: नवै: पीटकै: मृत्तिका वोढव्या |

अर्थ - नांगरणीचे कार्य करणारे जे कामगार आहेत ते अंगदोषविरहित असावेत आणि सुदृढ लोकांनी नवीन टोपल्यांमधून माती न्यावी .

एवंविधै: प्रकर्तव्यं रङ्गशीर्षं प्रयत्नत:
कूर्मपृष्ठं न कर्तव्यं मत्स्यपृष्ठं तथैव च || ७२ ||

पदच्छेद: - एवंविधै: प्रकर्तव्यं रङ्गशीर्षं प्रयत्नत: |
कूर्मपृष्ठं न कर्तव्यं मत्स्यपृष्ठं तथा एव च || ७२ ||

अन्वय: - एवंविधै: च रङ्गशीर्षं प्रयत्नत: कर्तव्यम् | कूर्मपृष्ठं तथैव मत्स्यपृष्ठं रङ्गशीर्षं न कर्तव्यम् |

अर्थ - अशाप्रकारे अतिशय प्रयत्नपूर्वक रंगशीर्षाची निर्मिती करावी. कासवाच्या पाठीच्या तसेच माशाच्या पाठीच्या आकाराचे रंगशीर्ष तयार करू नये.

शुद्धादर्शतलाकारं रङ्गशीर्षं प्रशस्यते |
रत्नानि चात्र देयानि पूर्वे वज्रं विचक्षणैः || ७३ ||

पदच्छेदः - शुद्ध-आदर्श-तल-आकारं रङ्गशीर्षं प्रशस्यते |
रत्नानि च अत्र देयानि पूर्वे वज्रं विचक्षणैः || ७३ ||

अन्वयः - शुद्धादर्शतलाकारं रङ्गशीर्षं प्रशस्यते | अत्र विचक्षणैः रत्नानि च देयानि | पूर्वे वज्रं (भवेत्) |

अर्थ - रंगशीर्ष स्वच्छ आरशाच्या पृष्ठभागाप्रमाणे समतल असेल तर अधिक प्रशंसनीय ठरते. या ठिकाणी बुद्धिमान लोकांनी अनेक रत्न व आयुधे द्यावीत. पूर्व दिशेला वज्र ठेवावे.

वैडूर्यं दक्षिणे पार्श्वे स्फटिकं पश्चिमे तथा |
प्रवालमुत्तरे चैव मध्ये तु कनकं भवेत् || ७४ ||

पदच्छेदः - वैडूर्यं दक्षिणे पार्श्वे स्फटिकं पश्चिमे तथा |
प्रवालम् उत्तरे च एव मध्ये तु कनकं भवेत् || ७४ ||

अन्वयः - दक्षिणे वैदूर्यं, तथा पश्चिमे पार्श्वे स्फटिकं, उत्तरे प्रवालं च मध्ये तु कनकं भवेत् |

अर्थ - दक्षिणेला वैदूर्य, तसेच पश्चिमेला स्फटिक, उत्तरेला प्रवाळ (पोवळे) आणि मध्ये सोने ठेवावे.

❖ लाकडाचे कोरीव काम ❖

एवं रङ्गशिरः कृत्वा दारुकर्म प्रयोजयेत् |
ऊहप्रत्यूहसंयुक्तं नानाशिल्पप्रयोजितम् || ७५ ||

पदच्छेदः - एवं रङ्गशिरः कृत्वा दारु-कर्म प्रयोजयेत् |
ऊह-प्रत्यूह-संयुक्तं नाना-शिल्प-प्रयोजितम् || ७५ ||

नानासञ्जवनोपेतं बहुव्यालोपशोभितम् |
ससालभञ्जिकाभिश्च समन्तात्समलङ्कृतम् || ७६ ||

पदच्छेद : - नाना-सञ्जवन-उपेतं बहु-व्याल-उपशोभितम् |
स-साल-भञ्जिकाभि : च समन्तात् समलङ्कृतम् || ७६ ||

निर्व्यूहकुहरोपतं नानाग्रथितवेदिकम् |
नानाविन्याससंयुक्तं चित्रजालगवाक्षकम् || ७७ ||

पदच्छेद : - निर्व्यूह-कुहर-उपेतं नाना-ग्रथित-वेदिकम् |
नाना-विन्यास-संयुक्तं चित्र-जाल-गवाक्षकम् || ७७ ||

सुपीठधारिणीयुक्तं कपोतालीसमाकुलम् |
नानाकुट्टिमविन्यस्तै : स्तभैश्चाप्युपशोभितम् || ७८ ||

पदच्छेद : - सुपीठ-धारिणी-युक्तं कपोत-आली-समाकुलम् |
नाना-कुट्टिम-विन्यस्तै : स्तभै : च अपि उपशोभितम् || ७८ ||

अन्वय : - एवं रङ्गशिर : कृत्वा दारुकर्म प्रवर्तयेत् | एतत् दारुकर्म ऊहप्रत्यूहसंयुक्तं नानाशिल्पप्रयोजितं नानासञ्जवनोपेतं बहुव्यालोपशोभितं, ससालभञ्जिकाभि : च समन्तात् समलङ्कृतं, निर्व्यूहकुहरोपेतं, नानाग्रथितवेदिकं, नानाविन्याससंयुक्तं, चित्रजालगवाक्षं, सुपीठधारिणीयुक्तं, कपोतालीसमाकुलं, नानाकुट्टिमविन्यस्तै : स्तम्भै : तत् उपशोभितं भवेत् |

अर्थ - अशा प्रकारे रंगशीर्ष करून लाकडाचे काम सुरू करावे . हे लाकडाचे काम ऊह, प्रत्यूह इ . प्रकारच्या लाकडांनी युक्त असावे . विविध प्रकारची शिल्पे कोरलेली असावीत . त्यात अनेक प्रकारचे संजवन काष्ठही असावे . अनेक सर्प, हत्ती, सिंह इ . प्राणी कोरलेले असावेत . तसेच सुंदर मूर्तीदेखील कोराव्यात . निर्व्यूह आणि कुहर या प्रकारच्या लाकडांचा वापर करावा . लाकडी काम विविध प्रकारच्या वेदिकांनी युक्त

असावे. त्यासाठी अनेक प्रकारच्या शैलींचा वापर करावा. चार किंवा आठ छिद्र असलेल्या जाळ्यांनी सुशोभित खिडक्या असाव्यात. स्तंभाच्या वर असलेल्या पीठावर कमान असावी. बारीक किनार असलेल्या लाकडाच्या कोरीव कबुतरांच्या रांगा असाव्यात. विविध कुट्टिम अर्थात रंगशीर्ष, रंगपीठ आणि दोन्ही मत्तवारणी यांच्यासाठी लाकडी जमिनीचा पृष्ठभाग लाल, सफेद, निळा, पिवळा इ. रंगांचा असावा. अशा जमिनीवर उभ्या केलेल्या स्तंभांनी सुशोभित असे लाकडाचे काम करावे.

❖ भिंत उभारणे आणि तिचे सुशोभीकरण ❖

एवं काष्ठविधिं कृत्वा भित्तिकर्म प्रयोजयेत्।
स्तम्भं वा नागदन्तं वा वातायनमथापि वा ॥ ७९ ॥

पदच्छेद :- एवं काष्ठ-विधिं कृत्वा भित्ति-कर्म प्रयोजयेत्।
स्तम्भं वा नागदन्तं वा वातायनम् अथ अपि वा ॥ ७९ ॥

कोणं वा सप्रतिद्वारं द्वारविद्धं न कारयेत्।
कार्यं शैलगुहाकारो द्विभूमिर्नाट्यमण्डपः ॥ ८० ॥

पदच्छेद :- कोणं वा सप्रतिद्वारं द्वारविद्धं न कारयेत्।
कार्यं शैल-गुहा-आकारः द्विभूमिः नाट्यमण्डपः ॥ ८० ॥

मन्दवातायनापेतो निर्वातो धीरशब्दवान्।
तस्मान्निवातः कर्तव्यः कर्तृभिर्नाट्यमण्डपः ॥ ८१ ॥

पदच्छेद :- मन्द-वातायन-अपेतः निर्वातः धीरशब्दवान्।
तस्मात् निवातः कर्तव्यः कर्तृभिः नाट्यमण्डपः ॥ ८१ ॥

गम्भीरस्वरता येन कुतपस्य भविष्यति।
भित्तिकर्मविधिं कृत्वा भित्तिलेपं प्रदापयेत् ॥ ८२ ॥

पदच्छेद: - गम्भीर-स्वरता येन कुतपस्य भविष्यति |
भित्ति-कर्म-विधिं कृत्वा भित्ति-लेपं प्रदापयेत् || ८२ ||

अन्वय: - एवं काष्ठविधिं कृत्वा भित्तिकर्म प्रवर्तयेत् | स्तम्भं नागदन्तं वातायनम् अथापि कोणं सप्रतिद्वारं वा अत्र द्वारविद्धं न कारयेत् | (तत:) शैलगुहाकार:, द्विभूमि:, मन्दवातायनोपेत:, निर्वात:, धीरशब्दभाक् नाट्यमण्डप: कार्य: | तस्मात् कर्तृभि: नाट्यमण्डप: निवात: कर्तव्य: येन कुतपस्य गम्भीरस्वरता भविष्यति | भित्तिकर्मविधिं कृत्वा भित्तिलेपं प्रदापयेत् |

अर्थ - अशाप्रकारे लाकडाचे काम व सजावट पूर्ण झाल्यावर भिंत बांधण्याचे काम सुरु करावे. कोणत्याही दरवाज्यासमोर खांब, खुंटी, खिडकी तसेच कोपरा किंवा दुसरा दरवाजा बनवू नये. नाट्यगृह डोंगरातील गुहेच्या आकाराप्रमाणे असावे, ज्यामुळे आवाज मोठा होऊन शेवटपर्यंत ऐकू येईल. हे नाट्यगृह द्विभूमि (दोन स्तरांवर) असावे. नाट्यगृहात खिडक्यांमधून मंद वाऱ्याची झुळूक यायला हवी. जोराचा वारा न येणारे आणि गंभीर स्वरांचे श्रवण नीट होऊ शकेल असे नाट्यगृह बनवावे. नाट्यगृह वायूशून्य बनवावे ज्यामुळे वाद्यवृंदातील वादक आणि गायकांचा गंभीर स्वर ऐकू येईल. भिंती उचलण्याचे काम झाल्यावर भिंतींना लेप द्यावा.

सुधाकर्म बहिस्तस्य विधातव्यं प्रयत्नत: |
भित्तिष्वथ विलिप्तासु परिमृष्टासु सर्वत: || ८३ ||

पदच्छेद: - सुधा-कर्म बहि: तस्य विधातव्यं प्रयत्नत: |
भित्तिषु अथ विलिप्तासु परिमृष्टासु सर्वत: || ८३ ||

समासु जातशोभासु चित्रकर्म प्रयोजयेत् |
चित्रकर्मणि चालेख्या: पुरुषा: स्त्रीजनास्तथा || ८४ ||

पदच्छेद : - समासु जात-शोभासु चित्र-कर्म प्रयोजयेत् |
चित्र-कर्मणि च आलेख्या : पुरुषा : स्त्री-जना : तथा || ८४ ||

लताबन्धाश्च कर्तव्याश्चरितं चात्मभोगजम् |
एवं विकृष्टं कर्तव्यं नाट्यवेश्म प्रयोक्तृभि : || ८५ ||

पदच्छेद : - लताबन्धा : च कर्तव्या : चरितं च आत्म-भोगजम् |
एवं विकृष्टं कर्तव्यं नाट्यवेश्म प्रयोक्तृभि : || ८५ ||

अन्वय : - तस्य बहि : प्रयत्नत : सुधाकर्म विधातव्यम् | सर्वत : लिप्तासु, परिमृष्टासु समासु जातशोभासु भित्तिषु चित्रकर्म प्रवर्तयेत् | चित्रकर्मणि पुरुषा : तथा स्त्रीजना : आलेख्या : | लताबन्धा : कर्तव्या :, आत्मभोगजं चरितं (च आलेख्यम्) | एवं प्रयोक्तृभि : विकृष्टं नाट्यवेश्म कर्तव्यम् |

अर्थ - भिंतींच्या बाहेरच्या बाजूला प्रयत्नपूर्वक चुन्याचा लेप द्यावा . भिंतीला लेप दिल्यावर, तिला सर्व बाजूंनी स्वच्छ करावे, भिंत समतल व सुंदर झाल्यावर त्यावर चित्रे रेखाटावी . ह्या चित्रांमध्ये स्त्रीपुरुष दाखवावेत . तसेच वृक्ष आणि वेलींचा मिलाप दाखविणारी व आत्मभोगास साजेशी अशी चित्रे काढली जावीत . अशा प्रकारे नाट्यगृह बनविणाऱ्यांनी विकृष्ट (आयताकार) नाट्यगृहाची रचना करावी .

### ❖ चतुरश्र नाट्यगृहाची लक्षणे ❖

पुनरेव हि वक्ष्यामि चतुरश्रस्य लक्षणम् |
समन्ततश्च कर्तव्या हस्ता द्वात्रिंशदेव तु || ८६ ||
शुभभूमिविभागस्थो नाट्यज्ञैर्नाट्यमण्डप : |
यो विधि : पूर्वमुक्तस्तु लक्षणं मङ्गलानि च || ८७ ||
विकृष्टे तान्यशेषाणि चतुरश्रेऽपि कारयेत् |

पदच्छेद : - पुन : एव हि वक्ष्यामि चतुरश्रस्य लक्षणम्।
समन्तत : च कर्तव्या हस्ता : द्वात्रिंशत् एव तु ॥ ८६ ॥
शुभ-भूमि-विभागस्थ : नाट्यज्ञै : नाट्यमण्डप :।
य : विधि : पूर्वम् उक्त : तु लक्षणं मङ्गलानि च ॥ ८७ ॥
विकृष्टे तानि अशेषाणि चतुरश्रे अपि कारयेत्।

अन्वय : - पुन : एव चतुरश्रस्य हि लक्षणं वक्ष्यामि । द्वात्रिंशत् एव तु हस्ता : समन्तत : कर्तव्या : । शुभभूमिविभागस्थ : नाट्यमण्डप : नाट्यज्ञै : (कर्तव्य :) । पूर्वं विकृष्टे य : विधि : उक्त :, अपि च लक्षणं मङ्गलानि च तानि अशेषाणि चतुरश्रे अपि कारयेत्।

अर्थ - आता मी चतुरश्र नाट्यगृहाचे लक्षण सांगतो. चहुबाजूंनी बत्तीस हाताचे माप घेऊन (चौकोन) करावा. नाट्याच्या जाणकार व्यक्तींकडून पवित्र भूमीवर त्याचे विभाजन करून चतुरश्र नाट्यगृह तयार करावे. विकृष्ट नाट्यगृहासाठी जो विधी पूर्वी सांगितलेला आहे तसेच जी लक्षणे आणि मंगल विधी सांगितलेले आहेत ते सर्व चतुरश्र नाट्यगृह बांधताना सुद्धा करावेत.

चतुरश्रं समं कृत्वा सूत्रेण प्रविभज्य च ॥ ८८ ॥
बाह्यत: सर्वत: कार्या भित्ति: श्लिष्टेष्टका दृढा ।
तत्राभ्यन्तरत: कार्या रङ्गपीठोपरि स्थिता: ॥ ८९ ॥
दश प्रयोक्तृभि: स्तम्भा: शक्ता मण्डपधारणे ।

पदच्छेद : - चतुरश्रं समं कृत्वा सूत्रेण प्रविभज्य च ॥ ८८ ॥
बाह्यत : सर्वत : कार्या भित्ति : श्लिष्टा-इष्टका दृढा।
तत्र अभ्यन्तरत : कार्या : रङ्गपीठ-उपरि स्थिता : ॥८९ ॥
दश प्रयोक्तृभि : स्तम्भा : शक्ता : मण्डप-धारणे।

अन्वय : - चतुरश्रं समं कृत्वा सूत्रेण प्रविभज्य बाह्यत : सर्वत : श्लिष्टेष्टका दृढा भित्ति : कार्या । तत्र

अभ्यन्तरत: रङ्गपीठोपरि स्थिता: मण्डपधारणे शक्ता: दश स्तम्भा: प्रयोक्तृभि: कार्या:|

अर्थ - चतुरश्र नाट्यगृहाची भूमी समतल करून व दोरीने ती मापून त्याच्या बाहेरील भागावर सर्वबाजूंनी पक्क्या विटांच्या भिंती उभ्या कराव्यात. नाट्यगृह निर्माण करणाऱ्यांनी नाट्यमंडपाच्या आतील भागात असणाऱ्या रंगपीठाच्या वर मंडप पेलण्यास सक्षम असे दहा खांब उभे करावेत.

स्तम्भानां बाह्यतश्चापि सोपानाकृतिपीठकम् || ९० ||
इष्टकादारुभि: कार्यं प्रेक्षकाणां निवेशनम् |
हस्तप्रमाणैरुत्सेधैर्भूमिभागसमुत्थितै: || ९१ ||
रङ्गपीठावलोक्यं तु कुर्यादासनजं विधिम् |

पदच्छेद: - स्तम्भानां बाह्यत: च अपि सोपान-आकृति-पीठकम् || ९० ||
इष्टका-दारुभि: कार्यं प्रेक्षकाणां निवेशनम् |
हस्तप्रमाणै: ऊत्सेधै: भूमि-भाग-समुत्थितै: || ९१ ||
रङ्गपीठ-अवलोक्यं तु कुर्यात् आसनजं विधिम् |

अन्वय: - स्तम्भानां बाह्यत: इष्तकादारुभि: सोपानकृतिपीठकं स्थाप्यं प्रेक्षकाणां च निवेशनं कार्यम् | भूमिभागसमुत्थितै: हस्तप्रमाणै: उत्सेधै: रङ्गपीठावलोक्यम् आसनजं विधिं कुर्यात् |

अर्थ - स्तंभांच्या बाहेरच्या बाजूला विटा व लाकडाचा वापर करून जिन्याच्या आकाराची बैठक तयार करावी. रंगपीठ नीट व सहज दिसावे यासाठी भूमीपासून एक हात वर माप घेऊन प्रेक्षकांसाठी आसन तयार करावे.

षडन्यानन्तरे चैव पुन: स्तम्भान्यथादिशम् || ९२ ||
विधिना स्थापयेत्तज्ज्ञो दृढान्मण्डपधारणे |

अष्टौ स्तम्भान्पुनश्चैव तेषामुपरि कल्पयेत् ‖ ९३ ‖
स्थाप्यं चैव ततः पीठमष्टहस्तप्रमाणतः।
विद्धास्यमष्टहस्तं च पीठं तेषु ततो न्यसेत् ‖ ९४ ‖
तत्र स्तम्भाः प्रदातव्यास्तज्ज्ञैर्मण्डपधारणे ।
धारणीधारणास्ते च शालस्त्रीभिरलङ्कृताः ‖ ९५ ‖
नेपथ्यगृहकं चैव ततः कार्यं प्रयत्नतः।

पदच्छेदः - षट्-अन्यान्-अन्तरे चैव पुनः स्तम्भान् यथादिशम्‖ ९२ ‖
विधिना स्थापयेत् तज्ज्ञः दृढान् मण्डप-धारणे।
अष्टौ स्तम्भान् पुनः च एव तेषाम् उपरि कल्पयेत्‖ ९३ ‖
स्थाप्यं च एव ततः पीठम् अष्ट-हस्त-प्रमाणतः।
विद्धास्यम् अष्ट-हस्तं च पीठं तेषु ततः न्यसेत्‖ ९४ ‖
तत्र स्तम्भाः प्रदातव्याः तज्ज्ञैः मण्डपधारणे।
धारणी-धारणाः ते च शालस्त्रीभिः अलङ्कृताः‖ ९५ ‖
नेपथ्यगृहकं च एव ततः कार्यं प्रयत्नतः।

अन्वयः - अन्तरे प्राज्ञः विधिना मण्डपधारणे अन्यान् षड् दृढान् स्तम्भान् यथादिशं स्थापयेत्। तेषाम् उपरि च पुनः अष्टौ स्तम्भान् एव कल्पयेत्। ततः अष्टहस्तप्रमाणतः पीठं स्थाप्यं च । ततः तेषु विद्धास्यम् अष्टहस्तं पीठं च न्यसेत् । तत्र तज्ज्ञैः मण्डपधारणे धारणीधरिताः शालस्त्रीभिः अलंकृताः स्तम्भाः प्रदातव्याः । ततः च प्रयत्नतः नेपथ्यगृहकम् एव कार्यम्।

अर्थ - त्यानंतर तज्ज्ञ शिल्पींनी विधीनुसार मंडप धरून ठेवण्यासाठी समर्थ व सक्षम असे इतर सहा भक्कम आणि सुंदर असे खांब योग्य दिशेनुसार प्रस्थापित करावेत. याशिवाय आणखी आठ खांब असावेत व त्यांवर बसण्यासाठी आठ हात लांबीचे आसन करावे जे रंगपीठाच्या समोर असेल.या ठिकाणी छताला आणि धारणीला धरून ठेवण्यासाठी

तज्ज्ञ मंडळींनी लाकडी बाहुल्यांनी सजविले गेलेले खांब उभे करावेत. त्यानंतर प्रयत्नपूर्वक नेपथ्यगृहाची रचना केली जावी.

द्वारं चैकं भवेत्तत्र रङ्गपीठप्रवेशनम् ‖ ९६ ‖
जनप्रवेशनं चान्यदाभिमुख्येन कारयेत् |
रङ्गस्याभिमुखं कार्यं द्वितीयं द्वारमेव तु ‖ ९७ ‖

पदच्छेद :- द्वारं च एकं भवेत् तत्र रङ्गपीठ-प्रवेशनम् ‖ ९६ ‖
जन-प्रवेशनं च अन्यत् आभिमुख्येन कारयेत् |
रङ्गस्य अभिमुखं कार्यं द्वितीयं द्वारम् एव तु ‖ ९७ ‖

अन्वय : - तत्र (नेपथ्यगृहस्य) एकं द्वारं रङ्गपीठप्रवेशनं भवेत् | अभिमुख्येन जनप्रवेशनं कारयेत् | रङ्गस्य अभिमुखं द्वितीयं द्वारं कार्यम् |

अर्थ - नेपथ्यगृहाचा एक दरवाजा रंगपीठामध्ये प्रवेश करण्यासाठी असावा. प्रेक्षकांच्या प्रवेशासाठी समोरच्या दिशेला दरवाजा करावा व नेपथ्यगृहातील कलाकार व इतर लोकांना रंगपीठावर प्रवेश करण्यासाठी नेपथ्यगृहाला दुसरे द्वार करावे.

अष्टहस्तं तु कर्तव्यं रङ्गपीठं प्रमाणत: |
चतुरश्रं समतलं वेदिकासमलङ्कृतम् ‖ ९८ ‖

पदच्छेद :- अष्टहस्तं तु कर्तव्यं रङ्गपीठं प्रमाणत: |
चतुरश्रं समतलं वेदिका-समलङ्कृतम् ‖ ९८ ‖

अन्वय : - रङ्गपीठं प्रमाणत: अष्टहस्तं कर्तव्यम् | (तत्) चतुरश्रं समतलं वेदिकासमलङ्कृतं (भवेत्) |

अर्थ - चतुरश्र नाट्यगृहाचे रंगपीठ आठ हात मापाचे (चौकोनी) बनवावे व त्याची जमीन समतल असावी आणि वेदिकेने अलंकृत असावी.

पूर्वप्रमाणनिर्दिष्टा कर्तव्या मत्तवारणी |
चतु:स्तम्भसमायुक्ता वेदिकायास्तु पार्श्वत: ‖ ९९ ‖

पदच्छेद : - पूर्व-प्रमाण-निर्दिष्टा कर्तव्या मत्तवारणी |
चतु :स्तम्भ-समायुक्ता वेदिकाया : तु पार्श्वत : || ९९ ||

अन्वय : - पूर्वप्रमाणनिर्दिष्टा चतु :स्तम्भसमायुक्ता मत्तवारणी वेदिकाया : पार्श्वत : कर्तव्या |

अर्थ - पूर्वी सांगितलेल्या मापानुसार चार खांब असलेल्या मत्तवारणीची रचना रंगपीठाच्या दोन्ही बाजूंना करावी .

समुन्नतं समं चैव रङ्गशीर्षं तु कारयेत् |
विकृष्टे तून्नतं कार्यं चतुरश्रे समं तथा || १०० ||
एवमेतेन विधिना चतुरश्रं गृहं भवेत् |

पदच्छेद : - समुन्नतं समं च एव रङ्गशीर्षं तु कारयते |
विकृष्टे तु उन्नतं कार्यं चतुरश्रे समं तथा || १०० ||
एवम् एतेन विधिना चतुरश्रं गृहं भवेत् |

अन्वय : - रङ्गशीर्षं तु समुन्नतं समं च कारयेत् | विकृष्टे तु उन्नतं तथा चतुरश्रं समं कार्यम् | एवम् एतेन विधिना चतुरश्रं गृहं भवेत् |

अर्थ - रंगशीर्ष हे रंगपीठापेक्षा उंच व समतल बनविले जावे . विकृष्टामध्ये उंच व चतुरश्रामध्ये समतल रंगशीर्ष बनविले जावे . वरील विधींप्रमाणे चतुरश्र नाट्यगृह बनवावे .

### ❖ त्र्यश्र नाट्यगृहाची लक्षणे ❖

अत : परं प्रवक्ष्यामि त्र्यश्रगेहस्य लक्षणम् || १०१ ||
त्र्यश्रं त्रिकोणं कर्तव्यं नाट्यवेश्म प्रयोक्तृभि : |
मध्ये त्रिकोणमेवास्य रङ्गपीठं तु कारयेत् || १०२ ||

पदच्छेद : - अत : परं प्रवक्ष्यामि त्र्यश्रगेहस्य लक्षणम् || १०१ ||
त्र्यश्रं त्रिकोणं कर्तव्यं नाट्यवेश्म प्रयोक्तृभि : |
मध्ये त्रिकोणम् एव अस्य रङ्गपीठं तु कारयेत् || १०२ ||

अन्वय: - त्र्यस्त्रस्य मण्डपस्य अपि लक्षणं संप्रवक्ष्यामि | प्रयोक्तृभि: त्रिकोणं त्र्यश्रं नाट्यवेश्म कर्तव्यम् | अस्य मध्ये त्रिकोणं रङ्गपीठं कारयेत् |

अर्थ - आता तुम्हाला त्र्यश्र (त्रिकोणाकृती) नाट्यगृहाची लक्षणे सांगतो . नाट्यगृह निर्माण करणाऱ्यांनी त्रिकोणी त्र्यश्र नाट्यगृह बनवावे . त्याच्या मध्यभागी त्रिकोणी रंगपीठ तयार करावे .

द्वारं तेनैव कोणेन कर्तव्यं तस्य वेश्मन: |
द्वितीयं चैव कर्तव्यं रङ्गपीठस्य पृष्ठत: || १०३ ||

पदच्छेद: - द्वारं तेन एव कोणेन कर्तव्यं तस्य वेश्मन: |
द्वितीयं च एव कर्तव्यं रङ्गपीठस्य पृष्ठत: || १०३ ||

अन्वय: - तस्य वेश्मन: तेन कोणेन प्रवेशने द्वारं कर्तव्यम् | रङ्गपीठस्य पृष्ठत: द्वितीयं (द्वारं) कर्तव्यम् |

अर्थ - नाट्यगृहाच्या प्रवेशाकरिता त्याच्या तीन कोपऱ्यांमध्ये तीन दरवाजे करावेत तर रंगपीठाच्या मागील बाजूला आणखी एक दरवाजा पात्रांच्या प्रवेशासाठी बनवावा .

विधीर्यश्चतुरश्रस्य भित्तिस्तम्भसमाश्रय: |
स तु सर्व: प्रयोक्तव्यस्त्र्यश्रस्यापि प्रयोक्तृभि: || १०४ ||

पदच्छेद: - विधीर्य: चतुरश्रस्य भित्ति-स्तम्भ-समाश्रय: |
स: तु सर्व: प्रयोक्तव्य: त्र्यश्रस्य अपि प्रयोक्तृभि: || १०४ ||

अन्वय: - प्रयोक्तृभि: य: चतुरश्रस्य भित्तिस्तम्भसमाश्रय: विधि: स: सर्व: त्र्यश्रस्य अपि प्रयोक्तव्य: |

अर्थ - नाट्यगृह निर्माण करणाऱ्यांनी चतुरश्र मंडपाच्या वेळी भिंत, स्तंभ यासंबंधित जो विधी सांगितला आहे तो सर्व त्र्यश्र मंडपाच्या बाबतीतही लागू करावा .

एवमेतेन विधिना कार्या नाट्यगृहा बुधैः ।
पुनरेषां प्रवक्ष्यामि पूजामेवं यथाविधि ॥ १०५ ॥

पदच्छेदः - एवम् एतेन विधिना कार्याः नाट्यगृहाः बुधैः ।
पुनः एषां प्रवक्ष्यामि पूजाम् एव यथाविधि ॥ १०५ ॥


अन्वयः - एवम् एतेन विधिना बुधैः नाट्यगृहं कार्यम् । अतः ऊर्ध्वं यथाविधि एषां पूजां प्रवक्ष्यामि ।

अर्थ - अशा प्रकारे या विधींद्वारे विद्वानांनी नाट्यगृहाची रचना करावी . यापुढे मी विधीनुसार त्यांची पूजा सांगणार आहे .

॥ इति भारतीये नाट्यशास्त्रे मण्डपविधानो नाम द्वितीयोऽध्यायः ॥

॥ अशा प्रकारे भारतीय नाट्यशास्त्रातील 'मंडपविधान' म्हणजेच 'प्रेक्षागृहाची लक्षणे' नावाचा दुसरा अध्याय समाप्त ॥

# तिसरा अध्याय
# रंगदेवतेचे पूजन



# तिसरा अध्याय

## रंगदेवतेचे पूजन

### ❖ देवतांना आवाहन ❖

सर्वलक्षणसम्पन्ने कृते नाट्यगृहे शुभे |
गावो वसेयु: सप्ताहं सह जप्यपरैर्द्विजै: || १ ||

पदच्छेद: - सर्व-लक्षण-सम्पन्ने कृते नाट्यगृहे शुभे |
गाव: वसेयु: सप्ताहं सह जप्यपरै: द्विजै: || १ ||

अन्वय: - सर्वलक्षणसम्पन्ने शुभे नाट्यगृहे कृते जप्यपरै: द्विजै: सह सप्ताहं गाव: वसेयु: |

अर्थ - अशाप्रकारे सर्व लक्षणांनी युक्त आणि शुभकारक अशा नाट्यगृहाची रचना पूर्ण झाल्यानंतर ब्राह्मणांनी विघ्ननाशक मंत्रांचा जप करावा आणि या मंत्रांचा जप करणाऱ्या ब्राह्मणांनी गाईसोबत तेथे रहावे .

ततोऽधिवासयेद्वेश्म रङ्गपीठं तथैव च |
मन्त्रपूतेन तोयेन प्रोक्षिताङ्गो निशागमे || २ ||
यथास्थानान्तरगतो दीक्षित: प्रयत: शुचि: |
त्रिरात्रोपोषितो भूत्वा नाट्याचार्योऽहताम्बर: || ३ ||

पदच्छेद: - तत: अधिवासयेत् वेश्म रङ्गपीठं तथा एव च |
मन्त्रपूतेन तोयेन प्रोक्षित-अङ्ग: निशा-आगमे || २ ||
यथास्थानान्तर-गत: दीक्षित: प्रयत: शुचि: |
त्रिरात्र-उपोषित: भूत्वा नाट्याचार्य: अहत-अम्बर: || ३ ||

अन्वय: - तत: मन्त्रपूतेन तोयेन प्रोक्षिताङ्ग: नाट्याचार्य: निशागमे यथास्थानान्तरगत: दीक्षित: प्रयत: शुचि: त्रिरात्र-उपोषित: भूत्वा अहत-अम्बर: (स:) वेश्म तथा एव रङ्गपीठं च अधिवासयेत् |

अर्थ - रात्र होत असताना नाट्याचार्यांनी मंत्रांनी पवित्र केलेल्या पाण्याने स्वत:चे शरीर शुद्ध करावे . आपल्या घराव्यतिरिक्त व्रतस्थपणे दुसरीकडे राहून आणि प्रयत्नपूर्वक शुद्ध

होऊन तीन रात्र उपवास करावा. नंतर नवीन वस्त्र धारण करून नाट्यगृह व रंगपीठावर देवतांची स्थापना करावी.

नमस्कृत्य महादेवं सर्वलोकोद्भवं भवम् |
जगत्पितामह चैव विष्णुमिन्द्रं गुहं तथा || ४ ||
सरस्वतीं च लक्ष्मीं च सिद्धिं मेधां धृतिं स्मृतिम् |
सोमं सूर्य च मरुतो लोकपालांस्तथाश्विनौ || ५ ||
मित्रमग्निं सुरान्वर्णान् रुद्रान्कालं कलिं तथा |
मृत्युं च नियतिं चैव कालदण्डं तथैव च || ६ ||
विष्णुप्रहरणं चैव नागराजं च वासुकिम्|
वज्रं विद्युत्समुद्रांश्च गन्धर्वाप्सरसो मुनीन्|| ७ ||
भूतान् पिशाचान् यक्षांश्च गुह्यकांश्च महोरगान्|
असुरान्नाट्यविघ्नांश्च तथाऽन्यान्दैत्यराक्षसान् || ८ ||
तथा नाट्यकुमारीश्च महाग्रामण्यमेव च |
यक्षांश्च गुह्यकांश्चैव भूतसङ्घांस्तथैव च || ९ ||
एतांश्चान्यांश्च देवर्षीन्प्रणम्य रचिताञ्जलिः |
यथास्थानान्तरगतान्समावाह्य ततो वदेत् || १० ||
भवद्भिर्नो निशायां तु कर्तव्यः सम्परिग्रहः |
साहाय्यं चैव दातव्यमस्मिन्नाट्ये सहानुगैः || ११ ||

पदच्छेदः - नमस्कृत्य महादेवं सर्वलोक-उद्भवं भवम्|
जगत्-पितामहं च एव विष्णुम् इन्द्रं गुहं तथा||४||
सरस्वतीं च लक्ष्मीं च सिद्धिं मेधां धृतिं स्मृतिम्|
सोमं सूर्य च मरुतः लोकपालान् तथा अश्विनौ||५||
मित्रम् अग्निं सुरान् वर्णान् रूद्रान् कालं कलिं तथा|
मृत्युं च नियतिं च एव कालदण्डं तथा एव च||६||

विष्णु-प्रहरणं च एव नागराजं च वासुकिम्‌ |
वज्रं विद्युत्‌-समुद्रान्‌ च गन्धर्व-अप्सरस: मुनीन्‌ ‖ ७ ‖
भूतान्‌ पिशाचान्‌ यक्षान्‌ च गुह्यकान्‌ च महोरगान्‌ |
असुरान्‌ नाट्यविघ्नान्‌ च तथा अन्यान्‌ दैत्यराक्षसान्‌ ‖ ८ ‖
तथा नाट्यकुमारी: च महाग्रामण्यम्‌ एव च |
यक्षान्‌ च गुह्यकान्‌ च एव भूत-सङ्घान्‌ तथा एव च ‖ ९ ‖
एतान्‌ च अन्यान्‌ च देवर्षीन्‌ प्रणम्य रचित-अञ्जलि: |
यथास्थानान्तर-गतान्‌ समावाह्य तत: वदेत्‌ ‖ १० ‖
भवद्भि: न: निशायां तु कर्तव्य: सम्परिग्रह: |
साहाय्यं च एव दातव्यम्‌ अस्मिन्‌ नाट्ये सह-अनुगै: ‖ ११ ‖

अन्वय: - सर्वलोकोद्‌भवं भवं महादेवं नमस्कृत्य जगत्पितामहं विष्णुम्‌ इन्द्रं गुहं तथा सरस्वतीं लक्ष्मीं सिद्धिं मेधां धृतिं स्मृतिं सोमं सूर्यं मरुत: लोकपालान्‌ अश्विनौ मित्रम्‌ अग्निं सुरान्‌ वर्णान्‌ रुद्रान्‌ कालं कलिं तथा मृत्युं नियतिं कालदण्डं तथा एव च विष्णुप्रहरणं नागराजं वासुकिं वज्रं विद्युत्समुद्रान्‌ गन्धर्वाप्सरस: मुनीन्‌ भूतान्‌ पिशाचान्‌ यक्षान्‌ गुह्यकान्‌ महोरगान्‌ असुरान्‌ नाट्यविघ्नान्‌ च तथा अन्यान्‌ दैत्यराक्षसान्‌ तथा नाट्यकुमारी: महाग्रामण्यं यक्षान्‌ गुह्यकान्‌ भूत-सङ्घान्‌ एतान्‌ च अन्यान्‌ देवर्षीन्‌ प्रणम्य रचिताञ्जलि: (स: नाट्याचार्य:) यथास्थानान्तरगतान्‌ (देवान्‌) समावाह्य तत: वदेत्‌, निशायां तु भवद्भि: न: सम्परिग्रह: कर्तव्य: अस्मिन्‌ नाट्ये सहानुगै: साहाय्यं च एव दातव्यम्‌ |

अर्थ - सर्व लोकांना निर्माण करणाऱ्या महादेव शिवाला नमस्कार करून जगाचे पितामह असणारे ब्रह्मा, भगवान विष्णू, इंद्र, गुह तसेच सरस्वती, लक्ष्मी, सिद्धी, मेधा, धृती, स्मृती, सोम (चंद्र), सूर्य, मरुत्‌, लोकपाल, अश्विनीकुमार, मित्र, अग्नी, सुर, वर्ण, रुद्र, काल, कली, तसेच मृत्यू, नियती, कालदंड, विष्णूचे प्रहरण (सुदर्शनचक्र), नागराज वासुकी, वज्र, विद्युत्‌, समुद्र, गंधर्व, अप्सरा, मुनी, भूत, पिशाच, यक्ष, गुह्यक, महासर्प गण, असुर, नाट्यविघ्न आणि अन्य दैत्य व राक्षस, नाट्यकुमारी, महाग्रामणी (गणपती), यक्ष, गुह्यक, भूतसमूह आणि तसेच अन्य देवर्षींना प्रणाम करून आपल्या

स्थानांवर स्थित असलेल्या देवतांना आवाहन करून असे म्हणावे - (हे भगवन्!) आज रात्री तुम्ही सर्वांनी आमचे रक्षण करावे आणि आमच्या नाट्यकार्यामध्ये (तुमच्या) साहाय्यकर्त्यांसहित (तुम्ही आम्हांला) मदत करावी .

### ❖ जर्जराची पूजा ❖

सम्पूज्य सर्वानेकत्र कुतपं सम्प्रयुज्य च |
जर्जराय प्रयुञ्जीत पूजां नाट्यप्रसिद्धये || १२ ||

पदच्छेद : - सम्पूज्य सर्वान् एकत्र कुतपं सम्प्रयुज्य च |
जर्जराय प्रयुञ्जीत पूजां नाट्य-प्रसिद्धये || १२ ||

अन्वय : - सर्वान् (देवान्) एकत्र सम्पूज्य कुतपं सम्प्रयुज्य च नाट्य-प्रसिद्धये जर्जराय पूजां प्रयुञ्जीत |

अर्थ - सर्व (देवतांचे) एका ठिकाणी पूजन करून आणि चारही प्रकारच्या वाद्यांची पूजा करून नाट्य निर्विघ्नपणे सफल होण्यासाठी जर्जराची पूजा करावी .

त्वं महेन्द्रप्रहरणं सर्वदानवसूदनम् |
निर्मितस्सर्वदेवैश्च सर्वविघ्ननिबर्हणम् || १३ ||
नृपस्य विजयं शंस रिपूणां च पराजयम् |
गोब्राह्मणशिवं चैव नाट्यस्य च विवर्धनम् || १४ ||

पदच्छेद : - त्वं महेन्द्र-प्रहरणं सर्व-दानव-सूदनम् |
निर्मित : सर्वदेवै : च सर्व-विघ्न-निबर्हणम् || १३ ||
नृपस्य विजयं शंस रिपूणां च पराजयम् |
गो-ब्राह्मण-शिवं च एव नाट्यस्य च विवर्धनम् || १४ ||

अन्वय : - त्वं महेन्द्रप्रहरणं सर्वदानवसूदनम् (असि) | सर्वदेवै : निर्मित : च (त्वं) सर्वविघ्ननिबर्हणम् (असि) | नृपस्य विजयं रिपूणां च पराजयं शंस | गो-ब्राह्मण-शिवं च एव नाट्यस्य च विवर्धनं (कुरु) |

अर्थ - (हे जर्जरा!) तू इंद्राचे शस्त्र आहेस. सर्व दानवांचा नाश करणारा आहेस. सर्व देवांच्या द्वारे निर्माण केला गेलेला तू सर्व विघ्नांना नष्ट करणारा आहेस. तू राजाला विजयी कर आणि शत्रूंचा पराजय कर. गायी आणि ब्राह्मणांचे कल्याण कर व नाट्याची भरभराट कर.

### ❖ पूजाविधी ❖

एवं कृत्वा यथान्यायमुपास्यं नाट्यमण्डपे |
निशायां तु प्रभातायां पूजनं प्रक्रमेदिह ‖ १५ ‖

पदच्छेद :- एवं कृत्वा यथान्यायम् उपास्यं नाट्यमण्डपे |
निशायां तु प्रभातायां पूजनं प्रक्रमेत् इह ‖ १५ ‖

अन्वय : - एवं कृत्वा निशायां नाट्यमण्डपे यथान्यायम् उपास्यं प्रभातायां तु इह पूजनं प्रक्रमेत् |

अर्थ - अशाप्रकारे रात्रभर नाट्यमंडपात विधिनुसार देवतांची उपासना करून सकाळ झाल्यावर तिथे पूजेला सुरुवात करावी.

आर्द्रायां वा मघायां वा याम्ये पूर्वेषु वा त्रिषु |
आश्लेषामूलयोर्वापि कर्तव्यं रङ्गपूजनम् ‖ १६ ‖
आचार्येण तु युक्तेन शुचिना दीक्षितेन च |
रङ्गस्योद्योतनं कार्यं देवतानां च पूजनम् ‖ १७ ‖

पदच्छेद :- आर्द्रायां वा मघायां वा याम्ये पूर्वेषु वा त्रिषु |
आश्लेषा-मूलयो : वा अपि कर्तव्यं रङ्गपूजनम् ‖ १६ ‖
आचार्येण तु युक्तेन शुचिना दीक्षितेन च |
रङ्गस्य उद्योतनं कार्यं देवतानां च पूजनम् ‖ १७ ‖

अन्वय : - आर्द्रायां मघायां याम्ये त्रिषु पूर्वेषु आश्लेषा-मूलयो : वा अपि रङ्गपूजनं कर्तव्यम् | शुचिना दीक्षितेन युक्तेन च आचार्येण रङ्गस्य उद्योतनं देवतानां च पूजनं कार्यम् |

अर्थ - आर्द्रा, मघा, भरणी, तीन पूर्वा (पूर्वाफाल्गुनी, पूर्वाषाढा, पूर्वाभाद्रपदा), आश्लेषा किंवा

मूळ नक्षत्र असताना हे रंगपूजन करावे. सुयोग्य, शुद्ध व दीक्षा घेतलेल्या आचार्यांकडून उद्योतनविधी करावा आणि देवतांची पूजा करून घ्यावी. (उद्योतनविधी - दर्भ प्रज्वलित करून चारही दिशांना फिरवणे हाच उद्योतनविधी होय. यालाच नीराजन असेही म्हणतात.)

### ❖ देवतांची स्थापना व मंडलनिर्मिती ❖

दिनान्ते दारुणे घोरे मुहूर्ते यमदैवते |
आचम्य तु यथान्यायं देवता वै निवेशयेत् || १८ ||
रक्ता: प्रतिसरा: सूत्रं रक्तगन्धाश्च पूजिता: |
रक्ता: सुमनसश्चैव यच्च रक्तं फलं भवेत् || १९ ||
यवैस्सिद्धार्थकैर्लाजैरक्षतै: शालितण्डुलै: |
नागपुष्पस्य चूर्णेन वितुषाभि: प्रियङ्गुभि: || २० ||
एतैर्द्रव्यैर्युतं कुर्याद्देवतानां निवेशनम् |

पदच्छेद: - दिनान्ते दारुणे घोरे मुहूर्ते यमदैवते |
आचम्य तु यथान्यायं देवता वै निवेशयेत् || १८ ||
रक्ता: प्रतिसरा: सूत्रं रक्तगन्धा: च पूजिता: |
रक्ता: सुमनस: च एव यत् च रक्तं फलं भवेत् || १९ ||
यवै: सिद्धार्थकै: लाजै: अक्षतै: शालितण्डुलै: |
नागपुष्पस्य चूर्णेन वितुषाभि: प्रियङ्गुभि: || २० ||
एतै: द्रव्यै: युतं कुर्यात् देवतानां निवेशनम् |

अन्वय: - दिनान्ते दारुणे घोरे मुहूर्ते यमदैवते आचम्य तु यथान्यायं देवता वै निवेशयेत् | रक्ता: प्रतिसरा: सूत्रं रक्तगन्धा: पूजिता: रक्ता: सुमनस: यत् रक्तं फलं भवेत् | यवै: सिद्धार्थकै: लाजै: अक्षतै: शालितण्डुलै: नागपुष्पस्य चूर्णेन वितुषाभि: प्रियङ्गुभि: एतै: द्रव्यै: युतं देवतानां निवेशनं कुर्यात् |

अर्थ - सूर्यास्त या वेळेची अधिदेवता यम आहे. संध्याकाळच्या अशा भयंकर व घोर मुहूर्तावर

आचमन करून शास्त्रानुसार त्या देवतेची स्थापना करावी. ह्यावेळी लाल दोऱ्यामध्ये गाठी मारून बनवलेली कंकणे घ्यावीत आणि रक्तचंदन घ्यावे. तसेच लाल रंगाची फुले व फळे, जव, पांढऱ्या मोहरीच्या लाह्या, अक्षता, साळभात, नागदंत (फुलाचे) चूर्ण (व) साले काढलेली प्रियंगुची फळे इ. वस्तू घ्याव्यात आणि देवतांची स्थापना करावी.

आलिखेन्मण्डलं पूर्वं यथास्थानं यथाविधि ॥ २१ ॥
समन्ततश्च कर्तव्यं हस्ता: षोडश मण्डलम् ।
द्वाराणि चात्र कुर्वीत विधानेन चतुर्दिशम् ॥ २२ ॥

पदच्छेद: - आलिखेत् मण्डलं पूर्वं यथास्थानं यथाविधि ॥ २१ ॥
समन्तत: च कर्तव्यं हस्ता: षोडश मण्डलम् ।
द्वाराणि च अत्र कुर्वीत विधानेन चतुर्दिशम् ॥ २२ ॥

अन्वय: - पूर्वं यथास्थानं यथाविधि मण्डलम् आलिखेत् । समन्तत: षोडश हस्ता: मण्डलं च कर्तव्यम् । अत्र च विधानेन चतुर्दिशं द्वाराणि कुर्वीत ।

अर्थ - सर्वप्रथम (देवतांच्या) स्थानानुसार विधिपूर्वक मंडल तयार करावे. चारही बाजूंनी हे मंडल एकूण १६ हातांचे असावे. म्हणजेच चारही बाजूंनी चार हात माप घ्यावे. त्यानंतर विधिपूर्वक चारही बाजूंना दारे बनवावीत.

मध्ये चैवात्र कर्तव्ये द्वे रेखे तिर्यगूर्ध्वगे ।
तयो: कक्ष्याविभागेन दैवतानि निवेशयेत् ॥ २३ ॥

पदच्छेद: - मध्ये च एव अत्र कर्तव्ये द्वे रेखे तिर्यक् ऊर्ध्वगे ।
तयो: कक्ष्या-विभागेन दैवतानि निवेश्येते ॥ २३ ॥

अन्वय: - मध्ये च अत्र तिर्यक् ऊर्ध्वगे द्वे रेखे कर्तव्ये । तयो: कक्ष्या-विभागेन दैवतानि निवेशयेत् ।

अर्थ - मंडलाच्या मध्यभागी पूर्व-पश्चिम आणि उत्तर-दक्षिण अशा दोन एकमेकांना छेदणाऱ्या रेषा काढाव्यात. त्यामुळे जे विभाग तयार होतील त्यात विभागानुसार देवगणांची स्थापना केली जावी.

पद्मोपविष्टं ब्रह्माणं तस्य मध्ये निवेशयेत् |
आदौ निवेश्यो भगवान्सार्धं भूतगणैः शिवः || २४ ||
नारायणो महेन्द्रश्च स्कन्दः सूर्योऽश्विनौ शशी |
सरस्वती च लक्ष्मीश्च श्रद्धा मेधा च पूर्वतः || २५ ||

पदच्छेदः - पद्म-उपविष्टं ब्रह्माणं तस्य मध्ये निवेशयेत् |
आदौ निवेश्यः भगवान् सार्धं भूतगणैः शिवः || २४ ||
नारायणः महेन्द्रः च स्कन्दः सूर्यः अश्विनौ शशी |
सरस्वती च लक्ष्मीः च श्रद्धा मेधा च पूर्वतः || २५ ||

अन्वयः - तस्य मध्ये पद्मोपविष्टं ब्रह्माणं निवेशयेत् | आदौ भूतगणैः सार्धं भगवान् शिवः निवेश्यः | पूर्वतः (एव) नारायणः महेन्द्रः स्कन्दः सूर्यः अश्विनौ शशी सरस्वती लक्ष्मीः श्रद्धा मेधा च (निवेश्याः) |

अर्थ - या मंडलाच्या मध्यभागी कमलासनस्थ ब्रह्माला स्थापित करावे . त्यानंतर भूतगणांसहित भगवान शिवाला सर्वप्रथम स्थापित करावे . पूर्व दिशेला नारायण, महेंद्र, कार्तिकेय, सूर्य, अश्विनीकुमार, चंद्रमा, सरस्वती, लक्ष्मी, श्रद्धा व मेधा यांची स्थापना करावी .

पूर्वदक्षिणतो वह्निर्निवेश्यः स्वाहया सह |
विश्वेदेवाः सगन्धर्वा रुद्राः सर्पगणास्तथा || २६ ||

पदच्छेदः - पूर्व-दक्षिणतः वह्निः निवेश्यः स्वाहया सह |
विश्वेदेवाः सगन्धर्वाः रुद्राः सर्पगणाः तथा || २६ ||

अन्वयः - पूर्व-दक्षिणतः स्वाहया सह वह्निः निवेश्यः | तथा विश्वेदेवाः सगन्धर्वाः रुद्राः सर्पगणाः (अपि निवेश्याः)|

अर्थ - दक्षिणपूर्व दिशेला (आग्नेय) स्वाहाबरोबर अग्नी, विश्वदेव, गंधर्व, रूद्र व सर्पगणांना स्थापित करावे .

दक्षिणेन निवेश्यस्तु यमो मित्रश्च सानुगः |
पितॄन्पिशाचानुरगान् गुह्यकांश्च निवेशयेत् || २७ ||

पदच्छेदः - दक्षिणेन निवेश्यः तु यमः मित्रः च सानुगः |
पितॄन् पिशाचान् उरगान् गुह्यकान् च निवेशयेत् || २७ ||

अन्वयः - दक्षिणेन तु यमः सानुगः मित्रः च निवेश्यः | पितॄन् पिशाचान् उरगान् गुह्यकान् च निवेशयेत् |

अर्थ - दक्षिण दिशेला यम, अनुचाऱ्यांसहित मित्र, पितृगण, पिशाच, सर्प व गुह्यकांची स्थापना करावी .

नैर्ऋत्यां राक्षसांश्चैव भूतानि च निवेशयेत् |
पश्चिमायां समुद्रांश्च वरुणं यादसां पतिम् || २८ ||

पदच्छेदः - नैर्ऋत्यां राक्षसान् च एव भूतानि च निवेशयेत् |
पश्चिमायां समुद्रान् च वरुणं यादसां पतिम् || २८ ||

अन्वयः - नैर्ऋत्यां राक्षसान् भूतानि च निवेशयेत् | पश्चिमायां समुद्रान् यादसां पतिं वरुणं (निवेशयेत्) |

अर्थ - नैर्ऋत्य दिशेला राक्षस व भूतांना स्थापित करावे . पश्चिमेला समुद्र व जलाधिपती वरुण यांना स्थापित करावे .

वायव्यायां दिशि तथा सप्त वायून्निवेशयेत् |
तत्रैव विनिवश्यस्तु गरूडः पक्षिभिः सह || २९ ||

पदच्छेदः - वायव्यायां दिशि तथा सप्त वायून् निवेशयेत् |
तत्र एव विनिवेश्यः तु गरुडः पक्षिभिः सह || २९ ||

अन्वयः - तथा वायव्यायां दिशि सप्त वायून् निवेशयेत् | तत्र एव तु पक्षिभिः सह गरुडः विनिवेश्यः |

अर्थ - वायव्य दिशेला सात वायूंची स्थापना करावी . तेथेच पक्ष्यांसहित गरुडाचीही स्थापना करावी .

उत्तरस्यां दिशि तथा धनदं संनिवेशयेत् |
नाट्यस्य मातॄश्च तथा यक्षानथ सगुह्यकान् || ३० ||

पदच्छेद: - उत्तरस्यां दिशि तथा धनदं संनिवेशयेत् |
नाट्यस्य मातॄ: च तथा यक्षान् अथ सगुह्यकान् || ३० ||

अन्वय: - तथा उत्तरस्यां दिशि धनदं संनिवेशयेत् | नाट्यस्य मातॄ: च तथा सगुह्यकान् यक्षान् अथ (निवेशयेत्) |

अर्थ - उत्तर दिशेला कुबेराची स्थापना करावी. नाट्यमातृका व गुह्यक व यक्ष यांचीही स्थापना करावी.

(तथैवोत्तरपूर्वायां नन्द्याद्यांश्च गणेश्वरान् |
ब्रह्मर्षिभूतसंघांश्च यथाभागं निवेशयेत् || ३१ ||)

पदच्छेद: - तथा एव उत्तर-पूर्वायां नन्दी-आद्यान् च गणेश्वरान् |
ब्रह्मर्षि-भूतसंघान् च यथाभागं निवेशयेत् || ३१ ||

अन्वय: - तथा एव च उत्तर-पूर्वायां नन्दी-आद्यान् गणेश्वरान् ब्रह्मर्षि-भूतसंघान् च यथाभागं निवेशयेत् |

अर्थ - उत्तरपूर्व (ईशान्य) दिशेला नंदी, गणेश्वर, ब्रह्मर्षी व भूतसमूहाला योग्य स्थानानुसार स्थापित करावे.

स्तम्भे सनत्कुमारं तु दक्षिणे दक्षमेव च |
ग्रामण्यमुत्तरे स्तम्भे पूजार्थं संनिवेशयेत् || ३२ ||
अनेनैव विधानेन यथास्थानं यथाविधि |
सुप्रसादानि सर्वाणि दैवतानि निवेशयेत् || ३३ ||
स्थाने स्थाने यथान्यायं विनिवेश्य तु देवता: |
तासां प्रकुर्वीत तत: पूजनं तु यथार्हत: || ३४ ||

पदच्छेद: - स्तम्भे सनत्कुमारं तु दक्षिणे दक्षम् एव च |
ग्रामण्यम् उत्तरे स्तम्भे पूजार्थं संनिवेशयेत् || ३२ ||

अनेन एव विधानेन यथास्थानं यथाविधि |
सुप्रसादानि सर्वाणि दैवतानि निवेशयेत् || ३३ ||
स्थाने स्थाने यथान्यायं विनिवेश्य तु देवता: |
तासां प्रकुर्वीत तत: पूजनं तु यथार्हत: || ३४ ||

अन्वय: - (पूर्वस्थे) स्तम्भे सनत्कुमारं दक्षम् उत्तरे स्तम्भे ग्रामण्यम् पूजार्थं संनिवेशयेत् | अनेन एव विधानेन यथास्थानं यथाविधि सर्वाणि सुप्रासादानि दैवतानि निवेशयेत् | स्थाने स्थाने यथान्यायं देवता: विनिवेश्य तत: यथार्हत: तासां पूजनं प्रकुर्वीत |

अर्थ - (पूर्वेकडील)खांबामध्ये सनत्कुमार, दक्षिणेकडील खांबामध्ये दक्ष, उत्तरेकडील स्तंभात गणपतीला (आणि पश्चिमेकडील स्तंभाजवळ स्कंदाला) पूजेसाठी प्रस्थापित करावे. याच विधानानुसार, स्थानाप्रमाणे विधिप्रमाणे सर्व प्रसन्न देवतांना स्थान आणि विधीनुसार प्रस्थापित करावे. योग्य ठिकाणी नियमानुसार देवतांची स्थापना करून नंतरच योग्यतेनुसार त्यांच्या पूजनास प्रारंभ करावा.

### ❖ देवतांचे पूजन आणि आहुती ❖

देवताभ्यस्तु दातव्यं सितमाल्यानुलेपनम् |
गन्धर्ववह्निसूर्येभ्यो रक्तमाल्यानुलेपनम् || ३५ ||
गन्धं माल्यं च धूपं च यथावदनुपूर्वश: |
दत्त्वा तत: प्रकुर्वीत बलिं पूजां यथाविधि || ३६ ||

पदच्छेद: - देवताभ्य: तु दातव्यं सित-माल्य-अनुलेपनम् |
गन्धर्व-वह्नि-सूर्येभ्य: रक्त-माल्य-अनुलेपनम् || ३५ ||
गन्धं माल्यं च धूपं च यथावत् अनुपूर्वश: |
दत्त्वा तत: प्रकुर्वीत बलिं पूजां यथाविधि || ३६ ||

अन्वय: - देवताभ्य: तु सितमाल्यानुलेपनं दातव्यम् | गन्धर्ववह्निसूर्येभ्य: रक्तमाल्यानुलेपनं (दातव्यम्) | गन्धं माल्यं च धूपं च यथावत् अनुपूर्वश: दत्त्वा तत: यथाविधि पूजां बलिं (च) प्रकुर्वीत |

अर्थ – देवतांना पांढऱ्या रंगाची फुले व सफेद चंदन अर्पण करावे . गंधर्व, अग्नी व सूर्याला लाल रंगांची फुले व रक्तचंदन अर्पण करावे . सर्व देवांना यथायोग्य क्रमश: गंध, माळ, धूप अर्पण करून त्यानंतर विधीनुसार पूजा करावी आणि आहुती अर्पण करावी .

ब्रह्माणं मधुपर्केण पायसेन सरस्वतीम् |
शिवविष्णुमहेन्द्राद्या: सम्पूज्या मोदकैरथ || ३७ ||

पदच्छेद: – ब्रह्माणं मधुपर्केण पायसेन सरस्वतीम् |
शिव-विष्णु-महेन्द्र-आद्या: सम्पूज्या मोदकै: अथ || ३७ ||

अन्वय: – ब्रह्माणं मधुपर्केण सरस्वतीं पायसेन अथ शिवविष्णुमहेन्द्राद्या: मोदकै: सम्पूज्या: |

अर्थ – ब्रह्माला मधुपर्क देऊन सरस्वतीला खरि देऊन शिव, विष्णु, महेंद्र आणि इतर देवतांना मोदक देऊन त्यांची पूजा करावी .

घृतौदनेन हुतभुक्सोमार्कौ तु गुडौदनै: |
विश्वेदेवा: सगन्धर्वा मुनयो मधुपायसै: || ३८ ||

पदच्छेद: – घृत- ओदनेन हुतभुक् सोम-अर्कौ तु गुड-ओदनै:|
विश्वेदेवा: सगन्धर्वा: मुनय: मधुपायसै: || ३८ ||

अन्वय: – हुतभुक् घृतौदनेन सोमार्कौ तु गुडौदनै: विश्वेदेवा: सगन्धर्वा: मुनय: मधुपायसै: (सम्पूज्या:) |

अर्थ – अग्नीला तूप-भात देऊन, सूर्याला आणि चंद्राला गूळ-भात देऊन, गंधर्वासहित विश्वदेव व मुनिगण यांना मधयुक्त खीर देऊन त्यांची पूजा करावी .

यममित्रौ च सम्पूज्यावपूपैर्मोदकैस्तथा |
पितॄन्पिशाचानुरगान् सर्पि:क्षीरेण तर्पयेत् || ३९ ||

पदच्छेद: – यम-मित्रौ च सम्पूज्यौ अपूपै: मोदकै: तथा |
पितॄन् पिशाचान् उरगान् सर्पि:क्षीरेण तर्पयेत् || ३९ ||

अन्वय: - यम-मित्रौ च अपूपै: तथा मोदकै: सम्पूज्यौ | पितॄन् पिशाचान् उरगान् सर्पि:क्षीरेण तर्पयेत्|

अर्थ - यम व सूर्य यांना मालपुआ व मोदक देऊन पूजा करावी. पितर, पिशाच्च व सापांना तूप व दुधाने तृप्त करावे.

पक्वान्नेन तु मांसेन सुरासीधुफलासवै: |
अर्चयेद् भूतसंघांश्च चणकै: पललाप्लुतै: || ४० ||

पदच्छेद: - पक्व-अन्नेन तु मांसेन सुरा-सीधु-फल-आसवै: |
अर्चयेत् भूतसंघान् च चणकै: पलला-प्लुतै: ||४० ||

अन्वय: - पक्वान्नेन मांसेन तु सुरासीधुफलासवै: पललाप्लुतै: चणकै: च भूतसंघान् अर्चयेत् |

अर्थ - पक्वान्न, मांस, दारू, फळांचा रस व मांसासहित चणे यांनी भूतगणांची पूजा करावी.

अनेनैव विधानेन सम्पूज्या मत्तवारणी |
पक्वामेन तु मांसेन सम्पूज्या रक्षसां गणा: || ४१ ||

पदच्छेद: - अनेन एव विधानेन सम्पूज्या मत्तवारणी |
पक्व-आमेन तु मांसेन सम्पूज्या रक्षसां गणा: || ४१ ||

अन्वय: - अनेन एव विधानेन मत्तवारणी सम्पूज्या | पक्वामेन तु मांसेन रक्षसां गणा: सम्पूज्या: |

अर्थ - याच विधीने मत्तवारणीची सुद्धा पूजा करावी. न शिजवलेले मांस देऊन राक्षस गणांची पूजा करावी.

सुरामांसप्रदानेन दानवान्प्रतिपूजयेत् |
शेषान्देवगणांस्तज्ज्ञ: सापूपोत्कारिकौदनै: || ४२ ||

पदच्छेद: - सुरा-मांस-प्रदानेन दानवान् प्रतिपूजयेत् |
शेषान् देवगणान् तज्ज्ञ: सापूप-उत्कारिक-ओदनै: || ४२ ||

अन्वय: - सुरामांसप्रदानेन दानवान् प्रतिपूजयेत् | शेषान् देवगणान् तज्ज्ञ: सापूपोत्कारिकौदनै: (सम्पूजयेत्) |

अर्थ - दारू व मांस देऊन दानवांची पूजा केली जावी. विद्वानांनी उरलेल्या देवांची मालपुआ, लापशी व भाताने पूजा करावी.

मत्स्यैश्च पिष्टभक्ष्यैश्च सागरान्सरितस्तथा |
सम्पूज्य वरुणं चापि दातव्यं घृतपायसम् || ४३ ||

पदच्छेद:- मत्स्यै: च पिष्टभक्ष्यै: च सागरान् सरित: तथा |
सम्पूज्य वरुणं च अपि दातव्यं घृत-पायसम् || ४३ ||

अन्वय: - मत्स्यै: च पिष्टभक्ष्यै: च सागरान् सरित: तथा वरुणं च सम्पूज्य घृत-पायसं दातव्यम् |

अर्थ - मासे व उडिदाच्या पीठापासून बनविलेले पदार्थ देऊन समुद्र आणि नदी यांची पूजा करावी आणि वरुणदेवाची पूजा करून त्याला तूप आणि खीर प्रदान करावी.

नानामूलफलैश्चापि मुनीन्सम्प्रतिपूजयेत् |
वायूंश्च पक्षिणश्चैव विचित्रैर्भक्ष्यभोजनै: || ४४ ||

पदच्छेद:- नाना-मूल-फलै: च अपि मुनीन् सम्प्रतिपूजयेत् |
वायून् च पक्षिण: च एव विचित्रै: भक्ष्य-भोजनै: || ४४ ||

अन्वय: - नानामूलफलै: च मुनीन् सम्प्रतिपूजयेत् | वायून् च पक्षिण: च विचित्रै: भक्ष्यभोजनै: (सम्पूजयेत्) |

अर्थ - अनेक प्रकारच्या कंदमुळे व फळांनी मुनींची पूजा करावी. विविध प्रकारचे भक्ष्य व भोजन देऊन वायू व पक्ष्यांची पूजा करावी.

मातॄर्नाट्यस्य सर्वास्ता धनदं च सहानुगै: |
अपूपैर्लाजिकामिश्रैर्भक्ष्यभोज्यैश्च पूजयेत् || ४५ ||
एवमेषां बलि: कार्यो नानाभोजनसंश्रय: |

पदच्छेद:- मातॄ: नाट्यस्य सर्वा: ता: धनदं च सह-अनुगै: |
अपूपै: लाजिकामिश्रै: भक्ष्यभोज्यै: च पूजयेत् || ४५ ||
एवम् एषां बलि: कार्य: नाना-भोजन-संश्रय: |

अन्वय: - नाट्यस्य सर्वा: ता: मातॄ: धनदं च सहानुगै: अपूपै: लाजिकामिश्रै: भक्ष्यभोज्यै: च पूजयेत्|
एवम् एषां नाना-भोजन-संश्रय: बलि: कार्य:|

अर्थ - मालपुआसह व लापशी मिश्रित भक्ष्य व भोजन प्रदान करून नाट्यमातृका, अनुचर आणि कुबेर यांची पूजा करावी. अशाप्रकारे, या सर्व देवतांना विविध प्रकारच्या भोजनाची आहुती प्रदान करावी.

❖ मंत्रांसह आहुती देण्याचा विधी ❖

पुनर्मन्त्रविधानेन बलिकर्म च वक्ष्यते || ४६ ||
देवदेव महाभाग सर्वलोकपितामह |
मन्त्रपूतमिमं सर्वं प्रतिगृह्णीष्व मे बलिम् || ४७ ||

पदच्छेद: - पुन: मन्त्र-विधानेन बलि-कर्म च वक्ष्यते || ४६ ||
देवदेव महाभाग सर्व-लोक-पितामह |
मन्त्रपूतम् इमं सर्वं प्रतिगृह्णीष्व मे बलिम् || ४७ ||

अन्वय: - पुन: मन्त्रविधानेन बलिकर्म च वक्ष्यते | महाभाग देवदेव सर्वलोकपितामह मन्त्रपूतम् इमं मे सर्वं बलिं प्रतिगृह्णीष्व |

अर्थ - आता मी मंत्र विधानासहित आहुती कशी प्रदान करावी ते सांगतो-
ब्रह्मदेवासाठी मंत्र - हे आदरणीय देवांच्याही देवा, सर्व लोकांचे पितामह ब्रह्मा! मंत्रांनी पवित्र अशा माझ्या या सर्व आहुती आपण ग्रहण कराव्या.

देवदेव महादेव गणेश त्रिपुरान्तक |
प्रगृह्यतां बलिर्देव मन्त्रपूतो मयोद्यत:|| ४८ ||

पदच्छेद: - देवदेव महादेव गणेश त्रिपुरान्तक |
प्रगृह्यतां बलि: देव मन्त्रपूत: मया उद्यत:|| ४८ ||

अन्वय: - देवदेव महादेव गणेश त्रिपुरान्तक देव मया उद्यत: मन्त्रपूत: बलि: प्रगृह्यताम् |

अर्थ - शिवाकरिता मंत्र - हे देवाधिदेवा महादेवा, गणाधिश्वरा त्रिपुरांसुराचा नाश करणाऱ्या ईश्वरा, मी वाहिलेली मंत्रांनी पवित्र केलेली ही आहुती आपण स्वीकारावी .

नारायणामितगते पद्मनाभ सुरोत्तम |
प्रगृह्यतां बलिर्देव मन्त्रपूतो मयार्पित:|| ४९ ||

पदच्छेद: - नारायण-अमितगते पद्मनाभ सुरोत्तम |
प्रगृह्यतां बलि: देव मन्त्रपूत:मया अर्पित:|| ४९ ||

अन्वय: - अमितगते नारायण पद्मनाभ सुरोत्तम देव मया अर्पित: मन्त्रपूत: बलि: प्रगृह्यताम्|

अर्थ - विष्णुकरिता मंत्र - हे अपारगती असणाऱ्या नारायणा, पद्मनाभा, देवांमध्ये श्रेष्ठ असणाऱ्या देवा! मी अर्पण केलेल्या, मंत्रांनी पवित्र केलेल्या या आहुतीचा तुम्ही स्वीकार करावा .

पुरन्दरामरपते वज्रपाणे शतक्रतो |
प्रगृह्यतां बलिर्देव विधिमन्त्रपुरस्कृत:|| ५० ||

पदच्छेद: - पुरन्दर अमरपते वज्रपाणे शतक्रतो |
प्रगृह्यतां बलि: देव विधि-मन्त्र-पुरस्कृत:|| ५० ||

अन्वय: - अमरपते पुरन्दर वज्रपाणे शतक्रतो देव विधिमन्त्रपुरस्कृत:बलि: प्रगृह्यताम्|

अर्थ - इंद्राकरिता मंत्र - हे देवांचा राजा असणाऱ्या पुरंदरा, वज्र हातात असणाऱ्या, शंभर यज्ञ करणाऱ्या इंद्रदेवा, विधिनुसार मंत्रासहित दिली जाणारी आहुती आपण स्वीकारावी .

देवसेनापते स्कन्द भगवन् शङ्करप्रिय |
बलि: प्रीतेन मनसा षण्मुख प्रतिगृह्यताम् || ५१ ||

पदच्छेद: - देवसेनापते स्कन्द भगवन् शङ्करप्रिय |
बलि: प्रीतेन मनसा षण्मुख प्रतिगृह्यताम् || ५१ ||

अन्वय: - देवसेनापते शङ्करप्रिय षण्मुख भगवन् स्कन्द प्रीतेन मनसा बलि: प्रतिगृह्यताम्|

अर्थ - स्कंदाकरिता मंत्र - हे देवांचा सेनापती असणाऱ्या, शंकराला प्रिय असणाऱ्या, सहा मुख असणाऱ्या, भगवान स्कंदा (कार्तिकेया), तुम्ही प्रसन्न मनाने या आहुतीचा स्वीकार करा .

देवि देवमहाभागे सरस्वति हरिप्रिये |
प्रगृह्यतां बलिर्मातर्मया भक्त्या समर्पित: || ५२ ||

पदच्छेद: - देवि देवमहाभागे सरस्वति हरिप्रिये |
प्रगृह्यतां बलि: मात: मया भक्त्या समर्पित: || ५२ ||

अन्वय: - देवमहाभागे देवि सरस्वति हरिप्रिये मात: मया भक्त्या समर्पित: बलि: प्रगृह्यताम् |

अर्थ - सरस्वतीकरिता मंत्र - हे देवतांमध्ये पूज्य असणाऱ्या देवी सरस्वती, ब्रह्माला प्रिय असणाऱ्या हे माते ! मी भक्तिपूर्वक अर्पण केलेली आहुती तू ग्रहण कर .

नानानिमित्तसम्भूता: पौलस्त्या: सर्व एव तु |
राक्षसेन्द्रा महासत्वा: प्रतिगृह्णीत मे बलिम् || ५३ ||

पदच्छेद: - नाना-निमित्त-सम्भूता: पौलस्त्या: सर्वे एव तु |
राक्षसेन्द्रा: महासत्वा: प्रतिगृह्णीत मे बलिम् || ५३ ||

अन्वय: - नानानिमित्तसम्भूता: पौलस्त्या: सर्वे एव राक्षसेन्द्रा: महासत्त्वा: तु मे बलिं प्रतिगृह्णीत |

अर्थ - राक्षसगणांकरिता मंत्र - अनेक कारणांनी निर्माण झालेल्या, पुलस्ती कुळाचे वंशज असणाऱ्या सर्व श्रेष्ठ महापराक्रमी राक्षसांनो, मी दिलेली आहुती आपण स्वीकारावी .

लक्ष्मी: सिद्धिर्मतिर्मेधा सर्वलोकनमस्कृता: |
मन्त्रपूतमिमं देव्य: प्रतिगृह्णन्तु मे बलिम् || ५४ ||

पदच्छेद: - लक्ष्मी: सिद्धि: मति: मेधा सर्वलोक-नमस्कृता: |
मन्त्रपूतम् इमं देव्य: प्रतिगृह्णन्तु मे बलिम् || ५४ ||

अन्वय: - सर्वलोकनमस्कृता: लक्ष्मी: सिद्धि: मति: मेधा देव्य: मन्त्रपूतम् इमं मे बलिं प्रतिगृह्णन्तु |

अर्थ - सर्व देवींकरिता मंत्र - सर्व लोकांमध्ये वंदनीय असणाऱ्या लक्ष्मी, सिद्धी, मती व मेधा या देवींनी मी अर्पण केलेली मंत्रांनी पवित्र झालेली आहुती आपण स्वीकारावी .

सर्वभूतानुभावज्ञ लोकजीवन मारुत |
प्रगृह्यतां बलिर्देव मन्त्रपूतो मयोद्यत: ‖ ५५ ‖

पदच्छेद: - सर्वभूत-अनुभावज्ञ लोकजीवन मारुत |
प्रगृह्यतां बलि: देव मन्त्रपूत: मया उद्यत: ‖ ५५ ‖

अन्वय: - सर्वभूतानुभावज्ञ लोकजीवन मारुत देव, मया उद्यत: मन्त्रपूत: बलि: प्रगृह्यताम् |

अर्थ - वायुकरिता मंत्र - सर्व प्राणिमात्रांचे सामर्थ्य जाणणाऱ्या, लोकांचे प्राण असणाऱ्या हे पवनदेवा! मी वाहिलेली मंत्रांनी पवित्र केलेली आहुती आपण स्वीकारावी .

देववक्त्र सुरश्रेष्ठ धूमकेतो हुताशन |
भक्त्या समुद्यतो देव बलि: सम्प्रति गृह्यताम् ‖ ५६ ‖

पदच्छेद: - देववक्त्र सुरश्रेष्ठ धूमकेतो हुताशन |
भक्त्या समुद्यत: देव बलि: सम्प्रति गृह्यताम् ‖ ५६ ‖

अन्वय: - देववक्त्र सुरश्रेष्ठ धूमकेतो हुताशन देव भक्त्या समुद्यत: बलि: सम्प्रति गृह्यताम् |

अर्थ - अग्निकरिता मंत्र - हे देवतांचे मुखस्वरूप असणाऱ्या, देवांमध्ये श्रेष्ठ असणाऱ्या, धूम हाच ध्वज असणाऱ्या, अग्निदेवा, भक्तिपूर्वक दिलेली ही आहुती तुम्ही ग्रहण करा .

सर्वग्रहाणां प्रवर तेजोराशे दिवाकर |
भक्त्या मयोद्यतो देव बलि: सम्प्रति गृह्यताम् ‖ ५७ ‖

पदच्छेद: - सर्वग्रहाणां प्रवर तेजोराशे दिवाकर |
भक्त्या मया उद्यत: देव बलि: सम्प्रति गृह्यताम् ‖ ५७ ‖

अन्वय: - सर्वग्रहाणां प्रवर तेजोराशे दिवाकर देव मया भक्त्या उद्यत: बलि: सम्प्रति गृह्यताम् |

अर्थ - सूर्याकरिता मंत्र - सर्व ग्रहांमध्ये श्रेष्ठ, तेजोमय, दिनकर, सूर्यदेवा! मी भक्तिपूर्वक अर्पण केलेल्या आहुतीचा आता तू स्वीकार कर .

सर्वग्रहपते सोम द्विजराज जगत्प्रिय |
प्रगृह्यतामेष बलिर्मन्त्र पूतो मयोद्यत: || ५८ ||

पदच्छेद: - सर्वग्रहपते सोम द्विजराज जगत्प्रिय |
प्रगृह्यताम् एष: बलि: मन्त्रपूत: मया उद्यत: || ५८ ||

अन्वय: - सर्वग्रहपते द्विजराज जगत्प्रिय सोम मया उद्यत: एष: मन्त्रपूत: बलि: प्रगृह्यताम् |

अर्थ - चंद्राकरिता मंत्र - सर्व ग्रहांचे अधिपती असणाऱ्या, ब्राम्हणांची शोभा असणाऱ्या, जगाला प्रिय असणाऱ्या, हे चंद्रदेवा ! माझ्याकडून अर्पण केलेल्या, मंत्रांनी पवित्र केलेल्या, या आहुतीचा (तुम्ही) स्वीकार करावा.

महागणेश्वरा: सर्वे नन्दीश्वरपुरोगमा: |
प्रगृह्यतां बलिर्भक्त्या मया सम्प्रति चोदित: || ५९ ||
नम: पितृभ्य: सर्वेभ्य: प्रतिगृह्णन्त्विमं बलिम् |

पदच्छेद: - महागणेश्वरा: सर्वे नन्दीश्वर-पुरोगमा: |
प्रगृह्यतां बलि: भक्त्या मया सम्प्रति चोदित: || ५९ ||
नम: पितृभ्य: सर्वेभ्य: प्रतिगृह्णन्तु इमं बलिम् |

अन्वय: - सर्वे नन्दीश्वरपुरोगमा: महागणेश्वरा: मया सम्प्रति भक्त्या चोदित: बलि: प्रगृह्यताम् |
पितृभ्य: सर्वेभ्य: नम:, इमं बलिं प्रतिगृह्णन्तु |

अर्थ - महागणांकरिता मंत्र - नंदीश्वर प्रमुख असणाऱ्या हे सर्व महागणेश्वरांनो ! भक्तिभावाने परिपूर्ण असलेली आहुती आपण ग्रहण करावी. सर्व पितरांना नमस्कार. आपण ही आहुती स्वीकारा.

(भूतेभ्यश्च नमो नित्यं येषामेष बलि: प्रिय: |)
कामपाल नमो नित्यं यस्यायं ते विधि: कृत: || ६० ||

पदच्छेद: - (भूतेभ्य: च नम: नित्यं येषाम् एष: बलि: प्रिय: |)
कामपाल नम: नित्यं यस्य अयं ते विधि: कृत: || ६० ||

अन्वय : - (भूतेभ्य : च नित्यं नम : येषाम् एष : बलि : प्रिय : |)
कामपाल, नित्यं ते नम : यस्य अयं विधि : कृत : |

अर्थ - ज्यांना आहुती प्रिय आहे, अशा भूतगणांना नेहमीच नमस्कार असो .
बलरामाकरिता मंत्र - हे बलरामा, तुम्हाला नित्य वंदन असो . तुमच्यासाठी हा विधी केला आहे . (तुम्हीदेखील या आहुतीचा स्वीकार करा) .

नारदस्तुम्बुरुश्चैव विश्वावसुपुरोगमा : |
परिगृह्णन्तु मे सर्वे गन्धर्वा बलिमुद्यतम् || ६१ ||

पदच्छेद : - नारद : तुम्बुरु : च एव विश्वावसु-पुरोगमा : |
परिगृह्णन्तु मे सर्वे गन्धर्वा : बलिम् उद्यतम् || ६१ ||

अन्वय : - नारद : तुम्बुरु : च एव विश्वावसु-पुरोगमा : सर्वे गन्धर्वा : उद्यतं मे बलिं परिगृह्णन्तु |

अर्थ - नारद, तुंबरू आणि सर्व गंधर्वांकरिता मंत्र - नारद, तुंबरु, विश्वावसु हे ज्यांच्यात प्रमुख आहे अशा सर्व गंधर्वांनी दिलेल्या आहुतीचा स्वीकार करावा .

यमो मित्रश्च भगवानीश्वरौ लोकपूजितौ |
इमं मे प्रतिगृह्णीतां बलिं मन्त्रपुरस्कृतम् || ६२ ||

पदच्छेद : - यम : मित्र : च भगवान् ईश्वरौ लोकपूजितौ |
इमं मे प्रतिगृह्णीतां बलिं मन्त्र-पुरस्कृतम् || ६२ ||

अन्वय : - भगवान् यम : (भगवान्) मित्र : च (एते) लोकपूजितौ ईश्वरौ मे मन्त्रपुरस्कृतम् इमं बलिं प्रतिगृह्णीताम् |

अर्थ - यम आणि मित्राकरिता मंत्र - लोकांद्वारे पूजिलेल्या भगवान यम व भगवान मित्र यांनी, मंत्रांनी पवित्र केलेली ही आहुती ग्रहण करावी .

रसातलगतेभ्यश्च पन्नगेभ्यो नमो नम : |
दिशस्तु सिद्धिर्नाट्यस्य पूजिता : पापनाशना : || ६३ ||

पदच्छेद :- रसातल-गतेभ्य : च पन्नगेभ्य : नमो नम : |
दिश : तु सिद्धि : नाट्यस्य पूजिता : पापनाशना : || ६३ ||

अन्वय : - रसातल-गतेभ्य : च पन्नगेभ्य : नमो नम : | हे पापनाशना : दिश : पूजिता :, नाट्यस्य सिद्धि : (कल्प्यताम्) |

अर्थ - सर्पांकरिता मंत्र - रसातळात राहणाऱ्या सर्पांना माझा पुन्हा पुन्हा प्रणाम ! हे पापांचा नाश करणाऱ्या, दशदिशांमध्ये पूजिलेल्या (नागदेवांनो), नाट्याचे हे कार्य पूर्ण होऊ दे .

सर्वाम्भिसां पतिर्देवो वरुणो हंसवाहन : |
पूजित : प्रीतिमानस्तु ससमुद्रनदीनद : || ६४ ||

पदच्छेद :- सर्व-अम्भसां पति : देव : वरुण : हंसवाहन : |
पूजित : प्रीतिमान : तु स-समुद्र-नदी-नद : || ६४ ||

अन्वय : - हंसवाहन : सर्वाम्भिसां पति : (मया)पूजित : देव : वरुण : ससमुद्रनदीनद : प्रीतिमान : (भवतु) |

अर्थ - वरुणदेवतेकरिता मंत्र - हंस वाहन असणारे, सर्व जलप्रदेशाचे अधिपती असणारे, माझ्याकडून पूजिले गेलेले, भगवान वरुण यांनी सर्व समुद्र, नदी व नद यांच्या सह माझ्यावर प्रसन्न व्हावे .

वैनतेय महासत्त्व सर्वपक्षिपते विभो |
प्रगृह्यतां बलिर्देव मन्त्रपूतो मयोद्यत : || ६५ ||

पदच्छेद :- वैनतेय महासत्त्व सर्वपक्षिपते विभो |
प्रगृह्यतां बलि : देव मन्त्रपूत : मया उद्यत : || ६५ ||

अन्वय : - महासत्त्व विभो सर्वपक्षिपते वैनतेय देव मया उद्यत : मन्त्रपूत : बलि : प्रगृह्यताम् |

अर्थ - गरुडाकरिता मंत्र - हे महाबलशाली, सामर्थ्यशाली, सर्व पक्षिगणांचे स्वामी असणाऱ्या, विनतापुत्र असणाऱ्या गरुडदेवा, मी अर्पण केलेली, अभिमंत्रित अशी ही आहुती तुम्ही ग्रहण करा .

धनाध्यक्षो यक्षपतिर्लोकपालो धनेश्वरः |
सगुह्यकस्सयक्षश्च प्रतिगृह्णातु मे बलिम् || ६६ ||

पदच्छेदः - धनाध्यक्षः यक्षपतिः लोकपालः धनेश्वरः |
सगुह्यकः सयक्षः च प्रतिगृह्णातु मे बलिम् || ६६ ||

अन्वयः - धनाध्यक्षः यक्षपतिः लोकपालः धनेश्वरः (कुबेरः) सगुह्यकः सयक्षः च मे बलिं प्रतिगृह्णातु |

अर्थ - कुबेराकरिता मंत्र - संपत्तीवर अधिराज्य गाजवणाऱ्या, यक्षांचे स्वामी असणाऱ्या, (उत्तरदिशेकडील) लोकांचे रक्षण करणाऱ्या, संपत्तीचा स्वामी असणाऱ्या कुबेरानेही, यक्ष व गुह्यकांसहित माझ्या आहुतीचा स्वीकार करावा .

नमोऽस्तु नाट्यमातृभ्यो ब्राह्म्याद्याभ्यो नमो नमः |
सुमुखीभिः प्रसन्नाभिर्बलिरद्य प्रगृह्यताम् || ६७ ||

पदच्छेदः - नमः अस्तु नाट्यमातृभ्यः ब्राह्मी-आद्याभ्यः नमो नमः |
सुमुखीभिः प्रसन्नाभिः बलिः अद्य प्रगृह्यताम् || ६७ ||

अन्वयः - नाट्यमातृभ्यः नमः अस्तु | ब्राह्म्याद्याभ्यः नमो नमः | प्रसन्नाभिः सुमुखीभिः (भवतीभिः) बलिः अद्य प्रगृह्यताम् |

अर्थ - नाट्यमातृकांकरिता मंत्र - ब्राह्मी इत्यादी नाट्यमातृकांना नमस्कार असो . (तुम्हाला माझा) वारंवार प्रणाम . प्रसन्न आणि सुंदर मुख असलेल्या आपण सगळ्यांनी अर्पण केलेली ही आहुती ग्रहण करावी .

रुद्रप्रहरणं सर्व प्रतिगृह्णातु मे बलिम् |
विष्णुप्रहरणं चैव विष्णुभक्त्या मयोद्यतम् || ६८ ||

पदच्छेदः - रूद्रप्रहरणं सर्व प्रतिगृह्णातु मे बलिम् |
विष्णुप्रहरणं च एव विष्णुभक्त्या मया उद्यतम् || ६८ ||

अन्वयः - रूद्रप्रहरणं मे सर्व बलिं प्रतिगृह्णातु | विष्णुप्रहरणं च एव विष्णुभक्त्या मया उद्यतं (बलिं प्रतिगृह्णातु) |

अर्थ - त्रिशूळ आणि सुदर्शनचक्राकरिता मंत्र - रूद्राचे शस्त्र असणाऱ्या त्रिशूळाने मी अर्पण केलेल्या आहुतीचा स्वीकार करावा आणि विष्णुचे शस्त्र असणाऱ्या सुदर्शनचक्रानेही विष्णुवरील भक्तीमुळे उद्युक्त झालेल्या माझ्याकडून या आहुतीचा स्वीकार करावा .

तथा कृतान्तः कालश्च सर्वप्राणिवधेश्वरौ ।
मृत्युश्च नियतिश्चैव प्रतिगृह्णातु मे बलिम् ॥ ६९ ॥

पदच्छेदः - तथा कृतान्तः कालः च सर्वप्राणि-वधेश्वरौ ।
मृत्युः च नियतिः च एव प्रतिगृह्णातु मे बलिम् ॥ ६९ ॥

अन्वयः - तथा सर्वप्राणिवधेश्वरौ कृतान्तः कालः मृत्युः नियतिः च एव मे बलिं प्रतिगृह्णातु ।

अर्थ - कालदेवतेकरिता मंत्र - सर्व प्राण्यांच्या मृत्यूची देवता असणाऱ्या कृतांत, काल, मृत्यू व नियती या सगळ्यांनी माझ्याकडून दिलेल्या आहुतीचे ग्रहण करावे .

याश्चास्यां मत्तवारण्यां संश्रिता वास्तुदेवताः ।
मन्त्रपूतमिमं सम्यक्प्रतिगृह्णन्तु मे बलिम् ॥ ७० ॥

पदच्छेदः - याः च अस्यां मत्तवारण्यां संश्रिताः वास्तुदेवताः ।
मन्त्रपूतम् इमं सम्यक् प्रतिगृह्णन्तु मे बलिम् ॥ ७० ॥

अन्वयः - याः च वास्तुदेवताः अस्यां मत्तवारण्यां संश्रिताः (ताः) मन्त्रपूतम् इमं मे बलिं सम्यक् प्रतिगृह्णन्तु ।

अर्थ - वास्तुदेवतेकरिता मंत्र - मंत्रांनी पवित्र झालेल्या, मी अर्पण केलेल्या आहुतीचा मत्तवारणीमध्ये आश्रय घेतलेल्या वास्तुदेवतांनी स्वीकार करावा .

अन्ये ये देवगन्धर्वा दिशो दश समाश्रिताः ।
दिव्यान्तरिक्षभौमाश्च तेभ्यश्चायं बलिः कृतः ॥ ७१ ॥

पदच्छेदः - अन्ये ये देवगन्धर्वाः दिशः दश समाश्रिताः ।
दिव्य-अन्तरिक्ष-भौमाः च तेभ्यः च अयं बलिः कृतः ॥ ७१ ॥

अन्वयः - अन्ये देवगन्धर्वाः ये दश दिशः दिव्यान्तरिक्षभौमाः च समाश्रिताः तेभ्यः च अयं बलिः कृतः ।

अर्थ - स्वर्ग, अन्तरिक्ष व भूमीवर राहणाऱ्या, दहा दिशांमध्ये व्याप्त असणाऱ्या इतर देव आणि गंधर्वांसाठी ही आहुती मी (समर्पित) केली आहे .

कुम्भं सलिलसम्पूर्णं पुष्पमालापुरस्कृतम् ।
स्थापयेद्रङ्गमध्ये तु सुवर्णं चात्र दापयेत् ॥ ७२ ॥

पदच्छेद :- कुम्भं सलिल-सम्पूर्णं पुष्पमाला-पुरस्कृतम् ।
स्थापयेत् रङ्गमध्ये तु सुवर्णं च अत्र दापयेत् ॥ ७२ ॥

अन्वय :- पुष्पमालापुरस्कृतं सलिलसम्पूर्णं कुम्भं रङ्गमध्ये स्थापयेत् सुवर्णं च अत्र दापयेत् ।

अर्थ - पुष्पमाळांनी सजविलेला, पाण्याने पूर्ण भरलेला मातीचा घडा रंगमंचाच्या मध्यभागी ठेवावा आणि त्यात (थोडे) सोने घालावे .

(आतोद्यानि तु सर्वाणि कृत्वा वस्त्रोत्तराणि तु ।
गन्धैर्माल्यैश्च धूपश्चै भक्ष्यैर्भोज्यैश्च पूजयेत् ॥)

पदच्छेद :- (आतोद्यानि तु सर्वाणि कृत्वा वस्त्र-उत्तराणि तु) ।
गन्धै : माल्यै : च धूपै : च भक्ष्यै : भोज्यै : च पूजयेत् ॥)

अन्वय :- सर्वाणि आतोद्यानि वस्त्रोत्तराणि कृत्वा गन्धै : माल्यै : धूपै : च, भक्ष्यै : भोज्यै : च पूजयेत् ।

अर्थ - सर्व वाद्यांना वस्त्रांनी झाकावे व नंतर सुगंधित गंध, माळा, धूप यांनी तसेच खाद्यपदार्थ व भोजन करण्यास योग्य अशा पंचपक्वान्नाने त्या वाद्यांची पूजा करावी .

पूजयित्वा तु सर्वाणि दैवतानि यथाक्रमम् ।
जर्जरस्त्वभिसंपूज्य : स्यात्ततो विघ्नजर्जर : ॥ ७३ ॥

पदच्छेद :- पूजयित्वा तु सर्वाणि दैवतानि यथाक्रमम् ।
जर्जर : तु अभिसंपूज्य : स्यात् तत : विघ्नजर्जर : ॥ ७३ ॥

अन्वय :- सर्वाणि दैवतानि यथाक्रमं पूजयित्वा जर्जर : अभिसंपूज्य : तत : (एव स :) विघ्नजर्जर : स्यात् ।

अर्थ - सर्व दैवतांची क्रमाने पूजा करून त्यानंतर जर्जराची पूजा करावी तेव्हाच तो 'विघ्नजर्जर' (सर्व विघ्नांचा नाश करणारा) होईल .

श्वेतं शिरसि वस्त्रं स्यान्नीलं रौद्रे च पर्वणि |
विष्णुपर्वणि वै पीतं रक्तं स्कन्दस्य पर्वणि || ७४ ||
मूलपर्वणि चित्रं तु देयं वस्त्रं हितार्थिना |
सदृशं च प्रदातव्यं धूपमाल्यानुलेपनम् || ७५ ||

पदच्छेद :- श्वेतं शिरसि वस्त्रं स्यात् नीलं रौद्रे च पर्वणि |
विष्णुपर्वणि वै पीतं रक्तं स्कन्दस्य पर्वणि || ७४ ||
मूलपर्वणि चित्रं तु देयं वस्त्रं हित-अर्थिना |
सदृशं च प्रदातव्यं धूप-माल्य-अनुलेपनम् || ७५ ||

अन्वय : - शिरसि श्वेतं वस्त्रं स्यात् रौद्रे च पर्वणि नीलं (वस्त्रं स्यात्) | विष्णुपर्वणि पीतं स्कन्दस्य पर्वणि रक्तं (वस्त्रं स्यात् ) | हितार्थिना मूलपर्वणि चित्रं वस्त्रं देयम् | सदृशं च धूप-माल्य-अनुलेपनं प्रदातव्यम् |

अर्थ - (जर्जरच्या) डोक्यावर शुभ्र वस्त्र ठेवावे आणि रुद्राच्या पेऱ्यावर नीळे वस्त्र, विष्णुच्या पेऱ्यावर पिवळे वस्त्र, कार्तिकेयाच्या पेऱ्यावर लाल, हिताची इच्छा करणाऱ्यांनी मुळाच्या पेऱ्यावर रंगीबेरंगी वस्त्र बांधावे व त्या त्या (पेऱ्यावर) योग्य धूप, माळा, चंदन अर्पण करावे .

### ❖ वाद्यपूजा ❖

आतोद्यानि च सर्वाणि वासोभिरवगुण्ठयेत् |
गन्धैर्माल्यैश्च धूपैश्च भक्ष्यभोज्यैश्च पूजयेत् || ७६ ||

पदच्छेद :- आतोद्यानि च सर्वाणि वासोभि: अवगुण्ठयेत् |
गन्धै : माल्यै : च धूपै : च भक्ष्यभोज्यै : च पूजयेत् || ७६ ||

अन्वय : - सर्वाणि आतोद्यानि वासोभि: अवगुण्ठयेत् | गन्धै: माल्यै: धूपै: च भक्ष्यभोज्यै: च पूजयेत् |

अर्थ - सर्व वाद्यांना वस्त्रांनी झाकावे व नंतर सुगंधित गंध, माळा, धूप आणि खाद्यपदार्थ व भोजन करण्यास योग्य अशा पंचपक्वान्नाने त्यांची पूजा करावी .

### ❖ जर्जरपूजा ❖

सर्वमेवं विधिं कृत्वा गन्धमाल्यानुलेपनै: |
विघ्नजर्जरणार्थं तु जर्जरं त्वभिमन्त्रयेत् || ७७ ||

पदच्छेद: - सर्वम् एवं विधिं कृत्वा गन्ध-माल्य-अनुलेपनै: |
विघ्न-जर्जरणार्थं तु जर्जरं तु अभिमन्त्रयेत् || ७७ ||

अन्वय: - एवं गन्धमाल्यानुलेपनै: सर्वं विधिं कृत्वा विघ्नजर्जरणार्थं जर्जरं तु अभिमन्त्रयेत् |

अर्थ - अशाप्रकारे गंध, माळा व चंदन अर्पण करून सर्व विधी पूर्ण करून नंतर विघ्नांना नष्ट करण्याकरिता जर्जराला अभिमंत्रित करावे .

अत्र विघ्नविनाशार्थं पितामहमुखैस्सुरै: |
निर्मितस्त्वं महावीर्यो वज्रसारो महातनु: || ७८ ||

पदच्छेद: - अत्र विघ्न-विनाशार्थं पितामह-मुखै: सुरै: |
निर्मित: त्वं महावीर्य: वज्रसार: महातनु: || ७८ ||

अन्वय: - अत्र विघ्नविनाशार्थं पितामहमुखै: सुरै: त्वं महावीर्य: वज्रसार: महातनु: निर्मित: |

अर्थ - (हे जर्जरा,) सर्व विघ्नांच्या विनाशाकरिता ब्रह्मदेवाला अभिमुख झालेल्या (शरण गेलेल्या) देवगणांनी तुला महापराक्रमी, सुदृढ, वज्रासमान टणक व विशाल शरीराचे बनविले आहे .

शिरस्ते रक्षतु ब्रह्मा सर्वैर्देवगणै: सह |
द्वितीयं च हर: पर्व तृतीयं च जनार्दन: || ७९ ||
चतुर्थं च कुमारस्ते पञ्चमं पन्नगोत्तम: |
नित्यं सर्वेऽपि पान्तु त्वां सुरार्थे च शिवो भव || ८० ||

पदच्छेद : - शिर : ते रक्षतु ब्रह्मा सर्वै : देवगणै : सह |
द्वितीयं च हर : पर्व तृतीयं च जनार्दन : || ७९ ||
चतुर्थं च कुमार : ते पञ्चमं पन्नगोत्तम : |
नित्यं सर्वे अपि पान्तु त्वां सुरार्थे च शिव : भव || ८० ||

अन्वय : - सर्वै : देवगणै : सह ब्रह्मा ते शिर : रक्षतु | द्वितीयं च पर्व हर : ( रक्षतु ) तृतीयं च जनार्दन : (रक्षतु ) |
ते चतुर्थं (पर्व) च कुमार : (रक्षतु), पञ्चमं (पर्व) पन्नगोत्तम : (रक्षतु) | सर्वे अपि त्वां नित्यं पान्तु सुरार्थे च शिव : भव |

अर्थ - सर्व देवतांसहित ब्रह्मा तुझ्या मस्तकाचे रक्षण करो . दुसऱ्या पर्वाचे शिव, तिसऱ्याचे विष्णु (रक्षण करो) . चौथ्या पर्वाचे कार्तिकेय (रक्षण करो), पन्नगांमधील जो उत्तम आहे असा (शेष) पाचव्या पर्वाचे रक्षण करो . सर्वच देवांनी सदैव तुझे रक्षण करावे आणि देवांकरिता तू मंगलमय हो .

नक्षत्रेऽभिजिति त्वं हि प्रसूतोऽहितसूदन |
जयं चाभ्युदयं चैव पार्थिवस्य समावह || ८१ ||

पदच्छेद : - नक्षत्रे अभिजिति त्वं हि प्रसूत : अहितसूदन |
जयं च अभ्युदयं च एव पार्थिवस्य समावह || ८१ ||

अन्वय : - हे अहितसूदन, त्वं हि अभिजिति नक्षत्रे प्रसूत : |
पार्थिवस्य जयं अभ्युदयं च एव समावह |

अर्थ - हे शत्रूंचा नाश करणाऱ्या (जर्जरा), तू अभिजित नक्षत्रावर उत्पन्न झाला आहेस . आमच्या राजाला विजय (प्रदान कर) आणि (त्यांची) उन्नती कर .

❖ हवनाचा विधी ❖

जर्जरं पूजयित्वैवं बलिं सर्वं निवेद्य च |
अग्नौ होमं तत : कुर्यान्मन्त्राहुतिपुरस्कृतम् || ८२ ||

पदच्छेद : - जर्जरं पूजयित्वा एवं बलिं सर्व निवेद्य च |
अग्नौ होमं तत: कुर्यात् मन्त्र-आहुति-पुरस्कृतम् || ८२ ||

अन्वय : - एवं जर्जरं पूजयित्वा सर्व बलिं निवेद्य च तत: अग्नौ मन्त्र-आहुति-पुरस्कृतं होमं कुर्यात् |

अर्थ - अशाप्रकारे जर्जराची पूजा करून व सर्व आहुती सांगून झाल्यानंतर मंत्र व आहुतीसहित अग्निमध्ये होम करावा .

हुताश एव दीप्ताभिरुल्काभि: परिमार्जनम् |
नृपतेर्नर्तकीनां च कुर्याद्दीप्त्यभिवर्धनम् || ८३ ||

पदच्छेद : - हुताशे एव दीप्ताभि : उल्काभि : परिमार्जनम् |
नृपते : नर्तकीनां च कुर्यात् दीप्ति-अभिवर्धनम् || ८३ ||

अन्वय : - हुताशे एव नृपते : नर्तकीनां दीप्त्यभिवर्धनं दीप्ताभि : उल्काभि : परिमार्जनं (नीराञ्जनं) कुर्यात् |

अर्थ - हवन झाल्यावर राजा आणि नर्तकींचे तेज वृद्धिंगत होण्यासाठी दर्भ प्रज्वलित करून चारही बाजूंनी ते फिरवावे (नीरांजन करावे) .

अभिद्योत्य सहातोद्यैर्नृपतिं नर्तकीस्तथा |
मन्त्रपूतेन तोयेन पुनरभ्युक्ष्य तान्वदेत् || ८४ ||
महाकुले प्रसूता: स्थ गुणौघैश्चाप्यलङ्कृता: |
यद्वो जन्मगुणोपेतं तद्वो भवतु नित्यश: || ८५ ||

पदच्छेद : - अभिद्योत्य सह आतोद्यै : नृपतिं नर्तकी : तथा |
मन्त्रपूतेन तोयेन पुन : अभ्युक्ष्य तान् वदेत् || ८४ ||
महाकुले प्रसूता : स्थ गुणौघै : च अपि अलङ्कृता : |
यद्वो जन्म-गुण-उपेतं तद्वो भवतु नित्यश : || ८५ ||

अन्वय : - आतोद्यै : सह नृपतिं तथा नर्तकी : अभिद्योत्य मन्त्रपूतेन तोयेन पुन : तान् अभ्युक्ष्य वदेत् , "(यूयं) महाकुले प्रसूता: स्थ गुणौघै: च अपि अलङ्कृता: | यत् जन्मगुणोपेतं व: (प्राप्तं) तत् व : नित्यश : भवतु |"

अर्थ - सर्व वाद्यांसहित राजा व नर्तकींना प्रकाशित करून मंत्रांनी पवित्र केलेल्या जलाने त्यांच्यावर प्रोक्षण करीत असे म्हणावे, "तुम्ही सर्व महान कुळात जन्मलेले आहात व सर्व गुणांनी युक्त आहात तेव्हा तुम्हाला जन्म व गुणांद्वारे जे प्राप्त झाले आहे ते सदैव तसेच तुमच्याकडे कायम राहू दे ."

एवमुक्त्वा ततो वाक्यं नृपतेर्भूतये बुधः |
नाट्ययोगप्रसिद्ध्यर्थमाशिषस्सम्प्रयोजयेत् || ८६ ||

पदच्छेदः - एवम् उक्त्वा ततः वाक्यं नृपतेः भूतये बुधः |
नाट्ययोग-प्रसिद्ध्यर्थम् आशिषः सम्प्रयोजयेत् || ८६ ||

अन्वयः - ततः बुधः नृपतेः भूतये एवं वाक्यम् उक्त्वा नाट्ययोग-प्रसिद्ध्यर्थम् आशिषः सम्प्रयोजयेत् |

अर्थ - विद्वानांनी राजाच्या समृद्धीसाठी असे वचन म्हटल्यानंतर नाट्यप्रयोगाच्या सिद्धीकरिता अशाप्रकारे आशीर्वचन म्हणावे .

सरस्वती धृतिर्मेधा ह्रीः श्रीर्लक्ष्मीस्स्मृतिर्मतिः |
पान्तु वो मातरः सौम्यास्सिद्धिदाश्च भवन्तु वः || ८७ ||

पदच्छेदः - सरस्वती धृतिः मेधा ह्रीः श्रीः लक्ष्मीः स्मृतिः मतिः |
पान्तु वः मातरः सौम्याः सिद्धिदाः च भवन्तु वः || ८७ ||

अन्वयः - सरस्वती धृतिः मेधा ह्रीः श्रीः लक्ष्मीः स्मृतिः मतिः एताः सौम्याः मातरः वः पान्तु सिद्धिदाः च वः भवन्तु |

अर्थ - देवी सरस्वती, धृती, मेधा, ह्री, श्री, लक्ष्मी, स्मृती व मती या सर्व सौम्य स्वभावाच्या मातृका तुमचे रक्षण करोत व तुम्हाला सिद्धी देणाऱ्या होवोत .

### ❖ कुंभभेदनविधी ❖

होमं कृत्वा यथान्यायं हविर्मन्त्रपुरस्कृतम् |
भिन्द्यात्कुम्भं ततश्चैव नाट्याचार्यः प्रयत्नतः || ८८ ||

पदच्छेद :- होमं कृत्वा यथान्यायं हविस्-मन्त्रपुरस्कृतम्।
भिन्द्यात् कुम्भं ततः च एव नाट्याचार्यः प्रयत्नतः॥८८॥

अन्वय :- यथान्यायं हविर्मन्त्रपुरस्कृतं होमं कृत्वा ततः च एव नाट्याचार्यः कुम्भं प्रयत्नतः भिन्द्यात्।

अर्थ - हवी व मंत्रासहित विधिपूर्वक होम संपवून मग नंतर नाट्याचार्यांनी तिथे असलेला घडा प्रयत्नपूर्वक फोडावा.

अभिन्ने तु भवेत्कुम्भे स्वामिनः शत्रुतो भयम्।
भिन्ने चैव तु विज्ञेयः स्वामिनः शत्रुसंक्षयः॥ ८९॥

पदच्छेद :- अभिन्ने तु भवेत् कुम्भे स्वामिनः शत्रुतः भयम्।
भिन्ने च एव तु विज्ञेयः स्वामिनः शत्रुसंक्षयः ॥८९॥

अन्वय :- अभिन्ने तु कुम्भे स्वामिनः शत्रुतः भयं भवेत्। भिन्ने च एव तु स्वामिनः शत्रुसंक्षयः विज्ञेयः।

अर्थ - हा घडा न फुटल्यास स्वामीला शत्रूपासून भय उत्पन्न होते परंतु जर तो फुटला तर स्वामीच्या शत्रुचा विनाश होतो.

## ❖ रंगमंचप्रदीपनविधी ❖

भिन्ने कुम्भे ततश्चैव नाट्यचार्यः प्रयत्नतः।
प्रगृह्य दीपिकां दीप्तां सर्वं रङ्गं प्रदीपयेत्॥९०॥

पदच्छेद :- भिन्ने कुम्भे ततः च एव नाट्याचार्यः प्रयत्नतः।
प्रगृह्य दीपिकां दीप्तां सर्वं रङ्गं प्रदीपयेत्॥ ९०॥

अन्वय :- भिन्ने कुम्भे ततः च एव नाट्याचार्यः प्रयत्नतः दीप्तां दीपिकां प्रगृह्य सर्वं रङ्गं प्रदीपयेत्।

अर्थ - अशा प्रकारे घडा फुटल्यानंतर नाट्याचार्याने प्रयत्नपूर्वक दिवा घेऊन संपूर्ण रंगमंच प्रकाशित करावे. (दिव्यासह संपूर्ण रंगमंचावर फिरावे.)

क्ष्वेडितैः स्फोटितैश्चैव वल्गितैश्च प्रधावितैः।
रङ्गमध्ये तु तां दीप्तां सशब्दां सम्प्रयोजयेत्॥ ९१॥

पदच्छेद :- क्ष्वेडितै : स्फोटितै : च एव वल्गितै : च प्रधावितै : |
रङ्गमध्ये तु तां दीप्तां सशब्दां सम्प्रयोजयेत् || ९१ ||

अन्वय : - क्ष्वेडितै : स्फोटितै : वल्गितै : प्रधावितै : च रङ्गमध्ये तां सशब्दां दीप्तां सम्प्रयोजयेत् |

अर्थ - (मुखाने) सिंहनाद करून, (पायांनी) मोठ्याने आवाज करून, उड्या मारून आणि वेगाने धावून रंगमंचावर अशा प्रकारे आवाज करीत तो दिवा फिरवावा .

## ❖ रंगपूजेची फलश्रुती ❖

शङ्खदुन्दुभिनिर्घोषैर्मृदङ्गपणवैस्तथा |
सर्वातोद्यैः प्रणदितै रङ्गे युद्धानि कारयेत् || ९२ ||

पदच्छेद :- शङ्ख-दुन्दुभि-निर्घोषै : मृदङ्ग-पणवै : तथा |
सर्व-आतोद्यै : प्रणदितै : रङ्गे युद्धानि कारयेत् || ९२ ||

अन्वय : - शङ्खदुन्दुभिनिर्घोषै : मृदङ्गपणवै : तथा प्रणदितै : सर्व-आतोद्यै : रङ्गे युद्धानि कारयेत् |

अर्थ - शंख, दुंदुभी यांच्या घोषात, मृदंग व पणव तसेच सर्व वाद्यांचा नाद करीत रंगभूमीवर युद्ध घडवावे .

तत्र च्छिन्नं च भिन्नं च दारितं च सशोणितम् |
क्षतं प्रदीप्तमायस्तं निमित्तं सिद्धिलक्षणम् || ९३ ||

पदच्छेद :- तत्र छिन्नं च भिन्नं च दारितं च सशोणितम् |
क्षतं प्रदीप्तम्आयस्तं निमित्तं सिद्धिलक्षणम् || ९३ ||

अन्वय : - तत्र (यदि)छिन्नं भिन्नं दारितं सशोणितं क्षतं प्रदीप्तम् आयस्तं (तर्हि तत् सर्वं) निमित्तं सिद्धिलक्षणम् (च अस्ति)|

अर्थ - या युद्धामध्ये योद्ध्यांना जर कापलं, चिरलं, फाटलं आणि जखमेतून रक्त आलं, एखादा घाव झाला किंवा खूप मोठी जखम झाली तर ते शुभ शकुन मानले जाते व ते यशाचे सूचक असते .

सम्यगिष्टस्तु रङ्गो वै स्वामिन : शुभमावहेत् |
पुरस्याबालवृद्धस्य तथा जनपदस्य च || ९४ ||

पदच्छेद : - सम्यक् इष्ट : तु रङ्ग : वै स्वामिन : शुभम् आवहेत् |
पुरस्य आबालवृद्धस्य तथा जनपदस्य च || ९४ ||

अन्वय : - सम्यक् इष्ट : तु रङ्ग : वै स्वामिन : शुभम् आवहेत् | पुरस्य आबालवृद्धस्य तथा जनपदस्य च ( शुभम् एव आवहेत् ) |

अर्थ - विधिपूर्वक पूजा केलेला रंगमंच राजाला शुभ देणारा ठरतो आणि शहरातील बालकांपासून वृद्धांपर्यंत सर्वांना, तसेच गावातील लहानथोरांनासुद्धा (कल्याणकारक ठरतो) .

दुरिष्टस्तु तथा रङ्गो दैवतैर्दुरधिष्ठित: |
नाट्यविध्वंसनं कुर्यान्नृपस्य च तथाऽशुभम् || ९५ ||

पदच्छेद : - दुरिष्ट : तु तथा रङ्ग : दैवतै : दुरधिष्ठित : |
नाट्यविध्वंसनं कुर्यात् नृपस्य च तथा अशुभम् || ९५ ||

अन्वय : - दुरिष्ट : तु तथा दैवतै : दुरधिष्ठित : रङ्ग : नाट्यविध्वंसनं तथा नृपस्य च अशुभं कुर्यात् |

अर्थ - व्यवस्थित पूजा न केला गेलेला तसेच देवतांद्वारे स्थानग्रहण न केला गेलेला रंगमंच नाट्याचा विध्वंस व राजाचे अशुभ करू शकतो .

य एवं विधिमुत्सृज्य यथेष्टं सम्प्रयोजयेत् |
प्राप्नोत्यपचयं शीघ्रं तिर्यग्योनिं च गच्छति || ९६ ||

पदच्छेद : - य : एवं विधिम् उत्सृज्य यथेष्टं सम्प्रयोजयेत् |
प्राप्नोति अपचयं शीघ्रं तिर्यक् योनिं च गच्छति || ९६ ||

अन्वय : - एवं य : विधिम् उत्सृज्य यथेष्टं सम्प्रयोजयेत् स : शीघ्रम् अपचयं प्राप्नोति तिर्यक् योनिं च गच्छति |

अर्थ - अशा प्रकारे जो व्यक्ती विधींचा त्याग करून इच्छेनुसार (अभिनयादिंचा रंगमंचावर) प्रयोग करतो तो लवकरच अधोगतीला जातो आणि त्याला पशूचा जन्म मिळतो .

यज्ञेन सम्मितं ह्येतद्रङ्गदैवतपूजनम् |
अपूजयित्वा रङ्गं तु नैव प्रेक्षां प्रयोजयेत् || ९७ ||

पदच्छेद : - यज्ञेन सम्मितं हि एतत् रङ्गदैवत-पूजनम् |
अपूजयित्वा रङ्गं तु न एव प्रेक्षां प्रयोजयेत् || ९७ ||

अन्वय : - एतत् रङ्गदैवतपूजनं यज्ञेन हि सम्मितम् (अस्ति) | रङ्गं तु अपूजयित्वा प्रेक्षां न एव प्रयोजयेत् |

अर्थ - रंगमंडपातील रंगदेवतांची ही पूजा यज्ञविधिसमान मान्य केली गेली आहे. त्यामुळे रंगपूजा केल्याशिवाय नाट्याच्या प्रयोगास आरंभ करू नये.

पूजिता: पूजयन्त्येते मानिता मानयन्ति च |
तस्मात्सर्वप्रयत्नेन कर्तव्यं रङ्गपूजनम् || ९८ ||

पदच्छेद : - पूजिता : पूजयन्ति एते मानिता : मानयन्ति च |
तस्मात् सर्वप्रयत्नेन कर्तव्यं रङ्गपूजनम् || ९८ ||

अन्वय : - पूजिता : मानिता : च एते देवगणा : पूजयन्ति मानयन्ति च | तस्मात् सर्वप्रयत्नेन रङ्गपूजनं कर्तव्यम् |

अर्थ - पूजा केलेल्या आणि मान दिलेल्या या सगळ्या देवता नाट्यप्रयोग करणाऱ्याला पूजनीय बनवतात आणि सन्मान प्राप्त करून देतात. म्हणून सर्वांनी प्रयत्नपूर्वक रंगपूजा करावी.

न तथा प्रदहत्यग्नि: प्रभञ्जनसमीरित: |
यथा ह्यपप्रयोगस्तु प्रयुक्तो दहति क्षणात् ||९९||

पदच्छेद : - न तथा प्रदहति अग्नि : प्रभञ्जनसमीरित : |
यथा हि अपप्रयोग : तु प्रयुक्त : दहति क्षणात् ||९९||

अन्वय : - प्रभञ्जनसमीरित : अग्नि : तथा न प्रदहति यथा हि प्रयुक्त : अपप्रयोग : तु क्षणात् दहति |

अर्थ - सोसाट्याच्या वाऱ्याने प्रेरित अग्निसुद्धा तेवढे जाळीत नाही, परंतु रंगपूजन विधीमध्ये चुका झाल्यास तो अपप्रयोग नाट्यप्रयोग करणाऱ्याला लगेचच जाळून टाकतो.

शास्त्रज्ञेन विनीतेन शुचिना दीक्षितेन च |
नाट्याचार्येण शान्तेन कर्तव्यं रङ्गपूजनम् ||१००||

पदच्छेद : - शास्त्रज्ञेन विनीतेन शुचिना दीक्षितेन च |
नाट्याचार्येण शान्तेन कर्तव्यं रङ्गपूजनम् ||१००||

अन्वय : - शास्त्रज्ञेन विनीतेन शुचिना दीक्षितेन शान्तेन च नाट्याचार्येण रङ्गपूजनं कर्तव्यम् |

अर्थ - म्हणूनच शास्त्राचे ज्ञान असणाऱ्या, विनम्र, पवित्र, व्रतस्थ, शांत स्वभावाच्या नाट्याचार्यांकडून रंगमंचाची पूजा करवून घ्यावी .

स्थानभ्रष्टं तु यो दद्याद्बलिमुद्विग्नमानस: |
मन्त्रहीनो यथा होता प्रायश्चित्ती भवेत्तु स: ||१०१||

पदच्छेद : - स्थानभ्रष्टं तु य : दद्यात् बलिम् उद्विग्न-मानस : |
मन्त्रहीन : यथा होता प्रायश्चित्ती भवेत् तु स : ||१०१||

अन्वय : - य: तु उद्विग्नमानस: स्थानभ्रष्टं बलिं दद्यात् , स: यथा मन्त्रहीन: होता (तथा) प्रायश्चित्ती भवेत् |

अर्थ - मनाच्या उद्विग्नतेमुळे अयोग्य स्थानी एखाद्या नाट्याचार्याने आहुती अर्पण केली तर त्याला मंत्रविरहित आहुती देणाऱ्या होत्याप्रमाणे प्रायश्चित्त करावे लागेल .

इत्ययं यो विधिर्दृष्टो रङ्गदैवतपूजने |
नवे नाट्यगृहे कार्य: प्रेक्षायां च प्रयोक्तृभि: ||१०२||


पदच्छेद : - इति अयं य : विधि : दृष्ट : रङ्गदैवतपूजने |
नवे नाट्यगृहे कार्य : प्रेक्षायां च प्रयोक्तृभि : ||१०२||

अन्वय : - इति रङ्गदैवतपूजने य: अयं विधि: दृष्ट: स: नवे नाट्यगृहे प्रेक्षायां च प्रयोक्तृभि: कार्य : |

अर्थ - अशा प्रकारे रंगदैवतपूजन या अध्यायामध्ये हा जो विधी सांगितला आहे, तो नव्या नाट्यगृहामध्ये आणि प्रेक्षागृहामध्ये प्रयोग करणाऱ्यांकडून करवून घ्यावा .

|| इति भारतीये नाट्यशास्त्रे रङ्गदैवतपूजनं नाम तृतीयोऽध्याय: समाप्त: ||
|| अशा प्रकारे भारतीय नाट्यशास्त्रातील 'रंगदैवतपूजन' म्हणजेच 'रंगदेवतेचे पूजन' नावाचा तिसरा अध्याय समाप्त ||

# चौथा अध्याय
# तांडवलक्षणे



# चौथा अध्याय

## तांडवलक्षणे

### ❖ 'अमृतमंथन'-समवकाराचा प्रयोग ❖

एवं तु पूजनं कृत्वा मया प्रोक्तः पितामहः |
आज्ञापय विभो क्षिप्रं कः प्रयोगः प्रयुज्यताम् || १ ||

पदच्छेदः - एवं तु पूजनं कृत्वा मया प्रोक्तः पितामहः |
आज्ञापय विभो क्षिप्रं कः प्रयोगः प्रयुज्यताम् || १ ||

अन्वयः - एवं तु पूजनं कृत्वा मया पितामहः प्रोक्तः विभो, कः प्रयोगः प्रयुज्यताम् (इति) क्षिप्रम् आज्ञापय |

अर्थ - अशाप्रकारे (विधिपूर्वक) पूजा केल्यानंतर मी ब्रह्मदेवास म्हणालो, - हे प्रभो! तुम्ही लगेचच आज्ञा करा की कोणत्या नाटकाचा मी प्रयोग करावा ?

ततोऽस्म्युक्तो भगवता योजयामृतमन्थनम् |
एतदुत्साहजननं सुरप्रीतिकरं तथा || २ ||

पदच्छेदः - ततः अस्मि उक्तः भगवता योजय अमृतमन्थनम् |
एतत् उत्साहजननं सुरप्रीतिकरं तथा || २ ||

अन्वयः - ततः भगवता उक्तः अस्मि 'अमृतमन्थनं' योजय | एतत् उत्साहजननं तथा सुरप्रीतिकरम् (अस्ति) |

अर्थ - तेव्हा भगवान ब्रह्मा मला म्हणाले , "अमृतमंथन सादर कर . हे उत्साह वाढविणारे असून देवांना प्रिय आहे ."

योऽयं समवकारस्तु धर्मकामार्थसाधकः |
मया प्राग्ग्रथितो विद्वन्स प्रयोगः प्रयुज्यताम् || ३ ||

पदच्छेदः - यः अयं समवकारः तु धर्म-काम-अर्थ-साधकः |
मया प्राक् ग्रथितः विद्वन् सः प्रयोगः प्रयुज्यताम् || ३ ||

अन्वय: - हे विद्वन् , मया प्राक् ग्रथित: य: अयं समवकार: तु धर्मकामार्थसाधक: अस्ति स: प्रयोग: (भवद्भि:) प्रयुज्यताम् |

अर्थ - हे विद्वन्, मी पूर्वी ज्या समवकाराची रचना केली , तो धर्म, काम व अर्थ मिळवून देणारा आहे . तेव्हा (तुम्ही) या नाटकाचा प्रयोग करावा .

तस्मिन्समवकारे तु प्रयुक्ते देवदानवा: |
हृष्टा: समभवन्सर्वे कर्मभावानुदर्शनात् || ४ ||

पदच्छेद: - तस्मिन् समवकारे तु प्रयुक्ते देवदानवा: |
हृष्टा: समभवन् सर्वे कर्मभाव-अनुदर्शनात् || ४||

अन्वय: - तस्मिन् समवकारे प्रयुक्ते (सति) तु कर्मभावानुदर्शनात् सर्वे देवदानवा: हृष्ता: समभवन् |

अर्थ - त्या 'अमृतमंथन' नावाच्या समवकाराचे सादरीकरण झाल्यावर त्यातील कर्म आणि भाव पाहून सगळे देव व दानव आनंदित झाले .

कस्यचित्त्वथ कालस्य मामाहाम्बुजसम्भव: |
नाट्यं सन्दर्शयामोऽद्य त्रिनेत्राय महात्मने || ५ ||

पदच्छेद: - कस्यचित् तु अथ कालस्य माम् आह अम्बुजसम्भव: |
नाट्यं सन्दर्शयाम: अद्य त्रिनेत्राय महात्मने || ५||

अन्वय: - अथ कस्यचित् तु कालस्य (सत:) अम्बुजसम्भव: माम् आह | अद्य महात्मने त्रिनेत्राय नाट्यं सन्दर्शयाम: |

अर्थ - काही काळ गेल्यानंतर कमलोत्पन्न ब्रह्मदेव मला म्हणाले की हे नाट्य आपण महात्मा शंकरासमोर सादर करूया .

तत: सार्धं सुरैर्गत्वा वृषभाङ्कनिवेशनम् |
समभ्यर्च्य शिवं पश्चादुवाचेदं पितामह: || ६ ||
मया समवकारस्तु योऽयं सृष्ट: सुरोत्तम |
श्रवणे दर्शने चास्य प्रसादं कर्तुमर्हसि || ७ ||

पदच्छेद: - तत: सार्धं सुरै: गत्वा वृषभ-अङ्क-निवेशनम्।
समभ्यर्च्य शिवं पश्चात् उवाच इदं पितामह:॥ ६॥
मया समवकार: तु य: अयं सृष्ट: सुरोत्तम।
श्रवणे दर्शने च अस्य प्रसादं कर्तुम् अर्हसि॥ ७॥

अन्वय: - तत: सुरै: सार्धं वृषभाङ्कनिवेशनं गत्वा शिवं समभ्यर्च्य पश्चात् पितामह: इदम् उवाच। हे सुरोत्तम, मया य: अयं समवकार: सृष्ट: अस्य श्रवणे दर्शने च प्रसादं कर्तुम् अर्हसि।

अर्थ - त्यानंतर सर्व देवांसहित नंदीश्वराच्या निवासस्थानी जाऊन शिवाची विधिवत् पूजा करून पितामह असे म्हणाले, "हे देवाधिदेवा! मी ज्या समवकाराची रचना केली आहे, तो ऐकण्याची व पाहण्याची आपण कृपा करावी."

पश्याम इति देवेशो द्रुहिणं वाक्यमब्रवीत्।
ततो मामाह भगवान् सज्जो भव महामते॥ ८॥

पदच्छेद: - पश्याम: इति देवेश: द्रुहिणं वाक्यम् अब्रवीत्।
तत: माम् आह भगवान् सज्ज: भव महामते॥ ८॥

अन्वय: - पश्याम: इति देवेश: द्रुहिणं वाक्यम् अब्रवीत्। तत: भगवान् माम् आह "महामते, सज्ज: भव"।

अर्थ - "पाहूया" असे देवाधिदेव (शंकर) ब्रह्मदेवास म्हणाले. तेव्हा ब्रह्मदेव मला (भरताला) म्हणाले, "हे बुद्धिमान (भरता)! (प्रयोगासाठी) तयार व्हा."

### ❖ 'त्रिपुरादाह'- डिमचा प्रयोग ❖

ततो हिमवत: पृष्ठे नानानगसमाकुले।
बहुभूतगणाकीर्णे रम्यकन्दरनिर्झरे॥ ९॥
पूर्वरङ्ग: कृत: पूर्वं तत्रायं द्विजसत्तमा:।
तथा त्रिपुरदाहश्च डिमसंज्ञ: प्रयोजित:॥ १०॥

पदच्छेद: - ततो हिमवत: पृष्ठे नाना-नग-समाकुले |
बहु-भूत-गण-आकीर्णे रम्य-कन्दर-निर्झरे || ९ ||
पूर्वरङ्ग: कृत: पूर्वं तत्र अयं द्विजसत्तमा: |
तथा त्रिपुरदाह: च डिमसंज्ञ: प्रयोजित: || १० ||

अन्वय: - द्विजसत्तमा:, तत: नानानगसमाकुले बहुभूतगणाकीर्णे रम्यकन्दरनिर्झरे हिमवत: पृष्ठे पूर्वम् अयं पूर्वरङ्ग: कृत: तथा च तत्र डिमसंज्ञ: त्रिपुरदाह: प्रयोजित: |

अर्थ - हे श्रेष्ठ मुनीजनहो! तेव्हा अनेक पर्वतांनी वेढलेल्या, अनेक भूतगणांचा निवास असणाऱ्या, मनोहर गुहा, दऱ्या, झरे असणाऱ्या त्या हिमालय पर्वताच्या पृष्ठभूमीवर मी प्रथम पूर्वरंग विधी केला आणि त्यानंतर तेथे (प्रथम अमृतमंथन हा समवकार व नंतर) त्रिपुरदाह नावाच्या डिमचा प्रयोग सादर केला .

ततो भूतगणा हृष्टा: कर्मभावानुकीर्तनात् |
महादेवश्च सुप्रीत: पितामहमथाब्रवीत् || ११||

पदच्छेद: - तत: भूतगणा: हृष्टा: कर्म-भाव-अनुकीर्तनात् |
महादेव: च सुप्रीत: पितामहम् अथ अब्रवीत् || ११||

अन्वय: - तत: कर्मभावानुकीर्तनात् भूतगणा: हृष्टा: | सुप्रीत: महादेव: च पितामहम् अथ अब्रवीत् |

अर्थ - तेव्हा कर्म व भावाचा अभिनय प्रयोग पाहून तेथील भूतगण अत्यंत आनंदीत झाले आणि भगवान महादेव सुद्धा अतिशय प्रसन्न होऊन पितामह ब्रह्मदेवास म्हणाले .

अहो नाट्यमिदं सम्यक् त्वया सृष्टं महामते |
यशस्यं च शुभार्थं च पुण्यं बुद्धिविवर्धनम् || १२ ||

पदच्छेद: - अहो नाट्यम् इदं सम्यक् त्वया सृष्टं महामते |
यशस्यं च शुभार्थं च पुण्यं बुद्धि-विवर्धनम् || १२ ||

अन्वय: - अहो महामते, इदं नाट्यं त्वया सम्यक् सृष्टम् यत् यशस्यं शुभार्थं पुण्यं बुद्धिविवर्धनम् च (अस्ति) |

अर्थ - हे महामते ! हे नाट्य तुम्ही खूप चांगल्या रीतीने निर्माण केले आहे जे यश देणारे, शुभ करणारे व पुण्यकारक आणि बुद्धी वाढविणारे आहे .

### ❖ शिव आणि ब्रह्माचा संवाद ❖

मयाऽपीदं स्मृतं नृत्यं सन्ध्याकालेषु नृत्यता |
नानाकरणसंयुक्तैरङ्गहारैर्विभूषितम् || १३ ||

पदच्छेद : - मया अपि इदं स्मृतं नृत्यं सन्ध्याकालेषु नृत्यता |
नानाकरण-संयुक्तै : अङ्गहारै : विभूषितम् || १३ ||

अन्वय : - सन्ध्याकालेषु नृत्यता मया अपि नानाकरणसंयुक्तै : अङ्गहारै : यत् विभूषितम् इदं नृत्यं स्मृतम् |

अर्थ - संध्याकाळच्या वेळी नृत्य करताना मी ज्या विविध करणांनी युक्त व अंगहारांनी विभूषित असे नृत्य केले होते त्या नृत्याविष्काराचे मला स्मरण होत आहे .

पूर्वरङ्गविधावस्मिंस्त्वया सम्यक्प्रयोज्यताम् |
वर्धमानकयोगेषु गीतेष्वासारितेषु च || १४ ||
महागीतेषु चैवार्थान्सम्यगेवाभिनेष्यसि |
यश्चायं पूर्वरङ्गस्तु त्वया शुद्ध: प्रयोजित: || १५ ||

पदच्छेद : - पूर्वरङ्ग-विधौ अस्मिन् त्वया सम्यक् प्रयोज्यताम् |
वर्धमानक-योगेषु गीतेषु आसारितेषु च || १४ ||
महागीतेषु च एव अर्थान् सम्यक् एव अभिनेष्यसि |
य : च अयं पूर्वरङ्ग : तु त्वया शुद्ध : प्रयोजित : || १५ ||

अन्वय : - पूर्वरङ्गविधौ अस्मिन् त्वया सम्यक् प्रयोज्यताम् | वर्धमानकयोगेषु आसारितेषु गीतेषु महागीतेषु च एव अर्थान् सम्यक् एव अभिनेष्यसि | य : च अयं पूर्वरङ्ग : त्वया प्रयोजित : (स :) शुद्ध : (पूर्वरङ्ग : अस्ति) |

अर्थ - पूर्वरंगविधीमध्ये तुम्ही (या अंगहारांचा) चांगला प्रयोग करा . वर्धमानकासह, आसारित

गीत व महागीतामध्ये या अर्थाची योग्य प्रकारे अभिव्यक्ती करू शकाल. तुम्ही जो पूर्व रंग केला, तो शुद्ध पूर्वरंग आहे.

एभिर्विमिश्रितश्चायं चित्रो नाम भविष्यति |
श्रुत्वा महेश्वरवचः प्रत्युक्तस्तु स्वयम्भुवा || १६ ||

पदच्छेद :- एभि : विमिश्रित : च अयं चित्र : नाम भविष्यति |
श्रुत्वा महेश्वर-वच : प्रत्युक्त : तु स्वयम्भुवा || १६ ||

अन्वय : - एभि : विमिश्रित : च अयं चित्र : नाम भविष्यति | महेश्वरवच : श्रुत्वा स्वयम्भुवा प्रत्युक्त : |

अर्थ - आणि जेव्हा तो पूर्वरंगविधी (वर्धमानक आदींनी) युक्त असेल तेव्हा त्याचे 'चित्रपूर्वरंग' असे नाव होईल. महेश्वराचे हे बोलणे ऐकून ब्रह्मदेव म्हणाले,

❖ शिवाचा तंडूला आदेश ❖

प्रयोगमङ्गहाराणामाचक्ष्व सुरसत्तम |
ततस्तण्डुं समाहूय प्रोक्तवान् भुवनेश्वरः || १७ ||
प्रयोगमङ्गहाराणाचक्ष्व भरताय वै |
ततो ये तण्डुना प्रोक्तास्त्वङ्गहारा महात्मना || १८ ||
तान्वः करणसंयुक्तान्व्याख्यास्यामि सरेचकान् |

पदच्छेद :- प्रयोगम् अङ्गहाराणाम् आचक्ष्व सुरसत्तम |
तत : तण्डुं समाहूय प्रोक्तवान् भुवनेश्वर : || १७ ||
प्रयोगम् अङ्गहाराणाम् आचक्ष्व भरताय वै |
तत : ये तण्डुना प्रोक्ता : तु अङ्गहारा : महात्मना || १८ ||
तान् व : सरेचकान् करण-संयुक्तान् व्याख्यास्यामि |

अन्वय : - सुरसत्तम, अङ्गहाराणां प्रयोगम् आचक्ष्व | तत : तण्डुं समाहूय भुवनेश्वर : प्रोक्तवान् | भरताय अङ्गहाराणां प्रयोगम्आचक्ष्व | तत : महात्मना तण्डुना ये अङ्गहारा : प्रोक्ता : | करणसंयुक्तान् सरेचकान् तान् (अङ्गहारान्) व : व्याख्यास्यामि |

अर्थ - "हे देवाधिदेवा! तुम्ही अंगहाराविषयी आम्हाला सांगा." तेव्हा (शंकराने)शिवाने तंडुला बोलावून सांगितले - "भरतमुनींना अंगहाराच्या प्रयोगाविषयी सांगा." तेव्हा महान तंडूने जे अंगहार सांगितले ते अंगहार करणांसह आणि रेचकांसह तुम्हांला सांगतो.

### ❖ अंगहारांची नावे ❖

स्थिरहस्तोऽङ्गहारस्तु तथा पर्यस्तकः स्मृतः ‖ १९ ‖
सूचीविद्धस्तथा चैव ह्यपविद्धस्तथैव च ।
आक्षिप्तकोऽथ विज्ञेयस्तथा चोद्धट्टितः स्मृतः ‖ २० ‖
विष्कम्भश्चैव सम्प्रोक्तस्तथा चैवापराजितः ।
विष्कम्भापसृतश्चैव मत्ताक्रीडस्तथैव च ‖ २१ ‖
स्वस्तिको रेचितश्चैव पार्श्वस्वस्तिक एव च ।
वृश्चिकापसृतः प्रोक्तो भ्रमरश्च तथापरः ‖ २२ ‖
मत्तस्खलितकश्चैव मदाद्विलसितस्तथा ।
गतिमण्डलकोज्ञेयः परिच्छिन्नस्तथैव च ‖ २३ ‖
परिवृत्तचितोऽथ स्यात्तथा वैशाखरेचितः ।
परावृत्तोऽथ विज्ञेयस्तथा चैवाप्यलातकः ‖ २४ ‖
पार्श्वच्छेदोऽथ सम्प्रोक्तो विद्युद्भ्रान्तस्तथैव च ।
ऊरूद्वृत्तस्तथा चैव स्यादालीढस्तथैव च ‖ २५‖
रेचितश्चापि विज्ञेयस्तथैवाच्छुरितः स्मृतः ।
आक्षिप्तरेचितश्चैव सम्भ्रान्तश्च तथापरः ‖ २६ ‖
अपसर्पस्तु विज्ञेयस्तथा चार्धनिकुट्टकः ।
द्वात्रिंशदेते सम्प्रोक्ता अङ्गहारास्तु नामतः ‖ २७ ‖

पदच्छेदः - स्थिरहस्तः अङ्गहारः तु तथा पर्यस्तकः स्मृतः ‖ १९ ‖
सूचीविद्धः तथा च एव हि अपविद्धः तथा एव च ।

आक्षिप्तकः अथ विज्ञेयः तथा च उद्घट्टितः स्मृतः ॥ २० ॥
विष्कम्भः च एव सम्प्रोक्तः तथा च एव अपराजितः।
विष्कम्भापसृतः च एव मत्ताक्रीडः तथा एव च ॥ २१ ॥
स्वस्तिकः रेचितः च एव पार्श्वस्वस्तिकः एव च ।
वृश्चिकापसृतः प्रोक्तः भ्रमरः च तथा अपरः ॥ २२ ॥
मत्तस्खलितकः च एव मदाद्विलसितः तथा ।
गतिमण्डलकः ज्ञेयः परिच्छिन्नः तथा एव च ॥ २३ ॥
परिवृत्तचितः अथ स्यात् तथा वैशाखरेचितः।
परावृत्तः अथ विज्ञेयः तथा च एव अपि अलातकः ॥ २४ ॥
पार्श्वच्छेदः अथ सम्प्रोक्तः विद्युद्भ्रान्तः तथा एव च ।
ऊरूद्वृत्तः तथा च एव स्यात् आलीढः तथा एव च ॥ २५॥
रेचितः च अपि विज्ञेयः तथा एव अच्छुरितः स्मृतः।
आक्षिप्तरेचितः च एव सम्भ्रान्तः च तथा अपरः ॥ २६ ॥
अपसर्पः तु विज्ञेयः तथा च अर्धनिकुट्टकः।
द्वात्रिंशत् एते सम्प्रोक्ताः अङ्गहाराः तु नामतः ॥ २७ ॥

अन्वयः - अङ्गहारः तु स्थिरहस्तः तथा पर्यस्तकः स्मृतः। सूचीविद्धः तथा च एव हि अपविद्धः तथा एव च । आक्षिप्तकः अथ विज्ञेयः तथा च उद्घट्टितः स्मृतः। विष्कम्भः च एव सम्प्रोक्तः तथा च एव अपराजितः। विष्कम्भापसृतः च एव मत्ताक्रीडः तथा एव च । स्वस्तिक रेचितः च एव पार्श्वस्वस्तिकः एव च । वृश्चिकापसृतः प्रोक्तः भ्रमरः च तथा अपरः। मत्तस्खलितकः च एव मदाद्विलसितः तथा । गतिमण्डलकः ज्ञेयः परिच्छिन्नः तथा एव च । परिवृत्तचितः अथ स्यात् तथा वैशाखरेचितः। परावृत्तः अथ विज्ञेयः तथा च एव अपि अलातकः। पार्श्वच्छेदः अथ सम्प्रोक्तः विद्युद्भ्रान्तः तथा एव च । ऊरूद्वृत्तः तथा च एव स्यात् आलीढः तथा एव च । रेचितः च अपि विज्ञेयः तथा एव अच्छुरितः स्मृतः। आक्षिप्तरेचितः च एव सम्भ्रान्तः च तथा अपरः। अपसर्पः तु विज्ञेयः तथा च अर्धनिकुट्टकः। एते द्वात्रिंशत् अङ्गहाराः तु नामतः सम्प्रोक्ताः।

अर्थ - १.स्थिरहस्त २. पर्यस्तक ३.सूचीविद्ध, ४. अपविद्ध, ५.आक्षिप्तक, ६.उद्घट्टित, ७. विष्कंभ, ८.अपराजित, ९.विष्कंभापसृत, १०.मत्ताक्रीडा, ११. स्वस्तिकरेचित, १२.पार्श्वस्वस्तिक,१३.वृश्चिकापसृत, १४.भ्रमर, १५.मत्तस्खलित, १६.मदविलसित, १७.गतिमंडल, १८.परिच्छिन्न, १९.परिवृत्तरेचित,२०. वैशाखरेचित, २१.परावृत्त, २२. अलातक, २३.पार्श्वच्छेद, २४. विद्युद्भ्रांत, २५.ऊरूद्वृत्त, २६. आलीढ, २७. रेचित, २८. आच्छुरित, २९. आक्षिप्तरेचित, ३०. संभ्रांत, ३१. अपसर्प आणि ३२. अर्धनिकुट्टक . अशाप्रकारे बत्तीस प्रकारचे अंगहार नावानुसार आहेत .

## ❖ अंगहार आणि करण ❖

एतेषां तु प्रवक्ष्यामि प्रयोगं करणाश्रयम् |
हस्तपादप्रचारश्च यथा योज्य: प्रयोक्तृभि: || २८ ||
अङ्गहारेषु वक्ष्यामि करणेषु च वै द्विजा: |
सर्वेषामङ्गहाराणां निष्पत्ति: करणैर्यत: || २९ ||
तान्यत: सम्प्रवक्ष्यामि नामत: कर्मतस्तथा |

पदच्छेद: - एतेषां तु प्रवक्ष्यामि प्रयोगं करण-आश्रयम् |
हस्तपाद-प्रचार: च यथा योज्य: प्रयोक्तृभि: || २८ ||
अङ्गहारेषु वक्ष्यामि करणेषु च वै द्विजा: |
सर्वेषाम् अङ्गहाराणां निष्पत्ति: करणै: यत: || २९ ||
तान् यत: सम्प्रवक्ष्यामि नामत: कर्मत: तथा |

अन्वय: - द्विजा:, एतेषां तु करणाश्रयं प्रयोगं प्रवक्ष्यामि | यथा च प्रयोक्तृभि: अङ्गहारेषु करणेषु योज्य: (य:) हस्तपादप्रचार: (अस्ति) तदपि वक्ष्यामि | करणै: सर्वेषाम् अङ्गहाराणां निष्पत्ति: (भवति) तान् नामत: तथा कर्मत: सम्प्रवक्ष्यामि |

अर्थ - हे मुनिजनहो! आता मी करणांवर आधारित त्यांचे प्रयोग सांगतो . तसेच प्रयोग करणाऱ्यांनी अंगहार आणि करण यामध्ये हात आणि पाय कसे वापरावे ते सुद्धा सांगतो . करणांद्वारे सर्व अंगहार उत्पन्न होतात, म्हणून त्यांचा उल्लेख नावानुसार आणि क्रियेनुसार सांगत आहे .

हस्तपादसमायोगो नृत्यस्य करणं भवेत् ॥ ३० ॥
द्वे नृत्तकरणे चैव भवतो नृत्तमातृका ।
द्वाभ्यां त्रिचतुराभिर्वाप्यङ्गहारस्तु मातृभि : ॥ ३१ ॥
त्रिभि: कलापकं चैव चतुर्भि: षण्डकं भवेत् ।
पञ्चैव करणानि स्यु: सङ्घातक इति स्मृत: ॥ ३२ ॥
षड्भिर्वा सप्तभिर्वापि अष्टभिर्नवभिस्तथा ।
करणैरिह संयुक्ता अङ्गहारा: प्रकीर्तिता: ॥ ३३ ॥

पदच्छेद: - हस्तपाद-समायोग: नृत्यस्य करणं भवेत् ॥ ३० ॥
द्वे नृत्तकरणे च एव भवत: नृत्त-मातृका ।
द्वाभ्यां त्रिचतुराभि: वा अपि अङ्गहार: तु मातृभि: ॥ ३१ ॥
त्रिभि: कलापकं च एव चतुर्भि: षण्डकं भवेत् ।
पञ्च एव करणानि स्यु: सङ्घातक: इति स्मृत: ॥ ३२ ॥
षड्भि: वा सप्तभि: वा अपि अष्टभि: नवभि: तथा ।
करणै: इह संयुक्ता: अङ्गहारा: प्रकीर्तिता: ॥ ३३ ॥

अन्वय: - हस्तपादसमायोग: नृत्यस्य करणं भवेत् । द्वे नृत्तकरणे च एव भवत: नृत्तमातृका । द्वाभ्यां त्रिचतुराभि: वा अपि मातृभि: अङ्गहार: (भवति) । त्रिभि: कलापकं च एव चतुर्भि: षण्डकं भवेत् । पञ्च एव करणानि स्यु: सङ्घातक इति स्मृत: । षड्भि: वा सप्तभि: वा अपि अष्टभि: तथा नवभि: करणै: संयुक्ता: अङ्गहारा: इह प्रकीर्तिता: ।

अर्थ - हात व पाय मिळून केलेल्या हालचालींना नृत्यात 'करण' असे म्हणतात . दोन नृत्तकरणे मिळून एक नृत्तमातृका आणि दोन, तीन किंवा चार मातृकांचे एक अंगहार तयार होतो . तीन करणे मिळून एक कलापक आणि चार करणे मिळून एक षंडक तयार होते . तसेच पाच करणे मिळून एक संघातक तयार होते . अशाप्रकारे सहा, सात, आठ आणि नऊ करणांच्या संयोगाने अंगहार इथे सांगितले आहेत .

## ❖ १०८ करणांची नावे ❖

एतेषामेव वक्ष्यामि हस्तपादविकल्पनम् |
तलपुष्पपुटं पूर्वं वर्तितं वलितोरु च || ३४ ||
अपविद्धं समनखं लीनं स्वस्तिकरेचितम् |
मण्डलस्वस्तिकं चैव निकुट्टकमथापि च || ३५ ||
तथैवार्धनिकुट्टं च कटिच्छिन्नं तथैव च |
अर्धरेचितकं चैव वक्ष:स्वस्तिकमेव च || ३६ ||
उन्मत्तं स्वस्तिकं चैव पृष्ठस्वस्तिकमेव च |
दिक्स्वस्तिकमलातं च तथैव च कटीसमम् || ३७ ||
आक्षिप्तरेचितं चैव विक्षिप्ताक्षिप्तकं तथा |
अर्धस्वस्तिकमुद्दिष्टमञ्चितं च तथापरम् || ३८ ||
भुजङ्गत्रासितं प्रोक्तमूर्ध्वजानु तथैव च |
निकुञ्चितं च मत्तल्लि त्वर्धमत्तल्लि चैव हि || ३९ ||
स्याद्रेचकनिकुट्टं च तथा पादापविद्धकम् |
वलितं घूर्णितं चैव ललितं च तथापरम् || ४० ||
दण्डपक्षं तथा चैव भुजङ्गत्रस्तरेचितम् |
नूपुरं चैव सम्प्रोक्तं तथा वैशाखरेचितम् || ४१ ||
भ्रमरं चतुरं चैव भुजङ्गाञ्चितमेव च |
दण्डरेचितकं चैव तथा वृश्चिककुट्टितम्|| ४२ ||
कटिभ्रान्तं तथा चैव लतावृश्चिकमेव च |
छिन्नं च करणं प्रोक्तं तथा वृश्चिकरेचितम् || ४३ ||
वृश्चिकं व्यंसितं चैव तथा पार्श्वनिकुट्टकम् |
ललाटतिलकं क्रान्तं कुञ्चितं चक्रमण्डलम् || ४४ ||
उरोमण्डलमाक्षिप्तं तथा तलविलासितम् |
अर्गलं चाथ विक्षिप्तमावृत्तं दोलपादकम् || ४५ ||

विवृत्तं विनिवृत्तं च पार्श्वक्रान्तं निशुम्भितम् |
विद्युद्भ्रान्तमतिक्रान्तं विवर्तितकमेव च || ४६ ||
गजक्रीडितकं चैव तलसंस्फोटितं तथा |
गरूडप्लुतकं चैव गण्डसूचि तथापरम् || ४७ ||
परिवृत्तं समुद्दिष्टं पार्श्वजानु तथैव च |
गृध्रावलीनकं चैव सन्नतं सूच्यथापि च || ४८ ||
अर्धसूचीति करणं सूचीविद्धं तथैव च |
अपक्रान्तं च सम्प्रोक्तं मयूरललितं तथा || ४९ ||
सर्पितं दण्डपादं च हरिणप्लुतमेव च |
प्रेङ्खोलितं नितम्बं च स्खलितं करिहस्तकम् || ५० ||
प्रसर्पितकमुद्दिष्टं सिहंविक्रीडितं तथा |
सिंहाकर्षितमुद्वृत्तं तथो प्रसृतमेव च || ५१ ||
तलसङ्घट्टितं चैव जनितं चावहित्थकम् |
निवेशमेलकाक्रीडमूरूद्वृत्तं तथैव च || ५२ ||
मदस्खलितकं चैव विष्णुक्रान्तमथापि च |
सम्भ्रान्तमथ विष्कम्भमुद्धट्टितमथापि च || ५३ ||
वृषभक्रीडितं चैव लोलितं च तथापरम् |
नागापसर्पितं चैव शकटास्यं तथैव च ||५४||
गङ्गावतरणं चैवेत्युक्तमष्टाधिकं शतम् |
अष्टोत्तरशतं ह्येतत्करणानां मयोदितम् || ५५ ||

पदच्छेद : - एतेषाम् एव वक्ष्यामि हस्तपादविकल्पनम् |
तलपुष्पपुटं पूर्वं वर्तितं वलित-ऊरु च || ३४ ||
अपविद्धं समनखं लीनं स्वस्तिकरेचितम् |
मण्डलस्वस्तिकं च एव निकुट्टकम् अथ अपि च || ३५ ||
तथा एव अर्धनिकुट्टं च कटिच्छिन्नं तथा एव च |
अर्धरेचितकं च एव वक्ष :स्वस्तिकम् एव च || ३६ ||

उन्मतं स्वस्तिकं च एव पृष्ठस्वस्तिकम् एव च |
दिक्स्वस्तिकम् अलातं च तथा एव च कटीसमम् ॥ ३७ ॥
आक्षिप्तरेचितं च एव विक्षिप्त-आक्षिप्तकं तथा |
अर्धस्वस्तिकम् उद्दिष्टम् अञ्चितं च तथा अपरम् ॥ ३८ ॥
भुजङ्गत्रासितं प्रोक्तम् ऊर्ध्वजानु तथा एव च |
निकुञ्चितं च मत्तल्लि तु अर्धमत्तल्लि च एव हि ॥ ३९ ॥
स्यात् रेचकनिकुट्टं च तथा पादापविद्धकम् |
वलितं घूर्णितं च एव ललितं च तथा अपरम् ॥ ४० ॥
दण्डपक्षं तथा च एव भुजङ्गत्रस्तरेचितम् |
नूपुरं च एव सम्प्रोक्तं तथा वैशाखरेचितम् ॥ ४१ ॥
भ्रमरं चतुरं च एव भुजङ्गाञ्चितम् एव च |
दण्डरेचितकं च एव तथा वृश्चिककुट्टितम् ॥ ४२ ॥
कटिभ्रान्तं तथा च एव लतावृश्चिकम् एव च |
छिन्नं च करणं प्रोक्तं तथा वृश्चिकरेचितम् ॥ ४३ ॥
वृश्चिकं व्यंसितं च एव तथा पार्श्वनिकुट्टकम् |
ललाटतिलकं क्रान्तं कुञ्चितं चक्रमण्डलम् ॥ ४४ ॥
उरोमण्डलम् आक्षिप्तं तथा तलविलासितम् |
अर्गलं चाथ विक्षिप्तम् आवृत्तं दोलपादकम् ॥ ४५ ॥
विवृत्तं विनिवृत्तं च पार्श्वक्रान्तं निशुम्भितम् |
विद्युद्भ्रान्तम् अतिक्रान्तं विवर्तितकम् एव च ॥ ४६ ॥
गजक्रीडितकं च एव तलसंस्फोटितं तथा |
गरुडप्लुतकं च एव गण्डसूचि तथा अपरम् ॥ ४७ ॥
परिवृत्तं समुद्दिष्टं पार्श्वजानु तथा एव च |
गृध्रावलीनकं च एव सन्नतं सूची अथ अपि च ॥ ४८ ॥
अर्धसूची इति करणं सूचीविद्धं तथा एव च |
अपक्रान्तं च सम्प्रोक्तं मयूरललितं तथा ॥ ४९ ॥
सर्पितं दण्डपादं च हरिणप्लुतम् एव च |

प्रेङ्खोलितं नितम्बं च स्खलितं करिहस्तकम् ॥ ५० ॥
प्रसर्पितकम् उद्दिष्टं सिंहविक्रीडितं तथा ।
सिंहाकर्षितम् उद्वृत्तं तथा उपसृतम् एव च ॥ ५१ ॥
तलसङ्घट्टितं च एव जनितं च अवहित्थकम् ।
निवेशम् एलकाक्रीडम् ऊरूद्वृत्तं तथा एव च ॥ ५२ ॥
मदस्खलितकं च एव विष्णुक्रान्तम् अथ अपि च ।
सम्भ्रान्तम् अथ विष्कम्भम् उद्घट्टितम् अथ अपि च ॥ ५३ ॥
वृषभक्रीडितं च एव लोलितं च तथा अपरम् ।
नागापसर्पितं च एव शकटास्यं तथा एव च ॥५४॥
गङ्गावतरणं च एव इति उक्तम् अष्टाधिकं शतम् ।
अष्टोत्तरशतं हि एतत् करणानां मया उदितम् ॥ ५५ ॥

अन्वयः - एतेषाम् एव हस्तपादविकल्पनं वक्ष्यामि । पूर्वं तलपुष्पपुटं वर्तितं वलितोरू अपविद्धं समनखं लीनं स्वस्तिकरेचितं मण्डलस्वस्तिकं निकुट्टकम् अर्धनिकुट्टं कटिच्छिन्नम् अर्धरेचितकं वक्षःस्वस्तिकम् उन्मत्तं स्वस्तिकं पृष्ठस्वस्तिकं दिक्स्वस्तिकम् अलातं कटीसमम् आक्षिप्तरेचितं विक्षिप्ताक्षिप्तकम् अर्धस्वस्तिकम् अञ्चितं भुजङ्गत्रासितम् ऊर्ध्वजानु निकुञ्चितं मत्तल्लि अर्धमत्तल्लि रेचकनिकुट्टं पादापविद्धकम् वलितं घूर्णितं ललितं दण्डपक्षं भुजङ्गत्रस्तरेचितं नूपुरं वैशाखरेचितं भ्रमरं चतुरं भुजङ्गाञ्चितं दण्डरेचितकं वृश्चिककुट्टितं कटिभ्रान्तं लतावृश्चिकं छिन्नं वृश्चिकरेचितं वृश्चिकं व्यंसितं पार्श्वनिकुट्टकं ललाटतिलकं क्रान्तं कुञ्चितं चक्रमण्डलम् उरोमण्डलम् आक्षिप्तं तलविलासितम् अर्गलं विक्षिप्तम् आवृत्तं दोलपादकं विवृत्तं विनिवृत्तं च पार्श्वक्रान्तं निशुम्भितं विद्युद्भ्रान्तम् अतिक्रान्तं विवर्तितकं गजक्रीडितकं तलसंस्फोटितं गरुडप्लुतकं गण्डसूचि परिवृत्तं पार्श्वजानु गृध्रावलीनकं सन्नतं सूची अर्धसूची सूचीविद्धम् अपक्रान्तं मयूरललितं सर्पितं दण्डपादं हरिणप्लुतम् प्रेङ्खोलितं नितम्बं स्खलितं करिहस्तकं प्रसर्पितकं सिंहविक्रीडितं सिंहाकर्षितम् उद्वृत्तम् उपसृतम् तलसङ्घट्टितं जनितं अवहित्थकं निवेशम् एलकाक्रीडम् ऊरूद्वृत्तं मदस्खलितकं विष्णुक्रान्तं सम्भ्रान्तं विष्कम्भम् उद्घट्टितं वृषभक्रीडितं लोलितं नागापसर्पितं शकटास्यं गङ्गावतरणं च इति अष्टाधिकं शतम् उक्तम् । एतत् करणानां अष्टोत्तरशतं मया उदितम् ।

अर्थ - आता हात व पायाच्या गतीने बनणारी करणे मी सांगतो आहे. १. तलपुष्पपुट, २.वर्तित, ३. वलितोरू, ४. अपविद्ध, ५. समनख, ६. लीन, ७. स्वस्तिकरेचित, ८. मंडलस्वस्तिक, ९. निकुट्टक, १०. अर्धनिकुट्ट, ११. कटिच्छिन्न, १२. अर्धरेचित, १३. वक्ष:स्वस्तिक, १४. उन्मत्त, १५. स्वस्तिक, १६. पृष्ठस्वस्तिक, १७. दिक्स्वस्तिक, १८. अलात, १९. कटिसम, २०. आक्षिप्तरेचित, २१. विक्षिप्ताक्षिप्तक, २२. अर्धस्वस्तिक, २३. अंचित, २४. भुजंगत्रासित, २५. ऊर्ध्वजानू, २६. निकुंचित, २७. मत्तल्ली, २८. अधमत्तल्ली, २९. रेचकनिकुट्ट, ३०. पादापविद्धक, ३१. वलित, ३२. घूर्णित, ३३. ललित, ३४. दंडपक्ष, ३५. भुजंगत्रस्तरेचित, ३६. नूपुर, ३७. वैशाखरेचित, ३८. भ्रमर, ३९. चतुर, ४०. भुजंगांचित, ४१. दंडरेचितक, ४२. वृश्चिककुट्टित, ४३. कटिभ्रांत, ४४. लतावृश्चिक, ४५. छिन्न, ४६. वृश्चिकरेचित, ४७. वृश्चिक, ४८. व्यंसित, ४९. पार्श्वनिकुट्टक, ५०. ललाटतिलक, ५१. क्रांत, ५२. कुंचित, ५३. चक्रमंडल, ५४. उरोमंडल, ५५. आक्षिप्त, ५६. तलविलासित, ५७. अर्गल, ५८. विक्षिप्त, ५९. आवृत्त, ६०. दोलापादक, ६१. विवृत्त, ६२. विनिवृत्त, ६३. पार्श्वक्रांत, ६४. निशुंभित, ६५. विद्युद्भ्रांत, ६६. अतिक्रांत, ६७. विवर्तितक, ६८. गजक्रीडितक, ६९. तलसंस्फोटित, ७०. गरूडप्लुतक, ७१. गंडसूची, ७२. परिवृत्त, ७३. पार्श्वजानू, ७४. गृध्रावलीनक, ७५. सन्नत, ७६. सूची, ७७. अर्धसूची, ७८. सूचीविद्ध, ७९. अपक्रांत, ८०. मयूरललित, ८१. सर्पित, ८२. दंडपाद, ८३. हरिणप्लुत, ८४. प्रेंखोलित, ८५. नितंब, ८६. स्खलित, ८७. करिहस्तक, ८८. प्रसर्पितक, ८९. सिंहविक्रीडित, ९०. सिंहाकर्षित, ९१. उद्वृत्त, ९२. उपसृत, ९३. तलसंघट्टित, ९४. जनित, ९५. अवहित्थक, ९६. निवेश, ९७. एलकाक्रीड, ९८. उरूद्वृत्त, ९९.मदस्खलतिक, १००. विष्णुक्रांत, १०१. संभ्रांत, १०२. विष्कंभ, १०३. उद्घट्टित, १०४. वृषभक्रीडित, १०५. लोलित, १०६. नागापसर्पित, १०७. शकटास्य, १०८. गंगावतरण. अशाप्रकारे एकशे आठ करणे मी सांगितली.

### ❖ करणांचा वापर ❖

नृत्ते युद्धे नियुद्धे च तथा गतिपरिक्रमे |
गतिप्रचारे वक्ष्यामि युद्धचारीविकल्पनम् || ५६ ||
यत्र तत्रापि संयोज्यमाचार्यैर्नाट्यशक्तित: |

पदच्छेद: - नृत्ते युद्धे नियुद्धे च तथा गति-परिक्रमे |
गतिप्रचारे वक्ष्यामि युद्धचारी-विकल्पनम् || ५६ ||
यत्र तत्र अपि संयोज्यम् आचार्यै: नाट्यशक्तित: |

अन्वय: - नृत्ते युद्धे नियुद्धे गतिपरिक्रमे तथा च गतिप्रचारे युद्धचारीविकल्पनं वक्ष्यामि | आचार्यै: नाट्यशक्तित: (एतत् करणं) यत्र तत्र अपि संयोज्यम् |

अर्थ - नृत्तामध्ये युद्धामध्ये बाहुयुद्धामध्ये तसेच गतिसंचार करताना युद्धचारींचे जे भेद आहेत त्यांचे वर्णन मी 'गतिप्रचार' नावाच्या अध्यायात करीन. नाट्याचार्यांनी या नाट्यशास्त्रामध्ये सांगितल्याप्रमाणे यथायोग्य ठिकाणी त्यांचा वापर करावा.

प्रायेण करणे कार्यो वामो वक्ष:स्थित: कर: || ५७ ||
चरणस्यानुगश्चापि दक्षिणस्तु भवेत्कर: |

पदच्छेद: - प्रायेण करणे कार्यो वामो वक्ष:स्थित: कर: || ५७ ||
चरणस्य अनुग: च अपि दक्षिण: तु भवेत् कर: |

अन्वय: - प्रायेण करणे वाम: कर: वक्षस्स्थित: कार्य: दक्षिण: च कर: अपि चरणस्य अनुग: भवेत् |

अर्थ - बहुधा करणामध्ये डावा हात छातीवर ठेवावा आणि उजवा हात पायांना अनुसरून करावा.

हस्तपादप्रचारन्तु कटिपार्श्वोरुसंयुतम् || ५८ ||
उर:पृष्ठोदरोपेतं वक्ष्यमाणं निबोधत |

पदच्छेद: - हस्तपादप्रचारं तु कटि-पार्श्व-ऊरुसंयुतम् || ५८ ||
उर:-पृष्ठ-उदर-उपेतं वक्ष्यमाणं निबोधत |

अन्वय : - कटिपार्श्वोरुसंयुतम् उर :पृष्ठोदरोपेतं वक्ष्यमाणं हस्तपादप्रचारं तु निबोधत |

अर्थ - कटी, पार्श्व, ऊरू, छाती, पाठ व उदराशी संबंधित सांगितले जाणारे हात व पायाचे प्रचार जाणून घ्या .

यानि स्थानानि याश्चार्यो नृत्तहस्तास्तथैव च || ५९ ||
सा मातृकेति विज्ञेया तद्योगात्करणं भवेत् |

पदच्छेद : - यानि स्थानानि या : चार्य : नृत्तहस्ता : तथा एव च || ५९ ||
सा मातृका इति विज्ञेया तत्-योगात् करणं भवेत् |

अन्वय : - यानि स्थानानि या : चार्य : तथा एव नृत्तहस्ता : च सा मातृका इति विज्ञेया तद्योगात् करणं भवेत् |

अर्थ - जी स्थाने, ज्या चारी व नृत्तहस्त आहेत त्यांना मातृका (नृत्तमातृका) असे म्हणतात व त्यांच्या एकत्रित हालचालींद्वारे 'करण' होते .

## ❖ सौष्ठव ❖

कटी कर्णसमा यत्र कूर्परांसशिरस्तथा || ६० ||
समुन्नतमुरश्चैव सौष्ठवं नाम तद्भवेत् |

पदच्छेद : - कटी कर्णसमा यत्र कूर्पर-अंस-शिर : तथा || ६० ||
समुन्नतम् उर : च एव सौष्ठवं नाम तत् भवेत् |

अन्वय : - यत्र कटी कर्णसमा कूर्परांसशिर : तथा (एव भवति) उर : च समुन्नतम् एव (भवति) तत् सौष्ठवं नाम (करणं) भवेत् |

अर्थ - कंबर आणि कर्ण समान रेषेत असून कोपर, खांदे व डोके सुद्धा तसेच असते आणि जेव्हा छाती थोडी वर उचलली जाते तेव्हा त्याला 'सौष्ठव' असे म्हणतात .

### १. तलपुष्पपुट

वामे पुष्पपुट : पाश्वै पादोऽग्रतलसञ्चर : || ६१ ||
तथा च सन्नतं पार्श्वं तलपुष्पपुटं भवेत् |

पदच्छेद :- वामे पुष्पपुट : पार्श्वे पाद : अग्रतलसञ्चर : || ६१ ||
तथा च सन्नतं पार्श्वं तलपुष्पपुटं भवेत् |

अन्वय : - वामे पुष्पपुट: पार्श्वे अग्रतलञ्चर: पाद: तथा च पार्श्वं (यदि) सन्नतं (पार्श्वं तत् करणं) तलपुष्पपुटं भवेत् |

अर्थ - डाव्या बाजूस 'पुष्पपुट' हस्त करून बाजूला पाय 'अग्रतल' संचर केल्यास आणि बाजू (पार्श्व) 'सन्नत' केली असता त्या करणाला 'तलपुष्पपुट' करण असे म्हणतात .

## २. वर्तित

कुञ्चितौ मणिबन्धे तु व्यावृत्तपरिवर्तितौ || ६२ ||
हस्तौ निपतितौ चोर्वोर्वर्तितं करणं तु तत् |

पदच्छेद :- कुञ्चितौ मणिबन्धे तु व्यावृत्त-परिवर्तितौ || ६२ ||
हस्तौ निपतितौ च ऊर्वो : वर्तितं करणं तु तत् |

अन्वय : - व्यावृत्तपरिवर्तितौ हस्तौ मणिबन्धे कुञ्चितौ (कृत्वा) ऊर्वो: निपतितौ च तत् तु वर्तितं करणम् |

अर्थ - मनगट कुंचित करून व्यावृत्त आणि परावर्तित हस्त करावे . त्यानंतर ते जंघांवर ठेवावे . त्यास वर्तित करण असे म्हणतात .

## ३. वलितोरुक

शुकतुण्डौ यदा हस्तौ व्यावृत्तपरिवर्तितौ || ६३ ||
ऊरू च वलितौयस्मिन्वलितोरूकमुच्यते |

पदच्छेद :- शुकतुण्डौ यदा हस्तौ व्यावृत्त-परिवर्तितौ || ६३ ||
ऊरू च वलितौ यस्मिन् वलितोरूकम् उच्यते |

अन्वय : - यस्मिन् (करणे) यदा शुकतुण्डौ हस्तौ व्यावृत्तपरिवर्तितौ कृत्वा ऊरू च वलितौ (तत् करणं) वलितोरूकम् (इति) उच्यते |

अर्थ - जर 'शुकतुंड' हस्त 'व्यावृत्त' व 'परिवर्तित' करून त्यानंतर मांड्या वळविल्या तर त्या करणाला 'वलितोरू' करण असे म्हणतात .

### ४. अपविद्ध

आवर्त्य शुकतुण्डाख्यमूरुपृष्ठे निपातयेत् ॥ ६४ ॥
वामहस्तश्च वक्ष:स्थोऽप्यपविद्धं तु तद्भवेत् ।

पदच्छेद: - आवर्त्य शुकतुण्ड-आख्यम् ऊरुपृष्ठे निपातयेत् ॥ ६४ ॥
वामहस्त: च वक्ष:स्थ: अपि अपविद्धं तु तत् भवेत् ।

अन्वय: - शुकतुण्डाख्यं (हस्तम्) आवर्त्य ऊरुपृष्ठे निपातयेत् । वामहस्त: अपि च वक्ष:स्थ: (स्यात्) तत् तु अपविद्धं (करणं) भवेत् ।

अर्थ - शुकतुंड हात वळवून तो उजव्या मांडीवर ठेवावा आणि डावा हात छातीवर ठेवावा तर त्याला 'अपविद्ध' करण म्हणतात .

### ५. समनख

श्लिष्टौ समनखौ पादौ करौ चापि प्रलम्बितौ ॥ ६५ ॥
देह: स्वाभाविको यत्र भवेत्समनखं तु तत् ।

पदच्छेद: - श्लिष्टौ समनखौ पादौ करौ च अपि प्रलम्बितौ ॥ ६५ ॥
देह: स्वाभाविक: यत्र भवेत् समनखं तु तत् ।

अन्वय: - समनखौ पादौ श्लिष्टौ (कृत्वा) करौ च अपि प्रलम्बितौ (अपि च) यत्र देह: स्वाभाविक: भवेत् तत् तु समनखं (करणम् इति उक्तम्) ।

अर्थ - दोन्ही पाय एकत्र आणून पायाचे अंगठे जुळवून दोन्ही हात आपापल्या बाजूला लांब पसरवावेत आणि शरीर स्वाभाविक स्थितीत ठेवावे . त्यास 'समनख' करण असे म्हणतात .

### ६. लीन

पताकाञ्जलि: वक्ष:स्थं प्रसारितशिरोधरम् ॥ ६६ ॥
निहञ्चितांसकूटं च तल्लीनं करणं स्मृतम् ।

पदच्छेद : - पताक-अञ्जलि : वक्ष :स्थं प्रसारित-शिरो-धरम् ‖ ६६ ‖
निहञ्चित-अंस-कूटं च तत् लीनं करणं स्मृतम् |

अन्वय : - पताकाञ्जलि : वक्ष :स्थं प्रसारितशिरोधरं निहञ्चितांसकूटं च तत् लीनं करणं स्मृतम् |

अर्थ - दोन्ही 'पताक' हस्त छातीजवळ आणून 'अंजली' करावी . त्यानंतर मान खाली करून दोन्ही खांदे थोडे (खाली) झुकवावे . त्याला 'लीन' करण असे म्हणतात .

## ७. स्वस्तिकरेचित

स्वस्तिकौ रेचिताविद्धौ विश्लिष्टौ कटिसंश्रितौ ‖ ६७ ‖
यत्र तत्करणं ज्ञेयं बुधै : स्वस्तिकरेचितम् |

पदच्छेद : - स्वस्तिकौ रेचित-आविद्धौ विश्लिष्टौ कटि-संश्रितौ ‖ ६७ ‖
यत्र तत् करणं ज्ञेयं बुधै : स्वस्तिकरेचितम् |

अन्वय : - रेचित-आविद्धौ स्वस्तिकौ (कृत्वा) विश्लिष्टौ कटिसंश्रितौ यत्र (भवति) तत् करणं बुधै : स्वस्तिकरेचितम् इति ज्ञेयम् |

अर्थ - 'रेचित' आणि 'आविद्ध' हस्त एकत्र आणून ते 'स्वस्तिक' करावेत . नंतर त्या हस्तांना वेगवेगळे करून मग कमरेवर ठेवावे . त्या करणाला 'स्वस्तिकरेचित' असे म्हणतात .

## ८. मंडलस्वस्तिक

स्वस्तिकौ तु करौ कृत्वा प्राङ्मुखोर्ध्वतलौ समौ ‖ ६८ ‖
तथा च मण्डलं स्थानं मण्डलस्वस्तिकं तु तत् |

पदच्छेद : - स्वस्तिकौ तु करौ कृत्वा प्राङ्मुख-ऊर्ध्व-तलौ समौ ‖ ६८ ‖
तथा च मण्डलं स्थानं मण्डलस्वस्तिकं तु तत् |

अन्वय : - प्राङ्मुख-ऊर्ध्व-तलौ समौ स्वस्तिकौ करौ कृत्वा तथा च मण्डलं स्थानं (करणीयं), तत् तु मण्डलस्वस्तिकं (करणम् इति उक्तम्)|

अर्थ - चतुरश्र (प्राङ्मुख) आणि ऊर्ध्वमंडलातील (ऊर्ध्वतल) दोन्ही हात समान रूपाने स्वस्तिक करून मंडल स्थान केले असता त्यास 'मंडलस्वस्तिक' करण असे म्हणतात .

## ९. निकुट्टक

निकुट्टितौ यदा हस्तौ स्वबाहुशिरसोऽन्तरे ‖ ६९ ‖
पादौ निकुट्टितौ चैव ज्ञेयं तत्तु निकुट्टकम् |

पदच्छेद :- निकुट्टितौ यदा हस्तौ स्व-बाहु-शिरस : अन्तरे ‖ ६९ ‖
पादौ निकुट्टितौ च एव ज्ञेयं तत् तु निकुट्टकम् |

अन्वय : - यदा स्वबाहुशिरस : अन्तरे निकुट्टितौ हस्तौ (कृत्वा) पादौ च (अपि) निकुट्टितौ एव (स्याताम्), तत् तु निकुट्टकं (करणं) ज्ञेयम् |

अर्थ - स्वत :चे बाहू व डोके यांच्यामध्ये निकुट्टित हस्त करून पाय सुद्धा निकुट्टित करावे . त्याला 'निकुट्टक' करण असे म्हणतात .

## १०. अर्धनिकुट्टक

अञ्चितौ बाहुशिरसि हस्तस्त्वभिमुखाङ्गुलि : ‖ ७० ‖
निकुञ्चितार्धयोगेन भवेदर्धनिकुट्टकम् |

पदच्छेद :- अञ्चितौ बाहु-शिरसि हस्त : तु अभिमुख-अङ्गुलि : ‖ ७० ‖
निकुञ्चित-अर्धयोगेन भवेत् अर्धनिकुट्टकम् |

अन्वय : - अञ्चितौ हस्तौ बाहुशिरसि (कृत्वा) अभिमुखाङ्गुलि : हस्त : तु निकुञ्चितार्धयोगेन अर्ध निकुट्टकं (करणं) भवेत् |

अर्थ - अंचित हस्त खांद्यावर ठेवून हाताची बोटे अभिमुख करावीत . याप्रमाणे निकुंचित हस्ताचा अर्धा प्रयोग झाला तर ते 'अर्धनिकुट्टक' करण होईल .

## ११. कटिच्छिन्न

पर्यायश : कटिश्छिन्ना बाह्वो : शिरसि पल्लवौ ‖ ७१ ‖
पुन :पुनश्च करणं कटिच्छिन्नं तु तद्भवेत् |

पदच्छेद :- पर्यायश : कटि : छिन्ना बाह्वो : शिरसि पल्लवौ ‖ ७१ ‖
पुन : पुन : च करणं कटिच्छिन्नं तु तत् भवेत् |

अन्वय: - छिन्ना कटि: (प्रदर्श्य) बाह्वो: पल्लवौ पर्यायश: शिरसि (नेयौ) पुन:पुन: च (एवं) करणं (यदि भवेत्) तत् तु कटिच्छिन्नं (करणं) भवेत्|

अर्थ - कंबर 'छिन्न' करून दोन्ही हात 'पल्लव' करून एकामागून एक असे डोक्यावर न्यावे आणि ही क्रिया जेव्हा पुन्हा पुन्हा केली जाते तेव्हा ते 'कटिच्छिन्न' करण होईल .

## १२. अर्धरेचित

अपविद्धकर: सूच्या पादश्चैव निकुट्टित: || ७२ ||
सन्नतं यत्र पार्श्वं च तद्भवेदर्धरेचितम् |

पदच्छेद: - अपविद्धकर: सूच्या पाद: च एव निकुट्टित: || ७२ ||
सन्नतं यत्र पार्श्वं च तत् भवेत् अर्धरेचितम् |

अन्वय: - सूच्या अपविद्धकर: पाद: निकुट्टित: च एव (कृत्वा) यत्र पार्श्वं सन्नतं च तत् अर्धरेचितं भवेत् |

अर्थ - सूची हस्त दूर नेऊन पाय 'निकुट्टित' करून पार्श्वभाग 'सन्नत' केला तर ते 'अर्धरेचित' करण होईल .

## १३. वक्ष:स्वस्तिक

स्वस्तिकौ चरणौ यत्र करौ वक्षसि रेचितौ || ७३ ||
निकुञ्चितं तथा वक्षो वक्ष:स्वस्तिकमेव तत् |

पदच्छेद: - स्वस्तिकौ चरणौ यत्र करौ वक्षसि रेचितौ || ७३ ||
निकुञ्चितं तथा वक्ष: वक्ष:स्वस्तिकम् एव तत् |

अन्वय: - यत्र चरणौ स्वस्तिकौ (कृत्वा) वक्षसि रेचितौ करौ (भवत:) तथा वक्ष: निकुञ्चितं (भवति) तत् एव वक्ष:स्वस्तिकम् (करणम् इति उक्तम्) |

अर्थ - दोन्ही पाय 'स्वस्तिक' ठेवून दोन्ही हात छातीजवळ 'रेचित' करावे . नंतर छाती 'निकुंचित' करावी . त्याला 'वक्ष:स्वस्तिक' करण असे म्हणतात .

## १४. उन्मत्त

अञ्चितेन तु पादेन रेचितौ तु करौ यदा ॥ ७४ ॥
उन्मत्तं करणं तत्तु विज्ञेयं नृत्तकोविदैः ।

पदच्छेदः - अञ्चितेन तु पादेन रेचितौ तु करौ यदा ॥ ७४ ॥
उन्मत्तं करणं तत् तु विज्ञेयं नृत्तकोविदैः ।

अन्वयः - यदा अञ्चितेन पादेन (भूत्वा अनन्तरं) रेचितौ करौ (क्रियेते) तत् उन्मत्तं करणं इति नृत्तकोविदैः विज्ञेयम् ।

अर्थ - एक पाय 'अंचित' करून दोन्ही हात 'रेचित' करावे. हीच क्रिया दुसऱ्या पायानेही करावी. नृत्यामधील तज्ज्ञ लोकांनी त्याला 'उन्मत्त' करण म्हटले आहे.

## १५. स्वस्तिक

हस्ताभ्यामथ पादाभ्यां भवतः स्वस्तिकौ यदा ॥ ७५ ॥
तत्स्वस्तिकमिति प्रोक्तं करणं करणार्थिभिः ।

पदच्छेदः - हस्ताभ्याम् अथ पादाभ्यां भवतः स्वस्तिकौ यदा ॥ ७५ ॥
तत् स्वस्तिकम् इति प्रोक्तं करणं करण-अर्थिभिः ।

अन्वयः - अथ यदा हस्ताभ्यां पादाभ्यां स्वस्तिकौ भवतः तत् स्वस्तिकम् इति करणं करणार्थिभिः प्रोक्तम् ।

अर्थ - जेव्हा दोन्ही हातापायांनी 'स्वस्तिक' केला जातो तेव्हा करणांच्या अभ्यासकांनी त्याला 'स्वस्तिक' करण असे म्हटले आहे.

## १६. पृष्ठस्वस्तिक

विक्षिप्ताक्षिप्तबाहुभ्यां स्वस्तिकौ चरणौ यदा ॥ ७६ ॥
अपक्रान्तार्धसूचिभ्यां तत्पृष्ठस्वस्तिकं भवेत् ।

पदच्छेदः - विक्षिप्त-आक्षिप्त-बाहुभ्यां स्वस्तिकौ चरणौ यदा ॥ ७६ ॥
अपक्रान्त-अर्धसूचिभ्यां तत् पृष्ठस्वस्तिकं भवेत् ।

अन्वय: - यदा विक्षिप्ताक्षिप्तबाहुभ्यां अपक्रान्तार्धसूचिभ्यां स्वस्तिकौ चरणौ (भवत:) तत् पृष्ठस्वस्तिकं (करणं) भवेत्।

अर्थ - 'विक्षिप्त' आणि 'आक्षिप्त' हस्त स्वस्तिक करावेत आणि 'अपक्रांत' आणि 'अर्धसूची' चारी करून पाय स्वस्तिक करावेत . तेव्हा ते 'पृष्ठस्वस्तिक' करण होईल .

## १७. दिक्स्वस्तिक

पार्श्वयोरग्रतश्चैव यत्र श्लिष्ट: करो भवेत् ॥ ७७ ॥
स्वस्तिकौ हस्तपादाभ्यां तद्दिक्स्वस्तिकमुच्यते ।

पदच्छेद: - पार्श्वयो: अग्रत: च एव यत्र श्लिष्ट: कर: भवेत् ॥ ७७ ॥
स्वस्तिकौ हस्तपादाभ्यां तत् दिक्स्वस्तिकम् इति उच्यते ।

अन्वय: - यत्र पार्श्वयो: अग्रत: च एव श्लिष्ट: कर: भवेत्। हस्तपादाभ्यां स्वस्तिकौ (कृतौ) तत् दिक्स्वस्तिकं (करणम्) इति उच्यते।

अर्थ - दोन्ही बाजूस आणि समोर हात एकत्र आणावेत आणि दोन्ही हात आणि पाय 'स्वस्तिक' केल्यास त्यास 'दिक्स्वस्तिक' करण असे म्हणतात .

## १८. अलातक

अलातं चरणं कृत्वा व्यंसयेद्दक्षिणं करम् ॥ ७८ ॥
ऊर्ध्वजानुक्रमं कुर्यादलातकमिति स्मृतम् ।

पदच्छेद: - अलातं चरणं कृत्वा व्यंसयेत् दक्षिणं करम् ॥ ७८ ॥
ऊर्ध्वजानुक्रमं कुर्यात् अलातकम् इति स्मृतम्।

अन्वय: - अलातं चरणं कृत्वा दक्षिणं करं व्यंसयेत्। (अनन्तरम्) ऊर्ध्वजानुक्रमं कुर्यात् (तत् करणम्) अलातकम् इति स्मृतम्।

अर्थ - अलात चारी करून उजवा हात खांद्यावरून खाली आणावा . नंतर 'ऊर्ध्वजानु' चारी करावी . त्याला 'अलात' करण असे म्हणतात .

## १९. कटिसम

स्वस्तिकापसृत: पाद: करौ नाभिकटिस्थितौ || ७९ ||
पार्श्वमुद्वहितं चैव करणं तत्कटीसमम् |

पदच्छेद: - स्वस्तिक-अपसृत: पाद: करौ नाभि-कटि-स्थितौ || ७९ ||
पार्श्वम् उद्वहितं च एव करणं तत् कटीसमम् |

अन्वय: - स्वस्तिकापसृत: पाद: करौ नाभिकटिस्थितौ पार्श्वं च उद्वहितम् एव तत् करणं कटीसमम् |

अर्थ - 'स्वस्तिक' करून पाय वेगळे केल्यास व दोन्ही हात नाभी व कमरेवर ठेवून पार्श्वभाग 'उद्वाहित' स्थितीत ठेवल्यास ते करण 'कटिसम' होय .

## २०. आक्षिप्तरेचित

हस्तो हृदि भवेद्वाम: सव्यश्चाक्षिप्तरेचित: || ८० ||
रेचितश्चापविद्धश्च तत्स्यादाक्षिप्तरेचितम् |

पदच्छेद: - हस्त: हृदि भवेत् वाम: सव्य: च आक्षिप्तरेचित: || ८० ||
रेचित: च अपविद्ध: च तत् स्यात् आक्षिप्तरेचितम् |

अन्वय: - वाम: हस्त: हृदि भवेत् सव्य: च आक्षिप्तरेचित: रेचित: अपविद्ध: च तत् (करणं) आक्षिप्तरेचितं स्यात् |

अर्थ - डावा हात हृदयावर आणि उजवा हात 'रेचित' आणि 'आक्षिप्त' करावा . दोन्ही हात 'रेचित' व 'अपविद्ध' मुद्रेत ठेवावे . त्याला 'आक्षिप्तरेचित' म्हणतात .

## २१. विक्षिप्ताक्षिप्तक

विक्षिप्तं हस्तपादं च तस्यैवाक्षेपणं पुन: || ८१ ||
यत्र तत्करणं ज्ञेयं विक्षिप्ताक्षिप्तकं द्विजा: |

पदच्छेद: - विक्षिप्तं हस्तपादं च तस्य एव आक्षेपणं पुन: ॥ ८१ ॥
यत्र तत् करणं ज्ञेयं विक्षिप्ताक्षिप्तकं द्विजा: ।

अन्वय: - यत्र विक्षिप्तं हस्तपादं च तस्य एव पुन: आक्षेपणं (भवति) तत् करणं हे द्विजा: विक्षिप्ताक्षिप्तकम् इति ज्ञेयम् ।

अर्थ - दोन्ही हात व पाय वरच्या दिशेस 'विक्षिप्त' करून नंतर पुन्हा खाली (जमिनीवर) 'आक्षिप्त' केल्यास त्या करणाला हे मुनिजनहो ! 'विक्षिप्ताक्षिप्तक' करण समजावे .

## २२. अर्धस्वस्तिक

स्वस्तिकौ चरणौ कृत्वा करिहस्तं च दक्षिणम् ॥ ८२ ॥
वक्ष:स्थाने तथा वाममर्धस्वस्तिकमादिशेत् ।

पदच्छेद: - स्वस्तिकौ चरणौ कृत्वा करिहस्तं च दक्षिणम् ॥ ८२ ॥
वक्ष:स्थाने तथा वामम् अर्धस्वस्तिकम् आदिशेत् ।

अन्वय: - स्वस्तिकौ चरणौ कृत्वा करिहस्तं च दक्षिणं तथा वामं वक्ष:स्थाने (अस्ति चेत् तत् करणम्) अर्धस्वस्तिकम् (इति) आदिशेत् ।

अर्थ - दोन्ही पायांनी 'स्वस्तिक' करून उजवा हात 'करिहस्तात' ठेवावा . तसेच डावा हात छातीजवळ ठेवला तर त्या करणाला 'अर्धस्वस्तिक' असे म्हणतात .

## २३. अंचित

व्यावृत्तपरिवृत्तस्तु स एव तु करो यदा ॥ ८३ ॥
अञ्चितो नासिकाग्रे तु तदञ्चितमुदाहृतम् ।

पदच्छेद: - व्यावृत्तपरिवृत्त: तु स: एव तु कर: यदा ॥ ८३ ॥
अञ्चित: नासिकाग्रे तु तत् अञ्चितम् उदाहृतम् ।

अन्वय: - यदा स: एव तु कर: व्यावृत्तपरिवृत्त: ( कृत: अनन्तरं) नासिकाग्रे अञ्चित: तत् (करणम्) अञ्चितम् (इति) उदाहृतम् ।

अर्थ - 'अर्धस्वस्तिक' करणामधील करिहस्त क्रमाने व्यावृत्त आणि परिवृत्त केला व नंतर नाकाच्या समोर आणून वाकविला तेव्हा त्या करणाला 'अंचित' करण असे म्हणतात .

## २४. भुजंगत्रासित

कुञ्चितं पादमुत्क्षिप्य त्र्यश्रमूरुं विवर्तयेत् ‖ ८४ ‖
कटिजानुविवर्ताच्च भृजङ्गत्रासितं भवेत् |

पदच्छेद : - कुञ्चितं पादम् उत्क्षिप्य त्र्यश्रम् ऊरुं विवर्तयेत् ‖ ८४ ‖
कटि-जानु-विवर्तात् च भृजङ्गत्रासितं भवेत् |

अन्वय : - कुञ्चितं पादम् उत्क्षिप्य त्र्यश्रम् ऊरूं विवर्तयेत् | कटिजानुविवर्तात् च भृजङ्गत्रासितं भवेत् |

अर्थ - कुंचित पाय वरच्या दिशेस उचलून जंघा तिरकी विवर्तित केल्यास आणि कंबर व गुडघे सुद्धा तसेच विवर्तित केले असता ते 'भुजंगत्रासित' करण होईल .

## २५. ऊर्ध्वजानु

कुञ्चितं पादमुत्क्षिप्य जानुस्तनसमं न्यसेत् ‖ ८५ ‖
प्रयोगवशगौ हस्तावूर्ध्वजानु प्रकीर्तितम् |

पदच्छेद : - कुञ्चितं पादम् उत्क्षिप्य जानु-स्तन-समं न्यसेत् ‖ ८५ ‖
प्रयोग-वशगौ हस्तौ ऊर्ध्वजानु प्रकीर्तितम् |

अन्वय : - कुञ्चितं पादम् उत्क्षिप्य जानुस्तनसमं न्यसेत् | हस्तौ प्रयोगवशगौ (चेत् तत् करणम्) ऊर्ध्वजानु (इति) प्रकीर्तितम् |

अर्थ - 'कुंचित' पाय उचलून गुडघा स्तनांच्या समांतर ठेवला आणि दोन्ही हात नृत्य प्रयोगाला अनुकूल असे ठेवले तर त्या करणाला 'ऊर्ध्वजानु' करण असे म्हणतात .

## २६. निकुंचित

वृश्चिकं चरणं कृत्वा करं पार्श्वे निकुञ्चयेत् ‖ ८६ ‖
नासाग्रे दक्षिणं चैव ज्ञेयं तत्तु निकुञ्चितम् |

पदच्छेद : - वृश्चिकं चरणं कृत्वा करं पार्श्वे निकुञ्चयेत् ॥ ८६ ॥
नासा-अग्रे दक्षिणं च एव ज्ञेयं तत् तु निकुञ्चितम् ।

अन्वय : - वृश्चिकं चरणं कृत्वा करं पार्श्वे निकुञ्चयेत् । दक्षिणं च (हस्तं) नासाग्रे एव तत् (करणं) तु निकुञ्चितम् (इति) ज्ञेयम् ।

अर्थ - 'वृश्चिक' (करणामध्ये) पाय ठेवून डावा हात बाजूला वाकवावा व उजवा हात नाकाच्या समोर आणावा, त्या करणाला 'निकुंचित' करण असे म्हणतात .

## २७. मत्तल्लि

वामदक्षिणपादाभ्यां घूर्णमानोपसर्पणै : ॥ ८७ ॥
उद्वेष्टितापविद्धैश्च हस्तैर्मत्तल्ल्युदाहृतम् ।

पदच्छेद : - वाम-दक्षिण-पादाभ्यां घूर्णमान-उपसर्पणै : ॥ ८७ ॥
उद्वेष्टित-अपविद्धै : च हस्तै : मत्तल्लि उदाहृतम् ।

अन्वय : - वामदक्षिणपादाभ्यां घूर्णमानोपसर्पणै : उद्वेष्टितापविद्धै : च हस्तै : (तत् करणं) मत्तल्लि (इति) उदाहृतम् ।

अर्थ - डावा आणि उजवा पाय गोल फिरवून 'उपसर्पण' केले आणि 'उद्वेष्टित' व 'अपविद्ध' हस्त केले तर त्याला 'मतल्ली' करण म्हणतात .

## २८. अर्धमत्तल्लि

स्खलितापसृतौ पादौ वामहस्तश्च रेचित : ॥ ८८ ॥
सव्यहस्त : कटिस्थ : स्यादर्धमत्तल्लि तत्स्मृतम् ।

पदच्छेद : - स्खलित-अपसृतौ पादौ वामहस्त : च रेचित : ॥ ८८ ॥
सव्यहस्त : कटिस्थ : स्यात् अर्धमत्तल्लि तत् स्मृतम् ।

अन्वय : - स्खलितापसृतौ पादौ वामहस्त : रेचित : सव्यहस्त : कटिस्थ : स्यात् (तत् करणम्) अर्धमत्तल्लि (इति) स्मृतम् ।

अर्थ - पायांना 'स्खलित' करणामध्ये मागे नेले, डावा हात 'रेचित' आणि उजवा हात कमरेवर ठेवला तर त्याला 'अर्धमत्तल्ली' म्हणतात .

## २९. रेचितनिकुट्टित

रेचितो दक्षिणो हस्त: पाद: सव्यो निकुट्टित: ‖ ८९ ‖
दोला चैव भवेद्वामस्तद्रेचितनिकुट्टितम् |

पदच्छेद: - रेचित: दक्षिण: हस्त: पाद: सव्य: निकुट्टित: ‖ ८९ ‖
दोला च एव भवेत् वाम: तत् रेचितनिकुट्टितम् |

अन्वय: - दक्षिण: हस्त: रेचित: सव्य: पाद: निकुट्टित: (करणीय:) | वाम: दोला च एव भवेत् तत् (करणम्) रेचितनिकुट्टितम् (इति स्मृतम्) |

अर्थ - उजवा हात 'रेचित' व उजवा पाय 'निकुट्टित' आणि डावा हात 'दोला' हस्त ठेवला तर त्या करणाला 'रेचित-निकुट्टित' असे म्हणतात .

## ३०. पादापविद्धक

कार्यौ नाभितटे हस्तौ प्राङ्मुखौ खटकामुखौ ‖ ९० ‖
सूचीविद्धावपक्रान्तौ पादौ पादापविद्धके |

पदच्छेद: - कार्यौ नाभितटे हस्तौ प्राङ्मुखौ खटकामुखौ ‖ ९० ‖
सूचीविद्धौ अपक्रान्तौ पादौ पादापविद्धके |

अन्वय: - पादापविद्धके (करणे) हस्तौ प्राङ्मुखौ (कृत्वा) नाभितटे खटकामुखौ कार्यौ | पादौ (च) सूचीविद्धौ अपक्रान्तौ (कार्यौ) |

अर्थ - 'पादापविद्धक' नावाच्या करणामध्ये दोन्ही हात समोरासमोर नाभिजवळ 'खटकामुख' मुद्रेत ठेवावे आणि दोन्ही पाय 'सूचीविद्ध' व 'अपक्रांत' चारीने युक्त करावे .

## ३१. वलित

अपविद्धो भवेद्धस्त: सूचीपादस्तथैव च ‖ ९१ ‖
तथा त्रिकं विवृत्तं च वलितं नाम तद्भवेत् |

पदच्छेद : - अपविद्ध : भवेत् हस्त : सूचीपाद : तथा एव च ‖ ९१ ‖
तथा त्रिकं विवृत्तं च वलितं नाम तत् भवेत्।

अन्वय : - हस्त : अपविद्ध : तथैव सूचीपाद : च भवेत्। तथा त्रिकं विवृत्तं (चेत्) तत् वलितं नाम (करणं) भवेत्।

अर्थ - हात अपविद्ध मुद्रेत व पायाने सूची चारी करून त्रिक (= पाठीसकट अधोभाग) जर विवृत्त केले तर ते 'वलित' नावाचे करण होईल .

## ३२. घूर्णित

वर्तिताघूर्णित : सव्यो हस्तो वामश्च दोलित : ‖ ९२ ‖
स्वस्तिकापसृत : पाद : करणं घूर्णितं तु तत्।

पदच्छेद : - वर्तित-आघूर्णित : सव्य : हस्त : वाम : च दोलित : ‖ ९२ ‖
स्वस्तिकापसृत : पाद : करणं घूर्णितं तु तत्।

अन्वय : - सव्य : हस्त : वर्तिताघूर्णित : वाम : च दोलित : पाद : च स्वस्तिकापसृत : तत् करणं तु घूर्णितम्।

अर्थ - उजवा हात वर्तित करून गोल फिरवावा . डावा हाताने 'दोला' करावे आणि पाय स्वस्तिक करून अपसृत करावे . त्या करणाला 'घूर्णित' म्हणतात .

## ३३. ललित

करिहस्तो भवेद्वामो दक्षिणश्च विवर्तित : ‖ ९३ ‖
बहुश : कुट्टित : पादो ज्ञेयं तल्ललितं बुधै :।

पदच्छेद : - करिहस्त : भवेत् वाम : दक्षिण : च विवर्तित : ‖ ९३ ‖
बहुश : कुट्टित : पाद : ज्ञेयं तत् ललितं बुधै :।

अन्वय : - वाम : करिहस्त : दक्षिण : च विवर्तित : भवेत्। बहुश : पाद : कुट्टित : तत् बुधै : ललितम् (इति) ज्ञेयम्।

अर्थ - डावा हात 'करिहस्त' व उजवा हात 'विवर्तित' हस्त करावा . नंतर वारंवार पाय 'कुट्टित' केल्यास त्याला बुद्धिमानांनी 'ललित' करण असे म्हटले आहे .

### ३४. दंडपक्ष

ऊर्ध्वजानुं विधायाथ तस्योपरि लतां न्यसेत् ॥ ९४ ॥
दण्डपक्षं तु तत्प्रोक्तं करणं नृत्तवेदिभि: ।

पदच्छेद: - ऊर्ध्वजानुं विधाय अथ तस्य उपरि लतां न्यसेत् ॥ ९४ ॥
दण्डपक्षं तु तत् प्रोक्तं करणं नृत्तवेदिभि: ।

अन्वय: - ऊर्ध्वजानुं विधाय अथ तस्य उपरि लतां न्यसेत् । नृत्तवेदिभि: तत् करणं दण्डपक्षम् (इति) प्रोक्तम् ।

अर्थ - 'ऊर्ध्वजानु' चारी करीत गुडघ्यावर लताहस्त ठेवावा . नृत्त जाणणाऱ्यांनी त्याला 'दंडपक्ष' करण असे म्हटले आहे .

### ३५. भुजंगत्रस्तरेचित

भुजङ्गत्रासितं कृत्वा यत्रोभावपि रेचितौ ॥ ९५ ॥
वामपार्श्वस्थितौ हस्तौ भुजङ्गत्रस्तरेचितम् ।

पदच्छेद: - भुजङ्गत्रासितं कृत्वा यत्र उभौ अपि रेचितौ ॥ ९५ ॥
वाम-पार्श्व-स्थितौ हस्तौ भुजङ्गत्रस्तरेचितम् ।

अन्वय: - यत्र भुजङ्गत्रासितं कृत्वा उभौ अपि हस्तौ रेचितौ (कृत्वा) वामपार्श्वस्थितौ (कार्यौ तत् करणं) भुजङ्गत्रस्तरेचितम् ।

अर्थ - भुजंगत्रासित चारी करून दोन्ही हात 'रेचित' करून डाव्या बाजूला ठेवावीत . त्याला 'भुजंगत्रस्तरेचित' करण असे म्हणतात .

### ३६. नूपुर

त्रिकं सुवलितं कृत्वा लतारेचितकौ करौ ॥ ९६ ॥
नुपूरश्च तथा पाद: करणे नूपुरे न्यसेत् ।

पदच्छेद: - त्रिकं सुवलितं कृत्वा लतारेचितकौ करौ ॥ ९६ ॥
नुपूर: च तथा पाद: करणे नूपुरे न्यसेत् |

अन्वय: - त्रिकं सुवलितं कृत्वा लतारेचितकौ करौ तथा पाद: नुपूर: च (एतत् सर्वं) नूपुरे करणे न्यसेत् |

अर्थ - 'त्रिका'ला सुंदर पद्धतीने वळवून लताहस्त व रेचितहस्त करावा आणि पायांनी नूपुरचारी करावी . यास 'नूपुर' करण असे म्हणतात .

### ३७. वैशाखरेचित

रेचितौ हस्तपादौ च कटी ग्रीवा च रेचिता ॥ ९७ ॥
वैशाखस्थानकेनैतद्भवेद्वैशाखरेचितम् |

पदच्छेद: - रेचितौ हस्तपादौ च कटी ग्रीवा च रेचिता ॥ ९७ ॥
वैशाखस्थानकेन एतत् भवेत् वैशाखरेचितम् |

अन्वय: - हस्तपादौ रेचितौ (कृत्वा) कटी ग्रीवा च रेचिता (भवेत्) | वैशाखस्थानकेन एतत् वैशाखरेचितं भवेत् |

अर्थ - हात व पाय 'रेचित' करून कंबर व मान सुद्धा रेचित करावी आणि वैशाखस्थानाचा वापर करावा . त्याला 'वैशाखरेचित' करण असे म्हणतात .

### ३८. भ्रमरक

आक्षिप्त: स्वस्तिक: पाद: करौ चोद्वेष्टितौ तथा ॥ ९८ ॥
त्रिकस्य वलनाच्चैव ज्ञेयं भ्रमरकं तु तत् |

पदच्छेद: - आक्षिप्त: स्वस्तिक: पाद: करौ च उद्वेष्टितौ तथा ॥ ९८ ॥
त्रिकस्य वलनात् च एव ज्ञेयं भ्रमरकं तु तत् |

अन्वय: - आक्षिप्त: पाद: स्वस्तिक:, करौ च उद्वेष्टितौ तथा त्रिकस्य वलनात् च एव तत् तु भ्रमरकं ज्ञेयम् |

अर्थ - पायाने आक्षिप्त चारी करून स्वस्तिक करावे. हात उद्वेष्टित करावे व 'त्रिक' वळवावे. त्याला 'भ्रमरक' करण असे म्हणतात.

### ३९. चतुर

अञ्चित: स्यात्करो वाम: सव्यश्चतुर एव तु ॥ ९९ ॥
दक्षिण: कुट्टित: पादश्चतुरं तत्प्रकीर्तितम् ।

पदच्छेद: - अञ्चित: स्यात् कर: वाम: सव्य: चतुर: एव तु ॥ ९९ ॥
दक्षिण: कुट्टित: पाद: चतुरं तत् प्रकीर्तितम् ।

अन्वय: - वाम: कर: अञ्चित: सव्य: चतुर: एव तु स्यात् । दक्षिण: पाद: कुट्टित: तत् चतुरम् इति प्रकीर्तितम् ।

अर्थ - डावा हात 'अंचित' करावा व उजवा हात 'चतुर' ठेवावा आणि तसेच उजवा पाय 'कुट्टित' करावा. त्यास 'चतुर' करण असे म्हणतात.

### ४०. भुजंगांचितक

भुजत्रासित: पादो दक्षिणो रेचित: कर: ॥ १०० ॥
लताख्यश्च करो वामो भुजङ्गाञ्चितकं भवेत् ।

पदच्छेद: - भुजङ्गत्रासित: पाद: दक्षिण: रेचित: कर: ॥ १०० ॥
लता-आख्य: च कर: वाम: भुजङ्गाञ्चितकं भवेत् ।

अन्वय: - पाद: भुजङ्गत्रासित:, दक्षिण: कर: रेचित:, वाम: कर: लताख्य: च तत् भुजङ्गाञ्चितकं भवेत् ।

अर्थ - पायाने 'भुजंगत्रासित' चारी करून उजव्या हाताने 'रेचित' हस्त करावा व डाव्या हाताने 'लताहस्त' करावा. असे केल्यास ते 'भुजंगांचितक' करण होईल.

### ४१. दंडकरेचित

विक्षिप्तं हस्तपादं तु समन्ताद्यत्र दण्डवत् ॥ १०१ ॥
रेच्यते तद्धि करणं ज्ञेयं दण्डकरेचितम् ।

पदच्छेद: - विक्षिप्तं हस्तपादं तु समन्तात् यत्र दण्डवत् ॥ १०१ ॥
रेच्यते तत् हि करणं ज्ञेयं दण्डकरेचितम् ।

अन्वय: - यत्र हस्तपादं तु समन्तात् दण्डवत् विक्षिप्तं रेच्यते तत् हि करणं दण्डकरेचितम् इति ज्ञेयम् ।

अर्थ - हात व पाय दंडाप्रमाणे सर्व दिशांना विक्षिप्त करून रेचित करावे. त्या करणाला 'दंडकरेचित' असे म्हणतात.

## ४२. वृश्चिककुट्टित

वृश्चिकं चरणं कृत्वा द्वावप्यथ निकुट्टितौ ॥ १०२ ॥
विधातव्यौ करौ तत्तु ज्ञेयं वृश्चिककुट्टितम् ।

पदच्छेद: - वृश्चिकं चरणं कृत्वा द्वौ अपि अथ निकुट्टितौ ॥ १०२ ॥
विधातव्यौ करौ तत् तु ज्ञेयं वृश्चिककुट्टितम् ।

अन्वय: - वृश्चिकं चरणं कृत्वा द्वौ अपि अथ निकुट्टितौ करौ विधातव्यौ तत्तु वृश्चिककुट्टितम् (इति) ज्ञेयम् ।

अर्थ - एका पायाने वृश्चिक पाद करावा. दोन्ही हात निकुट्टित करावेत. त्या करणाला 'वृश्चिककुट्टित' म्हणतात.

## ४३. कटिभ्रांत

सूचीं कृत्वापविद्धं च दक्षिणं चरणं न्यसेत् ॥ १०३ ॥
रेचिता च कटिर्यत्र कटिभ्रान्तं तदुच्यते ।

पदच्छेद: - सूचीं कृत्वा अपविद्धं च दक्षिणं चरणं न्यसेत् ॥ १०३ ॥
रेचिता च कटि: यत्र कटिभ्रान्तं तत् उच्यते ।

अन्वय: - यत्र सूचीं कृत्वा दक्षिणं चरणं अपविद्धं च न्यसेत् कटि: रेचिता च तत् कटिभ्रान्तम् (इति)उच्यते ।

अर्थ - पायाने सूची चारी करून उजवा हात 'अपविद्ध' केला व कंबर 'रेचित' केल्यास त्याला 'कटिभ्रांत' करण असे म्हणतात .

### ४४. लतावृश्चिक

अञ्चित: पृष्ठत: पाद: कुञ्चितोर्ध्वतलाङ्गुलि: || १०४ ||
लताख्यश्च करो वामस्तल्लतावृश्चिकं भवेत् |

पदच्छेद: - अञ्चित: पृष्ठत: पाद: कुञ्चित-ऊर्ध्वतल-अङ्गुलि: || १०४ ||
लता-आख्य: च कर: वाम: तत् लतावृश्चिकं भवेत् |

अन्वय: - पाद: पृष्ठत: अञ्चित:, कुञ्चितोर्ध्वतलाङ्गुलि: वाम: कर: च लताख्य: तत् लतावृश्चिकं (करणं) भवेत् |

अर्थ - पाय मागच्या बाजूला वाकवून नेऊन तळवा व बोटे वरच्या बाजूस आकुंचित करावी आणि डाव्या हाताने लताहस्त करावा . त्याला 'लतावृश्चिक' करण असे म्हणतात .

### ४५. छिन्न

अलपद्म: कटीदेशे छिन्ना पर्यायश: कटी || १०५ ||
वैशाखस्थानकेनेह तच्छिन्नं करणं भवेत् |

पदच्छेद: - अलपद्म: कटीदेशे छिन्ना पर्यायश: कटी || १०५ ||
वैशाखस्थानकेन इह तत् छिन्नं करणं भवेत् |

अन्वय: - अलपद्म: कटीदेशे, पर्यायश: कटी छिन्ना, वैशाखस्थानकेन इह (स्थितं चेत्) तत् छिन्नं करणं भवेत् |

अर्थ - अलपद्महस्त कंबरेवर ठेवला व कंबर 'छिन्न' करून वैशाखस्थानात उभे राहिल्यास त्याला 'छिन्न' करण असे म्हणतात .

### ४६. वृश्चिकरेचित

वृश्चिकं चरणं कृत्वा स्वस्तिकौ च करावुभौ || १०६ ||
रेचितौ विप्रकीर्णौ च करौ वृश्चिकरेचितम् |

पदच्छेद: - वृश्चिकं चरणं कृत्वा स्वस्तिकौ च करौ उभौ || १०६ ||
रेचितौ विप्रकीर्णौ च करौ वृश्चिकरेचितम्|

अन्वय: - वृश्चिकं चरणं (कृत्वा), उभौ करौ स्वस्तिकौ च कृत्वा रेचितौ विप्रकीर्णौ च करौ (करणीयौ तत्) वृश्चिकरेचितं (करणं भवेत्) |

अर्थ - वृश्चिक चरण करून दोन्ही हातांनी स्वस्तिक करून त्याच हातांनी क्रमाने रेचित व विप्रकीर्ण हस्त केल्यास त्याला 'वृश्चिकरेचित' करण असे म्हणतात .

## ४७. वृश्चिक

बाहुशीर्षाञ्चितौ हस्तौ पाद: पृष्ठाञ्चितस्तथा || १०७ ||
दूरसन्नतपृष्ठं च वृश्चिकं तत्प्रकीर्तितम् |

पदच्छेद: - बाहुशीर्ष-अञ्चितौ हस्तौ पाद: पृष्ठ-अञ्चित: तथा || १०७ ||
दूर-सन्नत-पृष्ठं च वृश्चिकं तत् प्रकीर्तितम्|

अन्वय: - बाहुशीर्षाञ्चितौ हस्तौ तथा पृष्ठाञ्चित: पाद: दूरसन्नतपृष्ठं च तत् (करणं) वृश्चिकं (इति) प्रकीर्तितम्|

अर्थ - दोन्ही हात खांद्यावर अंचित करून पाय मागे अंचित करावा आणि पाठ अधिक झुकवावी . अशा करणास 'वृश्चिक' करण असे म्हणतात .

## ४८. व्यंसित

आलीढं स्थानकं यत्र करौ वक्षसि रेचितौ || १०८ ||
ऊर्ध्वाधोविप्रकीर्णौ च व्यंसितं करणं तु तत् |

पदच्छेद: - आलीढं स्थानकं यत्र करौ वक्षसि रेचितौ || १०८ ||
ऊर्ध्व-अध:-विप्रकीर्णौ च व्यंसितं करणं तु तत्|

अन्वय: - आलीढं स्थानकं यत्र करौ वक्षसि रेचितौ (कृत्वा) ऊर्ध्व-अध:-विप्रकीर्णौ च तत्तु व्यंसितं करणं (भवेत्) |

अर्थ - आलीढ स्थान करून दोन्ही हात छातीजवळ रेचित करून त्यांना वरच्या आणि खालच्या दिशेस 'विप्रकीर्ण' केले असता त्याला 'व्यंसित' करण म्हणतात .

## ४९. पार्श्वनिकुट्टित

हस्तौ तु स्वस्तिकौ पार्श्वे तथा पादो निकुट्टित: ॥ १०९ ॥
यत्र तत्करणं ज्ञेयं बुधै: पार्श्वनिकुट्टितम् ।

पदच्छेद: - हस्तौ तु स्वस्तिकौ पार्श्वे तथा पाद: निकुट्टित: ॥ १०९ ॥
यत्र तत् करणं ज्ञेयं बुधै: पार्श्वनिकुट्टितम् ।

अन्वय: - यत्र स्वस्तिकौ हस्तौ तु पार्श्वे तथा निकुट्टित: पाद: तत् करणं बुधै: पार्श्वनिकुट्टितम् (इति) ज्ञेयम् ।

अर्थ - दोन्ही स्वस्तिक हात बाजूला ठेवून निकुट्टित पाय केल्यास ज्ञानीजनांनी त्याला 'पार्श्वकुट्टित' करण असे म्हटले आहे .

## ५०. ललाटतिलक

वृश्चिकं चरणं कृत्वा पादस्याङ्गुष्ठकेन तु ॥ ११० ॥
ललाटे तिलकं कुर्याल्ललाटतिलकं तु तत् ।

पदच्छेद: - वृश्चिकं चरणं कृत्वा पादस्य अङ्गुष्ठकेन तु ॥ ११० ॥
ललाटे तिलकं कुर्यात् ललाटतिलकं तु तत् ।

अन्वय: - वृश्चिकं चरणं कृत्वा पादस्य अङ्गुष्ठकेन तु ललाटे तिलकं कुर्यात् तत् तु ललाटतिलकं (इति) ज्ञेयम् ।

अर्थ - एका पायाने वृश्चिक चरण करून त्याच पायाच्या अंगठ्याने कपाळावर टिळा लावण्यासारखा भाव दाखविल्यास त्याला 'ललाटतिलक' करण असे म्हणतात .

## ५१. क्रांतक

पृष्ठत: कुञ्चितं कृत्वा व्यतिक्रान्तक्रमं तत: ॥ १११ ॥
आक्षिप्तौ च करौ कार्यौ क्रान्तके करणे द्विजा: ।

पदच्छेद: - पृष्ठत: कुञ्चितं कृत्वा व्यतिक्रान्त-क्रमं तत: ॥ १११ ॥
आक्षिप्तौ च करौ कार्यौ क्रान्तके करणे द्विजा: ।

अन्वय: - द्विजा:, क्रान्तके करणे पृष्ठत: कुञ्चितं कृत्वा व्यतिक्रान्तक्रमं तत: करौ आक्षिप्तौ च कार्यौ ।

अर्थ - हे मुनिजनहो ! 'क्रांतक' करणामध्ये एक पाय मागच्या बाजूने कुंचित करून अतिक्रांता चारी करावी आणि दोन्ही हात 'आक्षिप्त' करावे .

## ५२. कुंचित

आद्य: पादो नत: कार्य: सव्यहस्तश्च कुञ्चित: ॥ ११२ ॥
उत्तानो वामपार्श्वस्थस्तत्कुञ्चितमुदाहृतम् ।

पदच्छेद: - आद्य: पाद: नत: कार्य: सव्यहस्त: च कुञ्चित: ॥ ११२ ॥
उत्तान: वाम-पार्श्वस्थ: तत् कुञ्चितम् उदाहृतम् ।

अन्वय: - आद्य: पाद: नत: कार्य: सव्यहस्त: च कुञ्चित: । उत्तान: वामपार्श्वस्थ: तत् (करणं) कुञ्चितम् (इति) उदाहृतम् ।

अर्थ - उजवा पाय 'नत' करून डावा हात 'कुंचित' करावा आणि तो डाव्या पार्श्वभागावर 'उत्तान' (तळवा वरच्या दिशेला अशा) स्थितीत ठेवावा . त्या करणाला 'कुंचित' करण असे म्हणतात .

## ५३. चक्रमंडल

प्रलम्बिताभ्यां बाहुभ्यां यद्गात्रेणानतेन च ॥ ११३ ॥
अभ्यन्तरापविद्ध: स्यात्तज्ज्ञेय चक्रमण्डलम् ।

पदच्छेद: - प्रलम्बिताभ्यां बाहुभ्यां यत् गात्रेण आनतेन च ।११३ ॥
अभ्यन्तर-अपविद्ध: स्यात् तत् ज्ञेयं चक्रमण्डलम् ।

अन्वय: - यत् प्रलम्बिताभ्यां बाहुभ्यां गात्रेण आनतेन च अभ्यन्तरापविद्ध: स्यात् तत् चक्रमण्डलं (करणमिति) ज्ञेयम् ।

अर्थ - दोन्ही हात 'प्रलंबित' (झुलत) ठेवावे आणि शरीर झुकवून 'अपविद्ध' - अड्डिता चारी करावी यास 'चक्रमंडल' करण असे म्हणतात .

### ५४. उरोमंडल

स्वस्तिकापसृतौ पादावपविद्धक्रमौ यदा ॥ ११४ ॥
उरोमण्डलकौ हस्तावुरोमण्डलिकन्तु तत् ।

पदच्छेद: - स्वस्तिक-अपसृतौ पादौ अपविद्ध-क्रमौ यदा ॥ ११४ ॥
उरोमण्डलकौ हस्तौ उरोमण्डलिकं तु तत् ।

अन्वय: - यदा पादौ स्वस्तिकापसृतौ अपविद्धक्रमौ हस्तौ च उरोमण्डलकौ (कृतौ) तत् तु उरोमण्डलिकं (करणं ज्ञेयम्) ।

अर्थ - स्वस्तिक चरण वेगळे करून अपविद्ध चारी करावी आणि दोन्ही हातांनी 'उरोमंडल' करावे . त्यास 'उरोमंडल' करण असे म्हणतात .

### ५५. आक्षिप्त

आक्षिप्तं हस्तपादं च क्रियते यत्र वेगत: ॥ ११५ ॥
आक्षिप्तं नाम करणं विज्ञेयं तत् द्विजोत्तमा: ।

पदच्छेद: - आक्षिप्तं हस्तपादं च क्रियते यत्र वेगत: ॥ ११५ ॥
आक्षिप्तं नाम करणं विज्ञेयं तत् द्विज-उत्तमा: ।

अन्वय: - (हे) द्विजोत्तमा:, यत्र हस्तपादं वेगत: आक्षिप्तं क्रियते तत् आक्षिप्तं नाम करणं (युष्माभि:) विज्ञेयम् ।

अर्थ - हे श्रेष्ठ मुनींनो ! ज्या करणामध्ये हात आणि पाय वेगाने आक्षिप्त करतात . त्याला 'आक्षिप्त' करण असे म्हणतात .

### ५६. तलविलसित

ऊर्ध्वाङ्गुलितल: पाद: पार्श्वेनोर्ध्वं प्रसारित: ॥ ११६ ॥
प्रकुर्यादञ्चिततलौ हस्तौ तलविलसिते ।

पदच्छेद: - ऊर्ध्व-अङ्गुलितल: पाद: पार्श्वेन ऊर्ध्व प्रसारित: ॥ ११६ ॥
प्रकुर्यात् अञ्चित-तलौ हस्तौ तलविलसिते ।

अन्वय: - तलविलसिते (करणे) ऊर्ध्वाङ्गुलितल: पाद: पार्श्वेन ऊर्ध्वं प्रसारित: (भवेत्) अञ्चिततलौ च हस्तौ प्रकुर्यात् ।

अर्थ - 'तलविलसित' करणामध्ये पायाचा तळवा व बोटे वर करून बाजूला वरच्या बाजूस पसरवावे आणि हाताचे तळवे अंचित करावे .

## ५७. अर्गल

पृष्ठत: पसृत: पादो द्वौ तालावर्धमेव च ॥ ११७ ॥
तस्यैव चानुगो हस्त: पुरतस्त्वर्गलं तु तत् ।

पदच्छेद: - पृष्ठत: प्रसृत: पाद: द्वौ तालौ अर्धम् एव च ॥ ११७ ॥
तस्य एव च अनुग: हस्त: पुरत: तु अर्गलं तु तत् ।

अन्वय: - पाद: पृष्ठत: प्रसृत: द्वौ तालौ अर्धम् एव च (अन्तरं भवेत्) तस्य एव च अनुग: हस्त: तु पुरत: (स्यात्) तत् (करणं) तु अर्गलम् (इति ज्ञेयम्) ।

अर्थ - पाय मागच्या दिशेस अडीच (**2 . 5**) ताल अम्तरावर पसरवावा आणि पायाला अनुसरून त्याप्रमाणे हात समोरच्या बाजूला पसरवावा . त्या करणाला 'अर्गल' असे म्हणतात .

## ५८. विक्षिप्त

विक्षिप्तं हस्तपादं च पृष्ठत: पार्श्वतोऽपि वा ॥ ११८ ॥
एकमार्गगतं यत्र तद्विक्षिप्तमुदाहृतम् ।

पदच्छेद: - विक्षिप्तं हस्तपादं च पृष्ठत: पार्श्वत: अपि वा ॥ ११८ ॥
एकमार्ग-गतं यत्र तत् विक्षिप्तम् उदाहृतम् ।

अन्वय: - यत्र विक्षिप्तं हस्तपादं च पृष्ठत: वा पार्श्वत: अपि एकमार्गगतं (भवति) तत् (करणं) विक्षिप्तम् (इति) उदाहृतम् ।

अर्थ - दोन्ही हात व पाय मागे किंवा बाजूला एकाच दिशेने जाणारे असतील आणि एकमेकांना अनुसरणारे असतील तर त्याला 'विक्षिप्त' करण असे म्हणतात .

### ५९. आवर्त

प्रसार्य कुञ्चितं पादं पुनरावर्तयेत् द्रुतम् ॥ ११९ ॥
प्रयोगवशगौ हस्तौ तदावर्तमुदाहृतम् ।

पदच्छेद: - प्रसार्य कुञ्चितं पादं पुन: आवर्तयेत् द्रुतम् ॥ ११९ ॥
प्रयोगवशगौ हस्तौ तत् आवर्तम् उदाहृतम् ।

अन्वय: - कुञ्चितं पादं प्रसार्य पुन: द्रुतम् आवर्तयेत् । प्रयोगवशगौ हस्तौ (चेत्) तत् (करणं) आवर्तम् (इति) उदाहृतम् ।

अर्थ - कुंचित पाय पसरवून पुन्हा लगेचच आवर्तित करावा व त्यानुसार दोन्ही हाताचे प्रयोग केले असता त्याला 'आवर्त' करण असे म्हणतात .

### ६०. डोलापाद

कुञ्चितं पादमुत्क्षिप्य पार्श्वात्पार्श्वं तु डोलयेत् ॥ १२० ॥
प्रयोगवशगौ हस्तौ डोलापादं तदुच्यते ।

पदच्छेद: - कुञ्चितं पादम् उत्क्षिप्य पार्श्वात् पार्श्वं तु डोलयेत् ॥ १२० ॥
प्रयोग-वशगौ हस्तौ डोलापादं तत् उच्यते ।

अन्वय: - कुञ्चितं पादम् उत्क्षिप्य पार्श्वात् पार्श्वं तु डोलयेत् । प्रयोगवशगौ हस्तौ (चेत्) तत् (करणं) डोलापादम् (इति) उच्यते ।

अर्थ - कुंचित पाद उचलून एका बाजूवरून दुसऱ्या बाजूला डोलविला व त्याला अनुसरून दोन्ही हाताच्या क्रिया केल्या तर त्या करणाला 'डोलापाद' असे म्हणतात .

### ६१. विवृत्त

आक्षिप्तं हस्तपादं च त्रिकं चैव विवर्तयेत् ॥ १२१ ॥
रेचितौ च तथा हस्तौ विवृत्ते करणे द्विजा: ।

पदच्छेद: - आक्षिप्तं हस्तपादं च त्रिकं च एव विवर्तयेत् ‖ १२१ ‖
रेचितौ च तथा हस्तौ विवृत्ते करणे द्विजा:।

अन्वय: - द्विजा:, विवृत्ते करणे आक्षिप्तं हस्तपादं च त्रिकं च एव विवर्तयेत्। तथा च रेचितौ हस्तौ (करणीयौ)।

अर्थ - हे श्रेष्ठ ब्राह्मणांनो ! विवृत्त' करणामध्ये दोन्ही हात व पाय 'आक्षिप्त' करावेत आणि त्रिक गोलाकार फिरवित दोन्ही हातांनी 'रेचित' करावे.

## ६२. विनिवृत्त

सूचीविद्धं विधायाथ त्रिकं तु विनिवर्तयेत् ‖ १२२ ‖
करौ च रेचितौ कार्यौ विनिवृत्ते द्विजोत्तमा:।

पदच्छेद: - सूचीविद्धं विधाय अथ त्रिकं तु विनिवर्तयेत् ‖ १२२ ‖
करौ च रेचितौ कार्यौ विनिवृत्ते द्विजोत्तमा:।

अन्वय: - द्विजोत्तमा:, विनिवृत्ते (करणे) सूचीविद्धं विधाय अथ त्रिकं तु विनिवर्तयेत् करौ च रेचितौ कार्यौ।

अर्थ - हे श्रेष्ठमुनींनो! 'विनिवृत्त' करणामध्ये सूचीविद्ध चारी करावी. त्रिक गोलाकार फिरवावे आणि दोन्ही हात 'रेचित' करावे.

## ६३. पार्श्वक्रांत

पार्श्वक्रान्तक्रमं कृत्वा पुरस्तादथ पातयेत् ‖ १२३ ‖
प्रयोगवशगौ हस्तौ पार्श्वक्रान्तं तदुच्यते।

पदच्छेद: - पार्श्वक्रान्तक्रमं कृत्वा पुरस्तात् अथ पातयेत् ‖ १२३ ‖
प्रयोगवशगौ हस्तौ पार्श्वक्रान्तं तत् उच्यते।

अन्वय: - पार्श्वक्रान्तक्रमं कृत्वा पुरस्तात् अथ पातयेत्। प्रयोगवशगौ हस्तौ (चेत्) तत् (करणं) पार्श्वक्रान्तम् (इति) उच्यते।

अर्थ - 'पार्श्वक्रांत' चारी करून पाय समोरच्या दिशेस ठेवावा व त्यांना अनुसरून हातांची क्रिया करावी. त्याला 'पार्श्वक्रांत' करण असे म्हणतात.

## ६४. निस्तंभित

पृष्ठत: कुञ्चित: पादो वक्षश्चैव समुन्नतम् ‖ १२४ ‖
तिलके च कर: स्थाप्यस्तन्निस्तम्भितमुच्यते |

पदच्छेद: - पृष्ठत: कुञ्चित: पाद: वक्ष: च एव समुन्नतम् ‖ १२४ ‖
तिलके च कर: स्थाप्य: तत् निस्तम्भितम् उच्यते |

अन्वय: - पाद: पृष्ठत: कुञ्चित: वक्ष: च समुन्नतं (कृत्वा) तिलके च कर: स्थाप्य: तत् (करणं) निस्तम्भितम् (इति) उच्यते |

अर्थ - एक पाय पाठीमागे कुंचित करून छाती थोडी वर उचलून (जणु) तिलक लावल्याप्रमाणे हात कपाळावर आणावे. त्या करणाला 'निस्तंभित' करण असे म्हणतात.

## ६५. विद्युद्भ्रांत

पृष्ठतो वलितं पादं शिरोघृष्टं प्रसारयेत् ‖ १२५ ‖
सर्वतो मण्डलाविद्धं विद्युद्भ्रान्तं तदुच्यते |

पदच्छेद: - पृष्ठत: वलितं पादं शिरोघृष्टं प्रसारयेत् ‖ १२५ ‖
सर्वत: मण्डल-आविद्धं विद्युद्भ्रान्तं तत् उच्यते |

अन्वय: - पादं पृष्ठत: (ऊरुमूलदेशात्) वलितं (कृत्वा) शिरोघृष्टं प्रसारयेत् ‖ १२५ ‖
सर्वत: मण्डलाविद्धं तत् (करणं) विद्युद्भ्रान्तम् (इति) उच्यते |

अर्थ - एक पाय पाठीमागून गोलाकार वळवून डोक्याला स्पर्श करून पुढे जावे आणि चारही बाजूंनी मंडल आणि आविद्ध हस्त करावेत. त्या करणाला 'विद्युद्भ्रांत' करण असे म्हणतात.

## ६६. अतिक्रांत

अतिक्रान्तक्रमं कृत्वा पुरस्तात्संप्रसारयेत् ‖ १२६ ‖
प्रयोगवशगौ हस्तावतिक्रान्ते प्रकीर्तितौ |

पदच्छेद : - अतिक्रान्तक्रमं कृत्वा पुरस्तात् संप्रसारयेत् ॥ १२६ ॥
प्रयोगवशगौ हस्तौ अतिक्रान्ते प्रकीर्तितौ ।

अन्वय : - अतिक्रान्तक्रमं कृत्वा पुरस्तात् संप्रसारयेत् । प्रयोगवशगौ हस्तौ अतिक्रान्ते प्रकीर्तितौ ।

अर्थ - अतिक्रांत' या करणात, अतिक्रांत चारी केल्यानंतर एक पाय पुढच्या दिशेस पसरविला जातो व प्रयोगानुसार हस्तसंचार केला जातो .

## ६७. विवर्तितक

आक्षिप्तं हस्तपादं च त्रिकं चैव विवर्तितम् ॥ १२७ ॥
द्वितीयो रेचितो हस्तो विवर्तितकमेव तत् ।

पदच्छेद : - आक्षिप्तं हस्तपादं च त्रिकं च एव विवर्तितम् ॥ १२७ ॥
द्वितीय : रेचित : हस्त : विवर्तितकम् एव तत् ।

अन्वय : - आक्षिप्तं हस्तपादं (कृत्वा) त्रिकं च एव विवर्तितम् (भवेत्) ॥ १२७ ॥
द्वितीय : हस्त : रेचित : (कार्य :) । तत् एव विवर्तितकं (करणम् अस्ति) ।

अर्थ - हात व पाय 'आक्षिप्त' करून त्रिक गोल फिरवावे आणि दुसरा हात रेचित करावा . तेच 'विवर्तितक' करण होय .

## ६८. गजक्रीडितक

कर्णेऽञ्चित: करो वामो लताहस्तश्च दक्षिण: ॥ १२८ ॥
दोलापादस्तथा चैव गजक्रीडितकं भवेत् ।

पदच्छेद : - कर्णे अञ्चित : कर : वाम : लताहस्त : च दक्षिण : ॥ १२८ ॥
दोलापाद : तथा च एव गजक्रीडितकं भवेत् ।

अन्वय : - कर्णे वाम : कर : अञ्चित : दक्षिण : च लताहस्त : (कार्य :) । तथा च एव दोलापाद : (चेत् तत् करणं) गजक्रीडितकं भवेत् ।

अर्थ - डावा हात कानाजवळ 'अंचित' करावा आणि उजवा हाताने 'लताहस्त' करावा आणि तसेच पायाने 'दोलापाद' चारी करावी . असे केल्यास ते करण 'गजक्रीडितक' होईल .

## ६९. तलसंस्फोटित

द्रुतमुत्क्षिप्य चरणं पुरस्तादथ पातयेत् ‖ १२९ ‖
तलसंस्फोटितौ हस्तौ तलसंस्फोटिते मतौ |

पदच्छेद : - द्रुतम् उत्क्षिप्य चरणं पुरस्तात् अथ पातयेत् ‖ १२९ ‖
तलसंस्फोटितौ हस्तौ तलसंस्फोटिते मतौ |

अन्वय : - चरणं द्रुतम् उत्क्षिप्य पुरस्तात् अथ पातयेत् | तलसंस्फोटितौ हस्तौ (चेत्) तलसंस्फोटिते मतौ |

अर्थ - एक पाय जलदगतीने वर उचलून पुढच्या दिशेस खाली आणावा व दोन्ही हात 'तलसंस्फोटित' करावे . त्याला 'तलसंस्फोटित' करण म्हटले जाते .

## ७०. गरुडप्लुत

पृष्ठप्रसारित: पाद: लतारेचितकौ करौ ‖ १३० ‖
समुन्नतं शिरश्चैव गरुडप्लुतकं भवेत् |

पदच्छेद : - पृष्ठ-प्रसारित : पाद : लता-रेचितकौ करौ ‖ १३० ‖
समुन्नतं शिर : च एव गरुडप्लुतकं भवेत् |

अन्वय : - पृष्ठप्रसारित : पाद : लतारेचितकौ करौ समुन्नतं शिर : च एव तत् गरुडप्लुतकं (करणं) भवेत् |

अर्थ - मागच्या बाजूला पाय पसरवावा व दोन्ही हातांनी लता व रेचित हस्त करून डोके थोडे वर उचलावे . असे केल्यास ते 'गरुडप्लुतक' करण होईल .

## ७१. गंडसूची

सूचीपादो नतं पार्श्वमेको वक्ष:स्थित: कर: ‖ १३१ ‖
द्वितीयश्चाञ्चितो गण्डे गण्डसूची तदुच्यते |

पदच्छेद : - सूचीपाद : नतं पार्श्वम् एक : वक्ष :-स्थित : कर : ‖ १३१ ‖
द्वितीय : च अञ्चित : गण्डे गण्डसूची तत् उच्यते |

अन्वय: - सूचीपाद:, पार्श्वं नतम्, एक: कर: वक्ष:स्थित: द्वितीय: च गण्डे अञ्चित: तत् (करणं) गण्डसूची (इति)उच्यते |

अर्थ - पायाने सूची करून पार्श्व झुकवावे . एक हात छातीवर ठेवून दुसरा हात गालाजवळ अंचित ठेवावा . त्याला 'गंडसूची' करण असे म्हणतात .

### ७२. परिवृत्त

ऊर्ध्वापवेष्टितौ हस्तौ सूचीपादो विवर्तित: || १३२ ||
परिवृत्तत्रिकं चैव परिवृत्तं तदुच्यते |

पदच्छेद: - ऊर्ध्व-अपवेष्टितौ हस्तौ सूचीपाद: विवर्तित: || १३२ ||
परिवृत्त-त्रिकं च एव परिवृत्तं तत् उच्यते |

अन्वय: - हस्तौ ऊर्ध्वापवेष्टितौ सूचीपाद: विवर्तित: परिवृत्तत्रिकं च एव तत् (करणं) परिवृत्तम् (इति)उच्यते |

अर्थ - दोन्ही हातांनी ऊर्ध्वमंडली आणि अपवेष्टित हस्त करावा . पायाने सूची चारी करून विवर्तित करावे . त्रिकदेखील परिवृत्त करावे . यास 'परिवृत्त' करण असे म्हणतात .

### ७३. पार्श्वजानु

एक: समस्थित: पाद: ऊरुपृष्ठे स्थितोऽपर: || १३३ ||
मुष्टिहस्तश्च वक्ष:स्थ: पार्श्वजानु तदुच्यते |

पदच्छेद: - एक: समस्थित: पाद: ऊरुपृष्ठे स्थित: अपर: || १३३ ||
मुष्टिहस्त: च वक्ष:स्थ: पार्श्वजानु तत् उच्यते |

अन्वय: - एक: समस्थित: पाद:, ऊरुपृष्ठे अपर: स्थित: मुष्टिहस्त: च वक्ष:स्थ: तत् (करणं) पार्श्वजानु (इति) उच्यते |

अर्थ - एक पाय समस्थितीत ठेवून त्याच्या मांडीवर दुसरा पाय ठेवावा आणि एक हात छातीजवळ मुष्टिहस्तात ठेवावा . त्या करणाला 'पार्श्वजानु' करण असे म्हणतात .

## ७४. गृध्रावलीनक

पृष्ठप्रसारित: पाद: किञ्चिदञ्चितजानुक: ॥ १३४ ॥
यत्र प्रसारितौ बाहू तत्स्यात् गृध्रावलीनकम् ।

पदच्छेद: - पृष्ठ-प्रसारित: पाद: किञ्चित् अञ्चित-जानुक: ॥ १३४ ॥
यत्र प्रसारितौ बाहू तत् स्यात् गृध्रावलीनकम् ।

अन्वय: - पाद: पृष्ठप्रसारित: किञ्चित् अञ्चितजानुक: यत्र बाहू प्रसारितौ तत् गृध्रावलीनकं (करणं) स्यात् ।

अर्थ - एक पाय मागे सरकवून त्याचा गुडघा किंचित वाकवून ज्यामध्ये दोन्ही हात (समोर) पसरविले जातात त्या करणाला 'गृध्रावलीनक' करण असे म्हणतात .

## ७५. सन्नत

उत्प्लुत्य चरणौ कार्यावग्रत: स्वस्तिकस्थितौ ॥ १३५ ॥
सन्नतौ च तथा हस्तौ सन्नतं तदुदाहृतम् ।

पदच्छेद: - उत्प्लुत्य चरणौ कार्यौ अग्रत: स्वस्तिक-स्थितौ ॥ १३५ ॥
सन्नतौ च तथा हस्तौ सन्नतं तत् उदाहृतम् ।

अन्वय: - उत्प्लुत्य चरणौ अग्रत: स्वस्तिकस्थितौ कार्यौ । तथा च सन्नतौ हस्तौ (कर्तव्यौ) तत् (करणं) सन्नतम् (इति)उदाहृतम् ।

अर्थ - दोन्ही पायांनी उडी मारून समोरच्या दिशेला ते पाय स्वस्तिक स्थितीत ठेवावेत आणि दोन्ही हात 'सन्नत' (दोला) ठेवावे . त्या करणाला 'सन्नत' करण असे म्हणतात .

## ७६. सूची

कुञ्चितं पादमुत्क्षिप्य कुर्यादग्रस्थितं भुवि ॥ १३६ ॥
प्रयोगवशगौ हस्तौ सा सूची परिकीर्तिता ।

पदच्छेद: - कुञ्चितं पादम् उत्क्षिप्य कुर्यात् अग्रस्थितं भुवि ॥ १३६ ॥
प्रयोग-वशगौ हस्तौ सा सूची परिकीर्तिता ।

अन्वय: - कुञ्चितं पादम् उत्क्षिप्य अग्रस्थितं भुवि कुर्यात् | प्रयोगवशगौ हस्तौ (चेत्) सा सूची परिकीर्तिता |

अर्थ - कुंचित पाय उचलून त्याला समोरच्या बाजूस जमिनीवर ठेवावे व दोन्ही हात प्रयोगाला (क्रियेला)अनुसरून करावे . असे केल्यास त्या करणाला 'सूची' करण असे म्हणतात .

### ७७. अर्धसूची

अलपद्म: शिरोहस्त: सूचीपादश्च दक्षिण: || १३७ ||
यत्र तत्करणं ज्ञेयमर्धसूचीति नामत: |

पदच्छेद: - अलपद्म: शिरोहस्त: सूचीपाद: च दक्षिण: || १३७ ||
यत्र तत् करणं ज्ञेयम् अर्धसूची इति नामत: |

अन्वय: - यत्र अलपद्म: शिरोहस्त: दक्षिण: सूचीपाद: च तत् करणं अर्धसूची इति नामत: ज्ञेयम् |

अर्थ - डोक्यावर अलपद्म हस्त ठेवावा व उजव्या पायाने सूची चारी करावी . असे केल्यास त्या करणाला 'अर्धसूची' करण असे म्हणतात .

### ७८. सूचीविद्ध

पादसूच्या यदा पादो द्वितीयस्तु प्रविध्यते || १३८ ||
कटिवक्ष:स्थितौ हस्तौ सूचीविद्धं तदुच्यते |

पदच्छेद: - पादसूच्या यदा पाद: द्वितीय: तु प्रविध्यते || १३८ ||
कटिवक्ष: स्थितौ हस्तौ सूचीविद्धं तत् उच्यते |

अन्वय: - पादसूच्या यदा द्वितीय: पाद: तु प्रविध्यते | हस्तौ कटिवक्षस्स्थितौ तत् (करणं) सूचीविद्धं (इति) उच्यते |

अर्थ - सूची चारी करून एक पाय दुसऱ्या पायाच्या टाचेजवळ आणावा आणि दोन्ही हात क्रमश: कंबर व छाती जवळ ठेवावे . असे केल्यास त्या करणाला 'सूचीविद्ध' करण असे म्हणतात .

## ७९. अपक्रांत

कृत्वोरुवलितं पादमपक्रान्तक्रमं न्यसेत् ‖ १३९ ‖
प्रयोगवशगौ हस्तावपक्रान्तं तदुच्यते |

पदच्छेद: - कृत्वा ऊरुवलितं पादम् अपक्रान्तक्रमं न्यसेत् ‖ १३९ ‖
प्रयोग-वशगौ हस्तौ अपक्रान्तं तत् उच्यते |

अन्वय: - ऊरुवलितं कृत्वा पादम् अपक्रान्तक्रमं न्यसेत् | प्रयोगवशगौ हस्तौ (चेत्) तत् अपक्रान्तं (करणम् इति) उच्यते |

अर्थ - जंघा वळवून पायांनी अपक्रांत चारी करावी आणि त्या क्रियेला अनुसरून हस्तसंचार करावा. असे केले असता त्या करणाला 'अपक्रांत' करण म्हणतात.

## ८०. मयूरललित

वृश्चिकं चरणं कृत्वा रेचितौ च तथा करौ ‖ १४० ‖
तथा त्रिकं विवृत्तं मयूरललितं भवेत् |

पदच्छेद: - वृश्चिकं चरणं कृत्वा रेचितौ च तथा करौ ‖ १४० ‖
तथा त्रिकं विवृत्तं मयूरललितं भवेत् |

अन्वय: - वृश्चिकं चरणं कृत्वा करौ रेचितौ च तथा |
तथा त्रिकं विवृत्तं मयूरललितं भवेत् |

अर्थ - 'वृश्चिक' चरण करून दोन्ही हातांनी 'रेचित' करून त्रिक 'विवर्तित' करावे. त्यास 'मयूरललित' करण असे म्हणतात.

## ८१. सर्पित

अञ्चितापसृतौ पादौ शिरश्च परिवाहितम् ‖ १४१ ‖
रेचितौ च तथा हस्तौ तत्सर्पितमुदाहृतम् |

पदच्छेद: - अञ्चित-अपसृतौ पादौ शिर: च परिवाहितम् ‖ १४१ ‖
रेचितौ च तथा हस्तौ तत् सर्पितम् उदाहृतम् |

अन्वय: - अञ्चितापसृतौ पादौ, परिवाहितं शिर: तथा रेचितौ च हस्तौ तत् (करणं) सर्पितम् (इति) उदाहृतम्।

अर्थ - 'अंचित' पाय लांब न्यावेत व मस्तक 'परिवाहित' करावे आणि हात 'रेचित' करावे. असे केल्यास त्या करणाला 'सर्पित' करण असे म्हणतात.

## ८२. दंडपाद

नुपुरं चरणं कृत्वा दण्डपादं प्रसारयेत् ॥ १४२ ॥
क्षिप्राविद्धकरं चैव दण्डपादं तदुच्यते।

पदच्छेद: - नूपुरं चरणं कृत्वा दण्डपादं प्रसारयेत् ॥ १४२ ॥
क्षिप्र-आविद्ध-करं च एव दण्डपादं तत् उच्यते।

अन्वय: - नूपुरं चरणं कृत्वा दण्डपादं प्रसारयेत्। क्षिप्राविद्धकरं च एव (करणीयं), तत् (करणं) दण्डपादम् (इति) उच्यते।

अर्थ - 'नूपुर' चारी करून 'दंडपाद' चारी करावी आणि लगेचच 'आविद्ध' हस्त करावा. असे केल्यास या करणाला 'दंडपाद' करण असे म्हणतात.

## ८३. हरिणप्लुत

अतिक्रान्तक्रमं कृत्वा समुत्प्लुप्य निपातयेत् ॥ १४३ ॥
जङ्घाञ्चितोपरि क्षिप्ता तद्विद्याद्धरिणप्लुतम्।

पदच्छेद: - अतिक्रान्त-क्रमं कृत्वा समुत्प्लुप्य निपातयेत् ॥ १४३ ॥
जङ्घा-अञ्चित-उपरि क्षिप्ता तत् विद्यात् हरिणप्लुतम्।

अन्वय: - अतिक्रान्तक्रमं कृत्वा समुत्प्लुप्य निपातयेत्। जङ्घाञ्चितोपरि क्षिप्ता तत् (करणं) हरिणप्लुतम् (इति) विद्यात्।

अर्थ - अतिक्रांत चारी करून उडी मारून पाय आपटावा. नंतर मांडी अंचित करून 'क्षिप्त' करावी तर त्या करणाला 'हरिणप्लुत' म्हणतात.

## ८४. प्रेंखोलित

दोलापादक्रमं कृत्वा समुत्प्लुप्य निपातयेत् ‖ १४४‖
परिवृत्तत्रिकं चैव तत्प्रेङ्खोलितमुच्यते |

पदच्छेद: - दोलापाद-क्रमं कृत्वा समुत्प्लुप्य निपातयेत् ‖ १४४‖
परिवृत्त-त्रिकं च एव तत् प्रेङ्खोलितम् उच्यते |

अन्वय: - दोलापादक्रमं कृत्वा समुत्प्लुप्य निपातयेत् | परिवृत्तत्रिकं च तत् (करणं) प्रेङ्खोलितम् (इति)उच्यते |

अर्थ - 'दोलापाद'चारी करून उडी मारून पाय खाली आणावा आणि त्रिक 'परिवृत्त' करावे . असे केल्यास या करणाला 'प्रेंखोलित' करण असे म्हणतात .

## ८५. नितंब

भुजावूर्ध्वविनिष्क्रान्तौ हस्तौ चाभिमुखाङ्गुली ‖ १४५ ‖
बद्धा चारी तथा चैव नितम्बे करणे भवेत् |

पदच्छेद: - भुजौ ऊर्ध्व-विनिष्क्रान्तौ हस्तौ च अभिमुख-अङ्गुली ‖ १४५ ‖
बद्धा चारी तथा च एव नितम्बे करणे भवेत् |

अन्वय: - नितम्बे करणे भुजौ ऊर्ध्वविनिष्क्रान्तौ, हस्तौ च अभिमुखाङ्गुली (करणीयौ) | तथा च बद्धा चारी एव भवेत् |

अर्थ - 'नितंब' करणामध्ये हात डोक्याच्या वर उचलून हाताची बोटे वरच्या दिशेला अभिमुख करतात आणि पायाने बद्धाचारी करतात .

## ८६. स्खलित

दोलापादक्रमं कृत्वा हस्तौ तदनुगावुभौ ‖ १४६ ‖
रेचितौ घूर्णितौ वापि स्खलितं करणं भवेत् |

पदच्छेद: - दोलापाद-क्रमं कृत्वा हस्तौ तत्-अनुगौ उभौ ‖ १४६ ‖
रेचितौ घूर्णितौ वा अपि स्खलितं करणं भवेत् |

अन्वय: - दोलापादक्रमं कृत्वा उभौ हस्तौ तदनुगौ रेचितौ घूर्णितौ वा अपि (कृतौ चेत् तत्) स्खलितं करणं भवेत् ।

अर्थ - दोलापाद करून हात त्यानुसार दोन्ही हात 'रेचित' किंवा 'घूर्णित' केले तर ते 'स्खलित' करण होईल .

## ८७. करिहस्तक

एको वक्ष:स्थितो हस्त: प्रोद्वेष्टिततलोऽ पर: ॥ १४७ ॥
अञ्चितश्चरणश्चैव प्रयोज्य: करिहस्तके ।

पदच्छेद: - एक: वक्ष:स्थित: हस्त: प्रोद्वेष्टित-तल: अपर: ॥ १४७ ॥
अञ्चित: चरण: च एव प्रयोज्य: करिहस्तके ।

अन्वय: - करिहस्तके एक: हस्त: वक्ष:स्थित:, अपर: प्रोद्वेष्टिततल:, अञ्चित: चरण: च एव प्रयोज्य: ।

अर्थ - 'करिहस्तक' करणामध्ये एक हात छातीजवळ ठेवावा व दुसरा वेगाने 'उद्वेष्टित' क्रिया करणारा असावा आणि पाय 'अंचित' करावा .

## ८८. प्रसर्पितक

एकस्तु रेचितो हस्तो लताख्यस्तु तथा पर: ॥ १४८ ॥
प्रसर्पिततलौ पादौ प्रसर्पितकमेव तत् ।

पदच्छेद: - एक: तु रेचित: हस्त: लता-आख्य: तु तथा पर: ॥ १४८ ॥
प्रसर्पित-तलौ पादौ प्रसर्पितकम् एव तत् ।

अन्वय: - एक: तु रेचित: हस्त:, तथा पर: तु लताख्य: (करणीय:) । पादौ प्रसर्पिततलौ (करणीयौ) तत् प्रसर्पितकम् एव (करणं भवेत्) ।

अर्थ - एक हात रेचित ठेवून दुसरा लताहस्त करावा आणि दोन्ही पाय 'प्रसर्पित' (पायाचे तळवे घासून पुढे जाणे) करावे . ते 'प्रसर्पित' करण होय .

## ८९. सिंहविक्रीडित

अलातं च पुर:कृत्वा द्वितीयं च द्रुतक्रमम् ‖ १४९ ‖
हस्तौ पादानुगौ चापि सिंहविक्रीडिते स्मृतौ |

पदच्छेद: - अलातं च पुर: कृत्वा द्वितीयं च द्रुतक्रमम् ‖ १४९ ‖
हस्तौ पाद-अनुगौ च अपि सिंहविक्रीडिते स्मृतौ |

अन्वय: - पुर: अलातं च कृत्वा द्वितीयं द्रुतक्रमं हस्तौ पादानुगौ च अपि (इति) सिंहविक्रीडिते (करणे) स्मृतौ |

अर्थ - प्रथम अलात चारी करून दुसरा पाय द्रुत (जलद) गतीमध्ये ठेवून पायानुसार हातांची क्रिया करावी . असे 'सिंहविक्रीडित' करणामध्ये केले जाते .

## ९०. सिंहाकर्षित

पृष्ठप्रसर्पित: पादस्तथा हस्तौ निकुञ्चितौ ‖ १५० ‖
पुनस्तथैव कर्तव्यौ सिंहाकर्षितके द्विजा: |

पदच्छेद: - पृष्ठ-प्रसर्पित: पाद: तथा हस्तौ निकुञ्चितौ ‖ १५० ‖
पुन: तथा एव कर्तव्यौ सिंहाकर्षितके द्विजा: |

अन्वय: - द्विजा:, सिंहाकर्षितके (करणे) पाद: पृष्ठप्रसर्पित: तथा हस्तौ निकुञ्चितौ (कृत्वा) पुन: तथैव कर्तव्यौ |

अर्थ - हे मुनिजनहो ! 'सिंहकर्षितक' करणामध्ये पाय मागच्या बाजूला पसरवून दोन्ही हात 'निकुंचित' करावे आणि (हीच क्रिया) पुन्हा पुन्हा करावी .

## ९१. उद्वृत्त

आक्षिप्तहस्तमाक्षिप्तदेहमाक्षिप्तपादकम्‖ १५१ ‖
उद्वृत्तगात्रमित्येतद्रुद्वृत्तं करणं स्मृतम् |

पदच्छेद: - आक्षिप्त-हस्तम् आक्षिप्त-देहम् आक्षिप्त-पादकम् || १५१ ||
उद्वृत्त-गात्रम् इति एतत् उद्वृत्तं करणं स्मृतम् |

अन्वय: - आक्षिप्तहस्तम् आक्षिप्तदेहम् आक्षिप्तपादकम् उद्वृत्तगात्रम् इति एतत् उद्वृत्तं करणं स्मृतम् |

अर्थ - आक्षिप्त हात, आक्षिप्त देह, आक्षिप्त पाय आणि मग उद्वृत्त चारीने शरीराच्या हालचाली केल्या तर त्या करणाला 'उद्वृत्त' असे म्हणतात .

## ९२. उपसृतक (अपसृत)

आक्षिप्तश्चरणश्चैको हस्तौ तस्यैव चानुगौ || १५२ ||
आनतं च तथा गात्रं तथोपसृतकं भवेत् |

पदच्छेद: - आक्षिप्त: चरण: च एक: हस्तौ तस्य एव च अनुगौ || १५२ ||
आनतं च तथा गात्रं तथा उपसृतकं भवेत् |

अन्वय: - एक: चरण: आक्षिप्त: च हस्तौ तस्य एव च अनुगौ तथा च आनतं गात्रं तथा उपसृतकं भवेत् |

अर्थ - एक पायाने आक्षिप्त चारी करून दोन्ही हात त्यानुसार ठेवावे आणि शरीर थोडे झुकवावे . त्या करणाला 'उपसृतक' असे म्हणतात .

## ९३. तलसंघट्टित

दोलापादक्रमं कृत्वा तलसङ्घट्टितौ करौ || १५३ ||
रेचयेच्च करं वामं तलसङ्घट्टिते सदा |

पदच्छेद: - दोलापाद-क्रमं कृत्वा तलसङ्घट्टितौ करौ || १५३ ||
रेचयेत् च करं वामं तलसङ्घट्टिते सदा |

अन्वय: - तलङ्घट्टिते (करणे) दोलापादक्रमं कृत्वा तलसङ्घट्टित: करौ (करणीयौ) तथा च सदा वामं करं रेचयेत् |

अर्थ - 'तलसंघट्टित' करणामध्ये दोलापाद चारी करून नंतर दोन्ही हाताचे तळवे जुळवावे आणि डावा हात 'रेचित' करावा .

## ९४. जनित

एको वक्ष:स्थितो हस्तो द्वितीयश्च प्रलम्बित: ‖ १५४ ‖
तलाग्रसंस्थित: पादो जनिते करणे भवेत् |

पदच्छेद: - एक: वक्ष:-स्थित: हस्त: द्वितीय: च प्रलम्बित: ‖ १५४ ‖
तलाग्रसंस्थित: पाद: जनिते करणे भवेत् |

अन्वय: - जनिते करणे एक: वक्ष:स्थित: हस्त: द्वितीय: च प्रलम्बित: (करणीय:) | पाद: (च) तल-अग्र-संस्थित: भवेत् |

अर्थ - 'जनित' करणामध्ये, एक हात छातीवर ठेवून दुसरा हात लांब झुलत ठेवावा आणि पायांनी जनित चारीतील 'अग्रतलसंचर' करावे .

## ९५. अवहित्थ

जनितं करणं कृत्वा हस्तौ चाभिमुखाङ्गुली ‖ १५५ ‖
शनैर्निपतितौ चैव ज्ञेयं तदवहित्थकम् |

पदच्छेद: - जनितं करणं कृत्वा हस्तौ च अभिमुख-अङ्गुली ‖ १५५ ‖
शनै: निपतितौ च एव ज्ञेयं तत् अवहित्थकम् |

अन्वय: - जनितं करणं कृत्वा अभिमुखाङ्गुली हस्तौ शनै: निपतितौ एव तत् (करणम्) अवहित्थकम् (इति) ज्ञेयम् |

अर्थ - जनित करण करून समोरासमोर बोटे असणारे दोन्ही हात हळूहळू खाली आणावेत . त्या करणाला 'अवहित्थक' करण असे म्हणतात .

## ९६. निवेश

करौ वक्ष:स्थितौ कार्यावुरो निर्भुग्नमेव च ‖ १५६ ‖
मण्डलस्थानक चैव निवेशं करणं तु तत् |

पदच्छेद: - करौ वक्ष:स्थितौ कार्यौ उर: निर्भुग्नम् एव च ‖ १५६ ‖
मण्डलस्थानकं च एव निवेशं करणं तु तत् |

अन्वय : - करौ वक्ष :स्थितौ कार्यौ उर : निर्भुग्नम् (कर्तव्यं) च | मण्डलस्थानकम् एव (करणीयं) च तत् तु निवेशं करणं (भवेत्) |

अर्थ - दोन्ही हातांना 'निर्भुग्न' वक्ष :स्थळाजवळ आणावे आणि मंडलस्थानक करावे, त्या करणाला 'निवेश' करण असे म्हणतात .

### ९७. एलकाक्रीडित

तलसञ्चरपादाभ्यामुत्प्लुत्य पतनं भवेत् || १५७ ||
संनतं वलिंत गात्रमेलकाक्रीडितं तु तत् |

पदच्छेद : - तलसञ्चर-पादाभ्याम् उत्प्लुत्य पतनं भवेत् || १५७ ||
संनतं वलितं गात्रम् एलकाक्रीडितं तु तत् |

अन्वय : - तलसञ्चरपादाभ्याम् उत्प्लुत्य पतनं भवेत् | गात्रं संनतं वलितं (च कृतं चेत्) तत् तु एलकाक्रीडितं (करणं भवेत्) |

अर्थ - पाय 'अग्रतलसंचर' ठेवून उडी मारून एका मागून एक जमिनीवर आणावे आणि शरीर झुकलेले आणि वळविलेले असावे, तर त्याला 'एलकाक्रीडित' करण म्हणतात .

### ९८. ऊरूद्वृत्त

करमावृत्तकरणमूरुपृष्ठेऽञ्चितं न्यसेत् || १५८ ||
जङ्घाञ्चिता तथोद्वृत्ता ह्यूरूद्वत्तं तु तद्भवेत् |

पदच्छेद : - करम् आवृत्तकरणम् ऊरुपृष्ठे अञ्चितं न्यसेत् || १५८ ||
जङ्घा अञ्चिता तथा उद्वृत्ता हि ऊरूद्वृत्तं तु तत् भवेत् |

अन्वय : - करम् आवृत्तकरणम् ऊरुपृष्ठे अञ्चितं न्यसेत् | जङ्घा अञ्चिता तथा हि उद्वृत्ता (चेत्) तत् तु ऊरुद्वृत्तं (करणं) भवेत् |

अर्थ - दोन्ही हात 'आवर्तित' हस्त करून मांडीच्या मागच्या बाजूस अंचित करावे आणि पोटऱ्या 'अंचित' करून 'उद्वृत्त' कराव्यात . त्याला 'ऊरूद्वृत्त' करण असे म्हणतात .

### ९९. मदस्खलित

करौ प्रलम्बितौ कार्यौ शिरश्च परिवाहितम् ‖ १५९ ‖
पादौ च वलिताविद्धौ मदस्खलितके द्विजा: |

पदच्छेद: - करौ प्रलम्बितौ कार्यौ शिर: च परिवाहितम् ‖ १५९ ‖
पादौ च वलित-आविद्धौ मदस्खलितके द्विजा: |

अन्वय: - द्विजा:, मदस्खलितके (करणे) करौ प्रलम्बितौ कार्यौ शिर: च परिवाहितं पादौ च वलिताविद्धौ (कर्तव्यौ)|

अर्थ - हे मुनिजनहो, 'मदस्खलितक' करणामध्ये दोन्ही हात लंबित (दोला) ठेवून डोके 'परिवाहित' करून दोन्ही पाय आविद्ध चारीमध्ये वलित करावेत .

### १००. विष्णुक्रांत

पुर: प्रसारित: पाद: कुञ्चितो गगनोन्मुख: ‖ १६० ‖
करौ च रेचितौ यत्र विष्णुक्रान्तं तदुच्यते |

पदच्छेद: - पुर: प्रसारित: पाद: कुञ्चित: गगन-उन्मुख: ‖ १६० ‖
करौ च रेचितौ यत्र विष्णुक्रान्तं तत् उच्यते |

अन्वय: - यत्र कुञ्चित: पाद: पुर: प्रसारित: गगनोन्मुख: (क्रियते) करौ च रेचितौ (भवत:) तत् विष्णुक्रान्तं (करणम् इति)उच्यते |

अर्थ - ज्या करणामध्ये पुढे जाण्यासाठी उद्युक्त झालेला कुंचित पाय समोरच्या बाजूला प्रसारित केला जातो आणि दोन्ही हात रेचित केले जातात, त्या करणाला 'विष्णुक्रांत' करण असे म्हणतात .

### १०१. संभ्रांत

करमावर्तितं कृत्वा ह्यूरुपृष्ठे निकुञ्चयेत् ‖ १६१ ‖
ऊरूश्चैव तथाविद्ध: सम्भ्रान्तं करणं तु तत् |

पदच्छेद: - करम् आवर्तितं कृत्वा हि ऊरुपृष्ठे निकुञ्चयेत् ॥ १६१ ॥
ऊरु: च एव तथा आविद्ध: सम्भ्रान्तं करणं तु तत् ।

अन्वय: - करम् आवर्तितं कृत्वा ऊरुपृष्ठे निकुञ्चयेत् । तथा च ऊरु: (यदि) आविद्ध: तत् तु सम्भ्रान्तं करणं (भवेत्) ।

अर्थ - हात 'आवर्तित' करून मांडीच्या मागच्या बाजूस वाकवून ठेवावे आणि मांडी 'आविद्ध' चारीमध्ये ठेवावी . असे केल्यास ते 'संभ्रांत' करण होईल .

## १०२. विष्कंभ

अपविद्ध: कर: सूच्या पादश्चैव निकुट्टित: ॥ १६२ ॥
वक्ष:स्थश्च करो वामो विष्कम्भे करणे भवेत् ।

पदच्छेद: - अपविद्ध: कर: सूच्या पाद: च एव निकुट्टित: ॥ १६२ ॥
वक्ष:स्थ: च कर: वाम: विष्कम्भे करणे भवेत् ।

अन्वय: - विष्कम्भे करणे अपविद्ध: कर:, सूच्या पाद: (कृत्वा) च एव निकुट्टित: (करणीय:)। वाम: कर: च वक्ष:स्थ: भवेत् ।

अर्थ - 'विष्कंभ' करणामध्ये, हात 'अपविद्ध' करून पायाने 'सूची' चारी करावी आणि पाय 'निकुट्टित' करावे व डावा हात छातीवर ठेवावा .

## १०३. उदघट्टित

पादावुद्घट्टितौ कार्यौ तलसङ्घट्टितौ करौ ॥ १६३ ॥
नतञ्च पार्श्वं कर्तव्यं बुधैरुद्घट्टिते सदा ।

पदच्छेद: - पादौ उद्घट्टितौ कार्य: तलसङ्घट्टितौ करौ ॥ १६३ ॥
नतं च पार्श्वं कर्तव्यं बुधै: उद्घट्टिते सदा ।

अन्वय: - बुधै: उद्घट्टिते (करणे) पादौ उद्घट्टितौ कार्यौ करौ तलसङ्घट्टितौ पार्श्वं च सदा नतं कर्तव्यम् ।

अर्थ - बुद्धिमान लोकांनी 'उदघट्टित' करणामध्ये, दोन्ही पायांनी 'उदघट्टित' करावे . दोन्ही हात 'तलसंघट्टित' ठेवावेत आणि पार्श्वभाग 'नत' करावा .

## १०४. वृषभक्रीडित

प्रयुज्यालातकं पूर्वं हस्तौ चापि हि रेचयेत् ॥ १६४ ॥
कुञ्चितावञ्चितौ चैव वृषभक्रीडिते सदा ।

पदच्छेद : - प्रयुज्य आलातकं पूर्वं हस्तौ च अपि हि रेचयेत् ॥ १६४ ॥
कुञ्चितौ अञ्चितौ च एव वृषभक्रीडिते सदा ।

अन्वय : - वृषभक्रीडिते (करणे) पूर्वम् आलातकं प्रयुज्य हस्तौ च अपि रेचयेत् । सदा च कुञ्चितौ अञ्चितौ एव (करणीयौ) ।

अर्थ - 'वृषभक्रीडित' करणामध्ये, आधी 'अलातक' चारी करून दोन्ही हात 'रेचित' करावे . नंतर हात 'कुंचित' व 'अंचित' ठेवावे .

## १०५. लोलित

रेचितावञ्चितौ हस्तौ लोलितं वर्तितं शिर: ॥ १६५ ॥
उभयो: पार्श्वयोर्यत्र तल्लोलितमुदाहृतम् ।

पदच्छेद : - रेचितौ अञ्चितौ हस्तौ लोलितं वर्तितं शिर: ॥ १६५ ॥
उभयो : पार्श्वयो : यत्र तत् लोलितम् उदाहृतम् ।

अन्वय : - यत्र रेचितौ अञ्चितौ हस्तौ (कृत्वा) उभयो : पार्श्वयो : शिर : लोलितं वर्तितं च (क्रियते) तत् (करणं) लोलितम् (इति) उदाहृतम् ।

अर्थ - ज्या करणामध्ये दोन्ही हात रेचित व अंचित करून मस्तक 'लोलित' क्रियेद्वारे दोन्ही बाजूंना 'वर्तित' केले जाते, त्या करणाला 'लोलित' करण असे म्हणतात .

## १०६. नागापसर्पित

स्वस्तिकापसृतौ पादौ शिरश्च परिवाहितम् ॥ १६६ ॥
रेचितौ च तथा हस्तौ स्यातां नागापसर्पिते ।

पदच्छेद: - स्वस्तिक-अपसृतौ पादौ शिर: च परिवाहितम्॥ १६६॥
रेचितौ च तथा हस्तौ स्यातां नागापसर्पिते।

अन्वय: - नागापसर्पिते (करणे) स्वस्तिकापसृतौ पादौ (कृत्वा) शिर: च परिवाहितं (कर्तव्यं) तथा च हस्तौ रेचितौ स्याताम्।

अर्थ - 'नागापसर्पित' करणामध्ये, दोन्ही पाय 'स्वस्तिक' करून मग वेगळे करून मस्तक 'परिवाहित' करून दोन्ही हात रेचित केले जातात .

## १०७. शकटास्य

निषण्णाङ्गस्तु चरणं प्रसार्य तलसञ्चरम्॥ १६७॥
उद्वाहितमुर: कृत्वा शकटास्यं प्रयोजयेत्।

पदच्छेद: - निषण्ण-अङ्ग: तु चरणं प्रसार्य तलसञ्चरम्॥ १६७॥
उद्वाहितम् उर: कृत्वा शकटास्यं प्रयोजयेत्।

अन्वय: - निषण्णाङ्ग: तलसञ्चरं चरणं प्रसार्य उर: उद्वाहितं कृत्वा शकटास्यं प्रयोजयेत्।

अर्थ - स्थिर अवस्थेत राहून पाय 'तलसंचर' करून प्रसारित करावे आणि छाती 'उद्वाहित' स्थितीत ठेवून 'शकटास्य' करण योजावे .

## १०८. गंगावतरण

ऊर्ध्वाङ्गुलितलौ पादौ त्रिपताकावधोमुखौ॥ १६८॥
हस्तौ शिरस्सन्नतं च गङ्गावतरणं त्विति।

पदच्छेद: - ऊर्ध्व-अङ्गुलि-तलौ पादौ त्रिपताकौ अधोमुखौ॥ १६८॥
हस्तौ शिर:-सन्नतं च गङ्गावतरणं तु इति ।

अन्वय: - ऊर्ध्वाङ्गुलितलौ पादौ, त्रिपताकौ अधोमुखौ हस्तौ ,शिरस्सन्नतं च (तत् करणं) गङ्गावतरणं तु इति (ज्ञेयम्)।

अर्थ - दोन्ही पायांचे तळवे व बोटे वर उचलून दोन्ही 'त्रिपताक' हस्त जमिनीला टेकवून डोके 'सन्नत' स्थितीत ठेवले की त्या करणाला 'गंगावतरण' करण असे म्हणतात .

## ❖ अंगहार व त्यांची लक्षणे ❖

यानि स्थानानि याश्चार्यो व्यायामे कथितानि तु ॥ १६९ ॥
पादप्रचारस्त्वेषां तु करणानामयं भवेत् ।

पदच्छेद :- यानि स्थानानि या : चार्य : व्यायामे कथितानि तु ॥ १६९ ॥
पादप्रचार : तु एषां तु करणानाम् अयं भवेत् ।

अन्वय : - यानि स्थानानि या : चार्य : व्यायामे कथितानि अयं पादप्रचार : एषां करणानाम् भवेत् ।

अर्थ - नृत्तसंबंधित व्यायामामध्ये जी स्थाने आणि ज्या चारी सांगितल्या आहेत, ते पादप्रचार करणांमध्ये करावे .

ये चापि नृत्तहस्तास्तु गदिता नृत्तकर्मणि ॥ १७० ॥
तेषां समासतो योग: करणेषु विभाव्यते ।

पदच्छेद :- ये च अपि नृत्तहस्ता : तु गदिता : नृत्तकर्मणि ॥ १७० ॥
तेषां समासत : योग : करणेषु विभाव्यते ।

अन्वय : - समासत :, नृत्तकर्मणि ये च नृत्तहस्ता : गदिता : तेषां योग : करणेषु विभाव्यते ।

अर्थ - थोडक्यात, नृत्तकर्मामध्ये जे नृत्तहस्त सांगितले आहेत त्यांचे प्रयोग करणांमध्ये करावे .

प्रायेण करणे कार्यो वामो वक्ष :स्थित : कर : ॥ १७१ ॥
चरणश्चानुगश्चापि दक्षिणस्तु भवेत्कर : ।

पदच्छेद :- प्रायेण करणे कार्य : वाम : वक्ष :स्थित : कर : ॥ १७१ ॥
चरण : च अनुग : च अपि दक्षिण : तु भवेत् कर : ।

अन्वय : - करणे प्रायेण वाम : कर : वक्ष :स्थित : कार्य : । दक्षिण : कर : चरण : च अनुग : तु भवेत् ।

अर्थ - करणामध्ये बहुधा डावा हात छातीवर ठेवावा . उजवा हात पायाप्रमाणे करावा .

चार्यश्चैव तु या : प्रोक्ता नृत्तहस्तास्तथैव च ॥ १७२ ॥
सा मातृकेति विज्ञेया तद्भेदात्करणानि तु ।

पदच्छेद: - चार्य: च एव तु या: प्रोक्ता: नृत्तहस्ता: तथा एव च || १७२ ||
सा मातृका इति विज्ञेया तत् भेदात् करणानि तु |

अन्वय: - या: चार्य: तथैव नृत्तहस्ता: च प्रोक्ता: सा मातृका इति विज्ञेया तत् भेदात् तु करणानि (कर्तव्यानि) |

अर्थ - ज्या चारी तसेच नृत्तहस्त सांगितले आहेत त्यांना मातृका म्हणून जाणावे आणि या चारींच्या भेदानुसार करणांची रचना होते .

अष्टोत्तरशतं ह्येतत्करणानां मयोदितम् || १७३ ||
अत: परं प्रवक्ष्यामि ह्यङ्गहारविकल्पनम् |

पदच्छेद: - अष्टोत्तरशतं हि एतत् करणानां मया उदितम् || १७३ ||
अत: परं प्रवक्ष्यामि हि अङ्गहार-विकल्पनम् |

अन्वय: - एतत् करणानां अष्टोत्तरशतं हि मया उदितम् | अत: परं हि अङ्गहारविकल्पनं प्रवक्ष्यामि |

अर्थ - अशाप्रकारे एकशे आठ करणे मी सांगितली . आता मी अंगहाराची लक्षणे सांगतो .

### १. स्थिरहस्त

प्रसार्योत्क्षिप्य च करौ समपादं प्रयोजयेत् || १७४ ||
व्यंसितापसृतं सव्यं हस्तमूर्ध्वं प्रसारयेत् |
प्रत्यालीढं तत: कुर्यात् तथैव च निकुट्टकम् || १७५ ||
ऊरूद्वृत्तं तत: कुर्यादाक्षिप्तं स्वस्तिकं तत: |
नितम्बं करिहस्तं कटिच्छिन्नं च योगत: || १७६ ||
स्थिरहस्तो भवेदेष त्वङ्गहारो हरप्रिय: |

पदच्छेद: - प्रसार्य उत्क्षिप्य च करौ समपादं प्रयोजयेत् || १७४ ||
व्यंसित-अपसृतं सव्यं हस्तम् ऊर्ध्वं प्रसारयेत् |
प्रत्यालीढं तत: कुर्यात् तथा एव च निकुट्टकम् || १७५ ||
ऊरूद्वृत्तं तत: कुर्यात् आक्षिप्तं स्वस्तिकं तत: |

नितम्बं करिहस्तं कटिच्छिन्नं च योगत: ॥ १७६ ॥
स्थिरहस्त: भवेत् एष: तु अङ्गहार: हरप्रिय: ।

अन्वय: - करौ उत्क्षिप्य प्रसार्य च समपादं प्रयोजयेत् । सव्यं हस्तं व्यंसितापसृतम् ऊर्ध्वं प्रसारयेत् । तत: प्रत्यालीढं तथैव निकुट्टकं च कुर्यात् । तत: ऊरूद्वृत्तं कुर्यात् तत: आक्षिप्तं स्वस्तिकं योगत: च नितम्बं करिहस्तं कटिच्छिन्नं कुर्यात् । एष: तु स्थिरहस्त: अङ्गहार: भवेत् (य:) हरप्रिय: (अस्ति) ।

अर्थ - दोन्ही हात वर प्रसारित करून 'उत्क्षिप्त' करावे आणि पाय समपाद ठेवावे . उजवा हात व्यंसित आणि अपसृत करून वरच्या दिशेला प्रसारित करावा व नंतर प्रत्यालीढ स्थान करून निकुट्टक, ऊरूद्वृत्त, आक्षिप्त, स्वस्तिक, नितंब, करिहस्त आणि कटिच्छिन्न या करणांचा समन्वय साधून प्रयोग करावा . याला 'स्थिरहस्त' अंगहार म्हणावे जो भगवान शिवाला अतिशय प्रिय आहे .

## २. पर्यस्तक

तलपुष्पापविद्धे द्वे वर्तितं सनिकुट्टकम् ॥ १७७ ॥
(प्रत्यालीढं तत: कृत्वा तथैव च निकुट्टकम्)
उरूद्वृत्तं तथाक्षिप्तमुरोमण्डलमेव च ।
नितम्बं करिहस्तं च कटिच्छिन्नं तथैव च ॥ १७८ ॥
एष पर्यस्तको नाम ह्यङ्गहारो हरोद्भव: ।

पदच्छेद: - तलपुष्प-अपविद्धे द्वे वर्तितं सनिकुट्टकम् ॥ १७७ ॥
(प्रत्यालीढं तत: कृत्वा तथा एव च निकुट्टकम्)
ऊरूद्वृत्तं तथा आक्षिप्तम् उरोमण्डलम् एव च ।
नितम्बं करिहस्तं च कटिच्छिन्नं तथा एव च ॥ १७८ ॥
एष: पर्यस्तक: नाम हि अङ्गहार: हर-उद्भव: ।

अन्वय: - तलपुष्प-अपविद्धे द्वे वर्तितं सनिकुट्टकम् (कर्तव्यम्) । (तत: प्रत्यालीढं कृत्वा तथैव निकुट्टकम् च करणीयम्) । ऊरूद्वृत्तं तथा आक्षिप्तम् उरोमण्डलं नितम्बं करिहस्तं तथैव कटिच्छिन्नं च (कर्तव्यम्) । एष: पर्यस्तक: नाम अङ्गहार: हरोद्भव: (अस्ति) ।

अर्थ - तलपुष्पपुट, अपविद्ध, वर्तित व निकुट्टित करणांना क्रमाने केल्यावर (प्रत्यालीढ आणि निकुट्टित करून) ऊरूद्वृत्त, आक्षिप्त, उरोमंडल, नितंब, करिहस्त आणि कटिच्छिन्न करणे सादर केली की त्याला 'पर्यस्तक' अंगहार म्हणतात, जो भगवान शंकरापासून उत्पन्न झाला आहे .

### ३. सूचीविद्ध

अलपल्लवसूचीं च कृत्वा विक्षिप्तमेव च || १७९ ||
आवर्तितं ततः कुर्यात्तथैव च निकुट्टकम् |
ऊरूद्वृत्तं तथाक्षिप्तमुरोमण्डलमेव च || १८० ||
करिहस्तं कटिच्छिन्नं सूचीविद्धो भवेदयम् |

पदच्छेदः - अलपल्लव-सूचीं च कृत्वा विक्षिप्तम् एव च || १७९ ||
आवर्तितं ततः कुर्यात् तथा एव च निकुट्टकम् |
ऊरूद्वृत्तं तथा आक्षिप्तम् उरोमण्डलम् एव च || १८० ||
करिहस्तं कटिच्छिन्नं सूचीविद्धः भवेत् अयम् |

अन्वयः - अलपल्लवसूचीं कृत्वा विक्षिप्तम् आवर्तितं ततः निकुट्टकं कुर्यात् | तथा ऊरूद्वृत्तं आक्षिप्तम् उरोमण्डलं करिहस्तं कटिच्छिन्नं (करणीयम्)| अयं सूचीविद्धः भवेत् |

अर्थ - अलपल्लव हस्ताने व सूची पादाने विक्षिप्त करण करून आवर्तित करण करावे . त्यानंतर क्रमशः निकुट्टक, ऊरूद्वृत्त, आक्षिप्त, उरोमंडल, करिहस्त आणि कटिच्छिन्न ही करणे करावीत . हा 'सूचीविद्ध' अंगहार होय .

### ४. अपविद्ध

अपविद्धं तु करणं सूचीविद्धं तथैव च || १८१ ||
उद्वेष्टितेन हस्तेन त्रिकं तु परिवर्तयेत् |
उरोमण्डलकौ हस्तौ कटिच्छिन्नं तथैव च || १८२ ||
अपविद्धोऽङ्गहारश्च विज्ञेयोऽयं प्रयोक्तृभिः |

पदच्छेद : - अपविद्धं तु करणं सूचीविद्धं तथा एव च ॥ १८१ ॥
उद्वेष्टितेन हस्तेन त्रिकं तु परिवर्तयेत् ।
उरोमण्डलकौ हस्तौ कटिच्छिन्नं तथा एव च ॥ १८२ ॥
अपविद्ध : अङ्गहार : च विज्ञेय : अयं प्रयोक्तृभि : ।

अन्वय : - अपविद्धं तथैव सूचीविद्धं च करणं (प्रदर्श्य) उद्वेष्टितेन हस्तेन त्रिकं परिवर्तयेत् । उरोमण्डलकौ हस्तौ (कृत्वा) कटिच्छिन्नं (कर्तव्यम्) । अयं च अपविद्ध : अङ्गहार : (इति) प्रयोक्तृभि : विज्ञेय : ।

अर्थ - प्रथम अपविद्ध व सूचीविद्ध करण सादर करून उद्वेष्टित हस्त करून त्रिकाला परिवर्तित करावे . मग दोन्ही हात उरोमंडल करून कटिच्छिन्न करण सादर करावे . हा 'अपविद्ध' अंगहार होय, असे प्रयोग सादर करणाऱ्यांनी जाणावे .

## ५. आक्षिप्तक

करणं नूपुरं कृत्वा विक्षिप्तालातके पुन :॥ १८३ ॥
पुनराक्षिप्तकं कुर्यादुरोमण्डलकं तथा ।
नितम्बं करिहस्तं कटिच्छिन्नं तथैव च ॥ १८४ ॥
आक्षिप्तक : स विज्ञेयो ह्यङ्गहार : प्रयोक्तृभि :

पदच्छेद : - करणं नूपुरं कृत्वा विक्षिप्त-अलातके पुन : ॥ १८३ ॥
पुन : आक्षिप्तकं कुर्यात् उरोमण्डलकं तथा ।
नितम्बं करिहस्तं कटिच्छिन्नं तथा एव च ॥ १८४ ॥
आक्षिप्तक : स : विज्ञेय : हि अङ्गहार : प्रयोक्तृभि : ।

अन्वय : - नूपुरं करणं कृत्वा पुन : विक्षिप्तालातके ( कुर्यात् )। पुन : आक्षिप्तकं तथा उरोमण्डलकं कुर्यात् ।
नितम्बं करिहस्तं तथैव कटिच्छिन्नं च ( कुर्यात् )। स : हि अङ्गहार : आक्षिप्तक : (इति) प्रयोक्तृभि : विज्ञेय : ।

अर्थ - नूपुर करण करून विक्षिप्त आणि अलातक करण करावे . नंतर आक्षिप्त, उरोमंडल,

नितंब, करिहस्त आणि कटिच्छिन्न करणे करावीत. तोच 'आक्षिप्तक' अंगहार होय असे प्रयोग सादर करणाऱ्यांनी जाणावे.

### ६. उदघट्टित

उद्वेष्टितापविद्धस्तु करः पादो निकुट्टितः ॥ १८५ ॥
पुनस्तेनैव योगेन वामपार्श्वे भवेदथ ।
उरोमण्डलकौ हस्तौ नितम्बं करिहस्तकम् ॥ १८६ ॥
कर्तव्यं सकटिच्छिन्नं नृत्ते तूद्घट्टिते सदा ।

पदच्छेदः - उद्वेष्टित-अपविद्धः तु करः पादः निकुट्टितः ॥ १८५ ॥
पुनः तेन एव योगेन वामपार्श्वे भवेत् अथ ।
उरोमण्डलकौ हस्तौ नितम्बं करिहस्तकम् ॥ १८६ ॥
कर्तव्यं सकटिच्छिन्नं नृत्ते तु उद्घट्टिते सदा ।

अन्वयः - उद्घट्टिते नृत्ते उद्वेष्टित-अपविद्धः करः निकुट्टितः पादः (च क्रियेत) । तेनैव योगेन पुनः वामपार्श्वे (तदेव) भवेत् । उरोमण्डलकौ हस्तौ (कृत्वा) सदा नितम्बं करिहस्तकं सकटिच्छिन्नं कर्तव्यम् ।

अर्थ - 'उदघट्टित' अंगहारामध्ये उजव्या हाताने उद्वेष्टित आणि अपविद्ध हस्त करावा आणि उजव्या पायाने निकुट्टित करावे. हीच क्रिया डाव्या हातापायांनी पुन्हा डाव्या बाजूला करावी. दोन्ही हात उरोमंडल ठेवावे आणि नंतर नितंब, करिहस्त आणि कटिच्छिन्न ही करणे सादर करावीत.

### ७. विष्कंभ

पर्यायोद्वेष्टितौ हस्तौ पादौ चैव निकुट्टितौ ॥ १८७ ॥
कुञ्चितावञ्चितौ चैव ह्यूरूद्वृत्तंतथैव च ।
चतुरश्रं करं कृत्वा पादेन च निकुट्टकम् ॥ १८८ ॥
भुजत्रासितं चैव करं चोद्वेष्टितं पुनः ।

परिच्छिन्नं च कर्तव्यं त्रिकं भ्रमरकेण तु ॥ १८९ ॥
करिहस्तं कटिच्छिन्नं विष्कम्भे परिकीर्तितम् ।

पदच्छेद : - पर्याय-उद्वेष्टितौ हस्तौ पादौ च एव निकुट्टितौ ॥ १८७ ॥
कुञ्चित- अवञ्चितौ च एव हि ऊरूद्वृत्तं तथा एव च ।
चतुरश्रं करं कृत्वा पादेन च निकुट्टकम् ॥ १८८ ॥
भुजङ्गत्रासितं च एव करं च उद्वेष्टितं पुन: ।
परिच्छिन्नं च कर्तव्यं त्रिकं भ्रमरकेण तु ॥ १८९ ॥
करिहस्तं कटिच्छिन्नं विष्कम्भे परिकीर्तितम् ।

अन्वय : - हस्तौ पर्यायोद्वेष्टितौ पादौ च निकुट्टितौ अनन्तरं हस्तौ कुञ्चितौ पादौ च अञ्चितौ (कर्तव्यौ) । तथा ऊरूद्वृत्तं, चतुरश्रं करं कृत्वा पादेन च निकुट्टकं (कार्यम्)। भुजङ्गत्रासितं उद्वेष्टितं करं (कृत्वा) भ्रमरकेण त्रिकं परिच्छिन्नं कर्तव्यम् । तत: करिहस्तं कटिच्छिन्नं (करणीयम् इति) विष्कम्भे परिकीर्तितम् ।

अर्थ - दोन्ही हात क्रमाने उद्वेष्टित करावे आणि पाय निकुट्टित करावे . त्यानंतर क्रमाने हात कुंचित आणि पाय अंचित करावे . तसेच ऊरूद्वृत्त करण करून चतुरश्र हात करावे आणि पायाने निकुट्टित करण करावे . नंतर भुजंगत्रासित करणामध्ये, उद्वेष्टित हात करून भ्रमरक करण करून त्रिकाला 'छिन्न' करावे व नंतर 'करिहस्त' आणि 'कटिच्छिन्न' करणे करावीत . असे 'विष्कंभ' अंगहारामध्ये सांगितले आहे .

## ८. अपराजित

दण्डपादं करं चैव विक्षिप्याक्षिप्य चैव हि ॥ १९० ॥
व्यंसितं वामहस्तं च सह पादेन सर्पयेत् ।
निकुट्टकद्वयं कार्यमाक्षिप्तं मण्डलोरसि॥ १९१ ॥
करिहस्तं कटिच्छिन्नं कर्तव्यमपराजिते ।

पदच्छेद : - दण्डपादं करं च एव विक्षिप्य आक्षिप्य च एव हि ॥ १९० ॥
व्यंसितं वामहस्तं च सह पादेन सर्पयेत् ।
निकुट्टक-द्वयं कार्यम् आक्षिप्तं मण्डल-उरसि ॥ १९१ ॥

करिहस्तं कटिच्छिन्नं कर्तव्यम् अपराजिते |

अन्वय: - अपराजिते (अङ्गहारे) दण्डपादं (कृत्वा) करं च विक्षिप्य आक्षिप्य व्यंसितं च (कुर्यात् यत्र) वामहस्तं पादेन सह सर्पयेत् | निकुट्टकद्वयं आक्षिप्तं मण्डल-उरसि कार्यम् | करिहस्तं कटिच्छिन्नं कर्तव्यम् |

अर्थ - 'अपराजित' अंगहारामध्ये दंडपाद करण सादर केल्यावर उजव्या हाताने 'विक्षिप्त' व 'आक्षिप्त' क्रिया करावी . त्यानंतर 'व्यंसित' करण करावे ज्यामध्ये पायासह डावा हात 'सर्पित' करावा . नंतर निकुट्टक, अर्धनिकुट्टक, आक्षिप्त, उरोमंडल ही करणे करावीत . करिहस्त व कटिच्छिन्न ही करणे देखील करावी .

### ९. विष्कंभापसृत

कुट्टितं करणं कृत्वा भुजङ्गत्रासितं तथा || १९२ ||
रेचितेन तु हस्तेन पताकं हस्तमादिशेत् |
आक्षिप्तकं प्रयुञ्जीत ह्युरोमण्डलकं तथा || १९३ ||
लताख्यं सकटिच्छिन्नं विष्कम्भापसृते भवेत् |

पदच्छेद: - कुट्टितं करणं कृत्वा भुजङ्गत्रासितं तथा || १९२ ||
रेचितेन तु हस्तेन पताकं हस्तम् आदिशेत् |
आक्षिप्तकं प्रयुञ्जीत हि उरोमण्डलकं तथा || १९३ ||
लता-आख्यं सकटिच्छिन्नं विष्कम्भापसृते भवेत् |

अन्वय: - विष्कम्भापसृते अङ्गहारे कुट्टितं भुजङ्गत्रासितं करणं कृत्वा रेचितेन हस्तेन पताकं हस्तम् आदिशेत् | आक्षिप्तकं तथा हि उरोमण्डलकं प्रयुञ्जीत | सकटिच्छिन्नं लताख्यं भवेत् |

अर्थ - 'विष्कंभापसृत' अंगहारामध्ये कुट्टित आणि भुजंगात्रासित करण केल्यावर 'रेचित' हस्तासह पताक हस्त करावा . नंतर क्रमाने आक्षिप्तक, उरोमंडल करणे करावीत . कटिच्छिन्न करणासह लताहस्त करावा .

### १०. मत्ताक्रीड

त्रिकं सुवलितं कृत्वा नूपुरं करणं तथा || १९४||

भुजत्रासितं सव्यं तथा वैशाखरेचितम् |
आक्षिप्तकं ततः कृत्वा परिच्छिन्नं तथैव च || १९५ ||
बाह्यभ्रमरकं कुर्यादरोमण्डलमेव च |
नितम्बं करिहस्तं च कटिच्छिन्नं तथैव च || १९६ ||
मत्ताक्रीडो भवेदेष ह्यङ्गहारो हरप्रियः |

पदच्छेदः - त्रिकं सुवलितं कृत्वा नूपुरं करणं तथा || १९४||
भुजङ्गत्रासितं सव्यं तथा वैशाखरेचितम् |
आक्षिप्तकं ततः कृत्वा परिच्छिन्नं तथा एव च || १९५ ||
बाह्यभ्रमरकं कुर्यात् उरोमण्डलम् एव च |
नितम्बं करिहस्तं च कटिच्छिन्नं तथा एव च || १९६ ||
मत्ताक्रीडः भवेत् एषः हि अङ्गहारः हरप्रियः |

अन्वयः - त्रिकं सुवलितं कृत्वा नूपुरं करणं (कर्तव्यम्) | तथा सव्यं भुजङ्गत्रासितं वैशाखरेचितं (कार्यम्) | ततः आक्षिप्तकं परिच्छिन्नं च कृत्वा बाह्यभ्रमरकम् उरोमण्डलम् एव च कुर्यात् | नितम्बं करिहस्तं तथैव कटिच्छिन्नं कुर्यात् | (एवं) मत्ताक्रीडः अङ्गहारः भवेत् एषः हि हरप्रियः |

अर्थ - त्रिकास सुंदररीत्या फिरवून नूपुर करण करावे व नंतर उजव्या बाजूने भुजंगत्रासित आणि वैशाखरेचित करण करावे. नंतर आक्षिप्तक व छिन्न करण करावे. त्यानंतर बाह्यभ्रमरक, उरोमंडल, नितंब, करिहस्त आणि कटिच्छिन्न ही करणे करावीत. अशा प्रकारे 'मत्ताक्रीड' अंगहार होतो. हा भगवान शंकराला प्रिय आहे.

## ११. स्वस्तिकरेचित

रेचितं हस्तपादं च कृत्वा वृश्चिकमेव च || १९७ ||
पुनस्तेनैव योगेन वृश्चिकं सम्प्रयोजयेत् |
निकुट्टकं तथा चैव सव्यासव्यकृतं क्रमात् || १९८ ||
लताख्यः सकटिच्छेदो भवेत्स्वस्तिकरेचिते |

पदच्छेद : - रेचितं हस्तपादं च कृत्वा वृश्चिकम् एव च ॥ १९७ ॥
पुन : तेन एव योगेन वृश्चिकं सम्प्रयोजयेत् ।
तथा च निकुट्टकं एव सव्यासव्यकृतं क्रमात् ॥ १९८ ॥
लताख्य : सकटिच्छेदो भवेत् स्वस्तिकरेचिते ।

अन्वय : - रेचितं हस्तपादं, वृश्चिकं च कृत्वा पुन: तेनैव योगेन वृश्चिकं सम्प्रयोजयेत् । निकुट्टकं तथा च एव सव्यासव्यकृतं क्रमात् । लताख्य : सकटिच्छेदो भवेत् स्वस्तिकरेचिते ।

अर्थ - 'स्वस्तिकरेचित' अंगहारामध्ये, हात व पाय रेचित करून वृश्चिक करण करावे . नंतर वृश्चिक करण पुन्हा त्याच पद्धतीने सादर करावे . तसेच निकुट्टक करण क्रमश : उजव्या व डाव्या अंगाने सादर करून कटिच्छेदासह (कटिच्छिन्न करणासह) लताहस्ताचा वापर करावा .

## १२. पार्श्वस्वस्तिक

पार्श्वे तु स्वस्तिकं बद्ध्वा कार्यं त्वथ निकुट्टकम् ॥ १९९ ॥
द्वितीयस्य च पार्श्वस्य विधि: स्यादयमेव हि ।
ततश्च करमावर्त्य ह्यूरुपृष्ठे निपातयेत् ॥ २०० ॥
ऊरूद्वृत्तं तत: कुर्यादाक्षिप्तं पुनरेव हि ।
नितम्बं करिहस्तं च कटिच्छिन्नं तथैव च ॥ २०१ ॥
पार्श्वस्वस्तिक इत्येष ह्यङ्गहार: प्रकीर्तित: ।

पदच्छेद : - पार्श्वे तु स्वस्तिकं बद्ध्वा कार्यं तु अथ निकुट्टकम् ॥ १९९ ॥
द्वितीयस्य च पार्श्वस्य विधि : स्यात् अयम् एव हि ।
तत : च करम् आवर्त्य हि ऊरुपृष्ठे निपातयेत् ॥ २०० ॥
ऊरूद्वृत्तं तत : कुर्यात् आक्षिप्तं पुन : एव हि ।
नितम्बं करिहस्तं च कटिच्छिन्नं तथा एव च ॥ २०१ ॥
पार्श्वस्वस्तिक : इति एष : हि अङ्गहार : प्रकीर्तित : ।

अन्वय : - पार्श्वे वस्तिकं बद्ध्वा अथ निकुट्टकं कार्यम् । द्वितीयस्य च पार्श्वस्य अयम् एव विधि :

स्यात्| ततः च करम् आवर्त्य ऊरुपृष्ठे निपातयेत्| ततः ऊरूद्वृत्तम् आक्षिप्तं कुर्यात् | नितम्बं करिहस्तं च कटिच्छिन्नं तथा एव च| एषः हि अङ्गहारः पार्श्वस्वस्तिकः इति प्रकीर्तितः|

अर्थ - एका बाजूला स्वस्तिक पाय ठेवून अर्धनिकुट्टक करण करावे. दुसऱ्या बाजूने हीच क्रिया करावी. नंतर हात आवर्तित करून मांडीच्या मागच्या बाजूवर ठेवावे. त्यानंतर ऊरूद्वृत्त, आक्षिप्त, नितंब, करिहस्त आणि कटिच्छिन्न ही करणे सादर करावीत. हा अंगहार 'पार्श्वस्वस्तिक' म्हणून प्रसिद्ध आहे.

### १३. वृश्चिकापसृत

वृश्चिकं करण कृत्वा लताख्यं हस्तमेव च || २०२ ||
तमेव च करं भूयो नासाग्रे सन्निकुञ्चयेत्|
तमेवोद्वेष्टितं कृत्वा नितम्बं परिवर्तयेत् || २०३ ||
करिहस्तं कटिच्छिन्नं वृश्चिकापसृते भवेत्|

पदच्छेदः - वृश्चिकं करणं कृत्वा लता-आख्यं हस्तम् एव च || २०२ ||
तम् एव च करं भूयः नासाग्रे सन्निकुञ्चयेत्|
तम् एव उद्वेष्टितं कृत्वा नितम्बं परिवर्तयेत्|| २०३ ||
करिहस्तं कटिच्छिन्नं वृश्चिकापसृते भवेत्|

अन्वयः - वृश्चिकापसृते (करणे) वृश्चिकं करणं कृत्वा लताख्यं हस्तं (करणीयम्) | भूयः तम् एव च करं नासाग्रे सन्निकुञ्चयेत्| तम् एव उद्वेष्टितं कृत्वा नितम्बं परिवर्तयेत्| करिहस्तं कटिच्छिन्नं (च अपि) भवेत्|

अर्थ - 'वृश्चिकापसृत' अंगहारात, वृश्चिक करण करून लताहस्त करावा. पुन्हा तोच हात नाकाच्या अग्रभागी नेऊन थोडा वाकवावा व नंतर तोच हात उद्वेष्टित करून नितंब परिवर्तित करावे आणि नंतर क्रमशः करिहस्त व कटिच्छिन्न ही करणे सादर करावीत.

### १४. भ्रमर

कृत्वा नूपुरपादं तु तथाक्षिप्तकमेव च || २०४ ||
परिच्छिन्नं च कर्तव्यं सूचीपाद तथैव च|

नितम्बं करिहस्तं चाप्युरोमण्डलकं तथा ॥ २०५ ॥
कटिच्छिन्नं ततश्चैव भ्रमर: स तु संज्ञित: ।

पदच्छेद: - कृत्वा नूपुरपादं तु तथा आक्षिप्तकम् एव च ॥ २०४ ॥
परिच्छिन्नं च कर्तव्यं सूचीपाद तथा एव च ।
नितम्बं करिहस्तं च अपि उरोमण्डलकं तथा ॥ २०५ ॥
कटिच्छिन्नं तत: च एव भ्रमर : स : तु संज्ञित : ।

अन्वय: - नूपुरपादं कृत्वा तथा आक्षिप्तकं परिच्छिन्नं च कर्तव्यम् । तथैव च सूचीपाद: (सूचीपादेन सूचीविद्धं करणं कर्तव्यं तत:) नितम्बं करिहस्तम् उरोमण्डलकं कटिच्छिन्नं (च एतानि करणानि कर्तव्यानि) । स: एव भ्रमर: (अङ्गहार: इति) संज्ञित: ।

अर्थ - नूपुरपाद चारी केल्यावर आक्षिप्तक करण करावे आणि नंतर छिन्न करण करावे . तसेच सूचीपाद चारीद्वारे सूचीविद्ध करण करावे आणि नंतर क्रमश: नितंब, करिहस्त, उरोमंडल, कटिच्छिन्न या करणांचा प्रयोग करावा . या अंगहाराला 'भ्रमर' अंगहार अशी संज्ञा दिली आहे .

१५. मत्तस्खलित

मत्तल्लिकरणं कृत्वा करमावर्त्य दक्षिणम् ॥ २०६ ॥
कपोलस्य प्रदेशे तु कार्यं सम्यङ्निकुञ्चितम् ।
अपविद्धं द्रुतं चैव तलसंस्फोटसंयुतम् ॥ २०७ ॥
करिहस्तं कटिच्छिन्नं मत्तस्खलितके भवेत् ।

पदच्छेद: - मत्तल्लिकरणं कृत्वा करम् आवर्त्य दक्षिणम् ॥ २०६ ॥
कपोलस्य प्रदेशे तु कार्यं सम्यक् निकुञ्चितम् ।
अपविद्धं द्रुतं च एव तलसंस्फोट-संयुतम् ॥ २०७ ॥
करिहस्तं कटिच्छिन्नं मत्तस्खलितके भवेत् ।

अन्वय: - मत्तस्खलितके (अङ्गहारे) मत्तल्लिकरणं कृत्वा दक्षिणं करम् आवर्त्य कपोलस्य प्रदेशे तु

सम्यक् निकुञ्चितं कार्यम् | द्रुतं तलसंस्फोटसंयुतम् अपविद्धं (करणीयम् | ततः) करिहस्तं कटिच्छिन्नं (च अपि) भवेत् |

अर्थ - 'मत्तस्खलित' अंगहारामध्ये मत्तल्लिकरण करून उजवा हात आवर्तित करून गालाजवळ थोडा चांगल्या पद्धतीने वाकवावा आणि नंतर वेगाने तलसंस्फोटित करणासह अपविद्ध करण करावे . त्यानंतर, करिहस्त व कटिच्छिन्न ही करणे करावीत .

### १६. मदविलसित

दोलैः करैः प्रचलितैः स्वस्तिकापसृतैः पदैः || २०८ ||
अञ्चितैर्वलितैर्हस्तैस्तलसङ्घट्टितैस्तथा |
निकुट्टितं च कर्तव्यमूरूद्वृत्तं तथैव च || २०९ ||
करिहस्तं कटिच्छिन्नं मदाद्विलसिते भवेत् |

पदच्छेदः - दोलैः करैः प्रचलितैः स्वस्तिक-अपसृतैः पदैः || २०८ ||
अञ्चितैः वलितैः हस्तैः तलसङ्घट्टितैः तथा |
निकुट्टितं च कर्तव्यम् ऊरूद्वृत्तं तथा एव च || २०९ ||
करिहस्तं कटिच्छिन्नं मदात् विलसिते भवेत् |

अन्वयः - मदात् विलसिते (अङ्गहारे) दोलैः प्रचलितैः करैः स्वस्तिकापसृतैः पदैः अञ्चितैः वलितैः तथा तलसङ्घट्टितैः हस्तैः निकुट्टितं च कर्तव्यम् | तथैव ऊरूवृत्तं करिहस्तं कटिच्छिन्नं च भवेत् |

अर्थ - 'मदविलसित' अंगहारामध्ये दोलानृत्तहस्त करून, पायांनी स्वस्तिक करून ते मागे अपसृत करावेत . दोन्ही हात अंचित वलित करून, तलसंघट्टित हस्त करून क्रमशः निकुट्टक, ऊरूद्वृत्त, करिहस्त व कटिच्छिन्न ही करणे करावीत .

### १७. गतिमंडल

मण्डलं स्थानकं कृत्वा तथा हस्तौ च रेचितौ || २१० ||
उद्घट्टितेन पादेन मत्तल्लिकरणं भवेत् |

आक्षिप्तं करणं चैव ह्युरोमण्डलमेव च ‖ २११ ‖
कटिच्छिन्नं तथा चैव भवेत्तु गतिमण्डले |

पदच्छेद: - मण्डलं स्थानकं कृत्वा तथा हस्तौ च रेचितौ ‖ २१० ‖
उद्घट्टितेन पादेन मत्तल्लिकरणं भवेत् |
आक्षिप्तं करणं च एव हि उरोमण्डलम् एव च ‖ २११ ‖
कटिच्छिन्नं तथा च एव भवेत् तु गतिमण्डले |

अन्वय: - गतिमण्डले (अङ्गहारे) मण्डलं स्थानकं कृत्वा हस्तौ च रेचितौ (कुर्यात्) | उद्घट्टितेन पादेन मत्तल्लिकरणं भवेत् | तथा आक्षिप्तं करणम् उरोमण्डलं कटिच्छिन्नं च भवेत् |

अर्थ - 'गतिमंडल' अंगहारात मंडलस्थानामध्ये स्थित होऊन दोन्ही हात रेचित ठेवावे. पाय उद्घट्टित करून मत्तल्लिकरण करावे. तसेच आक्षिप्त, उरोमंडल व कटिच्छिन्न करणे करावीत.

## १८. परिच्छिन्न

समपादं प्रयुज्याथ परिच्छिन्नं त्वनन्तरम् ‖ २१२ ‖
आविद्धेन तु पादेन बाह्यभ्रमरकं तथा |
वामसूच्या त्वतिक्रान्तं भुजङ्गत्रासितं तथा ‖ २१३ ‖
करिहस्तं कटिच्छिन्नं परिच्छिन्ने विधीयते |

पदच्छेद: - समपादं प्रयुज्य अथ परिच्छिन्नं तु अनन्तरम् ‖ २१२ ‖
आविद्धेन तु पादेन बाह्यभ्रमरकं तथा |
वामसूच्या तु अतिक्रान्तं भुजङ्गत्रासितं तथा ‖ २१३ ‖
करिहस्तं कटिच्छिन्नं परिच्छिन्ने विधीयते |

अन्वय: - अथ समपादं प्रयुज्य अनन्तरं परिच्छिन्नं (कर्तव्यम्) | आविद्धेन पादेन बाह्यभ्रमरकं (कर्तव्यम्) | वामसूच्या तु अतिक्रान्तं भुजङ्गत्रासितं तथा करिहस्तं कटिच्छिन्नं परिच्छिन्ने विधीयते |

अर्थ - प्रथम समपाद स्थानात राहून 'छिन्न' करण करावे. नंतर पायांद्वारे आविद्ध चारी आणि बाह्यभ्रमरक करण करावे आणि डाव्या पायाने अर्धसूची, अतिक्रांत, भुजंगत्रासित,

करिहस्त व त्यानंतर कटिच्छिन्न या करणांचा प्रयोग करावा. अशा प्रकारे नऊ करणांच्या योगाने 'परिच्छिन्न' या अंगहार होतो.

### १९. परिवृत्तकरेचित

शिरसस्तूपरि स्थाप्यौ स्वस्तिकौ विच्युतौ करौ ‖ २१४ ‖
ततः सव्यं करं चापि गात्रमानम्य रेचयेत् |
पुनरूत्थापयेत्तत्र गात्रमुन्नम्य रेचितम् ‖ २१५ ‖
लताख्यौ च करौ कृत्वा वृश्चिकं सम्प्रयोजयेत् |
रेचितं करिहस्तं च भुजत्रासितं तथा ‖ २१६ ‖
आक्षिप्तकं प्रयुञ्जीत स्वस्तिकं पादमेव च |
पराङ्मुखविधिर्भूय एवमेव भवेदिह ‖ २१७ ‖
करिहस्तं कटिच्छिन्नं परिवृत्तकरेचिते |

पदच्छेद :- शिरस: तु उपरि स्थाप्यौ स्वस्तिकौ विच्युतौ करौ ‖ २१४ ‖
ततः सव्यं करं च अपि गात्रम् आनम्य रेचयेत् |
पुनः उत्थापयेत् तत्र गात्रम् उन्नम्य रेचितम् ‖ २१५ ‖
लता-आख्यौ च करौ कृत्वा वृश्चिकं सम्प्रयोजयेत् |
रेचितं करिहस्तं च भुजङ्गत्रासितं तथा ‖ २१६ ‖
आक्षिप्तकं प्रयुञ्जीत स्वस्तिकं पादम् एव च |
पराङ्मुख-विधिः भूय एवम् एव भवेत् इह ‖ २१७ ‖
करिहस्तं कटिच्छिन्नं परिवृत्तकरेचिते |

अन्वय: - परिवृत्तकरेचिते (अङ्गहारे), विच्युतौ करौ शिरस: उपरि स्वस्तिकौ स्थाप्यौ | ततः गात्रम् आनम्य सव्यं करं रेचयेत् | पुनः तत्र गात्रम् उन्नम्य रेचितं च उत्थापयेत् | लताख्यौ च करौ कृत्वा वृश्चिकं सम्प्रयोजयेत् | रेचितं करिहस्तं तथा च भुजङ्गत्रासितं आक्षिप्तकं प्रयुञ्जीत | स्वस्तिकं पादं (कृत्वा) इह पराङ्मुखविधिः भूयः एवम् एव भवेत् | (ततः) करिहस्तं कटिच्छिन्नं (च कर्तव्यम्) |

अर्थ - परिवृत्तकरेचित अंगहारामध्ये, वेगळ्या असणाऱ्या दोन्ही हातांना डोक्यावर स्वस्तिक स्थितीत आणावे . नंतर शरीर झुकवून उजवा हात रेचित करावा . शरीर पुन्हा थोडे वर उन्नत करून रेचित हस्त वर उचलावा . नंतर दोन्ही लताहस्त ठेवून वृश्चिक करण करावे . त्यानंतर क्रमाने रेचित, करिहस्त, भुजंगत्रासित, आक्षिप्तक ही करणे करावीत . नंतर स्वस्तिक पाय करून मागे वळून वरील क्रिया पुन्हा करावी . नंतर करिहस्त व कटिच्छिन्न ही करणे करावीत .

## २०. वैशाखरेचित

रेचितौ सह गात्रेण ह्यपविद्धौ करौ यदा || २१८ ||
पुनस्तेनैव देशेन गात्रमुन्नम्य रेचयेत् |
कुर्यान्नूपुरपादं च भुजङ्गत्रासितं तथा || २१९ ||
रेचितं मण्डलं चैव बाहुशीर्षे निकुञ्चयेत् |
ऊरूद्वृत्तं तथाक्षिप्तमुरोमण्डलमेव च || २२० ||
करिहस्तं कटिच्छिन्न कुर्याद्वैशाखरेचिते |

पदच्छेद : - रेचितौ सह गात्रेण हि अपविद्धौ करौ यदा || २१८ ||
पुन: तेन एव देशेन गात्रम् उन्नम्य रेचयेत् |
कुर्यात् नूपुरपादं च भुजङ्गत्रासितं तथा || २१९ ||
रेचितं मण्डलं च एव बाहुशीर्षे निकुञ्चयेत् |
ऊरूद्वृत्तं तथा आक्षिप्तम् उरोमण्डलम् एव च || २२० ||
करिहस्तं कटिच्छिन्नं कुर्यात् वैशाखरेचिते |

अन्वय: - यदा गात्रेण सह हि रेचितौ अपविद्धौ करौ (क्रियेते)| पुन: तेनैव देशेन गात्रम् उन्नम्य रेचयेत् | (तत:) नूपुरपादं तथा च भुजङ्गत्रासितं कुर्यात् |रेचितं मण्डलं च (कृत्वा) बाहुशीर्षे निकुञ्चयेत् | ऊरूद्वृत्तम् आक्षिप्तम् उरोमण्डलं करिहस्तं कटिच्छिन्नं कुर्यात् वैशाखरेचिते |

अर्थ - 'वैशाखरेचित' अंगहारात, शरीरासह रेचित करीत दोन्ही हात अपविद्ध केले जातात .

पुन्हा त्याच दिशेने शरीर उचलत रेचित केले जाते. नंतर नूपुरपाद, भुजंगत्रासित, रेचित व मंडल (स्वस्तिक) या करणांसह खांदे झुकवावे. त्यानंतर ऊरूद्वृत्त, आक्षिप्तक, उरोमंडल, करिहस्त व कटिच्छिन्न ही करणे प्रयुक्त करावीत.

## २१. परावृत्त

आद्यं तु जनितं कृत्वा पादमेकं प्रसारयेत् ॥ २२१ ॥
तथैवालातकं कुर्यात् त्रिकं तु परिवर्तयेत् ।
अञ्चितं वामहस्तं च गण्डदेशे निकुट्टयेत् ॥ २२२ ॥
कटिच्छिन्नं तथा चैव परावृत्ते प्रयोजयेत् ।

पदच्छेद :- आद्यं तु जनितं कृत्वा पादम् एकं प्रसारयेत् ॥ २२१ ॥
तथा एव अलातकं कुर्यात् त्रिकं तु परिवर्तयेत् ।
अञ्चितं वामहस्तं च गण्डदेशे निकुट्टयेत् ॥ २२२ ॥
कटिच्छिन्नं तथा च एव परावृत्ते प्रयोजयेत् ।

अन्वय : - आद्यं जनितं कृत्वा एकं पादं प्रसारयेत् । तथा एव अलातकं कुर्यात् त्रिकं तु परिवर्तयेत् । अञ्चितं वामहस्तं गण्डदेशे निकुट्टयेत् । तथैव च कटिच्छिन्नं परावृत्ते प्रयोजयेत् ।

अर्थ - प्रथम जनित करण करून नंतर एक पाय पसरावा. नंतर अलातक करण करावे. त्रिकास परिवर्तित करावे. नंतर डावा हात निकुंचित करून गालावर वाकवावा आणि तसेच कटिच्छिन्न करण करावे. अशा प्रकारे सहा करणांच्या योगाने परावृत्त अग्गहार होतो.

## २२. अलातक

स्वस्तिकं करणं कृत्वा व्यंसितौ च करौ पुनः ॥ २२३ ॥
अलातकं प्रयुञ्जीत ह्यूर्ध्वजानु निकुञ्चितम् ।
अर्धसूची च विक्षिप्तमुद्वृत्ताक्षिप्तके तथा ॥ २२४ ॥
करिहस्तं कटिच्छिन्नमङ्गहारे ह्यलातके ।

पदच्छेद: - स्वस्तिकं करणं कृत्वा व्यंसितौ च करौ पुन: ‖ २२३ ‖
अलातकं प्रयुञ्जीत हि ऊर्ध्वजानु निकुञ्चितम् ।
अर्धसूची च विक्षिप्तम् उद्वृत्त-आक्षिप्तके तथा ‖ २२४ ‖
करिहस्तं कटिच्छिन्नम् अङ्गहारे हि अलातके ।

अन्वय: - स्वस्तिकं करणं कृत्वा व्यंसितौ करौ (कुर्यात्) । (तत:) अलातकं ऊर्ध्वजानु निकुञ्चितं प्रयुञ्जीत । अर्धसूची विक्षिप्तम् उद्वृत्ताक्षिप्तके करिहस्तं कटिच्छिन्नम् अलातके अङ्गहारे (कुर्वीत) ।

अर्थ - स्वस्तिक करण करून दोन्ही हात 'व्यंसित' करावेत . नंतर अलातक, ऊर्ध्वजानु, निकुंचित, अर्धसूची, विक्षिप्त, उद्वृत्त, आक्षिप्तक, करिहस्त आणि कटिच्छिन्न ही करणे करावीत . या करणांद्वारे 'अलातक' अंगहार होतो .

## २३. पार्श्वच्छेद

निकुट्य वक्षसि करावूर्ध्वजानु प्रयोजयेत् ‖ २२५ ‖
आक्षिप्तस्वस्तिकं कृत्वा त्रिकं तु परिवर्तयेत् ।
उरोमण्डलकौ हस्तौ नितम्बं करिहस्तकम् ‖ २२६ ‖
कटिच्छिन्नं तथा चैव पार्श्वच्छेदे विधीयते ।

पदच्छेद: - निकुट्य वक्षसि करौ ऊर्ध्वजानु प्रयोजयेत् ‖ २२५ ‖
आक्षिप्त-स्वस्तिकं कृत्वा त्रिकं तु परिवर्तयेत् ।
उरोमण्डलकौ हस्तौ नितम्बं करिहस्तकम् ‖ २२६ ‖
कटिच्छिन्नं तथा च एव पार्श्वच्छेदे विधीयते ।

अन्वय: - निकुट्य करौ वक्षसि (स्थापयित्वा) ऊर्ध्वजानु प्रयोजयेत् । (तत:) आक्षिप्तस्वस्तिकं कृत्वा त्रिकं परिवर्तयेत् । उरोमण्डलकौ हस्तौ नितम्बं करिहस्तकं कटिच्छिन्नं (करणं) पार्श्वच्छेदे विधीयते ।

अर्थ - 'पार्श्वच्छेद' अंगहारामध्ये, निकुट्टित हस्त छातीजवळ ठेवून ऊर्ध्वजानु करण करावे . त्यानंतर आक्षिप्त व स्वस्तिक करण करून त्रिकास परिवर्तित करावे . नंतर हातांनी आणि पायांनी उरोमंडलक, नितंब, करिहस्त व कटिच्छिन्न ही करणे करावीत .

## २४. विद्युद्भ्रांत

सूचीवामपदं दद्याद्विद्युद्भ्रान्तं च दक्षिणम् ॥२२७॥
दक्षिणेन पुनः सूची विद्युद्भ्रान्तं वामतः।
परिच्छिन्नं तथा चैव ह्यतिक्रान्तं च वामकम् ॥२२८॥
लताख्यं सकटिच्छिन्नं विद्युद्भ्रान्तश्च स स्मृतः।

पदच्छेदः - सूचीवामपदं दद्यात् विद्युद्भ्रान्तं च दक्षिणम् ॥२२७॥
दक्षिणेन पुनः सूची विद्युद्भ्रान्तं वामतः।
परिच्छिन्नं तथा च एव हि अतिक्रान्तं च वामकम् ॥२२८॥
लता-आख्यं सकटिच्छिन्नं विद्युद्भ्रान्तः च सः स्मृतः।

अन्वयः - सूचीवामपदं, दक्षिणं विद्युद्भ्रान्तं च दद्यात् । दक्षिणेन पुनः सूची वामतः विद्युद्भ्रान्तं (दद्यात्)। तथा च परिच्छिन्नं, वामकम् अतिक्रान्तं च (करणीयम्) । (ततः) सकटिच्छिन्नं लताख्यं (करणीयम्)। सः च विद्युद्भ्रान्तः स्मृतः।

अर्थ - प्रथम डाव्या पायाने सूची चारी करून उजव्या पायाने विद्युद्भ्रांत चारी करावी. नंतर उजव्या अंगाने सूची पाद चारी आणि डाव्या पायाने विद्युद्भ्रांत करण सादर करावे. नंतर छिन्न करण करून डाव्या अंगाने अतिक्रांत करण करावे. नंतर कटिच्छिन्न करणासह लतावृश्चिक करण करावे. हा अंगहार 'विद्युद्भ्रांत' म्हणून ओळखला जातो.

## २५. उद्वृत्तक

कृत्वा नूपुरपादं तु सव्यवामौ प्रलम्बितौ ॥ २२९ ॥
करौ पार्श्वे ततस्ताभ्यां विक्षिप्तं सम्प्रयोजयेत् ।
ताभ्यां सूची तथा चैव त्रिकं तु परिवर्तयेत् ॥ २३० ॥
लताख्यं सकटिच्छिन्नं कुर्यादुद्वृत्तके सदा ।

पदच्छेदः - कृत्वा नूपुरपादं तु सव्यवामौ प्रलम्बितौ ॥ २२९ ॥
करौ पार्श्वे ततः ताभ्यां विक्षिप्तं सम्प्रयोजयेत्।

ताभ्यां सूची तथा च एव त्रिकं तु परिवर्तयेत् ॥ २३० ॥
लता-आख्यं सकटिच्छिन्नं कुर्यात् उद्वृत्तके सदा ।

अन्वय: - नूपुरपादं कृत्वा सव्यवामौ करौ पार्श्वे प्रलम्बितौ (कर्तव्यौ) । ततः ताभ्यां विक्षिप्तं सम्प्रयोजयेत् । ताभ्यां सूची (कृत्वा) त्रिकं तु परिवर्तयेत् । सकटिच्छिन्नं सदा लताख्यं (करणम्) उद्वृत्तके (अङ्गहारे) कुर्यात् ।

अर्थ - 'उद्वृत्तक' अंगहारात, नूपुर पाद चारी करून उजवा व डावा हात बाजूला झुलत ठेवावा. नंतर त्या दोन्ही हातांनी विक्षिप्त करण करावे. तसेच त्या दोन्ही हातांनी सूची करण करून त्रिक परिवर्तित करावे व शेवटी कटिच्छिन्नासह लतावृश्चिक करण करावे.

## २६. आलीढ

आलीढव्यंसितौ हस्तौ बाहुशीर्षे निकुट्टयेत् ॥२३१ ॥
नूपुरश्चरणो वामस्तथालातश्च दक्षिणः ।
तेनैवाक्षिप्तकं कुर्यादुरोमण्डलकौ करौ ॥२३२ ॥
करिहस्तं कटिच्छिन्नमालीढे सम्प्रयोजयेत् ।

पदच्छेद: - आलीढव्यंसितौ हस्तौ बाहुशीर्षे निकुट्टयेत् ॥ २३१ ॥
नूपुरः चरणः वामः तथा अलातः च दक्षिणः ।
तेन एव आक्षिप्तकं कुर्यात् उरोमण्डलकौ करौ ॥ २३२ ॥
करिहस्तं कटिच्छिन्नम् आलीढे सम्प्रयोजयेत् ।

अन्वय: - आलीढव्यंसितौ हस्तौ बाहुशीर्षे निकुट्टयेत् । वामः चरणः नूपुरः तथा च दक्षिणः अलातः (कृत्वा) तेन एव आक्षिप्तकं कुर्यात् । उरोमण्डलकौ करौ (कृत्वा) करिहस्तं कटिच्छिन्नम् आलीढे (अङ्गहारे) सम्प्रयोजयेत् ।

अर्थ - 'आलीढ' अंगहारामध्ये, आलीढ स्थानकासह व्यंसित करण करून दोन्ही हातांना खांद्यावर निकुट्टित करावे. नंतर डाव्या पायाने नूपुर करण व उजव्या पायाने अलातक करण करून त्याच हाताने आक्षिप्तक करण करावे. दोन्ही हातांनी उरोमंडल करून शेवटी करिहस्त व कटिच्छिन्न करणे सादर करावीत.

## २७. रेचित

हस्तं तु रेचित कृत्वा पार्श्वमानस्य रेचयेत् ॥२३३ ॥
पुनस्तेनैव योगेन गात्रमानम्य रेचयेत् ।
रेचितं करणं कार्यमुरोण्डलमेव च ॥२३४ ॥
कटिच्छिन्नं तु कर्तव्यमहारे तु रेचिते ।

पदच्छेद : - हस्तं तु रेचितं कृत्वा पार्श्वम् आनम्य रेचयेत् ॥ २३३ ॥
पुन : तेन एव योगेन गात्रम् आनम्य रेचयेत् ।
रेचितं करणं कार्यम् उरोमण्डलम् एव च ॥ २३४ ॥
कटिच्छिन्नं तु कर्तव्यम् अङ्गहारे तु रेचिते ।

अन्वय : - रेचिते अङ्गहारे, हस्तं रेचितं कृत्वा पार्श्वम् आनम्य रेचयेत् । पुन : तेन एव योगेन गात्रम् आनम्य रेचयेत् । तत : रेचितं करणं कार्यम् । उरोमण्डलं कटिच्छिन्नम् अपि कर्तव्यम् ।

अर्थ - हात रेचित करून पार्श्वभागी झुकवून रेचित करावे. त्याच अवस्थेत शरीर सुद्धा झुकवावे व नंतर क्रमाने रेचित, उरोमंडल व कटिच्छिन्न करण केल्यास 'रेचित' अंगहार होतो.

## २८. आच्छुरित

नूपुरं चरणं कृत्वा त्रिकं तु परिवर्तयेत् ॥२३५ ॥
व्यंसितेन तु हस्तेन त्रिकमेव विवर्तयेत् ।
वामं चालातकं कृत्वा सूचीमत्रैव योजयेत् ॥ २३६ ॥
करिहस्तं कटिच्छिन्नं कुर्यादाच्छुरिते सदा ।

पदच्छेद : - नूपुरं चरणं कृत्वा त्रिकं तु परिवर्तयेत् ॥ २३५ ॥
व्यंसितेन तु हस्तेन त्रिकम् एव विवर्तयेत् ।

वामं च अलातकं कृत्वा सूचीम् अत्र एव योजयेत् ‖ २३६ ‖
करिहस्तं कटिच्छिन्नं कुर्यात् आच्छुरिते सदा |

अन्वयः - आच्छुरिते सदा नूपुरं चरणं कृत्वा त्रिकं परिवर्तयेत् | ततः व्यंसितेन हस्तेन त्रिकम् एव विवर्तयेत् | ततः वामं च अलातकं कृत्वा अत्र सूचीं योजयेत् | ततः करिहस्तं कटिच्छिन्नं च कुर्यात् |

अर्थ - नूपुर पादचारी करून त्रिकास परिवर्तित करावे. नंतर व्यंसित करण करून हस्त स्थिर ठेवून त्रिकाला परिवर्तित करावे. नंतर डाव्या पायाने अलातक चारी करून सूची करण करावे. त्यानंतर करिहस्त व कटिच्छिन्न करणे करावीत. त्याला 'आच्छुरित' अंगहार असे म्हणतात.

## २९. आक्षिप्तरेचित

रेचितौ स्वस्तिकौ पादौ रेचितौ स्वस्तिकौ करौ ‖२३७ ‖
कृत्वा विश्लेषमेवं तु तेनैव विधिना पुनः |
पुनरुत्क्षेपणं चैव रेचितैरेव कारयेत् ‖२३८ ‖
उद्वृत्ताक्षिप्तके चैव ह्युरोमण्डलमेव च |
नितम्बं करिहस्तं च कटिच्छिन्नं तथैव च ‖२३९ ‖
आक्षिप्तरेचितो ह्येष करणानां विधिः स्मृतः |

पदच्छेदः - रेचितौ स्वस्तिकौ पादौ रेचितौ स्वस्तिकौ करौ ‖२३७‖
कृत्वा विश्लेषम् एवं तु तेन एव विधिना पुनः |
पुनः उत्क्षेपणं च एव रेचितैः एव कारयेत् ‖२३८ ‖
उद्वृत्त-आक्षिप्तके च एव हि उरोमण्डलम् एव च |
नितम्बं करिहस्तं च कटिच्छिन्नं तथा एव च ‖२३९ ‖
आक्षिप्तरेचितः हि एषः करणानां विधिः स्मृतः |

अन्वयः - रेचितौ स्वस्तिकौ पादौ रेचितौ स्वस्तिकौ करौ कृत्वा तेनैव विधिना पुनः विश्लेषं (कर्तव्यम्)| पुनः रेचितैः एव उत्क्षेपणं कारयेत् | उद्वृत्ताक्षिप्तके उरोमण्डलं नितम्बं

करिहस्तं कटिच्छिन्नं च (कुर्यात्) | एष: करणानां विधि: आक्षिप्तरेचित: (इति) स्मृत:|

अर्थ - दोन्ही स्वस्तिक स्थितीत असणारे पाय व हात रेचित करून पुन्हा त्याच विधीने वेगवेगळे करावे. त्यानंतर रेचित क्रियेद्वारे हात उत्क्षेपण करावे. नंतर उद्वृत्त, आक्षिप्तक, उरोमंडल, नितंब, करिहस्त, कटिच्छिन्न ही करणे करावी. या करणांनी होणाऱ्या विधीला 'आक्षिप्तरेचित' अंगहार असे म्हणतात.

### ३०. संभ्रांत

विक्षिप्तं करणं कृत्वा हस्तपादं मुखानुगम् || २४० ||
वामसूचीसमं कृत्वा विक्षिपेद्वामकं करम् |
वक्ष:स्थाने भवेत्सव्यो वलितं त्रिकमेव च || २४१ ||
नूपुराक्षिप्तके चैव ह्यर्धस्वस्तिकमेव च |
नितम्बं करिहस्तं च ह्युरोमण्डलकं तथा || २४२ ||
कटिच्छिन्नं च कर्तव्यं सम्भ्रान्ते नृत्तयोक्तृभि: |

पदच्छेद: - विक्षिप्तं करणं कृत्वा हस्तपादं मुख-अनुगम् ||२४० ||
वामसूचीसमं कृत्वा विक्षिपेत् वामकं करम्|
वक्ष:स्थाने भवेत् सव्य: वलितं त्रिकम् एव च ||२४१ ||
नूपुर-आक्षिप्तके च एव हि अर्धस्वस्तिकम् एव च|
नितम्बं करिहस्तं च हि उरोमण्डलकं तथा ||२४२ ||
कटिच्छिन्नं च कर्तव्यं सम्भ्रान्ते नृत्त-योक्तृभि:|

अन्वय: - विक्षिप्तं करणं कृत्वा हस्तपादं मुखानुगं (कुर्यात्)| वामकं करं वामसूचीसमं कृत्वा विक्षिपेत् | सव्य: वक्ष:स्थाने त्रिकं च वलितम् एव भवेत् | नूपुराक्षिप्तके अर्धस्वस्तिकं नितम्बं करिहस्तम् उरोमण्डलकं तथा कटिच्छिन्नं च नृत्तयोक्तृभि: सम्भ्रान्ते (अङ्गहारे) कर्तव्यम्|

अर्थ - विक्षिप्त करण केल्यावर दोन्ही हात व पाय मुखाला अनुसरून करावेत. डाव्या हाताने सूची करून तोच डावा हात विक्षिप्त करावा. उजवा हात छातीवर ठेवून त्रिक परिवर्तित

करावे. नंतर नूपुर, आक्षिप्तक, अर्धस्वस्तिक, नितंब, करिहस्त, उरोमंडल व कटिच्छिन्न ही करणे सादर करावीत. नृत्ताचा प्रयोग करणाऱ्यांनी यास 'संभ्रांत' अंगहार असे म्हटले आहे.

### ३१. अपसर्पित

अपक्रान्तक्रमं कृत्वा व्यंसितं हस्तमेव च ॥ २४३ ॥
कुर्यादुद्वेष्टितं चैव ह्यर्धसूची तथैव च ।
विक्षिप्तं सकटिच्छिन्नमुद्वृत्ताक्षिप्तके तथा ॥ २४४ ॥
करिहस्तं कटिच्छिन्नं कर्तव्यमपसर्पिते ।

पदच्छेद :- अपक्रान्तक्रमं कृत्वा व्यंसितं हस्तम् एव च ॥२४३ ॥
कुर्यात् उद्वेष्टितं च एव हि अर्धसूची तथा एव च ।
विक्षिप्तं सकटिच्छिन्नम् उद्वृत्त-आक्षिप्तके तथा ॥२४४ ॥
करिहस्तं कटिच्छिन्नं कर्तव्यम् अपसर्पिते ।

अन्वय: - अपसर्पिते (अङ्गहारे) अपक्रान्तक्रमं कृत्वा व्यंसितं उद्वेष्टितं तथैव अर्धसूची च हस्तं कुर्यात् । विक्षिप्तं सकटिच्छिन्नम् उद्वृत्ताक्षिप्तके तथा करिहस्तं कटिच्छिन्नं कर्तव्यम् ।

अर्थ - 'अपसर्पितक' या अंगहारामध्ये, अपक्रांत करण करून हात व्यंसित करणात करावे. उद्वेष्टित हात फिरवून अर्धसूची, विक्षिप्त, कटिच्छिन्न, उद्वृत्त, आक्षिप्तक, करिहस्त आणि कटिच्छिन्न ही करणे करावीत.

### ३२. अर्धनिकुट्टक

कृत्वा नूपुरपादं च द्रुतमाक्षिप्य च क्रमम् ॥२४५ ॥
पादस्य चानुगौ हस्तौ त्रिकं च परिवर्तयेत् ।
निकुट्य करपादं चाप्युरोमण्डलकं पुन: ॥२४६ ॥
करिहस्तं कटिच्छिन्नं कार्यमर्धनिकुट्टके ।
द्वात्रिंशदेते सम्प्रोक्ता ह्यङ्गहारा द्विजोत्तमा: ॥२४७ ॥

पदच्छेद : - कृत्वा नूपुरपादं च द्रुतम् आक्षिप्य च क्रमम् ||२४५ ||
पादस्य च अनुगौ हस्तौ त्रिकं च परिवर्तयेत् |
निकुट्य करपादं च अपि उरोमण्डलकं पुन: ||२४६ ||
करिहस्तं कटिच्छिन्नं कार्यम् अर्धनिकुट्टके |
द्वात्रिंशत् एते सम्प्रोक्ता : हि अङ्गहारा : द्विजोत्तमा : ||२४७ ||

अन्वय : - नूपुरपादं कृत्वा द्रुतम् च आक्षिप्य क्रमम् (कुर्यात्) | पादस्य अनुगौ हस्तौ त्रिकं च परिवर्तयेत् | करपादं च निकुट्य पुन: उरोमण्डलकं करिहस्तं कटिच्छिन्नं कार्यम् अर्धनिकुट्टके (अङ्गहारे) | हे द्विजोत्तमा:, (एवम् अत्र) एते द्वात्रिंशत् अङ्गहारा: सम्प्रोक्ता: |

अर्थ - 'अर्धनिकुट्टक' अंगहारामध्ये, नूपुरपाद चारी करून लगेचच हातपाय आक्षिप्त करावेत . हातांची स्थिती पायानुसार करावी आणि त्रिक परिवर्तित करावे . नंतर हात व पायांची निकुट्ट क्रिया करून क्रमाने उरोमंडल करण करावे . शेवटी करिहस्त व कटिच्छिन्न ही करणे करावी . हे मुनिजनहो ! अशाप्रकारे या ठिकाणी बत्तीस अंगहार सांगितले .

❖ रेचकाचे प्रकार ❖

१. पादरेचक, २. कटिरेचक, ३. हस्तरेचक, ४. कंठरेचक (ग्रीवारेचक)

चतुरो रेचिकांश्चापि गदतो मे निबोधत |
पादरेचक एक: स्यात् द्वितीय: कटिरेचक : ||२४८ ||
कररेचकस्तृतीयस्तु चतुर्थ: कण्ठरेचक: |

पदच्छेद : - चतुर : रेचिकान् च अपि गदत : मे निबोधत |
पादरेचक : एक : स्यात् द्वितीय : कटिरेचक : ||२४८ ||
कररेचक : तृतीय : तु चतुर्थ : कण्ठरेचक : |

अन्वय : - गदत: मे चतुर: रेचिकान् च अपि निबोधत | एक: पादरेचक: द्वितीय: कटिरेचक: तृतीय : कररेचक : चतुर्थ : तु कण्ठरेचक: (ग्रीवारेचक) स्यात् |

अर्थ - हे सांगितल्यानंतर आता चार प्रकारचे रेचक देखील तुम्ही जाणून घ्या . पहिला पादरेचक, दुसरा कटिरेचक, तिसरा कररेचक व चौथा कंठरेचक आहे .

[रेचिताख्य: पृथग्भावे वलने चाभिधीयते ||
उद्वाहनात्पृथग्भावाच्चलनाच्चापि रेचक: |

पदच्छेद: - [रेचित-आख्य: पृथक् भावे वलने च अभिधीयते ||
उद्वाहनात् पृथक् भावात् चलनात् च अपि रेचक: |

अन्वय: - [ पृथक् भावे वलने च रेचिताख्य: अभिधीयते | उद्वाहनात् पृथक् भावात् चलनात् च अपि रेचक: (इति कथ्यते)|

अर्थ - वेगवेगळ्या क्रियांनी अंग वळविणे यास 'रेचित' ही संज्ञा दिली जाते . वर उचलणे, वेगवेगळ्या क्रिया करणे आणि चलन करणे यांमुळेसुद्धा त्याला 'रेचक' असे म्हटले जाते .

पार्श्वात्पार्श्वे तु गमनं स्खलितैश्चलितै: पदै:||
विविधैश्चैव पादस्य पादरेचक उच्यते |

पदच्छेद: - पार्श्वात् पार्श्वे तु गमनं स्खलितै: चलितै: पदै:||
विविधै: च एव पादस्य पादरेचक: उच्यते |

अन्वय: - विविधै: स्खलितै: चलितै: पदै: पार्श्वात् पार्श्वे पादस्य गमनं चेत् स: 'पादरेचक:' (इति) उच्यते |

अर्थ - वेगवेगळ्या अडखळणाऱ्या आणि हलणाऱ्या पायांनी एका बाजूकडून दुसऱ्या बाजूला जाणे, त्याला 'पादरेचक' असे म्हणतात .

त्रिकस्योद्वर्तनं चैव कटीवलनमेव च ||
तथाऽपसर्पणं चैव कटिरेचक उच्यते |

पदच्छेद: - त्रिकस्य उद्वर्तनं च एव कटीवलनम् एव च ||
तथा अपसर्पणं च एव कटिरेचक उच्यते |

अन्वय: - त्रिकस्य उद्वर्तनं कटीवलनं तथा च अपसर्पणं 'कटिरेचक:' (इति) उच्यते |

अर्थ - त्रिकास वर उचलणे, कंबर गोल फिरवणे आणि तसेच परत मागे येणे, या क्रियेला 'कटिरेचक' असे म्हणतात .

उद्वर्तनं परिक्षेपो विक्षेप: परिवर्तनम् ||
विसर्पणं च हस्तस्य हस्तरेचक उच्यते |

पदच्छेद: - उद्वर्तनं परिक्षेप: विक्षेप: परिवर्तनम् ||
विसर्पणं च हस्तस्य हस्तरेचक: उच्यते |

अन्वय: - हस्तस्य उद्वर्तनं परिक्षेप: विक्षेप: परिवर्तनं विसर्पणं च 'हस्तरेचक:' (इति)उच्यते |

अर्थ - हात वर उचलणे, फेकणे, खाली आणणे, गोल फिरवणे व परत आणणे या क्रियांना 'हस्तरेचक' असे म्हणतात .

उद्वाहनं सन्नमनं तथा पार्श्वस्य सन्नति: ||
भ्रमणं चापि विज्ञेयो ग्रीवाया रेचको बुधै: |

पदच्छेद: - उद्वाहनं सन्नमनं तथा पार्श्वस्य सन्नति: ||
भ्रमणं च अपि विज्ञेय: ग्रीवाया: रेचक: बुधै: |

अन्वय: - ग्रीवाया: उद्वाहनं सन्नमनं तथा पार्श्वस्य सन्नति: भ्रमणं च ' रेचक:' (इति) बुधै: विज्ञेय: |

अर्थ - मान वर उचलणे, वाकविणे, तसेच बाजूला वाकविणे आणि गोल फिरवणे यास बुद्धिमानांनी 'कंठरेचक' असे म्हटले आहे .

### ❖ पिंडीबंधांचा क्रम, नावे आणि लक्षणे ❖

रैचकैरङ्गहारैश्च नृत्यन्तं वीक्ष्य शङ्करम् ||२४९ ||
सुकुमारप्रयोगेण नृत्यन्तीं चैव पार्वतीम् |
मृदङ्गभेरीपटहैर्भाण्डडिण्डिमगोमुखै: ||२५० ||
पणवैर्दर्दुरैश्चैव सर्वातोद्यै: प्रवादितै: |
दक्षयज्ञे विनिहते सन्ध्याकाले महेश्वर: ||२५१ ||
नानाङ्गहारै: प्रानृत्यल्लयतालवशानुगै: |

पिण्डीबन्धांस्ततो दृष्ट्वा नन्दिभद्रमुखा गणाः ॥२५२ ॥
चक्रुस्ते नाम पिण्डीनां बन्धमासां सलक्षणम् ।

पदच्छेद: - रैचकै: अङ्गहारै: च नृत्यन्तं वीक्ष्य शङ्करम् ॥ २४९ ॥
सुकुमार-प्रयोगेण नृत्यन्तीं च एव पार्वतीम् ।
मृदङ्ग-भेरी-पटहै: भाण्ड-डिण्डिम-गोमुखै: ॥ २५० ॥
पणवै: दर्दुरै: च एव सर्व-आतोद्यै: प्रवादितै: ।
दक्ष-यज्ञे विनिहते सन्ध्याकाले महेश्वर: ॥ २५१ ॥
नाना-अङ्गहारै: प्रानृत्यत् लय-ताल-वश-अनुगै: ।
पिण्डी-बन्धान् तत: दृष्ट्वा नन्दि-भद्रमुखा: गणा: ॥२५२ ॥
चक्रु: ते नाम पिण्डीनां बन्धम् आसां सलक्षणम् ।

अन्वय: - दक्षयज्ञे विनिहते सन्ध्याकाले मृदङ्गभेरीपटहै: भाण्डडिण्डिमगोमुखै: पणवै: दर्दुरै: च एव सर्वातोद्यै: प्रवादितै: लयतालवशानुगै: नानाङ्गहारै: महेश्वर: प्रानृत्यत् । रैचकै: अङ्गहारै: च नृत्यन्तं शङ्करं वीक्ष्य तथा सुकुमारप्रयोगेण नृत्यन्तीं पार्वतीं वीक्ष्य पिण्डीबन्धान् च दृष्ट्वा तत: ते नन्दिभद्रमुखा: गणा: पिण्डीनां बन्धम् आसां सलक्षणं नाम चक्रु: ।

अर्थ - दक्षाच्या यज्ञाचा विध्वंस झाल्यावर संध्याकाळच्या वेळी मृदंग, भेरी, पटह, भांड, डिंडिम, गोमुख, पणव व दर्दुर इ. सर्व वाद्य वाजवत ताल व लयींनुसार विविध अंगहारांसह महेश्वर शंकराने नृत्य केले. रेचक व अंगहारांनी युक्त नाचणाऱ्या शिवाला पाहून आणि सुकुमार प्रयोगाने युक्त असे नृत्य करणाऱ्या पार्वतीला पाहून तसेच पिंडीबंधाना पाहून नंदी व भद्रमुख गणांनी त्या पिंडींच्या संरचनांची लक्षणे व नावे सांगितली.

ईश्वरस्येश्वरी पिण्डी नन्दिनश्चापि पट्टसी ॥२५३ ॥
चण्डिकाया भवेत्पिण्डी तथा वै सिंहवाहिनी ।
तार्क्ष्यपिण्डी भवेद्विष्णो: पद्मपिण्डी स्वयम्भुव: ॥२५४ ॥
शक्रस्यैरावती पिण्डी झषपिण्डी तु मान्मथी ।

शिखिपिण्डी कुमारस्य रूपपिण्डी भवेच्छ्रियः ॥२५५ ॥
धारापिण्डी च जाह्नव्याः पाशपिण्डी यमस्य च ।
वारूणी च नदीपिण्डी याक्षी स्याद्धनदस्य तु॥२५६ ॥
हलपिण्डी बलस्यापि सर्पपिण्डी तु भोगिनाम् ।
गाणेश्वरी महापिण्डी दक्षयज्ञविमर्दिनी ॥२५७ ॥
त्रिशूलाकृतिसंस्थाना रौद्री स्यादन्धकद्विषः ।
एवमन्यास्वपि तथा देवतासु यथाक्रमम् ॥२५८ ॥
ध्वजभूताः प्रयोक्तव्याः पिण्डीबन्धाः सुचिह्निताः ।

पदच्छेदः - ईश्वरस्य ईश्वरी पिण्डी नन्दिनः च अपि पट्टसी ॥ २५३ ॥
चण्डिकायाः भवेत् पिण्डी तथा वै सिंहवाहिनी ।
तार्क्ष्यपिण्डी भवेत् विष्णोः पद्मपिण्डी स्वयम्भुवः ॥ २५४ ॥
शक्रस्य ऐरावती पिण्डी झषपिण्डी तु मान्मथी ।
शिखिपिण्डी कुमारस्य रूपपिण्डी भवेत् श्रियः ॥ २५५ ॥
धारापिण्डी च जाह्नव्याः पाशपिण्डी यमस्य च ।
वारूणी च नदीपिण्डी याक्षी स्यात् धनदस्य तु ॥ २५६ ॥
हलपिण्डी बलस्य अपि सर्पपिण्डी तु भोगिनाम् ।
गाणेश्वरी महापिण्डी दक्षयज्ञविमर्दिनी ॥ २५७ ॥
त्रिशूल-आकृति-संस्थाना रौद्री स्यात् अन्धक-द्विषः ।
एवम् अन्यासु अपि तथा देवतासु यथाक्रमम् ॥ २५८ ॥
ध्वजभूताः प्रयोक्तव्याः पिण्डीबन्धाः सुचिह्निताः ।

अन्वयः - ईश्वरस्य ईश्वरी पिण्डी, नन्दिनः पट्टसी, तथा चण्डिकायाः पिण्डी सिंहवाहिनी भवेत् । विष्णोः तार्क्ष्यपिण्डी, स्वयम्भुवः पद्मपिण्डी भवेत् । शक्रस्य ऐरावती पिण्डी, मान्मथी झषपिण्डी, कुमारस्य शिखिपिण्डी, श्रियः रूपपिण्डी भवेत् । जाह्नव्याः धारापिण्डी, यमस्य पाशपिण्डी, वारूणी नदीपिण्डी, धनदस्य तु याक्षी स्यात् । बलस्य हलपिण्डी , भोगिनां तु सर्पपिण्डी, गाणेश्वरी दक्षयज्ञविमर्दिनी महापिण्डी, अन्धकद्विषः

त्रिशूलाकृतिसंस्थाना रौद्री स्यात् | एवम् अन्यासु देवतासु यथाक्रमं ध्वजभूता: पिण्डीबन्धा: सुचिह्निता: प्रयोक्तव्या:|

अर्थ - विविध देवगण व देवींच्या नावाच्या आधारे या पिंडीबंधांची नावे ठेवली आहेत. ईश्वराची पिंडी ईश्वरी, नंदीची पट्टसी, चंडिकेची सिंहवाहिनी असते. विष्णूची तार्क्ष्य पिंडी, स्वयंभूची (ब्रह्मदेवाची) पद्मपिंडी, शक्राची ऐरावतीपिंडी, मन्मथाची मत्स्यपिंडी, कुमाराची मयूरपिंडी, लक्ष्मीची घुबडपिंडी, जाह्नवीची प्रवाहपिंडी, यमाची पाशपिंडी, वरुणाची नदीपिंडी, कुबेराची याक्षीपिंडी असते. बलरामाची हलपिंडी, सर्पांची सर्प पिंडी, शिवगणांची दक्षयज्ञविमर्दिनी नावाची महापिंडी आणि अन्धकासुराचा वध करणाऱ्या शिवाची त्रिशूलाची आकृती असलेली रौद्री नावाची पिंडी असते. अशाप्रकारे इतर देवी-देवतांच्या बाबतीत क्रमश: ठरलेल्या ध्वजांवर चिह्नांकित झालेल्या पिंडीबंधांचा प्रयोग करावा.

## ❖ तांडवलक्षण ❖

रेचका अङ्गहाराश्च पिण्डीबन्धास्तथैव च || २५९ ||
सृष्ट्वा भगवता दत्तास्तण्डवे मुनये तदा |
तेनापि हि तत: सम्यग्गानभाण्डसमन्वित: || २६० ||
नृत्तप्रयोग: सृष्टो य: स ताण्डव इति स्मृत: |

पदच्छेद: - रेचका: अङ्गहारा: च पिण्डीबन्धा: तथा एव च || २५९ ||
सृष्ट्वा भगवता दत्ता: तण्डवे मुनये तदा |
तेन अपि हि तत: सम्यक् गान-भाण्ड-समन्वित: || २६० ||
नृत्तप्रयोग: सृष्ट: य: स: ताण्डव: इति स्मृत: |

अन्वय: - तदा भगवता रेचका: अङ्गहारा: पिण्डीबन्धा: च सृष्ट्वा तण्डवे मुनये दत्ता: | तत: तेन अपि सम्यक् गानभाण्डसमन्वित: य: नृत्तप्रयोग: सृष्ट: स: ताण्डव: इति स्मृत: |

अर्थ - अशाप्रकारे भगवान (शंकराने) रेचक, अंगहार व पिंडीबंधाचे सृजन कार्य पूर्ण केल्यावर ते तंडु मुनींना दिले. तेव्हा तंडुमुनींनी गान व भांडवाद्यांनी युक्त अशा ज्या नृत्तप्रयोगाची निर्मिती केली त्याला 'तांडव' असे म्हणतात.

## ❖ ऋषींचे प्रश्न ❖

ऋषय ऊचु:- यदा प्राप्त्यर्थमर्थानां तज्ज्ञैरभिनय: कृत: ||२६१ ||
कस्मान्नृत्तं कृतं ह्येतत्कं स्वभावमपेक्षते |
न गीतकार्थसम्बद्धं न चाप्यर्थस्य भावकम् ||२६२ ||
कस्मान्नृत्तं कृतं ह्येतद्गीतेष्वासारितेषु च |

पदच्छेद:- ऋषय: ऊचु: =
यदा प्राप्त्यर्थम् अर्थानां तज्ज्ञै: अभिनय: कृत: ||२६१ ||
कस्मात् नृत्तं कृतं हि एतत् कं स्वभावम् अपेक्षते |
न गीतक-अर्थसम्बद्धं न च अपि अर्थस्य भावकम् ||२६२ ||
कस्मात् नृत्तं कृतं हि एतत् गीतेषु आसारितेषु च |

अन्वय: - ऋषय: ऊचु: =
यदा अर्थानां प्राप्त्यर्थं तज्ज्ञै: अभिनय: कृत: (तदा) नृत्तं कस्मात् कृतम् ? एतत् कं स्वभावम् अपेक्षते? आसारितेषु गीतेषु च एतत् नृत्तं कस्मात् कृतम् ? (एतत्) न गीतकार्थसम्बद्धं न च अपि अर्थस्य भावकं (भवति) |

अर्थ - ऋषींनी म्हटले -
जेव्हा अर्थाच्या प्राप्तीसाठी विद्वानांनी अभिनयाची निर्मिती केली तेव्हा या नृत्ताची स्थापना कोणत्या उद्देश्य पूर्तीसाठी करण्यात आली? याची स्थिती/लक्षण व स्वरूप कोणत्या प्रकारचे आहे? आसारित गीतांशी संबंधित या नृत्ताची रचना का केली? कारण यांचा संबंध गीतांच्या अर्थाशी नाही आणि अर्थाच्या भावांशीही नाही .

## ❖ नृत्ताचे प्रयोजन आणि प्रयोग ❖

(भरत:)-
अत्रोच्यते न खल्वर्थं कंचिन्नृत्तमपेक्षते ||२६३ ||
किं तु शोभां प्रजनयेदिति नृत्तं प्रवर्तितम् |
प्रायेण सर्वलोकस्य नृत्तमिष्टं स्वभावत: ||२६४ ||

मङ्गल्यमिति कृत्वा च नृत्तमेतत्प्रकीर्तितम् |
विवाहप्रसवावाहप्रमोदाभ्युदयादिषु ||२६५ ||
विनोदकारणं चेति नृत्तमेतत्प्रवर्तितम् |
अतश्चैव प्रतिक्षेपाद्भूतसङ्घै प्रवर्तिता: ||२६६ ||
ये गीतकादौ युज्यन्ते सम्यङ्नृत्तविभागका: |
देवेन चापि सम्प्रोक्तस्तण्डुस्ताण्डवपूर्वकम् ||२६७ ||
गीतप्रयोगमाश्रित्य नृत्तमेतत्प्रवर्त्याम् |
प्रायेण ताण्डवविधिर्देवस्तुत्याश्रयो भवेत् ||२६८ ||
सुकुमारप्रयोगश्च शृङ्गाररससम्भव: |

पदच्छेद: - (भरत:)- अत्र उच्यते न खलु अर्थ कंचित् नृत्तम् अपेक्षते ||२६३ ||
किं तु शोभां प्रजनयेत् इति नृत्तं प्रवर्तितम् |
प्रायेण सर्वलोकस्य नृत्तम् इष्टं स्वभावत: ||२६४ ||
मङ्गल्यम् इति कृत्वा च नृत्तम् एतत् प्रकीर्तितम् |
विवाह-प्रसव-आवाह-प्रमोद-अभ्युदय-आदिषु ||२६५ ||
विनोदकारणं च इति नृत्तम् एतत् प्रवर्तितम् |
अत: च एव प्रतिक्षेपात् भूतसङ्घै: प्रवर्तिता: ||२६६ ||
ये गीतक-आदौ युज्यन्ते सम्यक् नृत्त-विभागका: |
देवेन च अपि सम्प्रोक्त: तण्डु: ताण्डव-पूर्वकम् ||२६७ ||
गीत-प्रयोगम् आश्रित्य नृत्तम् एतत् प्रवर्त्यताम् |
प्रायेण ताण्डवविधि: देव-स्तुत्य-आश्रय: भवेत् |
सुकुमारप्रयोग: च शृङ्गार-रस-सम्भव: |

अन्वय: - (भरत: उवाच)- अत्र उच्यते खलु - नृत्तं कंचित् अर्थ न अपेक्षते किं तु शोभां प्रजनयेत् इति (अत:) नृत्तं प्रवर्तितम् (अस्ति)| प्रायेण स्वभावत: सर्वलोकस्य नृत्तम् इष्टम् (अस्ति)| मङ्गल्यम् इति कृत्वा एतत् नृत्तं प्रकीर्तितम् (अस्ति)| विवाह-प्रसव-आवाह-प्रमोद-अभ्युदय-आदिषु (मङ्गलकार्येषु) विनोदकारणम् इति (अत:) एतत् नृत्तं प्रवर्तितम् (अस्ति)|

अत: च एव प्रतिक्षेपात् भूतसङ्घै: प्रवर्तिता: ये नृत्तविभागका: (ते) गीतकादौ सम्यक् युज्यन्ते | देवेन च अपि तण्डु: सम्प्रोक्त: ताण्डवपूर्वकं गीतप्रयोगम् आश्रित्य एतत् नृत्तं प्रवर्त्यताम् | सुकुमारप्रयोग: शृङ्गाररससम्भव: भवेत् | ताण्डवविधि: प्रायेण देव-स्तुत्य-आश्रय: भवेत् |

अथ - भरतमुनी म्हणाले - या ठिकाणी खरोखरच असे म्हटले जाते की, नृत्त कोणत्याही प्रकारच्या अर्थाची अपेक्षा करीत नाही; परंतु शोभा वाढावी यासाठी हे नृत्त केले जाते. बहुधा स्वाभाविकपणे सर्व लोकांना नृत्त आवडते आणि ते मंगल करणारे आहे म्हणून नृत्त केले जाते. नृत्त हे विवाह, पुत्रजन्म, जावई घरी आल्यावर आणि उत्सव इ. मंगलकार्यांमध्ये करमणूक म्हणून केले जाते आणि म्हणूनच प्रतिक्षेपामुळे भूतगणांनी आनंदित होऊन जे नृत्ताचे विभाग केले आहेत ते नृत्तविभाग गीताच्या सुरुवातीला केले जातात. भगवान शंकराने तंडूला सांगितले 'तांडवासह गीताच्या प्रयोगाचा आश्रय घेऊन नृत्ताचा प्रयोग करावा. सुकुमार नृत्त हे शृङ्गाररसाशी निगडित असते. तांडवनृत्ताचा वापर बहुधा देवांच्या प्रार्थनेसाठी केला जातो.

### ❖ वर्धमानकाचे लक्षण ❖

तस्य तण्डुप्रयुक्तस्य ताण्डवस्य विधिक्रियाम् ||२६९ ||
वर्धमानकमासाद्य संप्रवक्ष्यामि लक्षणम् |
कलानां वृद्धिमासाद्य ह्यक्षराणां च वर्धनात् ||२७० ||
लयस्य वर्धनाच्चापि वर्धमानकमुच्यते |

पदच्छेद: - तस्य तण्डुप्रयुक्तस्य ताण्डवस्य विधिक्रियाम् ||२६९ ||
वर्धमानकम् आसाद्य लक्षणं संप्रवक्ष्यामि |
कलानां वृद्धिम् आसाद्य हि अक्षराणां च वर्धनात् ||२७० ||
लयस्य वर्धनात् च अपि वर्धमानकम् उच्यते |

अन्वय: - वर्धमानकम् आसाद्य तण्डुप्रयुक्तस्य तस्य ताण्डवस्य विधिक्रियां लक्षणं संप्रवक्ष्यामि | कलानां वृद्धिम् आसाद्य अक्षराणां च वर्धनात् लयस्य वर्धनात् च 'वर्धमानकम्' (इति) उच्यते |

अर्थ - आता वर्धमानकासह तंडूने प्रयुक्त केलेल्या त्या तांडव नृत्ताच्या विधिक्रिया आणि लक्षणे सांगतो. ज्या विधीच्या प्रयोगात कलेची वाढ होते. अक्षरांची वृद्धी होते आणि लयाची गती वाढते. त्याला 'वर्धमानक' असे म्हटले जाते.

### ❖ आसारिताचा प्रयोग आणि नर्तकी कर्म ❖

कृत्वा कुतपविन्यासं यथावद् द्विजसत्तमाः ॥ २७१ ॥
आसारितप्रयोगस्तु ततः कार्यः प्रयोक्तृभिः ।
तत्र तूपोहनं कृत्वा तन्त्रीगानसमन्वितम् ॥ २७२ ॥
कार्यः प्रवेशो नर्तक्या भाण्डवाद्यसमन्वितः ।

पदच्छेदः - कृत्वा कुतपविन्यासं यथावत् द्विज-सत्तमाः ॥२७१ ॥
आसारित-प्रयोगः तु ततः कार्यः प्रयोक्तृभिः ।
तत्र तु उपोहनं कृत्वा तन्त्री-गान-समन्वितम् ॥२७२ ॥
कार्यः प्रवेशः नर्तक्याः भाण्ड-वाद्य-समन्वितः ।

अन्वयः - हे द्विजसत्तमाः, ततः यथावत् कुतपविन्यासं कृत्वा प्रयोक्तृभिः आसारितप्रयोगः कार्यः । तत्र तन्त्रीगानसमन्वितम् उपोहनं कृत्वा नर्तक्याः भाण्डवाद्यसमन्वितः प्रवेशः कार्यः ।

अर्थ - हे मुनिजनहो! योग्य व उपयुक्त अशा संगीतवाद्यांची स्थापना केल्यानंतर प्रयोगकर्त्यांनी आसारिताचा प्रयोग करावा. तेथे तंत्रीवाद्यांसह गीताने युक्त उपोहनाचा प्रयोग करून रंगमंचावर भांडवाद्यांचे वादन होत असताना नर्तकीने प्रवेश करावा.

विशुद्धकरणायां तु जात्यां वाद्यं प्रयोजयेत् ॥२७३ ॥
गत्या वाद्यानुसारिण्या तस्याश्चारी प्रयोजयेत् ।
वैशाखस्थानकेनेह सर्वरेचकचारिणी ॥२७४ ॥

पदच्छेदः - विशुद्ध-करणायां तु जात्यां वाद्यं प्रयोजयेत् ॥२७३ ॥
गत्या वाद्य-अनुसारिण्या तस्याः चारी प्रयोजयेत् ।
वैशाखस्थानकेन इह सर्व-रेचक-चारिणी ॥२७४ ॥

अन्वय : - विशुद्धकरणायां जात्यां वाद्यं प्रयोजयेत्। वाद्यानुसारिण्या गत्या तस्या : चारी प्रयोजयेत्। वैशाखस्थानकेन इह सर्वरेचकचारिणी (कर्तव्या)।

अर्थ - येथे विशुद्ध करणांनी व जातींनी युक्त असे वाद्य वाजवावे. नंतर वाद्यानुसार गतीचे प्रदर्शन करीत नर्तकीने चारीचे सादरीकरण करावे. त्यानंतर नर्तकीने वैशाखस्थानात राहून रेचकांचा प्रयोग करावा.

पुष्पाञ्जलिधरा भूत्वा प्रविशेद्रङ्गमण्डपम्।
पुष्पाञ्जलिं विसृज्याथ रङ्गपीठं परीत्य च ॥२७५॥
प्रणम्य देवताभ्यश्च ततोऽभिनयमाचरेत्।
यत्राभिनेयं गीतं स्यात्तत्र वाद्यं न योजयेत् ॥२७६॥
अङ्गहारप्रयोगे तु भाण्डवाद्यं विधीयते।
समं रक्तं विभक्तं च स्फुटं शुद्धप्रहारजम् ॥२७७॥
नृत्ताङ्गग्राहि वाद्यज्ञैर्वाद्यं योज्यं तु ताण्डवे।

पदच्छेद : - पुष्पाञ्जलि-धरा भूत्वा प्रविशेत् रङ्गमण्डपम्।
पुष्पाञ्जलिं विसृज्य अथ रङ्गपीठं परीत्य च ॥२७५॥
प्रणम्य देवताभ्य : च तत : अभिनयम् आचरेत्।
यत्र अभिनेयं गीतं स्यात् तत्र वाद्यं न योजयेत् ॥२७६॥
अङ्गहार-प्रयोगे तु भाण्डवाद्यं विधीयते।
समं रक्तं विभक्तं च स्फुटं शुद्ध-प्रहारजम् ॥२७७॥
नृत्ताङ्ग-ग्राहि वाद्यज्ञै : वाद्यं योज्यं तु ताण्डवे।

अन्वय : - पुष्पाञ्जलिधरा भूत्वा रङ्गमण्डपं प्रविशेत्। अथ पुष्पाञ्जलिं विसृज्य रङ्गपीठं परीत्य च देवताभ्य : प्रणम्य च तत : अभिनयम् आचरेत्। यत्र अभिनेयं गीतं स्यात् तत्र वाद्यं न योजयेत्। अङ्गहारप्रयोगे तु भाण्डवाद्यं विधीयते। ताण्डवे वाद्यज्ञै : समं रक्तं विभक्तं स्फुटं शुद्धप्रहारजं नृत्ताङ्गग्राहि च वाद्यं योज्यम्।

अर्थ - नंतर नर्तकीने अंजलीहस्तामध्ये फुले घेऊन रंगमंचावर प्रवेश करावा व नंतर रंगपीठावर चारही बाजूंना गोल फिरून ते पुष्प अर्पण करून देवतांना वंदन करावे. नंतर अभिनयास आरंभ करावा. जेव्हा गीतांना अनुसरून अभिनय केला जातो तेव्हा वाद्य वाजवू नयेत आणि जेव्हा अंगहाराचा प्रयोग केला जातो तेव्हा भांडवाद्यांचा (अवनद्ध वाद्य) वापर करावा. तांडवामध्ये वाद्यज्ञांनी सम, रक्त, विभक्त व स्फुट (स्पष्ट) आणि शुद्ध आघातांद्वारे नृत्ताच्या अंगांना अनुसरण करणारे वाद्य वाजवावे.

प्रयुज्य गीतवाद्ये तु निष्क्रामेन्नर्तकी ततः ‖२७८ ‖
अनेनैव विधानेन प्रविशन्त्यपराः पृथक् |
अन्याश्चानुक्रमेणाथ पिण्डीं बध्नन्ति याः स्त्रियः ‖२७९ ‖
तावत्पर्यस्तकः कार्यो यावत्पिण्डी न बध्यते |
पिण्डीं बध्वा ततः सर्वा निष्क्रामेयुः स्त्रियस्तु ताः ‖२८० ‖

पदच्छेदः - प्रयुज्य गीतवाद्ये तु निष्क्रामेत् नर्तकी ततः ‖२७८ ‖
अनेन एव विधानेन प्रविशन्ति अपराः पृथक् |
अन्याः च अनुक्रमेण अथ पिण्डीं बध्नन्ति याः स्त्रियः ‖२७९ ‖
तावत् पर्यस्तकः कार्यः यावत् पिण्डी न बध्यते |
पिण्डीं बद्ध्वा ततः सर्वाः निष्क्रामेयुः स्त्रियः तु ताः ‖२८० ‖

अन्वयः - गीतवाद्ये प्रयुज्य ततः नर्तकी निष्क्रामेत् | अनेन एव विधानेन अपराः पृथक् प्रविशन्ति | अथ अनुक्रमेण याः अन्याः स्त्रियः (ताः) पिण्डीं बध्नन्ति | तावत् पर्यस्तकः कार्यः यावत् पिण्डी न बध्यते | पिण्डीं बद्ध्वा ततः सर्वाः ताः स्त्रियः निष्क्रामेयुः |

अर्थ - अशाप्रकारे गीत-वाद्यांसहित सादरीकरण केल्यावर नर्तकीने निघून जावे आणि अशाच प्रकारे विधीनुसार इतर नर्तकींनी रंगमंचावर वेगवेगळा प्रवेश करावा. नंतर इतर स्त्रियांनी क्रमाने पिंडी बांधावी. जोपर्यंत पिंडी बांधून होत नाही तोपर्यंत पर्यस्तकाचे सादरीकरण करावे. पिंडीबंधाचा प्रयोग पूर्ण झाल्यावर सर्व स्त्रियांनी मंचावरून निघून जावे.

## ❖ पिंडीबंधांचा प्रयोग ❖

पिण्डीबन्धेषु वाद्यं तु कर्तव्यमिह वादकैः |
पर्यस्तकप्रमाणेन चित्रौघकरणान्वितम् ||२८१ ||
तत्रोपवहनं भूयः कार्यं पूर्ववदेव हि |
ततश्चासारितं भूयो गायनं तु प्रयोजयेत् ||२८२ ||
पूर्वेणैव विधानेन प्रविशेच्चापि नर्तकी |
गीतकार्थं त्वभिनयेद् द्वितीयासारितस्य तु ||२८३ ||
तदेव च पुनर्वस्तु नृत्तेनापि प्रदर्शयेत् |

पदच्छेदः - पिण्डीबन्धेषु वाद्यं तु कर्तव्यम् इह वादकैः |
पर्यस्तक-प्रमाणेन चित्र-ओघ-करण-अन्वितम् ||२८१ ||
तत्र उपवहनं भूयः कार्यं पूर्ववत् एव हि |
ततः च आसारितं भूयः गायनं तु प्रयोजयेत् ||२८२ ||
पूर्वेण एव विधानेन प्रविशेत् च अपि नर्तकी |
गीतकार्थं तु अभिनयेत् द्वितीय-आसारितस्य तु ||२८३ ||
तत् एव च पुनः वस्तु नृत्तेन अपि प्रदर्शयेत् |

अन्वयः - इह पिण्डीबन्धेषु वादकैः पर्यस्तकप्रमाणेन चित्रौघकरणान्वितं वाद्यं कर्तव्यम् | तत्र पूर्ववत् एव उपवहनं भूयः कार्यम् | ततः च भूयः आसारितं गायनं प्रयोजयेत् | पूर्वेण विधानेन एव नर्तकी प्रविशेत् | द्वितीय-आसारितस्य गीतकार्थम् अभिनयेत् | तत् एव वस्तु नृत्तेन अपि प्रदर्शयेत् |

अर्थ - पिंडीबंधाचा प्रयोग करताना वादकांनी पर्यस्तक प्रयोगानुसार विविध प्रकारच्या 'ओघ' नावाच्या वाद्याचा आणि करणांनी युक्त वाद्यांचा प्रयोग करावा . तिथे पूर्वीप्रमाणेच पुन्हा उपोहन करावे . त्यानंतर आसारित गायनाचा प्रयोग करावा .

आधी सांगितल्याप्रमाणे एका नर्तकीने रंगमंचावर प्रवेश करावा आणि नंतर दुसऱ्या आसारित गाण्याच्या अर्थाचा अभिनय करावा आणि तीच विषय वस्तू नृत्ताद्वारे प्रदर्शित करावी .

आसारिते समाप्ते तु निष्क्रामेन्नर्तकी ततः ॥२८४॥
पूर्ववत्प्रविशन्त्यन्याः प्रयोगः स्यात्स एव हि ।
एवं पदे पदे कार्यो विधिरासारितस्य तु ॥२८५॥
भाण्डवाद्यकृते चैव तथा गानकृतेऽपि च ।
एका तु प्रथमं योज्या द्वे द्वितीयं तथैव च ॥२८६॥
तिस्रो वस्तु तृतीयं तु चतस्रस्तु चतुर्थकम् ।
पिण्डीनां विधयश्चैव चत्वारः सम्प्रकीर्तिताः ॥२८७॥
पिण्डी शृङ्खलिका चैव लताबन्धोऽथ भेद्यकः ।

पदच्छेदः - आसारिते समाप्ते तु निष्क्रामेत् नर्तकी ततः ॥२८४॥
पूर्ववत् प्रविशन्ति अन्याः प्रयोगः स्यात् सः एव हि ।
एवं पदे पदे कार्यः विधिः आसारितस्य तु ॥२८५॥
भाण्डवाद्यकृते च एव तथा गानकृते अपि च ।
एका तु प्रथमं योज्या द्वे द्वितीयं तथा एव च ॥२८६॥
तिस्रः वस्तु तृतीयं तु चतस्रः तु चतुर्थकम् ।
पिण्डीनां विधयः च एव चत्वारः सम्प्रकीर्तिताः ॥२८७॥
पिण्डी शृङ्खलिका च एव लताबन्धः अथ भेद्यकः ।

अन्वयः - आसारिते समाप्ते ततः नर्तकी निष्क्रामेत् । अन्याः पूर्ववत् प्रविशन्ति, सः एव हि प्रयोगः स्यात् । एवं पदे पदे आसारितस्य विधिः कार्यः । भाण्डवाद्यकृते गानकृते ( सः एव प्रयोगः स्यात्) । एका प्रथमं योज्या द्वे द्वितीयं तथैव तिस्रः तृतीयं वस्तु चतस्रः चतुर्थकम्

(भवेत्) | पिण्डीनां चत्वार: विधय: सम्प्रकीर्तिता: - पिण्डी शृङ्खलिका लताबन्ध: भेद्यक: च |

अर्थ - अशाप्रकारे आसारित विधी पूर्ण करून नर्तकीने मंचावरून निघून जावे. नंतर पूर्वीप्रमाणे अन्य नर्तकींनी मंचावर प्रवेश करून अशाच प्रकारे याच नृत्तप्रयोगाचा पुन्हा अभिनय करावा. याप्रमाणे प्रत्येक पदावर भांडवाद्य व गायनाद्वारे आसारित नृत्तविधीचे अनुसरण करावे. पहिला पाद एकदा गायला जावा. दुसरा पाद दोनदा, तिसरा पाद तीन वेळा व चौथा चार वेळा गायला जावा. पिंडीबंधांचे जे चार प्रयोगविधी आहेत ते म्हणजे पिंडी, शृंखलिका, लताबंध आणि भेद्यक.

पिण्डीबन्धस्तु पिण्डत्वाद्गुल्म: शृङ्खलिका भवेत् ॥२८८॥
जालोपनद्धा च लता सनृत्तो भेद्यक: स्मृत: |
पिण्डीबन्ध: कनिष्ठे तु शृङ्खला तु लयान्तरे ॥२८९॥
मध्यमे च लताबन्धो ज्येष्ठे चैवाथ भेद्यक: |
पिण्डीनां विविधा योनिर्यन्त्रं भद्रासनं तथा ॥२९०॥
शिक्षायोगस्तथा चैव प्रयोक्तव्य: प्रयोक्तृभि: |
एवं प्रयोग: कर्तव्यो वर्धमाने तपोधना: ॥२९१॥

पदच्छेद: - पिण्डीबन्ध: तु पिण्डत्वात् गुल्म: शृङ्खलिका भवेत् ॥२८८॥
जाल-उपनद्धा च लता सनृत्त: भेद्यक: स्मृत: |
पिण्डीबन्ध: कनिष्ठे तु शृङ्खला तु लयान्तरे ॥२८९॥
मध्यमे च लताबन्ध: ज्येष्ठे च एव अथ भेद्यक: |
पिण्डीनां विविधा योनि: यन्त्रं भद्रासनं तथा ॥२९०॥
शिक्षायोग: तथा च एव प्रयोक्तव्य: प्रयोक्तृभि: |
एवं प्रयोग: कर्तव्य: वर्धमाने तपोधना: ॥२९१॥

अन्वयः - पिण्डत्वात् पिण्डीबन्धः, गुल्मः शृङ्खलिका भवेत् | जाल-उपनद्धा च लता, सनृत्तः भेद्यकः स्मृतः | कनिष्ठे पिण्डीबन्धः, लयान्तरे शृङ्खला, मध्यमे च लताबन्धः ज्येष्ठे च भेद्यकः (प्रयोज्यः) | पिण्डीनां विविधा योनिः (वर्तते) यन्त्रं भद्रासनं शिक्षायोगः (इति) यः प्रयोक्तृभिः प्रयोक्तव्यः | हे तपोधनाः, वर्धमाने एवं प्रयोगः कर्तव्यः |

अर्थ - पिंडीरूपात असल्यामुळे याला पिंडी किंवा पिंडीबंध नाव पडले आहे. झाडीप्रमाणे असल्याने त्याला 'शृंखलिका' म्हटले आहे. जाळ्यामध्ये गुंफल्याप्रमाणे हात असतील तर त्याला 'लताबंध' व वेगवेगळे नृत्त असल्याने त्यास 'भेद्यक' म्हटले आहे. भेद्यकामध्ये सर्व नर्तकी एकमेकींपासून वेगवेगळ्या राहून नृत्त करतात. कनिष्ठ आसारितामध्ये पिंडीबंधाचा, लयींच्या मध्ये शृंखलेचा, मध्य स्थितीत लताबंधाचा व ज्येष्ठ आसारितामध्ये भेद्यकाचा प्रयोग करावा. पिंडीबंधांच्या उत्पत्तीची अनेक कारणे आहेत. यंत्र, भद्रासन आणि शिक्षायोग यांद्वारे पिंडीबंधाचा प्रयोग करावा.

हे मुनीजन ! वर्धमानविधीमध्ये असाच प्रयोग करावा (शिक्षण घेऊनच प्रयोग करावा).

## ❖ गीतछंदकविधि आणि लक्षणे ❖

गीतानां छन्दकानां च भूयो वक्ष्याम्यहं विधिम् ||२९२ ||
यानि वस्तुनिबद्धानि यानि चाङ्गकृतानि तु |
गीतानि तेषां वक्ष्यामि प्रयोगं नृत्तवाद्ययोः |
तत्रावतरणं कार्य नर्तक्याः सार्वभाण्डिकम् ||२९३ ||
क्षेपप्रतिक्षेपकृतं भाण्डोपोहनसंस्कृतम् |
प्रथमं त्वभिनेयं स्यादगीतके सर्ववस्तुकम् ||२९४ ||
तदेव च पुनर्वस्तु नृत्तेनापि प्रदर्शयेत् |

पदच्छेद: - गीतानां छन्दकानां च भूय: वक्ष्यामि अहं विधिम् ||२९२ ||
यानि वस्तुनिबद्धानि यानि च अङ्गकृतानि तु |
गीतानि तेषां वक्ष्यामि प्रयोगं नृत्तवाद्ययो: |
तत्र अवतरणं कार्यं नर्तक्या: सार्वभाण्डिकम् ||२९३ ||
क्षेप-प्रतिक्षेप-कृतं भाण्ड-उपोहन-संस्कृतम् |
प्रथमं तु अभिनेयं स्यात् गीतके सर्व-वस्तुकम् ||२९४ ||
तत् एव च पुन: वस्तु नृत्तेन अपि प्रदर्शयेत् |

अन्वय: - अहं भूय: गीतानां छन्दकानां च विधिं वक्ष्यामि | यानि गीतानि वस्तुनिबद्धानि यानि च अङ्गकृतानि तेषां नृत्तवाद्ययो: प्रयोगं वक्ष्यामि | तत्र नर्तक्या: क्षेपप्रतिक्षेपकृतं भाण्ड-उपोहनसंस्कृतम् सार्वभाण्डिकम् अवतरणं कार्यम् | गीतके प्रथमं सर्ववस्तुकम् अभिनेयं स्यात् | तत् एव च वस्तु पुन: नृत्तेन अपि प्रदर्शयेत् |

अर्थ - आता मी पुन्हा गीत व छंदांचे लक्षण सांगतो . जी गीते कथावस्तु आणि अंगांनी युक्त आहेत, त्या गीतांचा तसेच या गीतांसह होणाऱ्या नृत्त आणि वाद्यांच्या प्रयोगाबद्दल मी सांगतो . क्षेप व प्रतिक्षेप यांनी युक्त अशा वाद्यांसह, उपोहनविधीसह आणि सर्व वाद्यांच्या वादनासह नर्तकीने रंगमंचावर प्रवेश करावा . प्रथम गीतामधील कथावस्तूचा अभिनय करावा आणि नंतर तोच विषय नृत्ताद्वारे सादर करावा .

यो विधि: पूर्वमुक्तस्तु नृत्ताभिनयवादिते ||२९५ ||
आसारितविधौ स स्याद्गीतानां वस्तुकेष्वपि |
एवं वस्तुनिबन्धानां गीतकानां विधि: स्मृत: ||२९६ ||
शृणुताङ्गनिबद्धानां गीतानामपि लक्षणम् |
य एव वस्तुकविधिर्नृत्ताभिनयवादिते ||२९७ ||
तमेवाङ्गनिबद्धेषु च्छन्दकेष्वपि योजयेत् |

पदच्छेद : - यो विधि : पूर्वम् उक्त : तु नृत्त-अभिनय-वादिते ॥ २९५ ॥
आसारित-विधौ स : स्यात् गीतानां वस्तुकेषु अपि ।
एवं वस्तु-निबन्धानां गीतकानां विधि : स्मृत : ॥२९६ ॥
शृणुत अङ्गनिबद्धानां गीतानाम् अपि लक्षणम् ।
य : एव वस्तुक-विधि : नृत्त-अभिनय-वादिते ॥२९७ ॥
तम् एव अङ्ग-निबद्धेषु छन्दकेषु अपि योजयेत् ।

अन्वय : - नृत्त-अभिनय-वादिते य : विधि : पूर्वम् उक्त : स : आसारितविधौ गीतानां वस्तुकेषु अपि स्यात् । एवं वस्तुनिबन्धानां गीतकानां विधि : स्मृत : । अङ्गनिबद्धानां गीतानां लक्षणम् अपि शृणुत । य : वस्तुकविधि : नृत्ताभिनयवादिते तम् एव अङ्गनिबद्धेषु छन्दकेषु अपि योजयेत् ।

अर्थ - नृत्त, अभिनय, संगीत आणि वाद्यवादन याविषयी जो विधी अगोदर सांगितला आहे तोच विधी आसारितविधीमध्ये व गीताच्या विषयवस्तूचा प्रयोग होत असताना करावा. अशाप्रकारे विषयवस्तूद्वारे निबद्धगीताच्या विधीचे वर्णन केले. आता अंगांद्वारे निबंध गीताचे लक्षण तुम्ही ऐका. वस्तुनिबद्धित गीतांच्या वेळी नृत्त, अभिनय आणि वादनासाठी जो विधी सांगितला आहे, तोच विधी अंगनिबद्धित गीतांसाठी आणि छंदांसाठीदेखील वापरावा.

### ❖ वाद्यविधि ❖

वाद्यं गुर्वक्षरकृतं तथाल्पाक्षरमेव च ॥२९८ ॥
मुखे सोपोहने कुर्याद्वर्णानां विप्रकर्षत : ।
यदा गीतिवशादङ्गं भूयो भूयो निवर्तते ॥२९९ ॥
तत्राद्यमभिनेयं स्याच्छेषं नृत्तेन योजयेत् ।
यदा गीतिवशादङ्गं भूयो भूयो निर्वतते ॥३०० ॥

त्रिपाणिलयसंयुक्तं तत्र वाद्यं प्रयोजयेत् |
यथा लयस्तथा वाद्यं कर्तव्यमिह वादकै: ||३०१ ||

पदच्छेद : - वाद्यं गुरू-अक्षरकृतं तथा अल्प-अक्षरम् एव च ||२९८ ||
मुखे स-उपोहने कुर्यात् वर्णानां विप्रकर्षत : |
यदा गीतिवशात् अङ्गं भूय : भूय : निवर्तते ||२९९ ||
तत्र आद्यम् अभिनेयं स्यात् शेषं नृत्तेन योजयेत् |
यदा गीतिवशात् अङ्गं भूय : भूय : निर्वतते ||३०० ||
त्रि-पाणि-लय-संयुक्तं तत्र वाद्यं प्रयोजयेत् |
यथा लय : तथा वाद्यं कर्तव्यम् इह वादकै : ||३०१ ||

अन्वय : - मुखे सोपोहने गुर्वक्षरकृतं तथा अल्पाक्षरम् च वर्णानां विप्रकर्षत : वाद्यं कुर्यात् | यदा गीतिवशात् अङ्गं भूय: भूय: निवर्तते तत्र आद्यम् अभिनेयं स्यात् शेषं नृत्तेन योजयेत् | यदा गीतिवशात् अङ्गं भूय : भूय: निर्वतते तत्र त्रिपाणिलयसंयुक्तं वाद्यं प्रयोजयेत् | वादकै : इह यथा लय : तथा वाद्यं कर्तव्यम् |

अर्थ - मुख व उपोहन क्रियेमध्ये गुरू व लघु अक्षरांप्रमाणे वाद्य वाजविले जावे . ज्यामुळे वर्णाची स्थिती स्पष्ट कळून येईल . जेव्हा गीताची अंगे पुन्हा पुन्हा सादर होत असतात त्यावेळी त्याचा प्रथम भाग अभिनयाद्वारे सादर करावा व उर्वरित भाग नृत्ताद्वारे प्रस्तुत करावा . गीताच्या सामर्थ्यामुळे त्याचे अंग पुन्हा पुन्हा म्हटले जात असेल त्यावेळी तीन प्रकारच्या पाणि (समपाणि, उपरिपाणि, अवपाणि) व लयीने युक्त असे वाद्य वाजवावे . वादकांनी यावेळी जशी लय तसेच वाद्य वाजवावे .

(ततं चानुगतं चापि ओघं च करणान्वितम् |
स्थिरे तत्त्वं (तं) प्रयोक्तव्यं मध्ये चानुगतं भवेत् ||
भूयश्चौघ: प्रयोक्तव्यस्त्वेष वाद्यगतो विधि: |

छन्दोगीतकमासाद्य त्वङ्गानि परिवर्तयेत् ।
एष कार्यो विधिर्नित्यं नृत्ताभिनयवादिते ।
यानि वस्तुनिबद्धानि तेषामन्ते ग्रहो भवेत् ॥
अङ्गानां तु परावृत्तावादावेव ग्रहो मत: ॥)
एवमेष विधि: कार्यो गीतेष्वासारितेष्वपि ।

पदच्छेद: - (ततं च अनुगतं च अपि ओघं च करणान्वितम् ।
स्थिरे तत्त्वं (तं) प्रयोक्तव्यं मध्ये च अनुगतं भवेत् ॥
भूय: च ओघ: प्रयोक्तव्य: तु एष: वाद्यगत: विधि: ।
छन्दो-गीतकम् आसाद्य तु अङ्गानि परिवर्तयेत् ।
एष: कार्य: विधि: नित्यं नृत्त-अभिनय-वादिते ।
यानि वस्तु-निबद्धानि तेषाम् अन्ते ग्रह: भवेत् ॥
अङ्गानां तु परावृत्तौ आदौ एव ग्रह: मत: ॥)
एवम् एष: विधि: कार्य: गीतेषु आसारितेषु अपि ।

अन्वय: - ( ततं अनुगतं ओघं करणान्वितम् च भवेत् । स्थिरे तत्त्वं (तं) प्रयोक्तव्यं मध्ये च अनुगतं भवेत् । भूय: च ओघ: प्रयोक्तव्य:, एष: वाद्यगत: विधि: (भवति) । छन्दोगीतकम् आसाद्य तु अङ्गानि परिवर्तयेत् । नृत्त-अभिनय-वादिते एष: विधि: नित्यं कार्य: । यानि वस्तुनिबद्धानि तेषाम् अन्ते ग्रह: भवेत् । अङ्गानां परावृत्तौ आदौ ग्रह: मत: ।) एवम् आसारितेषु गीतेषु अपि एष: विधि: कार्य: ।

अर्थ - तत, अनुगत, ओघ यांचा संबंध करणांशी (बोलांशी) असतो . स्थिरलयीमध्ये तंत्रीवाद्य वापरावे . मध्य लयीत ते अनुगत (गीताप्रमाणे जाणारे असे अवनद्ध वाद्य) वाजवावे व द्रुत लयीत ओघ वाद्यांचा प्रयोग करावा . असाच नियम वाद्यांच्या प्रयोगाबद्दल सांगितलेला आहे . छंदोबद्ध गीताच्या प्रयोगात विविध अंगांची योजना पुन्हा पुन्हा

करावी . नृत्त, अभिनय आणि वादनाच्या बाबतीत हाच विधी नेहमी करावा . जी गीते वस्तुनिबद्ध आहेत त्यांच्या शेवटी ग्रहांचा वापर करावा . अम्गनिबद्ध गीते पुन्हा पुन्हा सादर करताना ग्रहांचा वापर सुरूवातीला करावा असे सांगितले जाते . अशाप्रकारे आसारित गीतांमध्ये सुद्धा हा विधी लागू करावा .

### ❖ सुकुमारनृत्तविधी ❖

देवस्तुत्याश्रयं ह्येतत्सुकुमारं निबोधत ||३०२ ||
स्त्रीपुंसयोस्तु संलापो यस्तु कामसमुद्भव: |
तज्ज्ञेयं सुकुमारं हि शृङ्गाररससम्भवम् ||३०३ ||
यस्यां यस्यामवस्थायां नृत्तं योज्यं प्रयोक्तृभि: |
तत्सर्वं सम्प्रवक्ष्यामि तच्च मे शृणुत द्विजा: ||३०४ ||

पदच्छेद : - देवस्तुति-आश्रयं हि एतत् सुकुमारं निबोधत ||३०२ ||
स्त्री-पुंसयो: तु संलाप: य: तु काम-समुद्भव: |
तत् ज्ञेयं सुकुमारं हि शृङ्गार-रस-सम्भवम् ||३०३ ||
यस्यां यस्याम् अवस्थायां नृत्तं योज्यं प्रयोक्तृभि: |
तत् सर्व सम्प्रवक्ष्यामि तत् च मे शृणुत द्विजा: ||३०४ ||

अन्वय: - तत् देवस्तुत्याश्रयं सुकुमारं हि निबोधत | य: स्त्रीपुंसयो: कामसमुद्भव: संलाप: तत् शृङ्गाररससम्भवं सुकुमारं ज्ञेयम् | द्विजा:, यस्यां यस्याम् अवस्थायां नृत्तं योज्यं प्रयोक्तृभि: | तत् सर्व सम्प्रवक्ष्यामि तत् च मे शृणुत |

अर्थ - आता देवतांच्या स्तुतीशी संबंधित सुकुमार नृत्त सांगतो . कामवासनेने स्त्रीपुरुषांचे जे संवाद होतात ते व्यक्त करणारे नृत्त म्हणजे सुकुमार नृत्त होय जे शृंगार रसाची निर्मिती करणारे असते . हे मुनीजनहो! ज्या ज्या अवस्थांमध्ये प्रयोगकर्त्यांकडून नृत्त योजले जाते ते सर्व आता सांगणार आहे . ते माझे बोलणे तुम्ही नीट ऐकावे .

अङ्गवस्तुनिवृत्तौ तु तथा वर्णनिवृत्तिषु ।
तथा चाभ्युदयस्थाने नृत्तं तज्ज्ञः प्रयोजयेत् ॥३०५ ॥
यत्तु संदृश्यते किञ्चिद्दम्पत्योर्मदनाश्रयम् ।
नृत्तं तत्र प्रयोक्तव्यं प्रहर्षार्थगुणाद्भवम् ॥३०६ ॥
यत्र सन्निहिते कान्ते ऋतुकालादिदर्शनम् ।
गीतकार्थाभिसंबद्धं नृत्तं तत्रापि चेष्यते ॥३०७ ॥

पदच्छेद :- अङ्ग-वस्तु-निवृत्तौ तु तथा वर्ण-निवृत्तिषु ।
तथा च अब्युदय-स्थाने नृत्तं तज्ज्ञः प्रयोजयेत् ॥३०५ ॥
यत् तु संदृश्यते किञ्चित् दम्पत्योः मदन-आश्रयम् ।
नृत्तं तत्र प्रयोक्तव्यं प्रहर्ष-अर्थ-गुणात् भवम् ॥३०६ ॥
यत्र सन्निहिते कान्ते ऋतु-काल-आदि-दर्शनम् ।
गीतक-अर्थ-अभिसंबद्धं नृत्तं तत्र अपि च इष्यते ॥३०७ ॥

अन्वय : - अङ्गवस्तुनिवृत्तौ वर्णनिवृत्तिषु तथा च अभ्युदयस्थाने तज्ज्ञः नृत्तं प्रयोजयेत् ।
दम्पत्योः मदनाश्रयम् यत् किञ्चित् संदृश्यते तत्र प्रहर्षार्थगुणात् भवम् नृत्तं प्रयोक्तव्यम् ।
यत्र सन्निहिते कान्ते तत्र ऋतुकालादिदर्शनम् । गीतकार्थाभिसंबद्धं नृत्तं अपि च इष्यते ।

अर्थ - अंग आणि वस्तूची समाप्ती, वर्णांची निवृत्ती आणि अभ्युदयाची स्थिती असल्यास विद्वानांनी नृत्ताची योजना करावी . नायकनायिकांचे प्रणयाश्रित असे जे काही दर्शविले जाते तिथे आनंद व्यक्त करणाऱ्या नृत्ताची योजना करावी . तसेच जेव्हा नायक जवळ असतो तेव्हा अनुकूल ऋतू काल इ. दर्शविणाऱ्या, गीत आणि गीताच्या अर्थाशी संबंधित असणाऱ्या नृत्ताची योजना करावी .

खण्डिता विप्रलब्धा वा कलहान्तरितापि वा ।
यस्मिन्नङ्गे तु युवतिर्न नृत्तं तत्र योजयेत् ॥३०८ ॥
सखीप्रवृत्ते संलापे तथाऽसन्निहिते प्रिये ।
नहि नृत्तं प्रयोक्तव्यं यस्या वा प्रोषितः प्रियः ॥३०९ ॥

[दूत्याश्रयं यदा तु स्यादृतुकालादिदर्शनम् |
औत्सुक्यचिन्तासंबद्धं न नृत्तं तत्र योजयेत् ||]

पदच्छेद: - खण्डिता विप्रलब्धा वा कलहान्तरिता अपि वा |
यस्मिन् अङ्गे तु युवति: न नृत्तं तत्र योजयेत् ||३०८ ||
सखी-प्रवृत्ते संलापे तथा असन्निहिते प्रिये |
न हि नृत्तं प्रयोक्तव्यं यस्या: वा प्रोषित: प्रिय: ||३०९ ||
[दूती-आश्रयं यदा तु स्यात् ऋतु-काल-आदि-दर्शनम् |
औत्सुक्य-चिन्ता-संबद्धं न नृत्तं तत्र योजयेत् ||]

अन्वय: - यस्मिन् अङ्गे खण्डिता विप्रलब्धा वा कलहान्तरिता युवति: तत्र नृत्तं न योजयेत् | सखीप्रवृत्ते संलापे तथा असन्निहिते प्रिये यस्या: वा प्रोषित: प्रिय: (तत्र) हि नृत्तं न प्रयोक्तव्यम् | [यदा दूत्याश्रयं ऋतुकालादिदर्शनम् | औत्सुक्यचिन्तासंबद्धं स्यात् तत्र नृत्तं न योजयेत् ||]

अर्थ - नाटकाच्या कथावस्तूच्या ज्या अंगामध्ये खंडिता, विप्रलब्धा वा कलहांतरिता नायिका असतील तेथे नृत्ताची योजना करू नये . सखींशी बोलताना, प्रियकर जवळ नसेल किंवा प्रवासाला गेला असेल तर तेथे हे नृत्त योजू नये आणि जर दूती (दासी)द्वारे ऋतू काल इ . चे वर्णन केले जात असेल तसेच औत्सुक्य किंवा चिंतायुक्त अवस्थेचा अनुभव केला जात असेल तर तेथे नृत्ताची योजना करू नये .

यस्मिन्नङ्गे प्रसादं तु गृह्णीयान्नायिका क्रमात् |
तत: प्रभृति नृत्तं तु शेषेष्वेषु योजयेत् ||३१० ||
देवस्तुत्याश्रयकृतं यदं तु भवेदथ |
माहेश्वरैरहारैरुद्धतैस्तत्प्रयोजयेत् ||३११ ||
यत्तु शृङ्गारसंबद्ध गानं स्त्रीपुरुषाश्रयम् |
देवीकृतैरहारैर्ललितैस्तत्प्रयोजयेत् ||३१२ ||

पदच्छेद : - यस्मिन् अङ्गे प्रसादं तु गृह्णीयात् नायिका क्रमात् |
ततः प्रभृति नृत्तं तु शेषेषु अङ्गेषु योजयेत् ||३१० ||
देवस्तुती-आश्रयकृतं यत् अङ्गं तु भवेत् अथ |
माहेश्वरैः अङ्गहारैः उद्धतैः तत् प्रयोजयेत् ||३११ ||
यत् तु शृङ्गार-संबद्धं गानं स्त्री-पुरुष-आश्रयम् |
देवीकृतैः अङ्गहारैः ललितैः तत् प्रयोजयेत् ||३१२ ||

अन्वय : - यस्मिन् अङ्गे क्रमात् नायिका प्रसादं गृह्णीयात् ततः प्रभृति शेषेषु अङ्गेषु नृत्तं योजयेत् | देवस्तुत्याश्रयकृतं यत् अङ्गं भवेत् तत् माहेश्वरैः उद्धतैः अङ्गहारैः प्रयोजयेत् | शृङ्गारसंबद्धं स्त्रीपुरुषाश्रयं यत् गानं तत् देवीकृतैः ललितैः अङ्गहारैः प्रयोजयेत् |

अर्थ - एखाद्या नाट्यात नायिकेला हर्षाची अनुभूती होत असेल तिथपासून नाट्यवस्तूच्या अंतापर्यंत नृत्ताची योजना करावी . जर एखाद्या भागात देवतांची प्रार्थना असेल तर तेथे महेश्वराद्वारे सांगितलेल्या उद्धत किंवा आवेगपूर्ण अंगहारांनी युक्त नृत्ताचा वापर करावा . स्त्री-पुरुषाच्या शृंगाररसाचे प्रणयात्मक गीत जेथे असेल तेथे पार्वती देवीने सांगितलेल्या ललित अंगहारांनी युक्त अशा नृत्ताची योजना करावी .

### ❖ भांडवाद्यविधी ❖

चतुष्पदा नर्कुटके खञ्जके परिगीतके |
विधानं सम्प्रवक्ष्यामि भाण्डवाद्यविधिं प्रति ||३१३ ||
खञ्जनर्कुटसंयुक्ता भवेद्या तु चतुष्पदा |
पदान्ते सन्निपाते तु तस्या भाण्डग्रहो भवेत् ||३१४ ||
या ध्रुवा छन्दसा युक्ता समपादा समाक्षरा |
तस्याः पादावसाने तु प्रदेशिन्या ग्रहो भवेत् ||३१५ ||
कृत्वैकं परिवर्तं तु गानस्याभिनयस्य च |
पुनः पादनिवृत्तिं तु भाण्डवाद्येन योजयेत् ||३१६ ||

पदच्छेद : - चतुष्पदा नर्कुटके खहजके परिगीतके |
विधानं सम्प्रवक्ष्यामि भाण्डवाद्य-विधिं प्रति ||३१३ ||
खञ्ज-नर्कुट-संयुक्ता भवेत् या तु चतुष्पदा |
पदान्ते सन्निपाते तु तस्या भाण्डग्रह : भवेत् ||३१४ ||
या ध्रुवा छन्दसा युक्ता समपादा समाक्षरा |
तस्या : पाद-अवसाने तु प्रदेशिन्या ग्रह : भवेत् ||३१५ ||
कृत्वा एकं परिवर्त तु गानस्य अभिनयस्य च |
पुन : पादनिवृत्तिं तु भाण्डवाद्येन योजयेत् ||३१६ ||

अन्वय : - (अधुना) चतुष्पदा नर्कुटके खञ्जके परिगीतके भाण्डवाद्यविधिं प्रति विधानं सम्प्रवक्ष्यामि | खञ्जनर्कुटसंयुक्ता या चतुष्पदा भवेत् तस्या: पदान्ते सन्निपाते भाण्डग्रह: भवेत् | या ध्रुवा छन्दसा युक्ता समपादा समाक्षरा तस्या: पादावसाने प्रदेशिन्या ग्रह : भवेत् | गानस्य अभिनयस्य च एकं परिवर्त कृत्वा पुन : पादनिवृत्तिं तु भाण्डवाद्येन योजयेत् |

अर्थ - आता मी चार चरण असणाऱ्या नर्कुटक, खंजक आणि परिगीतक नावाच्या गीतांसोबत होणाऱ्या भांडवाद्यवादनाचा विधी सांगतो . जर चतुष्पदा खंजक आणि नर्कुटक यांनी युक्त असते तेव्हा तिचा अंतिम चरण समाप्त होताना दोन्ही हातांनी टाळी वाजवून संनिपात करून भांडवाद्य वाजवण्यास सुरूवात करावी .

जी ध्रुवा छन्दयुक्त असते, समान अक्षरे असणारी असते, तिच्या पादाच्या समाप्तीच्या वेळी प्रदेशिनी बोटाने भांडवाद्यावर आघात करावा . गाण्याचे आणि अभिनयाचे पुन्हा एक आवर्तन करून शेवटचे चरण समाप्त होताना वाद्यवादन सुरू करावे .

अङ्गवस्तुनिवृत्तौ तु वर्णान्तरनिवृत्तिषु |
तथोपस्थाने चैव भाण्डवाद्यं प्रयोजयेत् ||३१७ ||
येऽपि चान्तरमार्गास्स्यु : तन्त्रीवाक्करण : कृता : |
तेषु सूची प्रयोक्तव्या भाण्डेन सह ताण्डवे ||३१८ ||
महेश्वरस्य चरितं य इदं सम्प्रयोजयेत् |
सर्वपापविशुद्धात्मा शिवलोकं स गच्छति ||३१९ ||

एवमेष विधिः सृ (दृ)ष्टस्ताण्डवस्य प्रयोगतः |
भूयः किं कथ्यतामन्यन्नाटयवेदविधिं प्रति ||३२० ||

पदच्छेदः - अङ्ग-वस्तु-निवृत्तौ तु वर्णान्तर-निवृत्तिषु |
तथा उपस्थाने च एव भाण्डवाद्यं प्रयोजयेत् ||३१७||
ये अपि च अन्तरमार्गाः स्युः तन्त्री-वाक्-करणैः कृताः
तेषु सूची प्रयोक्तव्या भाण्डेन सह ताण्डवे ||३१८ ||
महेश्वरस्य चरितं यः इदं सम्प्रयोजयेत् |
सर्व-पाप-विशुद्ध-आत्मा शिवलोकं सः गच्छति ||३१९ ||
एवम् एषः विधिः सृ (दृ)ष्टः ताण्डवस्य प्रयोगतः |
भूयः किं कथ्यताम् अन्यत् नाट्यवेद-विधिं प्रति ||३२० ||


अन्वयः - अङ्गवस्तुनिवृत्तौ वर्णान्तरनिवृत्तिषु तथा उपस्थापने एव भाण्डवाद्यं प्रयोजयेत् | ये च अपि तन्त्रीवाक्करणैः कृताः अन्तरमार्गाः स्युः तेषु भाण्डेन सह ताण्डवे सूची प्रयोक्तव्या | यः महेश्वरस्य इदं चरितं सम्प्रयोजयेत् सर्वपापविशुद्धात्मा सः शिवलोकं गच्छति | एवम् ताण्डवस्य प्रयोगतः एषः विधिः सृष्टः (दृष्टः) | भूयः नाट्यवेदविधिं प्रति अन्यत् किं कथ्यताम् |


अर्थ - जेव्हा गीताचे अंग आणि कथावस्तूची समाप्ती होते किंवा शब्दांचे गायन पूर्ण होते तेव्हा उपस्थापनेच्या वेळी पुन्हा भांडवाद्यांचा वापर करावा. जे तंत्रीवाद्य, शब्दरचना व करणांनी केलेले 'अंतरमार्ग' आहेत, त्यांच्या प्रयोगावेळी भांडवाद्याच्या वादनासहित तांडव नृत्त आणि सूचीचारी सादर करावी. अशाप्रकारे जो महेश्वराच्या या चरित्राचा प्रयोग करतो तो सर्व पापांमधून मुक्त होऊन शिवलोकामध्ये जातो. अशा प्रकारे शिवाने तांडवाच्या प्रयोगाचा हा विधी निर्माण केला आहे. आणखी नाट्यवेदाच्या विधिविषयी अन्य काय बोलावे?

|| इति भारतीये नाट्यशास्त्रे ताण्डवलक्षणं नाम चतुर्थोऽध्यायः ||

|| अशाप्रकारे भरतमुनिविरचित नाट्यशास्त्रातील 'तांडवलक्षणे' नावाचा चौथा अध्याय समाप्त ||

# पाचवा अध्याय
# पूर्वरंगविधी





# पाचवा अध्याय

# पूर्वरंगविधी

### ❖ ऋषींचे प्रश्न ❖

भरतस्य वच: श्रुत्वा नाट्यसन्तानकारणम् |
पुनरेवाब्रुवन्वाक्यमृषयो हृष्टमानसा: || १ ||

पदच्छेद: - भरतस्य वच: श्रुत्वा नाट्य-सन्तान-कारणम् |
पुन: एव अब्रुवन् वाक्यम् ऋषय: हृष्ट-मानसा: || १ ||

अन्वय: - भरतस्य नाट्यसन्तानकारणं वच: श्रुत्वा हृष्टमानसा: ऋषय: पुन: एव वाक्यम् अब्रुवन् |

अर्थ - अशाप्रकारे भरतमुनींचे नाट्याविषयीचे विस्तृत वर्णन ऐकून आनंदित झालेले ऋषी त्यांना असे म्हणाले . . .

यथा नाट्यस्य जन्मेदं जर्जरस्य च सम्भव: |
विघ्नानां शमनं चैव देवतानां च पूजनम् || २ ||
तदस्माभि: श्रुतं सर्व गृहीत्वा चावधारितम् |
निखिलेन यथातत्त्वमिच्छामो वेदितुं पुन: || ३ ||
पूर्वरङ्गं महातेज: सर्वलक्षणसंयुतम् |
यथा बुध्यामहे ब्रह्मंस्तथा व्याख्यातुमर्हसि || ४ ||

पदच्छेद: - यथा नाट्यस्य जन्म इदं जर्जरस्य च सम्भव: |
विघ्नानां शमनं च एव देवतानां च पूजनम् || २ ||
तत् अस्माभि: श्रुतं सर्व गृहीत्वा च अवधारितम् |
निखिलेन यथातत्त्वम् इच्छाम: वेदितुं पुन: || ३ ||
पूर्वरङ्गं महातेज: सर्व-लक्षण-संयुतम् |
यथा बुध्यामहे ब्रह्मन् तथा व्याख्यातुम् अर्हसि || ४ ||

अन्वय: - हे महातेज: ब्रह्मन्, यथा अस्माभि: इदं नाट्यस्य जन्म जर्जरस्य च सम्भव: विघ्नानां शमनं देवतानां च पूजनं श्रुतं तत् सर्व गृहीत्वा अवधारितं च (तथा) पुन: सर्व

लक्षणसंयुतं पूर्वरङ्गं यथातत्त्वं निखिलेन वेदितुं इच्छामः। यथा (वयं) बुध्यामहे तथा व्याख्यातुम् अर्हसि।

अर्थ - हे महातेजस्वी ब्रह्मदेवा! ज्याप्रमाणे आम्ही नाट्याची उत्पत्ती, जर्जराची निर्मिती, विघ्नांची शांती आणि देवतांचे पूजन ऐकले आणि ग्रहण करून लक्षात ठेवले आहे, त्याचप्रमाणे सर्व लक्षणांनी युक्त असा संपूर्ण पूर्वरंग विधी आम्ही तत्त्वशः जाणून घेऊ इच्छितो. तर आम्हांला समजेल अशाप्रकारे आपण व्याख्यान करावे.

तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनिः।
प्रत्युवाच पुनर्वाक्यं पूर्वरङ्गविधिं प्रति ॥ ५ ॥

पदच्छेदः - तेषां तु वचनं श्रुत्वा मुनीनां भरतः मुनिः।
प्रत्युवाच पुनः वाक्यं पूर्वरङ्गविधिं प्रति ॥ ५ ॥

अन्वयः - तेषां मुनीनां वचनं श्रुत्वा भरतः मुनिः पूर्वरङ्गविधिं प्रति पुनः वाक्यं प्रत्युवाच।

अर्थ - त्या मुनींचे बोलून ऐकून भरतमुनींनी पूर्वरंगविधानाच्या विषयी अशा प्रकारे उत्तर दिले.

## ❖ पूर्वरंगाची लक्षणे ❖

पूर्वरङ्गं महाभागा गदतो मे निबोधत।
पादभागाः कलाश्चैव परिवर्तास्तथैव च ॥ ६ ॥

पदच्छेदः - पूर्वरङ्गं महाभागाः गदतः मे निबोधत।
पादभागाः कलाः च एव परिवर्ताः तथा एव च ॥ ६ ॥

अन्वयः - महाभागाः, गदतः मे पूर्वरङ्गं पादभागाः कलाः परिवर्ताः च निबोधत।

अर्थ - हे महाभाग्यशाली ऋषींनो! माझ्याद्वारे सांगितले जाणारे पूर्वरंगविधान, पादभाग, कला आणि परिवर्त ऐकावे.

यस्माद्रङ्गे प्रयोगोऽयं पूर्वमेव प्रयुज्यते।
तस्मादयं पूर्वरङ्गो विज्ञेयो द्विजसत्तमाः ॥ ७ ॥

पदच्छेद: - यस्मात् रङ्गे प्रयोग: अयं पूर्वम् एव प्रयुज्यते|
तस्मात् अयं पूर्वरङ्ग: विज्ञेय: द्विजसत्तमा: || ७ ||

अन्वय: - द्विजसत्तमा:, यस्मात् अयं प्रयोग: रङ्गे पूर्वम् एव प्रयुज्यते तस्मात् अयं पूर्वरङ्ग: विज्ञेय:|

अर्थ - हे श्रेष्ठ ब्राह्मणांनो! हा प्रयोगविधी रंगमंचावर सर्वप्रथम केला जातो म्हणून त्यास 'पूर्वरंग' असे म्हटले गेले आहे.

## ❖ पूर्वरंगाची विविध अंगे ❖

अस्याङ्गानि तु कार्याणि यथावदनुपूर्वश:|
तन्त्रीभाण्डसमायोगै: पाठ्ययोगकृतैस्तथा || ८ ||

पदच्छेद: - अस्य अङ्गानि तु कार्याणि यथावत् अनुपूर्वश:|
तन्त्री-भाण्ड-समायोगै: पाठ्य-योग-कृतै: तथा || ८ ||

अन्वय: - तन्त्री-भाण्ड-समायोगै: तथा पाठ्ययोगकृतै: यथावत् अनुपूर्वश: अस्य (पूर्वरङ्गस्य) अङ्गानि कार्याणि|

अर्थ - तंतुवाद्य, चर्मवाद्य इ. च्या संयोगाने आणि पाठ्य इ. च्या योगाने या पूर्वरंगाच्या प्रत्याहार इ. अंगांचा प्रयोग आहे तसा करावा.

प्रत्याहारोऽवतरणं तथा ह्यारम्भ एव च|
आश्रावणा वक्त्रपाणिस्तथा च परिघट्टना || ९ ||
सङ्घोटना तत: कार्या मार्गासारितमेव च |
ज्येष्ठमध्यकनिष्ठानि तथैवासारितानि च || १० ||
एतानि तु बहिर्गीतान्यन्तर्जवनिकागतै: |
प्रयोक्तृभि: प्रयोज्यानि तन्त्रीभाण्डकृतानि तु || ११ ||

पदच्छेद: - प्रत्याहार: अवतरणं तथा हि आरम्भ: एव च |
आश्रावणा: वक्त्रपाणि: तथा च परिघट्टना || ९ ||
सङ्घोटना तत: कार्या: मार्गासारितम् एव च |
ज्येष्ठ-मध्य-कनिष्ठानि तथा एव आसारितानि च || १० ||
एतानि तु बहिर्गीतानि अन्तर्-जवनिका-गतै: |
प्रयोक्तृभि: प्रयोज्यानि तन्त्री-भाण्ड-कृतानि तु || ११ ||

अन्वय: - प्रत्याहार:, अवतरणं, आरम्भ:, आश्रावणा:, वक्त्रपाणि:, परिघट्टना (एतेषां षड् पूर्वरङ्गस्य अङ्गानां प्रयोग: करणीय: )| तत: सङ्घोटना मार्गासारितं च (कार्यम्) | तथैव ज्येष्ठमध्यकनिष्ठानि एतानि आसारितानि (प्रयोक्तव्यानि) | (एवम् अधुना उक्तानि यानि) तन्त्रीभाण्डकृतानि (नाट्यस्य कथावस्तुन:) बहिर्गीतानि (सन्ति तानि) अन्तर्जवनिकागतै: प्रयोक्तृभि: प्रयोज्यानि |

अर्थ - पूर्वरंगविधीमध्ये क्रमश: प्रत्याहार, अवतरण, आरंभ, आश्रावण, वक्त्रपाणी, परिघट्टना, सङ्घोटना, मार्गासारित, ज्येष्ठ, मध्यम, कनिष्ठ आसारित या सहा अंगांचा प्रयोग पडद्याच्या आत गाण्याशिवाय किंवा बहिर्गीतासह तंत्री आणि भांडवाद्यांसह करावा .

तत: सर्वैस्तु कुतपै: संयुक्तानीह कारयेत् |
विघाट्य वै जवनिकां नृत्तपाठ्यकृतानि तु || १२ ||
गीतानां मद्रकादीनां योज्यमेकं तु गीतकम् |
वर्धमानमथापीह ताण्डवं यत्र युज्यते || १३ ||
ततश्चोत्थापनं कार्यं परिवर्तनमेव च |
नान्दी शुष्कावकृष्टा च रङ्गद्वारं तथैव च || १४ ||
चारी चैव तत: कार्या महाचारी तथैव च |
त्रिकं प्ररोचना चापि पूर्वरङ्गे भवन्ति हि || १५ ||

पदच्छेद: - तत: सर्वै: तु कुतपै: संयुक्तानि इह कारयेत् |
विघाट्य वै जवनिकां नृत्त-पाठ्य-कृतानि तु || १२||

गीतानां मद्रक-आदीनां योज्यम् एकं तु गीतकम् |
वर्धमानम् अथ अपि इह ताण्डवं यत्र युज्यते || १३ ||
ततः च उत्थापनं कार्यं परिवर्तनम् एव च |
नान्दी शुष्कावकृष्टा च रङ्गद्वारं तथा एव च || १४ ||
चारी च एव ततः कार्या महाचारी तथा एव च |
त्रिकं प्ररोचना च अपि पूर्वरङ्गे भवन्ति हि || १५ ||

अन्वयः - ततः जवनिकां विघाट्य सर्वैः कुतपैः नृत्तपाठ्यकृतानि संयुक्तानि कारयेत् | अथ मद्रकादीनां गीतानां एकं गीतकं तु योज्यम् | यत्र ताण्डवं इह तत्र वर्धमानम् अपि युज्यते | ततः च उत्थापनं परिवर्तनं नान्दी तथा शुष्कावकृष्टा च कार्यम् | ततः चारी तथैव महाचारी च कार्या | पूर्वरङ्गे त्रिकं प्ररोचना च अपि भवन्ति |

अर्थ - यानंतर पडदा बाजूला करून सर्व वाद्यांसोबत नृत्य आणि पाठ्य याचा संयुक्त प्रयोग करावा. नंतर मद्रक इ. गीतांपैकी कुठल्याही एका गीताचा प्रयोग करावा आणि जिथे तांडवाचा प्रयोग होतो तिथे वर्धमानक गीताची योजना करावी. त्यानंतर क्रमाने उत्थापन, परिवर्तन, नांदी, शुष्कावकृष्ट, रंगद्वार, चारी तसेच महाचारी यांचा प्रयोग करावा आणि याच प्रकारे पूर्वरंगाच्या अंतर्गत त्रिक आणि प्ररोचना यांचादेखील प्रयोग करावा.

एतान्यङ्गानि कार्याणि पूर्वरङ्गविधौ द्विजाः |
एतेषां लक्षणमहं व्याख्यास्याम्यनुपूर्वशः || १६ ||

पदच्छेदः - एतानि अङ्गानि कार्याणि पूर्वरङ्गविधौ द्विजाः |
एतेषां लक्षणम् अहं व्याख्यास्यामि अनुपूर्वशः || १६ ||

अन्वयः - (हे) द्विजाः ! पूर्वरङ्गविधौ एतानि अङ्गानि कार्याणि | अनुपूर्वशः अहं एतेषां लक्षणम् व्याख्यास्यामि |

अर्थ - हे ब्राह्मणांनो ! पूर्वरंगाच्या विधीमध्ये या अंगांचा क्रमाने प्रयोग केला जावा. आता मी क्रमशः त्यांची लक्षणे सांगतो.

### ❖ प्रत्याहार आणि अवतरण ❖

कुतपस्य तु विन्यासः प्रत्याहार इति स्मृतः।
तथावतरणं प्रोक्तं गायिकानां निवेशनम् ॥ १७ ॥

पदच्छेदः - कुतपस्य तु विन्यासः प्रत्याहारः इति स्मृतः।
तथा अवतरणं प्रोक्तं गायिकानां निवेशनम् ॥ १७ ॥

अन्वयः - कुतपस्य विन्यासः प्रत्याहारः इति स्मृतः। तथा गायिकानां निवेशनम् अवतरणम् (इति) प्रोक्तम्।

अर्थ - कुतुप अर्थात् सर्व वाद्यांच्या विधिवत् स्थापनेला 'प्रत्याहार' म्हणतात आणि गायिका किंवा गायकांच्या स्थानापन्न होण्यास 'अवतरण' असे म्हणतात.

### ❖ आरंभ आणि आश्रावणा ❖

परिगीतक्रियारम्भ आरम्भ इति कीर्तितः।
आतोद्यरञ्जनार्थं तु भवेदाश्रावणाविधिः ॥ १८ ॥

पदच्छेदः - परिगीत-क्रिया-आरम्भः आरम्भः इति कीर्तितः।
आतोद्यरञ्जनार्थं तु भवेत् आश्रावणाविधिः ॥ १८ ॥

अन्वयः - परिगीत-क्रिया-आरम्भः आरम्भः इति कीर्तितः। आतोद्यरञ्जनार्थं तु आश्रावणाविधिः (इति) कीर्तितः।

अर्थ - परिगीतक्रिया अर्थात् आलापाची सुरूवात करणे यास 'आरंभ' म्हटले जाते आणि वादनाच्या सुरूवातीस वाद्यांमध्ये एकरूपता आणणे यास 'आश्रवणा' असे म्हणतात.

### ❖ वक्त्रपाणि आणि परिघट्टना ❖

वाद्यवृत्तिविभागार्थं वक्त्रपाणिर्विधीयते।
तन्त्र्योजःकरणार्थं तु भवेच्च परिघट्टना ॥ १९ ॥

पदच्छेद : - वाद्य-वृत्ति-विभागार्थ वक्त्रपाणि : विधीयते |
तन्त्री-ओज : करणार्थं तु भवेत् च परिघट्टना || १९ ||

अन्वय : - वाद्यवृत्तिविभागार्थ वक्त्रपाणि : विधीयते | तन्त्री-ओज : करणार्थं तु परिघट्टना भवेत् च |

अर्थ - वाद्यांच्या भिन्नवृत्तींच्या विभागासाठी 'वक्त्रपाणी'चा वापर करावा आणि वीणा इ. तन्त्रीवाद्यांना ओजपूर्ण करण्यासाठी 'परिघट्टना' हा विधी सांगितला आहे .

❖ संघोटना आणि मार्गासारित ❖

तथा पाणिविभागार्थं भवेत्संघोटनाविधि: |
तन्त्रीभाण्डसमायोगान्मार्गासारितमिष्यते || २० ||

❖ आसारित आणि गीतक ❖

कलापातविभागार्थं भवेदासारितक्रिया |
कीर्तनाद्देवतानां च ज्ञेयो गीतविधिस्तथा || २१ ||

पदच्छेद : - तथा पाणि-विभागार्थ भवेत् संघोटनाविधि : |
तन्त्री-भाण्ड-समायोगात् मार्गासारितम् इष्यते || २० ||
कला-पात-विभागार्थ भवेत् आसारितक्रिया |
कीर्तनात् देवतानां च ज्ञेय : गीतविधि : तथा || २१ ||

अन्वय : - पाणिविभागार्थं संघोटनाविधि : भवेत् | तन्त्री-भाण्ड-समायोगात् मार्गासारितम् इष्यते | कला-पात-विभागार्थम् आसारितक्रिया भवेत् | तथा देवतानां कीर्तनात् गीतविधि : ज्ञेय : च |

अर्थ - हस्तविभागाकरिता 'संघोटना' विधी करावा . (हस्तविभागांचा प्रयोग करणे अर्थात् हाताने वाद्यांवर प्रहार करणे किंवा हस्तप्रहाराद्वारे वाद्यांशी संगत करणे म्हणजे 'संघोटना' होय) आणि तंत्री व भांडवाद्यांसोबत प्रयोग करणे याला 'मार्गासारित' असे म्हणतात . कला आणि पात यांच्या विभागांसाठी 'आसारित' क्रिया केली जाते . देवतांच्या कीर्तनासाठी गीतक विधीचा प्रयोग केला जातो .

### ❖ उत्थापन ❖

(अत: परं प्रवक्ष्यामि ह्युत्थापनविधिक्रियाम् |)
यस्मादुत्थापयन्तत्र प्रयोगं नान्दीपाठका: |
पूर्वमेव तु रङ्गेऽस्मिंस्तस्मादुत्थापनं स्मृतम् || २२ ||

पदच्छेद: - (अत: परं प्रवक्ष्यामि हि उत्थापन-विधि-क्रियाम् |)
यस्मात् उत्थापयन्ति अत्र प्रयोगं नान्दीपाठका: |
पूर्वम् एव तु रङ्गे अस्मिन् तस्मात् उत्थापनं स्मृतम् || २२ ||

अन्वय: - (अत: परम् उत्थापनविधिक्रियां प्रवक्ष्यामि |)
यस्मात् नान्दीपाठका: अस्मिन् रङ्गे पूर्वम् एव प्रयोगम् उत्थापयन्ति |

अर्थ - यापुढे आता मी 'उत्थापनविधीविषयी' सांगणार आहे .
नांदी म्हणणारे नट रंगमंचावर सर्वप्रथम प्रयोगाचे (अभिनयाचे) उत्थापन करतात, म्हणून ह्या विधीस 'उत्थापन' विधी असे म्हणतात .

### ❖ परिवर्तन ❖

यस्माच्च लोकपालानां परिवृत्य चतुर्दिशम् |
वन्दनानि प्रकुर्वन्ति तस्माच्च परिवर्तनम् || २३ ||

पदच्छेद: - यस्मात् च लोकपालानां परिवृत्य चतुर्दिशम् |
वन्दनानि प्रकुर्वन्ति तस्मात् च परिवर्तनम् || २३ ||

अन्वय: - यस्मात् चतुर्दिशं परिवृत्य लोकपालानां वन्दनानि प्रकुर्वन्ति तस्मात् तत् परिवर्तनम् |

अर्थ - (सूत्रधार) चारही बाजूंना फिरून इंद्रादी लोकपालांना वंदन करतो . त्यामुळे या विधीला 'परिवर्तन' असे म्हणतात .

### ❖ नांदी ❖

आशीर्वचनसंयुक्ता नित्यं यस्मात्प्रयुज्यते |
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता || २४ ||

पदच्छेद :- आशीर्वचन-संयुक्ता नित्यं यस्मात् प्रयुज्यते |
देव-द्विज-नृप-आदीनां तस्मात् नान्दी इति संज्ञिता || २४ ||

अन्वय : - यस्मात् नित्यं देवद्विजनृपादीनां आशीर्वचनसंयुक्ता प्रयुज्यते तस्मात् नान्दी इति संज्ञिता |

अर्थ - नेहमी देवता,ब्राह्मण,राजा इत्यादींची आशीर्वचनांनी युक्त अशी स्तुती केली जाते म्हणून त्यास 'नांदी' म्हणतात .

❖ शुष्कावकृष्टा ❖

अत्र शुष्काक्षरैरेव ह्यवकृष्टा ध्रुवा यत: |
तस्माच्छुष्कावकृष्टेयं जर्जरश्लोकदर्शिका || २५ ||

पदच्छेद :- अत्र शुष्क-अक्षरै : एव हि अवकृष्टा ध्रुवा यत : |
तस्मात् शुष्का-अवकृष्टा इयं जर्जर-श्लोक-दर्शिका || २५ ||

अन्वय : - यत: अत्र अवकृष्टा ध्रुवा शुष्काक्षरै: एव (संयोजिता)| तस्मात् शुष्कावकृष्टा इति (संज्ञिता)|इयं (ध्रुवा) जर्जरश्लोकदर्शिका|

अर्थ - अवकृष्टा ध्रुवा शुष्काक्षरांनी युक्त असते म्हणून यास 'शुष्कावकृष्टा ध्रुवा' म्हटले जाते . ही ध्रुवा जर्जराचा श्लोक दाखविणारी आहे .

❖ रंगद्वार ❖

यस्मादभिनयस्त्वत्र प्रथमं ह्यवतार्यते |
रङ्गद्वारमतो ज्ञेयं वागङ्गाभिनयात्मकम् || २६ ||

पदच्छेद :- यस्मात् अभिनय : तु अत्र प्रथमं हि अवतार्यते |
रङ्गद्वारम् अत : ज्ञेयं वाग्-अङ्ग-अभिनयात्मकम् || २६ ||

अन्वय : - यस्मात् अत्र प्रथमम् अभिनय: अवतार्यते अत: वाग्-अङ्ग-अभिनयात्मकं रङ्गद्वारम् इति ज्ञेयम् |

अर्थ - इथूनच सर्वप्रथम वाचिक आणि आंगिक अभिनयास सुरुवात होते म्हणूनच या विधीस 'रंगद्वार' असे म्हणतात .

### ❖ चारी आणि महाचारी ❖

शृङ्गारस्य प्रचरणाच्चारी सम्परिकीर्तिता |
रौद्रप्रचरणाच्चापि महाचारीति कीर्तिता || २७ ||

पदच्छेद :- शृङ्गारस्य प्रचरणात् चारी सम्परिकीर्तिता |
रौद्रप्रचरणात् च अपि महाचारी इति कीर्तिता || २७ ||

अन्वय : - शृङ्गारस्य प्रचरणात् चारी सम्परिकीर्तिता | अपि च रौद्रप्रचरणात् महाचारी इति कीर्तिता |

अर्थ - शृंगार रसाची अभिव्यक्ती झाल्यास त्याला 'चारी' म्हणतात आणि रौद्र रस अभिव्यक्त झाल्यास त्याला 'महाचारी' म्हणतात .

### ❖ त्रिगत ❖

विदूषक: सूत्रधारस्तथा वै पारिपार्श्वक: |
यत्र कुर्वन्ति सञ्जल्पं तच्चापि त्रिगतं मतम् || २८ ||

पदच्छेद :- विदूषक : सूत्रधार : तथा वै पारिपार्श्वक : |
यत्र कुर्वन्ति सञ्जल्पं तत् च अपि त्रिगतं मतम् || २८ ||

अन्वय : - यत्र विदूषक : सूत्रधार : तथा पारिपार्श्वक : सञ्जल्पं कुर्वन्ति , तत् त्रिगतम् इति मतम् |

अर्थ - जिथे सूत्रधार, विदूषक आणि पारिपार्श्विक एकमेकांशी संवाद करतात त्यास 'त्रिगत'म्हणतात .

### ❖ प्ररोचना ❖

उपक्षेपेण काव्यस्य हेतुयुक्तिसमाश्रया |
सिद्धेनामन्त्रणा या तु विज्ञेया सा प्ररोचना || २९ ||

पदच्छेद :- उपक्षेपेण काव्यस्य हेतु-युक्ति-समाश्रया |
सिद्धेन आमन्त्रणा या तु विज्ञेया सा प्ररोचना || २९ ||

अन्वय: - सिद्धेन उपक्षेपेण काव्यस्य या हेतुयुक्तिसमाश्रया आमन्त्रणा (भवति), सा तु प्ररोचना इति विज्ञेया|

अर्थ - ज्या विधीमध्ये हेतू आणि युक्तिपूर्ण नाट्यवस्तूच्या आरंभाद्वारे, यशप्राप्तीच्या कथनाद्वारे, सूत्रधाराकडून रसिकप्रेक्षकांना आमंत्रण दिले जाते त्या विधीस 'प्ररोचना' असे म्हणतात .

❖ निर्गीतोत्पत्ति आणि प्रयोजन ❖

अत: परं प्रवक्ष्यामि ह्याश्रावणाविधिक्रियाम् |
बहिर्गीतविधौ सम्यगुत्पत्तिं कारणं तथा || ३० ||

पदच्छेद: - अत: परं प्रवक्ष्यामि हि आश्रावणा-विधिक्रियाम्|
बहिर्गीतविधौ सम्यक् उत्पत्तिं कारणं तथा || ३० ||

अन्वय: - अत: परं बहिर्गीतविधौ आश्रावणा-विधिक्रियाम् तथा तस्या: उत्पत्तिं कारणं च सम्यक् प्रवक्ष्यामि |

अर्थ - यानंतर मी बहिर्गीत विधानाच्या अंतर्गत येणाऱ्या आश्रवणाविधीच्या क्रिया, त्याची उत्पत्ती आणि कारणे सांगतो .

चित्रदक्षिणवृत्तौ तु सप्तरूपे प्रवर्तिते |
सोपोहने सनिर्गीते देवस्तुत्यभिनन्दिते || ३१ ||
नारदाद्यैस्तु गन्धर्वै: सभायां देवदानवा: |
निर्गीतं श्राविता: सम्यग्लयतालसमन्वितम् || ३२ ||

पदच्छेद: - चित्र-दक्षिण-वृत्तौ तु सप्तरूपे प्रवर्तिते|
सोपोहने सनिर्गीते देवस्तुति-अभिनन्दिते || ३१ ||
नारद-आद्यै: तु गन्धर्वै: सभायां देवदानवा:|
निर्गीतं श्राविता: सम्यक् लयतालसमन्वितम् || ३२ ||

अन्वय: - चित्रदक्षिणवृत्तौ सोपोहने सनिर्गीत, देवस्तुति-अभिनन्दिते प्रवर्तिते, नारदाद्यै: गन्धर्वै: सभायां सम्यक् लयतालसमन्वितम् निर्गीतं देवदानवा: श्राविता:|

अर्थ - यानंतर चित्र, दक्षिण, वार्तिक मार्गात उपोहन आणि निर्गीत यांसह देवतांच्या स्तुतीने अभिनंदित मद्रक इ. सात प्रकारची गीते झाल्यावर नारद इ. गंधर्वांनी सभेमध्ये देवता आणि दानवांना ताल आणि लय यांनी युक्त असे निर्गीत (बहिर्गीत)ऐकवले.

तच्छ्रुत्वा तु सुखं गानं देवस्तुत्यभिनन्दितम् |
अभवन्क्षुभिताः सर्वे मात्सर्याद्दैत्यराक्षसाः || ३३ ||

पदच्छेद :- तत् श्रुत्वा तु सुखं गानं देवस्तुति-अभिनन्दितम् |
अभवन् क्षुभिताः सर्वे मात्सर्यात् दैत्यराक्षसाः || ३३ ||

अन्वय : - तत् तु देवस्तुति-अभिनन्दितं सुखं गानं श्रुत्वा सर्वे दैत्यराक्षसाः क्षुभिताः अभवन् |

अर्थ - देवतांच्या स्तुतीने अभिनंदित असे सुखद गीत ऐकून सर्व दैत्य आणि राक्षस ईर्ष्येने रागावले.

सम्प्रधार्य च तेऽन्योन्यमित्यवोचन्नवस्थिताः |
निर्गीतं तु सवादित्रमिदं गृह्णीमहे वयम् || ३४ ||
सप्तरूपेण सन्तुष्टा देवाः कर्मानुकीर्तनात् |
वयं गृह्णीम निर्गीतं तुष्यामोऽत्रैव सर्वदा || ३५ ||

पदच्छेद :- सम्प्रधार्य च ते अन्योन्यम् इति अवोचन् अवस्थिताः |
निर्गीतं तु स-वादित्रम् इदं गृह्णीमहे वयम् || ३४ ||
सप्तरूपेण सन्तुष्टाः देवाः कर्म-अनुकीर्तनात् |
वयं गृह्णीम निर्गीतं तुष्यामः अत्र एव सर्वदा || ३५ ||

अन्वय : - सम्प्रधार्य ते अवस्थिताः अन्योन्यम् इति अवोचन् "वयम् स-वादित्रम् इदं निर्गीतं गृह्णीमहे | देवाः कर्म-अनुकीर्तनात् सप्तरूपेण सन्तुष्टाः | वयं निर्गीतं गृह्णीम | अत्र एव सर्वदा तुष्यामः |"

अर्थ - यानंतर दैत्य आणि राक्षस विचार करून एकमेकांना म्हणाले "आपण वाद्यांनी समन्वित या निर्गीताचा स्वीकार करूया. सर्व देव स्वकर्मांच्या (कार्यांच्या) प्रशंसा करणाऱ्या सप्तरूप गीतांनी संतुष्ट आहेत. आपण निर्गीताचा स्वीकार करूया आणि यातच सदैव आनंदित राहूया."

ते तत्र तुष्टा दैत्यास्तु साधयन्ति पुनः पुनः ।
रुष्टाश्चापि ततो देवाः प्रत्यभाषन्त नारदम् ॥ ३६ ॥
एते तुष्यन्ति निर्गीते दानवाः सह राक्षसैः ।
प्रणश्यतु प्रयोगोऽयं कथं वा मन्यते भवान् ॥ ३७ ॥

पदच्छेदः - ते तत्र तुष्टाः दैत्याः तु साधयन्ति पुनः पुनः ।
रुष्टाः च अपि ततः देवाः प्रत्यभाषन्त नारदम् ॥ ३६ ॥
एते तुष्यन्ति निर्गीते दानवाः सह राक्षसैः ।
प्रणश्यतु प्रयोगः अयं कथं वा मन्यते भवान् ॥ ३७ ॥

अन्वयः - तत्र ते तुष्टाः दैत्याः तु पुनः पुनः साधयन्ति । ततः रुष्टाः देवाः नारदं प्रत्यभाषन्त एते दानवाः राक्षसैः सह निर्गीते तुष्यन्ति । अयं प्रयोगः प्रणश्यतु । कथं वा भवान् मन्यते?

अर्थ - ते दैत्यगण निर्गीताने संतुष्ट होऊन पुन्हा पुन्हा त्याचीच मागणी करू लागले. यावर रागावून देवता नारदाला म्हणाले- हे भगवान! राक्षसांबरोबर हे दानव निर्गीताने संतुष्ट राहिले तर हा प्रयोग नष्ट होईल, या विषयावरील आपले मत काय?

देवानां वचनं श्रुत्वा नारदो वाक्यमब्रवीत् ।
धातुवाद्याश्रयकृतं निर्गीतं मा प्रणश्यतु ॥ ३८ ॥
किन्तूपोहनसंयुक्तं धातुवाद्यविभूषितम् ।
भविष्यतीदं निर्गीतं सप्तरूप विधानतः ॥ ३९ ॥
निर्गीतेनावबद्धाश्च दैत्यदानवराक्षसाः ।
न क्षोभं न विघातं च करिष्यन्तीह तोषिताः ॥ ४० ॥

पदच्छेदः - देवानां वचनं श्रुत्वा नारदः वाक्यम् अब्रवीत् ।
धातु-वाद्य-आश्रय-कृतं निर्गीतं मा प्रणश्यतु ॥ ३८ ॥
किन्तु उपोहन-संयुक्तं धातु-वाद्य-विभूषितम् ।
भविष्यति इदं निर्गीतं सप्त-रूप-विधानतः ॥ ३९ ॥
निर्गीतेन अवबद्धाः च दैत्य-दानव-राक्षसाः ।
न क्षोभं न विघातं च करिष्यन्ति इह तोषिताः ॥ ४० ॥

अन्वय: - देवानां वचनं श्रुत्वा नारद: वाक्यम् अब्रवीत् " धातुवाद्य-आश्रयकृतं निर्गीतं मा प्रणश्यतु | किन्तु उपोहनसंयुक्तं धातुवाद्यविभूषितम् इदं निर्गीतं सप्तरूपविधानत: भविष्यति | निर्गीतेन अवबद्धा: संतुष्टा: च दैत्यदानवराक्षसा: इह क्षोभं विघातं च न करिष्यन्ति |"

अर्थ - तेव्हा देवतांचे बोलणे ऐकून नारद म्हणाले "धातुवाद्यांवर आधारित हे निर्गीत नष्ट होणे योग्य नाही. हे गीत पुढे उपोहनयुक्त आणि धातुवाद्यांनी विभूषित सप्तरूप विधानानुसार होईल. कारण या निर्गीताने आकर्षित झाल्यामुळे दैत्य, दानव तसेच राक्षस संतुष्ट होऊन क्षोभही करणार नाहीत आणि नाट्याचा विनाशदेखील करणार नाहीत."

एवं निर्गीतमेतत्तु दैत्यानां स्पर्धया द्विजा: |
देवानां बहुमानेन बहिर्गीतमिति स्मृतम् || ४१ ||

पदच्छेद: - एव निर्गीतम् एतत् तु दैत्यानां स्पर्धया द्विजा: |
देवानां बहुमानेन बहिर्गीतम् इति स्मृतम् || ४१ ||

अन्वय: - हे द्विजा:! एवं दैत्यानां स्पर्धया एतत् निर्गीतं देवानां बहुमानेन बहिर्गीतम् इति स्मृतम् |

अर्थ - हे ब्राह्मणांनो! अशाप्रकारे दैत्यांशी स्पर्धा झाल्यामुळे हे निर्गीत देवतांच्या मानासाठी 'बहिर्गीत' म्हणून ओळखले जाईल.

धातुभिश्चित्रवीणायां गुरुलघ्वक्षरान्वितम् |
वर्णालङ्कारसंयुक्तं प्रयोक्तव्यं बुधैरथ || ४२ ||

पदच्छेद: - धातुभि: चित्र-वीणायां गुरु-लघु-अक्षरान्वितम् |
वर्ण-अलङ्कार-संयुक्तं प्रयोक्तव्यं बुधै: अथ || ४२ ||

अन्वय: - अथ बुधै: चित्रवीणायां धातुभि: गुरुलघु-अक्षरान्वितम्, वर्ण-अलङ्कार-संयुक्तं प्रयोक्तव्यम् |

अर्थ - यानंतर संगीततज्ज्ञांद्वारे 'चित्र' नामक वीणेच्या धातुंच्या तारांद्वारे गुरू आणि लघू अक्षरांनी युक्त वर्ण आणि अलंकारांसह या गीताचा प्रयोग करावा.

निर्गीतं गीयते यस्मादपदं वर्णयोजनात् |
असूयया च देवानां बहिर्गीतमिदं स्मृतम् || ४३ ||

पदच्छेद :- निर्गीतं गीयते यस्मात् अपदं वर्णयोजनात् |
असूयया च देवानां बहिर्गीतम् इदं स्मृतम् || ४३ ||

अन्वय : - यस्मात् अपदं वर्णयोजनात् निर्गीतं (इति) गीयते तस्मात् देवानाम् असूयया इदं बहिर्गीतम् इति स्मृतं च |

अर्थ - पदहीन अर्थात् निरर्थक वर्णांच्या योजनेने गायले गेल्यामुळे याला 'निर्गीत' असे म्हणतात आणि देवतांविषयीच्या ईर्ष्येमुळे यांस 'बहिर्गीत' असे म्हणतात .

निर्गीतं यन्मया प्रोक्तं सप्तरूपसमन्वितम् |
उत्थापनादिकं यच्च तस्य कारणमुच्यते || ४४ ||

पदच्छेद :- निर्गीतं यत् मया प्रोक्तं सप्त-रूप-समन्वितम् |
उत्थापन-आदिकं यत् च तस्य कारणम् उच्यते || ४४ ||

अन्वय : - मया यत् सप्त-रूप-समन्वितं निर्गीतं, यत् च उत्थापनादिकं प्रोक्तं तस्य कारणम् उच्यते |

अर्थ - मी सप्तरूपाने समन्वित जे निर्गीत सांगितले आहे आणि उत्थापन आदींचे जे अभिधान केले आहे त्यांचे आता प्रयोजन सांगतो .

### ❖ देव-दानव-दैत्यादींची संतुष्टी ❖

आश्रावणायां युक्तायां दैत्यास्तुष्यन्ति नित्यशः |
वक्त्रपाणौ कृते चैव नित्यं तुष्यन्ति दानवाः || ४५ ||

पदच्छेद :- आश्रावणायां युक्तायां दैत्याः तुष्यन्ति नित्यशः |
वक्त्र-पाणौ कृते च एव नित्यं तुष्यन्ति दानवाः || ४५ ||

अन्वय : - आश्रावणायां युक्तायां दैत्याः नित्यशः तुष्यन्ति | वक्त्रपाणौ कृते च दानवाः नित्यं तुष्यन्ति |

अर्थ - आश्रवणाचा प्रयोग केल्यावर दैत्यगण सदैव प्रसन्न होतात आणि वक्त्रपाणीचा प्रयोग केल्यावर दानव नेहमी संतुष्ट होतात .

परिघट्टनयां तुष्टा युक्तायां रक्षसां गण: |
सङ्घोटनाक्रियायां च तुष्यन्त्यपि च गुह्यका: || ४६ ||

पदच्छेद: - परिघट्टनया तुष्टा युक्तायां रक्षसां गण: |
सङ्घोटना-क्रियायां च तुष्यन्ति अपि च गुह्यका: || ४६ ||

अन्वय: - परिघट्टनया युक्तायां रक्षसां गण: तुष्टा गुह्यका: सङ्घोटनाक्रियायां च तुष्यन्ति |

अर्थ - परिघट्टना अर्थात् तन्त्रीवाद्यांचे स्वरसंधान असल्यावर राक्षस प्रसन्न होतात आणि संघोटना क्रियेचा प्रयोग झाल्यावर गुह्य संतुष्ट होतात .

मार्गासारितमासाद्य प्रीता यक्षा भवन्ति हि |
गीतकेषु प्रयुक्तेषु देवास्तुष्यन्ति नित्यश: || ४७ ||

पदच्छेद: - मार्गासारितम् आसाद्य प्रीता: यक्षा: भवन्ति हि |
गीतकेषु प्रयुक्तेषु देवा: तुष्यन्ति नित्यश: || ४७ ||

अन्वय: - मार्गासारितम् आसाद्य यक्षा: प्रीता: भवन्ति | गीतकेषु प्रयुक्तेषु देवा: नित्यश: तुष्यन्ति |

अर्थ - मार्गासारितास ग्रहण करून यक्ष आनंदित होतात आणि गीतकाच्या प्रयोगाने देवगण सदैव प्रसन्न होतात .

वर्धमाने प्रयुक्ते तु रुद्रस्तुष्यति सानुग: |
तथा चोत्थापने युक्ते ब्रह्मा तुष्टो भवेदिह || ४८ ||

पदच्छेद: - वर्धमाने प्रयुक्ते तु रुद्र: तुष्यति सानुग: |
तथा च उत्थापने युक्ते ब्रह्मा तुष्ट: भवेत् इह || ४८ ||

अन्वय: - वर्धमाने प्रयुक्ते तु रुद्र :सानुग: तुष्यति | तथा च उत्थापने युक्ते इह ब्रह्मा तुष्ट: भवेत् |

अर्थ - वर्धमानाच्या प्रयोगामुळे अनुचरांसह रूद्र प्रसन्न होतात आणि उत्थापनाचा प्रयोग झाल्यावर ब्रह्मा संतुष्ट होतो .

तुष्यन्ति लोकपालाश्च प्रयुक्ते परिवर्तने |
नान्दीप्रयोगेऽथ कृते प्रीतो भवति चन्द्रमा: || ४९ ||

पदच्छेद :- तुष्यन्ति लोकपाला : च प्रयुक्ते परिवर्तने |
नान्दीप्रयोगे अथ कृते प्रीत : भवति चन्द्रमा : || ४९ ||

अन्वय : - परिवर्तन प्रयुक्त लोकपाला : तुष्यन्ति | अथ नान्दीप्रयोगे कृते चन्द्रमा : प्रीत : भवति |

अर्थ - परिवर्तनाच्या प्रयोगाने लोकपाल संतुष्ट होतात आणि नांदीच्या प्रयोगाने चंद्र प्रसन्न होतो .

युक्तायामवकृष्टायां प्रीता नागा भवन्ति हि |
तथा शुष्कावकृष्टायां प्रीत : पितृगणो भवेत् || ५० ||

पदच्छेद :- युक्तायाम् अवकृष्टायां प्रीता : नागा : भवन्ति हि |
तथा शुष्कावकृष्टायां प्रीत : पितृगण : भवेत् || ५० ||

अन्वय : - अवकृष्टायां युक्तायाम् नागा : प्रीता : भवन्ति | तथा शुष्कावकृष्टायां पितृगण : प्रीत : भवेत् |

अर्थ - अवकृष्टा (ध्रुवा)च्या प्रयोगाने नाग प्रसन्न होतात आणि शुष्कावकृष्टाच्या प्रयोगाने पितृगण प्रसन्न होतात .

रङ्गद्वारे प्रयुक्ते तु विष्णु : प्रीतो भवेदिह |
जर्जरस्य प्रयोगे तु तुष्टा विघ्नविनायका : || ५१ ||

पदच्छेद :- रङ्गद्वारे प्रयुक्ते तु विष्णु : प्रीत : भवेत् इह |
जर्जरस्य प्रयोगे तु तुष्टा : विघ्नविनायका : || ५१ ||

अन्वय : - रङ्गद्वारे प्रयुक्ते तु विष्णु : इह प्रीत : भवेत् | जर्जरस्य प्रयोगे तु विघ्नविनायका : तुष्टा : |

अर्थ - रंगद्वार नामक अंगाचा प्रयोग झाल्यावर विष्णूदेवता प्रसन्न होते आणि जर्जराच्या प्रयोगाने विघ्नविनायक (गणेश)प्रसन्न होतो .

तथा चार्यां प्रयुक्तायामुमा तुष्टा भवेदिह |
महाचार्यां प्रयुक्तायां तुष्टो भूतगणो भवेत् || ५२ ||

पदच्छेद :- तथा चार्यां प्रयुक्तायाम् उमा तुष्टा भवेत् इह |
महाचार्यां प्रयुक्तायां तुष्ट : भूतगण : भवेत् || ५२ ||

अन्वय: - तथा चार्यां प्रयुक्तायाम् उमा इह तुष्टा भवेत् | महाचार्यां प्रयुक्तायां भूतगण: तुष्ट: भवेत्|

अर्थ - चारीचा प्रयोग झाल्यावर उमादेवी प्रसन्न होते आणि महाचारीच्या प्रयोगाने भूतगण प्रसन्न होतात .

आश्रावणादिचार्यन्तमेतद्दैवतपूजनम् |
पूर्वरङ्गे मया ख्यातं तथा चाङ्गविकल्पनम् || ५३ ||

पदच्छेद: - आश्रावणादि-चारी-अन्तम् एतत् दैवतपूजनम्|
पूर्वरङ्गे मया ख्यातं तथा च अङ्ग-विकल्पनम्|| ५३ ||

अन्वय: - पूर्वरङ्गे आश्रावणादिचार्यन्तम्, अङ्गविकल्पनं तथा च एतत् दैवतपूजनं मया ख्यातम्|

अर्थ - आश्रवणापासून चारीपर्यंत पूर्वरंगामध्ये देवतांचे अशाप्रकारचे पूजन आणि त्यांच्या सर्व अंगांचे विकल्पन मी सांगितले आहे .

देवस्तुष्यति यो येन यस्य यन्मनस: प्रियम् |
तत्तथा पूर्वरङ्गे तु मया प्रोक्तं द्विजोत्तमा: || ५४ ||

पदच्छेद: - देव: तुष्यति य: येन यस्य यत् मनस: प्रियम्|
तत् तथा पूर्वरङ्गे तु मया प्रोक्तं द्विजोत्तमा:|| ५४ ||

अन्वय: - हे द्विजोत्तमा:! य: देव: येन तुष्यति यस्य यत् मनस: प्रियम् तत् तथा पूर्वरङ्गे मया प्रोक्तम्|

अर्थ - हे श्रेष्ठ ब्राह्मणांनो! जी देवता ज्यामुळे तुष्ट होते आणि ज्या देवतेच्या मनाला जे प्रिय आहे ते सर्व या पूर्वरंग प्रकरणात मी सांगितले आहे .

सर्वदैवतपूजार्हं सर्वदैवतपूजनम् |
धन्यं यशस्यमायुष्यं पूर्वरङ्गप्रवर्तनम् || ५५ ||

पदच्छेद: - सर्वदैवत-पूजार्हं सर्वदैवत-पूजनम्|
धन्यं यशस्यम् आयुष्यं पूर्वरङ्ग-प्रवर्तनम्|| ५५ ||

अन्वय : - सर्वदैवतपूजार्हं सर्वदैवतपूजनं पूर्वरङ्गप्रवर्तनं धन्यं (धर्मं) यशस्यम्, आयुष्यं (ददाति) |

अर्थ - सर्व देवतांच्या पूजेयोग्य अर्थात् सर्व देवतांकडून प्रशंसित तसेच ज्याने सर्व देवतांची पूजा केली जाते असे पूर्वरंगाचे विधान हे धर्म, यश आणि आयुष्य प्रदान करणारे आहे .

दैत्यदानवतुष्ट्यर्थं सर्वेषां च दिवौकसाम् |
निर्गीतानि सगीतानि पूर्वरङ्गकृतानि तु || ५६ ||

पदच्छेद : - दैत्य-दानव-तुष्ट्यर्थं सर्वेषां च दिवौकसाम् |
निर्गीतानि सगीतानि पूर्वरङ्ग-कृतानि तु || ५६ ||

अन्वय : - सर्वेषां दिवौकसां (तुष्ट्यर्थं), दैत्यदानवतुष्ट्यर्थं च निर्गीतानि सगीतानि पूर्वरङ्गकृतानि |

अर्थ - सर्व दैत्य, दानव तसेच सर्व देवतांच्या तुष्टीसाठी पूर्वरंगामध्ये निर्गीत आणि सगीत यांचे विधान केले गेले आहे . (भाव असा, की पूर्वरंगाच्या विधानात निर्गीत किंवा सगीत दोन्हींचा प्रयोग दैत्य, दानव आणि देवतांच्या आनंदाकरिता केलेला आहे . )

(या विद्या यानि शिल्पानि या गतिर्यच्च चेष्टितम् |
लोकालोकस्य जगतस्तदस्मिन्नाटकाश्रये ||)

पदच्छेद : - (या विद्या यानि शिल्पानि या गति : यत् च चेष्टितम् |
लोक-अलोकस्य जगत : तत् अस्मिन् नाटकाश्रये ||)

अन्वय : - लोकालोकस्य जगत : या विद्या यानि शिल्पानि, या गति : च, यत् चेष्टितं च तत् अस्मिन् नाटकाश्रये (भवति)|

अर्थ - या दृश्य आणि अदृश्य जगाची जी विद्या आहे , जे शिल्प आहे, ज्या गती आणि ज्या चेष्टा आहेत त्या सर्व या नाटकात आहेत .

## ❖ ध्रुवा ❖

निर्गीतानां सगीतानां वर्धमानस्य चैव हि |
ध्रुवाविधाने वक्ष्यामि लक्षणं कर्म चैव हि || ५७ ||

पदच्छेद: - निर्गीतानां सगीतानां वर्धमानस्य च एव हि |
ध्रुवा-विधाने वक्ष्यामि लक्षणं कर्म च एव हि || ५७ ||

अन्वय: - ध्रुवा-विधाने निर्गीतानां सगीतानां वर्धमानस्य च लक्षणं कर्म च वक्ष्यामि |

अर्थ - आता मी ध्रुवाविधानाच्या वेळी निर्गीत, सगीत आणि वर्धमानक यांच्या लक्षणांचे आणि कर्माविषयीचे कथन करीन .

प्रयुज्य गीतकविधिं वर्धमानमथापि च |
गीतकान्ते ततश्चापि कार्या ह्युत्थापनी ध्रुवा || ५८ ||

पदच्छेद: - प्रयुज्य गीतक-विधिं वर्धमानम् अथ अपि च |
गीतक-अन्ते तत: च अपि कार्या हि उत्थापनी ध्रुवा || ५८ ||

अन्वय: - गीतकविधिं प्रयुज्य अपि च वर्धमानम् (प्रयुज्य) तत: गीतकान्ते उत्थापनी ध्रुवा कार्या |

अर्थ - प्रथम गीतक विधि आणि नंतर वर्धमानाचा प्रयोग केल्यावर गीतकाच्या शेवटी उत्थापनी ध्रुवा करावी .

❖ उत्थापनी ध्रुवा ❖

आदौ द्वे च चतुर्थं चाप्यष्टमैकादशे तथा |
गुर्वक्षराणि जानीयात्पादे ह्येकादशाक्षरे || ५९ ||
चतुष्पदा भवेत्सा तु चतुरश्रा तथैव च |
चतुर्भिस्सन्निपातैश्च त्रिलया त्रियतिस्तथा || ६० ||
परिवर्ताश्च चत्वार: पाणयस्त्रय एव च |
जात्या चैव हि विश्लोका तां च तालेन योजयेत् || ६१ ||

पदच्छेद: - आदौ द्वे च चतुर्थं च अपि अष्टम-एकादशे तथा |
गुरु-अक्षराणि जानीयात् पादे हि एकादश-अक्षरे || ५९ ||
चतुष्पदा भवेत् सा तु चतुरश्रा तथा एव च |
चतुर्भि: सन्निपातै: च त्रिलया त्रियति: तथा || ६० ||
परिवर्ता: च चत्वार: पाणय: त्रय एव च |
जात्या चैव हि विश्लोका तां च तालेन योजयेत् || ६१ ||

अन्वय: - (अस्या: ध्रुवाया:) एकादशाक्षरे पादे आदौ द्वे, चतुर्थम् अपि च अष्टम-एकादशे, गुरु-अक्षराणि जानीयात्| सा चतुष्पदा, तथैव चतुरश्रा, चतुर्भि: सन्निपातै: च त्रिलया त्रियति: भवेत्| चत्वार: परिवर्ता:, त्रय पाणय: च (भवेयु:)| (एषा) जात्या विश्लोका तां च तालेन योजयेत्|

अर्थ - अकरा अक्षरे असणाऱ्या या ध्रुवेच्या एका चरणात आधीची दोन अक्षरे म्हणजेच पहिले आणि दुसरे तसेच चौथे, आठवे तसेच अकरावे अक्षर गुरू असते. यात चार चरण असतात. यात चतुरश्र ताल असतो आणि चार सन्निपात, तीन लय, तीन यती, चार परिवर्त, तीन पाणि असतात. यात विश्लोक नामक जातिवृत्त (छंद)असते आणि त्याचप्रकारचा ताल दिला जातो.

शम्या तु द्विकला कार्या तालो द्विकल एव च |
पुनश्चैककला शम्या सन्निपात:कलात्रयम् || ६२ ||

पदच्छेद: - शम्या तु द्विकला कार्या ताल: द्विकल: एव च|
पुन: च एककला शम्या सन्निपात: कलात्रयम्|| ६२ ||

अन्वय: - शम्या तु द्विकला कार्या| ताल: द्विकल: च| पुन: च एककला शम्या कलात्रयं सन्निपात: (प्रयुक्त:)|

अर्थ - यामध्ये प्रथम दोन कलांची शम्या, नंतर दोन कलांचा ताल, मग एका कलेची शम्या आणि शेवटी तीन कलांचा सन्निपात केला जातो.

एवमष्टकल: कार्य: सन्निपातो विचक्षणै: |
चत्वार: सन्निपाताश्च परिवर्त: स उच्यते || ६३ ||

पदच्छेद: - एवम् अष्टकल: कार्य: सन्निपात: विचक्षणै:|
चत्वार: सन्निपाता: च परिवर्त: स: उच्यते|| ६३ ||

अन्वय: - एवम् विचक्षणै: अष्टकल: सन्निपाता: कार्य: | चत्वार: सन्निपाता:, स: परिवर्त: उच्यते|

अर्थ - अशाप्रकारे विद्वानांनी अष्टकल सन्निपाताचा प्रयोग केला पाहिजे. चार सन्निपातांच्या प्रयोगाने परिवर्त होतो.

## ❖ परिवर्त ❖

पूर्वं स्थितलयः कार्यः परिवर्तो विचक्षणैः |
तृतीये सन्निपाते तु तस्य भाण्डग्रहो भवेत् ‖ ६४ ‖

पदच्छेदः - पूर्वं स्थितलयः कार्यः परिवर्तः विचक्षणैः |
तृतीये सन्निपाते तु तस्य भाण्डग्रहः भवेत् ‖ ६४ ‖

अन्वयः - विचक्षणैः पूर्वं स्थितलयः परिवर्तः कार्यः | तृतीये सन्निपाते तु तस्य भाण्डग्रहः भवेत् |

अर्थ - नाट्यविद्वानांनी सर्वप्रथम विलंबित लयीत परिवर्ताचा प्रयोग करावा. मग तिसऱ्या सन्निपातात भांडवाद्यांचा प्रयोग करावा.

एकस्मिन्परिवर्ते तु गते प्राप्ते द्वितीयके |
कार्यं मध्यलये तज्ज्ञैः सूत्रधारप्रवेशनम् ‖ ६५ ‖

पदच्छेदः - एकस्मिन् परिवर्ते तु गते प्राप्ते द्वितीयके |
कार्यं मध्यलये तज्ज्ञैः सूत्रधार-प्रवेशनम् ‖ ६५ ‖

अन्वयः - तज्ज्ञैः एकस्मिन् परिवर्ते गते तु द्वितीयके (परिवर्ते) प्राप्ते, मध्यलये सूत्रधारप्रवेशनम् कार्यम् |

अर्थ - नाट्यविद्वानांनी एक परिवर्त संपल्यावर दुसऱ्या परिवर्ताच्या सुरूवातीस मध्य लयीचा प्रयोग करावा आणि त्याच वेळी सूत्रधाराने प्रवेश करावा.

पुष्पाञ्जलिं समादाय रक्षामङ्गलसंस्कृताः|
शुद्धवस्त्राः सुमनसस्तथा चाद्भुतदृष्टयः ‖ ६६ ‖
स्थानन्तु वैष्णवं कृत्वा सौष्ठवाङ्गपुरस्कृतम् |
दीक्षिताः शुचयश्चैव प्रविशेयुः समं त्रयः ‖ ६७ ‖

पदच्छेदः - पुष्पाञ्जलिं समादाय रक्षा-मङ्गल-संस्कृताः|
शुद्धवस्त्राः सुमनसः तथा च अद्भुत-दृष्टयः ‖ ६६ ‖
स्थानं तु वैष्णवं कृत्वा सौष्ठव-अङ्ग-पुरस्कृतम् |
दीक्षिताः शुचयः च एव प्रविशेयुः समं त्रयः ‖ ६७ ‖

अन्वय: - दीक्षिता: शुचय: च त्रय: पुष्पाञ्जलिं समादाय रक्षा-मङ्गल-संस्कृता:, शुद्धवस्त्रा: सुमनस: तथा च अद्भुत-दृष्टय:, सौष्ठव-अङ्ग-पुरस्कृतम् वैष्णवं स्थानं कृत्वा समं प्रविशेयु:|

अर्थ - दीक्षित आणि पवित्र असे सूत्रधार आणि दोन पारिपार्श्वक ज्यांच्यावर रक्षा आणि मंगल सूत्रांनी संस्कार झाले आहेत असा तिघांनी ओंजळीमध्ये फुले घेऊन, शुभ्र वस्त्र धारण करून, प्रसन्न चित्ताने आणि अद्भुत दृष्टीने, सौष्ठव अंगयुक्त वैष्णव स्थान करून रंगमंचावर एकत्र प्रवेश करावा.

भृङ्गारजर्जरधरौ भवेतां पारिपार्श्विकौ |
मध्ये तु सूत्रभृत्ताभ्यां वृत्तं पञ्चपदीं व्रजेत् || ६८ ||

पदच्छेद: - भृङ्गार-जर्जर-धरौ भवेतां पारिपार्श्विकौ |
मध्ये तु सूत्रभृत् ताभ्यां वृत्तं पञ्चपदीं व्रजेत् || ६८ ||

अन्वय: - पारिपार्श्विकौ भृङ्गारजर्जरधरौ भवेताम् | ताभ्यां मध्ये सूत्रभृत् पञ्चपदीं वृत्तं व्रजेत् |

अर्थ - ते दोघे पारिपार्श्वक क्रमाने भृंगार (झारी)आणि जर्जर धारण केलेले असावेत आणि त्यांच्यामध्ये असलेल्या सूत्रधाराने पाच पावले चालावे.

पदानि पञ्च गच्छेयुर्ब्रह्मणो यजनेच्छया |
पदानाञ्चापि विक्षेपं व्याख्यास्याम्यनुपूर्वश: || ६९ ||

पदच्छेद: - पदानि पञ्च गच्छेयु: ब्रह्मण: यजन-इच्छया |
पदानां च अपि विक्षेपं व्याख्यास्यामि अनुपूर्वश: || ६९ ||

अन्वय: - ब्रह्मण: यजन-इच्छया (ते) पञ्च पदानि गच्छेयु: | अनुपूर्वश: पदानां विक्षेपम् अपि व्याख्यास्यामि च |

अर्थ - ब्रह्माची पूजा करण्यासाठी त्या तिघांनी पाच पावले पुढे यावे. आता मी क्रमाने पायांच्या विक्षेपांची व्याख्या सांगतो.

त्रितालान्तरविष्कम्भमुत्क्षिपेच्चरणं शनै: |
पार्श्वोत्थानोत्थितं चैव तन्मध्ये पातयेत्पुन: || ७० ||

पदच्छेद: - त्रिताल-अन्तर-विष्कम्भम् उत्क्षिपेत् चरणं शनै:|
पार्श्व-उत्थान-उत्थितं चैव तत्-मध्ये पातयेत् पुन:॥ ७० ॥

अन्वय: - त्रिताल-अन्तर विष्कम्भं चरणं शनै: उत्क्षिपेत्| पुन: पार्श्व-उत्थान-उत्थितं पादं तन्मध्ये पातयेत्|

अर्थ - तीन तालाच्या अंतरावर पायाला हळूहळू वरच्या बाजूस उचलावे . बाजूला उचललेल्या पायास मध्यभागी ठेवावे .

एवं पञ्चपदीं गत्वा सूत्रधार: सहेतर:|
सूचीं वामपदे दद्याद्विक्षेपं दक्षिणेन च ॥ ७१ ॥

पदच्छेद: - एवं पञ्चपदीं गत्वा सूत्रधार: सहेतर:|
सूचीं वामपदे दद्यात् विक्षेपं दक्षिणेन च ॥ ७१ ॥

अन्वय: - एवं सहेतर: सूत्रधार: पञ्चपदीं गत्वा वामपदे सूचीं दद्यात्, दक्षिणेन विक्षेपं (दद्यात्) च|

अर्थ - अशाप्रकारे, सूत्रधाराने दोन पारिपार्श्वकांबरोबर पाच पावले चालून डाव्या पायाने सूची चारी करावी आणि उजवा पाय विक्षेप करावा .

पुष्पाञ्जल्यपवर्गश्च कार्यो ब्राह्मेऽथ मण्डले।
रङ्गपीठस्य मध्ये तु स्वयं ब्रह्मा प्रतिष्ठित: ॥ ७२ ॥

पदच्छेद: - पुष्पाञ्जलि-अपवर्ग: च कार्य: ब्राह्मे अथ मण्डले|
रङ्गपीठस्य मध्ये तु स्वयं ब्रह्मा प्रतिष्ठित:॥ ७२ ॥

अन्वय: - अथ ब्राह्मे मण्डले पुष्पाञ्जलि-अपवर्ग: कार्य: | रङ्गपीठस्य मध्ये ब्रह्मा स्वयं प्रतिष्ठित:|

अर्थ - यानंतर ब्रह्माच्या मंडलात पुष्पांजली अर्पण करावी . कारण रंगपीठाच्या मध्यभागी स्वत: ब्रह्मा प्रतिष्ठित आहेत .

तत: सललितैर्हस्तैरभिवन्द्य पितामहम्|
अभिवादानि कार्याणि त्रीणि हस्तेन भूतले ॥ ७३ ॥

पदच्छेद :- तत : सललितै : हस्तै : अभिवन्द्य पितामहम् |
अभिवादानि कार्याणि त्रीणि हस्तेन भूतले || ७३ ||

अन्वय : - तत : सललितै : पितामहम् अभिवादानि हस्तेन भूतले त्रीणि अभिवन्द्य कार्याणि |

अर्थ - यानंतर ललित हस्ताने ब्रह्माला अभिवादन करून जमिनीला हाताने स्पर्श करून त्याला तीन वेळा अभिवादन करावे .

कालप्रकर्षहेतोश्च पादानां प्रविभागत: |
सूत्रधारप्रवेशाद्यो वन्दनाभिनयान्तक: || ७४ ||
द्वितीय: परिवर्तस्तु कार्यो मध्यलयाश्रित: |

पदच्छेद :- काल-प्रकर्ष-हेतो : च पादानां प्रविभागत : |
सूत्रधार-प्रवेश-आद्य : वन्दन-अभिनय-अन्तक : || ७४ ||
द्वितीय : परिवर्त : तु कार्य : मध्य-लय-आश्रित : |

अन्वय : - कालप्रकर्षहेतो: पादानां प्रविभागत: सूत्रधारप्रवेशाद्य: वन्दन-अभिनय-अन्तक: मध्यलय-आश्रित : द्वितीय : परिवर्त : कार्य : |

अर्थ - काल प्रस्थापित करण्यासाठी पादांना विभाजित करून ठेवावे आणि सूत्रधाराच्या प्रवेशाच्या प्रारंभापासून ते वंदना म्हणजे अभिवादनाच्या अभिनयापर्यंत मध्य लयीत दुसरे परिवर्त करावे .

तत: परं तृतीये तु मण्डलस्य प्रदक्षिणम् || ७५ ||
भवेदाचमनं चैव जर्जरग्रहणं तथा ।
उत्थाय मण्डलात्तूर्णं दक्षिणं पादमुद्धरेत् || ७६ ||
वेधं तेनैव कुर्वीत विक्षेपं वामकेन च ।
पुनश्च दक्षिणं पादं पार्श्वसंस्थं समुद्धरेत् || ७७ ||
ततश्च वामवेधस्तु विक्षेपो दक्षिणस्य च ।

पदच्छेद :- तत : परं तृतीये तु मण्डलस्य प्रदक्षिणम् || ७५ ||
भवेत् आचमनं च एव जर्जरग्रहणं तथा |

उत्थाय मण्डलात् तूर्णं दक्षिणं पादम् उद्धरेत् ॥ ७६ ॥
वेधं तेन एव कुर्वीत विक्षेपं वामकेन च।
पुन: च दक्षिणं पादं पार्श्वसंस्थं समुद्धरेत् ॥ ७७ ॥
तत: च वामवेध: तु विक्षेप: दक्षिणस्य च।

अन्वय: - तत: परं तृतीये तु मण्डलस्य प्रदक्षिणम्, आचमनं तथा च जर्जरग्रहणं भवेत्। मण्डलात् तूर्णं दक्षिणं पादं तूर्णम् उत्थाय तेन एव वेधं कुर्वीत। वामकेन विक्षेपं (कुर्वीत) च। पुन: च दक्षिणं पादं पार्श्वसंस्थं समुद्धरेत्। तत: वामवेध: दक्षिणस्य विक्षेप: च (करणीय:)।

अर्थ - यानंतर तिसऱ्या परिवर्तात ब्रह्ममंडलाला प्रदक्षिणा घालावी. मग आचमन करून जर्जराचे ग्रहण करावे. मग ब्रह्माच्या मंडलावरून लगेच उठून उजवा पाय वर उचलावा. त्याच पायाने वेध करावा आणि डाव्या पायाने विक्षेप करावा. मग बाजूला असलेला उजवा पाय वर उचलावा. यानंतर डाव्या पायाने वेध आणि उजव्या पायाने विक्षेप करावा.

इत्येनेन विधानेन सम्यक्कृत्वा प्रदक्षिणम् ॥ ७८ ॥
भृङ्गारभृतमाहूय शौचं चापि समाचरेत्।
यथान्यायं तु कर्तव्या तेन ह्याचमनक्रिया ॥ ७९ ॥
आत्मप्रोक्षणमेवाद्भि: कर्तव्यं तु या यथाक्रमम्।

पदच्छेद: - इति अनेन विधानेन सम्यक् कृत्वा प्रदक्षिणम् ॥ ७८ ॥
भृङ्गारभृतम् आहूय शौचं च अपि समाचरेत्।
यथान्यायं तु कर्तव्या तेन हि आचमनक्रिया ॥ ७९ ॥
आत्मप्रोक्षणम् एव अद्भि: कर्तव्यं तु या यथाक्रमम्।

अन्वय: - अनेन विधानेन सम्यक् प्रदक्षिणं कृत्वा भृङ्गारभृतम् आहूय शौचम् अपि समाचरेत् च। तेन यथान्यायं आचमनक्रिया कर्तव्या। यथाक्रमम् अद्भि: आत्मप्रोक्षणं कर्तव्यम्।

अर्थ - अशाप्रकारे या विधानाने योग्य रीतीने प्रदक्षिणा करून भृंगार (झारी) धारण करणाऱ्याला

बोलावून सूत्रधाराने हातपाय धुवावेत. मग त्यानेच शास्त्राच्या विधिनुसार आचमन करावे. त्यानंतर पाण्याने क्रमश: स्वत:चे प्रोक्षण करावे.

प्रयत्नकृतशौचेन सूत्रधारेण यत्नत: ॥ ८० ॥
सन्निपातसमं ग्राह्यो जर्जरो विघ्नजर्जर: ।
प्रदक्षिणाद्यो विज्ञेयो जर्जरग्रहणान्तक: ॥ ८१ ॥

पदच्छेद: - प्रयत्नकृत-शौचेन सूत्रधारेण यत्नत: ॥ ८० ॥
सन्निपात-समं ग्राह्य: जर्जर: विघ्नजर्जर: ।
प्रदक्षिणाद्य: विज्ञेय: जर्जर-ग्रहणान्तक: ॥ ८१ ॥

अन्वय: - प्रयत्नकृतशौचेन सूत्रधारेण यत्नत: सन्निपातसमं विघ्नजर्जर: जर्जर: ग्राह्य: । एवं प्रदक्षिणाद्य: जर्जरग्रहणान्तक: अयं विधि: विज्ञेय: ।

अर्थ - प्रयत्नपूर्वक शुद्ध झाल्यावर सूत्रधाराने बलपूर्वक सन्निपाताबरोबरच विघ्नांचा नाश करणाऱ्या जर्जराचे ग्रहण करावे. प्रदक्षिणेने आरंभ करून जर्जर ग्रहण करेपर्यंत हा विधी करावा.

तृतीय: परिवर्तस्तु विज्ञेयो वै द्रुते लये ।
गृहीत्वा जर्जरं त्वष्टौ कला जप्यं प्रयोजयेत् ॥ ८२ ॥

पदच्छेद: - तृतीय: परिवर्त: तु विज्ञेय: वै द्रुते लये ।
गृहीत्वा जर्जरं तु अष्टौ कला: जप्यं प्रयोजयेत् ॥ ८२ ॥

अन्वय: - तृतीय: परिवर्त: तु द्रुते लये विज्ञेय: । जर्जरं गृहीत्वा अष्टौ कला: जप्यं प्रयोजयेत् ।

अर्थ - तिसरे परिवर्त द्रुतलयीत असावे. सूत्रधाराने जर्जर ग्रहण करून आठ कलांपर्यंत जप करावा.

वामवेधं तत:कुर्याद्विक्षेपं दक्षिणस्य च ।
तत: पञ्चपदीं चैव गच्छेत्तु कुतपोन्मुख: ॥ ८३ ॥

पदच्छेद: - वामवेधं तत: कुर्यात् विक्षेपं दक्षिणस्य च |
तत: पञ्चपदीं च एव गच्छेत् तु कुतप-उन्मुख: || ८३ ||

अन्वय: - तत: वामवेधं कुर्यात्, दक्षिणस्य विक्षेपं च (कुर्यात्)| तत: कुतप-उन्मुख: पञ्चपदीं गच्छेत्|

अर्थ - त्यानंतर डाव्या पायाने वेध करावा म्हणजेच सूची चारीचा प्रयोग करावा आणि उजव्या पायाने विक्षेप करावा. नंतर कुतुप म्हणजेच वाद्यवृंदाच्या दिशेने पाच पावले चालावे.

वामवेधस्तु तत्रापि विक्षेपो दक्षिणस्य तु |
जर्जरग्रहणाद्योऽयं कुतपाभिमुखान्तक: || ८४ ||

पदच्छेद: - वामवेध: तु तत्र अपि विक्षेप: दक्षिणस्य तु |
जर्जर-ग्रहणाद्य: अयं कुतप-अभिमुखान्तक: || ८४ ||

अन्वय: - तत्र अपि अयं वामवेध: दक्षिणस्य विक्षेप: | जर्जरग्रहणाद्य: कुतप-अभिमुखान्तक: (कुर्यात् )|

अर्थ - तिथे देखील डाव्या पायाने वेध करावा म्हणजेच सूची चारीचा प्रयोग करावा. उजव्या पायाने विक्षेप क्रिया करावी. जर्जर धारण करण्यापासून कुतूपाकडे चालेपर्यंत ही क्रिया करावी.

चतुर्थ: परिवर्तस्तु कार्यो द्रुतलये पुन: |
करपादनिपातास्तु भवन्त्यत्र तु षोडश || ८५ ||

पदच्छेद: - चतुर्थ: परिवर्त: तु कार्य: द्रुतलये पुन: |
कर-पाद-निपाता: तु भवन्ति अत्र तु षोडश || ८५ ||

अन्वय: - पुन: चतुर्थ: परिवर्त: तु द्रुतलये कार्य: |अत्र करपादनिपाता: तु षोडश भवन्ति |

अर्थ - चौथे परिवर्त द्रुत लयीत करावे. यात हात आणि पायाचे सोळा वेळा निपात होतात.

त्र्यश्रे द्वादश पातास्तु भवन्ति करपादयो: |
वन्दनान्यथ कार्याणि त्रीणि हस्तेन भूतले || ८६ ||

पदच्छेद : - त्र्यश्रे द्वादशपाता : तु भवन्ति करपादयो : |
वन्दनानि अथ कार्याणि त्रीणि हस्तेन भूतले || ८६ ||

अन्वय : - त्र्यश्रे करपादयो : द्वादश पाता : भवन्ति | अथ हस्तेन भूतले त्रीणि वन्दनानि कार्याणि |

अर्थ - त्र्यश्र तालात हात आणि पायाचे बारा वेळा पात होतात . यानंतर हातांनी भूमीला स्पर्श करत तीन वेळा नमस्कार करावा .

आत्मप्रोक्षणमद्भिश्च त्र्यश्रे नैव विधीयते |
एवमुत्थापनं कार्यं ततस्तु परिवर्तनम् || ८७ ||

पदच्छेद : - आत्म-प्रोक्षणम् अद्भि : च त्र्यश्रे न एव विधीयते |
एवम् उत्थापनं कार्यं तत : तु परिवर्तनम् || ८७ ||

अन्वय : - त्र्यश्रे अद्भि : आत्मप्रोक्षणं न एव विधीयते | एवम् उत्थापनं तत : तु परिवर्तनं कार्यम् |

अर्थ - त्र्यश्र तालात पाण्याने आत्मप्रोक्षण केले जात नाही . अशाप्रकारे प्रथम उत्थापन आणि मग परिवर्तन करावे .

## ❖ परिवर्तिनी ध्रुवा ❖

चतुरश्रलये मध्ये सन्निपातैरथाष्टभि : |
यस्या लघूनि सर्वाणि केवलं नैधनं गुरु || ८८ ||
भवेदतिजगत्यान्तु सा ध्रुवा परिवर्तनी |

पदच्छेद : - चतुरश्र-लये मध्ये सन्निपातै : अथ अष्टभि : |
यस्या लघूनि सर्वाणि केवलं नैधनं गुरु || ८८ ||
भवेत् अतिजगत्यां तु सा ध्रुवा परिवर्तनी |

अन्वय : - (यदा) चतुरश्रलये मध्ये अष्टभि: सन्निपातै: यस्या लघूनि सर्वाणि केवलं नैधनं गुरु (भवति)| अतिजगत्यां सा परिवर्तनी ध्रुवा भवेत् |

अर्थ - परिवर्तिनी ध्रुवा चतुरश्र तालात मध्यलयीत आठ सन्निपाताने युक्त असते . ज्यात अतिजगती छंदाचा प्रयोग होतो ज्यात तेरा अक्षरे असतात . ज्याची सर्व अक्षरे लघू असतात फक्त शेवटचे अक्षर गुरू असते त्याला 'परिवर्तिनी ध्रुवा' म्हणतात .

वार्तिकेन तु मार्गेण वाद्येनानुगतेन च ॥ ८९ ॥
ललितैः पादविन्यासैर्वन्द्या देवा यथादिशम्।

पदच्छेदः - वार्तिकेन तु मार्गेण वाद्येन अनुगतेन च ॥ ८९ ॥
ललितैः पाद-विन्यासैः वन्द्याः देवाः यथादिशम् ।

अन्वयः - वार्तिकेन मार्गेण, अनुगतेन वाद्येन च ललितैः पादविन्यासैः यथादिशं देवाः वन्द्याः।

अर्थ - सूत्रधाराने वार्तिक मार्गानुसार वाद्याला अनुसरणारे ललित पदविन्यास करीत दिशेनुसार सर्व देवतांना वंदन करावे .

द्विकलं पादपतनं पादचार्या गतं भवेत् ॥ ९० ॥
एकैकस्यां विधिं तथा सन्निपातद्वयं भवेत्।
वामपादेन वेधस्तु कर्तव्यो नृत्तयोक्तृभिः।
द्वितालान्तरविष्कम्भो विक्षेपो दक्षिणस्य च ॥ ९१ ॥

पदच्छेदः - द्विकलं पादपतनं पादचार्या गतं भवेत् ॥ ९० ॥
एकैकस्यां विधिं तथा सन्निपात-द्वयं भवेत्।
वामपादेन वेधः तु कर्तव्यः नृत्तयोक्तृभिः।
द्विताल-अन्तर-विष्कम्भः विक्षेपः दक्षिणस्य च ॥ ९१ ॥

अन्वयः - पादचार्या द्विकलं गतं भवेत् । तथा एकैकस्यां सन्निपातद्वयं विधिं भवेत् । नृत्तयोक्तृभिः वामपादेन वेधः तु कर्तव्यः । द्विताल-अन्तर-विष्कम्भः दक्षिणस्य विक्षेपः च (कर्तव्यः)।

अर्थ - पादचारीच्या प्रयोगात पाय पडण्याचे अंतर दोन कलांचे असते . नाट्यविद्वानांनी यात डाव्या पायाने वेध म्हणजेच सूची चारीचा प्रयोग करावा आणि दोन तालांच्या अंतरावर उजव्या पायाने विक्षेप करावा .

ततः पञ्चपदीं गच्छेदतिक्रान्तैः पदैरथ ।
ततोऽभिवादनं कुर्याद्दिवतानां यथादिशम् ॥ ९२ ॥

पदच्छेद : - तत : पञ्चपदीं गच्छेत् अतिक्रान्तै : पदै : अथ |
तत : अभिवादनं कुर्यात् देवतानां यथादिशम् || ९२ ||

अन्वय : - तत : अतिक्रान्तै : पदै : पञ्चपदीं गच्छेत् | तत : यथादिशं देवतानाम् अभिवादनं कुर्यात् |

अर्थ - यानंतर अतिक्रांत चारी पायाने पाच पावले चालावे . मग दिशांनुसार देवतांना अभिवादन करावे .

वन्देत प्रथमं पूर्वां दिशं शक्राधिदैवताम् |
द्वितीयां दक्षिणामाशां वन्देत यमदैवताम् || ९३ ||

पदच्छेद : - वन्देत प्रथमं पूर्वां दिशं शक्र-अधिदैवताम् |
द्वितीयां दक्षिणाम् आशां वन्देत यमदैवताम् || ९३ ||

अन्वय : - प्रथमं शक्राधिदैवतां पूर्वां दिशं वन्देत | द्वितीयां यमदैवतां दक्षिणाम् आशां वन्देत |

अर्थ - प्रथम इंद्रदेवतेचे अधिष्ठान असलेल्या पूर्व दिशेला वंदन करावे . त्यानंतर यमदेवाचे अधिष्ठान असलेल्या दक्षिण दिशेला वंदन करावे .

वन्देत पश्चिमामाशां ततो वरुणदैवताम् |
चतुर्थीमुत्तरामाशां वन्देत धनदाश्रयाम् || ९४ ||

पदच्छेद : - वन्देत पश्चिमाम् आशां तत : वरुणदैवताम् |
चतुर्थीम् उत्तराम् आशां वन्देत धनद-आश्रयाम् || ९४ ||

अन्वय : - तत : वरुणदैवतां पश्चिमाम् आशां वन्देत | चतुर्थीं धनदाश्रयाम् | उत्तराम् आशां वन्देत |

अर्थ - यानंतर वरुण देवाचे अधिष्ठान असलेल्या पश्चिम दिशेला वंदन करावे . मग कुबेराद्वारे आश्रित असलेल्या उत्तर दिशेला वंदन करावे .

दिशां तु वन्दनं कृत्वा वामवेधं प्रयोजयेत् |
दक्षिणेन च कर्तव्यं विक्षेपपरिवर्तनम् || ९५ ||

पदच्छेद : - दिशां तु वन्दनं कृत्वा वामवेधं प्रयोजयेत् |
दक्षिणेन च कर्तव्यं विक्षेप-परिवर्तनम् || ९५ ||

अन्वय : - दिशां वन्दनं कृत्वा वामवेधं प्रयोजयेत् | दक्षिणेन विक्षेपपरिवर्तनं कर्तव्यं च |

अर्थ - अशाप्रकारे दिशांना वंदन करून डाव्या पायाने वेध करावा. मग उजव्या पायाने विक्षेपपूर्वक परिवर्तन करावे.

प्राङ्मुखस्तु ततः कुर्यात्पुरुषस्त्रीनपुंसकैः |
त्रिपद्या सूत्रभृद्रुद्रब्रह्मोपेन्द्राभिवादनम् || ९६ ||

पदच्छेद : - प्राङ्मुखः तु ततः कुर्यात् पुरुष-स्त्री-नपुंसकैः |
त्रिपद्या सूत्रभृत् रुद्र-ब्रह्मा-उपेन्द्र-अभिवादनम् || ९६ ||

अन्वय : - ततः प्राङ्मुखः सूत्रभृत् पुरुषस्त्रीनपुंसकैः त्रिपद्या रुद्रब्रह्मोपेन्द्र-अभिवादनं कुर्यात् |

अर्थ - यानंतर पूर्वाभिमुख होऊन सूत्रधाराने पुरुष, स्त्री आणि नपुंसक लक्षण असलेली त्रिपदी अर्थात तीन पायांचा न्यास करून रूद्र, ब्रह्मा आणि विष्णू यांना अभिवादन करावे.

दक्षिणं तु पदं पुंसो वामं स्त्रीणां प्रकीर्तितम् |
पुनर्दक्षिणमेव स्यान्नात्युत्क्षिप्तं नपुंसकम् || ९७ ||

पदच्छेद : - दक्षिणं तु पदं पुंसः वामं स्त्रीणां प्रकीर्तितम् |
पुनः दक्षिणम् एव स्यात् न अति-उत्क्षिप्तं नपुंसकम् || ९७ ||

अन्वय : - दक्षिणं पदं तु पुंसः, वामं (पदं) स्त्रीणां प्रकीर्तितम् | पुनः न अतिउत्क्षिप्तं दक्षिणं (पदं) नपुंसकम् एव स्यात् |

अर्थ - उजवा पाय पुरुष पाद आणि डावा पाय स्त्रीपाद म्हटला गेला आहे आणि मग जास्त न उचलला गेलेला उजवा पाय नपुंसक पाय म्हटला गेला आहे.

वन्देत पौरुषेणेशं स्त्रीपदेन जनार्दनम् ।
नपुंसकपदेनापि तथैवाम्बुजसम्भवम् || ९८ ||

पदच्छेद :- वन्देत पौरुषेण ईशं स्त्रीपदेन जनार्दनम्।
नपुंसक-पदेन अपि तथा एव अम्बुज-सम्भवम्॥ ९८॥

अन्वय : - पौरुषेण ईशं वन्देत।स्त्रीपदेन जनार्दनं, तथा एव नपुंसकपदेन अम्बुजसम्भवं (वन्देत)।

अर्थ - पुरुष पादामध्ये उभे राहून शिवाला वंदन करावे. स्त्रीपादात उभे राहून विष्णूला तर नपुंसकपायाद्वारे उभे राहून ब्रह्माला वंदन करावे.

❖ चौथे परिवर्त करणाऱ्याचा प्रवेश ❖

परिवर्तनमेवं स्यात्तस्यान्ते प्रविशेत्ततः।
चतुर्थकारः पुष्पाणि प्रगृह्य विधिपूर्वकम्॥ ९९॥

पदच्छेद :- परिवर्तनम् एवं स्यात् तस्य अन्ते प्रविशेत् ततः।
चतुर्थकारः पुष्पाणि प्रगृह्य विधिपूर्वकम्॥ ९९॥

अन्वय : - एवं परिवर्तनं स्यात्। ततः तस्य अन्ते चतुर्थकारः विधिपूर्वकं पुष्पाणि प्रगृह्य (रङ्गमञ्चे) प्रविशेत्।

अर्थ - अशाप्रकारे परिवर्तन क्रिया संपूर्ण होते. मग त्याच्या शेवटी चौथे परिवर्त करणाऱ्याने विधिवत फुले घेऊन रंगमंचावर प्रवेश करावा.

यथावत्तेन कर्तव्यं पूजनं जर्जरस्य तु।
कुतपस्य च सर्वस्य सूत्रधारस्य चैव हि॥ १००॥

पदच्छेद :- यथावत् तेन कर्तव्यं पूजनं जर्जरस्य तु।
कुतपस्य च सर्वस्य सूत्रधारस्य च एव हि॥ १००॥

अन्वय : - तेन यथावत् जर्जरस्य, सर्वस्य कुतपस्य, सूत्रधारस्य च पूजनं कर्तव्यम्।

अर्थ - यानंतर विधिनुसार जर्जराची आणि संपूर्ण कुतपांची तसेच सूत्रधाराची देखील पूजा करावी.

तस्य भाण्डसमः कार्यस्तज्ज्ञैर्गतिपरिक्रमः।
न तत्र गानं कर्तव्यं तत्र स्तोभक्रिया भवेत्॥ १०१॥

पदच्छेद: - तस्य भाण्डसम: कार्य: तज्ज्ञै: गतिपरिक्रम: |
न तत्र गानं कर्तव्यं तत्र स्तोभक्रिया भवेत् || १०१ ||

अन्वय: - तज्ज्ञै: तस्य गतिपरिक्रम: भाण्डसम: कार्य: | तत्र गानं न कर्तव्यम् | तत्र स्तोभक्रिया भवेत् |

अर्थ - नाट्यविद्वानांनी त्या चतुर्थकाराच्या गतीचे परिक्रमण भांडवाद्यांबरोबर केले पाहिजे. त्यावेळी गायन करू नये, केवळ स्तोभक्रिया म्हणजेच केवळ अर्थहीन अक्षरांचा आलाप असावा.

चतुर्थकार: पूजां तु स कृत्वान्तर्हितो भवेत् |
ततो गेयावकृष्टा तु चतुरश्रा स्थिता ध्रुवा || १०२ ||

पदच्छेद: - चतुर्थकार: पूजां तु स: कृत्वा अन्तर्हित: भवेत् |
तत: गेया अवकृष्टा तु चतुरश्रा स्थिता ध्रुवा || १०२ ||

अन्वय: - पूजां कृत्वा चतुर्थकार: तु अन्तर्हित: भवेत् | तत: चतुरश्रा स्थिता अवकृष्टा ध्रुवा गेया |

अर्थ - अशाप्रकारे पूजा संपन्न करून तो चतुर्थकार रंगमंचावरून निघून जातो. त्यानंतर चतुरश्र ताल तसेच विलंबित लयीने युक्त अशी अवकृष्टा ध्रुवा गायली जावी.

## ❖ अवकृष्टा ध्रुवा ❖

गुरुप्राया तु सा कार्या तथा चैवावपाणिका ।
स्थायिवर्णाश्रयोपेता कलाष्टकविनिर्मिता || १०३ ||

पदच्छेद: - गुरुप्राया तु सा कार्या तथा च एव अवपाणिका |
स्थायिवर्ण-आश्रय-उपेता कला-अष्टक-विनिर्मिता || १०३ ||

अन्वय: - सा (अवकृष्टा ध्रुवा) तु गुरुप्राया, अवपाणिका, स्थायिवर्ण-आश्रय-उपेता कला-अष्टक-विनिर्मिता च कार्या |

अर्थ - ती अवकृष्टा ध्रुवा सुरूवातीस गुरू अक्षर असलेली अवपाणिका तालाने युक्त, स्थायी वर्णाच्या आश्रयाने युक्त आणि आठ कलांनी निर्मित असते.

(चतुर्थं पञ्चमं चैव सप्तमं चाष्टमं तथा |
लघूनि पादे पङ्क्त्यान्तु सावकृष्टा ध्रुवा स्मृता ||)

पदच्छेद :- (चतुर्थं पञ्चमं चैव सप्तमं च अष्टमं तथा |
लघूनि पादे पङ्क्त्यां तु सा अवकृष्टा ध्रुवा स्मृता ||)

अन्वय : - (यस्यां) पङ्क्त्यां पादे चतुर्थं, पञ्चमं, सप्तमं तथा च अष्टमं लघूनि सा अवकृष्टा ध्रुवा स्मृता |

अर्थ - ज्यात पंक्ती छंदाच्या प्रत्येक चरणात चौथे, पाचवे, सातवे, तसेच आठवे अक्षर लघू असते त्यास 'अवकृष्टा ध्रुवा' असे म्हणतात .

❖ नांदीपठण ❖

सूत्रधार: पठेत्तत्र मध्यमं स्वरमाश्रित: |
नान्दीं पदैर्द्वादशभिरष्टभिर्वाऽप्यलङ्कृताम् || १०४ ||

पदच्छेद :- सूत्रधार : पठेत् तत्र मध्यमं स्वरम् आश्रित : |
नान्दीं पदै : द्वादशभि : अष्टभि : वा अपि अलङ्कृताम् || १०४ ||

अन्वय : - तत्र सूत्रधार : मध्यमं स्वरम् आश्रित : द्वादशभि : अष्टभि : वा पदै : अलङ्कृतां नान्दीं पठेत् |

अर्थ - यानंतर सूत्रधाराने मध्यमस्वराचा आश्रय घेऊन बारा किंवा आठ पदांनी अलंकृत नांदीचे पठण करावे .

नमोऽस्तु सर्वदेवेभ्यो द्विजातिभ्य: शुभं तथा |
जितं सोमेन वै राज्ञा शिवं गोब्राह्मणाय च || १०५ ||

पदच्छेद :- नम : अस्तु सर्वदेवेभ्य : द्विजातिभ्य : शुभं तथा |
जितं सोमेन वै राज्ञा शिवं गोब्राह्मणाय च || १०५ ||

अन्वय : - सर्वदेवेभ्य : नम : | द्विजातिभ्य : शुभं अस्तु | तथा राज्ञा सोमेन जितं, गोब्राह्मणाय शिवं च अस्तु |

अर्थ - सर्व देवतांना नमस्कार असो . तसेच द्विजातींचे कल्याण होवो . राजा चंद्रमाचा विजय असो . गायी आणि ब्राह्मणांचे मंगल होवो .

ब्रह्मोत्तरं तथैवास्तु हता ब्रह्मद्विषस्तथा |
प्रशास्त्विमां महाराज: पृथिवीं च ससागराम् || १०६ ||

पदच्छेद: - ब्रह्मोत्तरं तथा एव अस्तु हता: ब्रह्मद्विष: तथा |
प्रशास्तु इमां महाराज: पृथिवीं च ससागराम् || १०६ ||

अन्वय: - तथा एव ब्रह्मोत्तरम् अस्तु | तथा ब्रह्मद्विष: हता: (भवन्तु)| महाराज: इमां ससागरां पृथिवीं प्रशास्तु च |

अर्थ - त्याचप्रकारे ब्राह्मणांचा उत्कर्ष होवो आणि ब्रह्मद्रोहींचा नाश होवो . समुद्रासह संपूर्ण पृथ्वीवर महाराजांचे राज्य असावे .

राष्ट्रं प्रवर्धतां चैव रङ्गस्याशा समृद्ध्यतु |
प्रेक्षाकर्तुर्महान्धर्मो भवतु ब्रह्मभाषित: || १०७ ||

पदच्छेद: - राष्ट्रं प्रवर्धतां च एव रङ्गस्य आशा समृद्ध्यतु |
प्रेक्षाकर्तु: महान् धर्म: भवतु ब्रह्मभाषित: || १०७ ||

अन्वय: - राष्ट्रं प्रवर्धतां | रङ्गस्य आशा समृद्ध्यतु च| प्रेक्षाकर्तु: ब्रह्मभाषित: महान् धर्म: भवतु |

अर्थ - राष्ट्राची समृद्धी होवो . रंगमंचाची आशा समृद्ध होवो . तसेच प्रेक्षानिर्मिती करणाऱ्या नाट्याचार्याला वेदात सांगितलेला महान धर्म प्राप्त होवो .

काव्यकर्तुर्यशश्चास्तु धर्मश्चापि प्रवर्धताम् |
इज्यया चानया नित्यं प्रीयन्तां देवता इति || १०८ ||

पदच्छेद: - काव्यकर्तु: यश: च अस्तु धर्म: च अपि प्रवर्धताम्।
इज्यया च अनया नित्यं प्रीयन्तां देवता: इति || १०८ ||

अन्वय: - काव्यकर्तु: यश: च अस्तु | धर्म: च अपि प्रवर्धताम् | अनया इज्यया नित्यं देवता: प्रीयन्ताम् |

अर्थ - काव्य-निर्मात्याला (नाटककाराला) यशप्राप्ती होवो आणि धर्माची वृद्धी होवो. अशाप्रकारे या काव्यरूपी यज्ञाच्या अनुष्ठानाने देवता सदैव प्रसन्न होवोत.

नान्दीपदान्तरेष्वेषु ह्येवमार्येति नित्यश: |
वदेतां सम्यगुक्ताभिर्वाग्भिस्तौ पारिपार्श्विकौ || १०९ ||

पदच्छेद: - नान्दी-पदान्तरेषु एषु हि एवम् आर्या इति नित्यश: |
वदेतां सम्यक् उक्ताभि: वाग्भि: तौ पारिपार्श्विकौ || १०९ ||

अन्वय: - एषु नान्दीपदान्तरेषु पारिपार्श्विकौ सम्यक् उक्ताभि: वाग्भि: नित्यश: "आर्या! एवम् हि (भवतु)|" इति वदेताम् |

अर्थ - अशाप्रकारे नांदीपदाच्या पठणाच्या शेवटी त्या दोन्ही पारिपार्श्विकांनी चांगल्याप्रकारे स्पष्टवाणीने "हे आर्य! असेच होऊ दे" असे म्हणावे.

## ❖ शुष्कावकृष्टा ❖

एवं नान्दी विधातव्या यथावल्लक्षणान्विता |
ततश्शुष्कावकृष्टा स्याज्जर्जरश्लोकदर्शिका || ११० ||

पदच्छेद: - एवं नान्दी विधातव्या यथावत् लक्षण-अन्विता |
तत: शुष्कावकृष्टा स्यात् जर्जर-श्लोकदर्शिका || ११० ||

अन्वय: - एवं यथावत् लक्षण-अन्विता नान्दी विधातव्या | तत: जर्जरश्लोकदर्शिका शुष्कावकृष्टा स्यात् |

अर्थ - अशाप्रकारे लक्षणांनी युक्त नांदीचा विधिवत प्रयोग करावा. त्यानंतर जर्जराच्या यशाचे प्रदर्शन करणाऱ्या शुष्कावकृष्टा ध्रुवाचे गायन करावे.

नवगुर्वक्षराण्यादौ षड्लघूनि गुरुत्रयम् |
शुष्कावकृष्टा तु भवेत्कला ह्यष्टौ प्रमाणत:|| १११ ||

यथा-

दिग्ले दिग्ले दिग्ले दिग्ले जम्बुकपलितकते तेचाम् |

पदच्छेद: - नव-गुरु-अक्षराणि आदौ षड् लघूनि गुरुत्रयम्।
शुष्कावकृष्टा तु भवेत् कला हि अष्टौ प्रमाणत:॥ १११ ॥
यथा-
दिग्ले दिग्ले दिग्ले दिग्ले जम्बुकपलितकते तेचाम्।

अन्वय: - आदौ नव-गुरु-अक्षराणि, षड्लघूनि, गुरुत्रयम् अष्टौ कला हि प्रमाणत: शुष्कावकृष्टा भवेत। यथा- दिग्ले दिग्ले दिग्ले दिग्ले जम्बुकपलितकते तेचाम्।

अर्थ - शुष्कावकृष्टा ध्रुवेमध्ये, आधीची नऊ अक्षरे गुरू असतात. नंतर सहा अक्षरे लघु आणि शेवटची तीन अक्षरे गुरू असतात तसेच आठ कलांचे परिमाण असते. जसे - दिग्ले दिग्ले दिग्ले दिग्ले जम्बुकपलितकते तेचाम्।

कृत्वा शुष्कावकृष्टा तु यथावद्द्विजसत्तमा:॥ ११२ ॥
तत: श्लोकं पठेदेकं गम्भीरस्वरसंयुतम्।
देवस्तोत्रं पुरस्कृत्य यस्य पूजा प्रवर्तते ॥ ११३ ॥

पदच्छेद: - कृत्वा शुष्कावकृष्टा तु यथावत् द्विजसत्तमा:॥ ११२ ॥
तत: श्लोकं पठेत् एकं गम्भीर-स्वर-संयुतम्।
देवस्तोत्रं पुरस्कृत्य यस्य पूजा प्रवर्तते॥ ११३ ॥

अन्वय: - हे द्विजसत्तमा:! यथावत् शुष्कावकृष्टा कृत्वा तत: यस्य पूजा प्रवर्तते (तस्य) देवस्तोत्रं पुरस्कृत्य गम्भीरस्वरसंयुतम् एकं श्लोकं पठेत्।

अर्थ - हे श्रेष्ठ ब्राह्मणांनो! विधीपूर्वक शुष्कावकृष्टा ध्रुवाचे गायन करून ज्या देवतेची पूजा सांगितली आहे त्या देवतेची स्तुती करणारा एक श्लोक गंभीर स्वरात म्हणावा.

राज्ञो वा यत्र भक्ति: स्यादथ वा ब्रह्मणस्तवम्।
गदित्वा जर्जरश्लोकं रङ्गद्वारे च यत्स्मृतम् ॥ ११४ ॥
पठेदन्यं पुन: श्लोकं जर्जरस्य प्रकाशनम्।
जर्जरं नमयित्वा तु ततश्चारीं प्रयोजयेत् ॥ ११५ ॥
पारिपार्श्विकयोश्च स्यात्पश्चिमेनापसर्पणम्।

पदच्छेद : - राज्ञ : वा यत्र भक्ति : स्यात् अथ वा ब्रह्मण-स्तवम् |
गदित्वा जर्जर-श्लोकं रङ्गद्वारे च यत्स्मृतम् || ११४ ||
पठेत् अन्यं पुन : श्लोकं जर्जरस्य प्रकाशनम् |
जर्जरं नमयित्वा तु तत : चारीं प्रयोजयेत् || ११५ ||
पारिपार्श्विकयो : च स्यात् पश्चिमेन अपसर्पणम् |

अन्वय : - यत्र राज्ञः भक्तिः स्यात् ब्रह्मणस्तवं वा (स्यात्), रङ्गद्वारे यत् स्मृतं च जर्जरश्लोकं गदित्वा पुनः अन्यं जर्जरस्य प्रकाशनं श्लोकं पठेत | जर्जरं नमयित्वा ततः चारीं प्रयोजयेत् | पारिपार्श्विकयो : च पश्चिमेन अपसर्पणं कुर्यात् च |

अर्थ - ज्यात राजाची भक्ती असेल किंवा ब्राह्मणांची स्तुती असेल आणि रंगमंचाच्या दरवाज्यावर ज्याचे स्मरण केले गेले आहे, अशा जर्जर श्लोकाचे पठण करून मग जर्जराचे यश प्रकाशित करणाऱ्या दुसऱ्या श्लोकाचे पठण करावे .

यानंतर जर्जराला प्रणाम करून चारीचा प्रयोग करावा आणि त्याचवेळी पश्चिमेला म्हणजेच मागच्या बाजूने दोन्ही पारिपार्श्वकांनी निघून जावे .

## ❖ अड्डिता ध्रुवा ❖

अड्डिता चात्र कर्तव्या ध्रुवा मध्यलयान्विता || ११६ ||
चतुर्भि :सन्निपातैश्च चतुरश्रा प्रमाणत : |
आद्यमन्त्यं चतुर्थं च पञ्चमं च तथा गुरु || ११७ ||
यस्यां ह्रस्वानि शेषाणि सा ज्ञेया त्वतिा बुधै :|

पदच्छेद : - अड्डिता च अत्र कर्तव्या ध्रुवा मध्य-लय-अन्विता || ११६ ||
चतुर्भि : सन्निपातै : च चतुरश्रा प्रमाणत : |
आद्यम् अन्त्यं चतुर्थं च पञ्चमं च तथा गुरु || ११७ ||
यस्यां ह्रस्वानि शेषाणि सा ज्ञेया तु अड्डिता बुधै : |

अन्वय : - अत्र मध्यलय-अन्विता 'अड्डिता ध्रुवा' कर्तव्या | चतुर्भि : सन्निपातै : चतुरश्रा प्रमाणत : यस्याम् आद्यम् अन्त्यं, चतुर्थं, पञ्चमं, च गुरु शेषाणि ह्रस्वानि (अक्षराणि) (भवन्ति), सा बुधै : 'अड्डिता' ज्ञेया |

अर्थ - यानंतर मध्यलयीत अड्डिता ध्रुवेचा प्रयोग करावा . जे चार सन्निपातांनी युक्त आहे तसेच त्याचे प्रमाण चतुरश्र आहे . यात पहिले, चौथे, पाचवे आणि शेवटचे अक्षर गुरू असते तसेच बाकीची अक्षरे लघू असतात . विद्वानांनी त्यास 'अड्डिता ध्रुवा' असे जाणावे .

अस्या: प्रयोगं वक्ष्यामि यथापूर्वं महेश्वर: || ११८ ||
सहोमया क्रीडितवान्नानाभावविचेष्टितै: |

पदच्छेद: - अस्या:प्रयोगं वक्ष्यामि यथापूर्वं महेश्वर:|| ११८ ||
सह उमया क्रीडितवान् नाना-भाव-विचेष्टितै:|

अन्वय: - अस्या: प्रयोगं वक्ष्यामि | यथापूर्वम् उमया सह महेश्वर: नाना-भाव-विचेष्टितै: क्रीडितवान्|

अर्थ - आता मी या चारींच्या प्रयोगाचे वर्णन करतो . जसे आधी महेश्वर शिवाने उमासोबत विविध भाव आणि क्रिया यांसह यांचा अभिनय केला होता .

कृत्वाऽवहित्थं स्थानं तु वामं चाधोमुखं भुजम् || ११९ ||
चतुरश्रमुर: कार्यमञ्चितश्चापि मस्तक: |

पदच्छेद: - कृत्वा अवहित्थं स्थानं तु वामं च अधोमुखं भुजम्|| ११९ ||
चतुरश्रम् उर: कार्यम् अञ्चित: च अपि मस्तक:|

अन्वय: - अवहित्थं स्थानं कृत्वा वामं भुजम् अधोमुखं कार्यम् | उर: चतुरश्रं मस्तक: अञ्चित: च (कार्य:)|

अर्थ - सूत्रधाराने प्रथम अवहित्थ स्थानात उभे राहून डाव्या हाताला खालच्या बाजूस वाकवून छाती चतुरश्र ठेवावी तसेच डोके झुकवावे .

नाभिप्रदेशे विन्यस्य जर्जरं च तुलाधृतम् || १२० ||
वामपल्लवहस्तेन पादैस्तालान्तरोत्थितै: |
गच्छेत्पञ्चपदीं चैव सविलासाङ्गचेष्टितै: || १२१ ||

पदच्छेद :- नाभि-प्रदेशे विन्यस्य जर्जरं च तुला-धृतम् ॥ १२० ॥
वाम-पल्लव-हस्तेन पादै : तालान्तर-उत्थितै :।
गच्छेत् पञ्चपदीं च एव सविलास-अङ्गचेष्टितै : ॥ १२१ ॥

अन्वय : - तुलाधृतं जर्जरं नाभिप्रदेशे विन्यस्य वाम-पल्लव-हस्तेन तालान्तर-उत्थितै: पादै: सविलास-अङ्गचेष्टितै : पञ्चपदीं गच्छेत्।

अर्थ - यानंतर संतुलित रूपात धारण केलेल्या जर्जराला नाभिजवळ ठेवून डावा हात पल्लव करून एक-एक तालाच्या अंतराने उचललेल्या पायाद्वारे विलासयुक्त अंगाने पाच पावले चालावे.

वामवेधस्तु कर्तव्यो विक्षेपो दक्षिणस्य च ।
शृङ्गाररससंयुक्तां पठेदार्यां विचक्षण: ॥ १२२ ॥

पदच्छेद :- वामवेध : तु कर्तव्य : विक्षेप : दक्षिणस्य च ।
शृङ्गार-रस-संयुक्तां पठेत् आर्यां विचक्षण : ॥ १२२ ॥

अन्वय : - वामवेध :, दक्षिणस्य विक्षेप : च कर्तव्य : । (तत:) विचक्षण: (सूत्रधार:) शृङ्गार-रस-संयुक्ता आर्यां पठेत्।

अर्थ - यानंतर डाव्या पायाने वेध म्हणजेच सूची चारीचा प्रयोग करावा आणि उजव्या पायाने विक्षेप करावा. मग विद्वान सूत्रधाराने शृंगार रसयुक्त आर्येचे पठण करावे.

चारीश्लोकं गदित्वा तु कृत्वा च परिवर्तनम् ।
तैरेव च पदै: कार्यं पश्चिमेनापसर्पणम् ॥ १२३ ॥

पदच्छेद :- चारीश्लोकं गदित्वा तु कृत्वा च परिवर्तनम्।
तै : एव च पदै : कार्यं पश्चिमेन अपसर्पणम् ॥ १२३ ॥

अन्वय : - चारीश्लोकं गदित्वा, परिवर्तनं कृत्वा च तै : एव पदै : पश्चिमेन अपसर्पणं कार्यम्।

अर्थ - यानंतर चारीचे श्लोकपठण करून मग परिवर्तन करून तशाच प्रकारे पूर्वी सांगितलेल्या विधिनुसार त्याच पायांनी पश्चिम दिशेला म्हणजेच मागच्या दिशेला जावे.

### ❖ महाचारी ❖

पारिपार्श्विकहस्ते तु न्यस्य जर्जरमुत्तमम् |
महाचारीं ततश्चैव प्रयुञ्जीत यथाविधि || १२४ ||

### ❖ चतुरश्रा ध्रुवा ❖

चतुरश्रा ध्रुवा तत्र तथा द्रुतलयान्विता |
चतुर्भिस्सन्निपातैश्च कला ह्यष्टौ प्रमाणतः || १२५ ||

पदच्छेदः - पारिपार्श्विक-हस्ते तु न्यस्य जर्जरम् उत्तमम् |
महाचारीं ततः चैव प्रयुञ्जीत यथाविधि || १२४ ||
चतुरश्रा ध्रुवा तत्र तथा द्रुतलय-अन्विता |
चतुर्भिः सन्निपातैः च कला हि अष्टौ प्रमाणतः || १२५ ||

अन्वयः - ततः पारिपार्श्विकहस्ते उत्तमं जर्जरं न्यस्य यथाविधि महाचारीं प्रयुञ्जीत | तत्र चतुरश्रा द्रुतलय-अन्विता ध्रुवा चतुर्भिः सन्निपातैः, अष्टौ कला प्रमाणतः कार्या |

अर्थ - यानंतर पारिपार्श्वकाच्या हातात उत्तम जर्जर देऊन मग विधिपूर्वक महाचारीचा प्रयोग करावा आणि त्यात द्रुत लयीतील चतुरश्र ध्रुवेचा प्रयोग करावा जो चार संनिपात तसेच आठ कलांनी युक्त असतो .

आद्यं चतुर्थमन्त्यं च सप्तमं दशमं गुरु |
लघु शेषं ध्रुवापादे चतुर्विंशतिके भवेत् || १२६ ||

पदच्छेदः - आद्यं चतुर्थम् अन्त्यं च सप्तमं दशमं गुरु |
लघु शेषं ध्रुवापादे चतुर्विंशतिके भवेत् || १२६ ||

अन्वयः - चतुर्विंशतिके ध्रुवापादे आद्यं, चतुर्थम्, अन्त्यं, सप्तमं, दशमं च गुरु, शेषं लघु भवेत् |

अर्थ - या ध्रुवेच्या त्रिष्टुप जातीच्या प्रत्येक चरणात अकरा अक्षरें असतात ज्यातील पहिले, चौथे, सातवे, दहावे आणि शेवटचे अक्षर गुरू असते आणि उरलेली सर्व लघू असतात .

यथा

पादतलाहतिपातितशैलं क्षोभितभूतसमग्रसमुद्रम् |
ताण्डवनृत्तमिदं प्रलयान्ते पातु जगत्सुखदायि हरस्य || १२७ ||
भाण्डोन्मुखेन कर्तव्यं पादविक्षेपणं ततः |
सूचीं कृत्वा पुनः कुर्याद्विक्षेपपरिवर्तनम् || १२८ ||

पदच्छेदः - पाद-तल-आहति-पातित-शैलं क्षोभित-भूत-समग्र-समुद्रम् |
ताण्डव-नृत्तम् इदं प्रलय-अन्ते पातु जगत्-सुखदायि हरस्य || १२७ ||
भाण्ड-उन्मुखेन कर्तव्यं पाद-विक्षेपणं ततः |
सूचीं कृत्वा पुनः कुर्यात् विक्षेप-परिवर्तनम् || १२८ ||

अन्वयः - प्रलय-अन्ते इदं पादतल-आहति-पातित-शैलं क्षोभित-भूत-समग्र-समुद्रं जगत्-सुखदायि हरस्य ताण्डवनृत्तं पातु | ततः भाण्ड-उन्मुखेन पादविक्षेपणं कर्तव्यम् | पुनः सूचीं कृत्वा विक्षेपपरिवर्तनं कुर्यात् |

अर्थ - प्रलयाच्या वेळी ज्याच्या पायाच्या आघातांनी डोंगर कोसळले . समुद्र आणि सर्व जग खवळले, असा जगाला सुख देणाऱ्या भगवान शिवाचे हे तांडवनृत्त सर्वांचे रक्षण करो . यानंतर भांडवाद्यांकडे वळून पायाचा विक्षेप केला पाहिजे . मग सूची चारीचा प्रयोग करून विक्षेपासह परिवर्तन केले पाहिजे .

अतिक्रान्तैः सलिलतैः पादैर्द्रुतलयान्वितैः |
त्रितालान्तरमुत्क्षेपैर्गच्छेत्पञ्चपदीं ततः ||१२९ ||

पदच्छेदः - अतिक्रान्तैः सलिलतैः पादैः द्रुत-लय-अन्वितैः |
त्रिताल-अन्तरम् उत्क्षेपैः गच्छेत् पञ्चपदीं ततः || १२९ ||

अन्वयः - ततः द्रुतलय-अन्वितैः अतिक्रान्तैः सलिलतैः पादैः त्रितालान्तरम् उत्क्षेपैः पञ्चपदीं गच्छेत् |

अर्थ - यानंतर अतिक्रांत चारीने युक्त अंगांच्या सुंदर हालचालींसह द्रुतलयीत तीन तालांच्या अंतरावर उचलल्या गेलेल्या पायांनी पाच पावले चालावे .

तत्रापि वामवेधस्तु विक्षेपो दक्षिणस्य च |
तैरेव च पदैः कार्यं प्राङ्मुखेनापसर्पणम् || १३० ||

पदच्छेदः - तत्र अपि वामवेधः तु विक्षेपः दक्षिणस्य च |
तैः एव च पदैः कार्यं प्राङ्मुखेन अपसर्पणम् || १३० ||

अन्वयः - तत्र अपि वामवेधः दक्षिणस्य विक्षेपः च (कार्यम्) | तैः एव पदैः प्राङ्मुखेन अपसर्पणं कार्यम् |

अर्थ - त्यातही डाव्या पायाने वेध अर्थात सूची चारीचा प्रयोग करावा. उजव्या पायाने विक्षेप करावा आणि मग त्याच पायांनी पूर्व दिशेला तोंड करून अपसर्पण करावे.

पुनः पदानि त्रीण्येव गच्छेत्प्राङ्मुख एव तु |
ततश्च वामवेधः स्याद्विक्षेपो दक्षिणस्य च || १३१ ||

पदच्छेदः - पुनः पदानि त्रीणि एव गच्छेत् प्राङ्मुखे एव तु |
ततः च वामवेधः स्यात् विक्षेपः दक्षिणस्य च || १३१ ||

अन्वयः - पुनः प्राङ्मुखे एव त्रीणि पदानि गच्छेत् | ततः च वामवेधः, दक्षिणस्य विक्षेपः च स्यात् |

अर्थ - मग पूर्वदिशेला अभिमुख होऊन तीन पाय पुढे चालावे. त्यावेळी डाव्या पायाने वेध आणि उजव्या पायाने विक्षेप करावा.

ततो रौद्ररसं श्लोकं पादसंहरणं पठेत् |
तस्यान्ते तु त्रिपद्याथ व्याहरेत्पारिपार्श्विकौ || १३२ ||

पदच्छेदः - ततः रौद्ररसं श्लोकं पाद-संहरणं पठेत् |
तस्य अन्ते तु त्रिपद्या अथ व्याहरेत् पारिपार्श्विकौ || १३२ ||

अन्वयः - ततः पादसंहरणं रौद्ररसं श्लोकं पठेत् | तस्य अन्ते त्रिपद्या पारिपार्श्विकौ व्याहरेत् |

अर्थ - त्यानंतर पायांचे संहरण करून (एकत्र आणून) रौद्ररसाने युक्त असलेल्या श्लोकाचे पठण करावे. शेवटी तीन पाय चालून दोन्ही पारिपार्श्वकांना बोलवावे.

❖ त्रिगत ❖

तयोरागमने कार्यं गानं नर्कुटकं बुधैः।
तथा च भारतीभेदे त्रिगतं सम्प्रयोजयेत् ॥ १३३ ॥

पदच्छेद :- तयोः आगमने कार्यं गानं नर्कुटकं बुधैः।
तथा च भारतीभेदे त्रिगतं सम्प्रयोजयेत् ॥ १३३ ॥

अन्वय : - तयोः आगमने बुधैः 'नर्कुटकं गानं' कार्यम्। तथा च भारतीभेदे त्रिगतं सम्प्रयोजयेत्।

अर्थ - त्या दोघांच्या आगमनानंतर नाट्यविद्वानांनी नर्कुटक ध्रुवेचे गायन करावे आणि भारती वृत्तीच्या त्रिगत भेदाचा प्रयोग करावा (म्हणजेच तीन पात्रांच्या संवादांचे आयोजन करावे.)

विदूषकस्त्वेकपदां सूत्रधारस्मितावहाम्।
असम्बद्धकथाप्रायां कुर्यात्कथनिकां ततः ॥१३४॥

पदच्छेद :- विदूषकः तु एकपदां सूत्रधार-स्मितावहाम्।
असम्बद्धकथाप्रायां कुर्यात् कथनिकां ततः ॥१३४॥

अन्वय : - ततः विदूषकः एकपदां, सूत्रधार-स्मितावहाम् असम्बद्धकथाप्रायां कथनिकां कुर्यात्।

अर्थ - त्यानंतर एक पद असलेली, सूत्रधाराला हसवणारी, असंबद्ध कथा असलेली एक गोष्ट विदूषकाने सांगावी किंवा वार्तालाप करावा.

(वितण्डां गण्डसंयुक्तां तालिकाञ्च प्रयोजयेत्।
कस्तिष्ठति जितं केनेत्यादिकाव्यप्ररूपिणीम् ॥

पदच्छेद :- (वितण्डां गण्डसंयुक्तां तालिकां च प्रयोजयेत्।
कः तिष्ठति जितं केन इत्यादि-काव्य-प्ररूपिणीम् ॥

अन्वय : - "कः तिष्ठति?" "केन जितं?" आदि-काव्यप्ररूपिणीं गण्डसंयुक्तां वितण्डां तालिकां च प्रयोजयेत्।

अर्थ - यांत 'कोण थांबते?' 'कोण जिंकले?' इ. प्रश्नरूपी काव्याचे निरूपण करणाऱ्या,

गंडयुक्त (निरर्थक) शब्द असणाऱ्या, वितंडा (असत्प्रलाप)असणाऱ्या, तसेच नालिका म्हणजेच हास्यपरिहास युक्त असणाऱ्या प्रहेलिकेचा प्रयोग करावा .

पारिपार्श्विकसञ्जल्पो विदूषकविरूपित: |
स्थापित: सूत्रधारेण त्रिगतं सम्प्रयुज्यते || )

पदच्छेद: - पारिपार्श्विक-सञ्जल्पो विदूषक-विरूपित: |
स्थापित: सूत्रधारेण त्रिगतं सम्प्रयुज्यते || )

अन्वय: - पारिपार्श्विकसञ्जल्पो, विदूषक-विरूपित: सूत्रधारेण स्थापित: त्रिगतं सम्प्रयुज्यते |

अर्थ - त्यानंतर पारिपार्श्वकांचा (संवाद)वार्तालाप, विदूषकाद्वारे त्या वार्तालापास हास्यमय बनवणे, त्यानंतर सूत्रधाराद्वारे त्याला प्रस्थापित करणे, अशाप्रकारच्या त्रिगताचा प्रयोग करावा .

❖ प्ररोचना ❖

प्ररोचना च कर्तव्या सिद्धेनोपनिमन्त्रणम् |
रसिद्धौ पुन: कार्यं काव्यवस्तुनिरूपणम् || १३५ ||

पदच्छेद: - प्ररोचना च कर्तव्या सिद्धेन उपनिमन्त्रणम् |
रङ्गसिद्धौ पुन: कार्यं काव्य-वस्तु-निरूपणम् || १३५ ||

अन्वय: - सिद्धेन उपनिमन्त्रणं प्ररोचना च कर्तव्या | रङ्गसिद्धौ पुन: काव्यवस्तुनिरूपणं कार्यम् |

अर्थ - यानंतर सूत्रधाराद्वारे प्रेक्षकांना आमंत्रण देत प्ररोचनेचा प्रयोग करावा . नंतर प्रयोगाच्या सफलतेसाठी नाट्यातील कथावस्तूचे विवेचन करावे .

सर्वमेव विधिं कृत्वा सूचीवेधकृतैरथ |
पादैरनाविद्धगतैर्निष्क्रामेयु: समं त्रय: || १३६ ||

पदच्छेद: - सर्वम् एव विधिं कृत्वा सूचीवेधकृतै: अथ |
पादै: अनाविद्धगतै: निष्क्रामेयु: समं त्रय: || १३६ ||

अन्वय: - सर्वम् एव विधिं कृत्वा सूचीवेधकृतै: अनाविद्धगतै: पादै: त्रय: समं निष्क्रामेयु:|

अर्थ - या सर्व विधि करून सूची चारीचा प्रयोग करताना आविद्धचारीच्या व्यतिरिक्त कुठल्याही चारीने युक्त पायांनी तीनही पात्रांनी एकत्र निघून जावे.

एवमेष प्रयोक्तव्य: पूर्वरङ्गं यथाविधि |
चतुरश्रो द्विजश्रेष्ठास्त्र्यश्रं चापि निबोधत || १३७ ||

पदच्छेद: - एवम् एष: प्रयोक्तव्य: पूर्वरङ्ग: यथाविधि |
चतुरश्र: द्विजश्रेष्ठा: त्र्यश्रं च अपि निबोधत || १३७ ||

अन्वय: - हे द्विजश्रेष्ठा:, एवम् एष: चतुरश्र: पूर्वरङ्ग: यथाविधि प्रयोक्तव्य: त्र्यश्रं च अपि निबोधत|

अर्थ - हे श्रेष्ठ ब्राह्मणांनो ! अशाप्रकारे चतुरश्र पूर्वरंगाचा विधिपूर्वक प्रयोग करावा. आता त्र्यश्र पूर्वरंगाचा विधी ऐका.

❖ शुद्ध त्र्यश्र पूर्वरंग ❖

अयमेव प्रयोग: स्यादङ्गान्येतानि चैव हि |
तालप्रमाणं सङ्क्षिप्तं केवलं तु विशेषकृत् || १३८ ||

पदच्छेद: - अयम् एव प्रयोग: स्यात् अङ्गानि एतानि च एव हि |
तालप्रमाणं सङ्क्षिप्तं केवलं तु विशेषकृत् || १३८ ||

अन्वय: - अयम् एव प्रयोग: स्यात् एतानि एव हि अङ्गानि च | तालप्रमाणं सङ्क्षिप्तं केवलं तु विशेषकृत्|

अर्थ - हाच प्रयोग त्र्यश्र पूर्वरंगात करावा. त्यात तेवढेच अंग असतात. चतुरश्रापेक्षा त्र्यश्राचे वेगळेपण म्हणजे त्यात तालप्रमाण संक्षिप्त असते.

शम्या तु द्विकला कार्या तालो ह्येककलस्तथा |
पुनश्चैककला शम्या सन्निपात: कलाद्वयम् || १३९ ||

पदच्छेद : - शम्या तु द्विकला कार्या ताल : हि एककल : तथा |
पुन : च एककला शम्या सन्निपात : कलाद्वयम् || १३९ ||

अन्वय : - शम्या द्विकला कार्या तथा ताल: हि एककल: (कार्य:) | पुन: च शम्या एककला सन्निपात : कलाद्वयं (भवेत्) |

अर्थ - यात शम्या दोन कालांची ताल एका कलेचा मग शम्या एका कलेची आणि सन्निपात दोन कलांचा असावा .

❖ उत्थापन आणि उत्थापनी ध्रुवा ❖

अनेन हि प्रमाणेन कलाताललयान्वित :|
कर्तव्य: पूर्वरस्तु त्र्यश्रोऽप्युत्थापनादिक: || १४० ||

पदच्छेद : - अनेन हि प्रमाणेन कला-ताल-लय-अन्वित :|
कर्तव्य : पूर्वरङ्ग : तु त्र्यश्र : अपि उत्थापनादिक : || १४० ||

अन्वय : - अनेन हि प्रमाणेन कला-ताल-लय-अन्वित : उत्थापनादिक : त्र्यश्र : पूर्वरङ्ग : कर्तव्य : |

अर्थ - असा प्रकारच्या प्रमाणांनी कला, ताल आणि लय यांनी अन्वित त्र्यश्र पूर्वरंगाचे विधान केले पाहिजे ज्यात उत्थापनादी अंग तसेच राहतात .

आद्यं चतुर्थं दशममष्टमं नैधनं गुरु |
यस्यास्तु जागते पादे सा त्र्यश्रोत्थापिनी ध्रुवा || १४१ ||

पदच्छेद : - आद्यं चतुर्थं दशमम् अष्टमं नैधनं गुरु |
यस्या : तु जागते पादे सा त्र्यश्र-उत्थापिनी ध्रुवा || १४१ ||

अन्वय : - यस्या : जागते पादे आद्यं चतुर्थं दशमम् अष्टमं नैधनं गुरु, सा त्र्यश्रोत्थापिनी ध्रुवा |

अर्थ - ज्याच्या जगती छंदाच्या चरणात प्रथम, चौथे, दहावे, आठवे आणि शेवटचे (बारावे)अक्षर गुरू असते, त्यास त्र्यश्र पूर्वरंगामध्ये 'उत्थापनी ध्रुवा' असे म्हणतात् .

वाद्यं गतिप्रचारश्च ध्रुवा तालस्तथैव च |
संक्षिप्तान्येव कार्याणि त्र्यश्रे नृत्तप्रवेदिभि: || १४२ ||

पदच्छेद : - वाद्यं गतिप्रचार : च ध्रुवा ताल : तथा एव च |
संक्षिप्तानि एव कार्याणि त्र्यश्रे नृत्तप्रवेदिभि : || १४२ ||

अन्वय : - नृत्तप्रवेदिभि: त्र्यश्रे वाद्यं गतिप्रचार: ध्रुवा तथैव ताल: (एतानि) संक्षिप्तानि एव कार्याणि |

अर्थ - नृत्तविद्वानांनी त्र्यश्र पूर्वरंगात वाद्यांचा प्रयोग, गतिप्रचार म्हणजेच नृत्ताच्या आंगिक क्रिया, ध्रुवा तसेच ताल इत्यादींचा प्रयोग थोडक्यात करावा .

वाद्यगीतप्रमाणेन कुर्यादङ्गविचेष्टितम् |
विस्तीर्णमथ सङ्क्षिप्तं द्विप्रमाणविनिर्मितम् || १४३ ||

पदच्छेद : - वाद्य-गीत-प्रमाणेन कुर्यात् अङ्ग-विचेष्टितम्|
विस्तीर्णम् अथ सङ्क्षिप्तं द्विप्रमाण-विनिर्मितम् || १४३ ||

अन्वय : - वाद्यगीतप्रमाणेन विस्तीर्णम् अथ सङ्क्षिप्तं द्विप्रमाणविनिर्मितम् अङ्गविचेष्टितं कुर्यात् |

अर्थ - वाद्य आणि गीताच्या प्रमाणानुसार आंगिक अभिनय करावा जो विस्तीर्ण आणि संक्षिप्त अशा दोन्ही प्रमाणांनी तयार केला आहे .

हस्तपादप्रचारस्तु द्विकल: परिकीर्तित:|
चतुरश्रे परिक्रान्तेपाता: स्यु: षोडशैव तु || १४४ ||

पदच्छेद : - हस्तपादप्रचार : तु द्विकल : परिकीर्तित : |
चतुरश्रे परिक्रान्ते पाता : स्यु : षोडश एव तु || १४४ ||

अन्वय : - हस्तपादप्रचार : द्विकल : परिकीर्तित : | चतुरश्रे परिक्रान्ते षोडश एव पाता : स्यु : |

अर्थ - चतुरश्र पूर्वरंगात हात आणि पायांचे संचलन दोन कलांचे असते आणि त्याच्या परिवर्तात सोळा सोळा पात असतात .

त्र्यश्रे द्वादश पातास्तु भवन्ति करपादयो: |
एतत्प्रमाणं विज्ञेयमुभयो: पूर्वरङ्गयो: || १४५ ||

पदच्छेद : - त्र्यश्रे द्वादश पाता : तु भवन्ति करपादयो :|
एतत् प्रमाणं विज्ञेयम् उभयो : पूर्वरङ्गयो : ॥ १४५ ॥

अन्वय : - त्र्यश्रे करपादयो : द्वादश पाता : भवन्ति| उभयो : पूर्वरङ्गयो : एतत् प्रमाणं विज्ञेयम्|

अर्थ - त्र्यश्र पूर्वरंगात हातापायांचे बारा पात असतात . अशा प्रकारचे प्रमाण दोन्ही पूर्वरंगात समजला पाहिजे .

केवलं परिवर्ते तु गमने त्रिपदी भवेत् |
दिग्वन्दने पञ्चपदी चतुरश्रे विधीयते ॥ १४६ ॥

पदच्छेद : - केवलं परिवर्ते तु गमने त्रिपदी भवेत्|
दिग्वन्दने पञ्चपदी चतुरश्रे विधीयते ॥ १४६ ॥

अन्वय : - परिवर्ते गमने केवलं त्रिपदी भवेत्| दिग्वन्दने पञ्चपदी चतुरश्रे विधीयते|

अर्थ - (त्र्यश्र पूर्वरंगात) परिवर्ताच्या गमनात केवळ त्रिपदीचा प्रयोग होतो आणि चतुरश्र पूर्व रंगात दिशांना वंदन करताना पंचपदीचा प्रयोग केला जातो .

आचार्यबुद्ध्या कर्तव्यस्त्र्यश्रस्तालप्रमाणत: |
तस्मान्न लक्षणं प्रोक्तं पुनरुक्तं भवेद्यत: ॥ १४७ ॥

पदच्छेद : - आचार्यबुद्ध्या कर्तव्य : त्र्यश्र : तालप्रमाणत :|
तस्मात् न लक्षणं प्रोक्तं पुनरुक्तं भवेत् यत : ॥ १४७ ॥

अन्वय : - आचार्यबुद्ध्या त्र्यश्र: तालप्रमाणत: कर्तव्य: | तस्मात् लक्षणं न प्रोक्तं यत: पुनरुक्तं भवेत्|

अर्थ - नाट्याचार्यांनी बुद्धीने तालाप्रमाणानुसार त्र्यश्र पूर्वरंगाचा प्रयोग करावा . याचे लक्षण सांगितलेले नाही कारण असे केल्यास पुनरावृत्ती झाली असती .

एवमेष प्रयोक्तव्य: पूर्वरङ्गे द्विजोत्तमा: |
त्र्यश्रश्च चतुरश्रश्च शुद्धो भारत्युपाश्रय: ॥ १४८ ॥

पदच्छेद: - एवम् एष: प्रयोक्तव्य: पूर्वरङ्ग: द्विजोत्तमा:|
त्र्यश्र: च चतुरश्र: च शुद्ध: भारती-उपाश्रय:|| १४८ ||

अन्वय: - द्विजोत्तमा:, एवम् एष: पूर्वरङ्ग: प्रयोक्तव्य: | त्र्यश्र: च चतुरश्र: च शुद्ध: भारती-उपाश्रय: |

अर्थ - हे श्रेष्ठ ब्राह्मणांनो, अशाप्रकारे भारती वृत्तीवर आधारित त्र्यश्र आणि चतुरश्राच्या शुद्ध पूर्वरंगाचा प्रयोग करावा .

## ❖ चित्रपूर्वरंग ❖

एवं तावदयं शुद्ध: पूर्वरङ्गो मयोदित: |
चित्रत्वमस्य वक्ष्यामि यथाकार्यं प्रयोक्तृभि: || १४९ ||

पदच्छेद: - एवं तावत् अयं शुद्ध: पूर्वरङ्ग: मया उदित:|
चित्रत्वम् अस्य वक्ष्यामि यथाकार्यं प्रयोक्तृभि:|| १४९ ||

अन्वय: - एवं तावत् अयं शुद्ध: पूर्वरङ्ग: मया उदित: | प्रयोक्तृभि: यथाकार्यं अस्य चित्रत्वम् वक्ष्यामि |

अर्थ - अशाप्रकारे मी आत्तापर्यंत शुद्ध पूर्वरंगाचे विधान सांगितले . आता प्रयोग करणाऱ्यांनी चित्रपूर्वरंगाचा कसा प्रयोग करावा ते सांगणार आहे .

वृत्ते ह्युत्थापने विप्रा: कृते च परिवर्तने |
चतुर्थकारदत्ताभि: सुमनोभिरलङ्कृते || १५० ||
उदात्तगानैर्गन्धर्वै: परिगीते प्रमाणत: |
देवदुन्दुभयश्चैव निनदेयुर्भृशं तत: || १५१ ||

पदच्छेद: - वृत्ते हि उत्थापने विप्रा: कृते च परिवर्तने|
चतुर्थकार-दत्ताभि: सुमनोभि: अलङ्कृते|| १५० ||
उदात्तगानै: गन्धर्वै: परिगीते प्रमाणत:|
देव-दुन्दुभय: च एव निनदेयु: भृशं तत:|| १५१ ||

अन्वय: - विप्रा: उत्थापने वृत्ते परिवर्तने कृते च चतुर्थकारदत्ताभि: सुमनोभि: अलङ्कृते उदात्तगानै: गन्धर्वै: परिगीते प्रमाणत: तत: च देवदुन्दुभय: भृशं निनदेयु:|

अर्थ - हे विप्रांनो, उत्थापन संपन्न झाल्यावर आणि परिवर्तन केल्यावर चतुर्थकाराद्वारे दिल्या गेलेल्या फुलांनी अलंकृत झाल्यावर आणि गंधर्वांकडून प्रमाणानुसार उदात्त गीत गाऊन झाल्यावर देवदुन्दुभींना पुन्हा पुन्हा वाजविले पाहिजे .

सिद्धा: कुसुममालाभिर्विकिरेयु: समन्तत: |
अङ्गहारैश्च देव्यस्ता उपनृत्येयुरग्रत: ॥ १५२ ॥

पदच्छेद: - सिद्धा: कुसुम-मालाभि: विकिरेयु: समन्तत:|
अङ्गहारै: च देव्य: ता: उपनृत्येयु: अग्रत: ॥ १५२ ॥

अन्वय: - सिद्धा: कुसुममालाभि: समन्तत: विकिरेयु:| अङ्गहारै: ता: देव्य: अग्रत: उपनृत्येयु:|

अर्थ - सिद्धगणांनी चारही बाजूस पुष्पमाला पसरवाव्यात आणि दिव्यांगनांनी समोर अंगहारयुक्त नृत्य करावे .

यस्ताण्डवविधि: प्रोक्तो नृत्ते पिण्डीसमन्वित: |
रेचकैरङ्गहारैश्च न्यासोपन्याससंयुत: ॥ १५३ ॥
नान्दीपदानां मध्ये तु एकैकस्मिन्पृथक्पृथक् |
प्रयोक्तव्यो बुधै: सम्यक्चित्रभावमभीप्सुभि: ॥ १५४ ॥

पदच्छेद: - य: ताण्डवविधि: प्रोक्त: नृत्ते पिण्डीसमन्वित:|
रेचकै: अङ्गहारै: च न्यास-उपन्यास-संयुत: ॥ १५३ ॥
नान्दीपदानां मध्ये तु एकैकस्मिन् पृथक् पृथक्|
प्रयोक्तव्य: बुधै: सम्यक् चित्रभावम् अभीप्सुभि: ॥ १५४ ॥

अन्वय: - नृत्ते पिण्डीसमन्वित: रेचकै: अङ्गहारै: च न्यास-उपन्यास-संयुत: य: ताण्डवविधि: प्रोक्त: स: नान्दीपदानां मध्ये एकैकस्मिन् पृथक् पृथक् चित्रभावम् अभीप्सुभि: बुधै: सम्यक् चित्रभावं प्रयोक्तव्य:।

अर्थ - नृत्ताच्या प्रकरणात पिंडीबंधांनी युक्त, रेचक आणि अंगहारांद्वारे, न्यास आणि उपन्यासाच्या प्रयोगासह जो तांडव नृत्ताचा विधी सांगितला गेला आहे, चित्रपूर्वरंगाची इच्छा असणाऱ्या बुद्धिमान लोकांनी नांदीपदाच्या प्रयोगामध्ये प्रत्येकी एक अथवा वेगवेगळा असा पद्धतीने तांडव विधीचा प्रयोग करावा .

एवं कृत्वा यथान्यायं शुद्धं चित्रं प्रयत्नत:।
तत: परं प्रयुञ्जीत नाटकं लक्षणान्वितम् ॥ १५५ ॥

पदच्छेद: - एवं कृत्वा यथान्यायं शुद्धं चित्रं प्रयत्नत:।
तत: परं प्रयुञ्जीत नाटकं लक्षण-अन्वितम् ॥ १५५ ॥

अन्वय: - एवं यथान्यायं शुद्धं चित्रं प्रयत्नत: कृत्वा तत: परं लक्षण-अन्वितं नाटकं प्रयुञ्जीत।

अर्थ - अशाप्रकारे नाट्यविधीनुसार प्रयत्नपूर्वक शुद्ध आणि चित्र पूर्वरंगाचे विवेचन करून त्यानंतर लक्षणांनी युक्त नाटकाचा प्रयोग केला पाहिजे .

ततस्त्वन्तर्हिता: सर्वा भवेयुर्दिव्ययोषित:।
निष्क्रान्तासु च सर्वासु नर्तकीषु तत: परम् ॥ १५६ ॥
पूर्वरङ्गे प्रयोक्तव्यमजातमत: परम् ।
एवं शुद्धो भवेच्चित्र: पूर्वरो विधानत: ॥ १५७ ॥

पदच्छेद: - तत: तु अन्तर्हिता: सर्वा: भवेयु: दिव्ययोषित:।
निष्क्रान्तासु च सर्वासु नर्तकीषु तत: परम् ॥ १५६ ॥

पूर्वरङ्गे प्रयोक्तव्यम् अङ्गजातम् अत: परम्|
एवं शुद्ध: भवेत्चित्र: पूर्वरङ्ग: विधानत: || १५७ ||

अन्वय: - तत: तु सर्वा: दिव्ययोषित: अन्तर्हिता: भवेयु: | निष्क्रान्तासु सर्वासु नर्तकीषु पूर्वरङ्गे अत: परम् अङ्गजातं प्रयोक्तव्यम्| एवं शुद्ध: पूर्वरङ्ग: विधानत: चित्र: भवेत्|

अर्थ - यानंतर सर्व दिव्यगणांनी अन्तर्हित व्हावे म्हणजे रंगमंचावरून निघून जावे . यानंतर सर्व नर्तकी गेल्यावर पूर्वरंगात इतर अंगाचा प्रयोग करावा . अशाप्रकारे विधिनुसार शुद्ध पूर्व रंग हाच चित्रपूर्वरंग होतो .

कार्यो नातिप्रसोऽत्र नृत्तगीतविधिं प्रति |
गीते वाद्ये च नृत्ते च प्रवृत्तेऽतिप्रसत: || १५८ ||
खेदो भवेत्प्रयोक्तॄणां प्रेक्षकाणां तथैव च |
खिन्नानां रसभावेषु स्पष्टता नोपजायते || १५९ ||
तत: शेषप्रयोगस्तु न रागजनको भवेत्

पदच्छेद: - कार्य: न अतिप्रसङ्ग: अत्र नृत्तगीतविधिं प्रति |
गीते वाद्ये च नृत्ते च प्रवृत्ते अतिप्रसङ्गत: || १५८ ||
खेद: भवेत् प्रयोक्तॄणां प्रेक्षकाणां तथैव च |
खिन्नानां रसभावेषु स्पष्टता न उपजायते || १५९ ||
तत: शेषप्रयोग: तु न रागजनक: भवेत्

अन्वय: - अत्र नृत्तगीतविधिं प्रति न अतिप्रसङ्ग: कार्य: | गीते वाद्ये च नृत्ते च प्रवृत्ते अतिप्रसङ्गत: प्रयोक्तॄणां प्रेक्षकाणां तथैव खेद: भवेत्| खिन्नानां रसभावेषु स्पष्टता न उपजायते तत: शेषप्रयोग: तु न रागजनक: भवेत्|

अर्थ - इथे पूर्वरंगात नृत्त आणि गीताच्या प्रयोगात आसक्ती करू नये, कारण नृत्त, गीत आणि वाद्याच्या प्रयोगात अतिशय प्रवृत्ती म्हणजे असंतुलित प्रयोग झाल्यावर प्रयोगतज्ज्ञांना

खूप दु:ख होते व तसेच प्रेक्षक देखील खिन्न होतात आणि खिन्न व्यक्तींचे रस आणि भाव स्पष्ट दिसत नाहीत म्हणजेच रस आणि भाव यांचा साक्षात्कार होत नाही त्यानंतर उरलेला प्रयोग समाधानकारक होत नाही .

(लक्षणेन विना बाह्यलक्षणाद्विस्तृतं भवेत् |
लोकशास्त्रानुसारेण तस्मान्नाट्यं प्रवर्तते ||)

पदच्छेद: - (लक्षणेन विना बाह्यलक्षणात् विस्तृतं भवेत् |
लोकशास्त्र-अनुसारेण तस्मात् नाट्यं प्रवर्तते ||)

अन्वय: - (लक्षणेन विना बाह्यलक्षणात् विस्तृतं भवेत् | तस्मात् लोकशास्त्रानुसारेण नाट्यं प्रवर्तते |)

अर्थ - लक्षण नसल्याने किंवा बाह्यलक्षणांमुळे नाटक विस्तृत होते, म्हणून लोक आणि शास्त्रानुसार नाट्याचे प्रवर्तन करावे .

त्र्यश्रं वा चतुरश्रं वा शुद्धं चित्रमथापि वा || १६० ||
प्रयुज्य रङ्गान्निष्क्रामेत्सूत्रधार: सहानुग: |

पदच्छेद: - त्र्यश्रं वा चतुरश्रं वा शुद्धं चित्रम् अथ अपि वा || १६० ||
प्रयुज्य रङ्गान् निष्क्रामेत् सूत्रधार: सहानुग: |

अन्वय: - त्र्यश्रं वा चतुरश्रं वा शुद्धं चित्रं वा रङ्गान् प्रयुज्य सहानुग: सूत्रधार: निष्क्रामेत् |

अर्थ - त्र्यश्र असो वा चतुरश्र तसेच शुद्ध असो किंवा चित्र असो, पूर्वरंगाचे विधान करून सूत्रधाराने आपल्या अनुयायांसह रंगमंचावरून निघून जावे .

(देवपार्थिवरानामाशीर्वचनसंयुताम् ||
कवेर्नामगुणोपेतां वस्तूपक्षेपरूपिकाम् |
लघुवर्णपदोपेतां वृत्तैश्चित्रैरलङ्कृताम् ||
अन्तर्यवनिकासंस्थ: कुर्यादाश्रावणां तत: |

पदच्छेद :- (देव-पार्थिव-रङ्गानाम् आशीर्वचन-संयुताम्॥
कवे : नामगुण-उपेतां वस्तु-उपक्षेप-रूपिकाम्।
लघु-वर्ण-पद-उपेतां वृत्तै : चित्रै : अलङ्कृताम्॥
अन्तर्-यवनिका-संस्थ : कुर्यात् आश्रावणां तत :।

अन्वय : - (देव-पार्थिव-रङ्गानाम् आशीर्वचन-संयुतां कवे: नामगुणोपेतां वस्तु-उपक्षेप-रूपिकां लघुवर्णपदोपेतां वृत्तै: चित्रै: अलङ्कृताम् अन्तर्यवनिकासंस्थ: (सूत्रधार:) आश्रावणां कुर्यात्।

अर्थ - यानंतर सूत्रधाराने देवता,राजा तसेच रंग यांच्या आशीर्वचनांनी युक्त, कवीचे नाव तसेच गुणांनी युक्त, नाट्याच्या कथावस्तूची विस्ताररूपिणी, लघु वर्ण तसेच पदांनी युक्त, विविध सुंदर वृत्तांनी अलंकृत अशा आश्रवणाविधिचा यवनिकेच्या आत राहून प्रयोग करावा .

आश्रावणावसाने च नान्दीं कृत्वा स सूत्रधृत्॥
पुन: प्रविश्य रं तु कुर्यात्प्रस्तावनां तत:।)

पदच्छेद :- आश्रावणा-अवसाने च नान्दीं कृत्वा स : सूत्रधृत्॥
पुन : प्रविश्य रङ्गं तु कुर्यात् प्रस्तावनां तत :।)

अन्वय : - आश्रावणावसाने च नान्दीं कृत्वा स : सूत्रधृत् पुन : रङ्गं प्रविश्य प्रस्तावनां कुर्यात्।)

अर्थ - यानंतर आश्रवणा विधी संपल्यानंतर सूत्रधाराने नांदीचे पठण करून पुन्हा रंगमंचावर प्रवेश करून प्रस्तावना करावी .

प्रयुज्य विधिनैवं तु पूर्वरङ्गं प्रयोगत: ॥ १६१ ॥
स्थापक: प्रविशेत्तत्र सूत्रधारगुणाकृति:।

पदच्छेद :- प्रयुज्य विधिना एवं तु पूर्वरङ्गं प्रयोगत : ॥ १६१ ॥
स्थापक : प्रविशेत् तत्र सूत्रधार-गुण-आकृति :।

अन्वय : - एवं विधिना पूर्वरङ्गं प्रयोगत : प्रयुज्य तत्र सूत्रधारगुणाकृति : स्थापक : प्रविशेत् |

अर्थ - अशाप्रकारे विधिपूर्वक पूर्वरंगाचा प्रयोग करून सूत्रधारासारखे गुण आणि आकृती असलेल्या स्थापकाने रंगमंचावर प्रवेश करावा .

❖ स्थापक ❖

स्थानं तु वैष्णवं कृत्वा सौष्ठवाङ्गपुरस्कृतम् || १६२ ||
प्रविश्य रङ्गं तैरेव सूत्रधारपदैर्व्रजेत् |
स्थापकस्य प्रवेशे तु कर्तव्याऽर्थानुगा ध्रुवा || १६३ ||
त्र्यश्रा वा चतुरश्रा वा तज्ज्ञैर्मध्यलयान्विता |

पदच्छेद : - स्थानं तु वैष्णवं कृत्वा सौष्ठव-अङ्ग-पुरस्कृतम् || १६२ ||
प्रविश्य रङ्गं तै : एव सूत्रधारपदै : व्रजेत् |
स्थापकस्य प्रवेशे तु कर्तव्या अर्थ-अनुगा ध्रुवा || १६३ ||
त्र्यश्रा वा चतुरश्रा वा तज्ज्ञै : मध्य-लय-अन्विता |

अन्वय : - सौष्ठव-अङ्गपुरस्कृतं वैष्णवं स्थानं कृत्वा रङ्गं प्रविश्य तै: एव सूत्रधारपदै: (स्थापक:) व्रजेत् | स्थापकस्य प्रवेशे अर्थानुगा ध्रुवा कर्तव्या | तज्ज्ञै: मध्यलयान्विता त्र्यश्रा चतुरश्रा वा (कर्तव्या) |

अर्थ - सौष्ठव अंगाने युक्त वैष्णव स्थानात उभे राहून रंगमंचावर प्रवेश करून सूत्रधाराच्या गतीने चालावे .

स्थापकाच्या प्रवेशावेळी अर्थानुगामिनी (परिस्थितीला अनुकूल) ध्रुवेचे गायन करावे .

ती ध्रुवा त्र्यश्र किंवा चतुरश्र तालात मध्य लयीत असावी .

कुर्यादनन्तरं चारीं देवब्राह्मणशंसिनीम् || १६४ ||
सुवाक्यमधुरै : श्लोकैर्नानाभावरसान्वितै : |
प्रसाद्य रङ्गं विधिवत्कवेर्नाम च कीर्तयेत् || १६५ ||

पदच्छेद :- कुर्यात् अनन्तरं चारीं देव-ब्राह्मण-शंसिनीम् ॥ १६४ ॥
सुवाक्य-मधुरै : श्लोकै : नाना-भाव-रस-अन्वितै : ।
प्रसाद्य रङ्गं विधिवत् कवे : नाम च कीर्तयेत् ॥ १६५ ॥

अन्वय : - अनन्तरं देवब्राह्मणशंसिनीं चारीं कुर्यात् । सुवाक्यमधुरै : श्लोकै : नानाभावरसान्वितै : रङ्गं प्रसाद्य विधिवत् कवे : नाम च कीर्तयेत् ।

अर्थ - यानंतर देवता आणि ब्राह्मणांची प्रशंसा करणारी चारी करावी . मग वेगवेगळ्या रसांनी आणि भावांनी युक्त सुंदर वाक्य असलेल्या मधुर श्लोकांनी नाटकातील प्रेक्षकांना चांगल्याप्रकारे प्रसन्न करून विधिनुसार कवीच्या नावाची घोषणा करावी .

प्रस्तावनां तत: कुर्यात्काव्यप्रख्यापनाश्रयाम् ।
उद्घात्यकादि कर्तव्यं काव्योपक्षेपणाश्रयम् ॥ १६६ ॥

पदच्छेद :- प्रस्तावनां तत : कुर्यात् काव्य-प्रख्यापन-आश्रयाम् ।
उद्घात्यक-आदि कर्तव्यं काव्य-उपक्षेपण-आश्रयम् ॥१६६ ॥

अन्वय : - तत : काव्यप्रख्यापनाश्रयां प्रस्तावनां कुर्यात् । उद्घात्यकादि काव्योपक्षेपणाश्रयं कर्तव्यम् ।

अर्थ - त्यानंतर काव्य (नाट्य)वस्तूच्या पुढील प्रसंगांच्या आधारावर प्रस्तावनेला सुरूवात करावी आणि काव्यातील विविध पर्यायांचा आधार घेऊन उद्घातकाचा प्रयोग करावा .

दिव्ये दिव्याश्रयो भूत्वा मानुषे मानुषाश्रय : ।
दिव्यमानुषसंयोगे दिव्यो वा मानुषोऽपि वा ॥ १६७ ॥

पदच्छेद :- दिव्ये दिव्य-आश्रय : भूत्वा मानुषे मानुष-आश्रय : ।
दिव्य-मानुष-संयोगे दिव्य : वा मानुष : अपि वा ॥ १६७ ॥

अन्वय : - दिव्ये दिव्याश्रय: भूत्वा मानुषे मानुषाश्रय: दिव्यमानुषसंयोगे दिव्य: मानुष: वा (आश्रयेत्)।

अर्थ - दिव्य म्हणजेच देव चरितांशी संबंधित रूपकात देवतांचा आश्रय आणि मानव चरिताशी संबंधित रूपकात मानवांचा आश्रय तसेच दिव्य मानव संबंधित रूपकात देवता आणि मनुष्य दोघांचाही आश्रय ग्रहण करावा .

मुखबीजानुसदृशं नानामार्गसमाश्रयम् |
नानाविधैरुपक्षैपै: काव्योपक्षेपणं भवेत् ‖ १६८ ‖

पदच्छेद: - मुखबीज-अनुसदृशं नानामार्ग-समाश्रयम् |
नानाविधै: उपक्षैपै: काव्य-उपक्षेपणं भवेत् ‖ १६८ ‖

अन्वय: - मुखबीजानुसदृश: नानामार्गसमाश्रयं नानाविधै: उपक्षैपै: काव्योपक्षेपणं भवेत् |

अर्थ - मुख तसेच बीजाप्रमाणे, अनेक मार्गांचा आश्रय घेणारे अनेक संदर्भाद्वारे काव्याचे उपक्षेपण करावे म्हणजेच काव्यातील कथावस्तूंचा निर्देश करावा .

प्रस्ताव्यैवं तु निष्क्रामेत्काव्यप्रस्तावकस्तत: |
एवमेष प्रयोक्तव्य: पूर्वरङ्गो यथाविधि ‖ १६९ ‖

पदच्छेद: - प्रस्ताव्य एवं तु निष्क्रामेत् काव्य-प्रस्तावक: तत: |
एवम् एष: प्रयोक्तव्य: पूर्वरङ्ग: यथाविधि ‖ १६९ ‖

अन्वय: - एवं प्रस्ताव्य काव्यप्रस्तावक: तत: निष्क्रामेत् | एवम् एष: पूर्वरङ्ग: यथाविधि प्रयोक्तव्य: |

अर्थ - अशाप्रकारे प्रस्तावना करून काव्याच्या प्रस्तावकाने (स्थापकाने)रंगमंचावरून निघून जावे . अशाप्रकारे विधिपूर्वक पूर्वरंगाचा प्रयोग केला पाहिजे .

### ❖ पूर्वरंगविधीची फलश्रुती ❖

य इमं पूर्वरङ्गं तु विधिनैव प्रयोजयेत् |
नाशुभं प्राप्नुयात्किञ्चित्स्वर्गलोकं च गच्छति ‖ १७० ‖

पदच्छेद : - य : इमं पूर्वरङ्गं तु विधिना एव प्रयोजयेत् ।
न अशुभं प्राप्नुयात् किञ्चित् स्वर्गलोकं च गच्छति ॥ १७० ॥

अन्वय : - य : इमं पूर्वरङ्गं विधिना एव प्रयोजयेत् स : किञ्चित् अशुभं न प्राप्नुयात् स्वर्गलोकं च गच्छति ।

अर्थ - जो या पूर्वरंगाचा विधिपूर्वक प्रयोग करेल त्यास काहीही अशुभप्राप्ती होणार नाही आणि स्वर्गलोकाची प्राप्ती होईल .

यश्चापि विधिमुत्सृज्य यथेष्टं संप्रयोजयेत् ।
प्राप्नोत्यपचयं घोरं तिर्यग्योनिं च गच्छति ॥ १७१ ॥

पदच्छेद : - य : च अपि विधिम् उत्सृज्य यथेष्टं संप्रयोजयेत् ।
प्राप्नोति अपचयं घोरं तिर्यग्-योनिं च गच्छति ॥ १७१ ॥

अन्वय : - य : च विधिम् उत्सृज्य यथेष्टं संप्रयोजयेत् स : घोरम् अपचयं प्राप्नोति तिर्यग्योनिं च गच्छति ।

अर्थ - आणि जो शास्त्रविधींना सोडून पूर्वरंगाचा स्वत:च्या इच्छेनुसार प्रयोग करेल त्यास अतिशय हानी प्राप्त करावी लागेल आणि तो पशुपक्ष्यांची योनी प्राप्त करेल .

न तथाऽग्नि : प्रदहति प्रभञ्जनसमीरित : ।
यथा ह्यपप्रयोगस्तु प्रयुक्तो दहति क्षणात् ॥ १७२ ॥

पदच्छेद : - न तथा अग्नि : प्रदहति प्रभञ्जन-समीरित : ।
यथा हि अपप्रयोग : तु प्रयुक्त : दहति क्षणात् ॥ १७२ ॥

अन्वय : - न तथा प्रभञ्जनसमीरित : अग्नि : प्रदहति यथा हि अपप्रयोग : प्रयुक्त : क्षणात् दहति ।

अर्थ - वायुद्वारे प्रेरित झालेला अग्नी एवढे जाळत नाही जितका त्रुटीपूर्ण केला गेलेला नाट्यप्रयोग क्षणभरात जाळून टाकतो .

इत्येवावन्तिपाञ्चालदाक्षिणात्यौढ्रमागधै: |
कर्तव्य: पूर्वरङ्गस्तु द्विप्रमाणविनिर्मित: ‖ १७३ ‖

पदच्छेद:- इति एव अवन्ति-पाञ्चाल-दाक्षिणात्य-औढ्र-मागधै:|
कर्तव्य: पूर्वरङ्ग: तु द्वि-प्रमाण-विनिर्मित: ‖ १७३ ‖

अन्वय: - इति एव अवन्ति-पाञ्चाल-दाक्षिणात्य-औढ्र-मागधै: द्विप्रमाणविनिर्मित: पूर्वरङ्ग: कर्तव्य:|

अर्थ - अशाप्रकारे अवन्ती, पांचाल, दाक्षिणात्य, औढ तसेच मगधाच्या लोकांकडून दोन प्रमाणाने विस्तारलेल्या (त्र्यश्र आणि चतुरश्र दोन प्रमाणांद्वारे निर्मित)पूर्वरंगाचा प्रयोग करावा .

एष व: कथितो विप्रा: पूर्वरङ्गाश्रितो विधि: |
भूय: किं कथ्यतां सम्यङ्नाट्यवेदविधिं प्रति ‖ १७४ ‖

पदच्छेद:- एष: व: कथित: विप्रा: पूर्वरङ्ग-आश्रित: विधि:|
भूय: किं कथ्यतां सम्यक् नाट्यवेद-विधिं प्रति ‖ १७४ ‖

अन्वय: - विप्रा:, एष: पूर्वरङ्गाश्रित: विधि: व: कथित:| नाट्यवेदविधिं प्रति भूय: सम्यक् किं कथ्यताम्|

अर्थ - हे ब्राह्मणांनो! मी तुम्हांला पूर्वरंगसंबंधित सर्व विधी सांगितले . आता नाट्यवेदाच्या विधिसंबंधित आणखी काय सांगावे ?

‖ इति भारतीये नाट्यशास्त्रे 'पूर्वरङ्गविधानं' नाम पञ्चमोऽध्याय: (१) ‖
‖ अशा प्रकारे भारतीय नाट्यशास्त्रातील 'पूर्वरंगविधी' नावाचा पाचवा अध्याय (१) समाप्त ‖

## प्रक्षिप्त-भाग

### ❖ ध्रुवांचे नियम, भेद आणि उदाहरणे ❖

पुनश्चित्रे तथा मिश्रे शुद्धे चैव ब्रवीम्यहम् ।
यथा योज्या ध्रुवा: पञ्च तथा वक्ष्यामि तत्त्वत: ॥

पदच्छेद :- पुन: चित्रे तथा मिश्रे शुद्धे च एव ब्रवीमि अहम् ।
यथा योज्या: ध्रुवा: पञ्च तथा वक्ष्यामि तत्त्वत: ॥

अन्वय : - पुन: अहं चित्रे मिश्रे शुद्धे (पूर्वरङ्गे) च (नियमान्) ब्रवीमि । यथा (पूर्वरङ्गे) पञ्च ध्रुवा: योज्या: (तेषां) तथा तत्त्वत: (विवेचनं) वक्ष्यामि ।

अर्थ - आता चित्र मिश्र आणि शुद्ध पूर्वरंगातील पाच ध्रुवांचे नियम सांगतो आणि तसेच ज्या पाच ध्रुवांचा वापर करायचा आहे त्याचे तात्त्विक दृष्ट्या वर्णन करीत आहे .

आदावुत्थापनी कार्या परिवर्तस्तथा भवेत् ।
अवकृष्टाड्डिता चैव विक्षिप्ता चैव पञ्चमी ॥

पदच्छेद :- आदौ उत्थापनी कार्या परिवर्त: तथा भवेत् ।
अवकृष्टा अड्डिता च एव विक्षिप्ता च एव पञ्चमी ॥

अन्वय : - आदौ उत्थापनी कार्या तथा परिवर्त: भवेत् । अवकृष्टा अड्डिता तथा च पञ्चमी विक्षिप्ता (ध्रुवा भवेत्) ।

अर्थ - सर्वप्रथम उत्थापनी ध्रुवेचा वापर करावा . त्यानंतर परिवर्तन करावे . मग अवकृष्ट ध्रुवा आणि अड्डिता ध्रुवा करून शेवटी पाचवी विक्षिप्ता ध्रुवा करावी .

एवं पञ्च ध्रुवा ज्ञेया उपोहनसमन्विता: ।
कर्तव्यास्तु प्रयत्नेन पूर्वरङ्गे प्रयोक्तृभि: ॥

पदच्छेद :- एवं पञ्च ध्रुवा: ज्ञेया: उपोहन-समन्विता: ।
कर्तव्या: तु प्रयत्नेन पूर्वरङ्गे प्रयोक्तृभि: ॥

अन्वय: - एवं पञ्च ध्रुवा: ज्ञेया: | पूर्वरङ्गे प्रयोक्तृभि: उपोहनसमन्विता: (एता:) प्रयत्नेन कर्तव्या:|

अर्थ - अशा प्रकारे पाच ध्रुवा आहेत. नाट्यप्रयोग करणाऱ्यांनी पूर्वरंगामध्ये उपोहनयुक्त अशा या पाच ध्रुवांचा प्रयत्नपूर्वक वापर करावा.

❖ उपोहनविधिक्रिया ❖

अत: परं प्रवक्ष्यामि ह्युपोहनविधिक्रियाम् |
उत्थापनस्याष्टकलं परिवर्तस्य षट्कलम् ||

पदच्छेद: - अत: परं प्रवक्ष्यामि हि उपोहन-विधिक्रियाम्|
उत्थापनस्य अष्टकलं परिवर्तस्य षट्कलम् ||

अन्वय: - अत: परं उपोहनविधिक्रियां प्रवक्ष्यामि | उत्थापनस्य अष्टकलं (भवेत्) परिवर्तस्य षट्कलं (भवेत्)|

अर्थ - यापुढे उपोहनक्रियेविषयी सांगणार आहे. उत्थापनी ध्रुवेत आठ कला असाव्यात. परिवर्तनी ध्रुवेत सहा कला असाव्यात.

अवकृष्टं पुन: कार्यं कलाभि: पञ्चभिर्युतम् |
ध्रुवायामड्डितायां च चतुष्कलमथापि च ||

पदच्छेद: - अवकृष्टं पुन: कार्यं कलाभि: पञ्चभि: युतम् |
ध्रुवायाम् अड्डितायां च चतुष्कलम् अथ अपि च ||

अन्वय: - पञ्चभि: कलाभि: युतम् अवकृष्टं पुन: कार्यम् | अड्डितायां ध्रुवायां च चतुष्कलं (भवेत्)|

अर्थ - अवकृष्टा पाच कलांनी युक्त असावी. अड्डिता ध्रुवेत चार कला असाव्यात.

क्षिप्तायां चैव विज्ञेयं कलात्रयसमन्वितम् |
एवं ह्युपोहनानां तु प्रमाणं समुदाहृतम् ||

पदच्छेद :- क्षिप्तायां च एव विज्ञेयं कलात्रयसमन्वितम् |
एवं हि उपोहनानां तु प्रमाणं समुदाहृतम् ||

अन्वय : - क्षिप्तायां च कलात्रयसमन्वितं विज्ञेयम् | एवं हि उपोहनानां प्रमाणं समुदाहृतम् ||

अर्थ - आणि विक्षिप्त ध्रुवा तीन कलांनी युक्त अशी जाणावी . अशा प्रकारे उपोहनांचे माप सांगितले आहे .

गुरुलाघवसंयुक्तं कलातालसमन्वितम् |
पूर्वरङ्गं सदा ज्ञेयं चित्रमार्गे ह्युपोहनम् ||

पदच्छेद :- गुरु-लाघव-संयुक्तं कला-ताल-समन्वितम् |
पूर्वरङ्गं सदा ज्ञेयं चित्रमार्गे हि उपोहनम् ||

अन्वय : - गुरुलाघवसंयुक्तं कलातालसमन्वितम् उपोहनं चित्रमार्गे पूर्वरङ्गं सदा ज्ञेयम् |

अर्थ - गुरु आणि लघु वर्ण असलेल्या, कला आणि तालाने युक्त असलेल्या चित्रमार्गातील पूर्वरंगामध्ये हे उपोहन जाणून घ्यावे .

## ❖ कलांचा प्रयोग ❖

चित्रे चैत्रा: कला ज्ञेया मिश्रे वार्तिकमाश्रिता: |
शुद्धे दक्षिणमार्गेण प्रयोक्तव्या: प्रयोक्तृभि: ||

पदच्छेद :- चित्रे चैत्रा : कला : ज्ञेया : मिश्रे वार्तिकम् आश्रिता : |
शुद्धे दक्षिणमार्गेण प्रयोक्तव्या : प्रयोक्तृभि : ||

अन्वय : - प्रयोक्तृभि : चित्रे चैत्रा : कला : ज्ञेया : मिश्रे च वार्तिकम् आश्रिता : (कला : ज्ञेया :) | शुद्धे दक्षिणमार्गेण (कला :) प्रयोक्तव्या : |

अर्थ - नाट्याचा प्रयोग करणाऱ्यांनी चित्रपूर्वरंगामध्ये चित्रमार्गानुसार कलांचा प्रयोग करावा . मिश्रपूर्वरंगात वार्तिक मार्गावर आधारित कलांचा प्रयोग करावा आणि शुद्ध पूर्वरंगामध्ये दक्षिणमार्गानुसार कलांचा प्रयोग करावा .

### ❖ गीतींचा प्रयोग ❖

चतस्रो गीतयः कार्या मागधी ह्यर्धमागधी |
संभाविता तथा चैव पृथुला च प्रकीर्तिता ||

पदच्छेदः - चतस्रः गीतयः कार्याः मागधी हि अर्धमागधी |
संभाविता तथा च एव पृथुला च प्रकीर्तिता ||

अन्वयः - (पूर्वरङ्गे) मागधी, अर्धमागधी, संभाविता तथैव (चतुर्थी गीतिः) पृथुला च (एताः)चतस्रः गीतयः कार्याः|

अर्थ - पूर्वरंगामध्ये मागधी, अर्धमागधी, संभाविता आणि पृथुला या चार गीतींचा वापर करावा.

मागधी त्वथ कर्तव्या त्वथवा त्वर्धमागधी |
पूर्वरङ्गे भवेच्चित्रे चित्रमार्गसमाश्रिता ||

पदच्छेदः - मागधी तु अथ कर्तव्या तु अथवा तु अर्धमागधी |
पूर्वरङ्गे भवेत् चित्रे चित्रमार्ग-समाश्रिता ||

अन्वयः - चित्रे पूर्वरङ्गे चित्रमार्गसमाश्रिता मागधी भवेत् अथवा अर्धमागधी कर्तव्या |

अर्थ - यातील चित्रपूर्वरंगात चित्रमार्गावर आधारित मागधी किंवा अर्धमागधी गीतीचा वापर करावा.

### ❖ मिश्रपूर्वरंग ❖

यथा मिश्रस्तु योक्तव्यः पूर्वरङ्गे भवेदिह |
मिश्रे सम्भाविता कार्या तदा वार्तिकमाश्रिता ||
शुद्धे च पृथुला कार्या दक्षिणं मार्गमाश्रिता |

पदच्छेदः - यथा मिश्रः तु योक्तव्यः पूर्वरङ्गे भवेत् इह |
मिश्रे सम्भाविता कार्या तदा वार्तिकम् आश्रिता ||
शुद्धे च पृथुला कार्या दक्षिणं मार्गम् आश्रिता |

अन्वय: - यथा इह मिश्र: योक्तव्य: भवेत् | तदा मिश्रे पूर्वरङ्गे वार्तिकम् आश्रिता सम्भाविता कार्या | शुद्धे च दक्षिणं मार्गम् आश्रिता पृथुला कार्या |

अर्थ - आता मिश्रपूर्वरंगाच्या प्रयोगाविषयी सांगतो . मिश्र पूर्वरंगामध्ये वार्तिक मार्गावर आधारित संभाविता गीतीचा प्रयोग करावा आणि शुद्ध पूर्वरंगामध्ये दक्षिण मार्गावर आधारित पृथुला गीतीचा प्रयोग करावा .

अत: परं प्रवक्ष्यामि गुरुलाघवत: क्रियाम् ||
उपोहनक्रियायां तु यथायोज्यं प्रयोक्तृभि: |

पदच्छेद: - अत: परं प्रवक्ष्यामि गुरुलाघवत: क्रियाम् ||
उपोहन-क्रियायां तु यथायोज्यं प्रयोक्तृभि: |

अन्वय: - अत: परम् उपोहनक्रियायां प्रयोक्तृभि: यथायोज्यं गुरुलाघवत: क्रियां प्रवक्ष्यामि |

अर्थ - यापुढे उपोहन क्रियेमध्ये वापरण्यात येणाऱ्या गुरु आणि लघु मात्रांचा प्रयोग कसा करावा याविषयी सांगणार आहे .

दिग्ले दिग्ले पुन: कार्यमन्ते झण्टुं सदा बुधै: ||
मध्ये लघ्वक्षराणि स्यु: षोडशैव तु नित्यश: |
एवं ह्युपोहनं कृत्वा तथा वस्तु समाचरेत् ||

पदच्छेद: - दिग्ले दिग्ले पुन: कार्यम् अन्ते झण्टुं सदा बुधै: ||
मध्ये लघु अक्षराणि स्यु: षोडश एव तु नित्यश: |
एवं हि उपोहनं कृत्वा तथा वस्तु समाचरेत् ||

अन्वय: - बुधै: पुन: दिग्ले दिग्ले कार्यम् | अन्ते सदा झण्टुम् (भवेत्) | मध्ये नित्यश: षोडश लघु अक्षराणि स्यु: | एवं हि उपोहनं कृत्वा तथा वस्तु समाचरेत् |

अर्थ - विद्वानांनी सुरुवातीस 'दिग्ले दिग्ले' या दोन गुरू अक्षरांनी युक्त शब्दाचे उच्चारण करावे आणि शेवटी 'झंटु' हा शब्द उच्चारावा . मध्ये १६ लघू अक्षरांचा वापर करावा . याप्रमाणे उपोहनक्रिया करून कथावस्तूस प्रारंभ करावा .

## ❖ उत्थापनी ध्रुवा ❖

उत्थापन्यां प्रयोगेऽस्मिन्कलाकालसमन्वितम् |
अक्षराणां कलायास्तु गुरुलाघवमेव च ||
पूर्वं तु कथितं यस्मात्तस्मान्नाभिहितं भवेत् |

पदच्छेद :- उत्थापन्यां प्रयोगे अस्मिन् कला-काल-समन्वितम् |
अक्षराणां कलाया : तु गुरुलाघवम् एव च ||
पूर्वं तु कथितं यस्मात् तस्मात् न अभिहितं भवेत् |

अन्वय : - उत्थापन्याम् अस्मिन् प्रयोगे यस्मात् कलाकालसमन्वितम् अक्षराणां कलाया : गुरुलाघवं च पूर्वं तु कथितं तस्मात् (पुन : अत्र) न अभिहितं भवेत् |

अर्थ - उत्थापनी ध्रुवेच्या प्रयोगात कला आणि कालाने युक्त अशा कलेचे आणि अक्षरांचे गुरुत्व आणि लघुत्व पूर्वीच सांगितले आहे त्यामुळे आता पुन्हा सांगणे योग्य नाही .

यथा -
देवं विभुं त्रिभुवनाधिपतिं कैलासपर्वतगुहाभिरतम् |
शैलेन्द्रराजतनयादयितं मूर्ध्ना नतोऽस्मि पुरनाशकरम् ||
एवमुत्थापनी कार्या पूर्वरङ्गप्रयोक्तृभि : |

पदच्छेद :- यथा -
देवं विभुं त्रिभुवन-अधिपतिं कैलास-पर्वत-गुहा-अभिरतम् |
शैलेन्द्र-राज-तनया-दयितं मूर्ध्ना नत : अस्मि पुर-नाश-करम् ||
एवम् उत्थापनी कार्या पूर्वरङ्ग-प्रयोक्तृभि : |

अन्वय : - यथा -
त्रिभुवन-अधिपतिं कैलासपर्वतगुहाभिरतं शैलेन्द्रराजतनयादयितं पुरनाशकरं देवं विभुं मूर्ध्ना नत : अस्मि |
पूर्वरङ्गप्रयोक्तृभि : एवम् उत्थापनी कार्या |

अर्थ - जसे - तीनही लोकांचे स्वामी असणाऱ्या, कैलासपर्वतातील गुहेमध्ये मग्न असणाऱ्या, हिमालयाच्या कन्येला (पार्वतीला) प्रिय असणाऱ्या, त्रिपुराचा नाश करणाऱ्या, भगवान शिवाला मी नतमस्तक आहे.
पूर्वरंगाचा प्रयोग करणाऱ्यांनी अशा प्रकारे उत्थापनी ध्रुवा करावी.

❖ परिवर्तिनी ध्रुवा ❖

अतोऽन्यत्परिवर्ताया लक्षणं संविधीयते ॥
अस्यास्तूपोहनं कार्यं षट्कलं परिसंख्यया ।
आदौ दिग्ले द्विरुक्तस्तु अन्ते झण्टुं सदा भवेत् ॥
मध्ये लघ्वक्षराण्येव द्वादशैव प्रयोजयेत् ।

पदच्छेद :- अत: अन्यत् परिवर्ताया: लक्षणं संविधीयते ॥
अस्या: तु उपोहनं कार्यं षट्कलं परिसंख्यया ।
आदौ दिग्ले द्विरुक्त: तु अन्ते झण्टुं सदा भवेत् ॥
मध्ये लघु-अक्षराणि एव द्वादश एव प्रयोजयेत् ।

अन्वय: - अत: अन्यत् परिवर्ताया: लक्षणं संविधीयते । षट्कलं परिसंख्यया अस्या: उपोहनं कार्यम् ।
आदौ दिग्ले द्विरुक्त:, अन्ते सदा झण्टुं भवेत् । मध्ये द्वादश लघ्वक्षराणि एव प्रयोजयेत् ।

अर्थ - आता यापुढे परिवतिर्नी ध्रुवेची लक्षणे सांगण्यात येतील. यामध्ये उपोहनाचा प्रयोग संख्येनुसार सहा कलांनी करावा. प्रथम दोन वेळा दिग्ले म्हणावे आणि शेवटी नेहमी झंटु शब्दाचे उच्चारण करावे. मध्ये १२ लघु अक्षरांचा वापर करावा.

वस्तुनोऽत्र प्रवक्ष्यामि गुरुलघ्वक्षरक्रमम् ॥
द्वे चादौ च चतुर्थं च अष्टमं दशमं तथा ।
चतुर्दशं पञ्चदशं पादे गुर्वक्षराणि तु ॥
सा ध्रुवा परिवर्ताख्या त्रिलया त्रियतिस्तथा ।

पदच्छेद : - वस्तुन : अत्र प्रवक्ष्यामि गुरु-लघु-अक्षरक्रमम् ||
द्वे च आदौ च चतुर्थं च अष्टमं दशमं तथा |
चतुर्दशं पञ्चदशं पादे गुरु-अक्षराणि तु ||
सा ध्रुवा परिवर्त-आख्या त्रिलया त्रियति : तथा |

अन्वय : - अत्र वस्तुन : गुरुलघु-अक्षरक्रमं प्रवक्ष्यामि | पादे आदौ द्वे च चतुर्थम् अष्टमं दशमं चतुर्दशं तथा पञ्चदशं गुरु-अक्षराणि (यदा भवन्ति) सा त्रिलया तथा त्रियति : परिवर्ताख्या ध्रुवा भवति)|

अर्थ - या कथावस्तुच्या गीतकामधील गुरु लघु अक्षरांचा क्रम कसा असावा, याविषयी सांगतो . परिवर्तिनी ध्रुवेच्या पादाची पहिली दोन अक्षरे तसेच चौथे, आठवे, दहावे, चौदावे, पंधरावे अक्षर गुरु असते आणि बाकीची अक्षरे लघू असावीत . यामध्ये तीन लय आणि तीन यती असतात .

परिवर्तास्तु चत्वार : पाणयस्त्रय एव च |
चतुर्भिस्सन्निपातैस्तु द्वात्रिंशत्कलिकान्विता ||
पूर्वरङ्गे प्रयोक्तव्य : परिवर्त : प्रयोक्तृभि : |

पदच्छेद : - परिवर्ता : तु चत्वार : पाणय : त्रय : एव च |
चतुर्भि : सन्निपातै : तु द्वात्रिंशत् कलिका-अन्विता ||
पूर्वरङ्गे प्रयोक्तव्य : परिवर्त : प्रयोक्तृभि : |

अन्वय : - चत्वार : परिवर्ता : त्रय : पाणय : च | चतुर्भि : सन्निपातै : द्वात्रिंशत् कलिकान्विता ||
प्रयोक्तृभि : परिवर्त : पूर्वरङ्गे प्रयोक्तव्य :|

अर्थ - तसेच या ध्रुवेमध्ये चार परिवर्त, तीन पाणि, चार संनिपात आणि बत्तीस कला असतात . नाट्यप्रयोग करणाऱ्यांनी अशा परिवर्तिनी ध्रुवेचा पूर्वरंगामध्ये प्रयोग करावा .

यथा -

चन्द्रार्धभूषणजटं वरं वृषभकेतुं
कैलासपर्वतनिवासिनं सुरवरिष्ठम् |

शैलाधिराजतनयाप्रियं प्रमथनाथं
मूर्ध्ना नतोऽस्मि त्रिपुरान्तकं परमयोगिनम् ‖

पदच्छेद :- यथा -
चन्द्रार्ध-भूषण-जटं वरं वृषभ-केतुं
कैलास-पर्वत-निवासिनं सुर-वरिष्ठम् |
शैलाधिराज-तनया-प्रियं प्रमथ-नाथं
मूर्ध्ना नत : अस्मि त्रिपुर-अन्तकं परम-योगिनम् ‖

अन्वय : - यथा -
चन्द्रार्ध-भूषणजटं वरं वृषभकेतुं कैलासपर्वत-निवासिनं सुरवरिष्ठं शैलाधिराज-तनयाप्रियं प्रमथनाथं त्रिपुरान्तकं परमयोगिनं मूर्ध्ना नत : अस्मि |

अर्थ - जसे - अर्धचंद्राने विभूषित असणाऱ्या, जटाधारी, वृषभांकित ध्वज असणाऱ्या, कैलासपर्वतावर निवास करणाऱ्या देवांमध्ये श्रेष्ठ असणाऱ्या, हिमालयकन्येला प्रिय असणाऱ्या, प्रमथनाथ असणाऱ्या, त्रिपुराचा नाश करणाऱ्या, परमयोगी शिवाला मी नम्र होऊन वंदन करतो .

## ❖ अवकृष्टा ध्रुवा ❖

अवकृष्टामिदानीं तु कथ्यमानां निबोधत |
अस्यास्तूपोहनं कार्यं कलाभि: पञ्चभिर्युतम् ‖

पदच्छेद :- अवकृष्टाम् इदानीं तु कथ्यमानां निबोधत |
अस्या : तु उपोहनं कार्यं कलाभि : पञ्चभि : युतम् ‖

अन्वय : - इदानीं कथ्यमानाम् अवकृष्टां निबोधत | अस्या : उपोहनं पञ्चभि : कलाभि : युतं कार्यम् |

अर्थ - आता सांगण्यात येणाऱ्या अवकृष्टा ध्रुवेविषयी तुम्ही जाणून घ्या . या ध्रुवेचे उपोहन पाच कलांचे असावे .

दिग्ले दिग्ले पुनश्चान्ते झण्टुमस्य प्रयोजयेत् |
अष्टावेव तु कार्याणि मध्ये लघ्वक्षराणि तु ||

पदच्छेद : - दिग्ले दिग्ले पुन : च अन्ते झण्टुम् अस्य प्रयोजयेत् |
अष्टौ एव तु कार्याणि मध्ये लघु-अक्षराणि तु ||

अन्वय : - पुन : अस्य दिग्ले दिग्ले, अन्ते झण्टुं प्रयोजयेत् | मध्ये अष्टौ एव लघु-अक्षराणि कार्याणि |

अर्थ - या ध्रुवेच्या सुरुवातीस दिग्ले दिग्ले म्हणून शेवटी झंटु शब्दाचे उच्चारण करावे . मध्ये आठ लघु अक्षरांचा वापर करावा .

तृतीयं चैव षष्ठं तु नवमैकादशे तथा |
पादे पञ्चदशं चैव षोडशं च भवेद्गुरु ||

पदच्छेद : - तृतीयं च एव षष्ठं तु नवम-एकादशे तथा |
पादे पञ्चदशं च एव षोडशं च भवेत् गुरु ||

अन्वय : - पादे तृतीयं षष्ठं नवम-एकादशे पञ्चदशं षोडशं च (अक्षरं) गुरु भवेत् |

अर्थ - या ध्रुवेच्या चरणातील तिसरे, सहावे, नववे, अकरावे, पंधरावे आणि सोळावे अक्षर गुरू असावे .

अष्टषष्टिगणै : पादैरवकृष्टविधिर्बुधा : |
चतुर्भि : सन्निपातैश्च पाणिभिस्त्रिभिरेव च ||

पदच्छेद : - अष्टषष्टि-गणै : पादै : अवकृष्ट-विधि : बुधा : |
चतुर्भि : सन्निपातै : च पाणिभि : त्रिभि : एव च ||

अन्वय - अष्टषष्टिगणै : पादै :, चतुर्भि : सन्निपातै :, त्रिभि : पाणिभि : च अवकृष्टविधि : बुधा : |

अर्थ - अवकृष्टा ध्रुवा ६८ गण असणाऱ्या पादांनी, चार संनिपातांनी आणि तीन पाणिंद्वारे जाणून घ्यावी .

यथा-

वरदं सगणं त्रिपुरान्तकं वृषभकेतुम् |
गजचर्मपटं विषमेक्षणं भुवननाथम् |
भुजगाभरणं जगतां हितं भुवनयोनिम् |
प्रणतोऽस्मि भवन्तमुमापतिं त्वसितकण्ठम् ||

पदच्छेद :- यथा-
वरदं सगणं त्रिपुर-अन्तकं वृषभकेतुम् |
गज-चर्म-पटं विषम-ईक्षणं भुवन-नाथम् |
भुजग-आभरणं जगतां हितं भुवन-योनिम् |
प्रणत : अस्मि भवन्तम् उमापतिं तु असित-कण्ठम् ||

अन्वय : - यथा- वरदं सगणं त्रिपुरान्तकं वृषभकेतुं गजचर्मपटं विषमेक्षणं भुवननाथं भुजग-आभरणं जगतां हितं भुवनयोनिम् असितकण्ठं भवन्तम् उमापतिं प्रणत : अस्मि |

अर्थ - वर देणाऱ्या, गणांसोबत असणाऱ्या, त्रिपुराचा संहार करणाऱ्या, वृषभकेतु असणाऱ्या, गजचर्म धारण करणाऱ्या, तीन नेत्र असणाऱ्या, त्रैलोक्याचे स्वामी असणाऱ्या, सर्पाचे आभूषण धारण करणाऱ्या, जगाचे कल्याण करणाऱ्या, सर्व जगाच्या उत्पत्तीचे कारण असणाऱ्या, नीलकंठ उमापती भगवान शिवाला मी वंदन करतो .

## ❖ अड्डिता ध्रुवा ❖

तृतीयं चैव षष्ठं च गुरु पादे त्रयोदशम् |
चतुर्गुणसमायुक्ता सा कार्या त्वड्डिता ध्रुवा ||

पदच्छेद :- तृतीयं च एव षष्ठं च गुरु पादे त्रयोदशम् |
चतुर्गुण-समायुक्ता सा कार्या तु अड्डिता ध्रुवा ||

अन्वय : - (यस्या:) पादे तृतीयं षष्ठं त्रयोदशम् (अक्षरं) गुरु (अस्ति) | चतुर्गुणसमायुक्ता सा अड्डिता ध्रुवा कार्या |

अर्थ - जिच्या प्रत्येक पादामधील तिसरे, सहावे आणि तेरावे अक्षर गुरू असते आणि अशा चार गुणांनी युक्त असलेल्या अड्डिता ध्रुवेचा प्रयोग करावा.

तत्राप्युपोहनं कार्यं चतुष्कलसमन्वितम् |
अड्डितायाः प्रयोगज्ञैरन्ते झण्टुविभूषितम् ||

पदच्छेदः - तत्र अपि उपोहनं कार्यं चतुष्कल-समन्वितम् |
अड्डितायाः प्रयोगज्ञैः अन्ते झण्टु-विभूषितम् ||

अन्वयः - तत्र अपि चतुष्कल-समन्वितम् उपोहनं कार्यम् | प्रयोगज्ञैः अड्डितायाः अन्ते झण्टुविभूषितम् (कर्तव्यम्) |

अर्थ - या ध्रुवेमध्ये चार कलांनी युक्त उपोहन करावे. प्रयोग जाणणाऱ्यांनी अड्डितेच्या शेवटी झंटु शब्दाचे उच्चारण करावे.

दिग्ले दिग्ले ततश्चैव कार्यमन्ते सदा बुधैः |
चत्वार्येव तु कार्याणि मध्ये लघ्वक्षराणि तु ||

पदच्छेदः - दिग्ले दिग्ले ततः च एव कार्यम् अन्ते सदा बुधैः |
चत्वारि एव तु कार्याणि मध्ये लघु-अक्षराणि तु ||

अन्वयः - बुधैः सदा दिग्ले दिग्ले ततः च कार्यम् अन्ते (झण्टुं वक्तव्यम्)| मध्ये चत्वारि लघु-अक्षराणि कार्याणि |

अर्थ - बुद्धिमान लोकांनी नेहमी सुरुवातीला दिग्ले दिग्ले म्हणावे आणि शेवटी झंटु शब्दाचे उच्चारण करावे. मध्ये चार लघू अक्षरे असावीत.

यथा-

प्रवरं वरदं प्रणमत सततम् |
गजचर्मपटं मुनिजनसहितम् |
उमया सहितं भुजगवलयिनम् |
प्रणतोऽस्मि शिवं त्रिभुवनसहितम् ||

पदच्छेद: - यथा-
प्रवरं वरदं प्रणमत सततम् ।
गज-चर्म-पटं मुनि-जन-सहितम् ।
उमया सहितं भुजग-वलयिनम् ।
प्रणत: अस्मि शिवं त्रि-भुवन-सहितम् ॥

अन्वय: - यथा- (यूयं) प्रवरं वरदं सततं प्रणमत । (तथा) गजचर्मपटं मुनिजनसहितम् उमया सहितं भुजगवलयिनं त्रिभुवनसहितं शिवं प्रणत: अस्मि ।

अर्थ - जसे - सर्वश्रेष्ठ असणाऱ्या, वर देणाऱ्याला तुम्ही सर्वांनी वंदन करा. गजचर्मवस्त्र धारण करणाऱ्या, मुनींसोबत असणाऱ्या, उमेसह असणाऱ्या, सर्पांचे कंकण धारण करणाऱ्या, त्रैलोक्यासोबत असणाऱ्या शिवाला मी वंदन करातो.

प्रयोज्या ह्यड्डिता ह्येवं पूर्वरङ्गे यथार्थत: ।
अत: परं प्रवक्ष्यामि विक्षिप्तायास्तु लक्षणम् ॥

पदच्छेद: - प्रयोज्या हि अड्डिता हि एवं पूर्वरङ्गे यथार्थत: ।
अत: परं प्रवक्ष्यामि विक्षिप्ताया: तु लक्षणम् ॥

अन्वय: - एवं पूर्वरङ्गे यथार्थत: अड्डिता प्रयोज्या । अत: परं विक्षिप्ताया: लक्षणं प्रवक्ष्यामि ।

अर्थ - अशा प्रकारे, पूर्वरंगामध्ये यथार्थपणे अड्डिता ध्रुवेचा प्रयोग करावा. यापुढे मी विक्षिप्ता ध्रुवेची लक्षणे सांगतो.

### ❖ विक्षिप्तका ध्रुवा ❖

तृतीयं चैव षष्ठं च नवमं दशमं तथा ।
गुर्वक्षराणि पादे तु यस्यां विक्षिप्तका तु सा ॥

पदच्छेद: - तृतीयं च एव षष्ठं च नवमं दशमं तथा ।
गुरु-अक्षराणि पादे तु यस्यां विक्षिप्तका तु सा ॥

अन्वय: - यस्यां पादे तृतीयं षष्ठं नवमं दशमं गुरु-अक्षराणि सा विक्षिप्तका (ध्रुवा भवेत्) ॥

अर्थ - जिच्या प्रत्येक चरणातील तिसरे, सहावे, नववे आणि दहावे अक्षर गुरू असते ती ‘विक्षिप्तका ध्रुवा’ होय .

दिग्ले त्रिभिर्गुणैर्युक्ता: पातास्तस्य भवन्ति हि |
त्रिकलं चापि निर्दिष्टमुपोहनमत: परम् ||

पदच्छेद:- तस्य दिग्ले त्रिभि: गुणै: युक्ता: पाता: भवन्ति |
त्रिकलं च अपि निर्दिष्टम् उपोहनम् अत: परम् ||

अन्वय: - तस्य दिग्ले त्रिभि: गुणै: युक्ता: पाता: भवन्ति | त्रिकलं च अपि निर्दिष्टम् | अत: परम् उपोहनं (वदामि) |

अर्थ - या विक्षिप्त ध्रुवेत 'दिग्ले' या शब्दाचा प्रयोग हा तीन गुणांनी युक्त पातांद्वारे करावा आणि यात तीन कला सांगितल्या गेल्या आहेत . यानंतर उपोहन क्रियेविषयी सांगतो .

दिग्ले दिग्ले पुन: कार्यमन्ते झण्टुं प्रयोक्तृभि: |
लघ्वक्षरैर्विहीनं तु विक्षिप्तोपोहनं भवेत् || ३५ ||

पदच्छेद:- दिग्ले दिग्ले पुन: कार्यम् अन्ते झण्टुं प्रयोक्तृभि: |
लघु-अक्षरै: विहीनं तु विक्षिप्त-उपोहनं भवेत् ||

अन्वय: - प्रयोक्तृभि: दिग्ले दिग्ले पुन: कार्यम् अन्ते झण्टुं (प्रयोजयेत्) | विक्षिप्त-उपोहनं लघु-अक्षरै: विहीनं भवेत् |

अर्थ - प्रयोग करणाऱ्यांनी सुरुवातीला दिग्ले दिग्ले म्हणावे आणि शेवटी झंटु शब्दाचे उच्चारण करावे . अशा या विक्षिप्त उपोहनामध्ये लघू अक्षरे नसावीत .

यथा-

त्रिपुरान्तकरं बहुलीलमुमया सहितं बहुरूपम् |
भुजगाभरणं त्रिपुरान्तकं प्रणमामि सदा परमीशम् || ३६ ||

पदच्छेद:- यथा-
त्रिपुरान्तकरं बहुलीलम् उमया सहितं बहुरूपम् |
भुजग-आभरणं त्रिपुरान्तकं प्रणमामि सदा परम् ईशम् ||

अन्वय: - यथा- त्रिपुरान्तकरं बहुलीलम् उमया सहितं बहुरूपं भुजगाभरणं त्रिपुरान्तकं परम् ईशम् सदा प्रणमामि।

अर्थ - जसे - त्रिपुराचा अंत करणाऱ्या, उमेसह अनेक प्रकारच्या लीला करणाऱ्या, अनेक रूपे असणाऱ्या, भुजंगाचे आभूषण धारण करणाऱ्या, त्रिपुरांतक परमेश्वराला मी नेहमी वंदन करतो .

## ❖ उपसंहार ❖

एवं सर्वा ध्रुवा: कार्या युग्मौजकृतगीतका: ।
आचार्यबुद्ध्या कर्तव्या: पूर्वरङ्गे यथाविधि ॥ ३७ ॥

पदच्छेद: - एवं सर्वा: ध्रुवा: कार्या: युग्म-ओज-कृत-गीतका: ।
आचार्य-बुद्ध्या कर्तव्या: पूर्वरङ्गे यथाविधि ॥

अन्वय: - एवं पूर्वरङ्गे आचार्यबुद्ध्या यथाविधि युग्मौजकृतगीतका: सर्वा: ध्रुवा: कार्या: ।

अर्थ - अशा प्रकारे पूर्वरंगामध्ये आचार्यांनी स्वबुद्धीनुसार विधिप्रमाणे चतुरश्र आणि त्र्यश्र तालाने युक्त असा गीतांद्वारे या सर्व ध्रुवांचा प्रयोग करावा .

एवं व: कथितं सम्यक्पूर्वरङ्गं त्रिधा मया ।
किमन्यत्सम्प्रवक्ष्यामि भूयोऽभीष्टं द्विजोत्तमा: ॥ ३८ ॥

पदच्छेद: - एवं व: कथितं सम्यक् पूर्वरङ्गं त्रिधा मया ।
किम् अन्यत् सम्प्रवक्ष्यामि भूय: अभीष्टं द्विजोत्तमा: ॥

अन्वय: - द्विजोत्तमा:, एवं मया त्रिधा पूर्वरङ्गं सम्यक् व: कथितम् । भूय: अन्यत् अभीष्टं किं सम्प्रवक्ष्यामि ?

अर्थ - हे श्रेष्ठ मुनिजनहो, अशाप्रकारे तीन प्रकारचा पूर्वरंगविधी मी व्यवस्थित तुम्हांला सांगितलेला आहे . आणखी कोणता विषय तुम्हांला शिकायचा आहे ?

॥ इति भारतीये नाट्यशास्त्रे पूर्वरङ्गविधानं नाम पञ्चमोऽध्याय: (२) ॥
॥ अशा प्रकारे भारतीय नाट्यशास्त्रातील 'पूर्वरंगविधी'नावाचा पाचवा अध्याय (२) समाप्त ॥

# सहावा अध्याय
# रसाध्याय

## रसो वै सः।



# सहावा अध्याय

# रसाध्याय

## ❖ मुनींचे प्रश्न ❖

पूर्वरङ्गविधिं श्रुत्वा पुनराहुर्महत्तमा:|
भरतं मुनय: सर्वे प्रश्नान्पञ्चाभिधत्स्व न: || १ ||

पदच्छेद: - पूर्वरङ्गविधिं श्रुत्वा पुन: आहु: |
भरतं मुनय: सर्वे प्रश्नान् पञ्च अभिधत्स्व न: || १ ||

अन्वय: - पूर्वरङ्गविधिं श्रुत्वा पुन: सर्वे महत्तमा: मुनय: भरतम् आहु:, "पञ्च प्रश्नान् न: अभिधत्स्व " इति|

अर्थ - पूर्वरंगविधी ऐकून पुन्हा सर्व श्रेष्ठ मुनींनी भरताला म्हटले, "आमच्या पाच प्रश्नांची उत्तरे द्या ."

ये रसा इति पठ्यन्ते नाट्ये नाट्यविचक्षणै:|
रसत्वं केन वै तेषामेतदाख्यातुमर्हसि || २ ||
भावाश्चैव कथं प्रोक्ता: किं वा ते भावयन्त्यपि |
संग्रहं कारिकां चैव निरुक्तं चैव तत्त्वत:|| ३ ||

पदच्छेद: - ये रसा: इति पठ्यन्ते नाट्ये नाट्य-विचक्षणै:|
रसत्वं केन वै तेषाम् एतत् आख्यातुम् अर्हसि || २ ||
भावा: च एव कथं प्रोक्ता: किं वा ते भावयन्ति अपि|
संग्रहं कारिकां च एव निरुक्तं च एव तत्त्वत:|| ३ ||

अन्वय: - नाट्यविचक्षणै: नाट्ये ये 'रसा:' इति पठ्यन्ते, तेषां रसत्वं केन (सिद्धम्)? भावा: च कथं प्रोक्ता:? किं वा ते भावयन्ति? तथा च संग्रहं, कारिकां, निरुक्तं च एतत् सर्वं तत्त्वत: आख्यातुम् अर्हसि|

अर्थ - "नाट्यामध्ये निपुण लोकांनी नाट्यात जे 'रस' सांगितले आहेत त्यांचे रसत्व कशाने सिद्ध होते? भाव कशाला म्हटले गेले आहे आणि ते कोणाला भावित करतात? ह्याच बरोबर संग्रह, कारिका तसेच निरुक्त हे सर्व तत्त्वत: सांगण्याची कृपा करावी ."

❖ भरतमुनींचे उत्तर ❖

तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनिः|
प्रत्युवाच पुनर्वाक्यं रसभावविकल्पनम् || ४ ||

पदच्छेदः - तेषां तु वचनं श्रुत्वा मुनीनां भरतः मुनिः|
प्रत्युवाच पुनः रस-भाव-विकल्पनम् || ४ ||

अन्वयः - तेषां मुनीनां वचनं श्रुत्वा भरतः मुनिः पुनः रसभावविकल्पनं वाक्यं प्रत्युवाच|

अर्थ - त्या मुनींचे हे बोलणे ऐकून भरतमुनी 'रसांचे आणि भावांचे' विवरण करण्यासाठी असे म्हणाले . . .

अहं वः कथयिष्यामि निखिलेन तपोधनाः|
संग्रहं कारिकां चैव निरुक्तं च यथाक्रमम् || ५ ||

पदच्छेदः - अहं वः कथयिष्यामि निखिलेन तपोधनाः|
संग्रहं कारिकां च एव निरुक्तं च यथाक्रमम् || ५ ||

अन्वयः - (हे) तपोधनाः! अहं वः निखिलेन संग्रहं, कारिकां, निरुक्तं च यथाक्रमं कथयिष्यामि|

अर्थ - "हे तपस्वी मुनींनो, मी तुम्हांला संग्रह, कारिका आणि निरुक्त यांचे क्रमाने निरूपण करत आहे .

न शक्यमस्य नाट्यस्य गन्तुमन्तं कथञ्चन|
कस्माद्बहुत्वाज्ज्ञानानां शिल्पानां वाप्यनन्ततः || ६ ||

पदच्छेदः - न शक्यम् अस्य नाट्यस्य गन्तुम् अन्तं कथञ्चन|
कस्मात् बहुत्वात् ज्ञानानां शिल्पानां वा अपि अनन्ततः || ६ ||

अन्वयः - अस्य नाट्यस्य अन्तं गन्तुम् कथञ्चन न शक्यम्| कस्मात्? ज्ञानानां बहुत्वात्, शिल्पानां अनन्ततः (च)|

अर्थ - ह्या नाट्याच्या अंतापर्यंत पोहोचणे शक्य नाही . का? कारण, ज्ञानाच्या असंख्य शाखा आहेत आणि शिल्पांची अनंत रूपे आहेत .

एकस्यापि न वै शक्यस्त्वन्तो ज्ञानार्णवस्य हि |
गन्तुं किं पुनरन्येषां ज्ञानानामर्थतत्त्वतः || ७ ||

पदच्छेदः - एकस्य अपि न वै शक्यः तु अन्तः ज्ञान-अर्णवस्य हि |
गन्तुं किं पुनः अन्येषां ज्ञानानाम् अर्थतत्त्वतः || ७ ||

अन्वयः - एकस्य अपि ज्ञानार्णवस्य अन्तः गन्तुं न शक्यः | किं पुनः अन्येषां ज्ञानानाम् अथ तत्त्वतः?

अर्थ - समुद्राप्रमाणे विस्तारित आणि अथांग असलेल्या नाट्याशी संबंधित असलेल्या एका ज्ञानशाखेचा सखोल अभ्यास करणे शक्य नाही . तर मग, दुसऱ्या ज्ञानशाखेचे सखोल अध्ययन कसे शक्य आहे ?

❖ संग्रह ❖

किन्त्वल्पसूत्रग्रन्थार्थमनुमानप्रसाधकम् |
नाट्यस्यास्य प्रवक्ष्यामि रसभावादिसङ्ग्रहम् || ८ ||

पदच्छेदः - किन्तु अल्प-सूत्र-ग्रन्थार्थम् अनुमान-प्रसाधकम् |
नाट्यस्य अस्य प्रवक्ष्यामि रस-भाव-आदि-सङ्ग्रहम् || ८ ||

अन्वयः - किन्तु अल्पसूत्रग्रन्थार्थम् अनुमानप्रसाधकम् अस्य नाट्यस्य रसभावादिसङ्ग्रहं प्रवक्ष्यामि |

अर्थ - परंत तरीही, लक्षण, परीक्षणीय विषय, अर्थसंक्षेपाने युक्त आणि अनुमान हे ज्याचे प्रमाण आहे अशा या नाट्यकलेच्या रस, भाव इत्यादी संग्रहाविषयी मी सांगतो .

विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः |
निबन्धो यः समासेन सङ्ग्रहं तं विदुर्बुधाः || ९ ||

पदच्छेदः - विस्तरेण उपदिष्टानाम् अर्थानां सूत्र-भाष्ययोः |
निबन्धः यः समासेन सङ्ग्रहं तं विदुः बुधाः || ९ ||

अन्वयः - सूत्रभाष्ययोः विस्तरेण उपदिष्टानाम् अर्थानां समासेन यः निबन्धः बुधाः तं सङ्ग्रहं विदुः|

अर्थ - विद्वानांच्या मते, सूत्र आणि भाष्याच्या स्वरूपात विस्ताराने सांगितलेल्या व्याख्येचा अर्थ थोडक्यात सांगणारा निबंध म्हणजे 'संग्रह' होय .

रसा भावा ह्यभिनयाः धर्मवृत्तिप्रवृत्तयः|
सिद्धिः स्वरास्तथातोद्यं गानं रङ्गश्च सङ्ग्रहः || १० ||

पदच्छेदः - रसाः भावाः हि अभिनयाः धर्म-वृत्ति-प्रवृत्तयः|
सिद्धिः स्वराः तथा आतोद्यं गानं रङ्गः च सङ्ग्रहः || १० ||

अन्वयः - रसाः , भावाः , अभिनयाः , धर्मवृत्तिप्रवृत्तयः, सिद्धिः , स्वराः , तथा आतोद्य, गानं , रङ्गः च सङ्ग्रहः|

अर्थ - रस, भाव, अभिनय ,धर्मी, वृत्ती, प्रवृत्ती, सिद्धी, स्वर, आतोद्य, गान, रंग ह्यास ‘संग्रह’ असे म्हटले आहे .

❖ कारिका ❖

अल्पाभिधानेनार्थो यः समासेनोच्यते बुधैः|
सूत्रतः साऽनुमन्तव्या (नु पठिता) कारिकार्थप्रदर्शिनी || ११ ||

पदच्छेदः - अल्प-अभिधानेन अर्थः यः समासेन उच्यते बुधैः|
सूत्रतः सा अनुमन्तव्या (नु पठिता) कारिका-अर्थ-प्रदर्शिनी || ११ ||

अन्वयः - अल्प-अभिधानेन समासेन यः अर्थः बुधैः सूत्रतः उच्यते, सा कारिका-अर्थप्रदर्शिनी अनुमन्तव्या (नु पठिता)|

अर्थ - कमी शब्दांमध्ये संक्षिप्तरीत्या सूत्रात्मक शैलीमध्ये बुद्धिमान लोकांकडून जो अर्थ सांगितला जातो, तो अर्थ व्यक्त करणाऱ्या वाक्याला 'कारिका' असे म्हणतात .

## ❖ निरुक्त ❖

नानानामाश्रयोत्पन्नं निघण्टुनिगमान्वितम् |
धात्वर्थहेतुसंयुक्तं नानासिद्धान्तसाधितम् || १२ ||
स्थापितोऽर्थो भवेद्यत्र समासेनार्थसूचकः|
धात्वर्थवचनेनेह निरुक्तं तत्प्रचक्षते || १३ ||

पदच्छेदः - नानानाम्-आश्रय-उत्पन्नं निघण्टु-निगम-अन्वितम्|
धातु-अर्थ-हेतु-संयुक्तं नाना-सिद्धान्त-साधितम्|| १२ ||
स्थापितः अर्थः भवेत् यत्र समासेन अर्थसूचकः|
धातु-अर्थ-वचनेन इह निरुक्तं तत् प्रचक्षते|| १३ ||

अन्वयः - नानानाम्-आश्रय-उत्पन्नं निघण्टु-निगम-अन्वितं धातु-अर्थहेतुसंयुक्तं नानासिद्धान्त-साधितम् यत्र धातु-अर्थवचनेन समासेन अर्थसूचकः स्थापितः अर्थः भवेत् तत् इह निरुक्तम् इति प्रचक्षते|

अर्थ - विविध प्रकारच्या नामांच्या आश्रयाने उत्पन्न, निघंटु आणि निगम यांनी युक्त, धातूचा अर्थ आणि प्रकृती सांगणारे, अनेक सिद्धांत स्पष्ट करणारे आणि जिथे धातूचा अर्थ स्पष्ट करणाऱ्या वाक्यांनी एखाद्या सिद्धांताचा अर्थ थोडक्यात स्पष्ट केला जातो, त्यास 'निरुक्त' असे म्हणतात .

सङ्ग्रहो यो मया प्रोक्तः समासेन द्विजोतमाः|
विस्तरं तस्य वक्ष्यामि सनिरुक्तं सकारिकम् || १४ ||

पदच्छेदः - सङ्ग्रहः यः मया प्रोक्तः समासेन द्विजोतमाः|
विस्तरं तस्य वक्ष्यामि सनिरुक्तं सकारिकम्|| १४ ||

अन्वयः - (हे) द्विजोत्तमाः ! मया यः सङ्ग्रहः समासेन प्रोक्तः तस्य विस्तरं सनिरुक्तं, सकारिकं वक्ष्यामि|

अर्थ - हे श्रेष्ठ मुनींनो, मी जो 'संग्रह' हा विषय थोडक्यात सांगितला त्याचेच निरुक्तासह व कारिकांद्वारे सविस्तर विवरण आता करत आहे .

❖ रस ❖

शृङ्गारहास्यकरुणा रौद्रवीरभयानका:।
बीभत्साद्भुतसंज्ञो चेत्यष्टौ नाट्ये रसा: स्मृता: ॥ १५ ॥

पदच्छेद:- शृङ्गार-हास्य-करुणा: रौद्र-वीर-भयानका:।
बीभत्स-अद्भुत-संज्ञ: च इति अष्टौ नाट्ये रसा: स्मृता: ॥ १५ ॥

अन्वय: - नाट्ये शृङ्गार-हास्य-करुणा: रौद्र-वीर-भयानका: बीभत्स-अद्भुत-संज्ञ: च इति अष्टौ रसा: स्मृता:।

अर्थ - शृंगार, हास्य, करुण, रौद्र, वीर, भयानक, बीभत्स, अद्भुत नावाचे आठ रस नाट्यामध्ये सांगितले गेले आहेत .

एते ह्यष्टौ रसा: प्रोक्ता द्रुहिणेन महात्मना।
पुनश्च भावान्वक्ष्यामि स्थायिसञ्चारिसत्त्वजान् ॥ १६ ॥

पदच्छेद:- एते हि अष्टौ रसा: प्रोक्ता: द्रुहिणेन महात्मना।
पुन: च भावान् वक्ष्यामि स्थायि-सञ्चारि-सत्त्वजान् ॥ १६ ॥

अन्वय: - महात्मना द्रुहिणेन एते अष्टौ रसा: प्रोक्ता:। पुन: च स्थायि-सञ्चारि-सत्त्वजान् भावान् वक्ष्यामि।

अर्थ - महात्मा ब्रह्माने हे आठ रस सांगितले आहेत . आता मी स्थायीभाव, संचारिभाव आणि सात्त्विकभावांचे वर्णन करतो .

❖ स्थायी भाव ❖

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावा: प्रकीर्तिता: ॥ १७ ॥

पदच्छेद: - रति: हास: च शोक: च क्रोध-उत्साहौ भयं तथा |
जुगुप्सा विस्मय: च इति स्थायिभावा: प्रकीर्तिता: ‖ १७ ‖

अन्वय: - रति: हास: शोक: क्रोध-उत्साहौ भयं जुगुप्सा विस्मय: च इति स्थायिभावा: प्रकीर्तिता: |

अर्थ - रति, हास, शोक, क्रोध, उत्साह, भय, जुगुप्सा आणि विस्मय हे स्थायी भाव सांगितले आहेत .

❖ व्यभिचारी भाव ❖

निर्वेदग्लानिशङ्काख्यास्तथासूया मद: श्रम: |
आलस्यं चैव दैन्यं च चिन्ता मोह: स्मृतिर्धृति: ‖ १८ ‖
व्रीडा चपलता हर्ष आवेगो जडता तथा |
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ‖ १९ ‖
सुप्तं विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता |
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ‖ २० ‖
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिण: |
त्रयस्त्रिंशदमी भावा: समाख्यातास्तु नामत: ‖ २१ ‖

पदच्छेद: - निर्वेद-ग्लानि-शङ्का-आख्या: तथा असूया मद: श्रम: |
आलस्यं च एव दैन्यं च चिन्ता मोह: स्मृति: धृति: ‖ १८ ‖
व्रीडा चपलता हर्ष: आवेग: जडता तथा |
गर्व: विषाद: औत्सुक्यं निद्रा अपस्मार: एव च ‖ १९ ‖
सुप्तं विबोध: अमर्ष: च अपि अवहित्थम् अथ उग्रता |
मति: व्याधि: तथा उन्माद: तथा मरणम् एव च ‖ २० |
त्रास: च एव वितर्क: च विज्ञेया: व्यभिचारिण: |
त्रयस्त्रिंशत् अमी भावा: समाख्याता: तु नामत: ‖ २१ ‖

अन्वय: - निर्वेद-ग्लानि-शङ्का-आख्या: असूया मद: श्रम: आलस्यं दैन्यं चिन्ता मोह: स्मृति: धृति: व्रीडा चपलता हर्ष: आवेग: जडता गर्व: विषाद: औत्सुक्यं निद्रा अपस्मार:

सुप्तं विबोध: अमर्ष: अवहित्थम् उग्रता मति: व्याधि: उन्माद: मरणं त्रास: वितर्क: च इति व्यभिचारिण: विज्ञेया: | अमी त्रयस्त्रिंशत् भावा: नामत: समाख्याता: |

अर्थ - निर्वेद, ग्लानी, शंका, असूया, मद, श्रम, आलस्य, दैन्य, चिंता, मोह, स्मृती, धृती, व्रीडा, चपलता, हर्ष, आवेग, जडता, गर्व, विषाद, औत्सुक्य, निद्रा, अपस्मार (सुप्त), स्वप्न, विबोध, अमर्ष, अवहित्थ, उग्रता, मती, व्याधी, उन्माद, मरण, त्रास, वितर्क हे व्यभिचारी भाव जाणून घ्या. नावानुसार हे तेहतीस भाव मी सांगितले आहेत.

## ❖ सात्त्विक भाव ❖

स्तम्भ: स्वेदोऽथ रोमाञ्च: स्वरभोऽथ वेपथु: |
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका: स्मृता: || २२ |

पदच्छेद: - स्तम्भ: स्वेद: अथ रोमाञ्च: स्वरभ: अथ वेपथु: |
वैवर्ण्यम् अश्रु प्रलय: इति अष्टौ सात्त्विका: स्मृता: || २२ |

अन्वय: - स्तम्भ: स्वेद: रोमाञ्च: स्वरभ: वेपथु: वैवर्ण्यम् अश्रु प्रलय: इति अष्टौ सात्त्विका: स्मृता: |

अर्थ - स्तंभ, स्वेद, रोमांच, स्वरभंग, वेपथु (थरथर कापणे),वैवर्ण्य (रंग बदलणे), अश्रू आणि प्रलय (मूर्च्छा)हे आठ सात्त्विक भाव सांगितले आहेत.

## ❖ चतुर्विध अभिनय ❖

आङ्गिको वाचिकश्चैव ह्याहार्य: सात्त्विकस्तथा |
चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रया: || २३ ||

पदच्छेद: - आङ्गिक: वाचिक: च एव हि आहार्य: सात्त्विक: तथा |
चत्वार: हि अभिनया: एते विज्ञेया: नाट्यसंश्रया: || २३ ||

अन्वय: - आङ्गिक:, वाचिक:, आहार्य: तथा च सात्त्विक: एते चत्वार: हि नाट्यसंश्रया: अभिनया: विज्ञेया: |

अर्थ - नाट्यामध्ये आंगिक, वाचिक, आहार्य, सात्त्विक असे चार प्रकारचे अभिनय आहेत.

### ❖ धर्मी ❖

लोकधर्मी नाट्यधर्मी धर्मीति द्विविधः स्मृतः|
भारती सात्वती चैव कैशिक्यारभटी तथा || २४ ||

### ❖ वृत्ती ❖

चतस्रो वृत्तयो ह्येता यासु नाट्यं प्रतिष्ठितम्|
आवन्ती दाक्षिणात्या च तथा चैवौढ्रमागधी || २५ ||

### ❖ प्रवृत्ती आणि सिद्धी ❖

पाञ्चालमध्यमा चेति विज्ञेयास्तु प्रवृत्तयः|
दैविकी मानुषी चैव सिद्धिः स्याद्द्विविधैव तु || २६ ||

पदच्छेदः- लोकधर्मी नाट्यधर्मी धर्मी इति द्विविधः स्मृतः|
भारती सात्वती च एव कैशिकी आरभटी तथा || २४ ||
चतस्रः वृत्तयः हि एताः यासु नाट्यं प्रतिष्ठितम्|
आवन्ती दाक्षिणात्या च तथा च एव औढ्रमागधी || २५ ||
पाञ्चाल-मध्यमा च इति विज्ञेयाः तु प्रवृत्तयः|
दैविकी मानुषी च एव सिद्धिः स्यात् द्विविधा एव तु || २६ ||

अन्वयः - लोकधर्मी नाट्यधर्मी इति द्विविधः धर्मी स्मृतः| भारती सात्वती कैशिकी तथा आरभटी च | एताः चतस्रः वृत्तयः यासु नाट्यं प्रतिष्ठितम् अस्ति| आवन्ती दाक्षिणात्या तथा च औढ्रमागधी पाञ्चालमध्यमा च इति तु प्रवृत्तयः विज्ञेयाः| दैविकी मानुषी च द्विविधा सिद्धिः स्यात् |

अर्थ - लोकधर्मी आणि नाट्यधर्मी असे दोन प्रकारचे धर्मी (नाट्यप्रयोग) सांगितले आहेत. भारती, सात्त्वती, कैशिकी, आरभटी या चार वृत्ती सांगितल्या आहेत, ज्यांच्यावर नाट्य अवलंबून असते. आवंती, दाक्षिणात्य, औढ्रमागधी, पांचाली, मध्यमा ह्या पाच प्रवृत्ती जाणून घ्याव्यात. सिद्धीचे दैवी आणि मानुषी असे दोन प्रकार सांगितले आहेत.

### ❖ स्वर ❖

शारीराश्चैव वैणाश्च सप्त षड्जादय: स्वरा: |
(निषादर्षभगान्धारमध्यपञ्चमधैवता: || )
ततं चैवावनद्धं च घनं सुषिरमेव च || २७ ||
चतुर्विधं च विज्ञेयमातोद्यं लक्षणान्वितम् |

पदच्छेद: - शारीरा: च एव वैणा: च सप्त षड्ज-आदय: स्वरा: |
(निषाद-ऋषभ-गान्धार-मध्य-पञ्चम-धैवता: || )
ततं च एव अवनद्धं च घनं सुषिरम् एव च || २७ ||
चतुर्विधं च विज्ञेयम् आतोद्यं लक्षण-अन्वितम् |

अन्वय: - शारीरा: वैणा: च षड्जादय: सप्त स्वरा: |
(निषाद-ऋषभ-गान्धार-मध्य-पञ्चम-धैवता: || )
ततम् अवनद्धं घनं सुषिरं च चतुर्विधं लक्षण-अन्वितम् आतोद्यं च विज्ञेयम् |

अर्थ - शरीरापासून व वीणेपासून उत्पन्न होणारे षड्ज इत्यादी स्वर सात प्रकारचे असतात. (ह्यांची नावे षड्ज, ऋषभ, गांधार, मध्यम, पंचम, धैवत, निषाद असे आहेत) तत, अवनद्ध, घन, सुषिर अशा चार प्रकारच्या लक्षणांनी युक्त आतोद्य सांगितली आहेत.

### ❖ चार प्रकारची वाद्ये ❖

ततं तन्त्रीगतं ज्ञेयमवनद्धं तु पौष्करम् || २८ ||
घनस्तु तालो विज्ञेय: सुषिरो वंश एव च |

पदच्छेद: - ततं तन्त्रीगतं ज्ञेयम् अवनद्धं तु पौष्करम् || २८ ||
घन: तु ताल: विज्ञेय: सुषिर: वंश: एव च |

अन्वय: - तन्त्रीगतं ततं ज्ञेयम् | पौष्करम् अवनद्धं ज्ञेयम् | ताल: तु घन: विज्ञेय: | वंश: सुषिर: एव च विज्ञेय: |

अर्थ - तारांवर आधारित वाद्यास 'तत' म्हटले जाते. चामड्याच्या वाद्यांस अवनद्ध, तालवाद्यास 'घन', बासरी इ. वाद्यांना 'सुषिर' म्हटले आहे.

## ❖ पाच प्रकारची गीते ❖

प्रवेशाक्षेपनिष्क्रामप्रासादिकमथान्तरम् ‖ २९ ‖
गानं पञ्चविधं ज्ञेयं ध्रुवायोगसमन्वितम् |

पदच्छेद : - प्रवेश-आक्षेप-निष्क्राम-प्रासादिकम् अथ अन्तरम् ‖ २९ ‖
गानं पञ्चविधं ज्ञेयं ध्रुवायोग-समन्वितम् |

अन्वय : - प्रवेश-आक्षेप-निष्क्राम-प्रासादिकम् अन्तरम् ध्रुवायोग-समन्वितं पञ्चविधं गानं ज्ञेयम् |

अर्थ - प्रवेशक, आक्षेपक, प्रासादिक, आंतर, निष्क्राम अशी पाच प्रकारची गाणी ध्रुवेच्या संयोगाने तयार होतात .

## ❖ रंगमंच ❖

चतुरश्रो विकृष्टश्च रङ्गस्त्र्यश्रश्च कीर्तित: ‖ ३० ‖

पदच्छेद : - चतुरश्र: विकृष्ट: च रङ्ग: त्र्यश्र: च कीर्तित: ‖ ३० ‖

अन्वय : - चतुरश्र:, विकृष्ट:, त्र्यश्र: च रङ्ग: कीर्तित: |

अर्थ - चौकोनी, आयताकृती आणि त्रिकोणी आकाराचे तीन प्रकारचे रंगमंडप म्हणजेच नाट्यगृहे सांगितली आहेत .

एवमेषोऽल्पसूत्रार्थो निर्दिष्टो नाट्यसंग्रह: |
अत: परं प्रवक्ष्यामि सूत्रग्रन्थविकल्पनम् ‖ ३१ ‖

पदच्छेद : - एवम् एष: अल्प-सूत्र-अर्थ: निर्दिष्ट: नाट्यसंग्रह: |
अत: परं प्रवक्ष्यामि सूत्र-ग्रन्थ-विकल्पनम् ‖ ३१ ‖

अन्वय : - एवम् एष: अल्पसूत्रार्थ: नाट्यसंग्रह: निर्दिष्ट: | अत: परं सूत्रग्रन्थविकल्पनं प्रवक्ष्यामि |

अर्थ - याप्रकारे थोडक्यात सूत्ररूपामध्ये (लक्षणासह) नाट्याचा संग्रह (नाट्याचा उद्देश) सांगितला आहे . ह्यानंतर संक्षिप्त रूपाने संग्रह केलेल्या विषयांची लक्षणे भाष्याद्वारे विस्तारपूर्वक विवेचन करत आहे .

❖ 'रस'संकल्पनेचे विवेचन ❖

तत्र रसानेव तावदादावभिव्याख्यास्याम:|

न हि रसादृते कश्चिदर्थ: प्रवर्तते|

तत्र विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति:|

को दृष्टान्त: | अत्राह-यथा हि नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्ति: तथा नानाभावोपगमाद्रसनिष्पत्ति:| यथा हि - गुडादिभिर्द्रव्यैर्व्यञ्जनैरौषधिभिश्च षाडवादयो रसा निर्वर्त्यन्ते तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति| अत्राह - रस इति क: पदार्थ: | उच्यते-आस्वाद्यत्वात् | कथमास्वाद्यते रस: | यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनस: पुरुषा हर्षादींश्चाधिगच्छन्ति तथा नानाभावाभिनयव्यञ्जितान् वागसत्वोपेतान् स्थायिभावानास्वादयन्ति सुमनस: प्रेक्षका: हर्षादींश्चाधिगच्छन्ति| तस्मान्नाट्यरसा इत्यभिव्याख्याता:|

अत्रानुवश्यौ श्लोकौ भवत: -

पदच्छेद: - तत्र रसान् एव तावत् आदौ अभिव्याख्यास्याम:|

न हि रसात् ऋते कश्चित् अर्थ: प्रवर्तते|

तत्र विभाव-अनुभाव-व्यभिचारि-संयोगात् रसनिष्पत्ति:|

क: दृष्टान्त:| अत्र आह -

यथा हि नाना-व्यञ्जन-ओषधि-द्रव्य-संयोगात् रसनिष्पत्ति: तथा नाना-भाव-उपगमात् रसनिष्पत्ति: | यथा हि - गुडादिभि: द्रव्यै: व्यञ्जनै: ओषधिभि: च षाडवादय: रसा: निर्वर्त्यन्ते तथा नाना-भाव-उपगता: अपि स्थायिन: भावा: रसत्वम् आप्नुवन्ति इति| अत्र आह - रस: इति क: पदार्थ:| उच्यते - आस्वाद्यत्वात्| कथम् आस्वाद्यते रस:| यथा हि नाना-व्यञ्जन-संस्कृतम् अन्नं भुञ्जाना: रसान् आस्वादयन्ति सुमनस: पुरुषा: हर्षादीन् च अधिगच्छन्ति तथा नाना-भाव-अभिनय-व्यञ्जितान् वाग्-अङ्ग-सत्त्व-उपेतान् स्थायिभावान् आस्वादयन्ति सुमनस: प्रेक्षका: हर्षादीन् च अधिगच्छन्ति | तस्मात् नाट्यरसा: इति अभिव्याख्याता: | अत्र अनुवश्यौ श्लोकौ भवत:|

अर्थ - गद्य - इथे (संग्रहामध्ये) सर्वात प्रथम मी 'रस' या विषयाचे विवेचन आता करीन. कारण रसाशिवाय नाट्याचा दुसरा कोणताही अर्थ व्यक्त होऊ शकत नाही. विभाव, अनुभाव आणि व्यभिचारीभावाच्या संयोगाने रसाची निर्मिती होते. इथे उदाहरण कोणते आहे? तर असं सांगितलं जातं की, ज्याप्रमाणे विविध प्रकारच्या खाद्यपदार्थांनी व औषधांच्या संयोगाने रसांची उत्पत्ती होते, त्याचप्रमाणे अनेक भावांच्या संयोगाने रसनिर्मिती होते. जसे गूळ वगैरे द्रव्यांनी आणि खाद्यपदार्थांनी व औषधाद्वारे षाडव (पानक रस) इ. रस उत्पन्न होतात त्याचप्रमाणे वेगवेगळ्या अनेक प्रकारच्या भावनिर्मितीने स्थायीभावाला रसत्व प्राप्त होते.

प्रश्न - रस म्हणजे कोणता पदार्थ ?

उत्तर - आस्वाद्य असल्याकारणाने त्यास 'रस' असे संबोधितात.

प्रश्न - रसाचा आस्वाद कोणत्या प्रकारे घेतला जातो?

उत्तर - ज्याप्रकारे विविध प्रकारच्या व्यंजनाने युक्त असे अन्न खाऊन रसाचा आस्वाद घेत सज्जन माणसे आनंदित होतात, त्याचप्रमाणे वेगवेगळ्या भावाच्या आणि अभिनयाद्वारे व्यक्त केलेल्या वाचिक, आंगिक व सात्त्विक अभिनयाने युक्त स्थायी भावांचा सहृदय प्रेक्षक आस्वाद घेतात आणि आनंद प्राप्त करतात. ह्यालाच नाट्यातून उत्पन्न होणारा 'नाट्यरस' असे म्हणतात. ह्या विषयावर परंपरेने दोन श्लोक आलेले आहेत.

यथा बहुद्रव्ययुतैर्व्यञ्जनैर्बहुभिर्युतम् ।
आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः ॥ ३२ ॥
भावाभिनयसंबद्धान्स्थायिभावांस्तथा बुधाः ।
आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः ॥ ३३ ॥

पदच्छेद :- यथा बहु-द्रव्य-युतैः व्यञ्जनैः बहुभिः युतम् ।
आस्वादयन्ति भुञ्जानाः भक्तं भक्तविदः जनाः ॥ ३२ ॥
भाव-अभिनय-संबद्धान् स्थायिभावान् तथा बुधाः ।
आस्वादयन्ति मनसा तस्मात् नाट्यरसाः स्मृताः ॥ ३३ ॥

अन्वय: - यथा भक्तविद: जना: बहुद्रव्ययुतै: बहुभि: व्यञ्जनै: युतम् भक्तं भुञ्जाना: आस्वादयन्ति तथा बुधा: भाव-अभिनय-संबद्धान् स्थायिभावान् मनसा आस्वादयन्ति तस्मात् नाट्यरसा: स्मृता:|

अर्थ - ज्याप्रमाणे भोजनाविषयीचे ज्ञान असणारे लोक विविध द्रव्य आणि व्यंजनांनी युक्त भात खाऊन त्याचा आस्वाद घेतात, त्याचप्रमाणे विविध भाव आणि अभिनयाशी संबंधित स्थायी भावांचा सहृदय पुरुष मनापासून आस्वाद घेतो म्हणूनच त्यांना 'नाट्यरस' असे म्हटले आहे.

अत्राह- किं रसेभ्यो भावानामभिनिर्वृत्तिरुताहो भावेभ्यो रसानामिति | केषाञ्चिन्मतं परस्परसम्बन्धादेषामभिनिर्वृत्तिरिति | तन्न | कस्मात् | दृश्यते हि भावेभ्यो रसानामभि निवृत्तिर्न तु रसेभ्यो भावानामभिनिर्वृत्तिरिति | भवन्ति चात्र श्लोका: -

पदच्छेद: - अत्र आह - किं रसेभ्य: भावानाम् अभिनिर्वृत्ति: उत अहो भावेभ्य: रसानाम् इति । केषाञ्चित् मतं परस्पर-सम्बन्धात् एषाम् अभिनिर्वृत्ति: इति | तत् न | कस्मात् | दृश्यते हि भावेभ्य: रसानाम् अभिनिर्वृत्ति: न तु रसेभ्य: भावानाम् अभिनिर्वृत्ति: इति | भवन्ति च अत्र श्लोका: -

अर्थ - प्रश्न - रसापासून भावांची उत्पत्ती होते कि भावांपासून रसाची?
उत्तर - त्याविषयी एका मतानुसार एक परस्परसंबंधाने ह्याची उत्पत्ती होते. हे शक्य नाही कारण भावातून रसाची उत्पत्ती स्पष्टपणे दिसते, परंतु रसातून भावाची उत्पत्ती दिसत नाही. ह्याविषयी पुढील श्लोक सांगितले आहेत.

## ❖ रससूत्र ❖

नानाभिनयसम्बद्धान्भावयन्ति रसानिमान् |
यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभि: || ३४ ||

पदच्छेद: - नाना-अभिनय-सम्बद्धान् भावयन्ति रसान् इमान् |
यस्मात् तस्मात् अमी भावा: विज्ञेया: नाट्ययोक्तृभि: || ३४ ||

अन्वय: - यस्मात् नाना-अभिनय-सम्बद्धान् इमान् रसान् भावयन्ति | तस्मात् अमी भावा: नाट्ययोक्तृभि: विज्ञेया: |

अर्थ - वेगवेगळ्या प्रकारच्या अभिनयाशी संबंधित असणारे जे रसांना भावित करतात त्यांना नाट्यप्रयोग जाणणाऱ्यांनी 'भाव' असे म्हटले आहे.

### ❖ रस आणि भावांचा संबंध ❖

नानाद्रव्यैर्बहुविधैर्व्यञ्जनं भाव्यते यथा |
एवं भावा भावयन्ति रसानभिनयै: सह || ३५ ||

पदच्छेद: - नानाद्रव्यै: बहुविधै: व्यञ्जनं भाव्यते यथा |
एवं भावा: भावयन्ति रसान् अभिनयै: सह || ३५ ||

अन्वय: - यथा बहुविधै: नानाद्रव्यै: व्यञ्जनं भाव्यते एवं भावा: अभिनयै: सह रसान् भावयन्ति |

अर्थ - ज्याप्रमाणे वेगवेगळया प्रकारच्या पदार्थांद्वारे चविष्ट भोजनपदार्थ तयार होतो, त्याचप्रमाणे भाव हे अभिनयासह मिळून रसांची निर्मिती करतात.

न भावहीनोऽस्ति रसो न भावो रसवर्जित: |
परस्परकृता सिद्धिस्तयोरभिनये भवेत् || ३६ ||

पदच्छेद: - न भाव-हीन: अस्ति रस: न भाव: रस-वर्जित: |
परस्पर-कृता सिद्धि: तयो: अभिनये भवेत् || ३६ ||

अन्वय: - भावहीन: रस: न अस्ति | रसवर्जित: भाव: न अस्ति | अभिनये तयो: परस्परकृता सिद्धि: भवेत् |

अर्थ - भावाशिवाय रस नाही आणि रसाशिवाय भाव नाही. अभिनयामध्ये एकमेकांच्या आश्रयाने त्यांना सिद्धी प्राप्त होते.

व्यञ्जनौषधिसंयोगो यथाऽन्नं स्वादुतां नयेत् |
एवं भावा रसाश्चैव भावयन्ति परस्परम् || ३७ ||

पदच्छेद: - व्यञ्जन-ओषधि-संयोग: यथा अन्नं स्वादुतां नयेत्।
एवं भावा: रसा: च एव भावयन्ति परस्परम्॥ ३७॥

अन्वय: - यथा व्यञ्जन-ओषधिसंयोग: अन्नं स्वादुतां नयेत् एवं भावा: रसा: च एव परस्परं भावयन्ति।

अर्थ - व्यंजन आणि औषधी ह्यांचा संयोग भोजनाला चविष्ट बनवितो, त्याचप्रमाणे भाव आणि रस परस्परांना भावित करतात.

यथा बीजाद्भवेद्वृक्षो वृक्षात्पुष्पं फलं यथा।
तथा मूलं रसा: सर्वे तेभ्यो भावा व्यवस्थिता:॥ ३८॥
तदेषां रसानामुत्पत्तिवर्णदैवतनिदर्शनान्यभिव्याख्यास्याम:।

पदच्छेद: - यथा बीजात् भवेत् वृक्ष: वृक्षात् पुष्पं फलं यथा।
तथा मूलं रसा: सर्वे तेभ्य: भावा: व्यवस्थिता: ॥ ३८॥
तत् एषां रसानाम् उत्पत्तिवर्ण-दैवत-निदर्शनानि अभिव्याख्यास्याम:।

अन्वय: - यथा बीजात् वृक्ष: भवेत् यथा वृक्षात् पुष्पं फलं तथा सर्वे रसा: मूलं (वर्तते), तेभ्य: रसेभ्य: भावा: व्यवस्थिता: । तत् एषां रसानाम् उत्पत्तिवर्ण-दैवत-निदर्शनानि अभिव्याख्यास्याम:।

अर्थ - ज्याप्रमाणे बीजातून वृक्ष निर्माण होतो आणि वृक्षातून फुले व फळे येतात, त्याचप्रमाणे समस्त रस हे मूळ आहेत आणि त्यांच्याप्रमाणेच भावांची व्यवस्था होते. आता या रसांची निर्मिती, वर्ण, देवता आणि उदाहरणे यांविषयी सांगतो.

तेषामुत्पत्तिहेतवश्चत्वारो रसा:।
तद्यथा- शृङ्गारो रौद्रो वीरो बीभत्स इति। अत्र-

पदच्छेद: - तेषाम् उत्पत्ति-हेतव: चत्वार: रसा:। तत् यथा - शृङ्गार: रौद्र: वीर: बीभत्स: इति। अत्र -

अन्वय: - तेषाम् चत्वार: रसा: उत्पत्तिहेतव: सन्ति। तत् यथा - शृङ्गार: रौद्र: वीर: बीभत्स: इति। अत्र -

अर्थ - यांमध्ये चार रस हे मूळ असतात, ते म्हणजे शृंगार, रौद्र, वीर, बीभत्स.

## ❖ रसांचा उत्पाद्य-उत्पादकभाव ❖

शृङ्गाराद्धि भवेद्धास्यो रौद्राच्च करुणो रस:।
वीराच्चैवाद्भुतोत्पत्तिर्बीभत्साच्च भयानक:॥ ३९ ॥

पदच्छेद :- शृङ्गारात् हि भवेत् हास्य: रौद्रात् च करुण: रस:।
वीरात् च एव अद्भुत-उत्पत्ति: बीभत्सात् च भयानक:॥ ३९ ॥

अन्वय: - शृङ्गारात् हि हास्य: भवेत्, रौद्रात् च करुण: रस:, वीरात् अद्भुत-उत्पत्ति:, बीभत्सात् भयानक: भवेत्।

अर्थ - शृंगारातून हास्य तर रौद्र रसातून करुण रसाची निर्मिती होते . वीर रसातून अद्भुत तसेच बीभत्स रसातून भयानक रसाची निर्मिती होते .

शृङ्गारानुकृतिर्या तु स हास्यस्तु प्रकीर्तित:।
रौद्रस्यैव च यत्कर्म स ज्ञेय: करुणो रस: ॥ ४० ॥

पदच्छेद :- शृङ्गार-अनुकृति: या तु स: हास्य: तु प्रकीर्तित:।
रौद्रस्य एव च यत्कर्म स ज्ञेय: करुण: रस: ॥ ४० ॥

अन्वय: - या शृङ्गार-अनुकृति: स: हास्य: प्रकीर्तित:। रौद्रस्य एव च यत् कर्म स: करुण: रस: ज्ञेय: ।

अर्थ - शृंगाराच्या अनुकरणाला 'हास्य' म्हटले आहे आणि रौद्र रसाच्या क्रियेच्या परिणामास 'करुण' रस मानले गेले आहे .

वीरस्यापि च यत्कर्म सोऽद्भुत: परिकीर्तित:।
बीभत्सदर्शनं यच्च ज्ञेय: स तु भयानक:॥ ४१ ॥

पदच्छेद :- वीरस्य अपि च यत्कर्म स: अद्भुत: परिकीर्तित:।
बीभत्सदर्शनं यत् च ज्ञेय: स: तु भयानक:॥ ४१ ॥

अन्वय: - वीरस्य यत् कर्म स: अद्भुत: परिकीर्तित:। बीभत्सदर्शनं यत् स: भयानक: ज्ञेय:।

अर्थ - वीर रसाच्या कर्माला 'अद्भुत' म्हटले असे म्हटले आहे आणि बीभत्स रसाचे दर्शन होते त्याला 'भयानक' समजले पाहिजे .

## ❖ रसांचे रंग ❖

श्यामो भवति शृङ्गारः सितो हास्यः प्रकीर्तितः।
कपोतः करुणश्चैव रक्तो रौद्रः प्रकीर्तितः॥ ४२॥

पदच्छेदः - अथ वर्णाः - श्यामः भवति शृङ्गारः सितः हास्यः प्रकीर्तितः।
कपोतः करुणः च एव रक्तः रौद्रः प्रकीर्तितः॥ ४२॥

अन्वयः - शृङ्गारः श्यामः भवति हास्यः सितः प्रकीर्तितः। करुणः कपोतः रौद्रः रक्तः च प्रकीर्तितः।

अर्थ - ह्यानंतर वर्णाविषयी - शृंगार रसाचा रंग श्याम आणि हास्य रसाचा रंग शुक्ल (पांढरा)सांगितला आहे. करुण रसाचा रंग कपोत (राखाडी) तर रौद्र रसाचा रंग लाल सांगितला आहे.

गौरो वीरस्तु विज्ञेयः कृष्णश्चैव भयानकः :।
नीलवर्णस्तु बीभत्सः पीतश्चैवाद्भुतः स्मृतः॥ ४३॥

पदच्छेदः - गौरः वीरः तु विज्ञेयः कृष्णः च एव भयानकः।
नीलवर्णः तु बीभत्सः पीतः च एव अद्भुतः स्मृतः॥ ४३॥

अन्वयः - वीरः गौरः विज्ञेयः भयानकः कृष्णः बीभत्सः नीलवर्णः अद्भुतः पीतः स्मृतः।

अर्थ - वीर रसाचा वर्ण गोरा व भयानक रसाचा रंग काळा, बीभत्साचा रंग निळा आणि अद्भुत रसाचा रंग पिवळा सांगितला आहे.

## ❖ रसांच्या देवता ❖

अथ दैवतानि -

शृङ्गारो विष्णुदैवत्यो हास्यः प्रमथदैवतः।
रौद्रो रुद्राधिदैवत्यः करुणो यमदैवतः ॥ ४४॥

पदच्छेदः - अथ दैवतानि - शृङ्गारः विष्णुदैवत्यः हास्यः प्रमथदैवतः।
रौद्रः रुद्र-अधिदैवत्यः करुणः यमदैवतः ॥ ४४॥

अन्वय: - अथ दैवतानि - विष्णुदैवत्य: शृङ्गार: प्रमथदैवत: हास्य: रुद्राधिदैवत्य: रौद्र: यमदैवत: करुण: अस्ति |

अर्थ - त्यानंतर देवतांचे वर्णन - शृंगाराची देवता विष्णू, हास्यरसाची देवता प्रमथ, रौद्ररसाची देवता रूद्र, करुण रसाची देवता यम आहे .

बीभत्सस्य महाकाल: कालदेवो भयानक: |
वीरो महेन्द्रदेव: स्याददभुतो ब्रह्मदैवत: || ४५ ||

पदच्छेद: - बीभत्सस्य महाकाल: कालदेव: भयानक: |
वीर: महेन्द्रदेव: स्यात् अद्भुत: ब्रह्मदैवत: || ४५ ||

अन्वय: - बीभत्सस्य महाकाल: भयानक: कालदेव: वीर: महेन्द्रदेव: अद्भुत: ब्रह्मदैवत: स्यात् |

अर्थ - बीभत्स रसाची देवता महाकाल आहे आणि भयानक रसाची देवता काल आहे . वीर रसाची देवता इंद्र आणि अद्भुत रसाची देवता ब्रह्मा आहे .

एवमेतेषां रसानामुत्पत्तिवर्णदेवतान्यभिव्याख्यातानि | इदानीमनुभावविभावव्यभिचारि संयुक्तानां लक्षणं निदर्शनान्यभिव्याख्यास्याम: | स्थायिभावांश्च रसत्वमुपनेष्याम: |

पदच्छेद: - एवम् एतेषां रसानाम् उत्पत्ति-वर्ण-दैवतानि अभिव्याख्यातानि | इदानीम् अनुभाव-विभाव-व्यभिचारि-संयुक्तानां लक्षण-निदर्शनानि अभिव्याख्यास्याम: | स्थायिभावान् च रसत्वम् उपनेष्याम: |

अर्थ - याप्रमाणे रसाची उत्पत्ती, वर्ण तसेच देवतांची माहिती दिली आहे . आता विभाव, अनुभाव आणि व्यभिचारी भावाने युक्त अशा ह्या रसांची लक्षणे आणि उदाहरणे तुम्हाला सांगतो . तसेच स्थायीभावांना रसापर्यंत नेऊया .

## ❖ शृंगार रस ❖

तत्र शृङ्गारो नाम रतिस्थायिभावप्रभव: | उज्ज्वलवेषात्मक: | यत्किञ्चिल्लोके शुचि मेध्यमुज्ज्वलं दर्शनीयं वा तच्छृङ्गारेणोपमीयते | यस्तावदुज्ज्वलवेष: स शृङ्गारवानित्युच्यते | यथा च गोत्रकुलाचारोत्पन्नान्याप्तोपदेशसिद्धानि पुंसां नामानि

भवन्ति तथैवैषां रसानां भावानां च नाट्याश्रितानां चार्थानामाचारोत्पन्नान्याप्तोपदेश-सिद्धानि नामानि | एवमेष आचारसिद्धो हृद्योज्ज्वलवेषात्मकत्वाच्छृङ्गारो रस: | स च स्त्रीपुरुषहेतुक उत्तमयुवप्रकृति:|

पदच्छेद:- तत्र शृङ्गार: नाम रति-स्थायिभाव-प्रभव: | उज्ज्वल-वेषात्मक: | यत् किञ्चित् लोके शुचि मेध्यम् उज्ज्वलं दर्शनीयं वा तत् शृङ्गारेण उपमीयते | य: तावत् उज्ज्वल-वेष: स: शृङ्गारवान् इति उच्यते | यथा च गोत्र-कुल-आचार-उत्पन्नानि आप्त-उपदेश-सिद्धानि पुंसां नामानि भवन्ति तथा एव एषां रसानां भावानां च नाट्य-आश्रितानां च अर्थानाम् आचार-उत्पन्नानि आप्त-उपदेश-सिद्धानि नामानि | एवम् एष: आचारसिद्ध: हृद्य-उज्ज्वल-वेषात्मकत्वात् शृङ्गार: रस: | स: च स्त्रीपुरुष-हेतुक: उत्तम-युव-प्रकृति:|

अर्थ - शृंगाररस - शृंगाररस हा 'रती' ह्या स्थायीभावातून उत्पन्न होतो . ह्यात उज्ज्वल वेषाचा वापर सांगितला आहे . कारण तिन्ही लोकांमध्ये जे काही पवित्र, शुद्ध, सरळ आणि दर्शनीय आहे त्यास शृंगाराची उपमा दिली जाते . जो उज्ज्वल वेष परिधान करतो त्यास शृंगारवान असे म्हणतात . ज्याप्रमाणे गोत्र, कुळाची प्रथा आणि आचाराने उत्पन्न नावे असतात, तसेच गुरुजनांच्या कथनांनी (सांगण्याने) लोकांची नावे सिद्ध असतात, त्याचप्रकारे रस, भाव आणि नाट्याश्रित पदार्थांची नावे सुद्धा आचार, व्यवहार आणि गुरूजनांच्या उपदेशाने ही नामे सिद्ध होतात . अशा प्रकारे उज्ज्वलवेषधारी आचारसिद्ध असलेल्या ह्यास 'शृंगार रस' असे म्हटले आहे .

स्त्रीपुरूष हे शृंगाररसाचे मूळ कारण आहे आणि हा शृंगार उत्तम युवक आणि युवतींच्या स्वभावाशी निगडित आहे .

तस्य द्वे अधिष्ठाने सम्भोगो विप्रलम्भश्च | तत्र सम्भोगस्तावत् ऋतु-माल्य-अनुलेपन-अलङ्कार-इष्टजन-विषय-वरभवन-उपभोग-उपवनगमन-अनुभवनश्रवणदर्शनक्रीडालीलादिभि-विभावै: उत्पद्यते |

पदच्छेद:- तस्य द्वे अधिष्ठाने सम्भोग: विप्रलम्भ: च | तत्र सम्भोग: तावत् ऋतु-माल्य-अनुलेपन-अलङ्कार-इष्टजन-विषय-वरभवन-उपभोग-उपवनगमन-अनुभवन-श्रवण-दर्शन-क्रीडा-लीलादिभि: विभावै: उत्पद्यते |

अर्थ - शृंगाररसाच्या दोन अवस्था सांगितल्या आहेत . संभोग आणि विप्रलंभ . ह्यात संभोग शृंगार हा ऋतू, माळा, अनुलेपन (मेकअप), अलंकार, आप्तजन, प्रिय विषय तसेच सुंदर भवन वगैरेंचा उपभोग, उपवनगमन, अनुभवन, श्रवण, दर्शन, क्रीडा आणि लीला इ . विभावांद्वारे उत्पन्न होतो .

तस्य नयनचातुर्यभ्रूक्षेपकटाक्षसञ्चारललितमधुराङ्गहारवाक्यादिभिरनुभावैरभिनय: प्रयोक्तव्य:|व्यभिचारिणश्चास्यालस्यौग्र्यजुगुप्सावर्ज्या:| विप्रलम्भकृतस्तुनिर्वेदग्लानि शङ्कासूयाश्रमचिन्तौत्सुक्यनिद्रास्वप्नविबोधव्याध्युन्मादापस्मारजाड्यमरणादिभि-रनुभावैरभिनेतव्य:|

पदच्छेद:- तस्य नयनचातुर्य-भ्रूक्षेप-कटाक्ष-सञ्चार-ललित-मधुर-अङ्गहार-वाक्यादिभि: अनुभावै: अभिनय: प्रयोक्तव्य: | व्यभिचारिण: च अस्य आलस्य-औग्र्य-जुगुप्सा-वर्ज्या:| विप्रलम्भकृत: तु निर्वेद-ग्लानि-शङ्का-असूया-श्रम-चिन्ता-औत्सुक्य-निद्रा-स्वप्न-विबोध-व्याधि-उन्माद-अपस्मार-जाड्य-मरणादिभि: अनुभावै: अभिनेतव्य:|

अर्थ - त्याचा अभिनय डोळ्यांच्या चातुर्याने, भुवयांच्या चलनाने, तसेच नेत्रकटाक्ष संचाराने ललित व मधुर अंगहारांनी तसेच कोमल व मधुर वाक्यांचा प्रयोग इ . अनुभवांद्वारे करावा . आळस, उग्रता आणि जुगुप्सा सोडून बाकी सर्व व्यभिचारी भाव शृंगारात केले जातात . विप्रलंभ शृंगाराचा अभिनय निर्वेद ,ग्लानी, शंका, असूया, श्रम, चिंता, औत्सुक्य, निद्रा, स्वप्न, विबोध, व्याधी, उन्माद, अपस्मार, जडता, मरण इ . अनुभावांद्वारे करावा असे सांगितले आहे .

अत्राह - यद्ययं रतिप्रभव: शृङ्गार: कथमस्य करुणाश्रयिणो भावा भवन्ति|
अत्रोच्यते - पूर्वमेवाभिहितं सम्भोगविप्रलम्भकृत: शृङ्गार इति | वैशिकशास्त्रकारैश्च दशावस्थोऽभिहित:|ताश्च सामान्याभिनये वक्ष्याम:|

पदच्छेद:- अत्र आह - यदि अयं रतिप्रभव: शृङ्गार: (तर्हि) कथम् अस्य करुण-आश्रयिण: भावा: भवन्ति | अत्र उच्यते - पूर्वम् एव अभिहितं सम्भोग-विप्रलम्भ-कृत: शृङ्गार: इति | वैशिक-शास्त्रकारै: च दश-अवस्थ: अभिहित: | ता: च सामान्य-अभिनये वक्ष्याम:|

अर्थ - प्रश्न - जर शृंगार रस हा 'रति' ह्या स्थायीभावातून निर्माण होतो तर करूण रसाला आश्रित असणारे निर्वेद, ग्लानी इ. अनुभाव शृंगाररसाच्या बाबतीत कसे होऊ शकतात? उत्तर - इथे पूर्वीच सांगितले आहे, की शृंगार दोन प्रकारचे असतात. संभोग आणि विप्रलंभ. कामशास्त्राच्या आचार्यांनी शृंगाराच्या दहा अवस्था सांगितल्या आहेत. सामान्य अभिनयाच्यावेळी ह्या विषयी मी सांगेन.

करुणस्तु शापक्लेशविनिपतितेष्टजनविभवनाशवधबन्धसमुत्थो निरपेक्षभावः | औत्सुक्यचिन्तासमुत्थः सापेक्षभावो विप्रलम्भकृतः | एवमन्यः करुणोऽन्यश्च विप्रलम्भ इति | एवमेष सर्वभाव-संयुक्तः शृङ्गारो भवति | अपि च

पदच्छेदः - करुणः तु शाप-क्लेश-विनिपतित-इष्टजन-विभव-नाश-वध-बन्ध-समुत्थः निरपेक्षभावः | औत्सुक्य-तिचन-समुत्थः सापेक्षभावः विप्रलम्भकृतः |
एवम् अन्यः करुणः अन्यः च विप्रलम्भः इति | एवम् एषः सर्वभावसंयुक्तः शृङ्गारः भवति | अपि च -

अर्थ - शापामुळे दु:खाच्या गर्तेत गेलेल्या नातेवाईकांच्या वैभवाचा नाश, वध किंवा बंधनामुळे उत्पन्न झालेला निरपेक्ष भावरूप तो करुण रस आहे. उत्सुकता आणि चिंता यांनी उत्पन्न झालेला सापेक्ष भाव म्हणजे विप्रलंभ शृंगार होय.
अशाप्रकारे, करुण रस निरपेक्ष असतो आणि विप्रलंभ शृंगार सापेक्ष असतो. म्हणून करुण रस वेगळा आणि विप्रलंभ शृंगार वेगळा आहे. अशाप्रकारे सर्व भावांनी युक्त असा हा शृंगाररस आहे.

सुखप्रायेषु सम्पन्नः ऋतुमाल्यादिसेवकः |
पुरुषः प्रमदायुक्तः शृङ्गार इति संज्ञितः || ४६ ||

पदच्छेदः - सुख-प्रायेषु सम्पन्नः ऋतु-माल्य-आदि-सेवकः |
पुरुषः प्रमदा-युक्तः शृङ्गारः इति संज्ञितः || ४६ ||

अन्वयः - सुखप्रायेषु सम्पन्नः ऋतुमाल्यादिसेवकः प्रमदायुक्तः पुरुषः शृङ्गारः इति संज्ञितः|

अर्थ - ज्यामध्ये सुख देणाऱ्या प्रिय वस्तू असतात. ऋतू आणि माळा आदींचा वापर केला जातो. स्त्रीपुरुषांचे मिलन दाखविले जाते, त्यास 'शृंगार' अशी संज्ञा दिली आहे.

अपि चात्र सूत्रार्थानुविद्धे आर्ये भवतः|
ऋतुमाल्यालङ्कारैः प्रियजनगान्धर्वकाव्यसेवाभिः|
उपवनगमनविहारैः शृङ्गाररसः समुद्भवति || ४७ ||

पदच्छेदः - अपि च अत्र सूत्रार्थ-अनुविद्धे आर्ये भवतः|
ऋतु-माल्य-अलङ्कारैः प्रियजन-गान्धर्व-काव्य-सेवाभिः|
उपवन-गमन-विहारैः शृङ्गाररसः समुद्भवति || ४७ ||

अर्थ - तसेच या सूत्रात्मक वाक्याच्या अर्थाशी निगडीत दोन आर्या सांगत आहे.
ऋतू, माळा, अलंकार (दागिने), प्रियजन (मित्र इ.), गांधर्व (शब्द, गीत किंवा आकर्षक विषय), काव्यसेवा (कथावस्तूचा विषय), उपवनात फिरणे तसेच विहार इत्यादींनी शृंगाररसाची उत्पत्ती होते.

नयनवदनप्रसादैः स्मितमधुरवचोधृतिप्रमोदैश्च|
मधुरैश्चाविहारैस्तस्याभिनयः प्रयोक्तव्यः || ४८ ||

पदच्छेदः - नयन-वदन-प्रसादैः स्मित-मधुर-वचः-धृति-प्रमोदैः च|
मधुरैः च अङ्गविहारैः तस्य अभिनयः प्रयोक्तव्यः || ४८ ||

अन्वयः - नयनवदनप्रसादैः स्मितमधुरवचोधृतिप्रमोदैः मधुरैः च अङ्गविहारैः तस्य अभिनयः प्रयोक्तव्यः|

अर्थ - डोळे व चेहऱ्यावरील प्रसन्नता, स्मित (हसणे) व गोड बोलणे, धृती (समाधान) व प्रमोद (आनंदाने) आणि अंगाच्या मधुर हालचालीने ह्या शृंगाररसाचा अभिनय केला पाहिजे.

(अत्र शृङ्गारप्रकरणं समाप्तम् |)
(येथे शृंगाररसप्रकरण संपले)

❖ हास्य रस ❖

अथ हास्यो नाम हासस्थायिभावात्मकः|
स च विकृतपरवेषालङ्कारधाष्ट्र्यलौल्यकुहकासत्प्रलापव्यङ्गदर्शन - दोषोदाहरणादिभिर्विभावैरुत्पद्यते | तस्योष्ठनासाकपोलस्पन्दनदृष्टिव्याकोशाकुञ्चन स्वेदास्यरागपार्श्वग्रहणादिभिरनुभावैरभिनयः प्रयोक्तव्यः|
व्यभिचारिणश्चास्यावहित्थालस्यतन्द्रानिद्रास्वप्नप्रबोधासूयादयः| द्विविधश्चायमात्मस्थः परस्थश्च|यदा स्वयं हसति तदाऽऽत्मस्थः|यदा तु परं हासयति तदा परस्थः|

पदच्छेदः - अथ हास्यः नाम हास-स्थायि-भावात्मकः । सः च विकृत-परवेष-अलङ्कार-धाष्ट्र्य-लौल्य-कुहक-असत्प्रलाप-व्यङ्गदर्शन-दोष-उदाहरणादिभिः विभावैः उत्पद्यते|
तस्य ओष्ठ-नासा-कपोल-स्पन्दन-दृष्टि-व्याकोश-आकुञ्चन-स्वेद-आस्य-राग-पार्श्व ग्रहण-आदिभिः अनुभावैः अभिनयः प्रयोक्तव्यः|
व्यभिचारिणः च अवहित्थ-आलस्य-तन्द्रा-निद्रा-स्वप्न-प्रबोध-असूया-आदयः|
द्विविधः च अयम् आत्मस्थः परस्थः च | यदा स्वयं हसति तदा आत्मस्थः | यदा तु परं हासयति तदा परस्थः|

अर्थ - (ह्यानंतर हास्य रसाचे प्रकरण सुरू होत आहे.)

हास ज्याचा स्थायीभाव आहे, तो म्हणजे हास्य रस. हा हास्य रस दुसऱ्यांचे विकृत वेष, अलंकार, धृष्टता, लोलुपता, कुहक (कुत्सित हसणे किंवा काखेला किंवा गळ्याला स्पर्श करणे), असंगत बडबडणे, व्यंग दर्शविणे (विकलांगत्व दाखविणे) तसेच दोषरूपी उदाहरणे इत्यादी विभावांनी उत्पन्न होतो.

ह्या हास्यरसाचा अभिनय ओठ, नाक व गालाचे कंपन करून दाखविणे, डोळे उघडबंद करणे (डोळ्यांची उघडझाप करणे), घाम पुसणे, चेहऱ्यावरचा रंग बदलणे तसेच बाजू धरणे इत्यादी अनुभवांद्वारे करावा.

ह्याचे व्यभिचारी भाव अवहित्थ (भाव लपविणे), आळस, तंद्रा, निद्रा, स्वप्न, प्रबोध तसेच असूया इत्यादी आहेत.

हास्यरस हा दोन प्रकारचा आहे १. आत्मस्थ २.परस्थ. जेव्हा स्वतः हसतो तेव्हा तो 'आत्मस्थ' आणि जेव्हा दुसऱ्याला हसवितो तेव्हा तो 'परस्थ' म्हटला गेला आहे.

अत्रानुवंश्ये आर्ये भवतः।
विपरीतालङ्कारैर्विकृताचाराभिधानवेषैश्च।
विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हास्यः॥ ४९ ॥

पदच्छेदः - अत्र आनुवंश्ये आर्ये भवतः।
विपरीत-अलङ्कारैः विकृत-आचार-अभिधान-वेषैः च ।
विकृतैः अर्थविशेषैः हसति इति रसः स्मृतः हास्यः॥ ४९ ॥

अन्वयः - अत्र आनुवंश्ये आर्ये भवतः।
विपरीत-अलङ्कारैः विकृत-आचार-अभिधान-वेषैः विकृतैः अर्थविशेषैः च हसति इति हास्यः रसः स्मृतः।

अर्थ - ह्या प्रसंगी वंशपरंपरागत चालून आलेल्या दोन आर्या आहेत, त्या सांगतो .
विपरीत अलंकार, विकृत आचरण, विकृत बोलणे तसेच विपरीत वेष परिधान करणे आणि शब्दांच्या विपरीत अर्थामुळे हसू येणे, ह्यालाच (आत्मस्थ) 'हास्यरस' असे म्हटले आहे .

विकृताचारैर्वाक्यैरङ्गविकारैश्च विकृतवेषैश्च।
हासयति जनं यस्मात्तस्माज्ज्ञेयो रसो हास्यः॥ ५० ॥

पदच्छेदः - विकृत-आचारैः वाक्यैः अङ्गविकारैः च विकृतवेषैः च।
हासयति जनं यस्मात् तस्मात् ज्ञेयः रसः हास्यः॥ ५० ॥

अन्वयः - यस्मात् विकृत-आचारैः वाक्यैः अङ्गविकारैः विकृतवेषैः च जनं हासयति तस्मात् हास्यः रसः ज्ञेयः।

अर्थ - आचरणामधील विकृती, बोलण्यातील विकृती, अंगचेष्टेमधील विकृती व वेषभूषेतील विकृती यामुळे इतरांना हसविले जाते . ह्या कारणाने ह्याला (परस्थ) 'हास्य रस' असे म्हटले आहे .

स्त्रीनीचप्रकृतावेष भूयिष्ठं दृश्यते रसः।
षड्भेदाश्चास्य विज्ञेयास्तांश्च वक्ष्याम्यहं पुनः॥ ५१ ॥

पदच्छेद: - स्त्री-नीच-प्रकृतौ एष: भूयिष्ठं दृश्यते रस:|
षड् भेदा: च अस्य विज्ञेया: तान् च वक्ष्यामि अहं पुन:||५१||

अन्वय: - एष: रस: स्त्रीनीचप्रकृतौ भूयिष्ठं दृश्यते| षड् भेदा: च अस्य विज्ञेया: तान् च अहं पुन: वक्ष्यामि|

अर्थ - हा रस मुख्यत: स्त्री व नीच प्रकृतीच्या लोकांमध्ये दिसून येतो. ह्याचे (हास्यरसाचे) सहा प्रकार आहेत. ते मी आता तुम्हांला सांगतो.

स्मितमथ हसितं विहसितमुपहसितं चापहसितमतिहसितम्|
द्वौ द्वौ भेदौ स्यातामुत्तममध्याधमप्रकृतौ ||५२||

पदच्छेद: - स्मितम् अथ हसितं विहसितम् उपहसितं च अपहसितम् अतिहसितम्|
द्वौ द्वौ भेदौ स्याताम् उत्तम-मध्य-अधमप्रकृतौ||५२||

अन्वय: - स्मितं हसितं विहसितम् उपहसितं च अपहसितम् अतिहसितम्| उत्तम-मध्य-अधमप्रकृतौ द्वौ द्वौ भेदौ स्याताम्|

अर्थ - स्मित, हसित, विहसित, उपहसित, अपहसित, अतिहसित हे हास्याचे सहा भेद आहेत. उत्तम, मध्यम तसेच अधम प्रकृतीमध्ये क्रमश: दोन-दोन भेद दिसून येतात.

तत्र -

स्मितहसिते ज्येष्ठानां मध्यानां विहसितोपहसिते च|
अधमानामपहसितं ह्यतिहसितं चापि विज्ञेयम् ||५३||

पदच्छेद: - तत्र - स्मित-हसिते ज्येष्ठानां मध्यानां विहसित-उपहसिते च|
अधमानाम् अपहसितं हि अतिहसितं च अपि विज्ञेयम्||५३||

अन्वय: - तत्र - ज्येष्ठानां स्मितहसिते मध्यानां विहसित-उपहसिते अथमानाम् अपहसितं हि अतिहसितं च विज्ञेयम्।

अर्थ - ह्यातील स्मित आणि हसित हे उत्तम प्रकृतीच्या लोकांसाठी , विहसित आणि उपहसित हे मध्यम प्रकृतीसाठी, आणि अपहसित तथा अतिहसित हे अधम प्रकृतीच्या लोकांसाठी सांगितले आहेत .

अत्र श्लोका: -
ईषद्विकसितैर्गण्डै: कटाक्षै: सौष्ठवान्वितै: |
अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत् || ५४ ||

पदच्छेद: - अत्र श्लोका: -
ईषत् विकसितै: गण्डै: कटाक्षै: सौष्ठव-अन्वितै: |
अलक्षित-द्विजं धीरम् उत्तमानां स्मितं भवेत् || ५४ ||

अन्वय: - अत्र श्लोका: -
ईषत् विकसितै: गण्डै: कटाक्षै: सौष्ठव-अन्वितै: अलक्षितद्विजं तत् उत्तमानां धीरं (हास्यं) 'स्मितं' भवेत् |

अर्थ - ह्याविषयी खालीलप्रमाणे श्लोक आहेत .
ज्यात गाल जरासे वर आलेले आणि नेत्रकटाक्ष सौष्ठवयुक्त सुंदर असतील तसेच दात दिसत नसतील ते धीर हास्य 'स्मित' म्हणून ओळखले जाते जे उत्तम प्रकृतीच्या लोकांसाठी असते .

उत्फुल्लाननेत्रं तु गण्डैर्विकसितैरथ |
किञ्चिल्लक्षितदन्तं च हसितं तद्विधीयते || ५५ ||

पदच्छेद: - उत्फुल्ल-आनन-नेत्रं तु गण्डै: विकसितै: अथ |
किञ्चित् लक्षित-दन्तं च हसितं तत् विधीयते || ५५ ||

अन्वय: - उत्फुल्ल-आनननेत्रं गण्डै: विकसितै: किञ्चित् लक्षितदन्तं च तत् 'हसितं' विधीयते |

अर्थ - ज्यात चेहरा व डोळे उत्फुल्लित असतात . गाल वर आलेले असतात तसेच दात थोडेसे दिसतात अशा ह्या हास्याला 'हसित' असे म्हटले आहे .

अथ मध्यमानाम्

आकुञ्चिताक्षिगण्डं यत्सस्वनं मधुरं तथा |
कालागतं सास्यरागं तद्वै विहसितं भवेत् || ५६ ||

पदच्छेद : - अथ मध्यमानाम् -
आकुञ्चित-अक्षिगण्डं यत् सस्वनं मधुरं तथा |
काल-आगतं स-आस्य-रागं तत् वै विहसितं भवेत् || ५६ ||

अन्वय : - अथ मध्यमानाम् -
आकुञ्चित-अक्षिगण्डं यत् सस्वनं मधुरं सास्यरागं तथा कालागतं तत् विहसितं भवेत् |

अर्थ - मध्यम प्रकृतीच्या लोकांसाठीच्या हास्याचे वर्णन -
ज्यामध्ये गाल आणि डोळे संकुचित असतात, शब्द मधुर असतात, आणि चेहरा लाल गुलाबी होतो, तसेच जो योग्य वेळी दर्शविला जातो, त्या हास्याला 'विहसित' म्हटले आहे .

उत्फुल्लनासिकं यत्तु जिह्मदृष्टिनिरीक्षितम् |
निकुञ्चिताङ्गकशिरस्तच्चोपहसितं भवेत् || ५७ ||

पदच्छेद : - उत्फुल्ल-नासिकं यत् तु जिह्म-दृष्टि-निरीक्षितम् |
निकुञ्चित-अङ्गकशिर : तत् च उपहसितं भवेत् || ५७ ||

अन्वय : - उत्फुल्लनासिकं जिह्मदृष्टिनिरीक्षितं निकुञ्जिताङ्गकशिर : तत् च उपहसितं भवेत् |

अर्थ - ज्यामध्ये नाक फुललेले असते, जिह्मदृष्टीने कुटिलदृष्टीने पाहिले जाते, तसेच अंग व मान वाकवून हसले जाते, त्या हास्याला 'उपहसित' असे म्हटले आहे .

अथाधमानाम्

अथाधमानाम् अस्थानहसितं यत्तु साश्रुनेत्रं तथैव च |
उत्कम्पितांसकशिरस्तच्चापहसितं भवेत् || ५८ ||

पदच्छेद : - अथ अधमानाम् -
अस्थान-हसितं यत् तु स-अश्रु-नेत्रं तथा एव च | उत्कम्पित-अंसकशिरः तत् च अपहसितं भवेत् |

अन्वय : - अथ अधमानाम् -
यत् अस्थानहसितं साश्रुनेत्रं तथा एव च उत्कम्पित-अंसकशिरः तत् च अपहसितं भवेत्|

अर्थ - ह्यानंतर अधमप्रकृतीच्या लोकांसाठीच्या हास्याचे वर्णन -
अयोग्य ठिकाणी हसणे, (हसता हसता) डोळ्यातून अश्रू येणे तसेच खांदे व मान हलवून हसणे ह्यास 'अपहसित' असे म्हटले आहे .

संरब्धसाश्रुनेत्रं च विकृष्टस्वरमुद्धतम् |
करोपगूढपार्श्वं च तच्चातिहसितं भवेत् || ५९ ||

पदच्छेद : - संरब्ध-स-अश्रु-नेत्रं च विकृष्ट-स्वरम् उद्धतम्|
कर-उपगूढ-पार्श्वं च तत् च अतिहसितं भवेत् || ५९ ||

अन्वय : - संरब्ध-साश्रुनेत्रं च विकृष्टस्वरं करोपगूढपार्श्वं च तत् उद्धतं हास्यम् अतिहसितं भवेत् |

अर्थ - ज्या हसण्यामध्ये डोळ्यातून अश्रू येऊन वरच्या बाजूला डोळे फिरतात, आवाज कर्कश होतो . दोन्ही हातांनी बाजूंवर आघात केला जातो, त्या उद्धट हास्याला 'अतिहसित' असे म्हटले .

हास्यस्थानानि यानि स्युः कार्योत्पन्नानि नाटके |
उत्तमाधममध्यानामेवं तानि प्रयोजयेत् || ६० ||

पदच्छेद : - हास्य-स्थानानि यानि स्युः कार्य-उत्पन्नानि नाटके |
उत्तम-अधम-मध्यानाम् एवं तानि प्रयोजयेत् || ६० ||

अन्वय : - एवं नाटके यानि कार्योत्पन्नानि हास्यस्थानानि स्युः तानि उत्तम-अधम-मध्यानाम् प्रयोजयेत्|

अर्थ - अशा प्रकारे नाट्यामध्ये कथानकाद्वारे निर्माण करण्यास योग्य अशी हास्याची ठिकाणे आहेत, ती दर्शविण्यासाठी उत्तम, मध्यम व अधम प्रकारच्या हास्याचा वापर केला पाहिजे .

इत्येष स्वसमुत्थस्तथा परसमुत्थश्च विज्ञेय:|
द्विविधस्त्रिप्रकृतिगतस्त्र्यवस्थभावो रसो हास्य:|| ६१ ||

पदच्छेद: - इति एष: स्वसमुत्थ: तथा परसमुत्थ: च विज्ञेय:|
द्विविध: त्रि-प्रकृति-गत: त्रि-अवस्थ-भाव: रस: हास्य: || ६१ ||

अन्वय: - इति एष: स्वसमुत्थ: तथा परसमुत्थ: च इति द्विविध: विज्ञेय:| त्रिप्रकृतिगत: त्रि-अवस्थ-भाव: एष: हास्य: रस: अस्ति |

अर्थ - ह्याप्रमाणे आत्मस्थ व परस्थ असा दोन प्रकारचा हास्य रस जाणून घ्यावा . हास्य रस हा उत्तम, मध्यम आणि अधम अशा तीन प्रकारच्या प्रकृतींमध्ये असतो . तसेच तो तीन अवस्थांमध्येही असतो .

(अत्र हास्यरसप्रकरणं समाप्तम्)
(येथे हास्यरस प्रकरण संपले . )

## ❖ करुण रस ❖

अथ करुणो नाम शोकस्थायिभावप्रभव:|
स च शापक्लेशविनिपतितेष्टजनविप्रयोगविभवनाशवधबन्धविद्रवोपघातव्यसन-संयोगादिभिर्विभावै: समुपजायते|
तस्याश्रुपातपरिदेवनमुखशोषणवैवर्ण्यस्रस्तगात्रतानि:श्वासस्मृतिलोपादिभिरनुभावै-रभिनयप्रयोक्तव्य:|
व्यभिचारिणश्चास्य निर्वेदग्लानिचिन्तौत्सुक्यावेगभ्रममोह-श्रमभयविषाददैन्यव्याधिजडतोन्मादापस्मारत्रासालस्यमरणस्तम्भवेपथुवैवर्ण्याश्रु-स्वरभेदादय :|

पदच्छेद : - अथ करुण : नाम शोक-स्थायिभाव-प्रभव : |

स : च शाप-क्लेश-विनिपतित-इष्टजनविप्रयोग-विभवनाश-वध-बन्ध-विद्रव-उपघात - व्यसनसंयोग-आदिभि : विभावै : समुपजायते |

तस्य अश्रुपात-परिदेवन-मुखशोषण-वैवर्ण्य-स्रस्तगात्रता-निश्श्वास-स्मृतिलोप-आदिभि : अनुभावै : अभिनय : प्रयोक्तव्य : |

व्यभिचारिण: च अस्य निर्वेद-ग्लानि-चिन्ता-औत्सुक्य-आवेग-भ्रम-मोह-श्रम-भय-विषाद-दैन्य-व्याधि-जडता-उन्माद-अपस्मार-त्रास-आलस्य-मरण-स्तम्भ-वेपथु-वैवर्ण्य-अश्रु-स्वरभेद-आदय : |

अर्थ - आता शोक स्थायीभावातून उत्पन्न होणाऱ्या करुण रसाचे कथन .

शापामुळे किंवा क्लेशामुळे प्रियजनांचा वियोग, वैभवाचा नाश, वध, बंधन, विद्रव (पलायन), उपघात तसेच व्यसनामुळे आलेल्या आकस्मिक संकट इ. विभावांमुळे हा करुण रस उत्पन्न होतो .

अश्रुपात, विलाप करणे, तोंड सुकणे, चेहऱ्यावरचा रंग उडणे/बदलणे, अंग शिथील होणे, नि:श्वास टाकणे, स्मृतीचा भ्रंश होणे इ. अनुभावांनी ह्याचा अभिनय केला जातो. करुण रसामधील व्यभिचारी भाव खालीलप्रमाणे - निर्वेद, ग्लानी, चिंता, औत्सुक्य, आवेग, भ्रम, मोह, श्रम, भय, विषाद, दैन्य, व्याधी, जडता, उन्माद, अपस्मार, त्रास, आलस्य, मरण, स्तंभ, वेपथु, वैवर्ण्य, अश्रू, स्वरभंग इत्यादी .

अत्रार्ये भवत: -

इष्टवधदर्शनाद्वा विप्रियवचनस्य संश्रवाद्वापि |
एभिर्भावविशेषै: करुणरसो नाम संभवति || ६२ ||

पदच्छेद : - अत्र आर्ये भवत : -

इष्ट-वध-दर्शनात् वा विप्रिय-वचनस्य संश्रवात् वा अपि |
एभि : भाव-विशेषै : करुणरस : नाम संभवति || ६२ ||

अन्वय : - अत्र आर्ये भवत : -

इष्टवधदर्शनात् वा विप्रियवचनस्य संश्रवात् वा अपि एभि : भावविशेषै : करुणरस : नाम संभवति |

अर्थ - याविषयी दोन आर्या सांगतो -

इष्ट जनांच्या वधाचे दर्शन किंवा अप्रिय बातमी ऐकणे ह्या विशेष भावांनी करुण नावाचा रस उत्पन्न होतो .

सस्वनरुदितैर्मोहागमैश्च परिदेवितैर्विलपितैश्च |
अभिनेय: करुणरसो देहायासाभिघातैश्च || ६३ ||

पदच्छेद: - सस्वन-रुदितै: मोह-आगमै: च परिदेवितै: विलपितै: च |
अभिनेय: करुणरस: देह-आयास-अभिघातै: च || ६३ ||

अन्वय: - सस्वन-रुदितै:, मोह-आगमै: परिदेवितै: विलपितै: देह-आयास-अभिघातै: च करुणरस: अभिनेय: |

अर्थ - मोठ्या आवाजाने रडणे, मोहित होणे, स्वत:च्या दुर्भाग्याला दोष देणे, विलाप करणे, जमिनीवर बेशुद्ध पडणे तसेच छाती पिटणे इत्यादींद्वारे करुण रसाचा अभिनय केला जातो .

( अत्र करुणरसप्रकरणं समाप्तम् |)
( इथे करुणरस प्रकरण संपले)

## ❖ रौद्र रस ❖

अथ रौद्रो नाम क्रोधस्थायिभावात्मक: रक्षोदानवोद्धतमनुष्यप्रकृति: संग्रामहेतुक: |
स च क्रोधाघर्षणाधिक्षेपानृतवचनोपघातवाक्पारुष्याभिद्रोहमात्सर्यादिभिर्विभावै - रुत्पद्यते |
तस्य च ताडनपाटनपीडनच्छेदनभेदनप्रहरणाहरणशस्त्रसम्पातसम्प्रहाररुधिराकर्षणाद्यानि कर्माणि |
पुनश्च रक्तनयनभ्रूकुटीकरणदन्तौष्ठपीडनगण्डस्फुरणहस्ताग्रनिष्पेषादिभिरनुभावै - रभिनय: प्रयोक्तव्य: |
भावाश्चास्यासम्मोहोत्साहावेगामर्षचपलतौग्य्रगर्वस्वेदवेपथुरोमाञ्चगद्गदादय : |

पदच्छेद: - अथ रौद्र: नाम क्रोध-स्थायि-भावात्मक: रक्षो-दानव-उद्धत-मनुष्य-प्रकृति: संग्राम-हेतुक: |

स: च क्रोध-आघर्षण-अधिक्षेप-अनृतवचन-उपघात-वाक् पारुष्य-अभिद्रोह-मात्सर्य-आदिभि: विभावै: उत्पद्यते|

तस्य च ताडन-पाटन-पीडन-छेदन-भेदन-प्रहरण-आहरण-शस्त्रसम्पात-सम्प्रहार-रुधिर आकर्षण-आद्यानि कर्माणि ।

पुन: च रक्त नयन-भ्रूकुटी करण-दन्त ओष्ठ पीडन-गण्ड स्फुरण-हस्त अग्र निष्पेष-आदिभि: अनुभावै: अभिनय: प्रयोक्तव्य:|

भावा: च अस्य असम्मोह-उत्साह-आवेग-अमर्ष-चपलता-औग्र्य-गर्व-स्वेद-वेपथु-रोमाञ्च- गद्गद-आदय:|

अर्थ - ह्यानंतर क्रोध ज्याचा स्थायीभाव आहे अशा रौद्ररसाविषयी मी सांगतो.

राक्षस, दानव आणि उद्धट मनुष्य यांचा मूळ स्वभाव असलेला, युद्धाला कारणीभूत होणारा तो रौद्ररस म्हणून ओळखला जातो.

रौद्र रस क्रोध, घर्षण, अपमान, खोटे बोलणे, मार लागणे, शिवीगाळ करणे, विद्रोह, मत्सर, ईर्ष्या इ. विभावांतून उत्पन्न होतो.

मारणे, फाडणे, दाबणे, कापणे, भेदन करणे, प्रहार करणे, शस्त्र ग्रहण करणे, शस्त्रांना फेकणे, रक्तपात होणे इ. विभावांद्वारे हा रस उत्पन्न होतो.

ह्याचा अभिनय लाल डोळे करून बघणे, भुवया चढविणे, दातांनी ओठ चावणे, गाल थरथरविणे आणि हात घासणे इ. अनुभावांनी करावा.

आणि ह्याचे व्यभिचारी भाव असंमोह (दृढता) किंवा निश्चय, उत्साह, आवेग, अमर्ष, चपलता, उग्रता, गर्व, स्वेद, कंपन, रोमांच, कंठ दाटून येणे, इ. आहेत.

अत्राह - यदभिहितं रक्षोदानवादीनां रौद्रो रस: | किमन्येषां नास्ति | उच्यते-अस्त्यन्येषामपि रौद्रो रस:|किन्त्वधिकारोऽत्र गृह्यते|ते हि स्वभावत एव रौद्रा:| कस्मात् | बहुबाहवो बहुमुखा: प्रोद्धूतविकीर्णपिङ्गलशिरोजा: रक्तोद्वृत्तविलोचना भीमासितरूपिणश्चैव | यच्च किञ्चित्समारभन्ते स्वभावचेष्टितं वागङ्गादिकं तत्सर्वं रौद्रमेवैतेषाम् |(शृङ्गारश्च तै: प्रायश: प्रसभं सेव्यते |) तेषां चानुकारिणो ये पुरुषास्तेषामपि सङ्ग्रामसम्प्रहारकृतो रौद्रो रसोऽनुमन्तव्य:|

पदच्छेद:- अत्र आह - यत् अभिहितं रक्षो-दानव-आदीनां रौद्र: रस: | किम् अन्येषां न अस्ति | उच्यते - अस्ति अन्येषाम् अपि रौद्र: रस: | किन्तु अधिकार: अत्र गृह्यते | ते हि स्वभावत: एव रौद्रा: | कस्मात्? बहु-बाहव: बहु-मुखा: प्रोद्धूत-विकीर्ण-पिङ्गल-शिरोजा: रक्त उद्वृत्त-विलोचना:भीमासित-रूपिण: च एव | यत् च किञ्चित् समारभन्ते स्वभावचेष्टितं वाग्-अङ्ग-आदिकं तत् सर्वं रौद्रम् एव एतेषाम् |(शृङ्गार: च तै: प्रायश: प्रसभं सेव्यते |) तेषां च अनुकारिण: ये पुरुषा: तेषाम् अपि सङ्ग्राम- सम्प्रहार-कृत: रौद्र: रस: अनुमन्तव्य: |

अर्थ - प्रश्न = जे सांगितले गेले आहे की, हा रौद्र रस राक्षस आणि दानव इ. चा असतो. मग तो इतरांच्या बाबतीत नसतो का?

उत्तर = इतरांसाठीदेखील हा रौद्र रस आहे. परंतु येथे तो 'अधिकार' ह्या अर्थाने घेतला आहे. कारण राक्षस इ. हे स्वभावाने रागीट असतात.

प्रश्न = कशावरून ?

उत्तर = ते अनेक भुजा (हात)असलेले, अनेक मुख असलेले, कंपित, विखुरलेले आणि पिवळे केस असलेले, तसेच वर चढलेले, लाल डोळे असलेले, ते राक्षस इ.भयंकर काळ्या रंगाचे असतात. त्यामुळे ते जे काही स्वाभाविक क्रीडा किंवा हालचाल करतात त्या स्वभावत: रौद्ररूपी असतात.

(त्यांच्याद्वारे शृंगाराचा उपभोग देखील मुख्यत: उग्र रूपानेच आणि जबरदस्तीने केला जातो.) त्यांचे अनुकरण करणारे जे मनुष्य असतात त्यांच्या बाबतीत पण युद्ध आणि प्रहार यांद्वारे रौद्र रस दाखविला जाऊ शकतो.

अत्रानुवंश्ये आर्ये भवत: -

युद्धप्रहारघातनविकृतच्छेदनविदारणैश्चैव |
सङ्ग्रामसम्भ्रमाद्यैरेभि: सञ्जायते रौद्र: || ६४ ||

पदच्छेद:- अत्र आनुवंश्ये आर्ये भवत:-
युद्धप्रहार-घातन-विकृत-छेदन-विदारणै: च एव |
सङ्ग्राम-सम्भ्रम-आद्यै: एभि: सञ्जायते रौद्र: || ६४ ||

अन्वय: - अत्र आनुवंश्ये आर्ये भवत:-
युद्धप्रहार-घातन-विकृत-छेदन-विदारणै: सङ्ग्राम-सम्भ्रम-आद्यै: एभि: रौद्र: सञ्जायते|

अर्थ - प्रस्तुत विषयावरील वंशपरंपरागत चालून आलेल्या दोन आर्या प्रचलित आहेत.
युद्ध, प्रहार, घात करणे, छिन्न-भिन्न करून कापणे, युद्धातील संभ्रम इ. कारणांमुळे रौद्र रस उत्पन्न होतो.

नानाप्रहरणमोक्षै: शिर:कबन्धभुजकर्तनैश्चैव |
एभिश्चार्थविशेषैरस्याभिनय: प्रयोक्तव्य: || ६५ ||

पदच्छेद:- नानाप्रहरण-मोक्षै:शिर:कबन्ध-भुज-कर्तनै: च एव|
एभि: च अर्थविशेषै: अस्य अभिनय: प्रयोक्तव्य:|| ६५ ||

अन्वय: - नानाप्रहरण-मोक्षै: शिर:कबन्ध-भुज-कर्तनै: एभि: च अर्थविशेषै: अस्य अभिनय: प्रयोक्तव्य:|

अर्थ - विविध प्रकारची आयुधे फेकणे, डोके-धड आणि हात इ. थरथर कापणे अशा विशेष कार्याद्वारे रौद्र रसाचा अभिनय करावा.

इति रौद्ररसो दृष्टो रौद्रवागङ्गचेष्टित:|
शस्त्रप्रहारभूयिष्ठ उग्रकर्मक्रियात्मक:|| ६६ ||

पदच्छेद:- इति रौद्ररस: दृष्ट: रौद्रवागङ्गचेष्टित:|
शस्त्रप्रहारभूयिष्ठ: उग्रकर्मक्रियात्मक:|| ६६ ||

अन्वय: - इति रौद्रवागङ्गचेष्टित: शस्त्रप्रहारभूयिष्ठ: उग्रकर्मक्रियात्मक: रौद्ररस: दृष्ट:|

अर्थ - ह्याप्रकारे वाणी आणि अंगचेष्टांनी युक्त, शस्त्रप्रहाराने परिपूर्ण आणि उग्र कर्माच्या क्रियेने युक्त असा हा रौद्र रस दाखविला जातो.

(इति रौद्ररस: समाप्त:)
(येथे रौद्र रसाचे विवरण संपले.)

## ❖ वीर रस ❖

अथ वीरो नामोत्तमप्रकृतिरुत्साहात्मकः |
स चासंमोहाध्यवसायनयविनयबलपराक्रमशक्तिप्रतापप्रभावादिभिर्विभावैरुत्पद्यते |
तस्य स्थैर्यधैर्यशौर्यत्यागवैशारद्यादिभि रनुभावैरभिनयः प्रयोक्तव्यः |
भावाश्चास्य धृतिमतिगर्वावेगौग्र्यामर्षस्मृतिरोमाञ्चादयः |

पदच्छेदः - अथ वीरः नाम उत्तम-प्रकृतिः उत्साहात्मकः |
सः च असंमोह-अध्यवसाय-नय-विनय-बल-पराक्रम-शक्ति-प्रताप-प्रभावादिभिः विभावैः उत्पद्यते |
तस्य स्थैर्य-धैर्य-शौर्य-त्याग-वैशारद्य-आदिभिः अनुभावैः अभिनयः प्रयोक्तव्यः |
भावाः च अस्य धृति-मति-गर्व-आवेग-औग्र्य-अमर्ष-स्मृति-रोमाञ्च-आदयः |

अर्थ - (ह्यानंतर वीर रस प्रकरणाला सुरुवात होत आहे.)
उत्तम प्रकृती असलेला आणि उत्साह स्थायीभाव असलेला रस 'वीर' ह्या नावाने ओळखला जातो. तो असंमोह, अध्यवसाय (कौतुक), नीती, विनय, बल, पराक्रम, शक्ती, प्रताप आणि प्रभाव इत्यादी विभावांनी उत्पन्न होतो.
ह्याचा अभिनय स्थिरता, धैर्य, शौर्य, त्याग, कुशलता इ. अनुभावांनी करावा.
धृती, मती, गर्व, आवेग, उग्रता, अमर्ष, स्मृती आणि रोमांच इ. ह्याचे व्यभिचारी भाव आहेत.

अत्रार्ये रसविचारमुखे -
उत्साहा (होऽ)ध्यवसायादविषादित्वादविस्मयामोहात् |
विविधादर्थविशेषाद्वीररसो नाम सम्भवति || ६७ ||

पदच्छेदः - अत्र आर्ये रसविचारमुखे -
उत्साहः अध्यवसायात् अविषादित्वात् अविस्मय-अमोहात् |
विविधात् अर्थविशेषात् वीररसः नाम सम्भवति || ६७ ||

अन्वय : - अत्र रसविचारमुखे आर्ये (प्रसिद्धे)-
अध्यवसायात् अविषादित्वात् अविस्मयामोहात् विविधात् अर्थविशेषात् उत्साह: वीररस: नाम सम्भवति |

अर्थ - येथे वीररसाच्या दृष्टीने दोन आर्या आहेत .
अध्यवसाय, अविषाद, विस्मयहीनता, तसेच मोहशून्यता इ. विविध विशेष अर्थांनी युक्त असा उत्साहरूप स्थायीभाव असणारा रस 'वीर' नावाने उत्पन्न होतो .

स्थितिधैर्यवीर्यगर्वैरुत्साहपराक्रमप्रभावैश्च |
वाक्यैश्चाक्षेपकृतैर्वीररस: सम्यगभिनेय: || ६८ ||

पदच्छेद : - स्थिति-धैर्य-वीर्य-गर्वै : उत्साह-पराक्रम-प्रभावै : च |
वाक्यै : च आक्षेप-कृतै : वीररस : सम्यक् अभिनेय : || ६८ ||

अन्वय : - स्थिति-धैर्य-वीर्य-गर्वै : उत्साह-पराक्रम-प्रभावै : आक्षेपकृतै : वाक्यै : च वीररस : सम्यक् अभिनेय : |

अर्थ - स्थिरता, धैर्य, वीर्य, गर्व, उत्साह, पराक्रम, प्रभाव तसेच आक्षेप व्यक्त करणाऱ्या वाक्यांनी वीर रसाचा उत्तम अभिनय केला पाहिजे .

(अत्र वीररसप्रकरणं समाप्तम्)
(येथे वीररस प्रकरण संपले . )

## ❖ भयानक रस ❖

अत्र भयानको नाम भयस्थायिभावात्मक: |
स च विकृतरवसत्त्वदर्शनशिवोलूकत्रासोद्वेगशून्यागारारण्यगमनस्वजनवधबन्धदर्शन श्रुतिकथादिभिर्विभावैरुत्पद्यते |
तस्य प्रवेपितकरचरणनयनचपलपुलकमुखवैवर्ण्य स्वरभेदादिभिरनुभावैरभिनय: प्रयोक्तव्य: |
भावाश्चास्य स्तम्भस्वेदगद्गदरोमाञ्चवेपथुस्वरभेदवैवर्ण्यशङ्कामोहदैन्यावेगचापल जडतात्रासापस्मारमरणादय: |

पदच्छेद : - अत्र भयानक : नाम भय-स्थायिभावात्मक : |
स : च विकृत रव - सत्त्व दर्शन - शिव उलूक त्रास उद्वेग - शून्य आगार - अरण्य गमन- स्वजन वध बन्ध दर्शन - श्रुति कथा आदिभि : विभावै : उत्पद्यते |
तस्य प्रवेपित कर चरण - नयन चपल - पुलक मुख - वैवर्ण्य - स्वर भेद - आदिभि : अनुभावै : अभिनय : प्रयोक्तव्य : |
भावा : च अस्य स्तम्भ-स्वेद-गद्गद-रोमाञ्च-वेपथु-स्वरभेद-वैवर्ण्य-शङ्का-मोह-दैन्य-आवेग-चापल-जडता-त्रास-अपस्मार-मरण-आदय : |

अर्थ - ह्यानंतर भयानक रसाचे प्रकरण सुरू होत आहे .
भयानक रसाचा स्थायीभाव भय आहे आणि तो रस कर्कश आवाज, पिशाच्च इ . चे दर्शन, कोल्हा आणि घुबडांचा त्रास व उद्वेग, निर्जनगृह, वनामध्ये गमन, आपल्या बंधुजनांचे वध तसेच बंधन इ . पाहणे किंवा श्रवण किंवा कथन इत्यादी विभावांनी उत्पन्न होतो .
थरथरणारे हातपाय, चंचल नेत्र, रोमांच, चेहरा काळवंडणे, आवाज बदलणे इ . अनुभावांद्वारे या रसाचा अभिनय करावा .
आणि याचे स्तंभ, स्वेद, गद्गद, रोमांच, वेपथू, स्वरभेद, वैवर्ण्य, शंका, मोह, दैन्य, आवेग, चपलता, जडता, त्रास, अपस्मार, मरण इ . व्यभिचारी भाव आहेत .

अत्रार्या : -

विकृतरवसत्त्वदर्शनसंग्रामारण्यशून्यगृहगमनात् |
गुरुनृपयोरपराधात्कृतकश्च भयानको ज्ञेय : || ६९ ||

पदच्छेद : - अत्र आर्या :-
विकृत रव - सत्त्व दर्शन - संग्राम - अरण्य - शून्य गृह गमनात् |
गुरु-नृपयो : अपराधात् कृतक : च भयानक : ज्ञेय : || ६९ ||

अन्वय : - विकृतरव-सत्त्वदर्शन-संग्राम-अरण्य-शून्यगृह-गमनात् गुरुनृपयो : अपराधात् कृतक : भयानक : ज्ञेय : |

अर्थ - या विषयीच्या आर्या पुढीलप्रमाणे - कर्कश आवाज, पिशाच्च इ. चे दर्शन, युद्ध, वन आणि निर्जन घरी जाणे, गुरू आणि राजा यांचा झालेला अपराध या सर्वांचे अनुकरण करण्याने 'भयानक' रस निर्माण होतो.

गात्रमुखदृष्टिभेदैरूरुस्तम्भाभिवीक्षणोद्वेगैः |
सन्नमुखशोषहृदयस्पन्दनरोमोद्‌गमैश्च भयम् || ७० ||

पदच्छेदः - गात्र-मुख-दृष्टि-भेदैः ऊरु-स्तम्भ-अभिवीक्षण-उद्वेगैः |
सन्न मुख शोष - हृदय स्पन्दन - रोम उद्‌गमैः च भयम् || ७० ||

अन्वयः - गात्र-मुख-दृष्टि-भेदैः ऊरु-स्तम्भ-अभिवीक्षण-उद्वेगैः सन्नमुखशोष-हृदय-स्पन्दन-रोम-उद्‌गमैः च भयं दर्शनीयम् |

अर्थ - अंग, मुख आणि दृष्टीमध्ये अंतर (फरक) पडणे, जांघा स्तब्ध (निष्क्रीय) होणे, इथे-तिथे व्याकुळ होऊन बघणे, उद्वेग, खिन्न होऊन तोंड सुकणे, हृदय धडधडणे, तसेच रोमांच इ. द्वारे भयाचा अभिनय करावा.

एतत्स्वभावजं स्यात्सत्त्वसमुत्थं तथैव कर्तव्यम् |
पुनरेभिरेव भावैः कृतकं मृदुचेष्टितैः कार्यम् || ७१ ||

पदच्छेदः - एतत् स्वभावजं स्यात् सत्त्व-समुत्थं तथा एव कर्तव्यम् |
पुनः एभिः एव भावैः कृतकं मृदु-चेष्टितैः कार्यम् || ७१ ||

अन्वयः - एतत् स्वभावजं स्यात् | तथैव सत्त्वसमुत्थं कर्तव्यम् | पुनः एभिः एव भावैः कृतकं मृदुचेष्टितैः कार्यम् |

अर्थ - हे स्वाभाविक भयाचे प्रकार आहेत. याचप्रकारे हिंस्त्र प्राण्यांना पाहून होणाऱ्या भयाचा अभिनय करावा आणि याच भावांनी व मृदू चेष्टांनी कृत्रिम भयाचा अभिनय करावा.

करचरणवेपथुस्तम्भगात्रहृदयप्रकम्पेन |
शुष्कोष्ठतालुकण्ठैर्भयानको नित्यमभिनेयः || ७२ ||

पदच्छेद :- कर चरण वेपथु - स्तम्भ गात्र - हृदय प्रकम्पेन।
शुष्क-ओष्ठ-तालु-कण्ठै: भयानक: नित्यम् अभिनेय:॥ ७२ ॥

अन्वय : - करचरणवेपथु-स्तम्भ-गात्र-हृदयप्रकम्पेन शुष्कोष्ठ-तालुकण्ठै: भयानक: नित्यम् अभिनेय:।

अर्थ - हातापायाचे कंपन होणे, शरीर स्तंभित होणे, हृदय दाटून येणे, ओठ, कंठ आणि टाळू सुकणे इ. अनुभावांनी भयानक रसाचा अभिनय करावा.

(इति भयानकरस: समाप्त:)
(येथे भयानकरसाचे विवरण संपले.)

## ❖ बीभत्स रस ❖

अथ बीभत्सो नाम जुगुप्सास्थयिभावात्मक:। स चाहृद्याप्रियाचोष्यानिष्टश्रवणदर्शन - कीर्तनादिभिर्विभावैरुत्पद्यते। तस्य सर्वाङ्गसंहारमुखविकूणनोल्लेखननिष्ठीवनोद्वेजन - आदिभिरनुभावैरभिनय: प्रयोक्तव्य:।
भावाश्चास्यापस्मारोद्वेगावेगमोहव्याधिमरणादय:।
अत्रानुवंश्ये आर्ये भवत:

पदच्छेद :- अथ बीभत्स: नाम जुगुप्सा-स्थायिभावात्मक:।
स: च अहृद्य-अप्रिय-अचोष्य-अनिष्ट-श्रवण-दर्शन-कीर्तन-आदिभि: विभावै: उत्पद्यते।
तस्य सर्वाङ्ग-संहार-मुखविकूणन-उल्लेखन-निष्ठीवन-उद्वेजन-आदिभि: अनुभावै: अभिनय: प्रयोक्तव्य:।
भावा: च अस्य अपस्मार-उद्वेग-आवेग-मोह-व्याधि-मरण-आदय:।
अत्र आनुवंश्ये आर्ये भवत:

अर्थ - आता बीभत्स रसाचे प्रकरण सुरू होत आहे ज्यामध्ये जुगुप्सा हा स्थायीभाव आहे. अहृद्य, अपवित्र, अप्रिय तसेच अनिष्ट गोष्टींचे श्रवण, दर्शन तसेच परिकीर्तन वगैरे विभावांनी याची उत्पत्ती होते.

संपूर्ण अंगाचे संकोचन, तोंड वाकडे करणे, उलटी करणे, थुंकणे, शरीराच्या अंगांना हलविणे वगैरे अनुभावांद्वारे ह्याचा अभिनय करावा.

अपस्मार, उद्वेग, आवेग, मोह, व्याधी, मरण इ. ह्याचे व्यभिचारीभाव आहेत.

याविषयी वंशपरंपरागत आलेल्या दोन आर्या पुढीलप्रमाणे -

अनभिमतदर्शनेन च गन्धरसस्पर्शशब्ददोषैश्च |<br>
उद्वेजनैश्च बहुभिर्बीभत्सरस: समुद्भवति || ७३ ||

पदच्छेद: - अनभिमत-दर्शनेन च गन्ध-रस-स्पर्श-शब्द-दोषै: च |<br>
उद्वेजनै: च बहुभि: बीभत्सरस: समुद्भवति || ७३ ||

अन्वय: - अनभिमत-दर्शनेन च गन्धरसस्पर्शशब्ददोषै: च बहुभि: उद्वेजनै: बीभत्सरस: समुद्भवति |

अर्थ - अप्रिय वस्तू पाहून, गंध, रस, स्पर्श आणि शब्दांच्या दोषांनी तसेच विविध प्रकारच्या उद्वेग निर्माण करणाऱ्या वस्तूंनी बीभत्स रस उत्पन्न होतो.

मुखनेत्रविकूणनया नासाप्रच्छादनावनमितास्यै: |<br>
अव्यक्तपादपतनैर्बीभत्स: सम्यगभिनेय: || ७४ ||

पदच्छेद: - मुख-नेत्र-विकूणनया नासा-प्रच्छादन-अवनमित-आस्यै: |<br>
अव्यक्त-पाद-पतनै: बीभत्स: सम्यक् अभिनेय: || ७४ ||

अन्वय: - मुखनेत्रविकूणनया नासा-प्रच्छादन-अवनमित-आस्यै: अव्यक्तपादपतनै: बीभत्स: सम्यक् अभिनेय: |

अर्थ - तोंड व डोळे संकुचित करणे किंवा वाकविणे (तिरके करणे), नाक झाकणे, मुख खाली झुकवून तसेच अडखळत चालून बीभत्स रसाचा अभिनय चांगल्या रितीने केला जातो.

(अत्र बीभत्सरसप्रकरणं समाप्तम् |)<br>
(इथे बीभत्स रसाचे प्रकरण संपले.)

❖ अद्भुत रस ❖

अथाद्भुतो नाम विस्मयस्थायिभावात्मकः |
स च दिव्यजनदर्शनेप्सितमनोरथावाप्त्युपवनदेवकुलादिगमनसभाविमानमायेन्द्रजाल सम्भावनादिभिर्विभावैरुत्पद्यते |
तस्य नयनविस्तारानिमेषप्रेक्षणरोमाञ्चाश्रुस्वेदहर्षसाधुवाददानप्रबन्धहाहाकारबाहुवदन चेलुलिभ्रमणादिभिरनुभावैरभिनयः प्रयोक्तव्यः |
भावाश्चास्य स्तम्भाश्रुस्वेदगद्गदरोमाञ्चावेगसम्भ्रमजडताप्रलयादयः |
अत्रानुवंश्ये आर्ये भवतः

पदच्छेदः - अथ अद्भुतः नाम विस्मय-स्थायिभावात्मकः |
स: च दिव्य जन दर्शन-ईप्सित मनोरथ अवाप्ति-उपवन देवकुल आदि गमन-सभा-विमान-माया-इन्द्रजाल-सम्भावना-आदिभिः विभावैः उत्पद्यते ।
तस्य नयन विस्तार-अनिमेष प्रेक्षण-रोमाञ्च-अश्रु-स्वेद-हर्ष-साधुवाद-दान-प्रबन्ध-हाहाकार- बाहु वदन-चेला-अङ्गुलि भ्रमण-आदिभिः अनुभावैः अभिनयः प्रयोक्तव्यः |
भावाः च अस्य स्तम्भ-अश्रु-स्वेद-गद्गद-रोमाञ्च-आवेग-सम्भ्रम-जडता-प्रलय-आदयः |
अत्र आनुवंश्ये आर्ये भवतः

अर्थ - इथून अद्भुत रसाचे प्रकरण सुरू होते ज्याचा विस्मय हा स्थायीभाव आहे .
तो दिव्यजनांचे दर्शन, अपेक्षित मनोरथ प्राप्ती, उपवन तसेच देवळात जाणे, सभा, विमान, माया, इंद्रजाल इ . वगैरे विभावांनी उत्पन्न होतो . डोळे मोठे करणे, टक लावून पाहणे, रोमांच, अश्रू, घाम येणे, हर्ष, चांगले बोलणे, दान करणे, निरंतर मोठ्याने हाहाकार करणे, बाहू, मुख, वस्त्र, बोटे इ . फिरविणे वगैरे अनुभावांद्वारे ह्याचा अभिनय करावा .
स्तंभ, अश्रू, घाम, गद्गदकंठ, रोमांच, आवेग, संभ्रम, जडता व प्रलय वगैरे अद्भुत रसाचे (व्यभिचारी)भाव आहेत .
याविषयी परंपरेनुसार दोन आर्या आहेत .

यत्त्वतिशयार्थयुक्तं वाक्यं शिल्पं च कर्मरूपं वा |
तत्सर्वमद्भुतरसे विभावरूपं हि विज्ञेयम् || ७५ ||

पदच्छेद: - यत् तु अतिशय-अर्थ-युक्तं वाक्यं शिल्पं च कर्मरूपं वा |
तत् सर्वम् अद्भुतरसे विभावरूपं हि विज्ञेयम् || ७५ ||

अन्वय: - यत्तु वाक्यं शिल्पं कर्मरूपं वा अतिशयार्थयुक्तं तत् सर्वम् अद्भुतरसे विभावरूपं हि विज्ञेयम् |

अर्थ - वाक्य, शिल्प किंवा कर्म जे विशिष्ट अर्थाने युक्त असेल ते सर्व अद्भुतरसाचे विभाव होतील असे जाणून घ्यावे.

स्पर्शग्रहोल्लुकसनैर्हाहाकारैश्च साधुवादैश्च |
वेपथुगद्गदवचनैः स्वेदाद्यैरभिनयस्तस्य || ७६ ||

पदच्छेद: - स्पर्श-ग्रह-उल्लुकसनैः हाहा-कारैः च साधु-वादैः च |
वेपथु-गद्गद-वचनैः स्वेद-आद्यैः अभिनयः तस्य || ७६ ||

अन्वय: - स्पर्शग्रहोल्लुकसनैः हाहाकारैः साधुवादैः च वेपथुगद्गदवचनैः स्वेदाद्यैः तस्य अभिनयः कार्यः |

अर्थ - स्पर्श, ग्रहण, उड्या मारत हाहाकार करणे, प्रशंसा करणे, गद्गदकंठ आणि घाम येणे इ. अनुभावांद्वारे अद्भुत रसाचा अभिनय करावा.

(अत्र अद्भुतरसः समाप्तः |)
(येथे अद्भुत रस संपला.)

## ❖ रसांचे विविध प्रकार ❖

शृङ्गारं त्रिविधं विद्याद्वाङ्नैपथ्यक्रियात्मकम् |
अङ्गनैपथ्यवाक्यैश्च हास्यरौद्रौ त्रिधा स्मृतौ || ७७ ||

पदच्छेद: - शृङ्गारं त्रिविधं विद्यात् वाङ्-नैपथ्य-क्रियात्मकम् |
अङ्ग-नैपथ्यवाक्यैः च हास्यरौद्रौ त्रिधा स्मृतौ || ७७ ||

अन्वय: - वाङ्-नैपथ्य-क्रियात्मकं शृङ्गारं अङ्ग-नैपथ्यवाक्यै: त्रिविधं विद्यात् च हास्यरौद्रौ त्रिधा स्मृतौ |

अर्थ - वाणी, नेपथ्य आणि वाक्यप्रयोगाच्या दृष्टीने शृंगाराचे तीन प्रकार आहेत . अंग, नेपथ्य आणि वाक्य यांच्या प्रयोगानुसार हास्य आणि रौद्र रसाचे पण तीन प्रकार होतात .

धर्मोपघातजश्चैव तथार्थापचयोद्भव: |
तथा शोककृतश्चैव करुणस्त्रिविध: स्मृत: ‖ ७८ ‖

पदच्छेद: - धर्म-उपघातज: च एव तथा अर्थ-अपचय-उद्भव: |
तथा शोककृत: च एव करुण: त्रिविध: स्मृत: ‖ ७८ ‖

अन्वय: - धर्म-उपघातज: तथा अर्थापचय-उद्भव: | तथा शोककृत: च करुण: त्रिविध: स्मृत: |

अर्थ - करुण रस तीन प्रकारचा सांगितला गेला आहे - धर्महानीमुळे निर्माण होणारा, अर्थ हानीमुळे उत्पन्न होणारा आणि शोक (मृत्यू वगैरे) मुळे उत्पन्न होणारा .

दानवीरं धर्मवीरं युद्धवीरं तथैव च |
रसवीरमपि प्राह ब्रह्मा त्रिविधमेव हि ‖ ७९ ‖

पदच्छेद: - दानवीरं धर्मवीरं युद्धवीरं तथा एव च |
रसवीरम् अपि प्राह ब्रह्मा त्रिविधम् एव हि ‖ ७९ ‖

अन्वय: - ब्रह्मा दानवीरं धर्मवीरं तथैव युद्धवीरं इति त्रिविधं रसवीरं प्राह |

अर्थ - ब्रह्मदेवाने दानवीर, धर्मवीर, युद्धवीर असे वीररसाचे तीन प्रकार सांगितले आहेत .

व्याजाच्चैवापराधाच्च वित्रासितकमेव च |
पुनर्भयानकस्यापि विद्यात् त्रिविधमेव हि ‖ ८० ‖

पदच्छेद: - व्याजात् च एव अपराधात् च वित्रासितकम् एव च |
पुन: भयानकस्य अपि विद्यात् त्रिविधम् एव हि ‖ ८० ‖

अन्वय: - व्याजात् अपराधात् वित्रासितकं च इति भयानकस्य अपि त्रिविधं विद्यात् |

अर्थ - भयानक रसाचे तीन प्रकार सांगितले आहेत . १. चोरी-लबाडी २. अपराध ३. त्रास

बीभत्स: क्षोभज: शुद्ध उद्वेगी स्यात् द्वितीयक: |
विष्ठाकृमिभिरुद्वेगी क्षोभजो रुधिरादिज: ‖ ८१ ‖

पदच्छेद: - बीभत्स: क्षोभज: शुद्ध: उद्वेगी स्यात् द्वितीयक: |
विष्ठा-कृमिभि: उद्वेगी क्षोभज: रुधिरादिज: ‖ ८१ ‖

अन्वय: - बीभत्स: क्षोभज: शुद्ध: उद्वेगी इति द्वितीयक: स्यात् | विष्ठाकृमिभि: उद्वेगी रुधिरादिज: क्षोभज: |

अर्थ - बीभत्स रस हा दोन प्रकारचा सांगितला आहे - क्षोभज म्हणजे शुद्ध आणि उद्वेगी म्हणजे अशुद्ध होय. अशुद्ध दोन प्रकारचा असतो. तो विष्ठा, जंत वगैरेंनी उत्पन्न होतो तर क्षोभज हा रक्त इ. नी उत्पन्न होतो.

दिव्यश्चानन्दजश्चैव द्विधा ख्यातोऽद्भुतो रस: |
दिव्यदर्शनजो दिव्यो हर्षादानन्दज: स्मृत: ‖ ८२ ‖

पदच्छेद: - दिव्य: च आनन्दज: च एव द्विधा ख्यात: अद्भुत: रस: |
दिव्यदर्शनज: दिव्य: हर्षात् आनन्दज: स्मृत: ‖ ८२ ‖

अन्वय: - अद्भुत: रस: दिव्य: च आनन्दज: च इति द्विधा ख्यात: | दिव्यदर्शनज: दिव्य: हर्षात् आनन्दज: स्मृत: |

अर्थ - अद्भुत रस दोन प्रकारचा सांगितला आहे - दिव्यज आणि आनंदज. दिव्य दर्शनाने उत्पन्न होणारा दिव्यज आणि हर्षातून उत्पन्न होणारा आनंदज होय.

## ❖ शांतरस ❖

(अथ शान्तो नाम शमस्थायिभावात्मको मोक्षप्रवर्तक: |
स तु तत्त्वज्ञानवैराग्याशयशुद्ध्यादिभिर्विभावै: समुत्पद्यते |
तस्य यमनियमाध्यात्मध्यानधारणोपासनसर्वभूतदयालिङ्गग्रहणादिभिरनुभावैरभिनय: प्रयोक्तव्य: |
व्यभिचारिणश्चास्य निर्वेदस्मृतिधृतिसर्वाश्रमशौचस्तम्भरोमाञ्चादय: |

पदच्छेद: - (अथ शान्त: नाम शमस्थायिभावात्मक: मोक्षप्रवर्तक: |
स: तु तत्त्वज्ञान-वैराग्य-आशय-शुद्धि-आदिभि: विभावै: समुत्पद्यते |
तस्य यम-नियम-अध्यात्म-ध्यान-धारणा-उपासन-सर्व भूत दया-लिङ्ग ग्रहण-आदिभि: अनुभावै: अभिनय: प्रयोक्तव्य: | व्यभिचारिण: च अस्य निर्वेद-स्मृति-धृति-सर्व आश्रम-शौच-स्तम्भ-रोमाञ्च-आदय: |

अर्थ - (यानंतर 'शम' स्थायीभाव असलेला आणि मोक्षाकडे नेणारा शांत रस सांगितला आहे.
तो तत्त्वज्ञान, वैराग्य, चित्तशुद्धी वगैरे विभावांनी उत्पन्न होतो.
यम, नियम, अध्यात्म, ध्यान, धारणा, उपासना, सर्व प्राणिमात्रांवर दया, संन्यास घेणे वगैरे अनुभावांद्वारे ह्याचा अभिनय करावा.
निर्वेद, श्रुती, स्मृती, धृती, सर्व आश्रमात पवित्रता, स्तंभ, रोमांच वगैरे ह्याचे व्यभिचारीभाव आहेत.

अत्रार्या: श्लोकाश्च भवन्ति -

मोक्षाध्यात्मसमुत्थस्तत्त्वज्ञानार्थहेतुसंयुक्त: |
नै:श्रेयसोपदिष्ट: शान्तरसो नाम सम्भवति ||
बुद्धीन्द्रियकर्मेन्द्रियसंरोधाध्यात्मसंस्थितोपेत: |
सर्वप्राणिसुखहित: शान्तरसो नाम विज्ञेय: ||
न यत्र दुखं न सुखं न द्वेषो नापि मत्सर: |
सम: सर्वेषु भूतेषु स शान्त: प्रथितो रस: ||
भावा विकारा रत्याद्या: शान्तस्तु प्रकृतिर्मत: |
विकार: प्रकृतेर्जात: पुनस्तत्रैव लीयते ||
स्वं स्वं निमित्तमासाद्य शान्ताद्भाव: प्रवर्तते |
पुनर्निमित्तापाये च शान्त एवोपलीयते ||
एवं नवरसा दृष्टा नाट्यज्ञैर्लक्षणान्विता: |)

पदच्छेद : - अत्र आर्या : श्लोका : च भवन्ति -

मोक्ष-अध्यात्म-समुत्थ : तत्त्वज्ञानार्थ-हेतुसंयुक्त : |
नै :श्रेयस-उपदिष्ट : शान्तरस : नाम सम्भवति ||
बुद्धि इन्द्रिय-कर्मेन्द्रिय-संरोध-अध्यात्म-संस्थित-उपेत : |
सर्वप्राणि-सुखहित : शान्तरस : नाम विज्ञेय : ||
न यत्र दुखं न सुखं न द्वेष : नापि मत्सर : |
सम : सर्वेषु भूतेषु स शान्त : प्रथितो रस : ||
भावा : विकारा : रति-आद्या : शान्त : तु प्रकृति : मत : |
विकार : प्रकृते : जात : पुन : तत्र एव लीयते ||
स्वं स्वं निमित्तम् आसाद्य शान्तात् भाव : प्रवर्तते |
पुन : निमित्तापाये च शान्ते एव उपलीयते ||
एवं नवरसा : दृष्टा : नाट्यज्ञै : लक्षण-अन्विता : |)

अन्वय : - अत्र आर्या : श्लोका : च भवन्ति -

मोक्ष-अध्यात्म-समुत्थ : तत्त्वज्ञानार्थ-हेतुसंयुक्त : नै :श्रेयस-उपदिष्ट : शान्तरस : नाम सम्भवति |

बुद्धीन्द्रिय-कर्मेन्द्रिय-संरोध-अध्यात्म-संस्थितोपेत : सर्वप्राणि-सुखहित : शान्तरस : नाम विज्ञेय : |

यत्र न दु :खं न सुखं न द्वेष : न मत्सर : सर्वेषु भूतेषु सम : स : शान्त : रस : प्रथित : |

रत्याद्या : भावा : विकारा :, शान्त : तु प्रकृति : मत : | विकार : प्रकृते : जात : पुन : तत्र एव लीयते |

स्वं स्वं निमित्तम् आसाद्य शान्तात् भाव : प्रवर्तते पुन : निमित्तापाये च शान्ते एव उपलीयते ||

एवं नाट्यज्ञै : लक्षण-अन्विता : नवरसा : दृष्टा : |)

अर्थ - याविषयावर आर्या आणि श्लोक अनेक आहेत .

श्लोक १ = मोक्ष आणि आध्यात्मिक ज्ञानाने उत्पन्न होणारा, तत्त्वज्ञानाचा अर्थ

जाणणारा, परम पुरुषार्थासाठी ज्याचा उपदेश केला जातो, त्याला शांत रस असे म्हटले आहे .

श्लोक २ = शांतरस ज्ञानेंद्रिय आणि कर्मेंद्रिय यांना विषयसुखापासून दूर नेणारा (विरत करणारा), आध्यात्मिक ज्ञान दृढ करणारा तसेच सर्व प्राण्यांसाठी सुख आणि कल्याणाची भावना जागृत करणारा समजला पाहिजे .

श्लोक ३ = ह्या (शांतरसा)मध्ये दु:ख, सुख, द्वेष, मत्सर वगैरेंचा अभाव आहे . जो सर्व प्राण्यांमध्ये समानतेचा भाव सांगतो तो रस शांतरस नावाने प्रसिद्ध आहे .

श्लोक ४ = रती वगैरे भाव विकाररूप आहेत . शांतरस हा प्रकृतीरूप आहे . विकार प्रकृतीमध्ये निर्माण होऊन पुन्हा प्रकृतीमध्येच विलीन होतो .

श्लोक ५ = स्वत:च्या निमित्ताला प्राप्त करून शांत रसातूनच भाव उत्पन्न होतात आणि निमित्ताच्या अभावी शांत रसामध्ये विलीन होतात .

ह्याप्रमाणे नाट्यशास्त्रकाराने नव रस सांगितले आहेत)

❖ उपसंहार ❖

एवमेते रसा ज्ञेयास्त्वष्टौ लक्षणलक्षिता:|
अत ऊर्ध्वं प्रवक्ष्यामि भावानामपि लक्षणम् || ८३ ||

पदच्छेद :- एवम् एते रसा: ज्ञेया: तु अष्टौ लक्षण-लक्षिता:|
अत: ऊर्ध्वं प्रवक्ष्यामि भावानाम् अपि लक्षणम् || ८३ ||

अन्वय: - एवम् एते अष्टौ लक्षणलक्षिता: रसा: ज्ञेया: | अत: ऊर्ध्वं भावानाम् अपि लक्षणं प्रवक्ष्यामि |

अर्थ - या प्रकारच्या लक्षणांनी युक्त असे आठ रस सांगितले आहेत . आता पुढे मी भावांची लक्षणे सांगेन .

|| इति भारतीये नाट्यशास्त्रे 'रसाध्याय:' षष्ठोऽध्याय: ||

|| अशा प्रकारे भारतीय नाट्यशास्त्रातील 'रसाध्याय' नावाचा सहावा अध्याय समाप्त ||

# सातवा अध्याय
# भावाध्याय

## ८ स्थायी भाव



# सातवा अध्याय

# भावाध्याय

## ❖ भावांचे स्वरूप ❖

भावानिदानीं व्याख्यास्याम:| अत्राह - भावा इति कस्मात्| किं भवन्तीति भावा:, किं वा भावयन्तीति भावा:| उच्यते - वागङ्गसत्त्वोपेतान्काव्यार्थान्भावयन्तीति भावा इति|

पदच्छेद: - भावान् इदानीं व्याख्यास्याम:| अत्र आह - भावा: इति कस्मात्| किं भवन्ति इति भावा:, किं वा भावयन्ति इति भावा:| उच्यते - वाग्-अङ्ग-सत्त्व-उपेतान् काव्यार्थान् भावयन्ति इति भावा: इति|

अर्थ - आता भावांची लक्षणे सांगतो. येथे प्रश्न उपस्थित होतो की, यांना भाव का म्हटले आहे? ते स्थिर असतात म्हणून भाव म्हणावे की, अभिव्यक्त करणारे असतात म्हणून त्यांना भाव म्हणावे ? याविषयी असे म्हटले जाते - वाणी, अंग आणि सत्त्वाने युक्त अशा काव्याच्या अर्थाला (रसाला) जे अभिव्यक्त करतात, त्याला भाव असे म्हणतात.

भू इति (ण्यन्त:)करणे धातु: तथा च भावितं वासितं कृतमित्यनर्थारन्तरम्| लोकेऽपि च प्रसिद्धम्| अहो ह्यनेन गन्धेन रसेन वा सर्वमेव भावितमिति| तच्च व्याप्त्यर्थम्|

पदच्छेद: - भू इति (ण्यन्त:)करणे धातु: तथा च भावितं वासितं कृतम् इति अनर्थारन्तरम् (एकार्थमेव)| लोके अपि च प्रसिद्धम्| अहो हि अनेन गन्धेन रसेन वा सर्वम् एव भावितम् इति| तत् च व्याप्ति-अर्थम्|

अर्थ - 'भू' धातूचा प्रयोजकाशी (णिच्)संबंध असल्याने 'करण' या अर्थाने 'घञ्' प्रत्यय लागून 'भाव' हा शब्द तयार झाला आहे. तसेच भावित, वासित आणि कृत हे सर्व एकाच अर्थाचे आहेत. लौकिक जगात असे सर्वज्ञात आहे की, ह्या गंधाने किंवा रसाने सर्वकाही भावित होते. याठिकाणी 'भावित' शब्दाचा अर्थ परिव्याप्त, सर्वव्यापी होणे असा आहे.

श्लोकाश्चात्र -

विभावेनाहृतो योऽर्थो ह्यनुभावैस्तु गम्यते |
वागङ्गसत्त्वाभिनयैः स भाव इति संज्ञितः || १ ||

पदच्छेदः - श्लोकाः च अत्र -
विभावेन आहृतः यः अर्थः हि अनुभावैः तु गम्यते |
वाग्-अङ्ग-सत्त्व-अभिनयैः सः भावः इति संज्ञितः ||

अन्वयः - श्लोकाः च अत्र -
विभावेन आहृतः यः अर्थः अनुभावैः वागङ्गसत्त्व-अभिनयैः गम्यते सः भावः इति संज्ञितः |

अर्थ - याविषयीचे श्लोक -
विभावांद्वारे उत्पन्न झालेला जो अर्थ अनुभाव तसेच वाचिक, आंगिक आणि सात्त्विक अभिनयांच्या द्वारे अनुभवजन्य होतो, त्याला 'भाव' अशी संज्ञा आहे .

वागङ्गमुखरागेण सत्त्वेनाभिनयेन च |
कवेरन्तर्गतं भावं भावयन्भाव उच्यते || २ ||

पदच्छेदः - वाग्-अङ्ग-मुखरागेण सत्त्वेन अभिनयेन च |
कवेः अन्तर्गतं भावं भावयन् भावः उच्यते ||

अन्वयः - वागङ्गमुखरागेण सत्त्वेन अभिनयेन च कवेः अन्तर्गतं भावं भावयन् भावः उच्यते |

अर्थ - वाचिक, आंगिक, मुखराग आणि सात्त्विक अभिनयाद्वारे कवीच्या अंतःकरणात असलेल्या भावांना अभिव्यक्त करणाऱ्या कारणास 'भाव' असे म्हणतात .

नानाभिनयसंबद्धान्भावयन्ति रसानिमान् |
यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः || ३ ||

पदच्छेद : - नाना-अभिनयसंबद्धान् भावयन्ति रसान् इमान्।
यस्मात् तस्मात् अमी भावा : विज्ञेया : नाट्ययोक्तृभि : ॥

अन्वय : - यस्मात् नानाभिनयसंबद्धान् इमान् रसान् भावयन्ति तस्मात् अमी भावा: इति नाट्ययोक्तृभि : विज्ञेया :।

अर्थ - विविध अभिनयाशी संबंधित रसांचा अनुभव प्रेक्षकांपर्यंत पोहोचवणारे असल्यामुळे नाट्याचा प्रयोग करणाऱ्यांनी यास 'भाव' असे म्हटले आहे .

## ❖ विभाव आणि अनुभाव ❖

अथ विभाव इति कस्मात्। उच्यते- विभावो विज्ञानार्थ :। विभाव : कारणं निमित्तं हेतुरिति पर्याया :। विभाव्यन्तेऽनेन वागङ्गसत्त्वाभिनया इत्यतो विभाव :। यथा विभावितं विज्ञातमित्यनर्थान्तरम्।

पदच्छेद : - अथ विभाव : इति कस्मात्। उच्यते - विभाव : विज्ञानार्थ :। विभाव : कारणं निमित्तं हेतु : इति पर्याया :। विभाव्यन्ते अनेन वाग्-अङ्ग-सत्त्व-अभिनया : इत्यत : विभाव :। यथा विभावितं विज्ञातम् इति अनर्थान्तरम्।

अर्थ - यानंतर प्रश्न - 'विभाव' कशाला म्हणावे?
उत्तर - 'विभाव' या शब्दाचा अर्थ आहे 'विज्ञान' . विभाव, कारण, निमित्त आणि हेतु हे समानार्थी शब्द आहेत . ज्याद्वारे वाचिक, आंगिक आणि सात्त्विक अभिनयाचे निश्चित ज्ञान होते, त्याला विभाव असे म्हणतात . विभावित आणि विज्ञात हे एकच अर्थ व्यक्त करतात .

अत्र श्लोक:

बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रया :।
अनेन यस्मात्तेनायं विभाव इति संज्ञित: ॥ ४ ॥

पदच्छेद : - अत्र श्लोक : -
बहव : अर्था : विभाव्यन्ते वाग्-अङ्ग-अभिनय-आश्रया :।
अनेन यस्मात् तेन अयं विभाव : इति संज्ञित : ॥

अन्वयः - अत्र श्लोकः -
यस्मात् अनेन बहवः वाग्-अङ्ग-अभिनय-आश्रयाः अर्थाः विभाव्यन्ते तेन अयं विभावः इति संज्ञितः |

अर्थ - या संबंधित श्लोक पुढीलप्रमाणे -
यांच्याद्वारे वाचिक आणि आंगिक अभिनयावर आश्रित असे विविध अर्थ प्रकट केले जातात, त्यामुळे यास विभाव असे म्हटले जाते .

अथानुभाव इति कस्मात् | उच्यते -
अनुभाव्यतेऽनेन वागङ्गसत्त्वकृतोऽभिनय इति |

पदच्छेदः - अथ अनुभावः इति कस्मात् | उच्यते - अनुभाव्यते अनेन वाग्-अङ्ग-सत्त्व-कृतः अभिनयः इति |

अर्थ - (प्रश्न)- अनुभाव म्हणजे काय? (उत्तर)- यांद्वारे आंगिक, वाचिक आणि सात्त्विक अभिनय अनुभवजन्य (अनुभूतियोग्य) होतात, म्हणून त्यास 'अनुभाव' असे म्हटले जाते .

अत्र श्लोकः -
वागङ्गाभिनयेनेह यतस्त्वर्थोऽनुभाव्यते |
शाखाङ्गोपाङ्गसंयुक्तस्त्वनुभावस्ततः स्मृतः || ५ ||

पदच्छेदः - अत्र श्लोकः -
वाग्-अङ्ग- अभिनयेन इह यतः तु अर्थः अनुभाव्यते |
शाखा-अङ्ग-उपाङ्ग-संयुक्तः तु अनुभावः ततः स्मृतः || ५ ||

अन्वयः - अत्र श्लोकः
यतः वागङ्गाभिनयेन इह शाखा-अङ्ग-उपाङ्ग-संयुक्तः अर्थः अनुभाव्यते, ततः अनुभावः स्मृतः |

अर्थ - यासंबंधित श्लोक पुढीलप्रमाणे - याद्वारे नाट्यातील वाचिक आणि आंगिक अभिनयाद्वारे शाखा, अंग तसेच उपांगांसह काव्याचा अर्थ प्रदर्शित होतो, म्हणून त्यास 'अनुभाव' अशी संज्ञा आहे .

एवं ते विभावानुभावसंयुक्ता भावा इति व्याख्याता: | अतो ह्येषां भावानां सिद्धिर्भवति | तस्मादेषां भावानां विभावानुभावसंयुक्तानां लक्षणनिदर्शनान्यभिव्याख्यास्याम: | तत्र विभावानुभावौ लोकप्रसिद्धौ | लोकस्वभावानुगतत्वाच्च तयोर्लक्षणं नोच्यतेऽतिप्रसङ्गनिवृत्त्यर्थम् |

पदच्छेद: - एवं ते विभाव-अनुभाव-संयुक्ता: भावा: इति व्याख्याता: | अत: हि एषां भावानां सिद्धि: भवति | तस्मात् एषां भावानां विभाव-अनुभाव-संयुक्तानां लक्षण-निदर्शनानि अभिव्याख्यास्याम: | तत्र विभाव-अनुभावौ लोकप्रसिद्धौ | लोकस्वभाव-अनुगतत्वात् च तयो: लक्षणं न उच्यते अतिप्रसङ्ग-निवृत्त्यर्थम् |

अर्थ - भाव हे विभाव आणि अनुभावांनी युक्त असतात अशी व्याख्या सांगितली . याप्रकारे विविध भाव सिद्ध होतात . तेव्हा विभाव आणि अनुभावांसह सर्व भावांची लक्षणे आता उदाहरणांसह सांगतो . यातील विभाव आणि अनुभाव हे लोकप्रसिद्ध आहेत . ते लोकांच्या स्वभावानुसार असल्याकारणाने अतिव्याप्तीदोष टाळण्यासाठी मी त्यांची लक्षणे इथे सांगत नाही .

भवति चात्र श्लोक:<br>
लोकस्वभावसंसिद्धा लोकयात्रानुगामिन: |<br>
अनुभावा विभावाश्च ज्ञेयास्त्वभिनये बुधै: || ६ ||

पदच्छेद: - भवति च अत्र श्लोक: -<br>
लोकस्वभाव-संसिद्धा: लोकयात्रा-अनुगामिन: |<br>
अनुभावा: विभावा: च ज्ञेया: तु अभिनये बुधै: ||

अन्वय: - भवति च अत्र श्लोक: -<br>
अभिनये बुधै: लोकस्वभावसंसिद्धा: लोकयात्रानुगामिन: अनुभावा: विभावा: च ज्ञेया: |

अर्थ - यासंबंधीचा एक श्लोक असा -<br>
विद्वान लोकांनी अभिनयाच्या प्रसंगामध्ये लोकस्वभावानुसार स्वयंसिद्ध असणाऱ्या आणि लोकव्यवहाराचे अनुगमन करणाऱ्या विभावांचे व अनुभावांचे ज्ञान या लोकांतूनच प्राप्त केले पाहिजे .

## ❖ भावांचे प्रकार ❖

तत्राष्टौ भावा: स्थायिन: | त्रयस्त्रिंशदव्यभिचारिण: | अष्टौ सात्त्विका इति भेदा: | एवमेते काव्यरसाभिव्यक्तिहेतव एकोनपञ्चाशद्भावा: प्रत्यवगन्तव्या: | एभ्यश्च सामान्यगुणयोगेन रसा निष्पद्यन्ते |

पदच्छेद: - तत्र अष्टौ भावा: स्थायिन: | त्रयस्त्रिंशत् व्यभिचारिण: | अष्टौ सात्त्विका: इति भेदा: | एवम् एते काव्यरस-अभिव्यक्ति-हेतव: एकोनपञ्चाशत् भावा: प्रत्यवगन्तव्या: | एभ्य: च सामान्यगुण-योगेन रसा: निष्पद्यन्ते |

अर्थ - आठ प्रकारचे स्थायीभाव सांगितले आहेत . तेहतीस व्यभिचारी भाव आहेत आणि आठ सात्त्विक भाव आहेत . याप्रकारे, काव्यरसाच्या अभिव्यक्तीला कारणीभूत असलेले हे एकोणपन्नास भाव सांगितले आहेत . सामान्य गुणांच्या योगाने ह्याच भावातून रसांची उत्पत्ती होते .

अत्र श्लोक: -

योऽर्थो हृदयसंवादी तस्य भावो रसोद्भव: |
शरीरं व्याप्यते तेन शुष्कं काष्ठमिवाग्निना || ७ ||

पदच्छेद: - अत्र श्लोक: -
य: अर्थ: हृदयसंवादी तस्य भाव: रस-उद्भव: |
शरीरं व्याप्यते तेन शुष्कं काष्ठम् इव अग्निना || ७ ||

अन्वय: - अत्र श्लोक: -
अग्निना शुष्कं काष्ठम् इव हृदयसंवादी य: अर्थ: तस्य रसोद्भव: भाव: तेन शरीरं व्याप्यते |

अर्थ - याविषयावरील श्लोक पुढीलप्रमाणे -
जसे अग्नी सुक्या लाकडाला पूर्णपणे व्यापतो, त्याप्रमाणे भाव संपूर्ण शरीरास व्यापून टाकतात, म्हणून कथावस्तुतील शब्दांचा अर्थ हृदयापर्यंत पोहोचविण्यासाठी भाव हे रसनिष्पत्तीचे मूळ कारण आहे .

## ❖ स्थायी भाव ❖

अत्राह - यदि काव्यार्थसंश्रितैर्विभावानुभावव्यञ्जितैरेकोनपञ्चाशद्भावैः सामान्यगुणयोगेनाभिनिष्पद्यन्ते रसास्तत्कथं स्थायिन एव भावा रसत्वमाप्नुवन्ति (इति)| उच्यन्ते - (एवमेतदिति |) यथा हि समानलक्षणास्तुल्यपाणिपादोदरशरीराः समानाङ्गप्रत्यङ्गा अपि पुरुषाः कुलशीलविद्याकर्मशिल्पविचक्षणत्वाद्राजत्वमाप्नुवन्ति तत्रैव चान्येऽल्पबुद्धयस्तेषामेवानुचरा भवन्ति तथा विभावानुभावव्यभिचारिणः स्थायिभावानुपाश्रिता भवन्ति | बह्वाश्रयत्वात्स्वामिभूताः स्थायिनो भावाः | तद्वत्स्थानीयपुरुषगुणभूता अन्ये भावास्तान्गुणतया श्रयन्ते | स्थायिभावा रसत्वमाप्नुवन्ति | परिजनभूता व्यभिचारिणो भावाः |

पदच्छेदः - अत्र आह - यदि काव्य-अर्थ-संश्रितैः विभाव-अनुभाव-व्यञ्जितैः एकोनपञ्चाशत् भावैः सामान्यगुण-योगेन अभिनिष्पद्यन्ते रसाः तत् कथं स्थायिनः एव भावाः रसत्वम् आप्नुवन्ति (इति)| उच्यन्ते - (एवम् एतत् इति |) यथा हि समानलक्षणाः तुल्य-पाणि-पाद-उदर-शरीराः समान-अङ्ग-प्रत्यङ्गाः अपि पुरुषाः कुल-शील-विद्या-कर्म-शिल्प -विचक्षणत्वात् राजत्वम् आप्नुवन्ति तत्र एव च अन्ये अल्पबुद्धयः तेषाम् एव अनुचराः भवन्ति तथा विभाव-अनुभाव-व्यभिचारिणः स्थायिभावान् उपाश्रिताः भवन्ति | बहु-आश्रयत्वात् स्वामिभूताः स्थायिनः भावाः | तद्वत् स्थानीय-पुरुष-गुणभूताः अन्ये भावाः तान् गुणतया श्रयन्ते | स्थायिभावाः रसत्वम् आप्नुवन्ति | परिजनभूताः व्यभिचारिणः भावाः |

अर्थ - याविषयावरचा प्रश्न -

विभाव आणि अनुभावांच्या आश्रयात असणाऱ्या भावांद्वारे काव्याचा अर्थ व्यक्त होत असतो . या सामान्य गुणधर्म असणाऱ्या एकोणपन्नास भावांद्वारे रस निर्माण होतो . असे असताना स्थायीभावच रसत्वापर्यंत का बरे पोहोचतात?

उत्तर - असे म्हटले जाते की, ज्याप्रमाणे समान लक्षण असलेले, एकसारखे हात, पाय, पोट आणि शरीर असलेले, एकसारखे अंग-प्रत्यंग असलेले पुरुष हे कुळ, शील, विद्या, कर्म, शिल्प यांमध्ये कुशल असल्याकारणाने 'राजा' या पदापर्यंत पोहोचतात आणि दुसरे अल्पबुद्धी असणारे लोक त्यांचे अनुचर होतात त्याचप्रमाणे विभाव, अनुभाव आणि

व्यभिचारी भाव हे सर्व स्थायीभावाचा आश्रय घेतात. खूप सारे आश्रित असल्याकारणाने स्थायीभाव 'स्वामी' प्रमाणे असतात. ज्याप्रमाणे अधिकारी पुरुषांच्या गुणांचे अवलंबन होते त्याप्रमाणेच विभाव, अनुभाव आणि व्यभिचारी भाव हे स्थायीभावांचे अवलंबन करतात आणि हेच स्थायीभाव रसाच्या अभिव्यक्तीपर्यंत पोहोचतात. व्यभिचारी भाव कुटुंबातील सदस्यांप्रमाणेच आहेत.

अत्राह – को दृष्टान्त इति | यथा नरेन्द्रो बहुजनपरिवारोऽपि स एव नाम लभते नान्य: सुमहानपि पुरुष: तथा विभावानुभावव्यभिचारिपरिवृत: स्थायी भावो रसनाम लभते |
भवति चात्र श्लोक: -

पदच्छेद: - अत्र आह – क: दृष्टान्त: इति | यथा नरेन्द्र: बहुजनपरिवार: अपि स: एव नाम लभते, न अन्य: सुमहान् अपि पुरुष: तथा विभाव-अनुभाव-व्यभिचारिपरिवृत: स्थायी भाव: रसनाम लभते |
भवति च अत्र श्लोक:

अर्थ - प्रश्न – ह्याचे उदाहरण काय?
उत्तर- ज्याप्रमाणे राजाचे अनेक नोकर-चाकर असतात, परंतु नावलौकिक हे मात्र त्याचेच (राजाचेच) असते. एखादा मनुष्य कितीही थोर असला तरी त्याला ते नावलौकिक मिळत नाही. त्याचप्रमाणे विभाव, अनुभाव आणि व्यभिचारी भावांनी युक्त असे स्थायीभावच राजाप्रमाणे रसत्वापर्यंत पोहोचतात (त्या स्थायीभावांनाच रस हे नाव प्राप्त होते).
याविषयी एक श्लोक पुढीलप्रमाणे –

यथा नराणां नृपति: शिष्याणां च यथा गुरु: |
एवं हि सर्वभावानां भाव: स्थायी महानिह || ८ ||

पदच्छेद: - यथा नराणां नृपति: शिष्याणां च यथा गुरु: |
एवं हि सर्वभावानां भाव: स्थायी महान् इह ||

अन्वय: - यथा नराणां नृपति: यथा शिष्याणां च गुरु: एवं हि सर्वभावानाम् इह भाव: स्थायी महान् (अस्ति)|

अर्थ - ज्याप्रमाणे मनुष्यांमध्ये राजा, शिष्यांमध्ये गुरू महान असतो, त्याचप्रमाणे सर्व भावांमध्ये स्थायीभाव हे महान आहेत .

लक्षणं खलु पूर्वमभिहितमेषां रससंज्ञकानाम् | इदानीं भावसामान्यलक्षणमभिधास्याम: | तत्र स्थायिभावान्वक्ष्याम:|

पदच्छेद:- लक्षणं खलु पूर्वम् अभिहितम् एषां रससंज्ञकानाम् | इदानीं भाव-सामान्य-लक्षणम् अभिधास्याम :| तत्र स्थायिभावान् वक्ष्याम:|

अर्थ - ज्याला रस ही संज्ञा आहे, त्याची लक्षणे मी पूर्वीच सांगितली आहेत . आता इथे पुढे भावांची सामान्य लक्षणे मी सांगत आहे . त्यापैकी आता स्थायीभावाविषयी सांगतो .

### ❖ रती ❖

रतिर्नाम प्रमोदात्मिका ऋतुमाल्यानुलेपनाभरणभोजनवरभवनानुभवनाप्रातिकूल्यादिभिर्विभावै: समुत्पद्यते|

पदच्छेद:- रति: नाम प्रमोद-आत्मिका ऋतुमाल्य-अनुलेपन-आभरण-भोजन-वरभवन-अनुभवन-अप्रातिकूल्य-आदिभि: विभावै: समुत्पद्यते|

अर्थ - आनंद ज्याचा आत्मा आहे असा हा 'रति' स्थायीभाव ऋतू, माला, अनुलेपन, आभरण, भोजन, उत्तमघराचा उपभोग आणि प्रतिकुलतेचा अभाव या विभावांनी उत्पन्न होतो .

तामभिनयेत्स्मितवदनमधुरकथनभ्रूक्षेपकटाक्षादिभिरनुभावै: |

पदच्छेद:- ताम् अभिनयेत् स्मितवदन-मधुरकथन-भ्रूक्षेप-कटाक्ष-आदिभि: अनुभावै:|

अर्थ - हसरा चेहरा, मधुर बोलणे, भुवयांची हालचाल व कटाक्ष इ . अनुभावांनी याचा अभिनय करावा .

अत्र श्लोक: -

इष्टार्थविषयप्राप्त्या रतिरित्युपजायते |
सौम्यत्वादभिनेया सा वाङ्माधुर्याङ्गचेष्टितै: || ९ ||

पदच्छेद : - अत्र श्लोक : -
इष्ट-अर्थ-विषय-प्राप्त्या रति: इति उपजायते |
सौम्यत्वात् अभिनेया सा वाग्-माधुर्य-अङ्ग-चेष्टितै : || ९ ||

अन्वय : - अत्र श्लोक : - इष्ट-अर्थ-विषय-प्राप्त्या रति : इति उपजायते | सा वाग्-माधुर्य-अङ्ग-चेष्टितै : सौम्यत्वात् अभिनेया |

अर्थ - यासंबंधित श्लोक पुढीलप्रमाणे - इष्ट वस्तूच्या प्राप्तीमुळे रती हा स्थायीभाव उत्पन्न होतो . मधुर शब्द आणि अंग चेष्टा यांद्वारे सौम्यपणे याचा अभिनय करावा .

❖ हास ❖

हासो नाम - परचेष्टानुकरणकुहकासम्बद्धप्रलापपौरोभाग्यमौर्ख्यादिभिर्विभावै: समुत्पद्यते | तमभिनयेत्पूर्वोक्तैर्हसितादिभिरनुभावै: |

पदच्छेद : - हास: नाम परचेष्टा-अनुकरण-कुहक-असम्बद्धप्रलाप-पौरोभाग्य-मौर्ख्य-आदिभि : विभावै : समुत्पद्यते |
तम् अभिनयेत् पूर्वोक्तै : हसित-आदिभि : अनुभावै : |

अर्थ - 'हास' नावाचा स्थायीभाव दुसऱ्यांच्या चेष्टांचे अनुकरण, कुहक (कुत्सित हसणे), असंबद्ध बोलणे, कुटिल कृत्य तसेच मूर्खपणा इ . विभावांनी उत्पन्न होतो .
पूर्वी (सहाव्या अध्यायात) सांगितलेल्या 'हसित' इत्यादी अनुभावांनी याचा अभिनय केला जातो .

भवति चात्र श्लोक:
परचेष्टानुकरणाद्धास: समुपजायते |
स्मितहासातिहसितैरभिनेय: स पण्डितै: || १० ||

पदच्छेद : - भवति च अत्र श्लोक : |
परचेष्टा-अनुकरणात् हास : समुपजायते |
स्मितहास-अतिहसितै : अभिनेय : स : पण्डितै : || १० ||

अन्वय : - अत्र च श्लोक : भवति | परचेष्टा-अनुकरणात् हास : समुपजायते | स्मित-हास-अतिहसितै : पण्डितै : अभिनेय : स : |

अर्थ - या संबंधित श्लोक पुढीलप्रमाणे - दुसऱ्यांच्या क्रियांचे अनुकरण केल्याने 'हास' या स्थायीभावाची उत्पत्ती होते . विद्वानांच्या मते, स्मित, हसित, अतिहसित यांनी त्याचा अभिनय करावा .

## ❖ शोक ❖

शोको नाम - इष्टजनवियोगविभवनाशवधबन्धदु :खानुभवनादिभिर्विभावै : समुत्पद्यते | तस्यास्रपातपरिदेवितविलपितवैवर्ण्यस्वरभेदस्रस्तगात्रताभूमिपतनसस्वनरुदिताक्रन्दितदीर्घनि :श्वसितजडतोन्मादमोहमरणादिभिरनुभावैरभिनय : प्रयोक्तव्य : |

पदच्छेद : - शोक : नाम इष्टजनवियोग-विभवनाश-वध-बन्ध-दु :ख-अनुभवन-आदिभि : विभावै : समुत्पद्यते | तस्य अस्रपात-परिदेवित-विलपित-वैवर्ण्य-स्वरभेद-स्रस्तगात्रता-भूमिपतन-सस्वनरुदित-आक्रन्दित-दीर्घनि :श्वसित-जडता-उन्माद-मोह-मरण-आदिभि : अनुभावै : अभिनय : प्रयोक्तव्य : |

अर्थ - प्रियजनांशी झालेला वियोग, वैभवाचा नाश, वध, बंधन आणि दु :खाचा अनुभव इ . विभावांद्वारे 'शोक' नावाचा स्थायीभाव उत्पन्न होतो .
अश्रुपात, परिताप, विलाप, वर्ण बदलणे, स्वर बदलणे, अंग शिथिल होणे, जमिनीवर पडणे, सस्वर रडणे, आक्रोश करीत रडणे, दीर्घ नि :श्वास सोडणे, जडता, उन्माद, मोह, मरण इ . अनुभावांनी 'शोक' या स्थायीभावाचा अभिनय केला जातो .

रुदितमत्र त्रिविधम् - आनन्दजमार्तिजमीर्ष्यासमुद्भवं चेति | भवन्ति चात्रार्या : |

पदच्छेद : - रुदितम् अत्र त्रिविधम् - आनन्दजम् आर्तिजम् ईर्ष्यासमुद्भवं च इति | भवन्ति च अत्र आर्या : |

अर्थ - रडणे हे तीन प्रकारचे असते - आनंदाने, दु :खाने, ईर्ष्येने . यासंबंधी परंपरागत आर्या पुढीलप्रमाणे -

[आनन्देर्ष्यार्तिकृतं त्रिविधं रुदितं सदा बुधैर्ज्ञेयम् |
तस्य त्वभिनययोगान्विभावगतित: प्रवक्ष्यामि || ]

पदच्छेद: - [आनन्द-ईर्ष्या-आर्तिकृतं त्रिविधं रुदितं सदा बुधै: ज्ञेयम् |
तस्य तु अभिनययोगान् विभावगतित: प्रवक्ष्यामि ||]

अन्वय: - [आनन्द-ईर्ष्या-आर्तिकृतं त्रिविधं रुदितं बुधै: सदा ज्ञेयम् | विभावगतित: तस्य अभिनययोगान् प्रवक्ष्यामि ||]

अर्थ - आनंद, ईर्ष्या आणि दु:खाने उत्पन्न होणारे असे तीन प्रकारचे रडणे बुद्धिमानांनी जाणून घ्यावेत. विभाव वगैरेंनी उत्पन्न होणाऱ्या याच्या अभिनयाविषयी मी सांगतो.

हर्षोत्फुल्लकपोलं सानुस्मरणादपाङ्गविसृतास्रम् |
रोमाञ्चगात्रमनिभृतमानन्दसमुद्भवं भवति || ११ ||

पदच्छेद: - हर्षोत्फुल्लकपोलं सानुस्मरणात् अपाङ्गविसृतास्रम् |
रोमाञ्चगात्रम् अनिभृतम् आनन्दसमुद्भवं भवति ||

अन्वय: - आनन्दसमुद्भवं (रुदनम्) अनिभृतं हर्षोत्फुल्लकपोलं सानुस्मरणात् अपाङ्गविसृतास्रं रोमाञ्चगात्रं भवति |

अर्थ - आनंदाने उत्पन्न होणाऱ्या रुदनामध्ये गाल हर्षामुळे फुललेले असतात. स्मरणामुळे डोळ्यांच्या कोपऱ्यामधून अश्रू ओघळतात. शरीर आनंदाने रोमांचित होते.

पर्याप्तविमुक्तास्रं सस्वनमस्वस्थगात्रगतिचेष्टम् |
भूमिनिपातनिवर्तितविलपितमित्यार्तिजं भवति || १२ ||

पदच्छेद: - पर्याप्त-विमुक्त-अस्रं सस्वनम् अस्वस्थ-गात्र-गति-चेष्टम् |
भूमि-निपात-निवर्तित-विलपितम् इति आर्तिजं भवति ||

अन्वय: - पर्याप्तविमुक्तास्रं सस्वनम् अस्वस्थगात्रगतिचेष्टं भूमिनिपातनिवर्तितविलपितम् इति आर्तिजं भवति |

अर्थ - दु:खामुळे किंवा पीडेमुळे उत्पन्न होणाऱ्या रुदनामध्ये उच्च स्वरात रडणे, खूप अश्रुप्रवाह, शरीर अस्वस्थ होऊन गती आणि क्रियांमध्ये शिथिलता येणे, जमिनीवर पडणे, लोळणे, विलाप करणे इ. क्रिया केल्या जातात.

प्रस्फुरितौष्ठकपोलं सशिर:कम्पं तथा सनि:श्वासम् |
भ्रुकुटीकटाक्षकुटिलं स्त्रीणामीर्ष्याकृतं भवति || १३ ||

पदच्छेद : - प्रस्फुरित-ओष्ठकपोलं सशिर:कम्पं तथा सनि:श्वासम् |
भ्रुकुटीकटाक्षकुटिलं स्त्रीणाम् ईर्ष्याकृतं भवति ||१३ ||

अन्वय : - स्त्रीणाम् ईर्ष्याकृतं रूदनं प्रस्फुरित-ओष्ठकपोलं सशिर:कम्पं तथा सनि:श्वासं भ्रुकुटीकटाक्षकुटिलं भवति |

अर्थ - ईर्ष्येमुळे उत्पन्न होणाऱ्या रुदनामध्ये स्त्रियांचे गाल व ओठ थरथरतात . डोके कंपित होते आणि दीर्घ नि:श्वास निघतात आणि भुवया, नेत्रकटाक्ष वक्र होतात .

स्त्रीनीचप्रकृतिष्वेष शोको व्यसनसम्भव: |
धैर्येणोत्तममध्यानां नीचानां रुदितेन च || १४ ||

पदच्छेद : - स्त्री-नीच-प्रकृतिषु एष : शोक : व्यसन-सम्भव : |
धैर्येण उत्तम-मध्यानां नीचानां रुदितेन च ||१४ ||

अन्वय : - एष : व्यसनसम्भव : शोक : स्त्रीनीचप्रकृतिषु (दृश्यते) उत्तममध्यानां धैर्येण नीचानां रुदितेन च (दृश्यते) |

अर्थ - आपत्तीमुळे निर्माण होणारा शोक प्रामुख्याने स्त्री व नीच व्यक्तींमध्ये आढळतो . हा शोक उत्तम व मध्यम व्यक्तींमध्ये धैर्ययुक्त असतो व नीच व्यक्तींमध्ये रुदनयुक्त असतो .

## ❖ क्रोध ❖

क्रोधो नाम आधर्षणाक्रुष्टकलहविवादप्रतिकूलादिभिर्विभावै: समुत्पद्यते | अस्य विकृष्टनासापुटोद्वृत्तनयनसन्दष्टौष्ठपुटगण्डस्फुरणादिभिरनुभावैरभिनय : प्रयोक्तव्य : |

पदच्छेद : - क्रोध : नाम आधर्षण-आक्रुष्ट-कलह-विवाद-प्रतिकूलादिभि : विभावै : समुत्पद्यते | अस्य विकृष्टनासापुट-उद्वृत्तनयन-सन्दष्टओष्ठपुट-गण्डस्फुरणादिभि : अनुभावै : अभिनय : प्रयोक्तव्य : |

अर्थ - संघर्ष, आक्रोश, कलह, विवाद, प्रतिकूलता इत्यादी विभावांनी क्रोध हा स्थायीभाव उत्पन्न होतो. नाक फुगवणे, डोळे चढवणे, ओठ चावणे, गाल फडफडवणे इ. अनुभावांद्वारे ह्याचा अभिनय करावा.

रिपुजो गुरुजश्चैव प्रणयिप्रभवस्तथा |
भृत्यजः कृतकश्चेति क्रोधः पञ्चविधः स्मृतः || १५ ||

पदच्छेदः - रिपुजः गुरुजः च एव प्रणयिप्रभवः तथा |
भृत्यजः कृतकः च इति क्रोधः पञ्चविधः स्मृतः ||

अन्वयः - रिपुजः गुरुजः प्रणयिप्रभवः भृत्यजः कृतकः च इति क्रोधः पञ्चविधः स्मृतः |

अर्थ - क्रोध हा पाच प्रकारचा असतो.
१. रिपुज (शत्रुद्वारे उत्पन्न झालेला) २. गुरुज (गुरूमुळे उत्पन्न झालेला) ३. प्रणयिप्रभव (प्रेमापोटी) ४. भृत्यज (सेवकामुळे) तसेच ५. कृत्रिम.

अत्रार्या भवन्ति -
भ्रुकुटीकुटिलोत्कटमुखः सन्दष्टौष्ठः स्पृशन्करणेन करम् |
क्रुद्धः स्वभुजप्रेक्षी शत्रौ निर्यन्त्रणं रुष्येत् || १६ ||

पदच्छेदः - अत्र आर्याः भवन्ति -
भ्रुकुटीकुटिल-उत्कटमुखः सन्दष्टौष्ठः स्पृशन् करणेन करम् |
क्रुद्धः स्वभुजप्रेक्षी शत्रौ निर्यन्त्रणं रुष्येत् || १६ ||

अन्वयः - अत्र आर्याः भवन्ति -
शत्रौ क्रुद्धः भ्रुकुटीकुटिलोत्कटमुखः सन्दष्टौष्ठः करणेन करं स्पृशन् निर्यन्त्रणं स्वभुजप्रेक्षी रुष्येत् |

अर्थ - याविषयी परंपरेने प्राप्त झालेल्या आर्या आहेत. त्या पुढीलप्रमाणे -
शत्रूमुळे होणाऱ्या क्रोधामध्ये, क्रुद्ध व्यक्तीच्या भुवया कुटिल होतात, तोंड भयानक होते, दातांनी ओठ चावले जातात, हात एकमेकांवर घासले जातात, वारंवार स्वतःच्या भुजांकडे पाहिले जाते.

किञ्चिदवाङ्मुखदृष्टिः सास्रस्वेदापमार्जनपरश्च ।
अव्यक्तोल्बणचेष्टो गुरौ विनययन्त्रितो रुष्येत् ॥ १७ ॥

पदच्छेदः - किञ्चित् अवाङ्-मुखदृष्टिः स-अस्र-स्वेद-अपमार्जनपरः च ।
अव्यक्त-उल्बणचेष्टः गुरौ विनय-यन्त्रितः रुष्येत् ॥ १७ ॥

अन्वयः - गुरौ विनययन्त्रितः (क्रुद्धः) किञ्चित् अवाङ्मुखदृष्टिः सास्र-स्वेद-अपमार्जनपरः अव्यक्त-उल्बणचेष्टः रुष्येत् ।

अर्थ - गुरुजनांच्या बाबतीत विनयाने नियंत्रित क्रुद्ध व्यक्तीच्या क्रोधामध्ये डोळे व तोंड किंचित खाली झुकलेले असते, डोळ्यात अश्रू येतात, घाम पुसला जातो आणि कोणत्याही उद्भट प्रतिक्रिया अव्यक्त ठेवल्या जातात .

अल्पतरप्रविचारो विकिरन्नश्रूण्यपाङ्गविक्षेपैः ।
सभ्रुकुटीस्फुरितौष्ठः प्रणयोपगतां प्रियां रुष्येत् ॥ १८ ॥

पदच्छेदः - अल्पतरप्रविचारः विकिरन् अश्रूणि अपाङ्गविक्षेपैः ।
सभ्रुकुटी-स्फुरित-ओष्ठः प्रणय-उपगतां प्रियां रुष्येत् ॥

अन्वयः - प्रणय-उपगतां प्रियाम्, अपाङ्ग-विक्षेपैः अल्पतरप्रविचारः अश्रूणि विकिरन् सभ्रुकुटी-स्फुरित-ओष्ठः रुष्येत् ।

अर्थ - प्रिय व्यक्तींच्या विषयी क्रोध दर्शविताना शारीरिक हालचाली अत्यंत शिथिल होतात . डोळ्याच्या कोपऱ्यातून पाहत अश्रू येतात आणि भुवया व ओठ कंपित होतात .

अथ परिजने तु रोषस्तर्जननिर्भर्त्सनाक्षिविस्तारैः ।
विप्रेक्षणैश्च विविधैरभिनेयः क्रूरतारहितः ॥ १९ ॥

पदच्छेदः - अथ परिजने तु रोषः तर्जन-निर्भर्त्सन-अक्षिविस्तारैः ।
विप्रेक्षणैः च विविधैः अभिनेयः क्रूरतारहितः ॥

अन्वयः - अथ परिजने तु क्रूरतारहितः रोषः तर्जन-निर्भर्त्सन-अक्षिविस्तारैः विविधैः विप्रेक्षणैः च अभिनेयः ।

अर्थ - नोकराविषयीच्या क्रोधामध्ये, क्रूरतारहित क्रोधाचा अभिनय रागावणे, ओरडणे, डोळे मोठे करणे आणि कठोर दृष्टीने पाहणे इ. विविध अनुभाव केले जातात.

कारणमवेक्षमाण: प्रायेणायासलिङ्गसंयुक्त: |
वीररसान्तरचारी कार्य: कृतको भवति कोप: || २० ||

पदच्छेद: - कारणम् अवेक्षमाण: प्रायेण आयास-लिङ्गसंयुक्त: |
वीररसान्तरचारी कार्य: कृतक: भवति कोप: || २० ||

अन्वय: - कारणम् अवेक्षमाण: प्रायेण आयास-लिङ्गसंयुक्त: वीररसान्तरचारी कृतक: कोप: कार्य: भवति |

अर्थ - कोणत्यातरी कारणाने उत्पन्न झालेला तसेच मुख्यत: प्रयत्नपूर्वक चिह्नांनी युक्त आणि वीर रसामध्ये संचार करणारा असा हा कृत्रिम क्रोध असतो.

❖ उत्साह ❖

उत्साहो नाम - उत्तमप्रकृति: | स चाविषादशक्तिधैर्यशौर्यादिभिर्विभावैरुत्पद्यते | तस्य धैर्यत्याग - वैशारद्यादिभिरनुभावैरभिनय: प्रयोक्तव्य: |

पदच्छेद: - उत्साह: नाम - उत्तमप्रकृति: | स: च अविषाद-शक्ति-धैर्य-शौर्य-आदिभि: विभावै: उत्पद्यते | तस्य धैर्य-त्याग-वैशारद्य-आदिभि: अनुभावै: अभिनय: प्रयोक्तव्य: |

अर्थ - उत्साह हा स्थायीभाव उत्तम प्रकृतीच्या व्यक्तींसंबंधी मानला जातो. अविषाद, शक्ती, धैर्य, शौर्य इ. विभावांनी तो उत्पन्न होतो. त्याचा धैर्य, त्याग, वैशारद्य इ. अनुभावांनी अभिनय करावा. (साम, दान, दंड आणि भेदाचा कुशल वापर म्हणजे वैशारद्य.)

अत्र श्लोक: -

असम्मोहादिभिर्व्यक्तो व्यवसायनयात्मक: |
उत्साहस्त्वभिनेय: स्यादप्रमादोत्थितादिभि: || २१ ||

पदच्छेद: - अत्र श्लोक: -
असम्मोह-आदिभि: व्यक्त: व्यवसाय-नयात्मक: |
उत्साह: तु अभिनेय: स्यात् अप्रमाद-उत्थितादिभि: || २१ ||

अन्वय: - अत्र श्लोक: -

असम्मोह-आदिभि: अप्रमाद-उत्थितादिभि: व्यवसाय-नयात्मक: व्यक्त: उत्साह: तु अभिनेय: स्यात्|

अर्थ - यासंबंधित श्लोक पुढीलप्रमाणे -

असंमोह इ. नी व्यक्त होणाऱ्या, उद्योग आणि नीतीने युक्त अशा उत्साहाचा अभिनय प्रमादहीनता, आनंद इ. द्वारे करावा.

❖ भय ❖

भयं नाम - स्त्रीनीचप्रकृतिकम् | गुरुराजापराधश्वापदशून्यागाराटवीपर्वतगहनगजाहिदर्शननिर्भत्सनकान्तारदुर्दिननिशान्धकारोलकनक्तञ्चरारावश्रवणादिभिर्विभावै: समुत्पद्यते | तस्य प्रकम्पितकरचरणहृदयकम्पनस्तम्भमुखशोषजिह्वापरिलेहनस्वेदवेपथुत्रासपरित्राणान्वेषणधावनोत्क्रुष्टादिभिरनुभावैरभिनय: प्रयोक्तव्य:|

पदच्छेद: - भय: नाम - स्त्रीनीचप्रकृतिकम् | गुरुराजाअपराध-श्वापद-शून्यागार-अटवीपर्वतगहन गज-अहिदर्शन-निर्भर्त्सन-कान्तार-दुर्दिन-निशाअन्धकारउलक-नक्तञ्चर-आराव-श्रवण-आदिभि: विभावै: समुत्पद्यते|

तस्य प्रकम्पित-करचरण-हृदयकम्पन-स्तम्भमुखशोष-जिह्वापरिलेहन-स्वेदवेपथु-त्रास- परित्राण-अन्वेषण-धावन-उत्क्रुष्ट-आदिभि: अनुभावै: अभिनय: प्रयोक्तव्य:|

अर्थ - भय नावाचा स्थायीभाव स्त्री आणि नीच व्यक्तींच्या स्वभावांशी संबंधित असतो. गुरू व राजांचा केलेला अपराध, हिंस्र पशू, रिकामे घर, दाट जंगलात फिरणे, पर्वत हत्ती आणि साप पाहणे, पतीची निर्भत्सना करणे, कोसळणारा पाऊस, काळोखी रात्र, घुबड तसेच इतर निशाचरांचे ध्वनी ऐकणे इत्यादी विभावांनी 'भय' हा स्थायीभाव उत्पन्न होतो. थरथरणारे हात-पाय, हृदय धडधडणे, स्तंभ, तोंड सुकणे, जिभेने चाटणे, घाम, वेपथु, त्रास, सुरक्षिततेचा शोध, धावणे, ओरडणे इत्यादी अनुभावांनी त्याचा अभिनय करावा.

अत्र श्लोका:

गुरुराजापराधेन रौद्राणां चापि दर्शनात्|
श्रवणादपि घोराणां भयं मोहेन जायते ||२२||

पदच्छेद : - अत्र श्लोका :
गुरु-राजा-अपराधेन रौद्राणां च अपि दर्शनात् |
श्रवणात् अपि घोराणां भयं मोहेन जायते ॥ २२ ॥

अन्वय : - अत्र श्लोका :
गुरुराजापराधेन रौद्राणां दर्शनात् घोराणां श्रवणात् अपि च मोहेन भयं जायते |

अर्थ - यासंबंधित श्लोक पुढीलप्रमाणे -
गुरू, राजांच्या प्रति केलेला अपराध, रौद्र प्राण्यांचे दर्शन, घोर ध्वनीचे श्रवण आणि मोह यांमुळे भय उत्पन्न होतो .

गात्रकम्पनवित्रासैर्वक्त्रशोषणसम्भ्रमै : |
विस्फारितेक्षणै : कार्यमभिनेयक्रियागुणै : ॥ २३ ॥

पदच्छेद : - गात्र-कम्पन-वित्रासै : वक्त्र-शोषण-सम्भ्रमै : |
विस्फारित-ईक्षणै : कार्यम् अभिनेय-क्रिया-गुणै : ॥ २३ ॥

अन्वय : - गात्रकम्पनवित्रासै : वक्त्रशोषणसम्भ्रमै : विस्फारितेक्षणै : अभिनेयक्रियागुणै : (भयं) कार्यम् |

अर्थ - शरीर थरथर कापणे, घाबरणे, तोंड सुकणे, संभ्रम (जलद हालचाली होणे), नेत्र विस्फारित होणे इ . अनुभावांनी त्याचा अभिनय करावा .

सत्त्ववित्रासनोद्भूतं भयमुत्पद्यते नृणाम् |
स्रस्ताङ्गाक्षिनिमेषैस्तदभिनेयं तु नर्तकै : ॥ २४ ॥

पदच्छेद : - सत्त्व-वित्रासन-उद्भूतं भयम् उत्पद्यते नृणाम् |
स्रस्त-अङ्ग-अक्षि-निमेषै : तत् अभिनेयं तु नर्तकै : ॥ २४ ॥

अन्वय : - सत्त्ववित्रासनोद्भूतं भयं नृणाम् उत्पद्यते | नर्तकै : तु स्रस्त-अङ्ग-अक्षिनिमेषै : तत् अभिनेयम् |

अर्थ - मनुष्यांमध्ये भूत, प्रेत इ . पासून भय उत्पन्न होतो . नर्तकांनी (नटांनी) शिथिल अंग आणि डोळे मिटून त्याचा अभिनय करावा .

अत्रार्या भवति
करचरणहृदयकम्पैर्मुखशोषणवदनलेहनस्तम्भैः।
सम्भ्रान्तवदनवेपथुसन्त्रासकृतैरभिनयोऽस्य ॥ २५ ॥

पदच्छेदः - अत्र आर्या भवति -
कर-चरण-हृदय-कम्पैः मुख-शोषण-वदन-लेहन-स्तम्भैः।
सम्भ्रान्त-वदन-वेपथु-सन्त्रास-कृतैः अभिनयः अस्य ॥ २५ ॥

अन्वयः - अत्र आर्या भवति -
करचरणहृदयकम्पैः मुखशोषणवदनलेहनस्तम्भैः सम्भ्रान्तवदनवेपथुसन्त्रासकृतैः अस्य अभिनयः (कर्तव्यः)।

अर्थ - यासंबंधित आर्या पुढीलप्रमाणे -
हात, पाय आणि हृदय कंपित होणे, तोंड सुकणे, ओठांवर जीभ फिरविणे, स्तंभित होणे, मुख संभ्रमित होणे, थरथर कापणे अशा भय दाखविणाऱ्या अनुभावांनी याचा अभिनय करावा.

## ❖ जुगुप्सा ❖

जुगुप्सा नाम स्त्रीनीचप्रकृतिका। सा चाहृद्यदर्शनश्रवणादिभिर्विभावैः समुत्पद्यते। तस्याः सर्वाङ्गसङ्कोचनिष्ठीवनमुखविकूणनहृल्लेखादिभिरनुभावैरभिनयः प्रयोक्तव्यः।

पदच्छेदः - जुगुप्सा नाम स्त्री-नीच-प्रकृतिका। सा च अहृद्य-दर्शन-श्रवण-आदिभिः विभावैः समुत्पद्यते। तस्याः सर्वाङ्ग-सङ्कोच-निष्ठीवन-मुखविकूणन-हृल्लेख-आदिभिः अनुभावैः अभिनयः प्रयोक्तव्यः।

अर्थ - जुगुप्सा हा स्थायीभाव स्त्री आणि नीच स्वभावाच्या व्यक्तींच्या संदर्भात मानण्यात आलेला आहे. ही नावडत्या वस्तूचे दर्शन आणि श्रवण अशा विभावांनी उत्पन्न होते. सर्वांग आकसणे, थुंकणे, तोंड वेंगाडणे, हृदयपीडा इत्यादी अनुभावांनी त्याचा अभिनय करावा.

भवति चात्र श्लोक: -
नासाप्रच्छादनेनेह गात्रसङ्कोचनेन च |
उद्वेजनै: सहृल्लेखैर्जुगुप्सामभिनिर्दिशेत् || २६ ||

पदच्छेद: - भवति च अत्र श्लोक: -
नासा-प्रच्छादनेन इह गात्र-सङ्कोचनेन च |
उद्वेजनै: सहृल्लेखै: जुगुप्साम् अभिनिर्दिशेत् || २६ ||

अन्वय: - अत्र च श्लोक: भवति -
नासाप्रच्छादनेन गात्रसङ्कोचनेन च उद्वेजनै: सहृल्लेखै: इह जुगुप्साम् अभिनिर्दिशेत् |

अर्थ - यासंबंधित श्लोक पुढीलप्रमाणे -
नाक झाकणे (बहुधा हाताने), अंग आकसून घेणे, घृणा आणि हृदयाची वेदना इ. अनुभावांद्वारे जुगुप्सेचा अभिनय करावा.

### ❖ विस्मय ❖

विस्मयो नाम - मायेन्द्रजालमानुषकर्मातिशयचित्रपुस्तशिल्पविद्यातिशयादिभिर्विभावै: समुत्पद्यते | तस्य नयनविस्तारानिमेषप्रेक्षितभ्रूक्षेपरोमहर्षणशिर: कम्पसाधुवादादिभिरनुभावैरभिनय: प्रयोक्तव्य: |

पदच्छेद: - विस्मय: नाम - माया-इन्द्रजाल-मानुषकर्म-अतिशयचित्रपुस्त-शिल्पविद्या-अतिशय-आदिभि: विभावै: समुत्पद्यते | तस्य नयनविस्तार-अनिमेष-प्रेक्षित-भ्रूक्षेप-रोमहर्षण-शिर:कम्प-साधुवाद-आदिभि: अनुभावै: अभिनय: प्रयोक्तव्य: |

अर्थ - विस्मय नामक स्थायीभाव माया, इंद्रजाल, असाधारण मनुष्यकर्म, चित्रकला, पुस्तकला (मातीकाम), शिल्प इ. विषयांमधील महान कार्य इ. विभावांनी उत्पन्न होतो. त्याचा अभिनय विस्फारित डोळे, भुवयांच्या हालचाली, रोमांच, मान हलवून, साधुवाद (वाह, वाह उच्चारण करणे)वगैरे अनुभावांनी करावा.

भवति चात्र श्लोक: |
कर्मातिशयनिर्वृत्तो विस्मयो हर्षसम्भव: |
सिद्धिस्थाने त्वसौसाध्य: प्रहर्षपुलकादिभि: || २७ ||

पदच्छेद : - भवति च अत्र श्लोक : -

कर्म-अतिशय-निर्वृत्त : विस्मय : हर्षसम्भव : |

सिद्धिस्थाने तु असौ साध्य : प्रहर्ष-पुलक-आदिभि : || २७ ||

अन्वय : - अत्र च श्लोक : भवति -

सिद्धिस्थाने कर्मातिशयनिर्वृत्त : हर्षसम्भव : असौ विस्मय : प्रहर्षपुलकादिभि : साध्य : |

अर्थ - यासंबंधित श्लोक पुढीलप्रमाणे -

यशप्राप्तीच्या वेळी असाधारण कर्तृत्वाने प्राप्त झालेल्या आनंदामुळे उत्पन्न झालेल्या विस्मयाचा अभिनय अत्यंत हर्ष तसेच पुलकित अंगाने करावा .

एवमेते स्थायिनो भावा रससंज्ञा : प्रत्यवगन्तव्या : |

पदच्छेद : - एवम् एते स्थायिन : भावा : रससंज्ञा : प्रत्यवगन्तव्या : |

अर्थ - अशाप्रकारे रसापर्यंत पोहोचणाऱ्या या स्थायीभावांना योग्यरीत्या जाणून घ्यावे .

## ❖ व्यभिचारी भाव ❖

व्यभिचारिण इदानीं व्याख्यास्याम : | अत्राह - व्यभिचारिण इति कस्मात् | उच्यते - वि अभि इत्येतावुपसर्गौ | चर इति गत्यर्थो धातु : | विविधमाभिमुख्येन रसेषु चरन्तीति व्यभिचारिण : | वागङ्गसत्त्वोपेता : प्रयोगे रसान्नयन्तीति व्यभिचारिण : अत्राह - कथं नयन्तीति | उच्यते- लोकसिद्धान्त एष : - यथा सूर्य इदं दिनं नक्षत्रं वा नयतीति | न च तेन बाहुभ्यां स्कन्धेन वा नीयते | किं तु लोकप्रसिद्धमेतत् | यथेदं सूर्यो नक्षत्रं दिनं वा नयतीति | एवमेते व्यभिचारिण इत्यवगन्तव्या : | तानिह सङ्ग्रहाभिहितांस्त्रयस्त्रिशद्व्यभिचारिणो भावान् वर्णयिष्याम : |

पदच्छेद : - व्यभिचारिण : इदानीं व्याख्यास्याम : |

अत्र आह - व्यभिचारिण : इति कस्मात् |

उच्यते - वि अभि इति एतौ उपसर्गौ | चर इति गत्यर्थ : धातु : | विविधम् आभिमुख्येन रसेषु चरन्ति इति व्यभिचारिण : | वाग्-अङ्ग-सत्त्व-उपेता : प्रयोगे रसान् नयन्ति इति व्यभिचारिण : | अत्र आह - कथं नयन्ति इति |

उच्यते - लोकसिद्धान्त: एष: - यथा सूर्य: इदं दिनं नक्षत्रं वा नयति इति | न च तेन बाहुभ्यां स्कन्धेन वा नीयते | किं तु लोकप्रसिद्धम् एतत् | यथा इदं सूर्य: नक्षत्रं दिनं वा नयति इति | एवम् एते व्यभिचारिण: इति अवगन्तव्या: | तान् इह सङ्ग्रह-अभिहितान् त्रयस्त्रिंशत् व्यभिचारिण: भावान् वर्णयिष्याम: |

अर्थ - आता व्यभिचारी भावांविषयी सांगणार आहे .

प्रश्न - यांना व्यभिचारी असे का म्हणतात?

उत्तर - 'वि' आणि 'अभि' असे दोन उपसर्ग आहेत . 'चर' हा गत्यर्थक (चालणे किंवा गतिदर्शक) धातू आहे . अनेक प्रकारच्या रसांमध्ये जो त्या रसाकडे उन्मुख होऊन संचार करतो त्यास व्यभिचारी असे म्हटले आहे . वाचिक, आंगिक आणि सात्त्विक अभिनयाने युक्त होऊन प्रयोगाच्या वेळी रसांपर्यंत घेऊन जातात ते व्यभिचारी भाव होत .

प्रश्न - कसे काय घेऊन जातात?

उत्तर - हा लोकसिद्धांत आहे . जसा सूर्य हा दिवस किंवा नक्षत्र घेऊन येतो . याठिकाणी सूर्य स्वत: त्याच्या हातांनी दिवस किंवा नक्षत्र खांद्यांवर किंवा बाहूंवर नेत नाही . तरीही हे जगात प्रसिद्धच आहे की सूर्य नक्षत्र किंवा दिवस घेऊन येतो . त्याचप्रमाणे या व्यभिचारी भावांविषयी पण समजले पाहिजे . संग्रह स्वरूपातील ह्या तेहतीस व्यभिचारी भावांचे वर्णन आता मी सांगतो .

## ❖ निर्वेद ❖

तत्र निर्वेदो नाम - दारिद्र्यव्याध्यवमानाधिक्षेपाक्रुष्टक्रोधताडनेष्टजनवियोगतत्त्वज्ञानादिभिर्विभावै: समुत्पद्यते स्त्रीनीचकुसत्त्वानाम् | रुदितनि:श्वसितोच्छ्वसितसम्प्रधारणादिभिरनुभावैस्तमभिनयेत् |

पदच्छेद: - तत्र निर्वेद: नाम दारिद्र्य-व्याधि-अवमान-अधिक्षेप-आक्रुष्ट-क्रोध-ताडन-इष्टजनवियोग-तत्त्वज्ञान-आदिभि: विभावै: समुत्पद्यते स्त्री-नीच-कुसत्त्वानाम् | रुदित-नि:श्वसित-उच्छ्वसित-सम्प्रधारण-आदिभि: अनुभावै: तम् अभिनयेत् |

अर्थ - दारिद्र्य, व्याधी, अपमान, तिरस्कार, आक्रोश, क्रोध, मारणे, प्रिय व्यक्तींशी वियोग,

तत्त्वज्ञान इत्यादी विभावांनी निर्वेद उत्पन्न होतो . स्त्री, नीच आणि दुष्ट व्यक्तींचे रडणे, नि:श्वास, उच्छ्वास, प्रतारणा (फसवणूक, कपट, लुच्चेगिरी) इत्यादी अनुभावांनी निर्वेद या संचारिभावाचा अभिनय करावा .

भवति चात्र श्लोक:
दारिद्र्येष्टवियोगाद्यैर्निर्वेदो नाम जायते |
सम्प्रधारणनि:श्वासैस्तस्य त्वभिनयो भवेत् ‖ २८ ‖

पदच्छेद: - भवति च अत्र श्लोक:
दारिद्र्य-इष्टवियोग-आद्यै: निर्वेद: नाम जायते |
सम्प्रधारण-नि:श्वासै: तस्य तु अभिनय: भवेत् ‖ २८ ‖

अन्वय: - अत्र च श्लोक: भवति -
दारिद्र्य-इष्टवियोग-आद्यै: निर्वेद: नाम (व्यभिचारिभाव:) जायते | तस्य अभिनय: सम्प्रधारणनि:श्वासै: भवेत् |

अर्थ - यासंदर्भातील श्लोक असा -
दारिद्र्य, इष्टजनांचा वियोग इत्यादींमुळे निर्वेद नावाचा संचारिभाव उत्पन्न होतो . चिंतन, नि:श्वास इत्यादींनी त्याचा अभिनय करावा .

अत्रानुवंश्ये आर्ये भवत: -
इष्टजनविप्रयोगाद्दारिद्र्याद्व्याधितस्तथा दु:खात् |
परवृद्धिं वा दृष्ट्वा निर्वेदो नाम सम्भवति ‖ २९ ‖

पदच्छेद: - अत्र आनुवंश्ये आर्ये भवत: -
इष्टजन-विप्रयोगात् दारिद्र्यात् व्याधित: तथा दु:खात् |
परवृद्धिं वा दृष्ट्वा निर्वेद: नाम सम्भवति ‖ २९ ‖

अन्वय: - अत्र आनुवंश्ये आर्ये भवत: -
इष्टजनविप्रयोगात् दारिद्र्यात् व्याधित: दु:खात् तथा परवृद्धिं दृष्ट्वा निर्वेद: नाम (व्यभिचारिभाव:) सम्भवति |

अर्थ - याठिकाणी परंपरेनुसार दोन आर्या देखील सांगितल्या जातात.
इष्टजनांचा वियोग, दारिद्र्य, रोग, दु:ख तसेच दुसऱ्याची समृद्धी पाहून निर्वेद उत्पन्न होतो.

बाष्पपरिप्लुतनयन: पुन: पुन: श्वासदीनमुखनेत्र: |
योगीव ध्यानपरो भवति हि निर्वेदवान्पुरुष: ‖ ३० ‖

पदच्छेद: - बाष्प-परिप्लुत-नयन: पुन: पुन: श्वास-दीन-मुख-नेत्र: |
योगी इव ध्यानपर: भवति हि निर्वेदवान् पुरुष: ‖ ३० ‖

अन्वय: - निर्वेदवान् पुरुष: बाष्पपरिप्लुतनयन: पुन: पुन: श्वासदीनमुखनेत्र: ध्यानपर: योगी इव हि भवति |

अर्थ - निर्वेदयुक्त पुरुषाचे डोळे अश्रुपूर्ण असतात. नि:श्वासामुळे मुख आणि डोळे दीन (मलीन) झालेले असतात आणि तो एखाद्या ध्यानमग्न योग्याप्रमाणे लीन असतो.

## ❖ ग्लानि ❖

ग्लानिर्नाम: वान्तविरिक्त व्याधितपोनियमोपवासमनस्तापातिपानमदनमद्यसेवनातिव्यायामाध्वगमन क्षुत्पिपासानिद्राच्छेदादिभिर्विभावै: समुत्पद्यते | तस्या: क्षामवाक्यनयनकपोलमन्दपदोत्क्षेपण वेपनानुत्साहतनुगात्रवैवर्ण्यस्वरभेदादिभिरनुभावैरभिनय: प्रयोक्तव्य: |

पदच्छेद: - ग्लानि: नाम वान्त-विरिक्त-व्याधि-तपो-नियम-उपवास-मनस्ताप-अतिपान-मदन-मद्यसेवन-अतिव्यायाम-अध्वगमन-क्षुत्पिपासा-निद्राच्छेद-आदिभि: विभावै: समुत्पद्यते | तस्या: क्षामवाक्य-(क्षाम)नयन-(क्षाम)कपोल-मन्दपद-उत्क्षेपण-वेपन-अनुत्साह-तनुगात्र-वैवर्ण्य-स्वरभेद-आदिभि: अनुभावै: अभिनय: प्रयोक्तव्य: |

अर्थ - ग्लानि नामक व्यभिचारीभाव वमन, रेचन, व्याधी, तप, नियम, उपवास, मनस्ताप, अतिप्रणय, मद्य पिणे, अतिव्यायाम, लांबची यात्रा, भूक, तहान, निद्राहानी इत्यादी विभावांनी उत्पन्न होतो. हळू आवाजात बोलणे, कांतिहीन डोळे, मलिन गाल, मंद गतीत चालणे, कंपन, अनुत्साह, कमजोर शरीर, वैवर्ण्य आणि स्वरभंग इ. अनुभावांनी त्याचा अभिनय करावा.

अत्रानुवंश्ये आर्ये भवतः -
वान्तविरिक्तव्याधिषु तपसा जरसा च जायते ग्लानिः।
कार्श्येन साभिनेया मन्दभ्रमणेन कम्पेन ॥ ३१ ॥

पदच्छेदः - अत्र आनुवंश्ये आर्ये भवतः -
वान्त-विरिक्त-व्याधिषु तपसा जरसा च जायते ग्लानिः।
कार्श्येन सा अभिनेया मन्दभ्रमणेन कम्पेन ॥ ३१ ॥

अन्वयः - अत्र आनुवंश्ये आर्ये भवतः -
वान्तविरिक्तव्याधिषु तपसा जरसा च ग्लानिः जायते। कार्श्येन मन्दभ्रमणेन कम्पेन सा अभिनेया।

अर्थ - यासंदर्भात परंपरेनुसार दोन आर्या आहेत.
वमन, विरेचन, रोग, तप, म्हातारपण इत्यादींमुळे 'ग्लानि' येते. शरीर दुर्बळ होणे, हळू चालणे, थरथर कापणे इत्यादींनी त्याचा अभिनय करावा.

गदितैः क्षामक्षामैर्नेत्रविकारैश्च दीनसञ्चारैः।
श्लथभावेनाङ्गानां मुहुर्मुहुर्निर्दिशेद्ग्लानिम् ॥ ३२ ॥

पदच्छेदः - गदितैः क्षामक्षामैः नेत्रविकारैः च दीनसञ्चारैः।
श्लथभावेन अङ्गानां मुहुः मुहुः निर्दिशेत् ग्लानिम् ॥ ३२ ॥

अन्वयः - क्षामक्षामैः गदितैः नेत्रविकारैः दीनसञ्चारैः अङ्गानां श्लथभावेन मुहुः मुहुः ग्लानिं निर्दिशेत्।

अर्थ - अत्यंत हळू आवाज, कमजोर नजर, दीन भावाने चालणे, सतत असणारी अंगामधील शिथिलता इत्यादींनी ग्लानीचा अभिनय केला जातो.

❖ शंका ❖

शङ्का नाम - सन्देहात्मिका स्त्रीनीचप्रभवा। चौर्याभिग्रहणनृपापराधपापकर्मकरणादिभिर्विभावैः समुत्पद्यते। तस्या मुहुर्मुहुरवलोकनावकुण्ठनमुखशोषणजिह्वापरिलेहनमुखवैवर्ण्यस्वरभेदवेपथुशुष्कोष्ठकण्ठवायससाधर्म्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः।

पदच्छेद: - शङ्का नाम सन्देह-आत्मिका स्त्री-नीच-प्रभवा | चौर्यअभिग्रहण-नृपअपराध-पापकर्म करण-आदिभि: विभावै: समुत्पद्यते | तस्या: मुहु: मुहु: अवलोकन-अवकुण्ठन -मुखशोषण-जिह्वापरिलेहन-मुखवैवर्ण्य-स्वरभेद-वेपथु-शुष्कोष्ठ-कण्ठवाय-स साधर्म्य- आदिभि: अनुभावै: अभिनय: प्रयोक्तव्य: |

अर्थ - शंका नावाच्या व्यभिचारी भावाच्या मुळाशी संदेह आहे. हा व्यभिचारी भाव स्त्री आणि नीच स्वभावाच्या लोकांमध्ये निर्माण होतो. चोरी करताना पकडले जाणे, राजद्रोह करणे, व पाप कर्म करणे इत्यादी विभावांमुळे 'शंका' हा व्यभिचारी भाव उत्पन्न होतो. पुन्हा पुन्हा इकडे तिकडे बघणे, संकुचित होणे, तोंड सुकणे, जीभ ओठांवरून फिरविणे, चेहऱ्यावरचा रंग उडणे, स्वरभंग होणे, थरथरणे, ओठ सुकणे, कंठ दाटून येणे यासारख्या विविध अनुभावांनी याचा अभिनय करावा.

अत्र श्लोक: -

चौर्यादिजनिता शङ्का प्राय: कार्या भयानके |
प्रियव्यलीकजनिता तथा शृङ्गारिणी मता || ३३ ||

अत्राकारसंवरणमपि केचिदिच्छन्ति | तच्च कुशलैरुपाधिभिरिङ्गितैश्चोपलक्ष्यम् |

पदच्छेद: - अत्र श्लोक: -

चौर्य-आदि-जनिता शङ्का प्राय: कार्या भयानके |
प्रिय-व्यलीक-जनिता तथा शृङ्गारिणी मता || ३३ ||

अत्र आकार-संवरणम् अपि केचित् इच्छन्ति | तत् च कुशलै: उपाधिभि: इङ्गितै: च उपलक्ष्यम् |

अन्वय: - अत्र श्लोक: -

चौर्यादिजनिता शङ्का प्राय: भयानके कार्या | तथा प्रियव्यलीकजनिता (शङ्का) शृङ्गारिणी मता |

अत्र केचित् आकारसंवरणम् अपि इच्छन्ति | तत् च कुशलै: उपाधिभि: इङ्गितै: च उपलक्ष्यम् |

अर्थ - यासंबंधित श्लोक पुढीलप्रमाणे -

चोरी इत्यादींमुळे होणाऱ्या शंकेचा अभिनय बहुधा भयानक रसामध्ये करावा. त्याचप्रमाणे प्रिय व्यक्तीने केलेल्या कपटामुळे होणाऱ्या शंकेचा अभिनय शृंगार रस उत्पन्न करतो असे मानले जाते. याठिकाणी काहीजण आकार लपविणे (लपतछपत येणे) यासदेखील अनुभाव मानतात. कुशल व्यक्तींनी कपट (उपाधी) आणि विशिष्ट संकेत (इंगित) यांद्वारे तो दर्शवावा.

अत्रार्ये भवतः -

द्विविधा शङ्का कार्या ह्यात्मसमुत्था च परसमुत्था च |
या तत्रात्मसमुत्था सा ज्ञेया दृष्टिचेष्टाभिः || ३४ ||

पदच्छेदः - अत्र आर्ये भवतः -
द्विविधा शङ्का कार्या हि आत्म-समुत्था च पर-समुत्था च |
या तत्र आत्मसमुत्था सा ज्ञेया दृष्टि-चेष्टाभिः || ३४ ||

अन्वयः - अत्र आर्ये भवतः -
द्विविधा शङ्का कार्या आत्मसमुत्था परसमुत्था च | या तत्र आत्मसमुत्था सा दृष्टिचेष्टाभिः ज्ञेया |

अर्थ - यासंदर्भात दोन आर्या आहेत.

शंका दोन प्रकारच्या आहेत. आपल्या मनामध्ये निर्माण होणारी ती 'आत्मसमुत्था' आणि दुसऱ्या व्यक्तीच्या विषयीची ती 'परसमुत्था'. यापैकी 'आत्मसमुत्था' शंका ही दृष्टी आणि हालचालींनी जाणून घ्यावी.

किञ्चित्प्रवेपिताङ्गस्त्वधोमुखो वीक्षते च पार्श्वानि |
गुरुसज्जमानजिह्वः श्यामास्यः शङ्कितः पुरुषः || ३५ ||

पदच्छेदः - किञ्चित् प्रवेपित-अङ्गः तु अधोमुखः वीक्षते च पार्श्वानि |
गुरु-सज्जमान-जिह्वः श्याम-आस्यः शङ्कितः पुरुषः || ३५ ||

अन्वय: - शङ्कित: पुरुष: किञ्चित् प्रवेपिताङ्ग: अधोमुख: पार्श्वानि च वीक्षते | (स:) गुरुसज्जमानजिह्व: श्यामास्य: (भवति)|

अर्थ - शंकित पुरुष थोडा थरथर कापत असतो . त्याची मान खाली झुकलेली असते . सतत दोन्ही बाजूंना तिरक्या नजरेने बघत असतो . त्याची जीभ जड व जाड होते आणि चेहरा काळा पडतो .

## ❖ असूया ❖

असूया नाम नानापराधद्वेषपरैश्वर्यसौभाग्यमेधाविद्यालीलादिभिर्विभावै: समुत्पद्यते | तस्याश्च परिषदि दोषप्रख्यापनगुणोपघातेर्ष्याचक्षु:प्रदानाधोमुखभ्रुकुटीक्रियावज्ञानकुत्सनादिभिरनुभावैरभिनय: प्रयोक्तव्य:|

पदच्छेद: - असूया नाम नाना - अपराध - द्वेष - पर ऐश्वर्य - सौभाग्य-मेधा-विद्या-लीला-आदिभि: विभावै: समुत्पद्यते | परिषदि दोषप्रख्यापन-गुण उपघात-ईर्ष्या चक्षु:प्रदान-अधोमुख-भ्रुकुटीक्रिया-अवज्ञान-कुत्सन-आदिभि: अनुभावै: तस्या: च अभिनय: प्रयोक्तव्य:|

अर्थ - अनेक प्रकारचे अपराध, द्वेष, दुसऱ्याचे ऐश्वर्य, सौभाग्य, मेधा, विद्या, लीला इत्यादी विभावांमुळे असूया नामक व्यभिचारी भाव उत्पन्न होतो . सभेमध्ये (दुसऱ्यांचे)दोष काढणे, (त्यांच्या) गुणांकडे दुर्लक्ष (किंवा अवहेलना) करणे, ईर्ष्येने पाहणे, अधोमुखी होणे, भुवया वर चढविणे, अपमान करणे, तिरस्कार करणे इत्यादी अनुभावांनी त्याचा अभिनय करावा .

अत्रार्ये भवत: -

परसौभाग्येश्वरतामेधालीलासमुच्छ्रयान्दृष्ट्वा |
उत्पद्यते ह्यसूया कृतापराधो भवेद्यश्च || ३६ ||

पदच्छेद: - अत्र आर्ये भवत: -
परसौभाग्य-ईश्वरता-मेधा-लीला-समुच्छ्रयान् दृष्ट्वा |
उत्पद्यते हि असूया कृतापराध: भवेत् य: च || ३६ ||

अन्वय: - अत्र आर्ये भवत: -
परसौभाग्य-ईश्वरता-मेधा-लीला-समुच्छ्रयान् दृष्ट्वा य: कृतापराध: भवेत् (तस्य मनसि) असूया हि उत्पद्यते |

अर्थ - यासंदर्भात दोन आर्या सांगितल्या जातात .
दुसऱ्याचे सौभाग्य, ऐश्वर्य, मेधा, क्रीडा-विलास आणि भरभराट पाहून अपराध करणाऱ्या व्यक्तीच्या मनात असूया उत्पन्न होते .

भ्रुकुटिकुटिलोत्कटमुखै: सेर्ष्याक्रोधपरिवृत्तनेत्रैश्च |
गुणनाशनविद्वेषैस्तत्राभिनय: प्रयोक्तव्य: || ३७ ||

पदच्छेद: - भ्रुकुटि-कुटिल-उत्कटमुखै: स ईर्ष्या-क्रोध-परिवृत्तनेत्रै: च |
गुणनाशन-विद्वेषै: तत्र अभिनय: प्रयोक्तव्य: || ३७ ||

अन्वय: - तत्र भ्रुकुटि-कुटिल-उत्कटमुखै: सेर्ष्या-क्रोध-परिवृत्त-नेत्रै: च गुणनाशन-विद्वेषै: (अस्य) अभिनय: प्रयोक्तव्य: |

अर्थ - भुवया चढवणे, तोंड फिरवणे, ईर्ष्येने आणि रागाने डोळे फिरवणे, गुणांचा नाश करणे आणि द्वेष करणे इ. अनुभावांनी असूयेचा अभिनय करावा .

### ❖ मद ❖

मदो नाम मद्योपयोगादुत्पद्यते | स च त्रिविध: पञ्चविधभावश्च |

पदच्छेद: - मद: नाम मद्य-उपयोगात् उत्पद्यते | स: च त्रिविध: पञ्चविधभाव: च |

अर्थ - मद्याच्या उपयोगाने (सेवनाने) मद उत्पन्न होतो . हा तीन प्रकारचा असून त्याचे पाच भाव आहेत .

अत्रार्या भवन्ति -
ज्ञेयस्तु मदस्त्रिविधस्तरुणो मध्यस्तथावकृष्टश्च |
करणं पञ्चविधं स्यात्तस्याभिनय: प्रयोक्तव्य: || ३८ ||

पदच्छेद : - अत्र आर्या : भवन्ति -
ज्ञेय : तु मद : त्रिविध : तरुण : मध्य : तथा अवकृष्ट : च |
करणं पञ्चविधं स्यात् तस्य अभिनय : प्रयोक्तव्य : || ३८ ||

अन्वय : - अत्र आर्या : भवन्ति -
मद : तु त्रिविध : ज्ञेय : तरुण : मध्य : तथा च अवकृष्ट : | करणं पञ्चविधं स्यात् तस्य अभिनय : प्रयोक्तव्य : |

अर्थ - यासंदर्भात पुढील आर्या आहेत .
तीन प्रकारचा मद जाणून घ्यावा . तरुण मद, मध्यमद आणि अवकृष्ट मद . ह्याचे पाच विभाव आहेत . यांच्या मदतीने मदाचा अभिनय करावा .

कश्चिन्मत्तो गायति रोदिति कश्चित्तथा हसति कश्चित् |
परुषवचनाभिधायी कश्चित्कश्चित्तथा स्वपिति || ३९ ||

पदच्छेद : - कश्चित् मत्त : गायति रोदिति कश्चित् तथा हसति कश्चित् |
परुष-वचन-अभिधायी कश्चित् कश्चित् तथा स्वपिति ||३९ ||

अन्वय : - कश्चित् मत्त : गायति कश्चित् रोदिति तथा कश्चित् हसति कश्चित् परुषवचनाभिधायी तथा कश्चित् स्वपिति |

अर्थ - या मदाने मत्त होऊन कोणी गातो, कोणी रडतो, कोणी हसतो, कोणी कठोर वाणीने बोलतो तर कोणी झोपतो .

उत्तमसत्त्व : शेते हसति च गायति च मध्यमप्रकृति : |
परुषवचनाभिधायी रोदित्यपि चाधमप्रकृति : || ४० ||

पदच्छेद : - उत्तमसत्त्व : शेते हसति च गायति च मध्यमप्रकृति : |
परुष-वचन-अभिधायी रोदिति अपि च अधमप्रकृति : || ४० ||

अन्वय : - उत्तमसत्त्व : शेते मध्यमप्रकृति : हसति गायति च | अधमप्रकृति : परुषवचनाभिधायी रोदिति च |

अर्थ - उत्तम प्रकृतीची व्यक्ती मदामध्ये झोपते . मध्यम प्रकृतीची व्यक्ती हसते आणि गाते . तसेच अधम स्वभावाची व्यक्ती कठोर वाणीने बोलते आणि प्रसंगी रडतेही .

स्मितवचन मधुररागो हृष्टतनुः किञ्चिदाकुलितवाक्यः |
सुकुमाराविद्धगतिस्तरुणमदस्तूत्तमप्रकृतिः ‖ ४१ ‖

पदच्छेदः - स्मित-वचन-मधुर-रागः हृष्टतनुः किञ्चित् आकुलित-वाक्यः |
सुकुमार-आविद्धगतिः तरुणमदः उत्तमप्रकृतिः ‖ ४१ ‖

अन्वयः - स्मितवचनमधुररागः हृष्टतनुः किञ्चित् आकुलितवाक्यः सुकुमार-आविद्धगतिः तरुणमदः उत्तमप्रकृतिः |

अर्थ - उत्तम प्रकृतीच्या व्यक्तीमध्ये जेव्हा तरुण मद असतो तेव्हा त्याच्या चेहऱ्यावर स्मित हास्य असते, मुख प्रसन्न असते, पूर्ण शरीर आनंदी असते, बोलताना वाणी अडखळते आणि नाजूक अशी आविद्धगती असते .

स्खलिताघूर्णितनयनः स्रस्तव्याकुलितबाहुविक्षेपः |
कुटिलव्याविद्धगतिर्मध्यमदो मध्यमप्रकृतिः ‖ ४२ ‖

पदच्छेदः - स्खलित-आघूर्णितनयनः स्रस्त-व्याकुलित-बाहुविक्षेपः |
कुटिलव्य-आविद्धगतिः मध्यमदः मध्यमप्रकृतिः ‖ ४२ ‖

अन्वयः - स्खलिताघूर्णितनयनः स्रस्तव्याकुलितबाहुविक्षेपः कुटिलव्य-आविद्धगतिः मध्यमदः मध्यमप्रकृतिः |

अर्थ - मध्यम प्रकृतीच्या व्यक्तींमध्ये जेव्हा मद असतो तेव्हा नेत्र चंचल आणि गोलाकार फिरतात, हस्तविक्षेप शिथिल आणि व्याकुळ असतात तसेच वक्रचालीने आविद्धगती करतात .

नष्टस्मृतिर्हतगतिश्छर्दितहिक्काकफैः सुबीभत्सः |
गुरुसज्जमानजिह्वो निष्ठीवति चाधमप्रकृतिः ‖ ४३ ‖

पदच्छेद: - नष्टस्मृति: हतगति: छर्दित-हिक्का-कफै: सुबीभत्स:।
गुरु-सज्जमान-जिह्व: निष्ठीवति च अधम-प्रकृति: ॥४३॥

अन्वय: - अधमप्रकृति: नष्टस्मृति: हतगति: छर्दितहिक्काकफै: सुबीभत्स: गुरुसज्जमानजिह्व: निष्ठीवति च।

अर्थ - अधम प्रकृतीच्या व्यक्तींमध्ये जेव्हा मद असतो तेव्हा त्यांची स्मृती नष्ट होते. गती नष्ट होते. शिंक, कफ आणि उचकीमुळे बीभत्सता येते. जीभ जड व जाड होते आणि तसेच तो थुंकतोही.

रङ्गे पिबत: कार्या मदवृद्धिर्नाट्ययोगमासाद्य।
कार्यो मदक्षयो वै य: खलु पीत्वा प्रविष्ट: स्यात् ॥ ४४ ॥

पदच्छेद: - रङ्गे पिबत: कार्या मदवृद्धि: नाट्ययोगम् आसाद्य।
कार्य: मदक्षय: वै य: खलु पीत्वा प्रविष्ट: स्यात् ॥४४॥

अन्वय: - नाट्ययोगम् आसाद्य रङ्गे पिबत: मदवृद्धि: कार्या। य: खलु पीत्वा प्रविष्ट: स्यात् (तस्य) मदक्षय: कार्य:।

अर्थ - नाट्याच्या प्रयोगामध्ये जो नट रंगभूमीवर मद्यपान करत असेल त्याचा मद (नशा) वाढल्याचे अभिनयाद्वारे व्यक्त झाले पाहिजे. तसेच जो नट मद्यपान करून नंतर रंगभूमीवर प्रवेश करतो त्याची नशा कमी झाल्याचे अभिनयातून व्यक्त झाले पाहिजे.

सन्त्रासाच्छोकाद्वा भयात्प्रहर्षाच्च कारणोपगतात्।
उत्क्रम्यापि हि कार्यो मदप्रणाश: क्रमात्तज्ज्ञै: ॥ ४५ ॥

पदच्छेद: - सन्त्रासात् शोकात् वा भयात् प्रहर्षात् च कारण-उपगतात्।
उत्क्रम्य अपि हि कार्य: मदप्रणाश: क्रमात् तज्ज्ञै: ॥४५॥

अन्वय: - सन्त्रासात् शोकात् भयात् प्रहर्षात् कारणोपगतात् च उत्क्रम्य क्रमात् तज्ज्ञै: मदप्रणाश: कार्य:।

अर्थ - त्रास, शोक, भय, अत्यानंद किंवा अन्य कोणत्याही कारणांद्वारे तज्ज्ञांनी मद उतरल्याचा अभिनय दाखवावा.

एभिर्भावविशेषैर्मदो द्रुतं सम्प्रणाशमुपयाति |
अभ्युदयसुखैर्वाक्यैर्यथैव शोकः क्षयं याति || ४६ ||

पदच्छेदः - एभिः भावविशेषैः मदः द्रुतं सम्प्रणाशम् उपयाति |
अभ्युदयसुखैः वाक्यैः यथा एव शोकः क्षयं याति || ४६ ||

अन्वयः - यथा अभ्युदयसुखैः वाक्यैः एव शोकः क्षयं याति तथा एभिः भावविशेषैः मदः द्रुतं सम्प्रणाशम् उपयाति |

अर्थ - ज्याप्रमाणे उत्कर्ष सुचवणारी सुखवाक्ये दुःख नष्ट करतात त्याचप्रमाणे वरील भावविशेष मदाचा ताबडतोब नाश करतात .

❖ श्रम ❖

श्रमो नाम अध्वव्यायामसेवनादिभिर्विभावः समुत्पद्यते | तस्य गात्रपरिमर्दनसंवाहननिःश्वसितविजृम्भित मन्दपदोत्क्षेपणनयनवदनविकूणनसीत्करादिभिरनुभावैरभिनयः प्रयोक्तव्यः |

पदच्छेदः - श्रमः नाम अध्व-व्यायाम-सेवन-आदिभिः विभावः समुत्पद्यते | तस्य गात्र-परिमर्दन-संवाहन - निःश्वसित - विजृम्भित - मन्दपद उत्क्षेण - नयन वदन विकूणन - सीत्कर-आदिभिः अनुभावैः अभिनयः प्रयोक्तव्य |

अर्थ - श्रम नावाचा व्यभिचारी भाव दूरची यात्रा करणे, व्यायाम, सेवा इत्यादी विभावांनी उत्पन्न होतो . अंगमर्दन करणे, मालिश करणे, निःश्वास टाकणे, जांभई देणे, हळू चालणे, डोळे संकुचित करणे, सीत्कार इत्यादी अनुभावांनी त्याचा अभिनय करावा .

अत्रार्याः

नृत्ताध्वव्यायामान्नरस्य सञ्जायते श्रमो नाम |
निःश्वासखेदगमनैस्तस्याभिनयः प्रयोक्तव्यः || ४७ ||

पदच्छेदः - अत्र आर्याः -
नृत्त-अध्व-व्यायामात् नरस्य सञ्जायते श्रमः नाम |
निःश्वास-खेद-गमनैः तस्य अभिनयः प्रयोक्तव्यः || ४७ ||

अन्वय : - अत्र आर्या : -

नृत्ताध्वव्यायामात् नरस्य श्रम : नाम (व्यभिचारिभाव :) सञ्जायते | नि :श्वासखेदगमनै : तस्य अभिनय : प्रयोक्तव्य : |

अर्थ - यासंबंधित आर्या पुढीलप्रमाणे -

नृत्त, लांबचा प्रवास, व्यायाम इ . नी माणसाच्या शरीरात 'श्रम' नावाचा व्यभिचारिभाव निर्माण होतो . दीर्घ नि :श्वास आणि शिथिल गतीने श्रमाचा अभिनय करावा .

## ❖ आलस्य ❖

आलस्यं नाम खेदव्याधिगर्भस्वभावश्रमसौहित्यादिभिर्विभावै : समुत्पद्यते स्त्रीनीचानाम् | तदभिनयेत्सर्व कर्मानभिलापशयनासननिद्रातन्द्रासेवनादिभिरनुभावै : |

पदच्छेद : - आलस्यं नाम खेद-व्याधि-गर्भ-स्वभाव-श्रम-सौहित्य-आदिभि : विभावै : समुत्पद्यते स्त्रीनीचानाम् | तत् अभिनयेत् सर्वकर्म-अनभिलाप-शयन-आसन-निद्रा-तन्द्रा-सेवन-आदिभि : अनुभावै : |

अर्थ - खेद, रोग, गर्भप्राप्ती, स्वभाव, श्रम आणि अतितृप्ती इत्यादी विभावांनी स्त्री व नीच व्यक्तींमध्ये आलस्य येते . सर्व प्रकारच्या कामांबद्दल तिरस्कार, आडवे पडून राहणे, बसणे, झोपणे, तंद्रीत राहणे इ . अनुभावांनी त्याचा अभिनय करावा .

अत्रार्या -

आलस्यं त्वभिनेयं खेदोपगतं स्वभावजं चापि |
आहारवर्जितानामारम्भाणामनारम्भात् || ४८ ||

पदच्छेद : - अत्र आर्या -

आलस्यं तु अभिनेयं खेद-उपगतं स्वभावजं चापि |
आहार-वर्जितानाम् आरम्भाणाम् अनारम्भात् || ४८ ||

अन्वय : - अत्र आर्या -

आहारवर्जितानाम् आरम्भाणाम् अनारम्भात् खेदोपगतं स्वभावजं आलस्यम् अभिनेयम् |

अर्थ - यासंदर्भातील आर्या -

खेद किंवा स्वभाव यापासून निर्माण होणाऱ्या आलस्य या संचारिभावाचा अभिनय जेवणाचा त्याग करून आणि अन्य कोणत्याही कामाला सुरूवात न करणे याद्वारे करावा .

## ❖ दैन्य ❖

दैन्यं नाम दौर्गत्यमनस्तापादिभिर्विभावैः समुत्पद्यते |
तस्याधृतिशिरोरोगगात्रगौरवान्यमनस्कतामृजापरिवर्जनादिभिरनुभावैरभिनयः प्रयोक्तव्यः |

पदच्छेदः- दैन्यं नाम दौर्गत्य-मनस्ताप-आदिभिः विभावैः समुत्पद्यते | तस्य अधृति-शिरोरोग-गात्रगौरव-अन्यमनस्कता-मृजा-परिवर्जन-आदिभिः अनुभावैः अभिनयः प्रयोक्तव्यः |

अर्थ - दैन्य नामक व्यभिचारी भाव दुर्गती, मनस्ताप इ. विभावांनी उत्पन्न होतो. अधीरता, डोकेदुखी, अंग जड होणे, मन जागेवर नसणे, शरीर अस्वच्छ ठेवणे इत्यादी अनुभावांनी त्याचा अभिनय करावा .

अत्रार्या-

चिन्तौत्सुक्यसमुत्था दुःखाद्या भवति दीनता पुंसाम् |
सर्वमृजापरिहारैर्विविधोऽभिनयो भवेत्तस्य || ४९ ||

पदच्छेदः- अत्र आर्या-

चिन्ता-औत्सुक्य-समुत्था दुःखाद्या भवति दीनता पुंसाम् |
सर्वमृजा-परिहारैः विविधः अभिनयः भवेत् तस्य || ४९ ||

अन्वयः - अत्र आर्या -

पुंसां दीनता चिन्ता-औत्सुक्य-समुत्था दुःखाद्या भवति | सर्वमृजा-परिहारैः तस्य विविधः अभिनयः भवेत् |

अर्थ - यासंबंधित आर्या -

पुरुषांमध्ये चिंता, औत्सुक्य आणि दुःख यांमुळे दैन्य निर्माण होते. सर्वप्रकारे शरीरशुद्धीचा त्याग करणे इ. अनुभावांनी त्याचा विविध अभिनय करावा .

## ❖ चिंता ❖

चिन्ता नाम ऐश्वर्यभ्रंशेष्टद्रव्यापहारदारिद्र्यादिभिर्विभावैरुत्पद्यते | तामभिनयेन्नि: श्वसितोच्छ्वसित सन्तापध्यानाधोमुखचिन्तनतनुकार्श्यादिभिरनुभावै:|

पदच्छेद: - चिन्ता नाम ऐश्वर्य-भ्रंश-इष्ट-द्रव्य-अपहार-दारिद्र्य-आदिभि: विभावै: उत्पद्यते | ताम् अभिनयेत् नि:श्वसित-उच्छ्वसित-सन्ताप-ध्यान-अधोमुख-चिन्तन-तनुकार्श्य-आदिभि: अनुभावै:|

अर्थ - ऐश्वर्य नष्ट होणे, आवडत्या वस्तू दूर जाणे, दारिद्र्य इ. विभावांनी चिंता हा व्यभिचारी भाव उत्पन्न होतो. नि:श्वास, उच्छ्वास, संताप (मानसिक ताण), ध्यान, अधोमुख होऊन चिंतन, शरीराची दुर्बळता इ. अनुभावांनी त्याचा अभिनय करावा.

अत्रार्ये भवत:

ऐश्वर्यभ्रंशेष्टद्रव्यक्षयजा बहुप्रकारा तु |
हृदयवितर्कोपगता नृणां चिन्ता समुद्भवति || ५० ||

पदच्छेद: - अत्र आर्ये भवत:
ऐश्वर्यभ्रंश-इष्टद्रव्य-क्षयजा बहुप्रकारा तु |
हृदयवितर्क-उपगता नृणां चिन्ता समुद्भवति || ५० ||

अन्वय: - अत्र आर्ये भवत:
ऐश्वर्यभ्रंशेष्टद्रव्यक्षयजा हृदयवितर्कोपगता बहुप्रकारा चिन्ता नृणां समुद्भवति |

अर्थ - यासंदर्भात दोन आर्या सांगितल्या जातात.
ऐश्वर्य नष्ट होणे, आवडत्या वस्तूंचा क्षय झाल्याने हृदय हादरून जाणे इ. मुळे विविध प्रकारची 'चिंता' माणसांमध्ये निर्माण होते.

सोच्छ्वासैर्नि:श्वसितै: सन्तापैश्चैव हृदयशून्यतया |
अभिनेतव्या चिन्ता मृजाविहीनैर धृत्या च || ५१ ||

पदच्छेद : - सोच्छ्वासै : नि :श्वसितै : सन्तापै : च एव हृदयशून्यतया |
अभिनेतव्या चिन्ता मृजाविहीनै : अधृत्या च || ५१ ||

अन्वय : - सोच्छ्वासै : नि :श्वसितै : सन्तापै : हृदयशून्यतया मृजाविहीनै : अधृत्या च चिन्ता अभिनेतव्या |

अर्थ - उच्छ्वास, नि :श्वास, संताप, हृदयशून्यता, शरीरशुद्धीचा त्याग करणे, अधीर असणे इ . अनुभावांनी 'चिंता' या संचारिभावाचा अभिनय करावा .

## ❖ मोह ❖

मोहो नाम दैवोपघातव्यसनाभिघातव्याधिभयावेगपूर्ववैरानुस्मरणादिभिर्विभावै : समुत्पद्यते | तस्य निश्चैतन्यभ्रमणपतनाघूर्णनादर्शनादिभिरनुभावैरभिनय : प्रयोक्तव्य : |

पदच्छेद : - मोह : नाम दैवोपघात-व्यसनाभिघात-व्याधि-भय-आवेग-पूर्ववैर-अनुस्मरण-आदिभि : विभावै : समुत्पद्यते | निश्चैतन्य-भ्रमण-पतन-आघूर्णन-अदर्शन-आदिभि : अनुभावै : तस्य अभिनय : प्रयोक्तव्य : |

अर्थ - दैवी आघात, आकस्मिक संकट, व्याधी, भय, आवेग, जुने वैर आठवणे इ . विभावांनी मोह नावाचा संचारिभाव उत्पन्न होतो . निश्चेष्ट राहणे, गोल फिरणे, पडणे, एकटक पाहणे, अस्पष्ट दिसणे इत्यादी अनुभावांनी त्याचा अभिनय करावा .

अत्र श्लोकस्तावदार्या च -
अस्थाने तस्करान्दृष्ट्वा त्रासनैर्विविधैरपि |
तत्प्रतीकारशून्यस्य मोह : समुपजायते || ५२ ||

पदच्छेद : - अत्र श्लोक : तावत् आर्या च -
अस्थाने तस्करान् दृष्ट्वा त्रासनै : विविधै : अपि |
तत्प्रतीकार-शून्यस्य मोह : समुपजायते || ५२ ||

अन्वय : - अत्र श्लोक : तावत् आर्या च -
अस्थाने तस्करान् दृष्ट्वा विविधै : त्रासनै : अपि तत्प्रतीकारशून्यस्य मोह : समुपजायते |

अर्थ - यासंबंधित श्लोक आणि आर्या पुढीलप्रमाणे -
अयोग्य ठिकाणी चोरांना पाहून अनेक प्रकारच्या त्रासांना प्रतिकार करण्यास असमर्थ असलेल्या व्यक्तीच्या मनात मोह उत्पन्न होतो.

व्यसनाभिघातभयपूर्ववैरसंस्मरणरोगजो मोह:।
सर्वेन्द्रियसम्मोहात्तस्याभिनय: प्रयोक्तव्य:॥ ५३ ॥

पदच्छेद: - व्यसन अभिघात-भय-पूर्ववैरसंस्मरण-रोगज: मोह:।
सर्व इन्द्रिय-सम्मोहात् तस्य अभिनय: प्रयोक्तव्य:॥ ५३ ॥

अन्वय: - व्यसनाभिघात-भयपूर्ववैरसंस्मरण-रोगजो मोह: (उत्पन्न: भवति)।
सर्वेन्द्रियसम्मोहात् तस्य अभिनय: प्रयोक्तव्य:।

अर्थ - संकटाचा आघात, भय, पूर्ववैर आठवणे आणि रोगामध्ये मोह उत्पन्न होतो व त्याचा अभिनय सर्व इंद्रियांची निष्क्रियता (संमोह) याने करावा.

## ❖ स्मृती ❖

स्मृतिर्नाम सुखदु:खकृतानां भावानामनुस्मरणम्। सा च स्वास्थजघन्यरात्रिनिद्राच्छेदसमानदर्शनोदाहरणचिन्ताभ्यासादिभिर्विभावै: समुत्पद्यते। तामभिनयेच्छिर:कम्पनावलोकनभ्रूसमुन्नमनादिभिरनुभावै:।

पदच्छेद: - स्मृति: नाम सुखदु:खकृतानां भावानाम् अनुस्मरणम्। सा च स्वार्स्थ -जघन्य-रात्रि-निद्राच्छेद-समानदर्शन-उदाहरण-चिन्ता-अभ्यास-आदिभि: विभावै: समुत्पद्यते। ताम् अभिनयेत् शिर:कम्पन-अवलोकन भ्रू-समुन्नमन-आदिभि: अनुभावै:।

अर्थ - 'स्मृती' हा व्यभिचारीभाव म्हणजे सुख दु:ख देणाऱ्या भावांचे स्मरण होय. स्वास्थ, रात्रीची अस्वस्थ झोप, एकसारख्या वस्तू बघणे, उदाहरण देणे, चिंता करणे, अभ्यास करणे इ. विभावांनी तो उत्पन्न होतो. डोके हलविणे, पाहणे, भुवया वर नेणे इत्यादी अनुभावांनी याचा अभिनय करावा.

अत्रार्ये भवत:

सुखदु:खमतिक्रान्तं तथा मतिविभावितं यथावृत्तम्।
चिरविस्मृतं स्मरति य: स्मृतिमानिति वेदितव्योऽसौ ॥ ५४ ॥

पदच्छेद:- अत्र आर्ये भवत: -
सुखदु:खम् अतिक्रान्तं तथा मतिविभावितं यथावृत्तम्।
चिरविस्मृतं स्मरति य: स्मृतिमान् इति वेदितव्य: असौ ॥ ५४ ॥

अन्वय: - अत्र आर्ये भवत: -
य: मतिविभावितं चिरविस्मृतं अतिक्रान्तं सुखदु:खं यथावृत्तं तथा स्मरति असौ स्मृतिमान् इति वेदितव्य:।

अर्थ - यासंबंधित दोन आर्या प्रसिद्ध आहेत.
जो माणूस बुद्धीच्या प्रभावाने दीर्घकाळ विसरलेले सुख दु:ख जसेच्या तसे आठवतो तो स्मृतिमान आहे असे जाणावे.

स्वास्थाभ्याससमुत्था श्रुतिदर्शनसम्भवा स्मृतिर्निपुणै:।
शिरउद्वाहनकम्पैर्भ्रूक्षेपैश्चाभिनेतव्या ॥ ५५ ॥

पदच्छेद:- स्वास्थ-अभ्यास-समुत्था श्रुतिदर्शन-सम्भवा स्मृति: निपुणै:।
शिरउद्वाहनकम्पै: भ्रूक्षेपै: च अभिनेतव्या ॥ ५५ ॥

अन्वय: - निपुणै: स्वास्थ-अभ्यास-समुत्था श्रुतिदर्शनसम्भवा स्मृति: शिरउद्वाहनकम्पै: भ्रूक्षेपै: च अभिनेतव्या।

अर्थ - निपुण (नटांनी) उत्तम आरोग्य, अभ्यास, श्रवण, दर्शन इत्यादींमुळे निर्माण होणाऱ्या स्मृतीचा अभिनय डोके वर उचलणे, हलविणे, भुवयांच्या हालचाली इत्यादी अनुभावांनी करावा.

❖ धृती ❖

धृतिर्नाम शौर्यविज्ञानश्रुतिविभवशौचाचारगुरुभक्त्यधिकमनोरथार्थलाभक्रीडादिभिर्विभावै: समुत्पद्यते। तामभिनयेत्प्राप्तानां विषयाणामुपभोगाप्राप्तातीतोपहतविनष्टानामननुशोचनादिभिरनुभावै:।

पदच्छेद :- धृति: नाम शौर्य-विज्ञान-श्रुति-विभव-शौच-आचार-गुरुभक्ति-अधिकमनोरथ-अर्थलाभ-क्रीडादिभि: विभावै: समुत्पद्यते | ताम् अभिनयेत् प्राप्तानां विषयाणाम् उपभोगात् अप्राप्त-अतीत-उपहत-विनष्टानाम् अनुशोचन-आदिभि: अनुभावै: |

अर्थ - धृती नामक व्यभिचारी भाव शौर्य, विज्ञान, श्रवण, वैभव, पवित्रता, चांगली वर्तणूक, गुरुभक्ती, मनोरथ, अधिक अर्थलाभ, विविध क्रीडा इत्यादी विभावांनी उत्पन्न होतो. मिळालेल्या वस्तूच्या उपभोग घेणे आणि न मिळालेल्या, भूतकाळातील काही अंशी उपभोग घेतलेल्या आणि नष्ट झालेल्या गोष्टींचा विचार न करणे इत्यादी अनुभावांनी त्याचा अभिनय करावा.

अत्रार्ये भवत: -

विज्ञानशौचविभवश्रुतिशक्तिसमुद्भवा धृति: सद्भि: |
भयशोकविषादाद्यै रहिता तु सदा प्रयोक्तव्या || ५६ ||

पदच्छेद :- अत्र आर्ये भवत:
विज्ञान-शौच-विभव-श्रुति-शक्ति-समुद्भवा धृति: सद्भि: |
भय-शोक-विषादाद्यै: रहिता तु सदा प्रयोक्तव्या || ५६ ||

अन्वय : - अत्र आर्ये भवत:
विज्ञान-शौच-विभव-श्रुति-शक्ति-समुद्भवा धृति: सद्भि: सदा भय-शोक-विषादाद्यै: रहिता प्रयोक्तव्या |

अर्थ - यासंबंधित दोन आर्या आहेत.
विज्ञान, पवित्रता, वैभव, श्रवण आणि शक्ती यांमुळे 'धृती' उत्पन्न होतो. सज्जनांनी भय, शोक व विषाद रहित अनुभावांनी त्याचा अभिनय करावा.

प्राप्तानामुपभोग: शब्दरसस्पर्शरूपगन्धानाम् |
अप्राप्तैश्च न शोको यस्यां हि भवेद्धृति: सा तु || ५७ ||

पदच्छेद :- प्राप्तानाम् उपभोग: शब्द-रस-स्पर्श-रूप-गन्धानाम् |
अप्राप्तै: च न शोको यस्यां हि भवेत् धृति: सा तु || ५७ ||

अन्वय: - यस्यां शब्दरसस्पर्शरूपगन्धानां प्राप्तानाम् उपभोग: अप्राप्तै: च न शोक:, सा तु धृति: भवेत्|

अर्थ - ज्यामध्ये शब्द, स्पर्श, रस रूप व गंध या विषयांचा उपभोग घेतला जातो आणि न मिळालेल्या गोष्टींसाठी शोक नसतो ती धृती होय .

## ❖ व्रीडा ❖

व्रीडा नाम - अकार्यकरणात्मिका | सा च गुरुव्यतिक्रमणावज्ञानप्रतिज्ञातानिर्वहणपश्चात्तापादिभिर्विभावै: समुत्पद्यते | तां निगूढवदनाधोमुखविचिन्तनोर्वीलेखनवस्त्राङ्गुलीयकस्पर्शनखनिकृन्तनादिभिरनुभावैरभिनयेत्|

पदच्छेद: - व्रीडा नाम अकार्यकरणात्मिका | सा च गुरुव्यतिक्रमण-अवज्ञान-प्रतिज्ञात-अनिर्वहण-पश्चात्ताप-आदिभि: विभावै: समुत्पद्यते | तां निगूढवदन-अधोमुख-विचिन्तन-ऊर्वी लेखन-वस्त्र अङ्गुलीयक स्पर्श-नखनिकृन्तन-आदिभि: अनुभावै: अभिनयेत्|

अर्थ - व्रीडा नामक व्यभिचारी भावाच्या मुळाशी अनुचित कार्य असते . गुरुजनांसमोर विपरीत कार्य करणे, अपमानित होणे, प्रतिज्ञेचे पालन न करणे आणि पश्चात्ताप इ . विभावांमुळे हा व्यभिचारी भाव उत्पन्न होतो . तोंड लपविणे, मान खाली करून विचार करणे, जमिनीवर रेघोट्या काढणे, कपडे किंवा अंगठीला स्पर्श करणे, नखे कुरतडणे इ . अनुभावांनी त्याचा अभिनय करावा .

अत्रार्ये भवत:

किञ्चिदकार्यं कुर्वन्नेवं यो दृश्यते शुचिभिरन्यै: |
पश्चात्तापेन युतो व्रीडित इति वेदितव्योऽसौ || ५८ ||

पदच्छेद: - अत्र आर्ये भवत:

किञ्चित् अकार्यं कुर्वन् एवं य: दृश्यते शुचिभि: अन्यै: |
पश्चात्तापेन युत: व्रीडित: इति वेदितव्य: असौ ||५८||

अन्वय: - अत्र आर्ये भवत:
किञ्चित् अकार्यं कुर्वन् य: अन्यै: शुचिभि: एवं दृश्यते पश्चात्तापेन युत: असौ व्रीडित: इति वेदितव्य:|

अर्थ - जेव्हा अनुचित कार्य करणाऱ्या व्यक्तीला एखाद्या चांगल्या व्यक्तीद्वारे पाहिले जाते तेव्हा अनुचित कार्य करणारा व्यक्ती पश्चात्तापाने लज्जित होतो. अशावेळी त्याच्या मनात 'व्रीडा' हा व्यभिचारी भाव उत्पन्न झाला असे समजावे.

लज्जानिगूढवदनो भूमिं विलिखन्नखांश्च विनिकृन्तन्|
वस्त्राङ्गुलीयकानां संस्पर्शं व्रीडित: कुर्यात् ||५९||

पदच्छेद:- लज्जानिगूढवदन: भूमिं विलिखन् नखान् च विनिकृन्तन्|
वस्त्र अङ्गुलीयकानां संस्पर्शं व्रीडित: कुर्यात् ||५९||

अन्वय: - व्रीडित: लज्जानिगूढवदन: भूमिं विलिखन् नखान् च विनिकृन्तन् वस्त्राङ्गुलीयकानां संस्पर्शं कुर्यात्|

अर्थ - लज्जित व्यक्ती लाजेने तोंड लपवितो, जमिनीवर रेघोट्या मारतो, नखं कुरतडतो, कपडे व अंगठी यांना स्पर्श करतो.

## ❖ चपलता ❖

चपलता नाम रागद्वेषमात्सर्यामर्षेर्ष्याप्रतिकूलादिभिर्विभावै: समुत्पद्यते| तस्याश्च वाक्पारुष्यनिर्भर्त्सनवधबन्धसम्प्रहारताडनादिभिरनुभावैरभिनय: प्रयोक्तव्य:|

पदच्छेद:- चपलता नाम राग-द्वेष-मात्सर्य-अमर्ष-ईर्ष्या-प्रतिकूल-आदिभि: विभावै: समुत्पद्यते| तस्या: च वाक्पारुष्य-निर्भर्त्सन-वध-बन्ध-सम्प्रहार-ताडन-आदिभि: अनुभावै: अभिनय: प्रयोक्तव्य:|

अर्थ - 'चपलता' हा व्यभिचारी भाव प्रेम, द्वेष, मत्सर, क्रोध, ईर्ष्या आणि प्रतिकूलता इ. विभावांनी उत्पन्न होतो. कठोर वाक्यप्रयोग करणे, निर्भत्सना करणे, ठार मारणे, बंधनात ठेवणे, प्रहार करणे, ताडन करणे इत्यादी अनुभावांनी त्याचा अभिनय करावा.

अत्रार्या भवति -

अविमृश्य तु यः कार्य पुरुषो वधताडनं समारभते |
अविनिश्चितकारित्वात्स तु खलु चपलो बुधैर्ज्ञेयः || ६० ||

पदच्छेदः - अत्र आर्या भवति -
अविमृश्य तु यः कार्य पुरुषः वधताडनं समारभते |
अविनिश्चित-कारित्वात् सः तु खलु चपलः बुधैः ज्ञेयः || ६० ||

अन्वयः - अत्र आर्या भवति -
यः पुरुषः अविमृश्य वधताडनं कार्य समारभते सः खलु अविनिश्चितकारित्वात् चपलः (इति) बुधैः ज्ञेयः |

अर्थ - यासंबंधित आर्या पुढीलप्रमाणे -
जेव्हा एखादा माणूस अविचाराने एखाद्याचा वध करतो किंवा एखाद्याला मारतो तेव्हा अनिश्चित कार्य केल्यामुळे तो चपल आहे असे बुद्धिमान लोकांनी जाणावे .

## ❖ हर्ष ❖

हर्षो नाम मनोरथलाभेष्टजनसमागमनमनः परितोषदेवगुरुराजभर्तृप्रसादभोजनाच्छादन लाभोपभोगादिभिर्विभावैः समुत्पद्यते | तमभिनयेन्नयनवदनप्रसादप्रियभाषणालिङ्गन कण्टकितपुलकितास्त्रस्वेदादिभिरनुभावैः|

पदच्छेदः - हर्षः नाम मनोरथलाभ-इष्टजनसमागमन-मनःपरितोष- देवगुरुराजभर्तृप्रसाद-भोजन-आच्छादन-लाभ-उपभोग-आदिभिः विभावैः समुत्पद्यते | तम् अभिनयेत् नयनवदन प्रसाद-प्रियभाषण-आलिङ्गन-कण्टकित-पुलकितअस्त्र-स्वेद-आदिभिः अनुभावैः|

अर्थ - मनोरथ पूर्ण होणे, प्रिय व्यक्तीचा सहवास घडणे, मानसिक संतोष, देव, गुरू, राजा, मालक यांची कृपा, भोजन, वस्त्र, धनलाभ आणि सर्व गोष्टींचा उपभोग इत्यादी विभावांनी 'हर्ष' हा व्यभिचारी भाव उत्पन्न होतो . डोळे व मुख प्रसन्न होणे, गोड बोलणे, आलिंगन देणे, रोमांचित होणे, आनंदाश्रू येणे, घाम येणे इत्यादी अनुभावांनी त्याचा अभिनय करावा .

अत्रार्ये भवतः

अप्राप्ये प्राप्ये वा लब्धेऽर्थे प्रियसमागमे वाऽपि |
हृदयमनोरथलाभे हर्षः सञ्जायते पुंसाम् || ६१ ||

पदच्छेदः- अत्र आर्ये भवतः
अप्राप्ये प्राप्ये वा लब्धे अर्थे प्रियसमागमे वा अपि |
हृदय-मनोरथ-लाभे हर्षः सञ्जायते पुंसाम् || ६१ ||

अन्वयः - अत्र आर्ये भवतः
अप्राप्ये प्राप्ये लब्धे अर्थे प्रियसमागमे वा हृदयमनोरथलाभे पुंसां हर्षः सञ्जायते |

अर्थ - यासंबंधित दोन आर्या पुढीलप्रमाणे -
एखादी वस्तू प्राप्त होणे, अप्राप्य अशी वस्तू मिळणे, प्रिय व्यक्तीचा सहवास घडणे, हृदयातील मनोरथ पूर्ण होणे इत्यादी गोष्टींमुळे माणसांना हर्ष होतो .

नयनवदनप्रसादप्रियभाषालिङ्गनैश्च रोमाञ्चैः |
ललितैश्चाङ्गविहारैः स्वेदाद्यैरभिनयस्तस्य || ६२ ||

पदच्छेदः- नयनवदनप्रसाद-प्रियभाषा-आलिङ्गनैः च रोमाञ्चैः |
ललितैः च अङ्गविहारैः स्वेदाद्यैः अभिनयः तस्य || ६२ ||

अन्वयः - नयनवदनप्रसाद-प्रियभाषा-आलिङ्गनैः च रोमाञ्चैः ललितैः च अङ्गविहारैः स्वेदाद्यैः तस्य अभिनयः (कार्यः) |

अर्थ - डोळे आणि मुख तेजस्वी होणे, प्रिय बोलणे, आलिंगन देणे, रोमांचित होणे, अंगाच्या नाजूक हालचाली करणे व घाम येणे इत्यादी अनुभावांनी त्याचा अभिनय करावा .

## ❖ आवेग ❖

आवेगो नाम उत्पातवातवर्षाग्निकुञ्जरोद्भ्रमणप्रियाप्रियश्रवणव्यसनाभिघातादिभिर्विभावैः समुत्पद्यते| तत्रोत्पातकृतो नाम विद्युदुल्कानिर्घातप्रपतनचन्द्रसूर्योपरागकेतुदर्शनकृतः | तमभिनयेत्सर्वाङ्गस्रस्तता वैमनस्यमुखवैवर्ण्यविषादविस्मयादिभिः | वातकृतं पुनरवकुण्ठनाक्षिपरिमार्जनवस्त्रसङ्गूहनत्वरित

गमनादिभिः । वर्षाकृतं पुनः सर्वाङ्गसम्पिण्डनप्रधावनच्छन्नाश्रयमार्गणादिभिः । अग्निकृतं तु धूमाकुलनेत्रताऽङ्गसङ्कोचनविधूननातिक्रान्तापक्रान्तादिभिः। कुञ्जरोद्भ्रमणकृतं नाम त्वरितापसर्पणचञ्चलगमनभयस्तम्भवेपथुपश्चादवलोकनविस्मयादिभिः । प्रियश्रवणकृतं नाम अभ्युत्थानालिङ्गन वस्त्राभरण प्रदानाश्रुपुलकितादिभिः । अप्रियश्रवणकृतं नाम भूमिपतनविषमविवर्तनपरिधावन विलापनाक्रन्दनादिभिः । व्यसनाभिघातजं तु सहसापसर्पणशस्त्रचर्मवर्मधारण गजतुरगरथारोहण सम्प्रधारणादिभिः।

पदच्छेदः - आवेगः नाम उत्पात-वात-वर्षा-अग्नि-कुञ्जर-उद्भ्रमण-प्रियाप्रियश्रवण-व्यसन-अभिघात-आदिभिः विभावैः समुत्पद्यते। तत्र उत्पातकृतः नाम विद्युत्-उल्का-निर्घात-प्रपतन-चन्द्र-सूर्य-उपराग-केतुदर्शन-कृतः । तम् अभिनयेत् सर्वाङ्ग-स्रस्तता-वैमनस्य-मुखवैवर्ण्य-विषाद-विस्मय-आदिभिः।

वातकृतं पुनः अवकुण्ठन अक्षिपरिमार्जन-वस्त्रसङ्गूहन-त्वरितगमन-आदिभिः।

वर्षाकृतं पुनः सर्वाङ्ग-सम्पिण्डन-प्रधावन- छन्नाश्रयमार्गण-आदिभिः।

अग्निकृतं तु धूमाकुलनेत्रता-अङ्गसङ्कोचन-विधूनन-अतिक्रान्त-अपक्रान्त-आदिभिः।

कुञ्जरोद्भ्रमणकृतं नाम त्वरित-अपसर्पण-चञ्चलगमन-भय-स्तम्भ-वेपथु-पश्चात् अवलोकन-विस्मय-आदिभिः।

प्रियश्रवणकृतं नाम अभ्युत्थान-आलिङ्गन-वस्त्राभरण-प्रदान-अश्रुपुलकित-आदिभिः।

अप्रियश्रवणकृतं नाम भूमिपतन-विषम-विवर्तन-परिधावन-विलापन-आक्रन्दन-आदिभिः।

व्यसनाभिघातजं तु सहसा-अपसर्पण-शस्त्र-चर्म-वर्मधारण-गज-तुरग-रथारोहण-सम्प्रधारण-आदिभिः।

अर्थ - अशुभ सूचक प्राकृतिक घटना, वादळ, पाऊस, अग्नीचा प्रकोप व हत्तींचे इकडेतिकडे धावणे, प्रिय तसेच अप्रिय गोष्ट ऐकणे, संकट, प्रहार इत्यादी विभावांनी 'आवेग' हा व्यभिचारी भाव उत्पन्न होतो .

उत्पात म्हणजेच अशुभ सूचक प्राकृतिक घटना . या संदर्भात वीज, उल्का, तारा पडणे, वज्रपात, चंद्र व सूर्यग्रहण, केतू (राहूसारख्या अशुभ) ग्रहाचे दर्शन इत्यादी विभावांनी उत्पन्न होतो .

याचा अभिनय सर्वांग शिथिल होणे, मन अस्थिर होणे, मुखाचा रंग बदलणे, दु:ख, विस्मय, इत्यादि अनुभावांनी अभिनय करावा .

मुख झाकणे, डोळे चोळणे, वस्त्र सांभाळणे, जलद चालणे इत्यादी अनुभावांनी वाऱ्यामुळे निर्माण होणाऱ्या आवेगाचा अभिनय करावा .

सर्व शरीर आकसून घेणे, धावणे, छप्पर असलेला आश्रय शोधणे इत्यादी अनुभावांनी पावसामुळे निर्माण होणाऱ्या आवेगाचा अभिनय करावा .

डोळे धुराने भरून जाणे, अंग संकोचून घेणे किंवा हलवणे, मोठी मोठी पावले घेत धावणे इत्यादी अनुभावांनी अग्नीमुळे निर्माण होणाऱ्या आवेगाचा अभिनय करावा .

हत्तीने मोकाट धावल्याने निर्माण होणाऱ्या आवेगाचा अभिनय, झटकन बाजूला सरकणे, लवकर चालणे, भय वाटणे, स्तंभित होणे, थरथरणे, मागे वळून पाहणे, आश्चर्यचकित होणे इत्यादी अनुभावांनी करावा .

प्रिय गोष्टी ऐकण्यापासून उत्पन्न होणाऱ्या आवेगाचा अभिनय, (एकाएकी) उठून उभे राहणे, आलिंगन देणे, वस्त्र व दागिने दान करणे, अश्रू, रोमांच इत्यादि अनुभावांनी करावा .

अप्रिय गोष्टी ऐकण्यामुळे उत्पन्न होणाऱ्या आवेगाचा अभिनय, जमिनीवर पडणे, विषम किंवा खडबडीत जागेवर लोळणे, धावणे , विलाप करणे, रडणे इत्यादी अनुभावांनी करावा .

संकट कोसळल्यामुळे निर्माण होणाऱ्या आवेगाचा अभिनय, अचानक बाजूला होणे, शस्त्र व चिलखत धारण करणे, हत्ती घोडे आणि रथ यांवर चढणे आणि प्रहार करणे इत्यादी अनुभावांनी करावा .

एवमष्टविकल्पोऽयमावेग: सम्भ्रमात्मक: |
स्थैर्येणोत्तममध्यानां नीचानां चापसर्पणै: || ६३ ||

पदच्छेद : - एवम् अष्टविकल्प : अयम् आवेग : सम्भ्रमात्मक :|
स्थैर्येण उत्तममध्यानां नीचानां च अपसर्पणै :|| ६३ ||

अन्वय : - एवम् अष्टविकल्प: सम्भ्रमात्मक: अयम् आवेग: उत्तममध्यानां स्थैर्येण नीचानां च अपसर्पणै: (व्यक्तीभवति)|

अर्थ - अशाप्रकारे 'संभ्रम' मुळाशी असणाऱ्या आवेगाचे हे आठ प्रकार आहेत. उत्तम व मध्यम व्यक्तींचा आवेग हा धैर्याने व्यक्त होतो तर अधम व्यक्तींचा आवेग पलायनाने व्यक्त होतो .

अत्रार्ये भवत: -

अप्रियनिवेदनाद्वा सहसा ह्यवधारितारिवचनस्य |
शस्त्राक्षेपात् त्रासादावेगो नाम सम्भवति || ६४ ||

पदच्छेद : - अत्र आर्ये भवत : -
अप्रियनिवेदनात् वा सहसा हि अवधारित-अरिवचनस्य |
शस्त्राक्षेपात् त्रासात् आवेग : नाम सम्भवति || ६४ ||

अन्वय : - अत्र आर्ये भवत : -
सहसा अवधारितारिवचनस्य अप्रियनिवेदनात् शस्त्राक्षेपात् त्रासात् आवेग: नाम सम्भवति |

अर्थ - यासंबंधित दोन आर्या पुढीलप्रमाणे -
अचानकपणे शत्रूचे बोलणे ऐकून अपमानित झाल्यावर अप्रिय बोलणे, शस्त्राने वार करणे आणि त्रास यामुळे आवेग उत्पन्न होतो .

अप्रियनिवेदनाद्यो विषादभावाश्रयोऽनुभावोऽस्य |
सहसारिदर्शनाच्चेत्प्रहरणपरिघट्टनै: कार्य: || ६५ ||

पदच्छेद : - अप्रियनिवेदनात् य : विषादभावाश्रय : अनुभाव : अस्य |
सहसा अरिदर्शनात् चेत् प्रहरणपरिघट्टनै : कार्य :|| ६५ ||

अन्वय: - अप्रियनिवेदनात् विषादभावाश्रय: अस्य य: अनुभाव: सहसा अरिदर्शनात् चेत् प्रहरणपरिघट्टनै: कार्य:|

अर्थ - अप्रिय बातमी ऐकून होणाऱ्या आवेगाचा अनुभाव विषाद या भावाच्या आश्रयात असतो. अचानक शत्रूचे दर्शन झाले तर होणाऱ्या आवेगाचा अभिनय शस्त्र उचलून करावा.

❖ जडता ❖

जडता नाम सर्वकार्याप्रतिपत्ति:| इष्टानिष्टश्रवणदर्शनव्याध्यादिभिर्विभावै: समुत्पद्यते| तामभिनयेदकथनाविभाषणतूष्णीम्भावाप्रतिभाऽनिमेषनिरीक्षणपरवशत्वादिभिरनुभावै:|

पदच्छेद: - जडता नाम सर्वकार्य-अप्रतिपत्ति: | इष्ट-अनिष्ट-श्रवणदर्शन-व्याधि-आदिभि: विभावै: समुत्पद्यते | ताम् अभिनयेत् अकथन-अविभाषण-तूष्णीम्भाव-अप्रतिभा-अनिमेषनिरीक्षण-परवशत्व-आदिभि: अनुभावै:|

अर्थ - सर्व प्रकारच्या कार्यामध्ये प्रवृत्तीचा अभाव, इष्ट किंवा अनिष्ट गोष्टी ऐकणे किंवा बघणे, व्याधी इत्यादी विभावांनी 'जडता' हा व्यभिचारी भाव उत्पन्न होतो.
काही न बोलणे, अस्पष्ट बोलणे, गप्प बसणे, हतप्रभ होणे, एकटक पाहणे, दुसऱ्यांवर अवलंबून असणे इत्यादी अनुभावांनी त्याचा अभिनय करावा.

अत्रार्या भवति

इष्टं वाऽनिष्टं वा सुखदु:खे वा न वेत्ति यो मोहात्|
तूष्णीक: परवशगो भवति स जडसंज्ञित: पुरुष:|| ६६ ||

पदच्छेद: - अत्र आर्या भवति -
इष्टं वा अनिष्टं वा सुखदु:खे वा न वेत्ति य: मोहात्|
तूष्णीक: परवशग: भवति स: जडसंज्ञित: पुरुष:|| ६६ ||

अन्वय: - अत्र आर्या भवति -
य: मोहात् इष्टं वा अनिष्टं वा सुखदु:खे वा न वेत्ति स: तूष्णीक: परवशग: पुरुष: जडसंज्ञित: भवति|

अर्थ - यासंबंधित आर्या पुढीलप्रमाणे -

जेव्हा एखाद्या माणसाला मोहामुळे इष्ट व अनिष्ट, सुख आणि दु:ख यातील फरक कळेनासा होतो . तो गप्प बसून राहतो आणि दुसऱ्यांच्या अधीन असतो तेव्हा त्याला 'जड पुरुष' म्हणतात .

## ❖ गर्व ❖

गर्वो नाम ऐश्वर्यकुलरूपयौवनविद्याबलधनलाभादिभिर्विभावै: समुत्पद्यते | तस्यासूयावज्ञाधर्षणानुत्तरदानासम्भाषणाङ्गावलोकनविभ्रमापहसनवाक्पारुष्यगुरुव्यतिक्रमणाधिक्षेपवचनविच्छेदादिभिरनुभावैरभिनय:प्रयोक्तव्य:|

पदच्छेद:- गर्व: नाम ऐश्वर्य-कुल-रूप-यौवन-विद्या-बल-धन-लाभ-आदिभि: विभावै: समुत्पद्यते | तस्य असूया-अवज्ञा-अधर्षण- अनुत्तरदान-असम्भाषण-अङ्गावलोकन विभ्रम-अपहसन-वाक्पारुष्य-गुरुव्यतिक्रमण-अधिक्षेप-वचनविच्छेद-आदिभि: अनुभावै: अभिनय: प्रयोक्तव्य:|

अर्थ - ऐश्वर्य, कुल, रूप, यौवन, विद्या, बल, धनलाभ इत्यादी विभावांनी 'गर्व' हा व्यभिचारी भाव उत्पन्न होतो .

असूया, अवज्ञा, अनादर, उत्तर न देणे, संभाषण न करणे, अंगांचे निरीक्षण करणे, विभ्रम (उद्विग्नता), दुसऱ्यांना हसणे (त्यांची टर उडवणे), कठोर बोलणे, गुरुजनांची अवहेलना करणे, दुसऱ्यांशी अपमानास्पद (व्यंगपूर्ण) बोलणे, मधूनच वाक्य तोडणे इत्यादी अनुभावांनी गर्व या व्यभिचारी भावाचा अभिनय करावा .

अत्रार्या भवति -

विद्यावाप्ते रूपादैश्वर्यादथ धनागमाद्वापि |
गर्व: स च नीचानां दृष्ट्यङ्गविचारणै: कार्य: || ६७ ||

पदच्छेद:- अत्र आर्या भवति -

विद्यावाप्ते रूपात् ऐश्वर्यात् अथ धनागमात् वा अपि |
गर्व: स: च नीचानां दृष्टि-अङ्गविचारणै: कार्य: || ६७ ||

अन्वय : - अत्र आर्या भवति -
नीचानां स : गर्व : विद्यावाप्ते रूपात् ऐश्वर्यात् अथ धनागमात् च दृष्टि-अङ्गविचारणै : कार्य : |

अर्थ - यासंबंधित आर्या पुढीलप्रमाणे -
विद्याप्राप्ती, रूप, ऐश्वर्य व धनलाभ यांमुळे निर्माण होणाऱ्या दृष्टी व अंगाच्या उद्धट हालचालींनी नीच व्यक्तीच्या गर्वाचा अभिनय करावा .

## ❖ विषाद ❖

विषादो नाम कार्यानिस्तरणदैवव्यापत्तिसमुत्थ : |
तमभिनयेत्सहायान्वेषणोपायचिन्तनोत्साहविघातवैमनस्यनि :श्वसितादिभिरनुभावैरुत्तममध्यमानाम् |
अधमानां तु विपरिधावनालोकनमुखशोषणसृक्वपरिलेहनानिद्रानि :श्वसितध्यानादिभिरनुभावै : |

पदच्छेद : - विषाद : नाम कार्य-अनिस्तरण-दैवव्यापत्ति-समुत्थ : | तम् अभिनयेत् सहाय-अन्वेषण-उपाय-चिन्तन-उत्साह-विघात-वैमनस्य-नि :श्वसित-आदिभि : अनुभावै : उत्तम-मध्यमानाम् | अधमानां तु विपरिधावन-आलोकन-मुखशोषण-सृक्वपरिलेहन-अनिद्रा-नि :श्वसित-ध्यान-आदिभि : अनुभावै : |

अर्थ - कार्य करू न शकणे आणि दैवी आपत्तींमुळे 'विषाद' हा व्यभिचारी भाव उत्पन्न होतो . मदतीचा शोध, उपायाविषयी विचार (चिंतन), उत्साहाचा नाश, मन खिन्न होणे, नि :श्वास इत्यादी अनुभावांनी उत्तम व मध्यम लोकांनी विषादाचा अभिनय करावा . अधम लोकांनी विषादाचा अभिनय, विपरीत धावणे, निरीक्षण करणे, तोंड कोरडे पडणे, तोंडाचे कोपरे जीभेने चाटणे, झोप न येणे, खोल श्वास घेणे, ध्यान करणे इत्यादी अनुभावांनी करावा .

अत्रार्याश्लोकौ -

कार्यानिस्तरणाद्वा चौर्याभिग्रहणराजदोषाद्वा |
दैवादर्थविपत्तेर्भवति विषाद : सदा पुंसाम् || ६८ ||

पदच्छेद : - अत्र आर्याश्लोकौ -
कार्य-अनिस्तरणात् वा चौर्य-अभिग्रहण-राजदोषात् वा |
दैवात् अर्थविपत्ते : भवति विषाद : सदा पुंसाम् || ६८ ||

अन्वय : - अत्र आर्याश्लोकौ -
कार्यानिस्तरणात् चौर्य-अभिग्रहण-राजदोषात् वा दैवात् अर्थविपत्ते : पुंसाम् सदा विषाद : भवति |

अर्थ - यासंबंधित आर्या आणि श्लोक पुढीलप्रमाणे -
कार्य पूर्ण न होणे, चोरी करत असताना पकडले जाणे, राजद्रोह करणे आणि दुर्भाग्यामुळे आलेले आर्थिक संकट इत्यादींमुळे पुरुषांमध्ये विषाद उत्पन्न होतो .

वैचित्र्योपायचिन्ताभ्यां कार्य उत्तममध्ययो : |
निद्रानि :श्वसितध्यानैरधमानां तु योजयेत् || ६९ ||

पदच्छेद : - वैचित्र्य-उपाय-चिन्ताभ्यां कार्य : उत्तममध्ययो : |
निद्रा-नि :श्वसित-ध्यानै : अधमानां तु योजयेत् || ६९ ||

अन्वय : - उत्तममध्ययो : (विषाद :) वैचित्र्य-उपाय-चिन्ताभ्यां कार्य : | अधमानां (विषाद :) निद्रा-नि :श्वसित-ध्यानै : योजयेत् |

अर्थ - उत्तम व मध्यम व्यक्तींच्या विषादाचा अभिनय, विविध उपायांचे चिंतन याद्वारे करावा तर अधम लोकांच्या विषादाचा अभिनय, झोपणे, नि :श्वास आणि ध्यान करणे यांद्वारे करावा .

## ❖ औत्सुक्य ❖

औत्सुक्यं नाम इष्टजनवियोगानुस्मरणोद्यानदर्शनादिभिर्विभावै : समुत्पद्यते |
तस्य दीर्घनि :श्वसिताधोमुखविचिन्तननिद्रातन्द्रीशयनाभिलाषादिभिरनुभावैरभिनय : प्रयोक्तव्य : |

पदच्छेद : - औत्सुक्यं नाम इष्टजनवियोग-अनुस्मरण-उद्यानदर्शन-आदिभि : विभावै : समुत्पद्यते |
तस्य दीर्घनि :श्वसित-अधोमुख-विचिन्तन-निद्रा-तन्द्री-शयन-अभिलाषा-आदिभि : अनुभावै : अभिनय : प्रयोक्तव्य : |

अर्थ - प्रियव्यक्तींचा वियोग, त्यांचे स्मरण, उद्यानाचे दर्शन इत्यादी विभावांनी 'औत्सुक्य' हा व्यभिचारी भाव उत्पन्न होतो.
त्याचा अभिनय दीर्घ नि:श्वास, अधोमुख होणे, चिंतन करणे, झोपणे, नुसते पडून राहणे, झोपण्याची इच्छा इत्यादी अनुभावांनी करावा.

अत्रार्या भवति -
इष्टजनस्य वियोगादौत्सुक्यं जायते ह्यनुस्मृत्या |
चिन्तानिद्रातन्द्रीगात्रगुरुत्वैरभिनयोऽस्य || ७० ||

पदच्छेद : - अत्र आर्या भवति -
इष्टजनस्य वियोगात् औत्सुक्यं जायते हि अनुस्मृत्या |
चिन्ता-निद्रा-तन्द्री-गात्रगुरुत्वै : अभिनय : अस्य || ७० ||

अन्वय : - अत्र आर्या भवति -
इष्टजनस्य वियोगात् अनुस्मृत्या औत्सुक्यं हि जायते | चिन्ता-निद्रा-तन्द्री-गात्रगुरुत्वै : अस्य अभिनय : (कार्य :) |

अर्थ - यासंबंधित आर्या पुढीलप्रमाणे -
प्रिय व्यक्तींचा वियोग व त्यांचे स्मरण केल्याने औत्सुक्य निर्माण होते. काळजी करणे, झोपणे, तंद्रीत असणे, अंग जड होणे इ. अनुभावांनी त्याचा अभिनय करावा.

## ❖ निद्रा ❖

निद्रा नाम दौर्बल्यश्रमक्लममदालस्यचिन्ताऽत्याहारस्वभावादिभिर्विभावै : समुत्पद्यते | तामभिनयेद्वदनगौरवशरीरावलोकननेत्रघूर्णनगात्रविजृम्भणमान्द्योच्छ्वसितसन्नगात्रताऽक्षिनिमीलनादिभिरनुभावै : |

पदच्छेद : - निद्रा नाम दौर्बल्य-श्रम-क्लम-मद-आलस्य-चिन्ता-अत्याहार-स्वभाव-आदिभि : विभावै : समुत्पद्यते | ताम् अभिनयेत् वदनगौरव-शरीरावलोकन-नेत्रघूर्णन-गात्रविजृम्भण-मान्द्य उच्छ्वसित-सन्नगात्रता-अक्षिनिमीलन-आदिभि : अनुभावै : |

अर्थ - निद्रा हा व्यभिचारी भाव दुर्बलता, श्रम, थकणे, मद, आळस, चिंता, अतिआहार व

स्वभाव इत्यादी विभावांमुळे उत्पन्न होतो .

त्याचा अभिनय तोंड जड होणे, शरीर लोळणे, डोळे फिरवणे, जांभई, अंग मोडणे, मंद उच्छ्वास, शरीर सुन्न व शिथिल होणे, डोळे मिटणे इत्यादी अनुभावांनी करावा .

अत्रार्ये भवत: -

आलस्याद्दौर्बल्यात्क्लमाच्छ्रमाच्चिन्तनात्स्वभावाच्च |
रात्रौ जागरणादपि निद्रा पुरुषस्य सम्भवति|| ७१ ||

पदच्छेद: - अत्र आर्ये भवत: -
आलस्यात् दौर्बल्यात् क्लमात् श्रमात् चिन्तनात् स्वभावात् च |
रात्रौ जागरणात् अपि निद्रा पुरुषस्य सम्भवति || ७१ ||

अन्वय: - अत्र आर्ये भवत: -
आलस्यात् दौर्बल्यात् क्लमात् श्रमात् चिन्तनात् स्वभावात् रात्रौ जागरणात् च पुरुषस्य निद्रा सम्भवति |

अर्थ - यासंबंधित आर्या पुढीलप्रमाणे -
आळस, दुर्बलता, थकणे, श्रम, चिंतन, स्वभाव, रात्रीच्या जागरणामुळे व्यक्तींमध्ये निद्रा हा भाव उत्पन्न होतो .

तां मुखगौरवगात्रप्रतिलोलननयनमीलनजडत्वै: |
जृम्भणगात्रविमर्दैरनुभावैरभिनयेत्प्राज्ञ : || ७२ ||

पदच्छेद: - तां मुखगौरव-गात्रप्रतिलोलन-नयनमीलन-जडत्वै : |
जृम्भणगात्रविमर्दै : अनुभावै : अभिनयेत् प्राज्ञ : || ७२ ||

अन्वय: - प्राज्ञ : मुखगौरवगात्र-प्रतिलोलन-नयनमीलन-जडत्वै : जृम्भणगात्रविमर्दै : अनुभावै : ताम् अभिनयेत् |

अर्थ - मुख जड होणे, अंग फिरणे (तोल जाणे) (किंवा कूस बदलणे), डोळे मिटणे, जडता,जांभई, अंग दाबणे इत्यादी अनुभावांनी त्याचा अभिनय करावा .

## ❖ अपस्मार ❖

अपस्मारो नाम देवयक्षनागब्रह्मराक्षस भूतप्रेतपिशाचग्रहणानुस्मरणोच्छिष्टशून्यागारसेवनाशुचि कालान्तरापरिपतनव्याध्यादिभिर्विभावै: समुत्पद्यते|
तस्य स्फुरितनि:श्वसितोत्कम्पितधावनपतनस्वेदस्तम्भनवदनफेनजिह्वापरिलेहनादिभिरनुभावैरभिनय: - प्रयोक्तव्य:|

पदच्छेद: - अपस्मार: नाम देव-यक्ष-नागब्रह्म-राक्षस-भूतप्रेत-पिशाचग्रहण-अनुस्मरण-उच्छिष्ट (सेवन)-शून्यागारसेवन अशुचि कालान्तर-अपरिपतन-व्याधि-आदिभि: विभावै: समुत्पद्यते|
तस्य स्फुरित-नि:श्वसित-उत्कम्पित-धावन-पतन-स्वेद-स्तम्भन-वदन-फेन-जिह्वा-परिलेहन-आदिभि: अनुभावै: अभिनय: प्रयोक्तव्य:|

अर्थ - देव, यक्ष, नाग, ब्रह्मराक्षस, पिशाच्च इत्यादींकडून पकडले जाणे, त्यांचे स्मरण करणे, उष्टे जेवण खाणे, निर्जन घरात राहणे, अपावित्र्य, वेळेचे पालन न करणे, व्याधी इत्यादी विभावांमुळे अपस्मार हा व्यभिचारी भाव उत्पन्न होतो .
धडधडणे, नि:श्वास, कापणे (थरथरणे), धावणे, पडणे, घाम येणे, निश्चेष्ट होणे, तोंडातून फेस येणे, जिभेने ओठ चाटणे इत्यादी अनुभाव आहेत .

अत्रार्ये भवत: -
भूतपिशाचग्रहणानुस्मरणोच्छिष्टशून्यगृहगमनात्|
कालान्तरातिपातादशुचेश्च भवत्यपस्मार: || ७३ ||

पदच्छेद: - अत्र आर्ये भवत: -
भूतपिशाचग्रहण-अनुस्मरण-उच्छिष्टशून्यगृहगमनात्|
कालान्तरातिपातात् अशुचे: च भवति अपस्मार: || ७३ ||

अन्वय: - अत्र आर्ये भवत: -
भूतपिशाचग्रहण-अनुस्मरण-उच्छिष्टशून्यगृहगमनात् कालान्तरातिपातात् अशुचे: च अपस्मार: भवति|

अर्थ - यासंबंधित दोन आर्या आहेत .
भूत, पिशाच यांनी पकडल्याने किंवा त्यांच्या स्मरणाने, उष्टे अन्न खाणे, रिकाम्या घरात जाणे , वेळेचे बंधन न पाळणे, अपावित्र्य इत्यादींमुळे अपस्मार होतो .

सहसा भूमौ पतनं प्रवेपनं वदनफेनमोक्षश्च |
नि:संज्ञस्योत्थानं रूपाण्येतान्यपस्मारे || ७४ ||

पदच्छेद : - सहसा भूमौ पतनं प्रवेपनं वदनफेनमोक्ष: च |
नि:संज्ञस्य उत्थानं रूपाणि एतानि अपस्मारे || ७४ ||

अन्वय : - अपस्मारे सहसा भूमौ पतनं प्रवेपनं वदनफेनमोक्ष: नि:संज्ञस्य उत्थानं च एतानि रूपाणि (भवन्ति) |

अर्थ - अचानक जमिनीवर पडणे, थरथरणे, तोंडातून फेस बाहेर येणे, संज्ञारहित होऊन अचानक उठून उभे राहणे इत्यादी अपस्माराचे अनुभाव आहेत .

## ❖ सुप्त ❖

सुप्तं नाम - निद्राभिभवविषयोपगमनमोहनक्षितितलशयनप्रसारणानुकर्षणादिभिर्विभावै: समुत्पद्यते निद्रासमुत्थम् | तदुच्छ्वसितसन्नगात्राक्षिनिमीलनसर्वेन्द्रियसम्मोहनोत्स्वप्नायितादिभिरनुभावैरभिनयेत् |

पदच्छेद : - सुप्तं नाम निद्रा-अभिभव-विषय-उपगमन-मोहन-क्षितितलशयनप्रसारण-अनुकर्षण-आदिभि: विभावै: समुत्पद्यते निद्रासमुत्थम् | तत्-उच्छ्वसित-सन्नगात्र-अक्षिनिमीलन-सर्वेन्द्रिय-सम्मोहन-उत्स्वप्नायित-आदिभि : - अनुभावै : अभिनयेत् |

अर्थ - झोपमोड होणे, इंद्रियांचा उपभोग घेणे, मोहित होणे, जमिनीवर झोपणे, अंग परसवणे किंवा संकोचित करणे इ. विभावांनी सुप्त हा व्यभिचारी भाव उत्पन्न होतो .
उच्छ्वास , नि:श्वास, अवयव शिथिल होणे, डोळे मिटणे, सर्व इंद्रिय सम्मोहित होणे, स्वप्नात बडबडणे इत्यादी अनुभावांनी निद्रेमध्ये होणाऱ्या सुप्तावस्थेचा अभिनय करावा .

अत्रार्ये भवतः -

निद्राभिभवेन्द्रियोपरमणमोहनैर्भवेत्सुप्तम् ।
अक्षिनिमीलोच्छ्वसनैः स्वप्नायितजल्पितैः कार्यः ॥ ७५ ॥

पदच्छेदः - अत्र आर्ये भवतः -
निद्रा-अभिभव-इन्द्रिय-उपरमण-मोहनैः भवेत् सुप्तम् ।
अक्षि-निमील-उच्छ्वसनैः स्वप्नायितजल्पितैः कार्यः ॥ ७५ ॥

अन्वयः - अत्र आर्ये भवतः -
निद्रा-अभिभव-इन्द्रिय-उपरमण-मोहनैः सुप्तं भवेत् । अक्षिनिमील-उच्छ्वसनैः स्वप्नायित-जल्पितैः (एतस्य अभिनयः) कार्यः ।

अर्थ - याठिकाणी दोन आर्या सांगितल्या जातात.
निद्रेमध्ये बाधा येणे, इंद्रियसुखात रमून जाणे आणि मोह यांमुळे सुप्त हा व्यभिचारी भाव उत्पन्न होतो. डोळे मिटणे, उच्छ्वास सोडणे, झोपेत बडबडणे इ. द्वारे त्याचा अभिनय करावा.

सोच्छ्वासैर्निःश्वासैर्मन्दाक्षिनिमीलनेन निश्चेष्टः ।
सर्वेन्द्रियसम्मोहात्सुप्तं स्वप्नैश्च युञ्जीत ॥ ७६ ॥

पदच्छेदः - सोच्छ्वासैः निःश्वासैः मन्दाक्षिनिमीलनेन निश्चेष्टः ।
सर्वेन्द्रियसम्मोहात् सुप्तं स्वप्नैः च युञ्जीत ॥ ७६ ॥

अन्वयः - सोच्छ्वासैः निःश्वासैः मन्दाक्षिनिमीलनेन निश्चेष्टः सर्वेन्द्रियसम्मोहात् स्वप्नैः च सुप्तं युञ्जीत ।

अर्थ - उच्छ्वास आणि निःश्वास घेणे, डोळे हळूहळू बंद करणे, निश्चेष्ट (पडून)राहणे, सर्व इंद्रिय संमोहित होणे व स्वप्न बघणे इत्यादी अनुभावांद्वारे 'सुप्त' चा अभिनय करावा.

## ❖ विबोध ❖

विबोधो नाम- आहारपरिणामनिद्राच्छेदस्वप्नान्ततीव्रशब्दस्पर्शश्रवणादिर्भिविभावैः समुत्पद्यते । तमभिनयेज्जृम्भणाक्षिपरिमर्दनशयनमोक्षणादिभिरनुभावैः ।

पदच्छेद :- विबोध : नाम आहारपरिणामनिद्राच्छेद-स्वप्नान्त-तीव्रशब्दस्पर्शश्रवण-आदिभि : विभावै : समुत्पद्यते |
तम् अभिनयेत् जृम्भण-अक्षिपरिमर्दन-शयनमोक्षण-आदिभि : अनुभावै : |

अर्थ - तीव्र ध्वनी, तीव्र स्पर्श किंवा तीव्र शब्द ऐकल्यामुळे जेवणाचा परिणाम म्हणून जी झोप येते तिचा जेव्हा भंग होतो तसेच स्वप्नाचा भंग होतो तेव्हा विबोध हा व्यभिचारी भाव उत्पन्न होतो . जांभई देणे, डोळे चोळणे, पलंगावरून उठणे इत्यादी अनुभावांनी त्याचा अभिनय करावा .

अत्रार्या भवति -

आहारविपरिणामाच्छब्दस्पर्शादिभिश्च सम्भूत : |
प्रतिबोधस्त्वभिनेयो जृम्भणवदनाक्षिपरिमर्दै : || ७७ ||

पदच्छेद :- अत्र आर्या भवति -
आहारविपरिणामात् शब्दस्पर्शादिभि : च सम्भूत : |
प्रतिबोध : तु अभिनेय : जृम्भणवदन-अक्षिपरिमर्दै : || ७७ ||

अन्वय : - अत्र आर्या भवति -
आहारविपरिणामात् शब्दस्पर्शादिभि : च (विबोध :) सम्भूत : (भवति) |
जृम्भणवदन-अक्षिपरिमर्दै : प्रतिबोध : अभिनेय : |

अर्थ - यासंबंधित आर्या पुढीलप्रमाणे -
शब्द, स्पर्श इ . नी भोजनाचा परिणामस्वरूप येणाऱ्या निद्रेतून विबोध निर्माण होतो . विबोधाचा अभिनय जांभई देणे, मुख व डोळे चोळणे इत्यादींनी करावा .

## ❖ अमर्ष ❖

अमर्षो नाम विद्यैश्वर्यशौर्यबलाधिकैरधिक्षिप्तस्यावमानितस्य वा समुत्पद्यते |
तमभिनयेच्छिर :कम्पनप्रस्वेदनाधोमुखचिन्तनध्यानाध्यवसायोपायसहायान्वेषणादिभिरनुभावै :|

पदच्छेद :- अमर्ष : नाम विद्या-ऐश्वर्य-शौर्य-बलाधिकै : अधिक्षिप्तस्य-अवमानितस्य वा समुत्पद्यते |
तम् अभिनयेत् शिर :कम्पन-प्रस्वेदन-अधोमुख-चिन्तनध्यान-अध्यवसाय-उपायसहाय-अन्वेषण-आदिभि : अनुभावै : |

अर्थ - विद्या, ऐश्वर्य, शौर्य आणि बल अधिक असल्यामुळे तिरस्कृत व अपमानित व्यक्तींमध्ये इत्यादी विभावांनी अमर्ष हा व्यभिचारी भाव उत्पन्न होतो . याचा अभिनय डोके हलवणे, घाम येणे, अधोमुख होऊन विचार करणे, ध्यान, नैराश्य, दृढतापूर्वक उपाय शोधणे इत्यादी अनुभावांनी करावा .

अत्र श्लोकौ -
आक्षिप्तानां सभामध्ये विद्याशौर्यबलाधिकैः |
नृणामुत्साहसंयोगादमर्षो नाम जायते || ७८ ||

पदच्छेदः - अत्र श्लोकौ -
आक्षिप्तानां सभामध्ये विद्याशौर्यबलाधिकैः |
नृणाम् उत्साहसंयोगात् अमर्षः नाम जायते || ७८ ||

अन्वयः - अत्र श्लोकौ -
सभामध्ये विद्याशौर्यबलाधिकैः आक्षिप्तानां नृणाम् उत्साहसंयोगात् अमर्षः नाम जायते |

अर्थ - यासंबंधित दोन श्लोक पुढीलप्रमाणे -
सभेमध्ये विद्या, शौर्य आणि बल अधिक असणाऱ्या व्यक्तींद्वारे अपमानित केलेल्या पुरुषांमध्ये उत्साहाच्या योगाने अमर्ष उत्पन्न होतो .

उत्साहाध्यवसायाभ्यामधोमुखविचिन्तनैः |
शिरःप्रकम्पस्वेदाद्यैस्तं प्रयुञ्जीत पण्डितः || ७९ ||

पदच्छेदः - उत्साह-अध्यवसायाभ्याम् अधोमुख-विचिन्तनैः |
शिरःप्रकम्प-स्वेदाद्यैः तं प्रयुञ्जीत पण्डितः || ७९ ||

अन्वयः - उत्साह-अध्यवसायाभ्याम् अधोमुख-विचिन्तनैः शिरःप्रकम्प-स्वेदाद्यैः पण्डितः तं प्रयुञ्जीत |

अर्थ - उत्साह, दृढता, अधोमुख, चिंतन करणे, डोके हलविणे, घाम येणे इत्यादी अनुभाव अमर्ष व्यक्त करताना विद्वानांनी वापरावेत .

## ❖ अवहित्थ ❖

अवहित्थं नाम आकारप्रच्छादनात्मकम् | तच्च लज्जाभयापजयगौरवजैह्म्यादिभिर्विभावै: समुत्पद्यते| तस्यान्यथाकथनावलोकितकथाभङ्गकृतकधैर्यादिभिरनुभावैरभिनय:प्रयोक्तव्य:|

पदच्छेद: - अवहित्थं नाम आकारप्रच्छादनात्मकम् | तत् च लज्जा-भय-अपजय-गौरव-जैह्म्य-आदिभि: विभावै: समुत्पद्यते | तस्य अन्यथाकथन-अवलोकित-कथाभङ्ग-कृतकधैर्य-आदिभि: अनुभावै: अभिनय:प्रयोक्तव्य:|

अर्थ - अवहित्थ या व्यभिचारी भावात मनातला भाव लपवला जातो . लज्जा, भय, पराजय, गौरव, फसवणूक, इत्यादी विभावांनी 'अवहित्थ' हा भाव उत्पन्न होतो . प्रसंगाच्या विपरीत चर्चा करणे किंवा दुसऱ्या व्यक्तीसारखे बोलणे, निरीक्षण करणे, दुसऱ्याचे बोलणे मधूनच कापणे, कृत्रिम धैर्य दाखविणे इ . अनुभावांनी त्याचा अभिनय करावा .

अत्र श्लोको भवति -
धाष्ट्र्यजैह्म्यादिसम्भूतमवहित्थं भयात्मकम्|
तच्चागणनया कार्यं नातीवोत्तरभाषणात् || ८० ||

पदच्छेद: - अत्र श्लोक: भवति -
धाष्ट्र्यजैह्म्यादिसम्भूतम् अवहित्थं भयात्मकम्|
तत्च अगणनया कार्यं न अतीव उत्तरभाषणात् || ८० ||

अन्वय: - अत्र श्लोक: भवति -
धाष्ट्र्य-जैह्म्यादि-सम्भूतम् अवहित्थं भयात्मकम् (अस्ति) | कार्यम् अगणनया न अतीव उत्तरभाषणात् तत् (कर्तव्यम्) |

अर्थ - यासंबंधित श्लोक पुढीलप्रमाणे -
धृष्टता, लबाडी इत्यादींनी उत्पन्न होणाऱ्या अवहित्थाच्या मुळाशी भय असतो . कार्याविषयी निष्काळजी असणे किंवा प्रत्युत्तरात्मक काही न बोलणे इत्यादी अनुभावांनी याचा अभिनय करावा .

### ❖ उग्रता ❖

उग्रता नाम चौर्याभिग्रहणनृपापराधासत्प्रलापादिभिर्विभावैः समुत्पद्यते। तां च वधबन्धनताडननिर्भर्त्सनादिभिरनुभावैरभिनयेत्।

पदच्छेदः - उग्रता नाम चौर्य अभिग्रहण - नृप अपराध-असत्प्रलाप-आदिभिः विभावैः समुत्पद्यते।
तां च वध-बन्धन-ताडन-निर्भर्त्सन-आदिभिः अनुभावैः अभिनयेत्।

अर्थ - चोरी करताना पकडले जाणे, राजद्रोह करणे, खोटे बोलणे इत्यादी विभावांनी उग्रता हा भाव उत्पन्न होतो. ठार मारणे, बंदिस्त करणे, मारणे, निर्भत्सना करणे इत्यादी अनुभावांनी त्याचा अभिनय करावा.

अत्रार्या भवति -
चौर्याभिग्रहणवशान्नृपापराधादथोग्रता भवति।
वधबन्धताडनादिभिरनुभावैरभिनयस्तस्याः ॥ ८१ ॥

पदच्छेदः - अत्र आर्या भवति -
चौर्य अभिग्रहणवशात् नृप अपराधात् अथ उग्रता भवति।
वध-बन्ध-ताडन-आदिभिः अनुभावैः अभिनयः तस्याः ॥ ८१ ॥

अन्वयः - अत्र आर्या भवति -
चौर्याभिग्रहणवशात् नृपापराधात् उग्रता भवति। वध-बन्ध-ताडन-आदिभिः अनुभावैः तस्याः अभिनयः (कर्तव्यः)।

अर्थ - यासंबंधित आर्या पुढीलप्रमाणे -
चोरी करताना पकडले जाणे, राजद्रोह करणे इत्यादींपासून उग्रता निर्माण होते. ठार मारणे, बंदिस्त करणे, मारणे इत्यादी अनुभावांनी त्याचा अभिनय करावा.

### ❖ मती ❖

मतिर्नाम नानाशास्त्रविचिन्तनोहापोहादिभिर्विभावैः समुत्पद्यते। तामभिनयेच्छिष्योपदेशार्थ विकल्पनसंशयच्छेदादिभिरनुभावैः।

पदच्छेद :- मति: नाम नानाशास्त्र-विचिन्तन-ऊहापोह-आदिभि: विभावै: समुत्पद्यते | ताम् अभिनयेत् शिष्य-उपदेश-अर्थविकल्पन-संशयच्छेद-आदिभि: अनुभावै:|

अर्थ - वेगवेगळया शास्त्रांचा विचार करणे, तर्कवितर्क करणे इत्यादी विभावांनी 'मती' हा व्यभिचारी भाव उत्पन्न होतो . शिष्याला उपदेश करणे, अर्थ निश्चित करणे, संशय दूर करणे इत्यादी अनुभावांनी त्याचा अभिनय करावा .

भवति चात्र श्लोक: -

नानाशास्त्रार्थबोधेन मति: संजायते नृणाम् |
शिष्योपदेशार्थकृतस्तस्यास्त्वभिनयो भवेत् || ८२ ||

पदच्छेद :- भवति च अत्र श्लोक: -
नाना-शास्त्रार्थ-बोधेन मति: संजायते नृणाम् |
शिष्य-उपदेशार्थ-कृत: तस्या: तु अभिनय: भवेत् || ८२ ||

अन्वय: - भवति च अत्र श्लोक: -
नानाशास्त्रार्थबोधेन नृणां मति: संजायते | शिष्योपदेशार्थकृत: तस्या: अभिनय: भवेत् |

अर्थ - यासंबंधित श्लोक पुढीलप्रमाणे -
निरनिराळ्या शास्त्रांत (पारंगत) झाल्यामुळे माणसांमध्ये मती उत्पन्न होते . शिष्यांना उपदेश करणे व अर्थ विशद करून सांगणे इत्यादींच्या योगाने तिचा अभिनय करावा .

## ❖ व्याधी ❖

व्याधिर्नाम वातपित्तकफसन्निपातप्रभव: | तस्या: ज्वरादयो विशेषा: | ज्वरस्तु (खलु)द्विविध: सशीत: सदाहश्च | तत्र सशीतो नाम प्रवेपितसर्वाङ्गोत्कम्पननिकुञ्चनाग्न्यभिलाषरोमाञ्चहनुवलन नासाविकूणनमुखशोषणपरिदेवितादिभिरनुभावैरभिनेय:|
सदाहो नाम विक्षिप्ताङ्गकरचरणभूम्यभिलाषानुलेपनशीताभिलाषपरिदेवनमुखशोषोत्क्रुष्टादिभि -रनुभावै: | ये चान्ये व्याधयस्तेऽपि खलु मुखविकूणनगात्रस्तम्भस्रस्ताक्षिनि:श्वसनस्तनितोत्क्रुष्ट -वेपनादिभिरनुभावैरभिनेया:|

पदच्छेद :- व्याधि : नाम वात-पित्त-कफ-सन्निपात-प्रभव : | तस्या : ज्वरादय : विशेषा : | ज्वर : तु (खलु) द्विविध : सशीत : सदाह : च |

तत्र सशीत: नाम प्रवेपित-सर्वाङ्ग-उत्कम्पन-निकुञ्चन-अग्न्यभिलाष-रोमाञ्च-हनुवलन- नासाविकूणन-मुखशोषण- परिदेवित-आदिभि : अनुभावै : अभिनेय : |

सदाह : नाम विक्षिप्ताङ्ग-करचरण-भूमि-अभिलाषा-अनुलेपन-शीताभिलाष-परिदेवन -मुखशोषोत्क्रुष्ट-आदिभि : अनुभावै : |

ये च अन्ये व्याधय: ते अपि खलु मुखविकूणन-गात्रस्तम्भ-स्रस्ताक्षि-नि:श्वसन-स्तनितोत्क्रुष्ट-वेपन-आदिभि : अनुभावै : अभिनेया : |

अर्थ - वात, पित्त, कफ यांच्यातील तोल बिघडल्याने व्याधी हा भाव उत्पन्न होतो .

ताप येणे (ज्वर)इत्यादी त्याचे विशेष आहेत . ज्वराचे दोन प्रकार आहेत . शीत ज्वर आणि दाह ज्वर .

शीतलता असणाऱ्या ज्वराचा अभिनय थरथरणे, सर्वांग कापणे आणि आकसून घेणे, शेकोटीची इच्छा करणे, रोमांच, हनुवटी हलवणे, नाक फुरफुरणे, तोंड कोरडे पडणे, विलाप इत्यादी अनुभावांनी करावा .

दाहकता असणाऱ्या ज्वराचा अभिनय अंग हात-पाय झटकणे, जमिनीवर झोपण्याची इच्छा करणे, (थंडावा देणारा) लेप लावणे, थंड पदार्थाची इच्छा होणे, विलाप करणे, तोंड कोरडे पडणे, आक्रोश करणे इत्यादी अनुभावांनी करावा .

याशिवाय अन्य जे व्याधी आहेत त्यांचा अभिनय सुद्धा तोंड आकसणे, अंग स्तंभित होणे, डोळे शिथिल होणे, नि:श्वास टाकणे, ओरडणे, थरथरणे इत्यादी अनुभावांनी करावा .

अत्र श्लोको भवति -

समासतस्तु व्याधीनां कर्तव्योऽभिनयो बुधै :|
स्रस्ताङ्गगात्रविक्षेपैस्तथा मुखविकूणनै : ॥ ८३ ॥

पदच्छेद :- अत्र श्लोक : भवति -

समासत : तु व्याधीनां कर्तव्य : अभिनय : बुधै : |
स्रस्ताङ्गगात्रविक्षेपै : तथा मुखविकूणनै : ॥ ८३ ॥

अन्वय : - अत्र श्लोक : भवति -
समासत :, बुधै : स्रस्ताङ्गगात्रविक्षेपै : तथा मुखविकूणनै : व्याधीनाम् अभिनय : कर्तव्य : |

अर्थ - थोडक्यात, सर्वसामान्यपणे शिथिल अंग, अवयव गळून पडणे, तोंड आकसणे इत्यादींनी व्याधी या भावाचा अभिनय करावा.

❖ उन्माद ❖

उन्मादो नाम इष्टजनवियोगविभवनाशाभिघातवातपित्तश्लेष्म प्रकोपादिभिर्विभावैरुत्पद्यते | तमनिमित्तहसितरुदितोत्क्रुष्टासम्बद्धप्रलापशयितोपविष्टोत्थितप्रधावितनृत्तगीतपठितभस्मपांस्ववधूल नतृणनिर्माल्यकुचेलचीरघटकपालशरावाभरणधारणोपभोगैरनेकैश्चानवस्थितैश्चेष्टानुकरणादिभिर नुभावैरभिनयेत् |

पदच्छेद : - उन्माद : नाम इष्ट जन वियोग-विभवनाश-अभिघात-वात पित्त श्लेष्म प्रकोप-आदिभि : विभावै : उत्पद्यते | तम् अनिमित्त-हसित-रुदित-उत्क्रुष्ट-असम्बद्ध-प्रलाप-शयित-उपविष्ट-उत्थित-प्रधावित-नृत्तगीतपठित-भस्मपांसु-अवधूलन-तृणनिर्माल्य-कुचेल-चीरघट-कपाल-शरावाभरण-धारणोपभोगै : अनेकै : च अनवस्थितै : चेष्टानुकरण- आदिभि : अनुभावै : अभिनयेत् |

अर्थ - प्रिय व्यक्तींचा वियोग होणे, ऐश्वर्य नष्ट होणे, संकटांचा आघात होणे, वात-पित्त कफ यांचा प्रकोप होणे इत्यादी विभावांनी उन्माद हा व्यभिचारी भाव उत्पन्न होतो. त्याचा अभिनय अकारण हसणे, रडणे, ओरडणे, असंबद्ध बोलणे, झोपणे, बसणे, उठणे, धावणे, नाचणे, गाणे, पाठ करणे, भस्म आणि धूळ उडवणे, गवत आणि निर्माल्य काढणे, मळलेले कपडे घालणे, कवटी किंवा तुटलेली भांडी अलंकार म्हणून धारण करणे आणि त्याचा उपभोग घेणे आणि अनेक प्रकारच्या अस्थिर क्रियांचे अनुकरण करणे इ. अनुभावांनी याचा अभिनय करावा.

अत्रार्ये भवत :

इष्टजनविभवनाशादभिघाताद्वातपित्तकफकोपात् |
विविधाच्चित्तविकारादुन्मादो नाम सम्भवति || ८४ ||

पदच्छेद : - अत्र आर्ये भवत :
इष्त-जन-विभव-नाशात् अभिघातात् वात-पित्त-कफ-कोपात् |
विविधात् चित्तविकारात् उन्माद : नाम सम्भवति ॥ ८४ ॥

अन्वय : - अत्र आर्ये भवत :
इष्टजनविभवनाशात् अभिघातात् वातपित्तकफकोपात् विविधात् चित्तविकारात् उन्माद : नाम सम्भवति |

अर्थ - यासंबधित दोन आर्या पुढीलप्रमाणे -
प्रिय व्यक्ती, वैभवाचा नाश होणे, अचानक वार होणे, वात-पित्त-कफ यांचा प्रकोप होणे इ . चित्ताच्या विकारांमुळे उन्माद उत्पन्न होतो .

अनिमित्तरुदितहसितोपविष्टगीतप्रधावितोत्क्रुष्टै : |
अन्यैश्च विकारकृतैरुन्मादं सम्प्रयुञ्जीत ॥ ८५ ॥

पदच्छेद : - अनिमित्तरुदित-हसित-उपविष्ट-गीत-प्रधावित-उत्क्रुष्टै : |
अन्यै : च विकारक्रुतै : उन्मादं सम्प्रयुञ्जीत ॥ ८५ ॥

अन्वय : - अनिमित्तरुदित-हसित-उपविष्ट-गीत-प्रधावित-उत्क्रुष्टै : अन्यै : च विकारक्रुतै : उन्मादं सम्प्रयुञ्जीत |

अर्थ - अकारण हसणे, रडणे, बसणे, गाणे, धावणे, ओरडणे अन्य विकारांनी उन्मादाचा अभिनय करावा .

### ❖ मरण ❖

मरणं नाम व्याधिजमभिघातजञ्च | तत्र यदान्त्रयकृच्छूलदोषवैषम्यगण्डपिटकज्वरविषूचिकादिभि-रुत्पद्यते तद्व्याधिप्रभवम् | अभिघातजन्तु शस्त्राहिदंशविषपानश्वापदगजतुरगरथपशुयानपात-विनाशप्रभवम् | एतेष्विदानीमभिनयविशेषान्वक्ष्याम: - तत्र व्याधिजंविषण्णगात्राव्यायताङ्ग-विचेष्टितनिमीलितनयनहिक्काश्वासोपेतानवेक्षितपरिजनाव्यक्ताक्षरकथनादिभिरनुभावैरभिनयेत् |

पदच्छेद : - मरणं नाम व्याधिजम् अभिघातजं च | तत्र यत् आन्त्रयकृत् शूलदोष वैषम्य गण्डपिटक-ज्वर विषूचिक आदिभि : उत्पद्यते तत् व्याधिप्रभवम् | अभिघातजं तु शस्त्र-अहिदंश-

विषपान-श्वापद-गज-तुरग-रथ-पशुयान-पातविनाश-प्रभवम् । एतेषु इदानीम् अभिनयविशेषान् वक्ष्यामः। तत्र व्याधिजं विषण्ण-गात्र-अव्यायत-अङ्ग-विचेष्टित निमीलितनयन-हिक्का-श्वास-उपेत-अनवेक्षितपरिजन-अव्यक्त-अक्षर-कथन-आदिभिः अनुभावैः अभिनयेत्।

अर्थ - मरण हे दोन प्रकारचे असते. १. व्याधिज आणि २. अभिघातज

आतडी, यकृत आणि शूल दोष, वात-पित्त-कफ यांच्यातील प्रमाण किंवा तोल बिघडणे गळ्यात गाठी होणे, ताप येणे, अतिसार इ. नी उत्पन्न होणारे मरण हे व्याधिज होय. (व्याधीने उत्पन्न झालेले असतात.)

शस्त्रांचा आघात, साप चावणे, विष पिणे, रानटी पशुंचा हल्ला, हत्ती-घोडे आणि रथ आणि इतर वाहनामधून पडून झालेला अपघात इत्यादींमुळे येणारे मरण हे अभिघातज होय. (अचानक आघात झाल्याने उत्पन्न झालेले असते.)

आता या दोन्ही प्रकारांचे अभिनय विशेष मी पुढे स्पष्ट करतो.

व्याधीपासून उत्पन्न होणाऱ्या मरणाचा अभिनय अंग विषण्ण होणे, शरीर संकुचित होणे, अंग निश्चेष्ट होणे, डोळे मिटणे, उचकी येणे, खोल श्वास घेणे, नातेवाईकांना न ओळखणे, अस्पष्ट शब्दात बोलणे इत्यादी अनुभावांनी करावा.

अत्र श्लोको भवति -

व्याधीनामेकभावो हि मरणाभिनयः स्मृतः।
विषण्णगात्रैर्निश्चेष्टैरिन्द्रियैश्च विवर्जितः॥ ८६॥

पदच्छेदः - अत्र श्लोकः भवति -
व्याधीनाम् एकभावः हि मरण-अभिनयः स्मृतः।
विषण्ण-गात्रैः निश्चेष्टैः इन्द्रियैः च विवर्जितः॥ ८६॥

अन्वयः - अत्र श्लोकः भवति -
व्याधीनाम् मरणाभिनयः एकभावः विषण्णगात्रैः निश्चेष्टैः इन्द्रियैः च विवर्जितः (इति) एकभावः स्मृतः।

अर्थ - यासंबंधित श्लोक पुढीलप्रमाणे -

पहिल्या प्रकारच्या (म्हणजे) व्याधीपासून निर्माण होणाऱ्या मरणाचा अभिनय अंग शिथिल होणे आणि सर्व इंद्रियांनी आपापली कामे टाकून निश्चेष्ट रहाणे या अनुभावांनी करावा .

अभिघातजे तु नानाप्रकारा अभिनयविशेषा: शस्त्रक्षताहिदष्टविषपीतगजादिपतितश्वापदहता: | यथा तत्र शस्त्रक्षते तावत्सहसा भूमिपतनवेपनस्फुरणादिभिरभिनय: प्रयोक्तव्य: | अहिदष्टे विषपीते वा नानाविषवेगा: | यथा- कार्श्यवेपथुविदाहहिक्काफेनस्कन्धभङ्गजडतामरणानीत्यष्टौ विषवेगा:|

पदच्छेद:- अभिघातजे तु नानाप्रकारा: अभिनयविशेषा: शस्त्रक्षत-अहिदष्ट-विषपीत-गजादि पतित-श्वापदहता: | यथा तत्र शस्त्रक्षते तावत् सहसा भूमिपतन-वेपन-स्फुरण-आदिभि: अभिनय: प्रयोक्तव्य: | अहिदष्टे विषपीते वा नाना-विषवेगा:|

यथा - कार्श्य-वेपथु-विदाह-हिक्का-फेन-स्कन्ध-भङ्ग-जडता-मरणानि इति अष्टौ विषवेगा:|

अर्थ - अचानक हल्ला होऊन आलेल्या मरणाचा अभिनय वेगवेगळया प्रकारे केला जातो . जसे - शस्त्राचा प्रहार, सर्पदंश आणि विषपान, हत्ती इ . वरून पडणे, हिंसक पशूंद्वारे मारले जाणे इ .

शस्त्राघाताने होणाऱ्या मरणाचा अभिनय अचानक जमिनीवर पडणे, थरथरणे, स्फुरण इ . द्वारे करावा .

सर्पदंश आणि विषपानाने होणाऱ्या मरणामध्ये विषाचे आठ परिणाम दिसून येतात . शरीर कृश होणे, कंपन, जळणे किंवा दाह होणे, उचकी, फेस येणे, खांदे निखळणे, जडता आणि मरण ही विषाच्या आवेगाची आठ स्थित्यंतरे आहेत .

अत्र श्लोकौ भवत: -

कार्श्यं तु प्रथमे वेगे द्वितीये वेपथुर्भवेत् |
दाहं तृतीये हिक्कां च चतुर्थे सम्प्रयोजयेत् || ८७ ||
फेनञ्च पञ्चमे कुर्यात्षष्ठे स्कन्धस्य भञ्जनम् |
जडतां सप्तमे कुर्यादष्टमे मरणं भवेत् || ८८ ||

पदच्छेद : - अत्र श्लोकौ भवत : -
काश्र्यं तु प्रथमे वेगे द्वितीये वेपथु : भवेत् |
दाहं तृतीये हिक्कां च चतुर्थे सम्प्रयोजयेत् || ८७ ||
फेनं च पञ्चमे कुर्यात् षष्ठे स्कन्धस्य भञ्जनम् |
जडतां सप्तमे कुर्यात् अष्टमे मरणं भवेत् || ८८ ||

अन्वय : - अत्र श्लोकौ भवत : -
प्रथमे वेगे काश्र्यं द्वितीये वेपथु : भवेत् | तृतीये दाहं चतुर्थे हिक्कां च सम्प्रयोजयेत् | पञ्चमे फेनं च षष्ठे स्कन्धस्य भञ्जनं कुर्यात् | सप्तमे जडतां कुर्यात्अष्टमे मरणं भवेत् |

अर्थ - यासंबंधित दोन श्लोक पुढीलप्रमाणे -
विषाच्या पहिल्या आवेगात कृशता, दुसऱ्यामध्ये थरथरणे, तिसऱ्यामध्ये दाह होणे, चौथ्यामध्ये उचकी येणे, पाचव्यात तोंडातून फेस येणे, सहाव्यामध्ये खांदे निखळणे, सातव्यामध्ये जडता आणि आठव्यामध्ये आवेगाने मरण येते .

अत्रार्या भवति -
श्वापदगजतुरगरथोद्भवं तु पशुयानपतनजं वाऽपि |
शस्त्रक्षतवत्कुर्यादनवेक्षितगात्रसञ्चारम् || ८९ ||

पदच्छेद : - अत्र आर्या भवति -
श्वापद-गज-तुरग-रथ-उद्भवं तु पशुयान-पतनजं वा अपि |
शस्त्रक्षतवत् कुर्यात् अनवेक्षित-गात्र-सञ्चारम् || ८९ ||

अन्वय : - अत्र आर्या भवति -
श्वापद-गज-तुरग-रथ-उद्भवं तु पशुयान-पतनजं वा अपि | शस्त्रक्षतवत् कुर्यात् अनवेक्षित-गात्रसञ्चारम् |

अर्थ - यासंबंधित आर्या पुढीलप्रमाणे -
हिंस्त्र पशू, हत्ती, घोडे, रथ यांमुळे आलेल्या तसेच पशुवाहनांतून पडणे इत्यादींमुळे

येणाऱ्या मरणाचा अभिनय शस्त्राघातामुळे येणाऱ्या मरणासारखाच कोणत्याही हालचालींच्या अभावाने करावा.

इत्येवं मरणं ज्ञेयं नानावस्थान्तरात्मकम् ।
प्रयोक्तव्यं बुधैः सम्यग्यथा भावाङ्गचेष्टितैः ॥ ९० ॥

पदच्छेदः - इति एवं मरणं ज्ञेयं नाना-अवस्थान्तरात्मकम् ।
प्रयोक्तव्यं बुधैः सम्यक् यथा भाव-अङ्ग-चेष्टितैः ॥ ९० ॥

अन्वयः - इति एवं नानावस्थान्तरात्मकं मरणं ज्ञेयम् । यथा भावाङ्गचेष्टितैः बुधैः सम्यक् प्रयोक्तव्यम् ।

अर्थ - अशाप्रकारे मरणाच्या निरनिराळ्या अवस्था आहेत हे जाणून घेऊन विद्वानांनी त्याचा अनुरूप भाव आणि अंगांनी अभिनय करावा.

## ❖ त्रास ❖

त्रासो नाम विद्युदुल्काशनिपातनिर्घाताम्बुधरमहासत्त्वपशुरवादिभिर्विभावैरुत्पद्यते ।
तमभिनयेत्संक्षिप्ताङ्गोत्कम्पनवेपथुस्तम्भरोमाञ्चगद्गदप्रलापादिभिरनुभावैः ।

पदच्छेदः - त्रासः नाम विद्युत् उल्का-अशनिपात-निर्घात-अम्बुधर-महासत्त्व-पशुरव-आदिभिः विभावैः उत्पद्यते । तम् अभिनयेत् संक्षिप्त-अङ्ग-उत्कम्पन-वेपथु-स्तम्भ-रोमाञ्च-गद्गद-प्रलाप-आदिभिः अनुभावैः ।

अर्थ - वीज पडणे, उल्कापात होणे, तारा तुटणे, ढगांचा गडगडाट, वादळ येणे, पशुंचा आवाज इ. विभावांमुळे त्रास नावाचा व्यभिचारी भाव उत्पन्न होतो. अंग संकुचित होणे, थरथरणे, स्तंभित होणे, रोमांचित होणे, कंठ दाटून येणे, असंबद्ध बडबड करणे इ. अनुभावांनी त्याचा अभिनय करावा.

अत्र श्लोको भवति -
महाभैरवनादाद्यैस्त्रासः समुपजायते ।
स्रस्ताङ्गाक्षिनिमेषैश्च तस्य त्वभिनयो भवेत् ॥ ९१ ॥

पदच्छेद :- अत्र श्लोक : भवति -
महाभैरव-नादाद्यै : त्रास : समुपजायते |
स्रस्त-अङ्ग-अक्षि-निमेषै : च तस्य तु अभिनय : भवेत् || ९१ ||

अन्वय : - अत्र श्लोक : भवति -
महाभैरव-नादाद्यै : त्रास : समुपजायते | स्रस्त-अङ्ग-अक्षि-निमेषै : च तस्य अभिनय : भवेत् |

अर्थ - यासंबंधित श्लोक पुढीलप्रमाणे -
अत्यंत भीषण भयानक आवाजापासून त्रास उत्पन्न होतो. शिथिल अंग, अर्धवट मिटलेले डोळे इ. अनुभावांनी त्याचा अभिनय करावा.

## ❖ वितर्क ❖

वितर्को नाम सन्देहविमर्शविप्रतिपत्त्यादिभिर्विभावैरुत्पद्यते | तमभिनये द्विविधविचारित प्रश्नसम्प्रधारणमन्त्रसंगूहनादिभिरनुभावै : |

पदच्छेद :- वितर्क : नाम सन्देह-विमर्श-विप्रतिपत्ति-आदिभि : विभावै : उत्पद्यते | तम् अभिनयेत् विविध-विचारित-प्रश्न-सम्प्रधारण-मन्त्रसंगूहन-आदिभि : अनुभावै : |

अर्थ - शंका घेणे, विचार करणे, तर्कवितर्क इ. विभावांनी वितर्क हा व्यभिचारी भाव उत्पन्न होतो. त्याचा अभिनय वेगवेगळे विचारविनिमय करणे, प्रश्नांद्वारे व्याख्या निश्चित करणे, गोपनीय मंत्रणा करणे इ. अनुभावांनी करावा.

अत्र श्लोको भवति -
विचारणादिसम्भूत : सन्देहातिशयात्मक : |
वितर्क : सोऽभिनेयस्तु शिरोभ्रूक्षेपकम्पनै : || ९२ ||

पदच्छेद :- अत्र श्लोक : भवति -
विचारणा-आदिसम्भूत : सन्देह-अतिशयात्मक : |
वितर्क : स : अभिनेय : शिरो-भ्रूक्षेप-कम्पनै : || ९२ ||

अन्वय: - अत्र श्लोक: भवति -
विचारणादि-सम्भूत: सन्देहातिशयात्मक: स: वितर्क: शिरोभ्रूक्षेप-कम्पनै: अभिनेय:|

अर्थ - यासंबंधित श्लोक पुढीलप्रमाणे -
विचारविमर्श यामधून निर्माण होणाऱ्या व शंका मुळाशी असलेल्या वितर्काचा अभिनय मान हलविणे, भुवया विक्षेप करणे इ. नी करावा.

एवमेते त्रयस्त्रिंशद्व्यभिचारिणो भावा देशकालावस्थानुरूप्येणात्मगतपरगतमध्यस्था उत्तममध्यमाधमै: स्त्रीपुंसै: स्वप्रयोगवशादुपपाद्या इति|

पदच्छेद: - एवम् एते त्रयस्त्रिंशत् व्यभिचारिण: भावा: देश-काल-अवस्था-अनुरूप्येण आत्मगत-परगत-मध्यस्था: उत्तम-मध्यम-अधमै: स्त्रीपुंसै: स्वप्रयोगवशात् उपपाद्या: इति|

अर्थ - अशाप्रकारे देश, काळ आणि अवस्थेप्रमाणे आत्मगत, परस्थ आणि मध्यस्थ रूपामध्ये उत्तम, मध्यम आणि अधम स्त्री-पुरुषांनी ह्या तेहतीस व्यभिचारी भावांचा प्रयोग करावा.

## ❖ सात्त्विक भाव ❖

त्रयस्त्रिंशदिमे भावा विज्ञेया व्यभिचारिण:|
स्वात्त्विकांस्तु पुनर्भावान्प्रवक्ष्याम्यनुपूर्वश: || ९३ ||

पदच्छेद: - त्रयस्त्रिंशत् इमे भावा: विज्ञेया: व्यभिचारिण:|
स्वात्त्विकान् तु पुन: भावान् प्रवक्ष्यामि अनुपूर्वश: || ९३ ||

अन्वय: - त्रयस्त्रिंशत् इमे व्यभिचारिण: भावा: विज्ञेया: | पुन: स्वात्त्विकान् भावान् अनुपूर्वश: प्रवक्ष्यामि|

अर्थ - तेहतीस भावांना व्यभिचारी भाव म्हटले आहे. आता मी सात्त्विक भावांचे विवेचन करतो.

अत्राह - किमन्ये भावा: सत्त्वेन विनाऽभिनीयन्ते यस्मादुच्यन्ते एते सात्त्विका इति|

पदच्छेद: - अत्र आह - किम् अन्ये भावा: सत्त्वेन विना अभिनीयन्ते यस्मात् उच्यन्ते एते सात्त्विका: इति|

अर्थ - प्रश्न - हे भाव जर सात्त्विक आहेत तर दुसऱ्या भावांचा अभिनय सत्त्वाशिवाय केला जातो का?

अत्रोच्यते -

इह हि सत्त्वं नाम मन:प्रभवम्। तच्च समाहितमनस्त्वादुच्यते। मनस: समाधौ सत्त्वनिष्पत्तिर्भवति। तस्य च योऽसौ स्वभावो रोमाञ्चाश्रुवैवर्ण्यादिलक्षणो यथाभावोपगत: स न शक्योऽन्यमनसा कर्तुमिति। लोकस्वभावानुकरणत्वाच्च नाट्यस्य सत्त्वमीप्सितम्। को दृष्टान्त: - इह हि नाट्यधर्मिप्रवृत्ता: सुखदु:खकृता भावास्तथा सत्त्वविशुद्धा: कार्या: यथा सरूपा भवन्ति। तत्र दु:खं नाम रोदनात्मकं तत्कथमदु:खितेन सुखं च प्रहर्षात्मकमसुखितेन वाभिनेयम्। एतदेवास्य सत्त्वं यत् दु:खितेन सुखितेन वाऽश्रुरोमाञ्चौ दर्शयितव्यौ इति कृत्वा [सत्त्वमीप्सितमिति]सात्त्विका भावा इत्यभिव्याख्याता:।

पदच्छेद: - अत्र उच्यते -

इह हि सत्त्वं नाम मन:प्रभवम्। तत् च समाहितमनस्त्वात् उच्यते। मनस: समाधौ सत्त्वनिष्पत्ति: भवति। तस्य च य: असौ स्वभाव: रोमाञ्च-अश्रु-वैवर्ण्य-आदिलक्षण: यथाभावोपगत: स: न शक्य: अन्यमनसा कर्तुम् इति। लोकस्वभाव-अनुकरणत्वात् च नाट्यस्य सत्त्वम् ईप्सितम्।

क: दृष्टान्त: - इह हि नाट्यधर्मिप्रवृत्ता: सुखदु:खकृता: भावा: तथा सत्त्वविशुद्धा: कार्या: यथा सरूपा: भवन्ति। तत्र दु:खं नाम रोदनात्मकं तत् कथम् अदु:खितेन सुखं च प्रहर्षात्मकम् असुखितेन वा अभिनेयम्। एतत् एव अस्य सत्त्वं यत् दु:खितेन सुखितेन वा अश्रुरोमाञ्चौ दर्शयितव्यौ इति कृत्वा सात्त्विका: भावा: इति अभिव्याख्याता:।

अर्थ - याविषयीचे उत्तर - सत्त्व हा मनात उत्पन्न होतो. एकाग्र मनात सत्त्वाची उत्पत्ती सांगितलेली आहे. एकाग्र मन जेव्हा समाधी अवस्थेपर्यंत पोहोचते तेव्हा सत्त्वाची निर्मिती होते. सत्त्वाचा हा जो स्वभाव आहे तो रोमांच, अश्रू आणि वैवर्ण्य वगैरे लक्षणांनी युक्त आहे, तसेच भावानुसार जाणारा आहे. त्याचा अभिनय चंचल मनाने करणे शक्य नाही. लोकस्वभावाच्या अनुकरणाच्या प्रवृत्तीमुळे नाट्यप्रयोगामध्ये सत्त्व अपेक्षित आहे.

प्रश्न - ह्या संबंधी कुठलं उदाहरण आहे?

उत्तर - या इहलोकामध्ये नाट्यधर्मीद्वारे प्रवृत्त झालेले सुखदु:खादी भावांचा अशा प्रकारे सत्त्वाने शुद्ध अभिनय केला पाहिजे जेणेकरून त्याचा यथार्थरूपाने अनुभव येईल.

प्रश्न - यात दु:खाचा अभिनय अश्रूपूर्ण आहे, परंतु जो व्यक्ती कधीच दु:खी नाही, तो त्याचा अभिनय कसा करणार? आणि याउलट जो कधीच सुखी नाही तो आनंदपूर्ण सुखाचा अभिनय कसा करणार?

उत्तर- नाट्यप्रसंगामध्ये हेच खरे 'सत्त्व' आहे की नट हा दु:खी किंवा सुखी काहीही असो परंतु त्याला अश्रू आणि रोमांचाचा अभिनय प्रसंगानुसार करावाच लागतो. याप्रमाणे सात्त्विक भावांची व्याख्या केली आहे.

## ❖ सात्त्विक भावांचे प्रकार ❖

त इमे -

स्तम्भ: स्वेदोऽथ रोमाञ्च: स्वरभेदोऽथ वेपथु: |
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मता: || ९४ ||

पदच्छेद: - ते इमे -
स्तम्भ: स्वेद: अथ रोमाञ्च: स्वरभेद: अथ वेपथु: |
वैवर्ण्यम् अश्रु प्रलय: इति अष्टौ सात्त्विका: मता: || ९४ ||

अन्वय: - ते इमे - स्तम्भ: स्वेद: रोमाञ्च: स्वरभेद: वेपथु: वैवर्ण्यम् अश्रु प्रलय: इति अष्टौ सात्त्विका: (भावा:) मता: |

अर्थ - ते पुढीलप्रमाणे - स्तंभ (जडता), स्वेद (घाम येणे), रोमांच(अंगावर काटा येणे), स्वरभंग (कंठ दाटून येणे), वेपथू(थरथर कापणे),वैवर्ण्य (रंग बदलणे),अश्रू (रडणे), प्रलय (मूर्च्छित होणे)असे आठ प्रकारचे सात्त्विकभाव सांगितले गेले आहेत.

## ❖ स्वेद ❖

अत्रार्या: | तत्र-

क्रोधभयहर्षलज्जादु:खश्रमरोगतापघातेभ्य: |
व्यायामक्लमघर्मै: स्वेद: सम्पीडनाच्चैव || ९५ ||

पदच्छेद : - अत्र आर्या : | तत्र-
क्रोध-भय-हर्ष-लज्जा-दु:ख-श्रम-रोग-ताप-घातेभ्य: |
व्यायाम-क्लम-घर्मै : स्वेद : सम्पीडनात् च एव || ९५ ||

अन्वय : - अत्र आर्या : | तत्र-
क्रोध-भय-हर्ष-लज्जा-दु:ख-श्रम-रोग-ताप-घातेभ्य: व्यायाम-क्लम-घर्मै: सम्पीडनात् च स्वेद: (इति सात्त्विक : भाव : भवति) |

अर्थ - यासंबंधित आर्या पुढीलप्रमाणे -
क्रोध, भय, हर्ष, लज्जा, दु:ख, श्रम, रोग, ताप, घात तसेच व्यायाम, क्लेश, ऊन यांमुळे आणि मालिश करणे यापासून स्वेद हा सात्त्विक भाव होतो .

## ❖ स्तंभ आणि कंप ❖

हर्षभयशोकविस्मयविषादरोषादिसम्भव: स्तम्भ: |
शीतभयहर्षरोषस्पर्शजरारोगज: कम्प: || ९६ ||

पदच्छेद : - हर्ष-भय-शोक-विस्मय-विषाद-रोषादिसम्भव : स्तम्भ : |
शीत-भय-हर्ष-रोष-स्पर्श-जरा-रोगज : कम्प : || ९६ ||

अन्वय : - हर्ष-भय-शोक-विस्मय-विषाद-रोषादिसम्भव: स्तम्भ: | शीत-भय-हर्ष-रोष-स्पर्श-जरा-रोगज : कम्प : |

अर्थ - हर्ष, भय, रोग, विस्मय, विषाद, मद, रोष यापासून स्तंभ हा सात्त्विक भाव निर्माण होतो आणि थंडी, भय, हर्ष, रोष, स्पर्श, म्हातारपण आणि रोग यांपासून कंप म्हणजे वेपथू हा भाव निर्माण होतो .

## ❖ अश्रू ❖

आनन्दामर्षाभ्यां धूमाञ्जनजृम्भणाद्भयाच्छोकात् |
अनिमेषप्रेक्षणत: शीताद्रोगाद्भवेदश्रु || ९७ ||

पदच्छेद : - आनन्द-अमर्षाभ्यां धूम-अञ्जन-जृम्भणात् भयात् शोकात् |
अनिमेषप्रेक्षणत : शीतात् रोगात् अश्रु भवेत् || ९७ ||

अन्वयः - आनन्द-अमर्षाभ्यां धूम-अञ्जन-जृम्भणात् भयात् शोकात् अनिमेषप्रेक्षणतः शीतात् रोगात् अश्रु (इति सात्त्विकः भावः) भवेत्।

अर्थ - आनंद, अमर्ष, धूर, अंजन, जांभई, भय, शोक, एकटक पाहणे, थंडी व रोगापासून अश्रू हा भाव उत्पन्न होतो .

## ❖ वैवर्ण्य आणि रोमांच ❖

शीतक्रोधभयश्रमरोगक्लमतापजं च वैवर्ण्यम्।
स्पर्शभयशीतहर्षात् क्रोधाद्रोगाच्च रोमाञ्चः ॥ ९८ ॥

पदच्छेदः - शीत-क्रोध-भय-श्रम-रोग-क्लम-तापजं च वैवर्ण्यम्।
स्पर्श-भय-शीत-हर्षात् क्रोधात् रोगात् च रोमाञ्चः ॥ ९८ ॥

अन्वयः - शीत-क्रोध-भय-श्रम-रोग-क्लम-तापजं च वैवर्ण्यम् (भवेत्) । स्पर्श-भय-शीत-हर्षात् क्रोधात् रोगात् च रोमाञ्चः (भवेत्) ।

अर्थ - थंडी, क्रोध, भय, श्रम, रोग, शिथिलता, ताप यापासून वैवर्ण्य हा भाव होतो आणि स्पर्श, भय, थंडी, हर्ष, क्रोध, रोग यापासून रोमांच हा भाव उत्पन्न होतो .

## ❖ स्वरभेद आणि प्रलय ❖

स्वरभेदो भयहर्षक्रोधजरारौक्ष्यरोग मदजनितः।
श्रममूर्च्छामदनिद्राभिघातमोहादिभिः प्रलयः ॥ ९९ ॥

पदच्छेदः - स्वरभेदः भय-हर्ष-क्रोध-जरा-रौक्ष्य-रोग मदजनितः।
श्रम-मूर्च्छा-मद-निद्रा-अभिघात-मोह-आदिभिः प्रलयः ॥ ९९ ॥

अन्वयः - भय-हर्ष-क्रोध-जरा-रौक्ष्य-रोग मदजनितः स्वरभेदः (भवेत्)।
श्रम-मूर्च्छा-मद-निद्रा-अभिघात-मोह-आदिभिः प्रलयः (भवेत्) ।

अर्थ - भय, हर्ष, क्रोध, म्हातारपण, कठोरता, रोग, मद यापासून 'स्वरभंग' हा भाव उत्पन्न होतो आणि श्रम, मूर्च्छा, मद, निद्रा, जखमी होणे, मोह यापासून प्रलय हा भाव उत्पन्न निर्माण होतो .

## ❖ सात्त्विकभावांचे विनियोग ❖

एवमेते बुधैर्ज्ञेया भावा ह्यष्टो तु सात्त्विका: |
कर्म चैषां प्रवक्ष्यामि रसभावानुभावकम् || १०० ||

पदच्छेद: - एवम् एते बुधै: ज्ञेया: भावा: हि अष्टौ तु सात्त्विका: |
कर्म च एषां प्रवक्ष्यामि रसभाव-अनुभावकम् || १०० ||

अन्वय: - एवम् एते हि अष्टौ सात्त्विका: भावा: बुधै: ज्ञेया: | एषां च रसभावानुभावकं कर्म प्रवक्ष्यामि |

अर्थ - विद्वज्जनांनी याप्रकारचे आठ सात्त्विकभाव समजून घ्यावेत . आता रस आणि भावाच्या उपयोगानुसार या सात्त्विक भावांच्या कार्याचे विवेचन करतो .

नि:संज्ञो निष्प्रकम्पश्च स्थित: शून्यजडाकृति: |
सन्नगात्रतया चैव स्तम्भं त्वभिनयेद्बुध: || १०१ ||

पदच्छेद: - नि:संज्ञ: निष्प्रकम्प: च स्थित: शून्यजडाकृति: |
सन्नगात्रतया च एव स्तम्भं तु अभिनयेत् बुध: || १०१ ||

अन्वय: - नि:संज्ञ: निष्प्रकम्प: स्थित: शून्यजडाकृति: सन्नगात्रतया च बुध: स्तम्भम् अभिनयेत् |

अर्थ - क्रियाहीन, कंप नसलेला, स्थिर, चेहऱ्यावर स्मित नसणे आणि संबंध शरीर जड आणि कठोर होणे या अनुभावांनी बुद्धिमान माणसाने स्तंभाचा अभिनय करावा .

व्यजनग्रहणाच्चापि स्वेदापनयनेन च |
स्वेदस्याभिनयो योज्यस्तथा वाताभिलाषत: || १०२ ||

पदच्छेद: - व्यजनग्रहणात् च अपि स्वेद-अपनयनेन च |
स्वेदस्य अभिनय: योज्य: तथा वात-अभिलाषत: || १०२ ||

अन्वय: - व्यजनग्रहणात् स्वेद-अपनयनेन तथा वाताभिलाषत: स्वेदस्य अभिनय: योज्य: |

अर्थ - हातामध्ये पंखा घेणे, घाम पुसणे आणि वाऱ्याची इच्छा करणे इत्यादींनी 'स्वेद' चा अभिनय करावा .

मुहुः कण्टकितत्वेन तथोल्लुकसनेन च ।
पुलकेन च रोमाञ्चं गात्रस्पर्शेन दर्शयेत् ॥ १०३ ॥

पदच्छेदः - मुहुः कण्टकितत्वेन तथा उल्लुकसनेन च ।
पुलकेन च रोमाञ्चं गात्रस्पर्शेन दर्शयेत् ॥ १०३ ॥

अन्वयः - मुहुः कण्टकितत्वेन उल्लुकसनेन पुलकेन गात्रस्पर्शेन च रोमाञ्चं दर्शयेत् ।

अर्थ - पुन्हा पुन्हा अंगावर काटा येणे, शहारे येणे, शरीराला स्पर्श इ. अनुभावांनी रोमांच या भावाचा अभिनय करावा.

स्वरभेदोऽभिनेतव्यो भिन्नगद्गदनिस्वनैः ।
वेपनात्स्फुरणात्कम्पाद्वेपथुं सम्प्रदर्शयेत् ॥ १०४ ॥

पदच्छेदः - स्वरभेदः अभिनेतव्यः भिन्न-गद्गद-निस्वनैः ।
वेपनात्स्फुरणात् कम्पात् वेपथुं सम्प्रदर्शयेत् ॥ १०४ ॥

अन्वयः - भिन्न-गद्गद-निस्वनैः स्वरभेदः अभिनेतव्यः । वेपनात् स्फुरणात् कम्पात् वेपथुं सम्प्रदर्शयेत् ।

अर्थ - स्वरामध्ये आलेला बदल व गद्गद होणे यांनी स्वरभेदाचा अभिनय करावा. कापणे, स्फुरण होणे आणि थरथरणे इत्यादींनी वेपथूचा अभिनय करावा.

मुखवर्णपरावृत्त्या नाडीपीडनयोगतः ।
वैवर्ण्यमभिनेतव्यं प्रयत्नात्तद्धि दुष्करम् ॥ १०५ ॥

पदच्छेदः - मुखवर्णपरावृत्त्या नाडीपीडनयोगतः ।
वैवर्ण्यम् अभिनेतव्यं प्रयत्नात् तत् हि दुष्करम् ॥ १०५ ॥

अन्वयः - मुखवर्णपरावृत्त्या नाडीपीडनयोगतः वैवर्ण्यम् अभिनेतव्यं (यः) प्रयत्नात् तत् हि दुष्करम् ।

अर्थ - चेहऱ्यावरच्या रंग बदलून, नसांवर दबाव पाडून, वैवर्ण्याचा अभिनय करावा जो अतिशय कठीण आहे.

बाष्पाम्बुप्लुतनेत्रत्वान्नेत्रसम्मार्जनेन च |
मुहुरश्रुकणापातैरास्रं त्वभिनयेद्बुधः || १०६ ||

पदच्छेदः - बाष्प-अम्बु-प्लुत-नेत्रत्वात् नेत्रसम्मार्जनेन च |
मुहुः अश्रुकणापातैः आस्रं तु अभिनयेत् बुधः || १०६ ||

अन्वयः - बाष्प-अम्बु-प्लुत-नेत्रत्वात् नेत्रसम्मार्जनेन च | मुहुः अश्रुकणापातैः बुधः आस्रं तु अभिनयेत् |

अर्थ - पाण्याने भरलेले डोळे अभिव्यक्त करणे, डोळे पुसणे आणि वारंवार अश्रुपात करणे इ. अनुभावांनी हुशार अभिनेत्यांनी अश्रूंचा अभिनय करावा.

निश्चेष्टो निष्प्रकम्पत्वादव्यक्तश्वसितादपि |
महीनिपातनाच्चापि प्रलयाभिनयो भवेत् || १०७ ||

पदच्छेदः - निश्चेष्टः निष्प्रकम्पत्वात् अव्यक्तश्वसितात् अपि |
महीनिपातनात् च अपि प्रलय-अभिनयः भवेत् || १०७ ||

अन्वयः - निश्चेष्टः निष्प्रकम्पत्वात् अव्यक्तश्वसितात् महीनिपातनात् च प्रलय-अभिनयः भवेत् |

अर्थ - चेष्टाहीन होणे, कंपित न होणे, अस्पष्टपणे श्वास चालू ठेवून जमिनीवर पडणे इत्यादींनी प्रलयाचा अभिनय करावा.

❖ एकूण भाव ❖

एकोनपञ्चाशदिमे यथावद्
भावास्त्र्यवस्था गदिता मयेह |
भूयश्च ये यत्र रसे नियोज्या-
स्तान् श्रोतुमर्हन्ति च विप्रमुख्याः || १०८ ||

पदच्छेदः - एकोनपञ्चाशत् इमे यथावत् भावाः त्र्यवस्था गदिताः मया इह |
भूयः च ये यत्र रसे नियोज्याः तान् श्रोतुम् अर्हन्ति च विप्रमुख्याः || १०८ ||

अन्वयः - एकोनपञ्चाशत् इमे भावाः त्र्यवस्था यथावत् मया इह गदिताः | भूयः च ये यत्र रसे नियोज्याः तान् विप्रमुख्याः श्रोतुम् अर्हन्ति च |

अर्थ - मी येथे एकोणपन्नास भाव आणि तीन अवस्था सांगितल्या . पुन्हा ज्या ज्या रसांमध्ये त्याचा प्रयोग केला पाहिजे त्याविषयी ब्राह्मणश्रेष्ठांनी ऐकावे .

❖ भावांचा रसामध्ये विनियोग ❖

अत्र श्लोका:

शङ्काव्याधिस्तथाग्लानिश्चिन्तासूया भयं तथा |
विस्मयश्च वितर्कश्च स्तम्भश्चपलता तथा ||

पदच्छेद:- अत्र श्लोका :
शङ्का व्याधि: तथा ग्लानि: चिन्ता असूया भयं तथा |
विस्मय: च वितर्क: च स्तम्भ: चपलता तथा ||

अर्थ - यासंबंधित श्लोक पुढीलप्रमाणे -
शंका, व्याधी, ग्लानी, चिंता, असूया, भय, विस्मय, वितर्क, स्तंभ आणि चपलता

रोमाञ्चहर्षौ निद्रा च तथोन्मादमदावपि |
स्वेदश्चैवावहित्थं च प्रलयो वेपथुस्तथा ||

पदच्छेद:- रोमाञ्चहर्षौ निद्रा च तथा उन्मादमदौ अपि |
स्वेद: च एव अवहित्थं च प्रलय: वेपथु: तथा ||

अर्थ - रोमांच, हर्ष, निद्रा, उन्माद, मद, स्वेद, अवहित्थ, प्रलय आणि वेपथु

विषादश्रमनिर्वेदा गर्वावेगौ धृति: स्मृति: |
मतिर्मोहो विबोधश्च सुप्तमौत्सुक्यवर्जिते ||

पदच्छेद:- विषादश्रमनिर्वेदा: गर्व-आवेगौ धृति: स्मृति: |
मति: मोह: विबोध: च सुप्तम् औत्सुक्यवर्जिते ||

अर्थ - विषाद, श्रम, निर्वेद, गर्व, आवेग, धृती, स्मृती, मती, मोह, विबोध, औत्सुक्यरहित सुप्त

क्रोधामर्षौ च हासश्च शोकोऽपस्मार एव च |
दैन्यं च मरणं चैव रतिरुत्साहसंयुता ||

पदच्छेद :- क्रोधामर्षौ च हास : च शोक : अपस्मार : एव च |
दैन्यं च मरणं च एव रति : उत्साहसंयुता ||

अर्थ - क्रोध, अमर्ष, हास, शोक, अपस्मार, दैन्य, मरण, उत्साहाच्या बरोबर रती,

त्रासवैवर्ण्यरुदितै : स्वरभेद : शमोऽपि च |
जडता च तथा षट् च चत्वारिंशत्प्रकीर्तिता : ||

पदच्छेद :- त्रासवैवर्ण्यरुदितै : स्वरभेद : शम : अपि च |
जडता च तथा षट् च चत्वारिंशत् प्रकीर्तिता : ||

अर्थ - त्रास, वैवर्ण्य, रूदन, स्वरभेद, शम आणि जडता पण या सहा मिळून सेहेचाळीस भाव सांगितले आहेत .

आलस्यौग्र्यजुगुप्साख्यैरेवं भावैस्तु वर्जिता : |
उद्भावयन्ति शृङ्गारं सर्वे भावा : स्वसंज्ञया || १०९ ||
[यथाऽवसरमेते हि स्थायिसञ्चारिसत्वजा : |
उद्दीपयन्ति शृङ्गारं रसमासाद्य संज्ञितम् || ]

पदच्छेद :- आलस्य-औग्र्यजुगुप्साख्यै : एवं भावै : तु वर्जिता :|
उद्भावयन्ति शृङ्गारं सर्वे भावा : स्वसंज्ञया || १०९ ||
[यथा अवसरम् एते स्थायिसञ्चारिसत्त्वजा :
उद्दीपयन्ति शृङ्गारं रसम् आसाद्य संज्ञिताम् || ]

अन्वय : - एवम् आलस्य-औग्र्यजुगुप्साख्यै: भावै: वर्जिता: सर्वे भावा: स्वसंज्ञया शृङ्गारम् उद्भावयन्ति |
[यथा अवसरम् एते हि स्थायिसञ्चारिसत्त्वजा: आसाद्य शृङ्गारं संज्ञितं रसम् उद्दीपयन्ति ||]

अर्थ - आलस्य, उग्रता आणि जुगुप्सा भाव सोडून बाकीच्या सर्व भाव नावाप्रमाणे शृंगार रस उत्पन्न करतात . हे स्थायी, संचारी आणि सात्त्विक भाव वेळोवेळी प्रसंगानुसार शृंगार रसाला उद्दीप्त करतात .

ग्लानिः शङ्का ह्यसूया च श्रमश्चपलता तथा।
सुप्तं निद्रावहित्थं च हास्ये भावाः प्रकीर्तिताः ॥ ११० ॥

पदच्छेदः - ग्लानिः शङ्का हि असूया च श्रमः चपलता तथा।
सुप्तं निद्रा अवहित्थं च हास्ये भावाः प्रकीर्तिताः ॥ ११० ॥

अन्वयः - हास्ये ग्लानिः शङ्का हि असूया च श्रमः चपलता तथा सुप्तं निद्रा अवहित्थं च (एते) भावाः प्रकीर्तिताः।

अर्थ - ग्लानी, शंका, असूया, श्रम, चपलता, सुप्त, निद्रा व अवहित्थ भावांचा उपयोग हास्य रसामध्ये सांगितला आहे.

निर्वेदश्चैव चिन्ता च दैन्यं ग्लान्यास्रमेव च।
जडता मरणं चैव व्याधिश्च करुणे स्मृताः ॥ १११ ॥

पदच्छेदः - निर्वेदः च एव चिन्ता च दैन्यं ग्लानि-आस्रम् एव च।
जडता मरणं च एव व्याधिः च करुणे स्मृताः ॥ १११ ॥

अन्वयः - करुणे निर्वेदः चिन्ता दैन्यं ग्लानि-आस्रं जडता मरणं व्याधिः च (एते भावाः) स्मृताः।

अर्थ - करुण रसामध्ये गर्व, असूया, मद, उत्साह, आवेग, अमर्ष, क्रोध, चपलता तसेच उग्रता इ. भाव सांगितले आहेत.

गर्वोऽसूया मदोत्साहावावेगोऽमर्ष एव च।
क्रोधश्चपलतौग्र्यं च विज्ञेया रौद्रसम्भवाः ॥ ११२ ॥

पदच्छेदः - गर्वः असूया मद-उत्साहौ आवेगः अमर्षः एव च।
क्रोधः चपलता औग्र्यं च विज्ञेयाः रौद्रसम्भवाः ॥ ११२ ॥

अन्वयः - गर्वः असूया मद-उत्साहौ आवेगः अमर्षः क्रोधः चपलता औग्र्यं च (एते भावाः) रौद्रसम्भवाः विज्ञेयाः।

अर्थ - गर्व, असूया, मद, उत्साह, आवेग, अमर्ष, क्रोध, चपलता आणि उग्रता (हे भाव) रौद्ररसात निर्माण होतात असे जाणून घ्यावे.

असम्मोहस्तथोत्साह आवेगो हर्ष एव च |
मतिश्चैव तथोग्रत्वममर्षो मद एव च || ११३ ||
रोमाञ्च: स्वरभेदश्च क्रोधोऽसूया धृतिस्तथा |
गर्वश्चैव वितर्कश्च वीरे भावा भवन्ति हि || ११४ ||

पदच्छेद: - असम्मोह: तथा उत्साह: आवेग: हर्ष: एव च |
मति: च एव तथा उग्रत्वम् अमर्ष: मद: एव च || ११३ ||
रोमाञ्च: स्वरभेद: च क्रोध: असूया धृति: तथा |
गर्व: च एव वितर्क: च वीरे भावा: भवन्ति हि || ११४ ||

अन्वय: - असम्मोह: उत्साह: आवेग: हर्ष: मति: उग्रत्वम् अमर्ष: मद: रोमाञ्च: स्वरभेद: क्रोध: असूया धृति: गर्व: वितर्क: च (एते) भावा: वीरे भवन्ति |

अर्थ - वीर रसामध्ये असम्मोह, उत्साह, आवेग, हर्ष, मती, उग्रता, अमर्ष, मद, रोमांच, स्वरभंग, क्रोध, असूया, धृती, गर्व आणि वितर्क हे भाव वीररसामध्ये प्रयुक्त होतात .

स्वेदश्च वेपथुश्चैव रोमाञ्चो गद्गदस्तथा |
त्रासश्च मरणञ्चैव वैवर्ण्यं च भयानके || ११५ ||

पदच्छेद: - स्वेद: च वेपथु: च एव रोमाञ्च: गद्गद: तथा |
त्रास: च मरणं च एव वैवर्ण्यं च भयानके || ११५ ||

अन्वय: - स्वेद: च वेपथु: रोमाञ्च: गद्गद: त्रास: मरणं वैवर्ण्यं च भयानके (एते भावा: भवन्ति)|

अर्थ - भयानक रसामध्ये स्वेद, वेपथू, रोमांच, गद्गद, कंठ, त्रास, मरण तसेच वैवर्ण्य या भावांचा उपयोग होतो .

अपस्मारस्तथोन्मादो विषादो मद एव च |
मृत्युर्व्याधिर्भयं चैव भावा बीभत्ससंश्रया: || ११६ ||

पदच्छेद: - अपस्मार: तथा उन्माद: विषाद: मद: एव च |
मृत्यु: व्याधि: भयं च एव भावा: बीभत्ससंश्रया: || ११६ ||

अन्वय: - अपस्मार: उन्माद: विषाद: मद: मृत्यु: व्याधि: भयं च (एते) भावा: बीभत्ससंश्रया: (सन्ति)|

अर्थ - बीभत्स रसाच्या आश्रयी अपस्मार, उन्माद, विषाद, मद, मृत्यु, व्याधी आणि भय भाव असतात .

स्तम्भ: स्वेदश्च मोहश्च रोमाञ्चो विस्मयस्तथा |
आवेगो जडता हर्षो मूर्च्छा चैवाद्भुताश्रया: || ११७ ||

पदच्छेद: - स्तम्भ: स्वेद: च मोह: च रोमाञ्च: विस्मय: तथा|
आवेग: जडता हर्ष: मूर्च्छा च एव अद्भुत-आश्रया: || ११७ ||

अन्वय: - स्तम्भ: स्वेद: मोह: रोमाञ्च: विस्मय: आवेग: जडता हर्ष: मूर्च्छा च (एते) अद्भुत-आश्रया: (भावा: सन्ति)|

अर्थ - अद्भुत रसाच्या आश्रयी स्तंभ, स्वेद, मोह, रोमांच, विस्मय, आवेग, जडता, हर्ष आणि मूर्च्छा हे भाव आहेत .

ये त्वेते सात्त्विका भावा नानाभिनयसंश्रिता: |
रसेष्वेतेषु सर्वे ते ज्ञेया नाट्यप्रयोक्तृभि: || ११८ ||

पदच्छेद: - ये तु एते सात्त्विका: भावा: नाना-अभिनय-संश्रिता:|
रसेषु एतेषु सर्वे ते ज्ञेया: नाट्यप्रयोक्तृभि: || ११८ ||

अन्वय: - ये एते नानाभिनयसंश्रिता: सात्त्विका: भावा: नाट्यप्रयोक्तृभि: ते सर्वे एतेषु रसेषु ज्ञेया:|

अर्थ - हे सात्त्विक भाव विविध प्रकारच्या अभिनयांवर आधारित आहेत, नाट्याचा प्रयोग करणाऱ्यांनी सर्व रसांमध्ये या भावांची स्थिती समजून घ्यावी .

### ❖ रस आणि भाव यांचा प्रयोगविधि ❖

न ह्येकरसजं काव्यं किञ्चिदस्ति प्रयोगत: |
भावो वापि रसो वापि प्रवृत्तिर्वृत्तिरेव च || ११९ ||

पदच्छेद : - न हि एकरसजं काव्यं किञ्चित् अस्ति प्रयोगत : |
भाव : वा अपि रस : वा अपि प्रवृत्ति : वृत्ति : एव च || ११९ ||

अन्वय : - किञ्चित् एकरसजं काव्यं न हि अस्ति | प्रयोगत : भाव : रस : वा अपि प्रवृत्ति : वृत्ति : च (भवेत्) |

अर्थ - असे कुठलेही काव्य नाही ज्यात एकच रस असेल . म्हणूनच प्रयोगानुसार विविध भाव, रस, वृत्ती आणि प्रवृत्तींचा उपयोग होतो .

[बहूनां समवेतानां रूपं यस्य भवेद्बहु |
स मन्तव्यो रस : स्थायी शेषा : संचारिणो मता : ||

पदच्छेद : - [बहूनां समवेतानां रूपं यस्य भवेत् बहु |
स : मन्तव्य : रस : स्थायी शेषा : संचारिण : मता : ||

अन्वय : - बहूनां समवेतानां यस्य रूपं बहु भवेत् स : स्थायी (भाव :) रस : मन्तव्य : शेषा : (तु) संचारिण : मता : |

अर्थ - जेव्हा अनेक भाव एकत्र येतात त्यावेळी ज्या एका भावाचा विविध रूपांमध्ये प्रयोग होतो त्याला त्या रसाचा स्थायी भाव समजावा व उरलेल्या भावांना संचारिभाव समजावे .

दीपयन्त : प्रवर्तन्ते ये पुन : स्थायिनं रसम् |
ते तु संचारिणो ज्ञेयास्ते हि स्थायित्वमागता : ||

पदच्छेद : - दीपयन्त : प्रवर्तन्ते ये पुन : स्थायिनं रसम् |
ते तु संचारिण : ज्ञेया : ते हि स्थायित्वम् आगता : ||

अन्वय : - ये स्थायिनं रसं दीपयन्त : प्रवर्तन्ते ते संचारिण : इति ज्ञेया : | ते हि स्थायित्वम् आगता : |

अर्थ - जे स्थायी भाव रसाला प्रकाशित करतात, ते भावांमध्ये संचार करीत असल्याने त्यास संचारी समजावे . परंतु रसाच्या संदर्भात तेच स्थायी भाव असतात .

विभावानुभावयुतो ह्यङ्गवस्तुसमाश्रय : |
संचारिभिस्तु संयुक्त : स्थाय्येव तु रसो भवेत् ||

पदच्छेद :- विभावानुभावयुत: हि अङ्गवस्तुसमाश्रय:|
संचारिभि: तु संयुक्त: स्थायी एव तु रस: भवेत्||

अन्वय: - अङ्गवस्तुसमाश्रय: विभावानुभावयुत: संचारिभि: संयुक्त: स्थायी एव रस: भवेत्|

अर्थ - कथावस्तूवर आधारित विभाव, अनुभाव आणि संचारिभावांनी युक्त असा हा स्थायीभाव रसाचे स्वरूप धारण करतो .

स्थायी सत्त्वातिरेकेण प्रयोक्तव्य: प्रयोक्तृभि:|
सञ्चार्याकारमात्रेण स्थायी यस्मादवस्थित: ||

पदच्छेद :- स्थायी सत्त्व-अतिरेकेण प्रयोक्तव्य: प्रयोक्तृभि:|
सञ्चारी आकारमात्रेण स्थायी यस्मात् अवस्थित:||

अन्वय: - प्रयोक्तृभि: सत्त्वातिरेकेण स्थायी प्रयोक्तव्य: | आकारमात्रेण सञ्चारी (प्रयोक्तव्य:) यस्मात् स्थायी अवस्थित:|

अर्थ - नाट्यप्रयोग करणाऱ्यांनी सत्त्वाचा अतिरेक करून स्थायी भावांचा उपयोग केला पाहिजे आणि संचारी भावांचा आवश्यकतेनुसार वापर करावा ज्यामुळे स्थायीभावाचे प्रधानत्व कायम राहील . (आणि संचारिभाव हे स्थायीभावाचे सहकारी राहतील . )

ये त्वेते सात्त्विका भावा नानाभिनययोजिता: |
रसेष्वेतेषु सर्वेषु ते ज्ञेया नाट्यकोविदै: ||

पदच्छेद :- ये तु एते सात्त्विका: भावा: नाना-अभिनय-योजिता:|
रसेषु एतेषु सर्वेषु ते ज्ञेया: नाट्यकोविदै:||

अन्वय: - ये एते नाना-अभिनय-योजिता: सात्त्विका: भावा: ते नाट्यकोविदै: एतेषु सर्वेषु रसेषु ज्ञेया:|

अर्थ - विविध प्रकारच्या अभिनयामध्ये वापरण्यात येणारे हे जे सात्त्विकभाव आहेत, ते नाट्यकोविदांनी सर्व रसांमध्ये वापरावे .

न ह्येकरसजं काव्यं नैकभावैकवृत्तिकम् |
विमर्दे रागमायाति प्रयुक्तं हि प्रयत्नत: ||

भावा वाऽपि रसा वाऽपि प्रवृत्तिर्वृत्तिरेव वा |
बीभत्साद्भुतशान्तानां त्रैविध्यं नात्र कथ्यते ||

पदच्छेद : - न हि एकरसजं काव्यं नैकभावैकवृत्तिकम् |
विमर्दे रागम् आयाति प्रयुक्तं हि प्रयत्नत : ||
भावा : वा अपि रसा : वा अपि प्रवृत्ति : वृत्ति : एव वा |
बीभत्स-अद्भुत-शान्तानां त्रैविध्यं न अत्र कथ्यते ||

अन्वय : - न एकरसजं काव्यं न एकभावैक-वृत्तिकं (शक्यम्) | भावा : रसा : प्रवृत्ति : वृत्ति : वा विमर्दे प्रयत्नत : प्रयुक्तं रागम् आयाति | बीभत्स-अद्भुत-शान्तानां त्रैविध्यं अत्र न कथ्यते |

अर्थ - असं कुठलही काव्य (नाटक-कथावस्तु)नाही ज्यात एकच रस असेल, एकच भाव आणि एकच वृत्ती असेल . परंतु कितीही भाव असो , रस असो, वृत्ती किंवा प्रवृत्ती असो ह्या सर्वांचे प्रयत्नपूर्वक संयोजन रसत्वापर्यंत पोचते (रस प्राप्त करते) . बीभत्स, अद्भुत आणि शांत रसाचे त्रैविध्य येथे सांगितलेले नाही .

षण्णां रसानां त्रैविध्यं नानाभावरसान्वितम् |
सत्त्वप्रयोजितो ह्यर्थ : प्रयोगोऽत्र विराजते ||
विदित्वा हि विराजन्ते लोके चित्रं हि दुर्लभम् ||

पदच्छेद : - षण्णां रसानां त्रैविध्यं नानाभाव-रसान्वितम् |
सत्त्वप्रयोजित : हि अर्थ : प्रयोग : अत्र विराजते ||
विदित्वा हि विराजन्ते लोके चित्रं हि दुर्लभम् ||

अन्वय : - नानाभाव-रसान्वितं षण्णां रसानां त्रैविध्यम् (उक्तम् अस्ति) | अत्र सत्त्वप्रयोजित : हि अर्थ : प्रयोग : (इति) विराजते | (एतत्) विदित्वा (नटा :) विराजन्ते लोके चित्रं हि दुर्लभम् (अस्ति) ||

अर्थ - विविध भाव आणि रसाने युक्त (रसासह)येथे सहा रसाच्या त्रैविध्याचे प्रयोग सांगितले आहेत. येथे सत्त्वाने युक्त असलेल्या विषयाला प्रयोग म्हटले आहे. हे जाणून घेऊन नाट्यप्रयोग करणाऱ्याला जगात मान-सन्मान व प्रतिष्ठा प्राप्त होते. परंतु लोकांमध्ये असे चित्रप्रयोग म्हणजे सर्वरसांनी मिश्रित प्रयोग दुर्लभच आहेत.

नानाभावार्थसंपन्ना: स्थायिसत्त्वाभिचारिण: |
पुष्पावकीर्णा: कर्तव्या: काव्येषु हि रसा बुधै: || १२० ||

पदच्छेद: - नाना-भावार्थ-संपन्ना: स्थायिसत्त्व-अभिचारिण:|
पुष्प-अवकीर्णा: कर्तव्या: काव्येषु हि रसा: बुधै: || १२० ||

अन्वय: - बुधै: काव्येषु नानाभावार्थसंपन्ना: स्थायिसत्त्वाभिचारिण:पुष्पावकीर्णा: रसा: कर्तव्या:|

अर्थ - नाट्यप्रयोगामध्ये विद्वान असलेल्यांनी काव्यामध्ये (कथावस्तूमध्ये) विविध भाव तसेच अर्थांचा समन्वय करून स्थायी, सात्त्विक आणि संचारिभावांचा माळेमध्ये ओवलेल्या फुलांप्रमाणे उपयोग केला पाहिजे.

एवं रसाश्च भावाश्च त्र्यवस्था नाटके स्मृता: |
य एवमेताञ्जानाति स गच्छेत्सिद्धिमुत्तमाम् || १२१ ||

पदच्छेद: - एवं रसा: च भावा: च त्रि-अवस्था नाटके स्मृता:|
य: एवम् एतान् जानाति स: गच्छेत् सिद्धिम् उत्तमाम् || १२१ ||

अन्वय: - एवं नाटके रसा: च भावा: च त्र्यवस्था स्मृता:| य: एवम् एतान् जानाति स: उत्तमां सिद्धिं गच्छेत्|

अर्थ - याप्रकारे नाटकात तीन अवस्था असलेले रस आणि भाव यांचे निरूपण केले. जो ह्यांना जाणतो तो उत्तम सिद्धी प्राप्त करतो.

|| इति श्रीभारतीये नाट्यशास्त्रे 'भावव्यञ्जको' नाम सप्तमोऽध्याय: ||

|| भरताच्या नाट्यशास्त्रातील 'भावाध्याय' नावाचा सातवा अध्याय पूर्ण झाला.||

# आठवा अध्याय
## उपांगाभिनय



# आठवा अध्याय

## उपांगाभिनय

### ❖ ऋषींचे प्रश्न आणि भरतमुनींचे उत्तर ❖

भावानां च रसानां च समुत्थानं यथाक्रमम् |
त्वत्प्रसादाच्छ्रुतं सर्वमिच्छामो वेदितुं पुन: ‖ १ ‖
नाट्ये कतिविध: कार्यस्तज्ज्ञैरभिनयक्रम:
कथं वाभिनयो ह्येष: कतिभेदश्च कीर्तित: ‖ २ ‖

पदच्छेद: - ऋषय: ऊचु: -
भावानां च रसानां च समुत्थानं यथाक्रमम् |
त्वत्प्रसादात् श्रुतं सर्वम् इच्छाम: वेदितुं पुन: ‖ १ ‖
नाट्ये कतिविध: कार्य: तज्ज्ञै: अभिनयक्रम: |
कथं वा अभिनय: हि एष: कतिभेद: च कीर्तित: ‖ २ ‖

अन्वय: - ऋषय: ऊचु: -
भावानां रसानां च समुत्थानं त्वत्प्रसादात् यथाक्रमं सर्वं श्रुतम् | पुन: वेदितुं इच्छाम: (यत्) तज्ज्ञै: नाट्ये कतिविध: अभिनयक्रम: कार्य:? कथं वा एष: अभिनय: हि (कार्य:)? कतिभेद: च कीर्तित: ?

अर्थ - ऋषीमुनी म्हणाले -
तुमच्या कृपेने आम्ही क्रमानुसार भाव आणि रसांचा उगम पूर्णपणे ऐकला . आता आम्ही जाणू इच्छितो की, नाट्यविद्वानांनी नाट्यप्रयोगामध्ये किती प्रकारे अभिनय करावा? हा अभिनय कसा करावा आणि त्याचे किती भेद आहेत?

सर्वमेतद्यथातत्त्वं कथयस्व महामुने |
यो यथाभिनयो यस्मिन्योक्तव्य: सिद्धिमिच्छता ‖ ३ ‖

पदच्छेद: - सर्वम् एतत् यथातत्त्वं कथयस्व महामुने |
य: यथा अभिनय: यस्मिन् योक्तव्य: सिद्धिम् इच्छता ‖३‖

अन्वय: - महामुने, सिद्धिम् इच्छता (नटेन) य: अभिनय: यथा यस्मिन् योक्तव्य: एतत् सर्व यथातत्त्वं कथयस्व |

अर्थ - हे महामुनी! नाट्यप्रयोगाच्या सिद्धीची इच्छा असणाऱ्याने जिथे जो अभिनय करायचा, ते सर्व यथायोग्य आम्हांला सांगा .

तेषां तद्वचनं श्रुत्वा मुनीनां भरतो मुनि: |
प्रत्युवाच पुनर्वाक्यं चतुरोऽभिनयान्प्रति ‖ ४ ‖

पदच्छेद: - तेषां तत् वचनं श्रुत्वा मुनीनां भरत: मुनि: |
प्रत्युवाच पुन: वाक्यं चतुर: अभिनयान् प्रति ‖ ४ ‖

अन्वय: - तेषां मुनीनां तत् वचनं श्रुत्वा भरत: मुनि: चतुर: अभिनयान् प्रति पुन: (एतत्) वाक्यं प्रत्युवाच |

अर्थ - त्या मुनीजनांचे ते बोलणे ऐकून भरतमुनींनी चार प्रकारच्या अभिनयांविषयी असे म्हटले .

अहं व: कथयिष्यामि निखिलेन तपोधना: |
यस्मादभिनयो ह्येष विधिवत्समुदाहृत: ‖ ५ ‖

पदच्छेद: - अहं व: कथयिष्यामि निखिलेन तपोधना: |
यस्मात् अभिनय: हि एष: विधिवत् समुदाहृत: ‖ ५ ‖

अन्वय: - हे तपोधना:, यस्मात् एष: अभिनय: विधिवत् समुदाहृत: (अस्ति तस्मात्) अहं व: निखिलेन कथयिष्यामि |

अर्थ - हे तपस्वी मुनींनो! या अभिनयाविषयी विधिनुसार सांगितले गेले आहे म्हणून मी तुम्हांला ते सविस्तर सांगतो .

### ❖ अभिनय शब्दाची निरुक्ती ❖

यदुक्तं चत्वारोऽभिनया इति तान्वर्णयिष्याम:| अत्राह - अभिनय इति कस्मात्? अत्रोच्यते-अभीत्युपसर्ग: | णीञित्ययं धातु: प्रापणार्थ: | अस्याभिनीत्येवं व्यवस्थितस्य एरजित्यच्प्रत्ययान्तस्याभिनय इत्येवं रूपं सिद्धम् | एतच्च धात्वर्थवचनेनावधार्य | अत्र श्लोको -

पदच्छेद : - यत् उक्तं चत्वार : अभिनया : इति तान् वर्णयिष्याम : |
अत्र आह - अभिनय : इति कस्मात्?
अत्र उच्यते - अभि इति उपसर्ग : | णीञ् इति अयं धातु : प्रापणार्थ : | अस्य 'अभिनी' इति एवं व्यवस्थितस्य एरच् इति अच् प्रत्ययान्तस्य अभिनय : इत्येवं रूपं सिद्धम् | एतत् च धातु-अर्थ-वचनेन अवधार्यम् |
अत्र श्लोकौ -

अर्थ - पूर्वी ज्या चार प्रकारच्या अभिनयांचा उल्लेख केला गेला आहे, त्याचेच आता सविस्तर वर्णन करतो .
प्रश्न - याला 'अभिनय' असे का म्हणतात?
उत्तर - 'अभि' हा उपसर्ग आहे आणि 'णीञ्' हा धातु पोहोचणे या अर्थाचा आहे . अभि नी अशी स्थिती असताना एरच् म्हणजे 'अच्' प्रत्यय लागून 'अभिनय' शब्दाचे रूप सिद्ध होते . अशा प्रकारे, 'धातु' आणि 'प्रत्यय' यांच्या योगाने उत्पन्न अशा 'अभिनय' शब्दाचा अर्थ जाणून घ्यावा .
याविषयी खालीलप्रमाणे दोन श्लोक आहेत .

अभिपूर्वस्तु णीञ्धातुराभिमुख्यार्थनिर्णये |
यस्मात्प्रयोगं नयति तस्मादभिनय :स्मृत : || ६ ||

पदच्छेद : - अभिपूर्व : तु णीञ् धातु : आभिमुख्यार्थनिर्णये |
यस्मात् प्रयोगं नयति तस्मात् अभिनय :स्मृत : ||६||

अन्वय : - अभिपूर्व : तु णीञ् धातु : आभिमुख्यार्थनिर्णये (भवति) | यस्मात् प्रयोगं नयति तस्मात् (स :) अभिनय : स्मृत : |

अर्थ - 'अभि' उपसर्ग 'णीञ्' धातूपासून 'अभिनय' हा शब्द आभिमुख्य या अर्थाने तयार होतो . 'अभिनय' हा प्रयोगास (नाट्याच्या कथावस्तूच्या अर्थास) प्रेक्षकांच्या अभिमुख (सन्मुख) घेऊन जातो' म्हणून यास अभिनय असे म्हणतात .

विभावयति यस्माच्च नानार्थान्हि प्रयोगत : |
शाखाङ्गोपाङ्गसंयुक्तस्तस्मादभिनय : स्मृत : || ७ ||

पदच्छेद: - विभावयति यस्मात् च नाना-अर्थान् हि प्रयोगत:|
शाखा-अङ्ग-उपाङ्गसंयुक्त: तस्मात् अभिनय: स्मृत:॥ ७॥

अन्वय: - यस्मात् शाखा-अङ्ग-उपाङ्गसंयुक्त: अभिनय: प्रयोगत: नाना-अर्थान् विभावयति तस्मात् (स: अभिनय: इति) स्मृत:|

अर्थ - ज्या अर्थी शाखा, अंग आणि उपांगांनी युक्त अभिनय नाट्यप्रयोगाद्वारे (कथावस्तूच्या) विविध अर्थांना व्यक्त करतो, म्हणूनच त्यास 'अभिनय' म्हटले जाते .

## ❖ अभिनयाचे प्रकार ❖

चतुर्विधश्चैष भवेन्नाट्यस्याभिनयो द्विजा: |
अनेकभेदबहुलं नाट्यमस्मिन्प्रतिष्ठितम् ॥८॥

पदच्छेद: - चतुर्विध: च एष: भवेत् नाट्यस्य अभिनय: द्विजा:|
अनेकभेदबहुलं नाट्यम् अस्मिन् प्रतिष्ठितम् ॥ ८॥

अन्वय: - हे द्विजा: , नाट्यस्य एष: अभिनय: चतुर्विध: भवेत् | अस्मिन् अनेकभेदबहुलं नाट्यं प्रतिष्ठितम्|

अर्थ - हे मुनींनो! नाट्याचा हा अभिनय चार प्रकारचा असतो आणि अनेक भेदांमुळे विविध प्रकारचे असणारे नाट्य या अभिनयामध्येच स्थिर असते .

आङ्गिको वाचिकश्चैव ह्याहार्य: सात्त्विकस्तथा |
ज्ञेयस्त्वभिनयो विप्राश्चतुर्धा परिकल्पित: ॥ ९ ॥

पदच्छेद: - आङ्गिक: वाचिक: च एव हि आहार्य: सात्त्विक: तथा|
ज्ञेय: तु अभिनय: विप्रा: चतुर्धा परिकल्पित:॥ ९॥

अन्वय: - हे विप्रा:, आङ्गिक: वाचिक: आहार्य: तथा सात्त्विक: च (एवं) चतुर्धा अभिनय: परिकल्पित: (स: च) ज्ञेय:|

अर्थ - हे मुनींनो, आंगिक, वाचिक, आहार्य आणि सात्त्विक अशा चार प्रकारांचा अभिनय सांगितला आहे . तो तुम्ही जाणून घ्यावा .

सात्त्विकः पूर्वमुक्तः तु भावैश्च सहितो मया |
अङ्गाभिनयमेवादौ गदतो मे निबोधत || १० ||

पदच्छेदः - सात्त्विकः पूर्वम् उक्तः तु भावैः च सहितः मया |
अङ्गाभिनयम् एव आदौ गदतः मे निबोधत || १० ||

अन्वयः - भावैः सहितः सात्त्विकः मया पूर्वम् उक्तः | (अतः) आदौ अङ्गाभिनयम् एव गदतः मे (यूयं तत् सर्वं) निबोधत |

अर्थ - भावांनी युक्त असा सात्त्विक अभिनय यापूर्वीच सांगितला आहे, म्हणून सर्वप्रथम 'आंगिक अभिनयाविषयी' सांगत आहे. तुम्ही ते नीट समजून घ्या.

### ❖ आंगिक अभिनयाचे तीन प्रकार ❖

त्रिविधस्त्वाङ्गिको ज्ञेयः शारीरो मुखजस्तथा |
तथा चेष्टाकृतश्चैव शाखाङ्गोपाङ्गसंयुतः || ११ ||

पदच्छेदः - त्रिविधः तु आङ्गिकः ज्ञेयः शारीरः मुखजः तथा |
तथा चेष्टाकृतः चैव शाखा-अङ्ग-उपाङ्गसंयुतः || ११ ||

अन्वयः - आङ्गिकः तु त्रिविधः ज्ञेयः शारीरः मुखजः तथा चेष्टाकृतः च | (एषः) एव शाखा-अङ्ग-उपाङ्गसंयुतः (भवति) |

अर्थ - 'आंगिक अभिनय' तीन प्रकारात विभागला जातो. १. शरीरज २. मुखज ३. चेष्टाकृत. हेच सर्व प्रकार शाखा, अंग आणि उपांगांनी युक्त असतात.

### ❖ अंग आणि उपांगे ❖

शिरोहस्तकटीवक्षः पार्श्वपादसमन्वितः |
अङ्गप्रत्यङ्गसंयुक्तः षडङ्गो नाट्यसंग्रहः ||१२||

पदच्छेदः - शिरोहस्तकटीवक्षः पार्श्वपादसमन्वितः |
अङ्ग-प्रत्यङ्ग-संयुक्तः षड्-अङ्गः नाट्यसंग्रहः || १२ ||

अन्वय: - शिरोहस्तकटीवक्ष: पार्श्वपादसमन्वित: अङ्गप्रत्यङ्गसंयुक्त: षडङ्ग: नाट्यसंग्रह: |

अर्थ - नाट्य हे डोके, हात, छाती, कंबर, काख आणि पाय अशा अंग व प्रत्यंगांनी युक्त असते .

तस्य शिरोहस्तोर: पार्श्वकटीपादत: षडङ्गानि |
नेत्रभ्रूनासाधरकपोलचिबुकान्युपाङ्गानि ||१३||

पदच्छेद: - तस्य शिर:-हस्त-उर:-पार्श्व-कटी-पादत: षड् अङ्गानि |
नेत्र-भ्रू-नासा-अधर-कपोल-चिबुकानि उपाङ्गानि || १३ ||

अन्वय: - तस्य (अभिनयस्य) शिर:-हस्त-उर:-पार्श्व-कटी-पादत: षड् अङ्गानि (सन्ति) |
(अपि च) नेत्र-भ्रू-नासा-अधर-कपोल-चिबुकानि उपाङ्गानि (सन्ति) |

अर्थ - या आंगिक अभिनयाची डोके, हात, छाती, काख, कंबर आणि पाय ही सहा अंगे सांगितली आहेत आणि डोळे, भुवया, नाक, ओठ, गाल, हनुवटी ही सहा 'उपांगे' सांगितली आहेत .

### ❖ अभिनयातील शाखा, नृत्त आणि अंकुर ❖

अस्य शाखा च नृत्तं च तथैवाङ्कुर एव च |
वस्तून्यभिनयस्येह विज्ञेयानि प्रयोक्तृभि: || १४ ||

पदच्छेद: - अस्य शाखा च नृत्तं च तथा एव अङ्कुर: एव च |
वस्तूनि अभिनयस्य इह विज्ञेयानि प्रयोक्तृभि: || १४ ||

अन्वय: - अस्य अभिनयस्य शाखा, नृत्तम् अङ्कुर: च (एतानि) वस्तूनि इह प्रयोक्तृभि: विज्ञेयानि |

अर्थ - प्रयोग करणाऱ्यांनी या अभिनयाच्या शाखा, नृत्त आणि अंकुर नावाच्या तत्त्वांना पण जाणून घेतले पाहिजे .

आङ्गिकस्तु भवेच्छाखा ह्यङ्कुर: सूचना भवेत् |
अङ्गहारविनिष्पन्नं नृत्तं तु करणाश्रयम् ||१५||

पदच्छेद : - आङ्गिक : तु भवेत् शाखा हि अङ्कुर : सूचना भवेत् |
अङ्गहार-विनिष्पन्नं नृत्तं तु करण-आश्रयम् ||१५||

अन्वय : - आङ्गिक: शाखा भवेत् अङ्कुर: सूचना भवेत् करणाश्रयम् अङ्गहारविनिष्पन्नं तु नृत्तं (भवेत्) |

अर्थ - आंगिक अभिनयाला 'शाखा' असे म्हणतात . सूचना किंवा सूच्य अभिनयाला 'अंकुर' असे म्हणतात आणि करणांवर आधारित अंगहारांद्वारे उत्पन्न होणाऱ्या अभिनयाला 'नृत्त' असे म्हणतात .

## ❖ शीर्षाभिनयाचे प्रकार ❖

मुखजेऽभिनये विप्रा नानाभावरसाश्रये |
शिरस: प्रथमं कर्म गदतो मे निबोधत ||१६||

पदच्छेद : - मुखजे अभिनये विप्रा : नाना-भाव-रस-आश्रये |
शिरस : प्रथमं कर्म गदत : मे निबोधत ||१६||

अन्वय : - हे विप्रा:, नानाभावरसाश्रये मुखजे अभिनये शिरस: प्रथमं कर्म मे गदत: (यूयं) निबोधत |

अर्थ - हे मुनीजनांनो, विविध भाव आणि रस ज्याच्या आश्रयात असतात अशा मुखाद्वारे निर्माण होणाऱ्या अभिनयामधील शीर्षाभिनयाविषयी सांगतो . तुम्ही ते नीट जाणून घ्या .

आकम्पितं कम्पितं च धुतं विधुतमेव च |
परिवाहितमाधूतमवधूतं तथाञ्चितम् ||१७ ||
निहञ्चितं परावृत्तमुत्क्षिप्तं चाप्यधोगतम् |
लोलितं चैव विज्ञेयं त्रयोदशविधं शिर: ||१८ ||

पदच्छेद : - आकम्पितं कम्पितं च धुतं विधुतम् एव च |
परिवाहितम् आधूतम् अवधूतं तथा अञ्चितम् || १७ ||
निहञ्चितं परावृत्तम् उत्क्षिप्तं च अपि अधोगतम् |
लोलितं च एव विज्ञेयं त्रयोदशविधं शिर : || १८ ||

अन्वय: - आकम्पितं कम्पितं धुतं विधुतं परिवाहितम् आधूतम् अवधूतम् अञ्चितं निहञ्चितं परावृत्तम् उत्क्षिप्तम् अधोगतं लोलितं च (इति) त्रयोदशविधं शिर: विज्ञेयम्|

अर्थ - एकूण १३ प्रकारचे शीर्ष आहेत. १.आकंपित २.कंपित ३.धुत ४. विधुत ५.परिवाहित ६.आधूत ७.अवधूत ८.अंचित ९.निहंचित १०.परावृत्त ११.उत्क्षिप्त १२.अधोगत १३.लोलित

❖ आकंपित आणि कंपिताचे लक्षण ❖

शनैराकम्पनादूर्ध्वमधश्चाकम्पितं भवेत् |<br>
द्रुतं तदेव बहुश: कम्पितं कम्पितं शिर: || १९ ||

पदच्छेद: - शनै: आकम्पनात् ऊर्ध्वम् अध: च आकम्पितं भवेत्|<br>
द्रुतं तत् एव बहुश: कम्पितं कम्पितं शिर: || १९ ||

अन्वय: - शनै: ऊर्ध्वम् अध: च आकम्पनात् आकम्पितं (शिर:) भवेत् | तत् एव बहुश: द्रुतं कम्पितं (चेत्) कम्पितं शिर: (भवेत्) |

अर्थ - मस्तक हळूहळू वर आणि खाली हलविण्यास 'आकंपित' असे म्हणतात आणि यालाच अनेकदा जलद गतीने हलविल्यास 'कंपित' असे म्हणतात.

[ऋजुस्थितस्य चोर्ध्वाध: क्षेपादाकम्पितं भवेत् |<br>
बहुशश्चलितं यच्च तत्कम्पितमिहोच्यते || २० ||]

पदच्छेद: - मतान्तरेण -<br>
ऋजुस्थितस्य च ऊर्ध्व-अध: क्षेपात् आकम्पितं भवेत्|<br>
बहुश: चलितं यत् च तत् कम्पितम् इह उच्यते || २० ||

अन्वय: - ऋजुस्थितस्य (शिरस:) ऊर्ध्व-अध: क्षेपात् आकम्पितं (शिर:) भवेत् | यत् बहुश: चलितं (चेत्) तत् कम्पितम् इह उच्यते |

अर्थ - अन्य मतानुसार, शीर्षाला सरळ रेषेत ठेवून वर-खाली नेल्यास त्याला 'आकंपित' शीर्ष असे म्हणतात आणि अनेकदा कंपन केल्यास 'कंपित' शीर्ष असे म्हणतात.

## ❖ आकंपिताचा विनियोग ❖

संज्ञोपदेशपृच्छासु स्वभावाभाषणे तथा |
निर्देशावाहने चैव भवेदाकम्पितं शिर: || २१ ||

पदच्छेद: - संज्ञा-उपदेश-पृच्छासु स्वभाव-आभाषणे तथा |
निर्देश-आवाहने च एव भवेत् आकम्पितं शिर: || २१ ||

अन्वय: - संज्ञा-उपदेश-पृच्छासु स्वभाव-आभाषणे तथा निर्देश-आवाहने च आकम्पितं शिर: भवेत् |

अर्थ - इशारा करणे, उपदेश देणे, प्रश्न करणे, स्वाभाविकरीत्या संभाषण करणे, आज्ञा देणे, बोलविणे यासाठी 'आकंपित' शीर्षाचा विनियोग केला पाहिजे .

## ❖ कंपिताचा विनियोग ❖

रोषे वितर्के विज्ञाने प्रतिज्ञानेऽथ तर्जने |
व्याध्यमर्षणयोश्चैव शिर: कम्पितमिष्यते ||२२ ||

पदच्छेद: - रोषे वितर्के विज्ञाने प्रतिज्ञाने अथ तर्जने |
व्याधिअमर्षणयो: च एव शिर: कम्पितम् इष्यते || २२ ||

अन्वय: - रोषे वितर्के विज्ञाने प्रतिज्ञाने तर्जने व्याधिअमर्षणयो: च कम्पितं शिर: इष्यते |

अर्थ - क्रोध, वितर्क, वस्तूंचे विशेष ज्ञान घेणे (विज्ञान), प्रतिज्ञा करणे, अंगुलिनिर्देश करणे, अतिशय प्रश्न करणे, व्याधी आणि क्रोध इ. व्यक्त करण्यासाठी कंपित शिराचा प्रयोग केला जातो .

## ❖ धुत आणि विधुताचे लक्षण ❖

शिरसो रेचनं यत्तु शनैस्तद्धुतमिष्यते |
द्रुतमारेचनादेतद्विधुतं तु भवेच्छिर: ||२३||

पदच्छेद: - शिरस: रेचनं यत् तु शनै : तत् धुतम् इष्यते |
द्रुतम् आरेचनात् एतत् विधुतं तु भवेत् शिर: || २३ ||

अन्वय: - शिरस: यत् शनै: रेचनं तत् धुतम् इष्यते | द्रुतम् आरेचनात् एतत् शिर: विधुतं भवेत् |

अर्थ - शीर्ष आजूबाजूला हळूहळू हलविल्यास 'धुत' असे म्हणतात आणि हे (डोके)जलदगतीने हलविले गेल्यास त्यास 'विधुत' असे म्हणतात .

## ❖ धुत शीर्षाचे विनियोग ❖

अनीप्सिते विषादे च विस्मये प्रत्यये तथा |
पार्श्वावलोकने शून्ये प्रतिषेधे धुतं शिर: ‖२४‖

पदच्छेद: - अनीप्सिते विषादे च विस्मये प्रत्यये तथा |
पार्श्व-अवलोकने शून्ये प्रतिषेधे धुतं शिर: ‖ २४ ‖

अन्वय: - अनीप्सिते विषादे विस्मये प्रत्ययं तथा पार्श्वावलोकने शून्ये प्रतिषेधे धुतं शिर: (भवेत्) |

अर्थ - अनिच्छा, विषाद, विस्मय, विश्वास, आजूबाजूला पाहणे (पार्श्वावलोकन), निर्जन स्थानी बघणे, निषेध इ. साठी 'धुत' शिराचा वापर करावा .

## ❖ विधुत शीर्षाचे विनियोग ❖

शीतग्रस्ते भयार्ते च त्रासिते ज्वरिते तथा |
पीतमात्रे तथा मद्ये विधुतं तु भवेच्छिर: ‖२५‖

पदच्छेद: - शीतग्रस्ते भयार्ते च त्रासिते ज्वरिते तथा |
पीतमात्रे तथा मद्ये विधुतं तु भवेत् शिर: ‖ २५ ‖

अन्वय: - शीतग्रस्ते भयार्ते त्रासिते ज्वरिते पीतमात्रे तथा मद्ये विधुतं शिर: भवेत् |

अर्थ - अत्यंत थंडी, भयाने पीडित होणे, त्रास, ताप येणे, मद्यपानाची प्रथम अवस्था इत्यादींमध्ये 'विधुत' शिराचा वापर करावा .

## ❖ परिवाहित आणि आधूत शीर्षाचे लक्षण ❖

पर्यायश: पार्श्वगतं शिर: स्यात्परिवाहितम् |
आधूतमुच्यते तिर्यक्सकृदुद्वाहितं तु यत् ‖२६‖

पदच्छेद :- पर्यायश : पार्श्वगतं शिर : स्यात् परिवाहितम् |
आधूतम् उच्यते तिर्यक् सकृत् उद्वाहितं तु यत् || २६ ||

अन्वय : - (यदा) शिर : पर्यायश : पार्श्वगतं (भवति तदा तत्) परिवाहितं स्यात् | यत् सकृत् तिर्यक् उद्वाहितं (भवति तदा तत् शिर :) आधूतम् उच्यते |

अर्थ - जेव्हा शीर्ष दोन्ही बाजूस क्रमश : झुकविले जाते तेव्हा 'परिवाहित' शिर होते आणि जेव्हा शीर्ष एकदाच तिरक्या दिशेने वर नेले जाते तेव्हा त्यास 'आधूत' शिर असे म्हटले जाते .

### ❖ परिवाहित शीर्षाचा विनियोग ❖

साधने विस्मये हर्षे स्मिते चामर्षिते तथा |
विचारे विहृते चैव लीलायां परिवाहितम् || २७ ||

पदच्छेद :- साधने विस्मये हर्षे स्मिते च अमर्षिते तथा |
विचारे विहृते च एव लीलायां परिवाहितम् || २७ ||

अन्वय : - साधने विस्मये हर्षे स्मिते अमर्षिते विचारे विहृते लीलायां च एव परिवाहितं (शिर : प्रयुज्यते) |

अर्थ - अभ्यास करताना, आश्चर्य व्यक्त करताना, प्रसन्न असताना, मंद हास्य करताना, क्रोधामध्ये, विचार करताना, प्रेमपूर्ण शब्द ऐकून लाजेने किंवा स्वभावामुळे सांगणे शक्य नसते तेव्हा, प्रेमभाव लपविताना (विहृत अवस्था) आणि तसेच लीलेमध्ये 'परिवाहित' शिराने अभिनय केला जातो .

### ❖ आधूत शीर्षाचा विनियोग ❖

गर्वेच्छादर्शने चैव पार्श्वस्थोर्ध्वनिरीक्षणे |
आधूतं तु शिरो ज्ञेयमात्मसम्भावनादिषु ||२८||

पदच्छेद :- गर्व-इच्छा-दर्शने च एव पार्श्वस्थ-ऊर्ध्व-निरीक्षणे |
आधूतं तु शिर : ज्ञेयम् आत्म-सम्भावन-आदिषु ||२८||

अन्वय : - गर्वेच्छादर्शने पार्श्वस्थ-ऊर्ध्वनिरीक्षणे आत्मसम्भावनादिषु आधूतं शिर : ज्ञेयम् |

अर्थ - गर्वाने इच्छा दर्शविताना, बाजूला आणि वरच्या दिशेस पाहताना, तसेच आत्मसन्मान दाखविताना 'आधूत' शिराचा वापर करावा .

### ❖ अवधूत शीर्षाचे लक्षण आणि विनियोग ❖

यदधः सकृदाक्षिप्तमवधूतं तु तच्छिरः |
सन्देशावाहनालापसंज्ञादिषु तदिष्यते ||२९||

पदच्छेदः - यत् अधः सकृत् आक्षिप्तम् अवधूतं तु तत् शिरः |
सन्देश-आवाहन-आलापसंज्ञादिषु तत् इष्यते || २९ ||

अन्वयः - यत् शिरः अथः सकृत् आक्षिप्तं (तदा) तत् अवधूतं (शिरः) | तत् सन्देश-आवाहन-आलाप-संज्ञादिषु इष्यते |

अर्थ - शीर्ष खालच्या बाजूस एकदा नेल्यास त्यास 'अवधूत' असे म्हटले जाते . त्याचा वापर बातमी देणे, आवाहन करणे, आलाप करणे आणि संकेत देण्यासाठी होतो .

### ❖ अंचित शीर्षाचे लक्षण आणि विनियोग ❖

किञ्चित्पार्श्वानतग्रीवं शिरो विज्ञेयमञ्चितम् |
व्याधिते मूर्च्छिते मत्ते सचिन्ते दु:खिते भवेत् || ३० ||

पदच्छेदः - किञ्चित् पार्श्व-आनतग्रीवं शिरः विज्ञेयम् अञ्चितम् |
व्याधिते मूर्च्छिते मत्ते सचिन्ते दु:खिते भवेत् || ३० ||

अन्वयः - (यदि) किञ्चित् पार्श्व-आनत-ग्रीवं (तदा तत्) अञ्चितं शिरः विज्ञेयम् | व्याधिते मूर्च्छिते मत्ते सचिन्ते दु:खिते भवेत् |

अर्थ - जेव्हा मानेला एका बाजूला झुकविले जाते तेव्हा त्यास 'अंचित' शीर्ष असे म्हणतात . आजारपणात, मूर्च्छेमध्ये, उन्मत्त अवस्थेत, चिंतेमध्ये आणि दु:खी असताना याचा वापर केला जातो .

### ❖ निहंचित शीर्षाचे लक्षण आणि विनियोग ❖

उत्क्षिप्तांसावसक्तं यत्कुञ्चितभूलतं मनाक् |
निहञ्चितं तु विज्ञेयं स्त्रीणामेतत्प्रयोजयेत् || ३१ ||
गर्वे माने विलासे च बिब्बोके किलकिञ्चिते |
मोट्टायिते कुट्टमिते स्तम्भे माने निहञ्चितम् || ३२ ||

पदच्छेद: - उत्क्षिप्त-अंस अवसक्तं यत् कुञ्चितभूलतं मनाक् |
निहञ्चितं तु विज्ञेयं स्त्रीणाम् एतत् प्रयोजयेत् || ३१ ||
गर्वे माने विलासे च बिब्बोके किलकिञ्चिते |
मोट्टायिते कुट्टमिते स्तम्भे माने निहञ्चितम् || ३२ ||

अन्वय: - यत् उत्क्षिप्तांसावसक्तं मनाक् कुञ्चितभूलतं (तत् शिर:)निहञ्चितम् (इति) विज्ञेयम् | स्त्रीणां गर्वे माने विलासे च बिब्बोके किलिकिञ्चिते मोट्टायिते कुट्टमिते स्तम्भे माने एतत् निहञ्चितं प्रयोजयेत् |

अर्थ - जेव्हा दोन्ही खांदे वरच्या बाजूस नेले जातात आणि मानेला खालच्या बाजूला संकुचित केले जाते तेव्हा त्यास 'निहंचित' शिर असे म्हणतात . स्त्रियांद्वारे निहंचिताचा वापर गर्व, विलास, बिब्बोक, किलकिंचित, मोट्टायित, कुट्टमित, स्तंभ तसेच मान दर्शविण्यासाठी केला जातो .

### ❖ परावृत्त शीर्षाचे लक्षण आणि विनियोग ❖

परावृत्तानुकरणात्परावृत्तमिहोच्यते |
तत्स्यान्मुखापहरणे पृष्ठत: प्रेक्षणादिषु || ३३ ||

पदच्छेद: - परावृत्त-अनुकरणात् परावृत्तम् इह उच्यते |
तत् स्यात् मुख-अपहरणे पृष्ठत: प्रेक्षणादिषु ||३३||

अन्वय: - परावृत्तानुकरणात् इह परावृत्तम् (इति) उच्यते | तत् मुखापहरणे पृष्ठत: प्रेक्षणादिषु (प्रयोज्यं) स्यात् |

अर्थ - जेव्हा शीर्ष मागच्या बाजूस फिरवले जाते तेव्हा त्यास 'परावृत्त' शिर म्हणतात . याचा वापर चेहरा फिरवण्यासाठी आणि मागच्या बाजूस पाहण्यासाठी केला जातो .

❖ उत्क्षिप्त शीर्षाचे लक्षण आणि विनियोग ❖

उत्क्षिप्तं चापि विज्ञेयमुन्मुखावस्थितं शिर: |
प्रांशुदिव्यास्त्रयोगेषु स्यादुत्क्षिप्तं प्रयोगत: ||३४||

पदच्छेद: - उत्क्षिप्तं च अपि विज्ञेयम् उन्मुख-अवस्थितं शिर: |
प्रांशुदिव्यास्त्रयोगेषु स्यात् उत्क्षिप्तं प्रयोगत: ||३४||

अन्वय: - उन्मुख-अवस्थितं शिर: उत्क्षिप्तं च विज्ञेयम् | उत्क्षिप्तं प्रयोगत: प्रांशुदिव्यास्त्रयोगेषु स्यात् |

अर्थ - जेव्हा शीर्ष वरच्या बाजूस नेले जाते त्यास 'उत्क्षिप्त' शिर असे म्हणतात . याचा उपयोग उंचावरची वस्तू पाहणे तसेच दिव्यास्त्राची प्राप्ती करण्यासाठी केला जातो .

❖ अधोगत शीर्षाची व्याख्या आणि विनियोग ❖

अधोमुखस्थितञ्चापि बुधा: प्राहुरधोगतम् |
लज्जायां च प्रणामे च दु:खे चाधोगतं शिर: || ३५ ||

पदच्छेद: - अधोमुखस्थितं च अपि बुधा: प्राहु: अधोगतम् |
लज्जायां च प्रणामे च दु:खे च अधोगतं शिर: || ३५ ||

अन्वय: - बुधा: अधोमुखस्थितम् अधोगतम् (इति) प्राहु: | लज्जायां प्रणामे दु:खे च अधोगतं शिर: (प्रयोक्तव्यम्) |

अर्थ - जेव्हा शीर्ष खालच्या बाजूस झुकविले जाते तेव्हा त्यास 'अधोगत' असे म्हणतात . लज्जा, प्रणाम करणे आणि दु:ख प्रकट करण्यासाठी याचा वापर करावा .

❖ लोलित शीर्षाची व्याख्या आणि विनियोग ❖

सर्वतो लोलनाच्चैव शिर: स्यात् परिलोलितम् |
मूर्च्छाव्याधिमदावेशग्रहनिद्रादिषु स्मृतम् || ३६ ||

पदच्छेद :- सर्वत: लोलनात् च एव शिर: स्यात् परिलोलितम्|
मूर्च्छा-व्याधि-मद-आवेश-ग्रह-निद्रा-आदिषु स्मृतम्|| ३६ ||

अन्वय : - सर्वत: लोलनात् एव परिलोलितं शिर: स्यात् | मूर्च्छा-व्याधि-मद-आवेश-ग्रह-निद्रा -आदिषु (एतत्) स्मृतम्|

अर्थ - जेव्हा शीर्ष सर्व बाजूंनी फिरवले जाते तेव्हा त्यास 'लोलित' शिर असे म्हणतात . मूर्च्छा, व्याधी, मद, आवेश, ग्रहांनी झपाटणे तसेच निद्रा इत्यादींमध्ये याचा विनियोग करावा .

❖ स्वभावज शीर्षाचे लक्षण आणि विनियोग ❖

[ऋजुस्वभावसंस्थानं प्राकृतं तु स्वभावजम् |
मङ्गल्याध्ययनध्यानस्वभावजयकर्मसु || ३७ ||]

पदच्छेद :- ऋजुस्वभावसंस्थानं प्राकृतं तु स्वभावजम्|
मङ्गल-अध्ययन-ध्यान-स्वभाव-जय-कर्मसु|| ३७||

अन्वय : - ऋजुस्वभावसंस्थानं प्राकृतं तु स्वभावजम्(शिर: इति उक्तम्)| मङ्गलाध्ययनध्यान स्वभावजयकर्मसु (एतत् प्रयोजनीयम्)|

अर्थ - नैसर्गिक अवस्थेत सरळ स्वभावाचे दर्शन घडविणारे शीर्ष म्हणजे 'स्वभावज' शीर्ष होय . याचा विनियोग मंगल कार्य, अध्ययन, ध्यान, स्वाभाविक कार्य आणि विजय यामध्ये करावा .

एभ्योऽन्ये बहवो भेदा लोकाभिनयसंश्रया: |
ते च लोकस्वभावेन प्रयोक्तव्या: प्रयोक्तृभि: || ३८ ||

पदच्छेद :- एभ्य: अन्ये बहव: भेदा: लोक-अभिनय-संश्रिता:|
ते च लोकस्वभावेन प्रयोक्तव्या: प्रयोक्तृभि:|| ३८||

अन्वय : - एभ्य: लोक-अभिनय-संश्रिता: अन्ये बहव: भेदा: (सन्ति) | ते च लोकस्वभावेन प्रयोक्तृभि: प्रयोक्तव्या:|

अर्थ - ह्याव्यतिरिक्त शीर्षाचे अनेक भेद होऊ शकतात, जे सामान्य लोकाभिनयावर आधारित

असू शकतात. त्याचा यथायोग्य उपयोग, प्रयोग लोकांच्या स्वभावानुसार केला पाहिजे.

❖ दृष्टींचे प्रकार आणि लक्षणे ❖

त्रयोदशविधं ह्येतच्छिर:कर्म मयोदितम्।
अत: परं प्रवक्ष्यामि दृष्टीनामपि लक्षणम् ॥३९॥

पदच्छेद :- त्रयोदशविधं हि एतत् शिर:कर्म मया उदितम्।
अत: परं प्रवक्ष्यामि दृष्टीनाम् अपि लक्षणम् ॥ ३९ ॥

अन्वय : - एतत् त्रयोदशविधं शिर:कर्म मया उदितम्। अत: परं दृष्टीनां लक्षणं प्रवक्ष्यामि।

अर्थ - याप्रकारे मी तेरा प्रकारांचे शिरोभेद सांगितले. यापुढे दृष्टीभेद व त्यांची लक्षणे सांगणार आहे.

❖ रसदृष्टी ❖

कान्ता भयानका हास्या करुणा चाद्भुता तथा।
रौद्री वीरा च बीभत्सा विज्ञेया रसदृष्टय: ॥ ४० ॥

पदच्छेद :- कान्ता भयानका हास्या करुणा च अद्भुता तथा।
रौद्री वीरा च बीभत्सा विज्ञेया: रसदृष्टय: ॥ ४० ॥

अन्वय : - दृष्टिभेदा: - कान्ता भयानका हास्या करुणा अद्भुता रौद्री वीरा बीभत्सा च रसदृष्टय: विज्ञेया:।

अर्थ - कांता, भयानका, हास्या, करुणा, अद्भुता, रौद्री, वीरा तसेच बीभत्सा या रसांना अभिव्यक्त करणाऱ्या आठ रसदृष्टी जाणून घ्याव्यात.

❖ स्थायिभावदृष्टी ❖

स्निग्धा हृष्टा च दीना च क्रुद्धा दृप्ता भयान्विता।
जुगुप्सिता विस्मिता च स्थायिभावेषु दृष्टय: ॥ ४१ ॥

पदच्छेद : - स्निग्धा हृष्टा च दीना च क्रुद्धा दृप्ता भय-अन्विता ।
जुगुप्सिता विस्मिता च स्थायिभावेषु दृष्टय : ॥ ४१ ॥

अन्वय : - स्निग्धा दृष्टा दीना क्रुद्धा दृप्ता भयान्विता जुगुप्सिता विस्मिता च स्थायिभावेषु दृष्टय : (सन्ति) ।

अर्थ - स्निग्धा, हृष्टा, दीना, क्रुद्धा, दृप्ता, भयान्विता, जुगुप्सिता तसेच विस्मिता या स्थायीभावांना अभिव्यक्त करणाऱ्या आठ दृष्टी होत .

❖ व्यभिचारीभावदृष्टी ❖

शून्या च मलिना चैव श्रान्ता लज्जान्विता तथा ।
ग्लाना च शङ्किता चैव विषण्णा मुकुला तथा ॥ ४२ ॥
कुञ्चिता चाभितप्ता च जिह्मा सललिता तथा ।
वितर्किताऽर्धमुकुला विभ्रान्ता विप्लुता तथा ॥ ४३ ॥
आकेकरा विकोशा च त्रस्ता च मदिरा तथा ।
षट्त्रिंशद्दृष्टयो ह्येता नामतोऽभिहिता मया ॥ ४४ ॥

पदच्छेद : - शून्या च मलिना च एव श्रान्ता लज्जा-अन्विता तथा ।
ग्लाना च शङ्किता च एव विषण्णा मुकुला तथा ॥ ४२ ॥
कुञ्चिता च अभितप्ता च जिह्मा सललिता तथा ।
वितर्किता अर्धमुकुला विभ्रान्ता विप्लुता तथा ॥ ४३ ॥
आकेकरा विकोशा च त्रस्ता च मदिरा तथा ।
षट्त्रिंशत् दृष्टय : हि एता : नामत : अभिहिता : मया ॥ ४४ ॥

अन्वय : - शून्या मलिना श्रान्ता लज्जा-अन्विता ग्लाना, शङ्किता, विषण्णा, मुकुला, कुञ्चिता, अभितप्ता, जिह्मा, सललिता, वितर्किता, अर्धमुकुला, विभ्रान्ता, विप्लुता, आकेकरा, विकोशा, त्रस्ता, मदिरा च (एता: व्यभिचारिभावेषु विंशति: दृष्टय: सन्ति । एवम् आहत्य) एता : षट्त्रिंशत् दृष्टय : नामत : मया अभिहिता : ।

अर्थ - शून्या, मलिना, श्रांता, लज्जान्विता, ग्लाना, शंकिता, विषण्णा, मुकुला, कुंचिता,

अभितप्ता, जिह्मा, ललिता, विर्तकिता, अर्धमुकुला, विभ्रांता, विप्लुता, आकेकरा, विकोशा, त्रस्ता, मदिरा अशा २० व्यभिचारी भाव दृष्टी आहेत. अशा प्रकारे, रस आणि भावांच्या सर्व दृष्टी मिळून एकूण ३६ दृष्टींची नावे मी येथे सांगितली आहेत.

### ❖ रसदृष्टींची लक्षणे ❖

अस्य दृष्टिविधानस्य नानाभावरसाश्रयम् ।
लक्षणं सम्प्रवक्ष्यामि यथाकर्म प्रयोगतः ॥ ४५ ॥

पदच्छेदः - अस्य दृष्टिविधानस्य नानाभावरस-आश्रयम् ।
लक्षणं सम्प्रवक्ष्यामि यथाकर्म प्रयोगतः ॥ ४५ ॥

अन्वयः - अस्य दृष्टिविधानस्य नानाभावरसाश्रयं यथाकर्म प्रयोगतः लक्षणं सम्प्रवक्ष्यामि ।

अर्थ - आता मी या दृष्टींचे विविध रस आणि भावांवर आधारित कर्मे आणि प्रयोगावर आधारित त्यांची लक्षणे सांगतो.

### ❖ शृंगारदृष्टी ❖

हर्षप्रसादजनिता कान्तात्यर्थं समन्मथा ।
सभ्रूक्षेपकटाक्षा च शृङ्गारे दृष्टिरिष्यते ॥४६॥

पदच्छेदः - हर्षप्रसादजनिता कान्ता अत्यर्थं समन्मथा ।
सभ्रूक्षेपकटाक्षा च शृङ्गारे दृष्टिः इष्यते ॥४६॥

अन्वयः - हर्षप्रसादजनिता अत्यर्थं समन्मथा सभ्रूक्षेपकटाक्षा च कान्ता दृष्टिः (या) शृङ्गारे इष्यते ।

अर्थ - हर्ष व प्रसन्नता यांपासून निर्माण होणारी, कामाने अत्यंत आतुर झालेली, भ्रूक्षेप आणि कटाक्षांसह असलेली 'कांता' दृष्टी होय, जिचा वापर शृंगाररसामध्ये करावा.

### ❖ भीतादृष्टी ❖

प्रोद्वृत्तनिष्टब्धपुटा स्फुरदुद्वृत्ततारका ।
दृष्टिर्भयानकात्यर्थं भीता ज्ञेया भयानके ॥ ४७ ॥

पदच्छेद :- प्रोद्वृत्तनिष्टब्धपुटा स्फुरत्-उद्वृत्ततारका |
दृष्टि : भयानका अत्यर्थ भीता ज्ञेया भयानके || ४७ ||

अन्वय : - प्रोद्वृत्तनिष्टब्धपुटा स्फुरत्-उद्वृत्ततारका अत्यर्थ भीता (सा) भयानका दृष्टि: भयानके ज्ञेया |

अर्थ - जेव्हा पापण्या वरच्या बाजूस स्थिर असतात आणि बुबुळे चंचल असतात, ती अत्यंत भय दर्शविणारी 'भयानका दृष्टी' भयानक रसामध्ये वापरतात .

### ❖ हास्यादृष्टी ❖

क्रमादाकुञ्चितपुटा सविभ्रान्ताल्पतारका |
हास्या दृष्टिस्तु कर्तव्या कुहकाभिनयं प्रति ||४८||

पदच्छेद :- क्रमात् आकुञ्चितपुटा सविभ्रान्ता अल्पतारका |
हास्या दृष्टि : तु कर्तव्या कुहक-अभिनयं प्रति ||४८||

अन्वय : - क्रमात् आकुञ्चितपुटा सविभ्रान्ताल्पतारका हास्या दृष्टि : तु कुहकाभिनयं प्रति कर्तव्या |

अर्थ - जेव्हा पापण्या क्रमाने आकुंचित केलेल्या असतात, बुबुळे चंचल आणि किंचित दिसणारी असतात, तेव्हा होणारी हास्या दृष्टी ही कुहक (जादू करणे-हसविणे) इत्यादी अभिनयात वापरली जाते .

### ❖ करुणादृष्टी ❖

पतितोर्ध्वपुटा साश्रा मन्युमन्थरतारका |
नासाग्रानुगता दृष्टि: करुणा करुणे रसे ||४९||

पदच्छेद :- पतित-ऊर्ध्वपुटा स-अश्रा मन्यु-मन्थर-तारका |
नासाग्र-अनुगता दृष्टि : करुणा करुणे रसे ||४९||

अन्वय : - पतित-ऊर्ध्वपुटा साश्रा मन्युमन्थरतारका नासाग्र-अनुगता करुणा दृष्टि: करुणे रसे भवति |

अर्थ - वरची पापणी सैल टाकून खाली पडलेली असते, डोळ्यामध्ये अश्रू असतात, क्रोध किंवा

शोकामुळे बुबुळे शिथिल असतात, दृष्टी नाकाच्या टोकावर केंद्रित केलेली असते, ती 'करुणा दृष्टी' करुण रसामध्ये वापरली जाते .

### ❖ अद्‌भुतादृष्टी ❖

या त्वाकुञ्चितपक्ष्माग्रा साश्चर्योद्वृत्ततारका |
सौम्या विकसितान्ता च साद्‌भुता दृष्टिरद्‌भुते || ५० ||

पदच्छेद : - या तु आकुञ्चित-पक्ष्म-अग्रा साश्चर्य-उद्वृत्ततारका |
सौम्या विकसितान्ता च सा अद्‌भुता दृष्टि : अद्‌भुते || ५० ||

अन्वय : - या तु आकुञ्चितपक्ष्माग्रा साश्चर्योद्वृत्ततारका सौम्या विकसितान्ता च सा अद्‌भुता दृष्टि : अद्‌भुते (योजनीया) |

अर्थ - पापण्यांचा अग्रभाग थोडासा आकुंचित झालेला असतो, आश्चर्याने बुबुळे उद्वृत्त झालेली असतात, डोळे किंचित सौम्यरीत्या विकसित झालेले असतात, ती 'अद्‌भुता दृष्टी' अद्‌भुत रसामध्ये वापरली जाते .

### ❖ रौद्रीदृष्टी ❖

क्रूरा रुक्षारुणोद्‌वृत्ता निष्टब्धपुटतारका |
भ्रुकुटीकुटिला दृष्टी रौद्री रौद्ररसे स्मृता || ५१ ||

पदच्छेद : - क्रूरा रुक्ष-अरुण-उद्वृत्ता निष्टब्ध-पुटतारका |
भ्रुकुटी-कुटिला दृष्टि : रौद्री रौद्ररसे स्मृता || ५१ ||

अन्वय : - क्रूरा रुक्ष-अरुण-उद्वृत्ता निष्टब्ध-पुटतारका भ्रुकुटीकुटिला रौद्री दृष्टि : रौद्ररसे स्मृता |

अर्थ - जी दृष्टी क्रूर असते, डोळे रूक्ष आणि लाल असतात, पापण्या व बुबुळे स्थिर असतात, भुवया वक्र असतात ती 'रौद्री दृष्टी' रौद्र रसामध्ये वापरतात .

### ❖ वीरादृष्टी ❖

दीप्ता विकसिता क्षुब्धा गम्भीरा समतारका |
उत्फुल्लमध्या दृष्टिस्तु वीरा वीररसाश्रया || ५२ ||

पदच्छेद : - दीप्ता विकसिता क्षुब्धा गम्भीरा समतारका |
उत्फुल्लमध्या दृष्टि : तु वीरा वीररसाश्रया ॥ ५२ ॥

अन्वय : - दीप्ता विकसिता क्षुब्धा गम्भीरा समतारका उत्फुल्लमध्या वीरा दृष्टि: तु वीररसाश्रया (भवति) |

अर्थ - तेजस्वी, संपूर्णपणे विकसित, उत्साहित, गंभीर, समान बुबुळे आणि डोळ्यांचा मध्यभाग मोठा असणे, ती 'वीरा दृष्टी' होय जी वीर रसामध्ये वापरतात .

❖ बीभत्सादृष्टी ❖

निकुञ्चितपुटापाङ्गा घूर्णोपप्लुततारका |
संश्लिष्टस्थिरपक्ष्मा च बीभत्सा दृष्टिरिष्यते ॥ ५३ ॥

पदच्छेद : - निकुञ्चित-पुट-अपाङ्गा घूर्ण-उपप्लुत-तारका |
संश्लिष्ट-स्थिर-पक्ष्मा च बीभत्सा दृष्टि : इष्यते ॥ ५३ ॥

अन्वय : - निकुञ्चितपुटापाङ्गा घूर्णोपप्लुततारका संश्लिष्टस्थिरपक्ष्मा च बीभत्सा दृष्टि: इष्यते |

अर्थ - नेत्रकटाक्ष पापण्यांनी जवळजवळ झाकलेले असतात, बुबुळे फिरणारे व चंचल असतात, पापण्या स्थिर आणि एकमेकांच्या अत्यंत जवळ असतात ती 'बीभत्सा दृष्टी' (बीभत्सरसामध्ये वापरतात) .

❖ शांतादृष्टी ❖

[नासाग्रसक्तानिमिषा तथाधोभागचारिणी |
आकेकरपुटा चैव शान्ता दृष्टिर्भवेदसौ ॥ ५४ ॥]

पदच्छेद : - नासाग्र-सक्ता अनिमिषा तथा अधोभाग-चारिणी |
आकेकर-पुटा च एव शान्ता दृष्टि : भवेत् असौ ॥ ५४ ॥

अन्वय : - नासाग्रसक्ता अनिमिषा तथा अधोभागचारिणी आकेकरपुटा च (तदा)असौ शान्ता दृष्टि : भवेत् |

अर्थ - नाकाच्या अग्रभागावर केंद्रित असलेली, एकटक असणारी, खालच्या बाजूला बघणारी आणि पापण्या आकेकर स्थितीमध्ये असलेली दृष्टी ही 'शांता दृष्टी' होय जी (शांतरसामध्ये वापरतात) .

❖ स्थायिभावदृष्टी ❖

रसजा दृष्टयो ह्येता विज्ञेया लक्षणान्विता: |
अत: परं प्रवक्ष्यामि स्थायिभावसमाश्रया: ‖ ५५ ‖

पदच्छेद: - रसजा: दृष्टय: हि एता: विज्ञेया: लक्षण-अन्विता: |
अत: परं प्रवक्ष्यामि स्थायिभाव-समाश्रया: ‖ ५५ ‖

अन्वय: - रसजा: एता: दृष्टय: लक्षण-अन्विता: विज्ञेया: | अत: परं स्थायिभाव-समाश्रया: (दृष्टय:) प्रवक्ष्यामि |

अर्थ - रसाशी संबंधित लक्षणांनी युक्त अशा या दृष्टी जाणून घ्याव्यात. यापुढे मी स्थायीभावांशी संबंधित दृष्टींची लक्षणे सांगतो .

❖ स्निग्धादृष्टी ❖

व्याकोशमध्या मधुरा स्थितताराभिलाषिणी |
सानन्दभ्रूलता दृष्टि: स्निग्धेयं रतिभावजा ‖ ५६ ‖

पदच्छेद: - व्याकोश-मध्या मधुरा स्थिततारा-अभिलाषिणी |
सानन्द-भ्रूलता दृष्टि: स्निग्धा इयं रतिभावजा ‖ ५६ ‖

अन्वय: - व्याकोशमध्या मधुरा स्थितताराभिलाषिणी सानन्दभ्रूलता इयं रतिभावजा स्निग्धा दृष्टि: |

अर्थ - ज्या दृष्टीमध्ये डोळे थोडेसे विकसित असतात,आकर्षकता असते, बुबुळे हसरी असून स्थिर असतात, आनंदाश्रू असतात ती 'स्निग्धा दृष्टी' रती या स्थायी भावापासून निर्माण होते त्यामुळे तिचा रती या स्थायी भावामध्ये प्रयोग करावा .

### ❖ हृष्टादृष्टी ❖

चला हसितगर्भा च विशत्तारानिमेषिणी |
किञ्चिदाकुञ्चिता हृष्टा दृष्टिर्हासे प्रकीर्तिता ‖ ५७ ‖

पदच्छेद : - चला हसितगर्भा च विशत्तारा-निमेषिणी |
किञ्चित् आकुञ्चिता हृष्टा दृष्टि : हासे प्रकीर्तिता ‖ ५७ ‖

अन्वय : - चला हसितगर्भा विशत्तारानिमेषिणी किञ्चित् आकुञ्चिता हृष्टा दृष्टि : हासे प्रकीर्तिता |

अर्थ - जी दृष्टी चंचल असते, हसणे हा जिचा आत्मा आहे, बुबुळे संपूर्णपणे दृष्टीपथात येत नाहीत . नेत्र थोडे आकुंचित केले जातात, ती 'हृष्टा दृष्टी' हास या स्थायी भावामध्ये वापरली जाते .

### ❖ दीनादृष्टी ❖

ईषत्स्रष्टोत्तरपुटा रुद्धतारा जलाविला |
मन्दसञ्चारिणी दीना सा शोके दृष्टिरुच्यते [?रिष्यते] ‖ ५८ ‖

पदच्छेद : - ईषत् स्रष्ट-उत्तरपुटा रुद्धतारा जलाविला |
मन्दसञ्चारिणी दीना सा शोके दृष्टि : उच्यते [?इष्यते] ‖ ५८ ‖

अन्वय : - ईषत्स्रष्टोत्तरपुटा रुद्धतारा जलाविला मन्दसञ्चारिणी सा दीना दृष्टि: शोके उच्यते [?इष्यते] |

अर्थ - वरची पापणी किंचित खालच्या बाजूला झुकलेली असते, बुबुळे किंचित झाकलेली असतात , जी अत्यंत हळू संचार करीत असते ती 'दीना दृष्टी' शोक या स्थायीभावामध्ये वापरतात .

### ❖ क्रुद्धादृष्टी ❖

रुक्षा स्थिरोद्वृत्तपुटा निष्टब्धोद्वृत्ततारका |
कुटिलभुकुटी दृष्टि: क्रुद्धा क्रोधे विधीयते ‖ ५९ ‖

पदच्छेद :- रुक्षा स्थिरोद्वृत्त-पुटा निष्टब्ध-उद्वृत्ततारका |
कुटिल-भ्रुकुटी दृष्टि : क्रुद्धा क्रोधे विधीयते || ५९ ||

अन्वय : - रुक्षा स्थिरोद्वृत्तपुटा निष्टब्धोद्वृत्ततारका कुटिलभ्रुकुटी क्रुद्धा दृष्टि : क्रोधे विधीयते |

अर्थ - जी दृष्टी स्नेहशून्य असते पापण्या स्थिर असून वरच्या बाजूला वळलेल्या असतात. बुबुळे स्थिर आणि वरच्या बाजूला फिरणारी असतात आणि भुवया वक्र असतात ती 'क्रुद्धा दृष्टी' क्रोधामध्ये वापरतात.

❖ दृप्तादृष्टी ❖

संस्थिते तारके यस्याः स्थिता विकसिता तथा |
सत्त्वमुद्गिरती दृप्ता दृष्टिरुत्साहसम्भवा || ६० ||

पदच्छेद :- संस्थिते तारके यस्या : स्थिता विकसिता तथा |
सत्त्वम् उद्गिरती दृप्ता दृष्टि : उत्साहसम्भवा || ६० ||

अन्वय : - संस्थिते तारके यस्याः स्थिता विकसिता तथा सत्त्वम् उद्गिरती दृप्ता दृष्टिः उत्साहसम्भवा (अस्ति)|

अर्थ - जिच्यामध्ये बुबुळे स्थिर असतात, नेत्र स्थिर व विकसित असतात आणि जी सत्त्वाला व्यक्त करते, ती 'दृप्ता दृष्टी' उत्साहामध्ये वापरतात.

❖ भयान्वितादृष्टी ❖

विस्फारितोभयपुटा भयकम्पिततारका |
निष्क्रान्तमध्या दृष्टिस्तु भयभावे भयान्विता || ६१ ||

पदच्छेद :- विस्फारित-उभयपुटा भयकम्पित-तारका |
निष्क्रान्त-मध्या दृष्टि : तु भयभावे भयान्विता || ६१ ||

अन्वय : - विस्फारितोभयपुटा भयकम्पिततारका निष्क्रान्तमध्या भयान्विता दृष्टिः तु भयभावे (योजनीया) |

अर्थ - दोन्ही पापण्या संपूर्ण उघडलेल्या (विस्फारित)असतात, बुबुळे भयाने थरथर कापत असतात आणि डोळ्याचा मध्यभाग बाहेर आलेला असतो अशी ही 'भयान्विता दृष्टी' भय या स्थायीभावामध्ये वापरतात .

### ❖ जुगुप्सितादृष्टी ❖

संकोचितपुटाक्षामा दृष्टिर्मीलिततारका |
पक्ष्मोद्देशात्समुद्विग्ना जुगुप्सायां जुगुप्सिता || ६२ ||

पदच्छेद :- संकोचित-पुटाक्षामा दृष्टि : मीलित-तारका |
पक्ष्म-उद्देशात् समुद्विग्ना जुगुप्सायां जुगुप्सिता || ६२ ||

अन्वय : - संकोचितपुटाक्षामा मीलिततारका पक्ष्मोद्देशात् समुद्विग्ना जुगुप्सिता दृष्टि: जुगुप्सायां (प्रयोक्तव्या)|

अर्थ - ज्या दृष्टीमध्ये पापण्या संकुचित केलेल्या असतात, बुबुळे झाकलेली असतात, पापण्या लक्ष्यस्थानापासून परावृत्त होतात ती 'जुगुप्सिता दृष्टी' जुगुप्सा या स्थायीभावामध्ये वापरली जाते .

### ❖ विस्मितादृष्टी ❖

भृशमुद्वृत्ततारा च हृष्टोभयपुटाञ्चिता | [?पुटान्विता] [श्रमण्डम्]
समा विकसिता दृष्टिर्विस्मिता विस्मये स्मृता || ६३ ||

पदच्छेद :- भृशम् उद्वृत्ततारा च हृष्ट-उभयपुट-अन्विता |
समा विकसिता दृष्टि : विस्मिता विस्मये स्मृता || ६३ ||

अन्वय : - भृशम् उद्वृत्ततारा हृष्ट-उभयपुट-अन्विता समा विकसिता विस्मिता दृष्टि : विस्मये स्मृता |

अर्थ - ज्या दृष्टीमध्ये बुबुळे तेजस्वी आणि वरच्या बाजूला वळलेली असतात . दोन्ही पापण्या स्थिर असतात . अशी सम, पण विकसित असलेली 'विस्मिता दृष्टी' 'विस्मय' या स्थायी भावामध्ये वापरली जाते .

### ❖ व्यभिचारिभावदृष्टी ❖

स्थायिभावाश्रया ह्येता विज्ञेया: दृष्टयो बुधै: |
सञ्चारिणीनां दृष्टीनां संप्रवक्ष्यामि लक्षणम् || ६४ ||

पदच्छेद: - स्थायिभाव-आश्रया: हि एता: विज्ञेया: दृष्टय: बुधै: |
सञ्चारिणीनां दृष्टीनां संप्रवक्ष्यामि लक्षणम् || ६४ ||

अन्वय: - एता: स्थायिभाव-आश्रया: दृष्टय: बुधै: विज्ञेया: | (अधुना) सञ्चारिणीनां दृष्टीनां लक्षणं संप्रवक्ष्यामि |

अर्थ - या सर्व दृष्टी स्थायीभावात आहेत आता संचारिभावामध्ये वापरल्या जाणाऱ्या दृष्टींची लक्षणे सांगतो .

### ❖ शून्यादृष्टी ❖

समतारा समपुटा निष्कम्पा शून्यदर्शना |
बाह्यार्थाग्राहिणी क्षामा शून्यादृष्टि: प्रकीर्तिता || ६५ ||

पदच्छेद: - समतारा समपुटा निष्कम्पा शून्यदर्शना |
बाह्यार्थाग्राहिणी क्षामा शून्यादृष्टि: प्रकीर्तिता || ६५ ||

अन्वय: - समतारा समपुटा निष्कम्पा शून्यदर्शना बाह्यार्थाग्राहिणी क्षामा (सा) शून्यादृष्टि: प्रकीर्तिता |

अर्थ - सम बुबुळे आणि सम पापण्या असलेली, स्थिर असलेली, शून्यात हरवून गेलेली आणि बाह्य विषय ग्रहण न करणारी, अशक्त जी दृष्टी तिला 'शून्या दृष्टी' असे म्हटले आहे .

### ❖ मलिनादृष्टी ❖

प्रस्पन्दमानपक्ष्माग्रा नात्यर्थमुकुलै: पुटै: |
मलिनान्ता च मलिना दृष्टिर्विस्मिततारका || ६६ ||

पदच्छेद: - प्रस्पन्दमान-पक्ष्म-अग्रा न अत्यर्थमुकुलै: पुटै: |
मलिनान्ता मलिना दृष्टि: विस्मिततारका || ६६ ||

अन्वय: - प्रस्पन्दमानपक्ष्माग्रा न अत्यर्थमुकुलै: पुटै: मलिनान्ता विस्मिततारका (सा) मलिना दृष्टि:|

अर्थ - ज्या दृष्टीमध्ये पापण्यांच्या केसांची टोके कंपित होतात, पापण्या अत्यंत संकुचित नसतात, डोळे कडेला मलीन झालेले असतात, बुबुळे तेजोहीन असतात, ती 'मलीना दृष्टी' होय .

❖ श्रांतादृष्टी ❖

श्रमात्प्रम्लापितपुटा क्षामा कुञ्चितलोचना |
सन्ना पतिततारा च श्रान्ता दृष्टि: प्रकीर्तिता || ६७ ||

पदच्छेद: - श्रमात् प्रम्लापितपुटा क्षामा कुञ्चितलोचना |
सन्ना पतिततारा च श्रान्ता दृष्टि: प्रकीर्तिता || ६७ ||

अन्वय: - श्रमात् प्रम्लापितपुटा क्षामा कुञ्चितलोचना सन्ना पतिततारा च (सा) श्रान्ता दृष्टि: प्रकीर्तिता|

अर्थ - अतिश्रमामुळे डोळ्यांच्या पापण्या या अगदी सैलपणे खालच्या दिशेला वळलेल्या असतात, डोळे टोकाला आकुंचित झालेले असतात, बुबुळे स्तब्ध असून खालच्या बाजूला वळलेली असतात ती 'श्रांता दृष्टी' असते .

❖ लज्जान्वितादृष्टी ❖

किञ्चिदञ्चितपक्ष्माग्रा पतितोर्ध्वपुटाह्रिया |
त्रपाधोगततारा च दृष्टिर्लज्जान्विता तु सा || ६८ ||

पदच्छेद: - किञ्चित् अञ्चित-पक्ष्माग्रा पतित-ऊर्ध्वपुटा-ह्रिया |
त्रपा-अधोगततारा च दृष्टि: लज्जान्विता तु सा || ६८ ||

अन्वय: - किञ्चित् अञ्चितपक्ष्माग्रा पतितोर्ध्वपुटाह्रिया त्रपाधोगततारा सा लज्जान्विता तु दृष्टि:|

अर्थ - ज्या दृष्टीमध्ये पापण्यांचे केस किंचित वळलेले असतात, लज्जेने वरची पापणी झुकलेली असते, बुबुळे लाजेने खाली वाकलेले असतात ती 'लज्जान्विता दृष्टी' असते .

### ❖ ग्लानादृष्टी ❖

ग्लानभ्रूपुटपक्ष्मा या शिथिला मन्दचारिणी |
क्लमप्रवृष्टतारा च ग्लाना दृष्टिस्तु सा स्मृता || ६९ ||

पदच्छेद : - ग्लान-भ्रू-पुट-पक्ष्मा या शिथिला मन्दचारिणी |
क्लम-प्रवृष्ट-तारा च ग्लाना दृष्टि: तु सा स्मृता || ६९ ||

अन्वय : - या ग्लानभ्रूपुटपक्ष्मा शिथिला मन्दचारिणी क्लमप्रवृष्टतारा च सा तु ग्लाना दृष्टि: (इति) स्मृता |

अर्थ - ज्या दृष्टीमध्ये भुवया आणि पापण्या शिथिल आणि सैल असून अत्यंत हळू संचार करतात, श्रमामुळे बुबुळे आत गेलेली असतात ती 'ग्लाना दृष्टी' असते .

### ❖ शंकितादृष्टी ❖

किञ्चिच्चला स्थिरा किञ्चिदुद्गता तिर्यगायता |
गूढा चकिततारा च शङ्किता दृष्टिरिष्यते || ७० ||

पदच्छेद : - किञ्चित् चला स्थिरा किञ्चित् उद्गता तिर्यक्-आयता |
गूढा चकिततारा च शङ्किता दृष्टि: इष्यते || ७० ||

अन्वय : - किञ्चित् चला स्थिरा किञ्चित् उद्गता तिर्यक् आयता गूढा चकिततारा च (एषा) शङ्किता दृष्टि: इष्यते |

अर्थ - ज्या दृष्टीमध्ये जराशी चंचलता व जरासे स्थैर्य असते, थोडीशी वर उचलेली असते आणि किंचित तिरकस विकसित झालेली असते, जिच्यामध्ये बुबुळे गूढ आणि चकित असतात ती 'शंकिता दृष्टी' असते .

### ❖ विषादिनीदृष्टी ❖

विषादविस्तीर्णपुटा पर्यस्तान्ता निमेषिणी |
किञ्चिन्निष्टब्धतारा च कार्या दृष्टिर्विषादिनी || ७१ ||

पदच्छेद : - विषादविस्तीर्णपुटा पर्यस्तान्ता निमेषिणी ।
किञ्चित् निष्टब्धतारा च कार्या दृष्टि : विषादिनी ॥ ७१ ॥

अन्वय : - विषादविस्तीर्णपुटा पर्यस्तान्ता निमेषिणी किञ्चित् निष्टब्धतारा च (सा) विषादिनी दृष्टि : कार्या ।

अर्थ - ज्या दृष्टीमध्ये पापण्या विषादाने खूप विस्तीर्ण असतात, डोळे मिटलेले असतात आणि बुबुळे किंचित स्तब्ध असतात ती 'विषादिनी दृष्टी' असते .

### ❖ मुकुलादृष्टी ❖

स्फुरिताश्लिष्टपक्ष्मार्धा मुकुलोर्ध्वपुटाञ्चिता ।
सुखोन्मीलिततारा च मुकुला दृष्टिरिष्यते ॥ ७२ ॥

पदच्छेद : - स्फुरित-आश्लिष्ट-पक्ष्मार्धा मुकुल-ऊर्ध्वपुट-अञ्चिता ।
सुख-उन्मीलित-तारा च मुकुला दृष्टि : इष्यते ॥ ७२ ॥

अन्वय : - स्फुरिताश्लिष्टपक्ष्मार्धा मुकुल-ऊर्ध्वपुट-अञ्चिता सुख-उन्मीलिततारा च मुकुला दृष्टि : इष्यते ।

अर्थ - अर्धविकसित आणि जुळलेल्या पापण्या थरथरणाऱ्या असतात, वरची पापणी कळीप्रमाणे झुकलेली असते, सुखामुळे बुबुळे थोडीशी उघडलेली असतात, ती 'मुकुला दृष्टी' असते .

### ❖ कुंचितादृष्टी ❖

आनिकुञ्चितपक्ष्माग्रा पुटैराकुञ्चितैस्तथा ।
सन्निकुञ्चिततारा च कुञ्चिता दृष्टिरिष्यते ॥ ७३ ॥

पदच्छेद : - आनिकुञ्चित-पक्ष्माग्रा पुटै : आकुञ्चितै : तथा ।
सन्निकुञ्चित-तारा च कुञ्चिता दृष्टि : इष्यते ॥ ७३ ॥

अन्वय : - आनिकुञ्चितपक्ष्माग्रा पुटै : आकुञ्चितै : तथा सन्निकुञ्चिततारा च कुञ्चिता दृष्टि : इष्यते ।

अर्थ - ज्या दृष्टीमध्ये पापण्या संकुचित झाल्यामुळे पापण्यांचे केस किंचित खाली वळलेले असतात, बुबुळे सुद्धा किंचित आकुंचित झालेली असतात ती 'कुंचिता दृष्टी' असते .

### ❖ अभितप्तादृष्टी ❖

मन्दायमानतारा या पुटैः प्रचलितैस्तथा |
सन्तापोपप्लुता दृष्टिरभितप्ता तु सव्यथा || ७४ ||

पदच्छेदः - मन्दायमान-तारा या पुटैः प्रचलितैः तथा |
सन्ताप-उपप्लुता दृष्टिः अभितप्ता तु सव्यथा || ७४ ||

अन्वयः - या मन्दायमानतारा प्रचलितैः पुटैः सन्तापोपप्लुता तथा सव्यथा (सा) तु अभितप्ता दृष्टिः |

अर्थ - ज्या दृष्टीमध्ये पापण्यांच्या हालचालींमुळे बुबुळे सुद्धा हळूहळू संचार करतात . तसेच तीव्र संताप आणि व्यथा व्यक्त करतात . ती 'अभितप्ता दृष्टी' असते .

### ❖ जिह्मादृष्टी ❖

लम्बिता कुञ्चितपुटा शनैस्तिर्यङ्निरीक्षणा | [?क्षिणी]
निगूढा गूढतारा च जिह्मा दृष्टिरुदाहृता || ७५ ||

पदच्छेदः - लम्बिता कुञ्चितपुटा शनैः तिर्यङ्निरीक्षणा |
निगूढा गूढतारा च जिह्मा दृष्टिः उदाहृता || ७५ ||

अन्वयः - लम्बिता कुञ्चितपुटा शनैः तिर्यङ्निरीक्षणा निगूढा गूढतारा च (सा) जिह्मा दृष्टिः उदाहृता |

अर्थ - ज्यामध्ये लांब आणि कुंचित पापण्या असतात आणि दृष्टी हळूच तिरक्या नजरेने पाहते . दृष्टी गुप्तता सांगणारी असते आणि बुबुळे गूढरहस्यमय असतात ती 'जिह्मा दृष्टी' असते

## ❖ ललितादृष्टी ❖

मधुरा कुञ्चितान्ता च सभ्रूक्षेपा च सस्मिता |
समन्मथविकारा च दृष्टि: सा ललिता स्मृता || ७६ ||

पदच्छेद: - मधुरा कुञ्चितान्ता च सभ्रूक्षेपा च सस्मिता |
समन्मथविकारा च दृष्टि: सा ललिता स्मृता || ७६ ||

अन्वय: - मधुरा कुञ्चितान्ता सभ्रूक्षेपा सस्मिता समन्मथविकारा च सा दृष्टि: ललिता (इति) स्मृता |

अर्थ - जी दृष्टी मधुर असते, डोळे टोकाला आकुंचित केलेले असतात, याच्या जोडीला चेहऱ्यावर स्मित असते व भुवयांच्या हालचाली असतात व जी कामविकार सूचित करते ती 'ललिता दृष्टी' असते .

## ❖ वितर्कितादृष्टी ❖

वितर्कोद्वर्तितपुटा तथैवोत्फुल्लतारका |
अधोगतविचारा च दृष्टिरिष्टा वितर्किता || ७७ ||

पदच्छेद: - वितर्क-उद्वर्तित-पुटा तथा एव उत्फुल्लतारका |
अधोगत-विचारा च दृष्टि: इष्टा वितर्किता || ७७ ||

अन्वय: - वितर्क-उद्वर्तितपुटा उत्फुल्लतारका अधोगतविचारा च (सा) वितर्किता दृष्टि: इष्टा |

अर्थ - ज्या दृष्टीमध्ये तर्कवितर्क करण्यासाठी पापण्या वरच्या बाजूला वळलेल्या असतात, बुबुळे संपूर्णपणे विकसित व दृष्टी खालच्या बाजूला संचार करणारी असते, ती 'वितर्किता दृष्टी' असते .

## ❖ अर्धमुकुलादृष्टी ❖

अर्धव्याकोशपक्ष्मा च ह्लादार्धमुकुलै पुटै: |
स्मितार्धमुकुला दृष्टि: किञ्चिल्लुलिततारका || ७८ ||

पदच्छेद: - अर्धव्याकोशपक्ष्मा च ह्लादार्धमुकुलै पुटै: |
स्मिता अर्धमुकुला दृष्टि: किञ्चित् लुलिततारका || ७८ ||

अन्वय: - स्मिता अर्धव्याकोशपक्ष्मा ह्लादार्धमुकुलै पुटै: किञ्चित् लुलिततारका (सा) अर्धमुकुला दृष्टि:|

अर्थ - जी दृष्टी आनंदी असते, पापण्या अर्धवट उघडलेल्या कळीप्रमाणे असतात, बुबुळे अर्धवट विकसित असतात व किंचित चंचल असतात ती 'अर्धमुकुला दृष्टी' असते .

## ❖ विभ्रांतादृष्टी ❖

अनवस्थिततारा च विभ्रान्ताकुलदर्शना |
विस्तीर्णोत्फुल्लमध्या च विभ्रान्ता दृष्टिरिष्यते || ७९ ||

पदच्छेद: - अनवस्थत-तारा च विभ्रान्त-आकुलदर्शना |
विस्तीर्ण-उत्फुल्लमध्या च विभ्रान्ता दृष्टि: इष्यते || ७९ ||

अन्वय: - अनवस्थततारा विभ्रान्ताकुलदर्शना विस्तीर्णोत्फुल्लमध्या च (सा) विभ्रान्ता दृष्टि: इष्यते |

अर्थ - ज्या दृष्टीमध्ये बुबुळे आणि पापण्या दोन्ही चंचल असतात, डोळ्याचा मधला भाग विस्तीर्ण व विकसित असतो ती 'विभ्रांता दृष्टी' असते .

## ❖ विप्लुतादृष्टी ❖

पुटौ प्रस्फुरितौ यस्य निष्टब्धौ पतितौ पुन: |
विप्लुतोद्वृत्ततारा च दृष्टिरेषा तु विप्लुता || ८० ||

पदच्छेद: - पुटौ प्रस्फुरितौ यस्य निष्टब्धौ पतितौ पुन: |
विप्लुत-उद्वृत्ततारा च दृष्टि: एषा तु विप्लुता || ८० ||

अन्वय: - पुटौ प्रस्फुरितौ यस्य निष्टब्धौ पतितौ विप्लुतोद्वृत्ततारा च एषा तु विप्लुता दृष्टि: |

अर्थ - ज्या दृष्टीमध्ये पापण्या क्रमश: थरथरतात आणि नंतर स्तब्ध होतात, आणि खालच्या बाजूला झुकतात . उत्सुकतेमुळे बुबुळे वरच्या बाजूला गढून गेलेली असतात, ती 'विप्लुता दृष्टी' असते .

### ❖ आकेकरादृष्टी ❖

आकुञ्चितपुटापाङ्गा सङ्गतार्धनिमेषिणी |
मुहुर्व्यावृत्ततारा च दृष्टिराकेकरा स्मृता || ८१ ||

पदच्छेद : - आकुञ्चित-पुटापाङ्गा सङ्गत-अर्ध-निमेषिणी |
मुहु : व्यावृत्ततारा च दृष्टि : आकेकरा स्मृता || ८१ ||

अन्वय : - आकुञ्चितपुटापाङ्गा सङ्गतार्धनिमेषिणी मुहु : व्यावृत्ततारा च (सा) आकेकरा दृष्टि : स्मृता |

अर्थ - ज्या दृष्टीमध्ये पापण्या व डोळ्यांच्या कडा आकुंचित असतात आणि अर्धवट मिटलेले डोळे असून बुबुळे पुन्हा पुन्हा वरच्या बाजूला वळतात (गोल फिरतात), तिला 'आकेकरा दृष्टी' असे म्हणतात .

### ❖ विकोशादृष्टी ❖

विकोशितोभयपुटा प्रोत्फुल्ला चानिमेषिणी |
अनवस्थिततारा च विकोशा दृष्टिरिष्यते || ८२ ||

पदच्छेद : - विकोशित-उभयपुटा प्रोत्फुल्ला च अनिमेषिणी |
अनवस्थिततारा विकोशा दृष्टि : इष्यते || ८२ ||

अन्वय : - विकोशित-उभयपुटा प्रोत्फुल्ला अनिमेषिणी अनवस्थिततारा (सा) विकोशा दृष्टि : इष्यते |

अर्थ - ज्या दृष्टीमध्ये दोन्ही पापण्या संपूर्णपणे उघडलेल्या असतात, नेत्र अनिमिष असतात आणि बुबुळे किंचित चंचल असतात ती 'विकोषा दृष्टी' असते .

### ❖ त्रस्तादृष्टी ❖

त्रासोद्वृत्तपुटा या तु तथोत्कम्पिततारका |
सन्त्रासोत्फुल्लमध्या च त्रस्ता दृष्टिरुदाहृता || ८३ ||

पदच्छेद : - त्रास-उद्वृत्तपुटा या तु तथा उत्कम्पित-तारका |
सन्त्रास-उत्फुल्ल-मध्या च त्रस्ता दृष्टि : उदाहृता || ८३ ||

अन्वय : - या त्रास-उद्वृत्तपुटा तथा उत्कम्पिततारका सन्त्रास-उत्फुल्लमध्या च (सा) त्रस्ता दृष्टि: उदाहृता |

अर्थ - ज्या दृष्टीमध्ये घाबरल्याने पापण्या वर वळतात, बुबुळे थरथरतात आणि डोळ्यांचा मधला भाग त्रासामुळे पूर्णपणे विकसित झालेला असतो, तिला 'त्रस्ता दृष्टी' असे म्हणतात .

❖ तरुणमदातील मदिरादृष्टी ❖

व्याघूर्णमानमध्या या क्षामान्ताञ्चितलोचना |
दृष्टिर्विकसितापाङ्गा मदिरा तरुणे मदे || ८४ ||

पदच्छेद : - व्याघूर्णमान-मध्या या क्षामान्ता अञ्चितलोचना |
दृष्टि : विकसित-अपाङ्गा मदिरा तरुणे मदे || ८४ ||

अन्वय : - या व्याघूर्णमानमध्या क्षामान्ता अञ्चितलोचना विकसितापाङ्गा (सा) मदिरा दृष्टि: तरुणे मदे (प्रयोक्तव्या)|

अर्थ - ज्या दृष्टीमध्ये डोळ्याचा मधला भाग गोलाकार फिरतो . डोळ्याच्या कडा बारीक झालेल्या असतात आणि डोळे अंचित असतात . डोळ्यांचे कोपरे संपूर्ण विकसित झालेले असतात . अशी ही 'मदिरा दृष्टी' तरुण मदामध्ये वापरावी .

❖ मध्यमदातील मदिरादृष्टी ❖

किञ्चिदाकुञ्चितपुटा ह्यनवस्थिततारका |
तथा चलितपक्ष्मा च दृष्टिर्मध्यमदे भवेत् || ८५ ||

पदच्छेद : - किञ्चित् आकुञ्चितपुटा हि अनवस्थिततारका |
तथा चलितपक्ष्मा च दृष्टि : मध्यमदे भवेत् || ८५ ||

अन्वय : - किञ्चित् आकुञ्चितपुटा अनवस्थिततारका तथा चलितपक्ष्मा च (मदिरा) दृष्टि: मध्यमदे भवेत् |

अर्थ - मध्यम प्रकारच्या मदामध्ये पापण्या किंचित आकुंचित झालेल्या असतात आणि बुबुळे व पापण्या किंचित अस्थिर असतात . ती 'मध्यम मदातील मदिरा दृष्टी' होय .

❖ अधममदातील मदिरादृष्टी ❖

सनिमेषाऽनिमेषा च किञ्चिदद‍र्शिततारका |
अधोभागचरी दृष्टिरधमे तु मदे स्मृता || ८६ ||

पदच्छेद :- सनिमेषा अनिमेषा च किञ्चित् दर्शिततारका |
अधोभागचरी दृष्टि : अधमे तु मदे स्मृता || ८६ ||

अन्वय : - सनिमेषा अनिमेषा च किञ्चित् दर्शिततारका अधोभागचरी (मदिरा) दृष्टि : अधमे मदे स्मृता |

अर्थ - पापण्या कधी मिटतात तर कधी अनिमेष राहतात, बुबुळे थोडीशीच दिसतात व जी खालच्या दिशेकडे संचार करणारी असते, ती मदिरा दृष्टी अधम मदामध्ये मानली गेली आहे .

इत्येवं लक्षिता ह्येता: षट्त्रिंशद्दृष्टयो मया |
सहजा [? रसजा]भावजाश्चासां विनियोगं निबोधत || ८७ ||

पदच्छेद :- इति एवं लक्षिता : हि एता : षट्त्रिंशत् दृष्टय : मया |
सहजा : [? रसजा :]भावजा : च आसां विनियोगं निबोधत || ८७ ||

अन्वय : - इति एवं एता : षट्त्रिंशत् दृष्टय : मया लक्षिता : (या :) सहजा : [? रसजा :]भावजा : च| (अधुना) आसां विनियोगं निबोधत |

अर्थ - याप्रकारे मी ३६ प्रकारच्या दृष्टिभेदाची लक्षणे सांगितली जी रस आणि भावातून उत्पन्न होतात . आता मी त्यांच्या विनियोगाविषयी सांगतो .

❖ शून्यादी दृष्टींचा रसादींमध्ये विनियोग ❖

रसजास्तु रसेष्वेव स्थायिषु स्थायिदृष्टय : |
शृणुत व्यभिचारिण्य : सञ्चारिषु यथा हि ता : || ८८ ||

पदच्छेद : - रसजा : तु रसेषु एव स्थायिषु स्थायिदृष्टय : |
शृणुत व्यभिचारिण्य : सञ्चारिषु यथा हि ता : || ८८ ||

अन्वय : - रसजा : तु रसेषु एव (विनियुक्ता :) स्थायिदृष्टय : स्थायिषु (विनियुक्ता :) | (अधुना) सञ्चारिषु व्यभिचारिण्य : शृणुत |

अर्थ - रसदृष्टीचा विनियोग रसांमध्ये होतो आणि स्थायी भावदृष्टींचा विनियोग स्थायीभावामध्ये होतो जे पूर्वी सांगितले आहे . आता व्यभिचारी भावदृष्टींचा संचारिभावानुसार विनियोग सांगत आहोत .

शून्या दृष्टिस्तु चिन्तायां स्तम्भे चापि प्रकीर्तिता |
निर्वेदे चापि मलिना वैवर्ण्ये च विधीयते || ८९ ||

पदच्छेद : - शून्या दृष्टि : तु चिन्तायां स्तम्भे च अपि प्रकीर्तिता |
निर्वेदे च अपि मलिना वैवर्ण्ये च विधीयते || ८९ ||

अन्वय : - शून्या दृष्टि : चिन्तायां स्तम्भे च प्रकीर्तिता |
निर्वेदे वैवर्ण्ये च मलिना दृष्टि : विधीयते |

अर्थ - 'चिंता' या व्यभिचारी भावामध्ये आणि स्तंभ या सात्त्विक भावामध्ये शून्या दृष्टीचा विनियोग केला जातो . तसेच निर्वेद आणि वैवर्ण्य या व्यभिचारी भावांना प्रकट करण्यासाठी मलीना दृष्टी सांगितली गेली आहे .

श्रान्ता श्रमार्ते स्वेदे च लज्जायां ललिता तथा |
अपस्मारे तथा व्याधौ ग्लान्यां ग्लाना विधीयते || ९० ||

पदच्छेद : - श्रान्ता श्रमार्ते स्वेदे च लज्जायां ललिता तथा |
अपस्मारे तथा व्याधौ ग्लान्यां ग्लाना विधीयते || ९० ||

अन्वय : - श्रमार्ते स्वेदे च श्रान्ता (दृष्टि :) तथा लज्जायां ललिता (दृष्टि :) अपस्मारे व्याधौ तथा ग्लान्यां ग्लाना (दृष्टि :) विधीयते |

अर्थ - श्रम आणि स्वेदामध्ये श्रांता दृष्टी, लज्जेमध्ये लज्जिता दृष्टी आणि अपस्मार, व्याधी आणि ग्लानीमध्ये ग्लाना दृष्टी वापरतात .

शङ्कायां शङ्किता ज्ञेया विषादार्थे विषादिनी |
निद्रास्वप्नसुखार्थेषु मुकुला दृष्टिरिष्यते || ९१ ||

पदच्छेद :- शङ्कायां शङ्किता ज्ञेया विषादार्थे विषादिनी |
निद्रा-स्वप्न-सुखार्थेषु मुकुला दृष्टि : इष्यते || ९१ ||

अन्वय : - शङ्कायां शङ्किता (दृष्टि :) ज्ञेया विषादार्थे विषादिनी (दृष्टि :) निद्रास्वप्नसुखार्थेषु मुकुला दृष्टि : इष्यते |

अर्थ - शंकेमध्ये शंकिता, विषादामध्ये विषादिनी आणि निद्रा, स्वप्न तसेच सुखाचा भाव अभिव्यक्त करण्यासाठी मुकुला दृष्टी वापरतात .

कुञ्चितासूयितानिष्टदुष्प्रेक्षाक्षिव्यथासु च |
अभितप्ता च निर्वेदे ह्यभिघाताभितापयो : || ९२ ||

पदच्छेद :- कुञ्चिता असूयित-अनिष्टदुष्प्रेक्षा-अक्षिव्यथासु च |
अभितप्ता च निर्वेदे हि अभिघात-अभितापयो : || ९२ ||

अन्वय : - असूयित-अनिष्टदुष्प्रेक्षा-अक्षिव्यथासु कुञ्चिता (दृष्टि :) निर्वेदे च अभिघात-अभितापयो : अभितप्ता (दृष्टि : योजनीया) |

अर्थ - असूया, अनिष्ट वस्तू, मोठ्या प्रयासाने दिसणाऱ्या गोष्टी, डोळ्यांची व्यथा इत्यादींमध्ये कुंचिता दृष्टी आणि निर्वेदामध्ये, अचानक झालेला वार आणि संतापामध्ये अधितप्ता दृष्टीचा प्रयोग करावा .

जिह्मा दृष्टिरसूयायां जडतालस्ययोस्तथा |
धृतौ हर्षे सललिता स्मृतौ तर्के वितर्किता || ९३ ||

पदच्छेद :- जिह्मा दृष्टि : असूयायां जडता-आलस्ययो : तथा |
धृतौ हर्षे सललिता स्मृतौ तर्के वितर्किता || ९३ ||

अन्वय : - असूयायां तथा जडता-आलस्ययो : जिह्मा दृष्टि : धृतौ हर्षे सललिता (दृष्टि :) स्मृतौ तर्के वितर्किता (दृष्टि : भवेत्) |

अर्थ - असूया, जडता तसेच आलस्यामध्ये जिह्मा दृष्टी, समाधान व हर्षामध्ये ललिता दृष्टी आणि स्मृती व वितर्कामध्ये वितर्किता दृष्टीचा वापर करावा.

आह्लादेष्वर्धमुकुला गन्धस्पर्शसुखादिषु |
विभ्रान्ता दृष्टिरावेगे सम्भ्रमे विभ्रमे तथा || ९४ ||

पदच्छेद: - आह्लादिषु अर्धमुकुला गन्धस्पर्शसुखादिषु |
विभ्रान्ता दृष्टि: आवेगे सम्भ्रमे विभ्रमे तथा || ९४ ||

अन्वय: - गन्धस्पर्शसुखादिषु आह्लादिषु अर्धमुकुला (दृष्टि:) आवेगे सम्भ्रमे तथा विभ्रमे विभ्रान्ता दृष्टि: (प्रयोक्तव्या) |

अर्थ - गंध व स्पर्शामुळे मिळणारे सुख इ. दर्शविण्यासाठी अर्धमुकुला दृष्टी, आवेग, संभ्रम व विभ्रम यामध्ये विभ्रांता दृष्टीचा प्रयोग करावा.

विप्लुता चापलोन्माददु:खार्तिमरणादिषु |
आकेकरा दुरालोके विच्छेदप्रेक्षितेषु च || ९५ ||

पदच्छेद: - विप्लुता चापल-उन्माद-दु:ख-आर्तिमरण-आदिषु |
आकेकरा दुरालोके विच्छेदप्रेक्षितेषु च || ९५ ||

अन्वय: - चापल-उन्माद-दु:ख-आर्ति-मरण-आदिषु विप्लुता (दृष्टि:) दुरालोके विच्छेदप्रेक्षितेषु च आकेकरा (दृष्टि: भवेत्) |

अर्थ - चपलता, उन्माद, दु:ख, मानसिक व्यथा व मरण इ.मध्ये विप्लुता दृष्टी वापरावी. तसेच लांबची वस्तू पाहण्यासाठी, विभक्त गोष्टी पाहण्यासाठी आकेकरा दृष्टी वापरावी.

विबोधगर्वामर्षौग्र्यमतिषु स्याद्विकोशिता |
त्रस्ता त्रासे भवेद्दृष्टिर्मदिरा च मदेष्विति || ९६ ||

पदच्छेद: - विबोध-गर्व-अमर्ष-औग्र्यमतिषु स्यात् विकोशिता |
त्रस्ता त्रासे भवेत् दृष्टि: मदिरा च मदेषु इति || ९६ ||

अन्वयः - विबोध-गर्व-अमर्ष-औग्र्यमतिषु विकोशिता (दृष्टिः) स्यात् | त्रस्ता (दृष्टिः) त्रासे, मदिरा दृष्टिः च मदेषु भवेत् इति |

अर्थ - विबोध, मती, गर्व ,अमर्ष, उग्रता, मती यांसाठी विकोशिता दृष्टी, त्रासामध्ये त्रस्ता दृष्टी तसेच मदामध्ये मदिरा दृष्टीचा वापर सांगितला आहे .

❖ बुबुळांचे नऊ प्रकार ❖

षट्त्रिंशद्दृष्टयो ह्येता यथावत्समुदाहृताः |
रसजानां तुं दृष्टीनां भावजानां तथैव च || ९७ ||
तारापुटभ्रुवां कर्म गदतो मे निबोधत |

पदच्छेदः - षट्त्रिंशत् दृष्टयः हि एताः यथावत् समुदाहृताः |
रसजानां तु दृष्टीनां भावजानां तथा एव च || ९७ ||
तारापुटभ्रुवां कर्म गदतः मे निबोधत |

अन्वयः - एताः हि षट्त्रिंशत् दृष्टयः यथावत् समुदाहृताः | (अधुना) रसजानां तथा एव भावजानां दृष्टीनां च तारापुटभ्रुवां कर्म मे गदतः (यूयं) निबोधत |

अर्थ - याप्रकारे मी ३६ प्रकारच्या दृष्टींचे हुबेहूब वर्णन केले . आता, रस आणि भावजन्य दृष्टीमध्ये होणारे बुबुळ, पापण्या आणि भुवयांचे कार्य सांगतो .

भ्रमणं वलनं पातश्चलनं सम्प्रवेशनम् || ९८ ||
विवर्तनं समुद्वृत्तं निष्क्रामः प्राकृतं तथा |
[एतानि नवकर्माणि ताराकर्म द्विजात्तमाः |
शृणुध्वं लक्षणं तावत्साम्प्रतं प्रीतितः स्फुटम् ||]

पदच्छेदः - भ्रमणं वलनं पातः चलनं सम्प्रवेशनम् || ९८ ||
विवर्तनं समुद्वृत्तं निष्क्रामः प्राकृतं तथा |
[एतानि नवकर्माणि ताराकर्म द्विजोत्तमाः |
शृणुध्वं लक्षणं तावत् सांप्रतं प्रीतितः स्फुटम् ||]

अन्वय: - भ्रमणं वलनं पात: चलनं सम्प्रवेशनं विवर्तनं समुद्वृत्तं निष्क्राम: तथा प्राकृतम् एतानि नवकर्माणि सन्ति | हे द्विजोत्तमा:, सांप्रतं ताराकर्म तावत् स्फुटं लक्षणं प्रीतित: शृणुध्वम्|

अर्थ - १. भ्रमण २. वलन ३. पात ४. चलन ५. संप्रवेशन ६. विवर्तन ७. समुद्वृत्त ८. निष्क्राम ९. प्राकृत अशा बुबुळांच्या ९ प्रकारच्या क्रिया आहेत. हे उत्तम ब्राह्मणांनो, आता बुबुळांचे कार्य तसेच त्यांची स्पष्ट लक्षणे आनंदाने ऐकावी.

❖ बुबुळांची लक्षणे ❖

पुटान्तर्मण्डलावृत्तिस्तारयोर्भ्रमणं स्मृतम् ॥ ९९ ॥
वलनं गमनं त्र्यश्रं पातनं स्रस्तता तथा |
चलनं कम्पनं ज्ञेय: प्रवेशोऽन्त: प्रवेशनम् ॥ १०० ॥
विवर्तनं कटाक्षस्तु समुद्वृतं समुन्नति: |
निष्क्रामो निर्गम: प्रोक्त: प्राकृतं तु स्वभावजम् ॥ १०१ ॥

पदच्छेद: - पुट-अन्तर्मण्डल-आवृत्ति: तारयो: भ्रमणं स्मृतम् ॥ ९९ ॥
वलनं गमनं त्र्यश्रं पातनं स्रस्तता तथा |
चलनं कम्पनं ज्ञेयं प्रवेश: अन्त:प्रवेशनम् ॥ १०० ॥
विवर्तनं कटाक्ष: तु समुद्वृतं समुन्नति: |
निष्क्राम: निर्गम: प्रोक्त: प्राकृतं तु स्वभावजम् ॥ १०१ ॥

अन्वय: - तारयो: पुट-अन्तर्मण्डलआवृत्ति: भ्रमणं स्मृतम् | त्र्यश्रं गमनं वलनं तथा स्त्रस्तता पातनं, कम्पनं चलनं ज्ञेयम् | अन्त:प्रवेशनं प्रवेश:, कटाक्ष: विवर्तनं, समुन्नति: समुद्वृतं, निर्गम: निष्क्राम: प्रोक्त: | स्वभावजं तु प्राकृतं (कर्म भवेत्) |

अर्थ - बुबुळांना पापण्यांमध्ये गोल फिरवणे यास भ्रमण असे म्हणतात. बुबुळांना तिरके घेऊन जाणे याला वलन, बुबुळे वरून सरळ खाली आणणे यास पातन, बुबुळे कंपित करणे यास चलन, बुबुळांना आतल्या बाजूस नेणे यास संप्रवेशन, बुबुळे एका कोपऱ्यात नेऊन कटाक्षाने पाहणे यास विवर्तन, बुबुळे वरच्या बाजूस नेऊन फिरविण्यास समुद्वृत्त,

बाहेरच्या बाजूस आणणे यास निष्क्राम असे म्हटले आहे आणि बुबुळांना स्वाभाविक-सहज अवस्थेत ठेवणे हे बुबुळांचे प्राकृत कर्म होय .

## ❖ बुबुळांचे विनियोग ❖

अथैषां रसभावेषु विनियोगं निबोधत
भ्रमणं वलनोद्वृत्ते निष्क्रामो वीररौद्रयो: ॥ १०२ ॥
निष्क्रामणं सवलनं कर्तव्यं हि भयानके ।
हास्यबीभत्सयोश्चापि प्रवेशनमिहेष्यते ॥ १०३ ॥
पातनं करुणे कार्यं निष्क्रामणमथाद्भुते ।
प्राकृतं शेषभावेषु शृङ्गारे च विवर्तितम् ॥ १०४ ॥
स्वभावसिद्धमेवैतत् कर्म लोकक्रियाश्रयम् ॥ १०५ ॥
एवं रसेषु भावेषु ताराकर्माणि योजयेत् ।

पदच्छेद: - अथ एषां रसभावेषु विनियोगं निबोधत ।
भ्रमणं वलन-उद्वृत्ते निष्क्राम: वीररौद्रयो: ॥ १०२ ॥
निष्क्रामणं सवलनं कर्तव्यं हि भयानके ।
हास्यबीभत्सयो: च अपि प्रवेशनम् इह इष्यते ॥ १०३ ॥
पातनं करुणे कार्यं निष्क्रामणम् अथ अद्भुते ।
प्राकृतं शेषभावेषु शृङ्गारे च विवर्तितम् ॥ १०४ ॥
स्वभावसिद्धम् एव एतत् कर्म लोकक्रियाश्रयम् ॥ १०५ ॥
एवं रसेषु भावेषु ताराकर्माणि योजयेत् ।

अन्वय: - अथ एषां रसभावेषु विनियोगं निबोधत । वीररौद्रयो: भ्रमणं वलनउद्वृत्ते निष्क्राम: (कर्तव्य:) ।
भयानके सवलनं निष्क्रामणं हि कर्तव्यम् । हास्यबीभत्सयो: इह प्रवेशनम् इष्यते । करुणे पातनं कार्यम् अथ अद्भुते निष्क्रामणम् । शेषभावेषु प्राकृतं शृङ्गारे च विवर्तितम् । एतत् लोकक्रियाश्रयं कर्म स्वभावसिद्धम् एव । एवं रसेषु भावेषु ताराकर्माणि योजयेत् ।

अर्थ - आता मी यांचा रस आणि भावामध्ये कसा वापर करावा ते सांगतो -
भ्रमण, वलन, उद्वृत्त तथा निष्क्राम बुबुळाचा उपयोग वीर आणि रौद्र रसामध्ये करावा. निष्क्राम आणि वलन बुबुळाचा उपयोग भयानक रसामध्ये करावा. संप्रवेशनाचा प्रयोग हास्य आणि बीभत्स रसामध्ये, पातनाचा करुण रसामध्ये, निष्क्रामाचा अद्भुतामध्ये, प्राकृताचा उरलेल्या भावांमध्ये आणि विवर्तिताचा शृंगाररसामध्ये विनियोग करावा. हे बुबुळांचे विनियोग प्रत्येकाच्या स्वभावानुसार आणि लोकक्रियेवर आधारित आहेत. रस अणि भावांमध्ये त्यांचा विधिपूर्वक प्रयोग करावा.

## ❖ दर्शनांचे प्रकार आणि लक्षणे ❖

अथात्रैव प्रवक्ष्यामि प्रकारान् दर्शनस्य तु ॥ १०६ ॥
समं साच्यनुवृत्ते च ह्यालोकितविलोकिते ।
प्रालोकितोल्लोकिते चाप्यवलोकितमेव च ॥१०७ ॥
समतारञ्च सौम्यञ्च यद्दृष्टं तत्समं स्मृतम् ।
पक्ष्मान्तर्गततारं यत्त्र्यश्रं साचीकृतं तु तत् ॥१०८ ॥
रूपनिर्वर्णनायुक्तमनुवृत्तमिति स्मृतम् ।
सहसा दर्शनं यत्स्यात्तदालोकितमुच्यते ॥१०९ ॥
विलोकितं पृष्ठतस्तु पार्श्वाभ्यां तु प्रलोकितम् ।
ऊर्ध्वमुल्लोकितं ज्ञेयमवलोकितमप्यधः ॥११० ॥
इत्येष दर्शनविधिः सर्वभावरसाश्रयः ।

पदच्छेद :- अथ अत्र एव प्रवक्ष्यामि प्रकारान् दर्शनस्य तु ।
समं साची अनुवृत्ते च हि आलोकितविलोकिते ॥ १०६ ॥
प्रालोकित-उल्लोकिते च अपि अवलोकितम् एव च ।
समतारं च सौम्यं च यत् दृष्टं तत् समं स्मृतम् ॥ १०७ ॥
पक्ष्म-अन्तर्गत-तारं यत् त्र्यश्रं साचीकृतं तु तत् ।
रूपनिर्वर्णना युक्तम् अनुवृत्तम् इति स्मृतम् ॥ १०८ ॥

सहसा दर्शनं यत् स्यात् तत् आलोकितम् उच्यते |
विलोकितं पृष्ठत: तु पार्श्वाभ्यां तु प्रलोकितम् || १०९ ||
ऊर्ध्वम् उल्लोकितं ज्ञेयम् अवलोकितम् अपि अध: |
इति एष: दर्शनविधि: सर्वभावरस-आश्रय: || ११० ||

अन्वय: - अथ अत्र एव दर्शनस्य प्रकारान् प्रवक्ष्यामि | समं साची अनुवृत्ते च हि आलोकित-विलोकिते प्रालोकित-उल्लोकिते अवलोकितं च | (एतेषां लक्षणानि अधुना वक्ष्यामि)
यत् दृष्टं समतारं सौम्यं च तत्समं स्मृतम् |
यत् पक्ष्मअन्तर्गततारं त्र्यश्रं तत् तु साचीकृतम् |
रूपनिर्वर्णना युक्तम् अनुवृत्तम् इति स्मृतम् |
यत् सहसा दर्शनं स्यात् तत् आलोकितम् उच्यते |
पृष्ठत: ( दर्शनं स्यात् तत् )विलोकितं पार्श्वाभ्यां तु प्रलोकितम् |
ऊर्ध्वम् (दर्शनं) उल्लोकितं ज्ञेयम्, अध: (दर्शनं) अवलोकितम् |
इति सर्वभावरसाश्रय: एष: दर्शनविधि: |

अर्थ - दर्शनाचे आठ प्रकार मी इथे सांगतो . १. सम २. साची ३. अनुवृत्त ४. आलोकित ५. विलोकित ६. प्रालोकित ७. उल्लोकित ८. अवलोकित .
आता, क्रमानुसार खालीलप्रमाणे त्यांची लक्षणे सांगतो -
ज्या दृष्टीमध्ये बुबुळे समान आणि सौम्य असतील तर तिला सम असे म्हणतात .
जिच्यामध्ये बुबुळं पापण्यांच्या आतमध्ये जाऊन तिरके होतात तिला साची असे म्हणतात .
कोणत्याही वस्तूचे अवलोकन करणे त्यास अनुवृत्त असे म्हणतात .
अचानक कुठल्यातरी वस्तूला पाहणे त्याला आलोकित,
मागच्या बाजूला पाहणे म्हणजे विलोकित,
दोन्ही बाजूला पाहणे ते प्रालोकित,
वरच्या बाजूस पाहण्यास उल्लोकित, आणि खाली जमिनीकडे बघण्यास अवलोकित म्हटले आहे .
याप्रमाणे सर्व रस आणि भावामध्ये येणारे दर्शनाचे प्रकार मी सांगितले .

## ❖ पापण्यांचे प्रकार ❖

तारागतोऽस्यानुगतं पुटकर्म निबोधत || १११ ||
उन्मेषश्च निमेषश्च प्रसृतं कुञ्चितं समम् |
विवर्तितं प्रस्फुरितं पिहितं सविताडितम् || ११२ ||

पदच्छेद: - ताराकृत: अस्य अनुगतं पुटकर्म निबोधत || १११ ||
उन्मेष: च निमेष: च प्रसृतं कुञ्चितं समम् |
विवर्तितं प्रस्फुरितं पिहितं सविताडितम् || ११२ ||

अन्वय: - ताराकृत: अस्य अनुगतं पुटकर्म निबोधत | उन्मेष: निमेष: प्रसृतं कुञ्चितं समं विवर्तितं प्रस्फुरितं पिहितं सविताडितम् |

अर्थ - आता मी बुबुळांच्या गतीला अनुसरणारे 'पुटकर्म' मी सांगतो . ही नऊ पुटकर्म आहेत . १.उन्मेष २. निमेष ३. प्रसृत ४. कुंचित ५. सम ६. विवर्तित ७. प्रस्फुरित ८. पिहित ९.विताडित

विश्लेष: पुटयोर्यस्तु स उन्मेष: प्रकीर्तित: |
समागमो निमेष: स्यादायाम: प्रसृतं भवेत् || ११३ ||
आकुञ्चितं कुञ्चितं स्यात् समं स्वाभाविकं स्मृतम् |
विवर्तितं समुद्वृत्तं स्फुरितं स्पन्दितं तथा || ११४ ||
स्थगितं पिहितं प्रोक्तमाहतं तु वितालितम् |

पदच्छेद: - विश्लेष: पुटयो: य: तु स: उन्मेष: प्रकीर्तित: |
समागम: निमेष: स्यात् आयाम: प्रसृतं भवेत् |
आकुञ्चितं कुञ्चितं स्यात् समं स्वाभाविकं स्मृतम् || ११३ ||
विवर्तितं समुद्वृत्तं स्फुरितं स्पन्दितं तथा |
स्थगितं पिहितं प्रोक्तम् आहतं तु वितालितम् || ११४ ||

अन्वय: - विश्लेष: पुटयो: य: तु स: उन्मेष: प्रकीर्तित: | पुटयो: य: विश्लेष: स: तु उन्मेष: (इति) प्रकीर्तित: | समागम: निमेष: स्यात्, आयाम: प्रसृतं भवेत् | आकुञ्चितं कुञ्चितं

स्यात् स्वाभाविकं समं स्मृतम् | समुद्वृत्तं विवर्तितं, स्पन्दितं स्फुरितं तथा स्थगितं पिहितं आहतं तु वितालितम् (इति) प्रोक्तम् |

अर्थ - क्रमानुसार त्यांची लक्षणे खालीलप्रमाणे आहेत .

दोन्ही पापण्या एकमेकांपासून दूर होण्यास उन्मेष असे म्हणतात . दोन्ही पापण्या एकत्रित येण्यास निमेष असे म्हणतात . पापण्या पसरविण्यास प्रसृत आणि पापण्या संकुचित करण्यास कुंचित असे म्हणतात . पापण्या स्वाभाविक अवस्थेत असल्यास सम असे म्हणतात . वरच्या बाजूला असल्यास विवर्तित असे म्हणतात . पापण्यांच्या फडफडण्यास स्फुरित असे म्हणतात . पापण्या बंद करण्यास पिहित आणि झटकन मिटून उघडल्यास त्यास विताडित असे म्हणतात .

### ❖ पापण्यांचे विनियोग ❖

अथैषां रसभावेषु विनियोगं निबोधत || ११५ ||
क्रोधे विवर्तितं कार्यं निमेषोन्मेषणै: सह |
विस्मयार्थे च हर्षे च वीरे च प्रसृतं स्मृतम् || ११६ ||
अनिष्टदर्शने गन्धे रसे स्पर्शे च कुञ्चितम् |
शृङ्गारे च समं कार्यमीर्ष्यासु स्फुरितं तथा || ११७ ||
सुप्तमूर्च्छितवातोष्णधूमवर्षाञ्जनार्तिषु |
नेत्ररोगे च पिहितमभिघाते विताडितम् || ११८ ||
इत्येषु रसभावेषु तारकापुटयोर्विधि: |

पदच्छेद : - अथ एषां रसभावेषु विनियोगं निबोधत |
क्रोधे विवर्तितं कार्यं निमेष-उन्मेषणै : सह || ११५ ||
विस्मयार्थे च हर्षे च वीरे च प्रसृतं स्मृतम् |
अनिष्टदर्शने गन्धे रसे स्पर्शे च कुञ्चितम् || ११६ ||
शृङ्गारे च समं कार्यम् ईर्ष्यासु स्फुरितं तथा |
सुप्त-मूर्च्छित-वात-उष्ण-धूम-वर्षा-अञ्जन-आर्तिषु || ११७ ||

नेत्ररोगे च पिहितम् अभिघाते विताडितम्।
इत्येषु रसभावेषु तारकापुटयो: विधि: ॥ ११८ ॥

अन्वय: - अथ एषां रसभावेषु विनियोगं निबोधत। क्रोधे निमेष-उन्मेषणै: सह विवर्तितं कार्यम्।
विस्मयार्थे हर्षे वीरे च प्रसृतं स्मृतम्।
अनिष्टदर्शने गन्धे रसे स्पर्शे च कुञ्चितम्।
शृङ्गारे च समं कार्यम्। तथा ईर्ष्यासु स्फुरितं (कार्यम्)।
सुप्त-मूर्च्छित-वात-उष्ण-धूम-वर्षा-अञ्जन-आर्तिषु नेत्ररोगे च पिहितं (कार्यम्)।
अभिघाते विताडितम्।
इत्येषु रसभावेषु तारकापुटयो: विधि: (मया उक्त:)।

अर्थ - आता रस आणि भावांमध्ये पुटकर्मांचा विनियोग मी सांगतो. क्रोध भावामध्ये निमेष, उन्मेष आणि विवर्तित या पुटांचा वापर करावा.
विस्मय, हर्ष आणि वीर रसामध्ये प्रसृत वापरावे.
अनिष्ट (वाईट गोष्टींचे) दर्शन, गंध, रस आणि स्पर्शामध्ये कुंचित वापरावे.
शृंगारामध्ये सम आणि ईर्ष्येमध्ये स्फुरित पुट वापरावे. निद्रा, मूर्च्छा, वारा, उष्णता, धूर, पाऊस, अंजन, लेपन, पीडा आणि नेत्ररोगामध्ये पिहित पुटाचा वापर करावा.
आणि, अकस्मात झालेल्या जखमेमध्ये विताडित पुटाचा प्रयोग करावा.
याप्रमाणे रस आणि भावांमध्ये वापरल्या जाणाऱ्या बुबुळे आणि पापण्यांचा अभिनय मी सांगितला.

## ❖ भुवयांचे प्रकार ❖

कार्यानुगतमस्यैव भ्रुवो: कर्म निबोधत ॥ ११९ ॥
उत्क्षेप: पातनं चैव भ्रुकुटी चतुरं तथा।
कुञ्चितं रेचितं चैव सहजं चेति सप्तधा ॥ १२० ॥

पदच्छेद: - कार्यानुगतम् अस्य एव भ्रुवो: कर्म निबोधत।
उत्क्षेप: पातनं च एव भ्रुकुटी चतुरं तथा ॥ ११९ ॥
कुञ्चितं रेचितं च एव सहजं च इति सप्तधा।

अन्वय : - कार्यानुगतम् अस्य एव भ्रुवो : कर्म निबोधत |
उत्क्षेप : पातनं भ्रुकुटी चतुरं कुञ्चितं रेचितं सहजं च इति सप्तधा |

अर्थ - आता (बुबुळ आणि पुट) ह्यांच्या अनुषंगाने होणाऱ्या भुवयांचे प्रकार सांगतो. भुवयांचे सात प्रकार आहेत.
१.उत्क्षेप २. पातन ३. भ्रुकुटी ४. चतुर ५. कुंचित ६. रेचित ७. सहज.

भ्रुवोरुन्नतिरुत्क्षेप: सममेकैकशोऽपि वा |
अनेनैव क्रमेणैव पातनं स्यादधोमुखम् ॥ १२१ ॥
भ्रुवोर्मूलसमुत्क्षेपाद्भ्रुकुटी परिकीर्तिता |
चतुरं किञ्चिदुच्छ्वासान्मधुरायतयोर्भ्रुवो: ॥ १२२ ॥
एकस्या उभयोर्वापि मृदुभङ्गस्तु कुञ्चितम् |
एकस्या एव ललितादुत्क्षेपाद्रेचितं भ्रुव: ॥ १२३ ॥
सहजातं तु सहजं कर्म स्वाभाविकं स्मृतम् |

पदच्छेद : - भ्रुवो : उन्नति :उत्क्षेप : समम् एकैकश : अपि वा ॥ १२० ॥
अनेन एव क्रमेण एव पातनं स्यात् अधोमुखम् |
भ्रुवो : मूलसमुत्क्षेपात् भ्रुकुटी परिकीर्तिता ॥ १२१ ॥
चतुरं किञ्चित् उच्छ्वासात् मधुर-आयतयो : भ्रुवो : |
एकस्या : उभयो : वा अपि मृदुभङ्ग : तु कुञ्चितम् ॥ १२२ ॥
एकस्या : एव ललितात् उत्क्षेपात् रेचितं भ्रुव : |
सहजातं तु सहजं कर्म स्वाभाविकं स्मृतम् ॥ १२३ ॥

अन्वय : - भ्रुवो: समम् एकैकश: वा उन्नति: उत्क्षेप: | अनेन एव क्रमेण एव अधोमुखं पातनं स्यात् | भ्रुवो: मूलसमुत्क्षेपात् भ्रुकुटी परिकीर्तिता | किञ्चित् उच्छ्वासात् भ्रुवो: मधुर-आयतयो : चतुरम् | एकस्या : उभयो : वा मृदुभङ्ग : कुञ्चितम् | एकस्या : एव भ्रुव : ललितात् उत्क्षेपात् रेचितम् | सहजातं सहजं कर्म स्वाभाविकं स्मृतम् |

अर्थ - भुवयांची लक्षणे -
भुवयांचे क्रमश: एकामागून एक किंवा एकत्र वर नेण्यास 'उत्क्षेप'असे म्हणतात. याच

क्रमाने त्यांना खाली आणण्यास 'पातन' असे म्हणतात. दोन्ही भुवयांच्या मुळांना एकत्रित वर नेण्यास भ्रुकुटी असे म्हणतात. उच्छ्वास टाकून दोन्ही भुवया मधुर आणि विस्तारित करणे यास 'चतुर' असे म्हणतात. एका किंवा दोन्ही भुवयांना हळूहळू खाली आणण्यास 'कुंचित' असे म्हणतात. एकाच भुवईस लालित्यपूर्ण रीतीने वर उचलण्यास 'रेचित' आणि स्वाभाविक स्थितीत असलेल्या भुवयांना 'सहज' असे म्हटले जाते.

### ❖ भुवयांचे विनियोग ❖

अथैषां संप्रवक्ष्यामि रसभावप्रयोजनम् ॥ १२४ ॥
कोपे वितर्के हेलायां लीलादौ सहजे तथा ।
दर्शने श्रवणे चैव भ्रुवमेकां समुत्क्षिपेत् ॥ १२५ ॥
उत्क्षेपो विस्मये हर्षे रोषे चैव द्वयोरपि ।
असूयिते जुगुप्सायां हासे घ्राणे च पातनम् ॥ १२६ ॥
क्रोधस्थानेषु दीप्तेषु योजयेद्भ्रुकुटीं बुधः ।
शृङ्गारे ललिते सौम्ये सुखस्पर्शे प्रबोधने ॥ १२७ ॥
एवंविधेषु भावेषु चतुरं तु प्रयोजयेत् ।

पदच्छेदः - अथ एषां संप्रवक्ष्यामि रसभावप्रयोजनम् ।
कोपे वितर्के हेलायां लीलादौ सहजे तथा ॥ १२४ ॥
दर्शने श्रवणे च एव भ्रुवम् एकां समुत्क्षिपेत् ।
उत्क्षेपः विस्मये हर्षे रोषे च एव द्वयोः अपि ॥ १२५ ॥
असूयित-जुगुप्सायां हासे घ्राणे च पातनम् ।
क्रोधस्थानेषु दीप्तेषु योजयेत् भ्रुकुटीं बुधः ॥ १२६ ॥
शृङ्गारे ललिते सौम्ये सुखस्पर्शे प्रबोधने ।
एवंविधेषु भावेषु चतुरं तु प्रयोजयेत् ॥ १२७ ॥

अन्वयः - अथ एषां रसभावप्रयोजनं संप्रवक्ष्यामि ।
कोपे वितर्के हेलायां लीलादौ सहजे दर्शने श्रवणे च एकां भ्रुवं समुत्क्षिपेत् ।

विस्मये हर्षे रोषे च एव द्वयो: अपि उत्क्षेप:|
असूयित-जुगुप्सायां हासे घ्राणे च पातनम्|
क्रोधस्थानेषु दीप्तेषु बुध: भ्रुकुटीं योजयेत्|
शृङ्गारे ललिते सौम्ये सुखस्पर्शे प्रबोधने एवंविधेषु भावेषु चतुरं प्रयोजयेत्|

अर्थ - आता मी रस आणि भावांमध्ये भुवयांचा वापर सांगत आहे . क्रोध, वितर्क, लीला, हेला, सहज अवलोकन आणि ऐकण्याच्या अवस्थेमध्ये एक भुवई वर उचलावी म्हणजेच एका भुवईने उत्क्षेप करावा आणि विस्मय, हर्ष, क्रोध, रोषामध्ये दोन्ही भुवया वर उचलून 'उत्क्षेप' करावा .

असूया, जुगुप्सा, हास आणि सुगंधित पदार्थांचा वास घेणे या दशेमध्ये पातनाचा वापर करावा .

क्रोध आणि देदीप्यमान स्थानी भ्रुकुटीचा वापर करावा .

शृंगार, ललित वस्तू, सौम्य वस्तू, सुखमयस्पर्श आणि जागृती या भावांमध्ये 'चतुर' भ्रूचा प्रयोग करावा .

(स्त्रीपुरुषयोश्च संलापे नानावस्थान्तरात्मके) || १२८ ||
मोट्टायिते कुट्टमिते तथा च किलिकिञ्चिते
निकुञ्चितं च कर्तव्यं नृत्ते योज्यं तु रेचितम् || १२९ ||
अनाविद्धेषु भावेषु विद्यात्स्वाभाविकं बुध: |
इत्येवं तु भ्रुव: प्रोक्तं नासाकर्म निबोधत || १३० ||

पदच्छेद: - (स्त्रीपुरुषयो: च संलापे नानावस्थान्तरात्मके)
मोट्टायिते कुट्टमिते तथा च किलिकिञ्चिते|
निकुञ्चितं च कर्तव्यं नृत्ते योज्यं तु रेचितम्|
अनाविद्धेषु भावेषु विद्यात् स्वाभाविकं बुध: || १२९ ||
इत्येवं तु भ्रुव: प्रोक्तं नासाकर्म निबोधत|

अन्वय: - ( नानावस्थान्तरात्मके स्त्रीपुरुषयो: च संलापे )
तथा च मोट्टायिते कुट्टमिते किलिकिञ्चिते निकुञ्चितं च कर्तव्यं| नृत्ते तु रेचितं योज्यम्|

अनाविद्धेषु भावेषु बुध: स्वाभाविकं विद्यात् | इत्येवं तु भ्रुव: प्रोक्तम् | (अधुना) नासाकर्म निबोधत |

अर्थ - विविध अवस्था आणि भावांमध्ये होणाऱ्या स्त्री आणि पुरुषांच्या संलापामध्ये तसेच मोट्टायितामध्ये, कुट्टमितामध्ये आणि किलकिंचितामध्ये 'कुंचिता'चा प्रयोग करावा. नृत्तामध्ये 'रेचित' आणि उरलेल्या सामान्य भावांमध्ये 'सहज' भ्रूचा वापर करावा. याप्रकारे मी भुवयांचे प्रकार व विनियोग सांगितले. आता नासिकेचे (नाकाचे) कर्म सांगतो, ते तुम्ही जाणून घ्यावे .

## ❖ नाकाचे विविध प्रकार ❖

नता मन्दा विकृष्टा च सोच्छ्वासाथ विकूणिता |
स्वाभाविका चेति बुधै: षड्विधा नासिका स्मृता || १३१ ||
नता मुहु:श्लिष्टपुटा मन्दा तु निभृता स्मृता |
विकृष्टोत्फुल्लितपुटा सोच्छ्वासाकृष्टमारुता || १३२ ||
विकूणिता संकुचिता समा स्वाभाविकी स्मृता |
नासिकालक्षणं ह्येतद्विनियोगं निबोधत || १३३ ||

पदच्छेद: - नता मन्दा विकृष्टा च सोच्छ्वासा अथ विकूणिता |
स्वाभाविका च इति बुधै: षड्विधा नासिका स्मृता || १३१ ||
नता मुहु:श्लिष्टपुटा मन्दा तु निभृता स्मृता |
विकृष्टा उत्फुल्लितपुटा सोच्छ्वासा आकृष्टमारुता || १३२ ||
विकूणिता संकुचिता समा स्वाभाविकी स्मृता |
नासिकालक्षणं हि एतत् विनियोगं निबोधत || १३३ ||

अन्वय: - नता मन्दा विकृष्टा सोच्छ्वासा विकूणिता स्वाभाविका च इति बुधै: षड्विधा नासिका स्मृता |
मुहु:श्लिष्टपुटा नता, निभृता मन्दा स्मृता | उत्फुल्लितपुटा विकृष्टा, आकृष्टमारुता सोच्छ्वासा |

संकुचिता विकूणिता स्वाभाविकी समा स्मृता | एतत् हि नासिकालक्षणम् (अधुना) विनियोगं निबोधत|

अर्थ - नासिका कर्म सहा प्रकारची आहेत . १. नता २. मंदा ३. विकृष्टा ४. सोच्छ्वासा ५. विकूणिता ६. स्वाभाविका (समा) .

वारंवार जर नाकपुड्या एकत्रित येत असतील तर तीस 'नता' असे म्हणतात . जर नाकपुड्या स्थिर असतील तर तीस 'मंदा' असे म्हणतात . नाकपुड्या फुललेल्या असतील तर 'विकृष्टा', नाकपुड्यांनी श्वास आत घेतला असेल तर 'सोच्छ्वासा', नाकपुड्या आकुंचित झालेल्या असतील तर 'विकूणिता' आणि जर स्वाभाविक स्थितीत असतील तर 'स्वाभाविका' (समा) असे म्हणतात . याप्रमाणे मी नाकाचे प्रकार आणि त्यांची लक्षणे सांगितली आहेत . यापुढे मी त्याचा विनियोग सांगत आहे .

### ❖ नाकाचे विनियोग ❖

मदोत्कम्पसमायुक्ते नारीणामनुरोधने |
नि:श्वासे च नता कार्या नासिका नाट्ययोक्तृभि: || १३४ ||
निर्वेदौत्सुक्याचिन्तासु मन्दा शोके च योजयेत् |
तीव्रगन्धे विकृष्टां तां रौद्रे वीरे तथैव च || १३५ ||
इष्टघ्राणे तथोच्छ्वासे दीर्घोच्छ्वासां प्रयोजयेत् |
विकूणिता च कर्तव्या जुगुप्सासूयितादिषु || १३६ ||
कार्या शेषेषु भावेषु तज्ज्ञै: स्वाभाविका तथा |

पदच्छेद : - मन्द-उत्कम्प-समायुक्ते नारीणाम् अनुरोधने |
नि :श्वासे च नता कार्या नासिका नाट्ययोक्तृभि : || १३४ ||
निर्वेद-औत्सुक्य-चिन्तासु मन्दा शोके च योजयेत् |
तीव्रगन्धे विकृष्टां तां रौद्रे वीरे तथा एव च || १३५ ||
इष्टघ्राणे तथा उच्छ्वासे दीर्घोच्छ्वासां प्रयोजयेत् |
विकूणिता च कर्तव्या जुगुप्सा-असूयिता-आदिषु || १३६ ||
कार्या शेषेषु भावेषु तज्ज्ञै : स्वाभाविका तथा |

अन्वय: - मन्द-उत्कम्प-समायुक्ते नारीणाम् अनुरोधने नि:श्वासे च नाट्ययोक्तृभि: नता नासिका कार्या|
निर्वेद-औत्सुक्य-चिन्तासु शोके च मन्दा योजयेत्|
तीव्रगन्धे रौद्रे तथैव च वीरे तां विकृष्टां (योजयेत्)|
इष्टघ्राणे तथा उच्छ्वासे दीर्घोच्छ्वासां (सोच्छ्वासां) प्रयोजयेत्|
जुगुप्सा-असूयिता-आदिषु विकूणिता कर्तव्या|
तथा शेषेषु भावेषु तज्ज्ञै: स्वाभाविका कार्या|

अर्थ - स्त्रियांना मनविणे, मंद कंपन, उच्छ्वास टाकणे यांमध्ये 'नता' नावाच्या नासिकेचा वापर करावा. निर्वेद, औत्सुक्य, चिंता आणि शोकामध्ये 'मंदा' नासिकेचा वापर करावा. उग्रवास, श्वास, रोष, भय, दु:खामध्ये 'विकृष्टा' नासिकेचा वापर करावा. मधुर गंध, आणि उच्छ्वासामध्ये 'सोच्छ्वासा' नासिकेचा वापर करावा. जुगुप्सा, असूया इ. मध्ये 'विकूणिता', तसेच उरलेल्या सगळ्या भावांमध्ये 'समा'(स्वाभाविका)चा प्रयोग करावा.

### ❖ गालाचे प्रकार ❖

क्षामं फुल्लं च पूर्णं च कम्पितं कुञ्चितं समम् || १३७ ||
षड्विधं गण्डमुद्दिष्टमस्य लक्षणमुच्यते |
क्षामं चावनतं ज्ञेयं फुल्लं विकसितं भवेत् || १३८ ||
विततं पूर्णमत्रोक्तं कम्पितं स्फुरितं भवेत् |
स्यात्कुञ्चितं संकुचितं समं प्राकृतमुच्यते || १३९ ||

पदच्छेद: - क्षामं फुल्लं च पूर्णं च कम्पितं कुञ्चितं समम् || १३७ ||
षड्विधं गण्डम् उद्दिष्टं तस्य लक्षणम् उच्यते |
क्षामं च अवनतं ज्ञेयं फुल्लं विकसितं भवेत् || १३८ ||
विततं पूर्णम् अत्र उक्तं कम्पितं स्फुरितं भवेत् |
स्यात् कुञ्चितं संकुचितं समं प्राकृतम् उच्यते || १३९ ||

अन्वयः - क्षामं फुल्लं पूर्णं कम्पितं कुञ्चितं समम् (इति)षड्विधं गण्डम् उद्दिष्टं तस्य लक्षणम् उच्यते|

अवनतं क्षामं ज्ञेयं विकसितं च फुल्लं भवेत्| विततम् अत्र पूर्णम् उक्तं स्फुरितं (च) कम्पितं भवेत्|

संकुचितं कुञ्चितं स्यात् प्राकृतं समम् (इति)उच्यते|

अर्थ - १.क्षाम, २. फुल्ल ३.पूर्ण ४. कंपित .५. कुंचित ६. सम हे गालाचे सहा प्रकार आहेत . आता मी त्यांची लक्षणे सांगतो .

बसके गाल किंवा आतमध्ये गेलेले गाल म्हणजे 'क्षाम', भरलेले गाल 'फुल्ल', गोबरे गाल म्हणजे 'पूर्ण', थरथरणारे गाल म्हणजे 'कंपित', आकुंचित झालेले गाले 'कुंचित' आणि स्वाभाविक अवस्थेत असलेले गाल 'सम' म्हणून ओळखले जातात .

### ❖ गालाचे विनियोग ❖

गण्डयोर्लक्षणं प्रोक्तं विनियोगं निबोधत |
क्षामं दु:खेषु कर्तव्यं प्रहर्षे फुल्लमेव च || १४० ||
घूर्णमुत्साहगर्वेषु रोषहर्षेषु कम्पितम् |
कुञ्चितं च सरोमाञ्चं स्पर्शे शीते भये ज्वरे || १४१ ||
प्राकृतं शेषभावेषु गण्डकर्म भवेदिति |

पदच्छेद: - गण्डयो : लक्षणं प्रोक्तं विनियोगं निबोधत|
क्षामं दु:खेषु कर्तव्यं प्रहर्षे फुल्लम् एव च || १४० ||
घूर्णम् उत्साह-गर्वेषु रोषहर्षेषु कम्पितम्|
कुञ्चितं च सरोमाञ्चं स्पर्शे शीते भये ज्वरे || १४१ ||
प्राकृतं शेषभावेषु गण्डकर्म भवेत् इति|

अन्वय: - गण्डयो : लक्षणं प्रोक्तम् (इदानीं) विनियोगं निबोधत|
दु:खेषु क्षामं कर्तव्यं प्रहर्षे फुल्लम् च | उत्साह-गर्वेषु पूर्णं रोषहर्षेषु कम्पितम्|
सरोमाञ्चं स्पर्शे शीते भये ज्वरे कुञ्चितं च | शेषभावेषु प्राकृतं गण्डकर्म भवेत्|

अर्थ - याप्रकारे मी गालांची लक्षणे सांगितली . आता त्याचा प्रयोग कसा करावा ते जाणून घ्या . दु:खामध्ये 'क्षाम', हर्षामध्ये 'फुल्ल', उत्साह आणि गर्वामध्ये 'पूर्ण', रोष तसेच

हर्षामध्ये 'कंपित', रोमांच, स्पर्श, थंडी , भय आणि तापामध्ये 'कुंचित' तसेच उरलेल्या भावांमध्ये 'सम' गालाचा वापर करावा .

### ❖ अधरोष्ठाचे प्रकार ❖

विवर्तनं कम्पनं च विसर्गो विनिगूहनम् ‖ १४२ ‖
सन्दष्टकं समुद्गं च षट्कर्माण्यधरस्य तु |
विकूणनं विवर्तस्तु वेपनं कम्पनं स्मृतम् ‖ १४३ ‖
विनिष्क्रामो विसर्गस्तु प्रवेशो विनिगूहनम् |
सन्दष्टकं द्विजैर्दष्टं समुद्गः सहजोन्नतिः ‖ १४४ ‖
इत्योष्ठलक्षणं प्रोक्तं विनियोगं निबोधत |

पदच्छेदः - विवर्तनं कम्पनं च विसर्गः विनिगूहनम् ‖ १४२ ‖
सन्दष्टकं समुद्गं च षट् कर्माणि अधरस्य तु |
विकूणनं विवर्तः तु वेपनं कम्पनं स्मृतम् ‖ १४३ ‖
विनिष्क्रामः विसर्गः तु प्रवेशः विनिगूहनम् |
सन्दष्टकं द्विजैः दष्टं समुद्गः सहज-उन्नतिः ‖ १४४ ‖
इति ओष्ठलक्षणं प्रोक्तं विनियोगं निबोधत |

अन्वयः - विवर्तनं कम्पनं विसर्गः विनिगूहनं सन्दष्टकं समुद्गं च षट् अधरस्य कर्माणि | विवर्तः विकूणनं, वेपनं कम्पनं स्मृतम् | विनिष्क्रामः विसर्गः, प्रवेशः विनिगूहनम् | द्विजैः दष्टं सन्दष्टकम् (इति ज्ञेयं), सहजोन्नतिः समुद्गः इति ओष्ठलक्षणं प्रोक्तम् | (अधुना) विनियोगं निबोधत |

अर्थ - सहा प्रकारचे अधरोष्ठ सांगितले आहेत . १. विवर्तन २. कंपन ३. विसर्ग ४. विनिगूहन ५.संदष्टक ६. समुद्ग .

खालचा ओठ तिरका वाकविणे 'विवर्तन', ओठाचे थरथरणे 'कंपन', ओठ बाहेर पडणे 'विसर्ग', ओठ आत नेणे 'विनिगूहन', दातांनी ओठांना चावणे 'संदष्टक', ओठांना बाहेरच्या बाजूस आणून वर नेण्यास 'समुद्ग' असे म्हटले आहे . ही ओठांची लक्षणे आहेत आता त्यांचे विनियोग ऐका .

## ❖ अधरोष्ठाचे विनियोग ❖

असूयावेदनावज्ञाहास्यादिषु विवर्तनम् || १४५ ||
कम्पनं वेदनाशीतभयरोषजवादिषु |[? ज्वरादिषु]
स्त्रीणां विलासे बिब्बोके विसर्गो रञ्जने तथा || १४६ ||
विनिगूहनमायासे सन्दष्टं क्रोधकर्मसु |
समुद्गस्त्वनुकम्पायां चुम्बने चाभिनन्दने || १४७ ||

पदच्छेद :- असूया-वेदना-अवज्ञा-हास्य-आदिषु विवर्तनम् || १४५ ||
कम्पनं वेपना शीत-भय-रोष-जवादिषु |
स्त्रीणां विलासे बिब्बोके विसर्ग: रञ्जने तथा || १४६ ||
विनिगूहनम् आयासे सन्दष्टं क्रोधकर्मसु |
समुद्ग: तु अनुकम्पायां चुम्बने च अभिनन्दने || १४७ ||

अन्वय: - असूया-वेदना-अवज्ञा-हास्य-आदिषु विवर्तनम् | वेपना शीत-भय-रोष-जवादिषु कम्पनम् | स्त्रीणां विलासे बिब्बोके तथा रञ्जने विसर्ग: | आयासे विनिगूहनम् क्रोधकर्मसु सन्दष्टं च | अनुकम्पायां चुम्बने अभिनन्दने च समुद्ग: (प्रयोक्तव्य:)|

अर्थ - असूया, वेदना, लज्जा ,अनादर आणि हास्यामध्ये 'विवर्तन' अधरोष्ठाचा वापर करावा. वेदना, थंडी, भय, क्रोध, गती इत्यादींमध्ये 'कंपन' अधरोष्ठ वापरावे. स्त्रियांचे विलास, बिब्बोक आणि रंजन (आनंद)इ. मध्ये 'विसर्ग' , श्रमामध्ये 'विनिगूहन' , क्रोध इत्यादी क्रियांमध्ये 'संदष्टक', अनुकंपा, चुंबन आणि अभिनंदनामध्ये 'समुद्गा'चा प्रयोग करावा.

## ❖ हनुवटीचे प्रकार ❖

इत्योष्ठकर्माण्युक्तानि चिबुकस्य निबोधत |
कुट्टनं खण्डनं छिन्नं चुक्कितं लेहितं समम् || १४८ ||
दष्टञ्च दन्तक्रियया चिबुकं त्विह लक्ष्यते |
कुट्टनं दन्तसंघर्ष: संस्फोट: खण्डनं मुहु: || १४९ ||

छिन्नं तु गाढसंश्लेषश्चुक्कितं दूरविच्युतिः |
लेहनं जिह्वया लेहः किञ्चित् श्लेषः समं भवेत् || १५० ||
दन्तैर्दष्टेऽधरे दष्टमित्येषां विनियोजनम् |

पदच्छेदः - इति ओष्ठकर्माणि उक्तानि चिबुकस्य निबोधत |
कुट्टनं खण्डनं छिन्नं चुक्कितं लेहितं समम् || १४८ ||
दष्टं च दन्तक्रियया चिबुकं तु इह लक्ष्यते |
कुट्टनं दन्तसंघर्षः संस्फोटः खण्डनं मुहुः || १४९ ||
छिन्नं तु गाढसंश्लेषः चुक्कितं दूरविच्युतिः |
लेहनं जिह्वया लेहः किञ्चित् श्लेषः समं भवेत् || १५० ||
दन्तैः दष्टे अधरे दष्टम् इति एषां विनियोजनम् |

अन्वयः - इति ओष्ठकर्माणि उक्तानि | (अधुना) चिबुकस्य (प्रकारान्) निबोधत |
कुट्टनं खण्डनं छिन्नं चुक्कितं लेहितं समं दष्टं च दन्तक्रियया चिबुकं इह लक्ष्यते |
दन्तसंघर्षः कुट्टनं, मुहुः संस्फोटः खण्डनं, गाढसंश्लेषः छिन्नं, दूरविच्युतिः चुक्कितं, जिह्वया लेहः लेहनं, किञ्चित् श्लेषः समं भवेत् | दन्तैः दष्टे अधरे दष्टम् इति | (अधुना) एषां विनियोजनम् |

अर्थ - याप्रमाणे, मी तुम्हांला ओठांचे अभिनय सांगितले . आता तुम्हांला हनुवटीचे प्रकार सांगतो, ते तुम्ही जाणून घ्या .
१. कुट्टन २. खंडन ३. छिन्न ४.चुक्कित ५.लेहित ६.सम ७. दष्ट .
येथे दातांच्या क्रियेनुसार वरील प्रकारे हनुवटी सांगितली आहे .
दातांचे एकमेकांशी घर्षण म्हणजे 'कुट्टन',
वारंवार दात चावणे म्हणजे 'खंडन' ,
दात गच्च मिटून घेणे म्हणजे 'छिन्न' ,
दात एकमेकांपासून दूर करणे म्हणजे 'चुक्कित' ,
जिभेने दात चाटणे म्हणजे 'लेहित' ,

दात एकमेकांजवळ ठेवणे म्हणजे 'सम',
तसेच दातांनी ओठ चावणे यास 'दष्ट' असे म्हणतात.
आता, यांच्या विनियोगाविषयी सांगतो.

❖ हनुवटीचे विनियोग ❖

भयशीतज्वरक्रोधग्रस्तानां कुट्टनं भवेत् ॥ १५१ ॥
जपाध्ययनसंलापभक्ष्ययोगे च खण्डनम् ।
छिन्नं व्याधौ भये शीते व्यायामे रुदिते मृते ॥ १५२ ॥
जृम्भणे चुक्कितं कार्यं तथा लौल्ये च लेहनम् ।
समं स्वभावभावेषु सन्दष्टं क्रोधकर्मसु ॥ १५३ ॥
इति दन्तोष्ठजिह्वानां करणे चिबुकक्रिया ।

पदच्छेद : - भय-शीत-ज्वर-क्रोध-ग्रस्तानां कुट्टनं भवेत् ॥ १५१ ॥
जप-अध्ययन-संलाप-भक्ष्ययोगे च खण्डनम् ।
छिन्नं व्याधौ भये शीते व्यायामे रुदिते मृते ॥ १५२ ॥
जृम्भणे चुक्कितं कार्यं तथा लौल्ये च लेहनम् ।
समं स्वभावभावेषु सन्दष्टं क्रोधकर्मसु ॥ १५३ ॥
इति दन्त-ओष्ठ-जिह्वानां करणे चिबुकक्रिया ।

अन्वय : - भय-शीत-ज्वर-क्रोध-ग्रस्तानां कुट्टनं भवेत् । जप-अध्ययन-संलाप-भक्ष्ययोगे च खण्डनम् । व्याधौ भये शीते व्यायामे रुदिते मृते छिन्नम् । जृम्भणे चुक्कितं कार्यं तथा च लौल्ये लेहनम् । स्वभावभावेषु समं क्रोधकर्मसु सन्दष्टम् इति दन्त-ओष्ठ-जिह्वानां करणे चिबुकक्रिया ।

अर्थ - भय, थंडी, व्याधी, ताप आणि क्रोधामध्ये 'कुट्टन' करावे. जप, अभ्यास, संवाद, खाण्यामध्ये 'खंडन' करावे. आजारपण, भय, थंडी, व्यायाम, रडणे, मरणामध्ये 'छिन्न' करावे. जांभई देताना 'चुक्कित', चाटताना 'लेहित', स्वाभाविक क्रियेमध्ये 'सम' आणि

क्रोध इ. मध्ये 'संदष्टका'चा वापर करावा. याप्रकारे दात, ओठ आणि जीभ यांचा अभिनय केल्याने चिबुक (हनुवटीचे) कर्म होते.

## ❖ मुखजाचे प्रकार ❖

विनिवृत्तं च विधुतं निर्भुग्नं भुग्नमेव च ॥ १५४ ॥
विवृतञ्च तथोद्वाहि कर्माण्यत्रास्यजानि तु ।
व्यावृत्तं विनिवृत्तं स्याद्विधुतं तिर्यगायतम् ॥ १५५ ॥
अवाङ्मुखत्वं निर्भुग्नं व्याभुग्नं किञ्चिदायतम् ।
विश्लिष्टोष्ठं च विवृत्तमुद्वाह्युत्क्षिप्तमेव च ॥ १५६ ॥

पदच्छेद :- विनिवृत्तं च विधुतं निर्भुग्नं भुग्नम् एव च ॥ १५४ ॥
विवृतं च तथा उद्वाहि कर्माणि अत्र आस्यजानि तु ।
व्यावृत्तं विनिवृत्तं स्यात् विधुतं तिर्यक् आयतम् ॥ १५५ ॥
अवाङ्मुखत्वं निर्भुग्नं व्याभुग्नं किञ्चित् आयतम् ।
विश्लिष्ट-ओष्ठं च विवृत्तम् उद्वाहि उत्क्षिप्तम् एव च॥ १५६ ॥

अन्वय : - अत्र विनिवृत्तं विधुतं निर्भुग्नं भुग्नम् विवृतं उद्वाहि च कर्माणि आस्यजानि (सन्ति)। विनिवृत्तं व्यावृत्तं स्यात् विधुतं तिर्यक् आयतम् । निर्भुग्नं अवाङ्मुखत्वं, व्याभुग्नं किञ्चित् आयतम्।
विवृत्तं विश्लिष्ट-ओष्ठम्, उद्वाहि उत्क्षिप्तम् (भवति)।

अर्थ - मुखजाचे सहा प्रकार आहेत.

१. विनिवृत्त २.विधुत ३.निर्भुग्न ४.भुग्न ५.विवृत्त ६.उद्वाही.

विनिवृत्तामध्ये मुख सरळ उघडलेले असते. विधुतामध्ये मुख तिरकस उघडलेले असते.

निर्भुग्नामध्ये मुख खालच्या बाजूस झुकलेले असते. व्याभुग्नामध्ये मुख थोडेसे उघडलेले असते.

विवृत्तामध्ये मुख ओठांशी संलग्न असते. उद्वाहीमध्ये मुख वरच्या बाजूस उचललेले असते.

## ❖ मुखजाचे विनियोग ❖

विनिवृत्तमसूयायामीर्ष्याकोपकृतेषु च |
अवज्ञाविहृतादौ च स्त्रीणां कार्यं प्रयोक्तृभि: || १५७ ||
विधुतं वारणे चैव नैवमित्येवमादिषु |
निर्भुग्नं चापि विज्ञेयं गम्भीरालोकनादिषु || १५८ ||
भुग्नं लज्जान्विते योज्यं यतीनां तु स्वभावत: |
निर्वेदौत्सुक्यचिन्तासु तथा च विनिमन्त्रणे || १५९ ||

पदच्छेद: - विनिवृत्तम् असूयायां ईर्ष्या-कोपकृतेषु च |
अवज्ञा-विहृतादौ च स्त्रीणां कार्यं प्रयोक्तृभि: || १५७ ||
विधुतं वारणे च एव न एवम् इति एवम् आदिषु |
निर्भुग्नं च अपि विज्ञेयं गम्भीर-आलोकनादिषु || १५८ ||
भुग्नं लज्जान्विते योज्यं यतीनां तु स्वभावत: |
निर्वेद-औत्सुक्य-चिन्तासु तथा च विनिमन्त्रणे || १५९ ||

अन्वय: - प्रयोक्तृभि: स्त्रीणां असूयायाम् ईर्ष्या-कोपकृतेषु अवज्ञा-विहृतादौ च विनिवृत्तं कार्यम् | न एवम् इति एवम् आदिषु वारणे च विधुतम् एव (कार्यम्) | गम्भीर-आलोकनादिषु निर्भुग्नं च विज्ञेयम् | लज्जान्विते यतीनां स्वभावत: निर्वेद-औत्सुक्य-चिन्तासु तथा च विनिमन्त्रणे भुग्नं योज्यम् |

अर्थ - प्रयोगकर्त्यांनी स्त्रियांची असूया, ईर्ष्या, क्रोध, अवज्ञा, विहृत इ. भावांमध्ये विनिवृत्ताचा वापर करावा. नकार देणे आणि निवारण करण्यामध्ये 'विधुत', गंभीर अवलोकन इ.मध्ये 'निर्भुग्न' यांचा वापर करावा. तसेच लज्जित व्यक्ती, संन्यासीजनांच्या स्वभावातच असणारा निर्वेद, औत्सुक्य, विचारविनिमय आणि मंत्रणा या भावांमध्ये 'भुग्न'चा वापर करावा.

विवृत्तं वापि विज्ञेयं हास्यशोकभयादिषु |
स्त्रीणामुद्वाहि लीलायां गर्वे गच्छत्यनादरे || १६० ||
एवं नामेति कार्यञ्च कोपवाक्ये विचक्षणै: |

समं साचीकृताद्युक्तं यच्च दृष्टिविकल्पनम् ॥ १६१ ॥
तज्ज्ञैस्तदनुसारेण कार्यं तदनुगं मुखम् ।

पदच्छेद: - विवृत्तं वा अपि विज्ञेयं हास्य-शोक-भयादिषु ।
स्त्रीणाम् उद्वाहि लीलायां गर्वे गच्छति अनादरे ॥ १६० ॥
एवं नाम इति कार्यं च कोपवाक्ये विचक्षणै: ।
समं साचीकृतादि उक्तं यत् च दृष्टिविकल्पितम् ॥ १६१ ॥
तज्ज्ञै: तदनुसारेण कार्यं तत् अनुगं मुखम् ।

अन्वय: - हास्य-शोक-भयादिषु विवृत्तं विज्ञेयम् ।
स्त्रीणां लीलायां गर्वे गच्छति अनादरे एवं नाम इति कार्यं च कोपवाक्ये विचक्षणै: उद्वाहि (योज्यम्) ।
यत् च दृष्टिविकल्पितं समं साचीकृतादि उक्तम् । तज्ज्ञै: तदनुसारेण तत् मुखम् अनुगं कार्यम् ।

अर्थ - हास्य, शोक आणि भयामध्ये 'विवृत्ता'चा वापर करावा. तसेच स्त्रियांच्या लीला, गर्व, अनादर, निघून जाणे आणि "असेच आहे," असे बोलणे आणि क्रोधयुक्त बोलणे यांमध्ये 'उद्वाही'चा वापर करावा.
दृष्टिभेदाच्या वेळी सम, साचीकृत इ.जे भेद सांगितले आहेत, त्याच्याप्रमाणेच विद्वानांनी मुखाचा प्रयोग करावा.

## ❖ मुखरागाचे प्रकार ❖

अथातो मुखरागस्तु चतुर्धा संप्रकीर्तित: ॥ १६२ ॥
स्वाभाविक: प्रसन्नश्च रक्त: श्यामोऽर्थसंश्रय: ।

पदच्छेद: - अथ अत: मुखराग: तु चतुर्धा संप्रकीर्तित: ॥ १६२ ॥
स्वाभाविक: प्रसन्न: च रक्त: श्याम: अर्थसंश्रय: ।

अन्वय: - अथ अत: मुखराग: चतुर्धा संप्रकीर्तित: । अर्थसंश्रय: (ते सन्ति) स्वाभाविक: प्रसन्न: च रक्त: श्याम: ।

अर्थ - आता, मी मुखरागाविषयी सांगणार आहे. मुखराग म्हणजे चेहऱ्यावरचा रंग. शब्दाच्या अर्थाप्रमाणेच त्याचे चार भेद आहेत. १.स्वाभाविक २. प्रसन्न ३.रक्त ४. श्याम.

### ❖ मुखरागाचे विनियोग ❖

स्वाभाविकस्तु कर्तव्य: स्वभावाभिनयाश्रय: ‖ १६३ ‖
मध्यस्थादिषु भावेषु मुखराग: प्रकीर्तित: |
प्रसन्नस्त्वद्‌भुते कार्यो हास्यशृङ्गारयोस्तथा ‖ १६४ ‖
वीररौद्रमदाद्येषु रक्त: स्यात्करुणे तथा |
भयानके सबीभत्से श्यामं संजायते मुखम् ‖ १६५ ‖
एवं भावसार्थेषु मुखरागं प्रयोजयते |

पदच्छेद: - स्वाभाविक: तु कर्तव्य: स्वभाव-अभिनय-आश्रय: ‖ १६३ ‖
मध्यस्थ-आदिषु भावेषु मुखराग: प्रकीर्तित: |
प्रसन्न: तु अद्‌भुते कार्य: हास्य-शृङ्गारयो: तथा ‖ १६४ ‖
वीर-रौद्र-मदाद्येषु रक्त: स्यात् करुणे तथा |
भयानके सबीभत्से श्यामं संजायते मुखम् ‖ १६५ ‖
एवं भावरसार्थेषु मुखरागं प्रयोजयते |

अन्वय: - स्वभाव-अभिनय-आश्रय: मध्यस्थआदिषु भावेषु स्वाभाविक: मुखराग: कर्तव्य: |
प्रसन्न: हास्यशृङ्गारयो: अद्‌भुते तथा कार्य: |
वीररौद्रमदाद्येषु एषु रक्त: स्यात् करुणे तथा |
भयानके सबीभत्से श्यामं संजायते मुखम् |
एवं भावरसार्थेषु मुखरागं प्रयोजयते |

अर्थ - 'स्वाभाविक मुखरागा'चा वापर स्वाभाविक अभिनयामध्ये आणि मध्यस्थ इ. भावांमध्ये करावा. 'प्रसन्न मुखराग' अद्‌भुत हास्य आणि शृंगारामध्ये वापरावा. 'रक्त मुखराग' वीर, रौद्र, करूण आणि मदामध्ये वापरावा. 'श्याम मुखराग' भयानक, बीभत्सरसामध्ये योजावा. याप्रमाणे भाव आणि रसामध्ये मुखरागाचा प्रयोग करावा.

## ❖ मुखरागाचे महत्त्व ❖

शाखाङ्गोपाङ्गसंयुक्तः कृतोऽप्यभिनयः शुभः ॥ १६६ ॥
मुखरागविहीनस्तु नैव शोभान्वितो भवेत् ।
शारीराभिनयोऽल्पोऽपि मुखरागसमन्वितः ॥ १६७ ॥
द्विगुणां लभते शोभां रात्राविव निशाकरः ।
नयनाभिनयोऽपि स्यान्नानाभावरसान्वितः ॥ १६८ ॥
मुखरागान्वितो यस्मान्नाटयमत्र प्रतिष्ठितम् ।
यथा नेत्रं प्रसर्पेत मुखभ्रूदृष्टिसंयुतम् ॥ १६९ ॥
तथा भावरसोपेतं मुखरागं प्रयोजयेत् ।
इत्येष मुखरागस्तु प्रोक्तो भावरसाश्रयः ॥ १७० ॥

पदच्छेदः - शाखा-अङ्ग-उपाङ्गसंयुक्तः कृतः अपि अभिनयः शुभः ॥ १६६ ॥
मुखरागविहीनः तु न एव शोभा-अन्वितः भवेत् ।
शारीर-अभिनयः अल्पः अपि मुखराग-समन्वितः ॥ १६७ ॥
द्विगुणां लभते शोभां रात्रौ इव निशाकरः ।
नयन-अभिनयः अपि स्यात् नानाभाव-रसान्वितः ॥ १६८ ॥
मुखराग-अन्वितः यस्मात् नाट्यम् अत्र प्रतिष्ठितम् ।
यथा नेत्रं प्रसर्पेत मुखभ्रूदृष्टिसंयुतम् ॥ १६९ ॥
तथा भावरस-उपेतं मुखरागं प्रयोजयेत् ।
इति एषः मुखरागः तु प्रोक्तः भावरसाश्रयः ॥ १७० ॥

अन्वयः - मुखरागविहीनः शाखा-अङ्ग-उपाङ्ग-संयुक्तः कृतः अपि शुभः अभिनयः शोभा-अन्वितः न एव भवेत् । मुखराग-समन्वितः अल्पः अपि शारीर-अभिनयः द्विगुणां शोभां लभते रात्रौ निशाकरः इव ।
मुखराग-अन्वितः नयन-अभिनयः अपि नानाभाव-रसान्वितः स्यात् । यस्मात् नाट्यम्

अत्र प्रतिष्ठितम् | यथा मुखभ्रूदृष्टिसंयुतं नेत्रं प्रसर्पेत | तथा भावरस-उपेतं मुखरागं प्रयोजयेत् |
इति एष : मुखराग : तु भावरसाश्रय : प्रोक्त : |

अर्थ - मुखरागाशिवाय शाखा, अंग आणि उपांगांचा अभिनय उत्तमप्रकारे केला तरी तो अभिनय शोभून दिसत नाही . परंतु मुखरागासह फक्त थोडासा जरी शरीराभिनय केला तर तो पौर्णिमेच्या रात्रीतील चंद्राप्रमाणे शोभा द्विगुणित करेल . मुखरागाने युक्त नेत्राभिनय विविध प्रकारच्या भाव आणि रसांना चांगल्या पद्धतीने व्यक्त करतात . म्हणूनच नाट्य हे या मुखरागांवरच अवलंबून असते . ज्याप्रमाणे मुख, भुवया , दृष्टी इ . नी युक्त नेत्रांचा संचार होतो त्याचप्रमाणे रस आणि भावांनी युक्त असलेल्या मुखरागाचा प्रयोग करावा . याप्रमाणे भाव आणि रसांना आश्रयभूत असलेल्या मुखरागाचे विवेचन केले .

## ❖ ग्रीवाप्रकार, लक्षणे व विनियोग ❖

अत: परं प्रवक्ष्यामि ग्रीवाकर्माणि वै द्विजा: |
समा नतोन्नता त्र्यश्रा रेचिता कुञ्चिताञ्चिता || १७१ ||
वलिता च विवृत्ता च ग्रीवा नवविधार्थत: |

पदच्छेद: - अत : परं प्रवक्ष्यामि ग्रीवाकर्माणि वै द्विजा : |
समा नता-उन्नता त्र्यश्रा रेचिता कुञ्चिताअञ्चिता || १७१ ||
वलिता च विवृत्ता च ग्रीवा नव-विधार्थत : |

अन्वय: - हे द्विजा :, अत : परं ग्रीवाकर्माणि प्रवक्ष्यामि | समा नता-उन्नता त्र्यश्रा रेचिता कुञ्चिता अञ्चिता वलिता विवृत्ता च ग्रीवा नव-विधार्थत : (अस्ति) |

अर्थ - हे मुनीजनांनो, आता मी तुम्हाला ग्रीवेचे (मानेचे) प्रकार सांगतो . १. समा २. नता ३. उन्नता ४. त्र्यश्रा ५. रेचिता ६. कुंचिता ७.अंचिता ८.वलिता ९.विवृत्ता असे नऊ प्रकारचे ग्रीवाभेद आहेत .

समा स्वाभाविकी ध्यानस्वभावजपकर्मसु ॥ १७२ ॥
नता नतास्याऽलङ्कारबन्धे कण्ठावलम्बने ।
उन्नताभ्युन्नतमुखी ग्रीवा चोर्ध्वादिदर्शने ॥ १७३ ॥
त्र्यश्रा पार्श्वगता ज्ञेया स्कन्धभारे च दु:खिते ।
रेचिता विधुता भ्रान्ता हावे मथननृत्तयो: ॥ १७४ ॥
कुञ्चिताऽकुञ्चिता मूर्ध्नि भारिते गलरक्षणे ।

पदच्छेद: - समा स्वाभाविकी ध्यान-स्वभाव-जपकर्मसु ॥ १७२ ॥
नता नतास्या अलङ्कार-बन्धे कण्ठ-अवलम्बने ।
उन्नता अभ्युन्नत-मुखी ग्रीवा च ऊर्ध्वादि-दर्शने ॥ १७३ ॥
त्र्यश्रा पार्श्वगता ज्ञेया स्कन्धभारे च दु:खिते ।
रेचिता विधुता भ्रान्ता हावे मथन-नृत्तयो: ॥ १७४ ॥
कुञ्चिता आकुञ्चिता मूर्ध्नि भारिते गल-रक्षणे ।

अन्वय: - स्वाभाविकी समा (ग्रीवा) ध्यान-स्वभाव-जपकर्मसु (योज्या) ।
नतास्या नता (ग्रीवा) अलङ्कार-बन्धे कण्ठावलम्बने (नियोज्या) ।
अभ्युन्नत-मुखी उन्नता ग्रीवा च ऊर्ध्वादि-दर्शने (प्रयोज्या) ।
पार्श्वगता त्र्यश्रा ज्ञेया स्कन्धभारे दु:खिते च (योक्तव्या) ।
विधुता भ्रान्ता रेचिता (ग्रीवा) हावे मथन-नृत्तयो: (प्रयोक्तव्या) ।
आकुञ्चिता कुञ्चिता (ग्रीवा) मूर्ध्नि भारिते गलरक्षणे (योजनीया) ।

अर्थ - स्वाभाविक अवस्थेत असलेल्या मानेला 'सम' असे म्हणतात. हिचा वापर ध्यान, सहजभाव, जपकर्मामध्ये करावा.

जर मान झुकलेली असेल तर ती 'नता' म्हटली जाते. अलंकार धारण करताना तसेच दुसऱ्या व्यक्तिच्या मानेचा आधार घेताना हिचा उपयोग करावा.

चेहरा वरच्या बाजूला करून उंचावलेली मान म्हणजे 'उन्नता'. वर बघण्याच्या भावामध्ये हिचा वापर करावा.

जर मानेला एका बाजूला वाकविले तर तिला 'त्र्यश्रा' असे म्हणतात. खांद्यावर जड

ओझे वाहणे, आणि दु :ख व्यक्त करताना हिचा वापर करावा .

जेव्हा मान कंपित किंवा फिरती राहते तेव्हा तिला 'रेचिता' म्हणतात . हावप्रदर्शन, नृत्त आणि मंथनामध्ये हिचा उपयोग केला जातो .

जेव्हा डोक्यासह मानेला खालच्या बाजूला झुकविले जाते, तेव्हा तिला 'कुंचिता' असे म्हणतात .

जड ओझे उचलणे तसेच गळ्याचे रक्षण करण्यासाठी हिचा उपयोग करावा .

अञ्चिताऽपसृतोद्बद्धकेशकर्षोर्ध्वदर्शने ॥ १७५ ॥
पार्श्वोन्मुखी स्याद्वलिता ग्रीवाभङ्गे च वीक्षिते ।
विवृत्ताभिमुखीभूता स्वस्थानाभिमुखादिषु ॥ १७६ ॥

पदच्छेद : - अञ्चिता अपसृता उद्बद्ध-केशकर्ष-ऊर्ध्वदर्शने ॥ १७५ ॥
पार्श्वोन्मुखी स्यात् वलिता ग्रीवाभङ्गे च वीक्षिते ।
विवृत्ता अभिमुखीभूता स्वस्थान-अभिमुख-आदिषु ॥ १७६ ॥

अन्वय : - अपसृता अञ्चिता (ग्रीवा)उद्बद्ध-केशकर्ष-ऊर्ध्वदर्शने (प्रयोज्या) ।
पार्श्वोन्मुखी वलिता स्यात् ग्रीवाभङ्गे च वीक्षिते (प्रयोक्तव्या) ।
अभिमुखीभूता विवृत्ता (ग्रीवा) स्वस्थान-अभिमुख-आदिषु (प्रयोजनीया) ।

अर्थ - जेव्हा मान मागच्या बाजूला वळलेली असते तेव्हा तिला 'अंचिता' असे म्हणतात . फासावर लटकणे, केस ओढणे आणि वर बघण्यासाठी हिचा उपयोग होतो .

जेव्हा मान काखेकडे वळविली जाते तेव्हा त्यास 'वलिता' असे म्हणतात . वाकून बघण्यासाठी हिचा उपयोग होतो .

जेव्हा मान समोर स्थिर असते ती 'विवृत्ता' होय . स्वत :च्या गंतव्य स्थानाकडे प्रस्थान करण्यासाठी हिचा उपयोग होतो .

इत्यादिलोकभावार्था ग्रीवा भेदैरनेकधा ।
ग्रीवाकर्माणि सर्वाणि शिर :कर्मानुगानि हि ॥ १७७ ॥
शिरस : कर्मणा कर्म ग्रीवाया : संप्रवर्तते

पदच्छेद : - इत्यादि-लोक-भावार्था ग्रीवा भेदै : अनेकधा |
ग्रीवाकर्माणि सर्वाणि शिर : कर्मानुगानि हि || १७७ ||
शिरस : कर्मण : कर्म ग्रीवाया : संप्रवर्तते |

अन्वय : - इत्यादि-लोक-भावार्था ग्रीवा भेदै : अनेकधा (अस्ति) |
ग्रीवाकर्माणि सर्वाणि शिर : कर्मानुगानि हि (सन्ति) |
शिरस : कर्मणा ग्रीवाया : कर्म संप्रवर्तते |

अर्थ - याप्रमाणे माणसांच्या भाव आणि व्यवहाराप्रमाणे मानेचे अनेक भेद सांगितले. ग्रीवांची कर्मे मस्तकाच्या क्रियेला अनुसरणारी असतात. म्हणूनच शिरकर्मासह ग्रीवाकर्म होतील.

इत्येतल्लक्षणं प्रोक्तं शीर्षोपाङ्गसमाश्रयम् || १७८ ||
अङ्गकर्माणि शेषाणि गदतो मे निबोधत || १७९ ||

पदच्छेद : - इति एतत् लक्षणं प्रोक्तं शीर्ष-उपाङ्ग-समाश्रयम् || १७८ ||
अङ्गकर्माणि शेषाणि गदत : मे निबोधत || १७९ ||


अन्वय : - इति शीर्ष-उपाङ्ग-समाश्रयम् एतत् लक्षणं प्रोक्तम् | शेषाणि अङ्गकर्माणि गदत : मे (यूयं) निबोधत |


अर्थ - याप्रकारे मी शीर्षाच्या उपांगांची लक्षणे सांगितली . आता मी उरलेल्या अंगांचे प्रकार व लक्षणे सांगतो, जे तुम्ही योग्यरीत्या जाणून घ्या .

|| इति श्रीभारतीये नाट्यशास्त्रे 'उपाङ्गाभिनय:' नाम अष्टम : अध्याय : ||

|| भरताच्या नाट्यशास्त्रातील 'उपांगाभिनय' नावाचा आठवा अध्याय पूर्ण झाला ||

# नववा अध्याय
# अंगाभिनय





# नववा अध्याय

## अंगाभिनय

### ❖ हस्ताभिनय ❖

एवमेतच्छिरोनेत्रभ्रूनासोष्ठकपोलजम् |
कर्म लक्षणसंयुक्तमुपाङ्गानां मयोदितम् ‖ १ ‖
हस्तोर:पार्श्वजठरकटीजङ्घोरुपादत: |
लक्षणं सम्प्रवक्ष्यामि विनियोगं च तत्त्वत: ‖ २ ‖
हस्तादीनां प्रवक्ष्यामि कर्म नाट्यप्रयोजकम् |
यथा येनाभिनेयं च गदतो मे निबोधत ‖ ३ ‖

पदच्छेद: - एवम् एतत् शिरो-नेत्र-भ्रू-नासा-ओष्ठ-कपोलजम् |
कर्म लक्षणसंयुक्तम् उपाङ्गानां मया उदितम् ‖ १ ‖
हस्त-उर:-पार्श्व-जठर-कटी-जङ्घा-ऊरु-पादत: |
लक्षणं सम्प्रवक्ष्यामि विनियोगं च तत्त्वत: ‖ २ ‖
हस्त-आदीनां प्रवक्ष्यामि कर्म नाट्यप्रयोजकम् |
यथा येन अभिनेयं च गदत: मे निबोधत ‖ ३ ‖

अन्वय: - एवं मया एतत् शिरो-नेत्र-भ्रू-नासा-ओष्ठ-कपोलजम् उपाङ्गानां लक्षणसंयुक्तं कर्म उदितम् | हस्त-उर-पार्श्व-जठर-कटी-जङ्घा-ऊरु-पादत: तत्त्वत: लक्षणं विनियोगं च प्रवक्ष्यामि | मे गदत: हस्तादीनां नाट्यप्रयोजकं कर्म यथा येन अभिनेयं तत् निबोधत |

अर्थ - भरतमुनी म्हणाले – हे मुनीजन, आतापर्यंत मी तुम्हांला शिर, नेत्र, भुवया, नासिका, ओठ आणि गाल इ. उपांगांची लक्षणे आणि विनियोग सांगितले. आता मी क्रमश: हस्त (हात), वक्ष (छाती), पार्श्व (बाजू), जठर (पोट), कटी (कंबर), जंघा (पोटऱ्या), ऊरू (मांड्या) आणि पाद (पाय) यांची लक्षणे आणि त्यांचे विनियोग सांगतो. त्यापुढे नाट्यप्रयोगामध्ये हस्त इ.चा होणारा अभिनय कुठल्या व्यक्तीद्वारे कसा करावा ते सांगतो, ते जाणून घ्या.

### ❖ असंयुतहस्ताचे प्रकार ❖

पताकस्त्रिपताकश्च तथा वै कर्तरीमुखः।
अर्धचन्द्रो ह्यरालश्च शुकतुण्डस्तथैव च ॥ ४ ॥
मुष्टिश्च शिखराख्यश्च कपित्थः खटकामुखः।
सूच्यास्यः पद्मकोशः सर्पशिरा मृगशीर्षकः ॥ ५ ॥
काङ्गूलकोऽलपद्मश्च चतुरो भ्रमरस्तथा।
हंसास्यो हंसपक्षश्च सन्दंशो मुकुलस्तथा ॥ ६ ॥
ऊर्णनाभस्ताम्रचूडश्चतुर्विंशतिरीरिताः।
असंयुताः संयुतांश्च गदतो मे निबोधत ॥ ७ ॥

पदच्छेदः - पताकः त्रिपताकः च तथा वै कर्तरीमुखः।
अर्धचन्द्रः हि अरालः च शुकतुण्डः तथा एव च ॥ ४ ॥
मुष्टिः च शिखराख्यः च कपित्थः खटकामुखः।
सूच्यास्यः पद्मकोशः सर्पशिराः मृगशीर्षकः ॥ ५ ॥
काङ्गूलकः अलपद्मः च चतुरः भ्रमरः तथा।
हंसास्यः हंसपक्षः च सन्दंशः मुकुलः तथा ॥ ६ ॥
ऊर्णनाभः ताम्रचूडः चतुर्विंशतिः ईरिताः।
असंयुताः संयुतान् च गदतः मे निबोधत ॥ ७ ॥

अन्वयः - पताकः, त्रिपताकः, कर्तरीमुखः, अर्धचन्द्रः, अरालः, शुकतुण्डः, मुष्टिः, शिखराख्यः, कपित्थः, खटकामुखः, सूच्यास्यः, पद्मकोशः, सर्पशिराः, मृगशीर्षकः, काङ्गूलकः, अलपद्मः, चतुराः, भ्रमरः, हंसास्यः, हंसपक्षः, सन्दशः, मुकुलः, ऊर्णनाभः, ताम्रचूडः इति चतुर्विंशतिः असंयुताः (हस्ताः) ईरिताः। मे गदतः संयुतान् (हस्तान्) निबोधत।

अर्थ - असंयुत (एकत्र नसलेले) हस्त एकूण चोवीस आहेत.
१.पताक, २. त्रिपताक, ३. कर्तरीमुख ४. अर्धचंद्र , ५. अराल, ६. शुकतुंड, ७. मुष्टी, ८. शिखर, ९. कपित्थ, १०. कटकामुख, ११. सूचीमुख, १२. पद्मकोष, १३. सर्पशीर्ष, १४. मृगशीर्ष, १५. कांगुलक, १६. अलपद्म, १७. चतुर, १८. भ्रमर, १९. हंसास्य, २०. हंसपक्ष, २१. संदश, २२. मुकुल, २३. ऊर्णनाभ, २४. ताम्रचूड

❖ संयुतहस्ताचे प्रकार ❖

अञ्जलिश्च कपोतश्च कर्कटः स्वस्तिकस्तथा |
खटकावर्धमानश्च ह्युत्संगो निषधस्तथा || ८ ||
दोलः पुष्पपुटश्चैव तथा मकर एव च |
गजदन्तोऽवहित्थश्च वर्धमानस्तथैव च || ९ ||
एते तु संयुता हस्ता मया प्रोक्तास्त्रयोदश |
नृत्तहस्तानतश्चोर्ध्वं गदतो मे निबोधत ||१० ||

पदच्छेदः - अञ्जलिः च कपोतः च कर्कटः स्वस्तिकः तथा |
खटकावर्धमानः च हि उत्संगः निषधः तथा || ८ ||
दोलः पुष्पपुटः च एव तथा मकरः एव च |
गजदन्तः अवहित्थः च वर्धमानः तथा एव च || ९ ||
एते तु संयुताः हस्ताः मया प्रोक्ताः त्रयोदश |
नृत्तहस्तान् अतः च ऊर्ध्वं गदतः मे निबोधत ||१० ||

अन्वयः - अञ्जलिः, कपोतः, कर्कटः, स्वस्तिकः, खटकावर्धमानः, उत्संगः, निषधः, दोलः, पुष्पपुटः, मकरः, गजदन्तः, अवहित्थः, वर्धमानः च एते त्रयोदश हस्ताः मया ऊर्ध्वं प्रोक्ताः | मे गदतः नृत्तहस्तान् निबोधत |

अर्थ - संयुत (एकत्र असणारे) हस्त एकूण तेरा प्रकारचे आहेत .
१. अंजली, २. कपोत, ३. कर्कट, ४. स्वस्तिक, ५. खटकावर्धमानक, ६. उत्संग , ७. निषध, ८. दोला, ९. पुष्पपुट, १०. मकर, ११. गजदंत, १२. अवहित्थ, १३. वर्धमान .

❖ नृत्तहस्ताचे प्रकार ❖

चतुरश्रौ तथोद्वृत्तौ तथा तलमुखौ स्मृतौ |
स्वस्तिकौ विप्रकीर्णौ चाप्यरालखटकामुखौ || ११ ||
आविद्धवक्रौ सूच्यास्यौ रेचितावर्धरेचितौ |

उत्तानवञ्चितौ चैव पल्लवौ च तथा करौ ॥ १२ ॥
नितम्बावपि विज्ञेयौ केशबन्धौ तथैव च ।
लताख्यौ च तथा प्रोक्तौ करिहस्तौ तथैव च ॥ १३ ॥
पक्षवञ्चितकौ चैव, पक्षप्रद्योतकौ तथा ।
ज्ञेयौ गरुडपक्षौ च दण्डपक्षावतः परम् ॥ १४ ॥
ऊर्ध्वमण्डलिनौ चैव, पार्श्वमण्डलिनौ तथा ।
उरोमण्डलिनौ चैव उरःपार्श्वार्धमण्डलौ ॥ १५ ॥
मुष्टिकस्वस्तिकौ चापि नलिनीपद्मकोशकौ ।
अलपल्लवोल्बणौ च ललितौ वलितौ तथा ॥ १६ ॥
चतुष्षष्टिकरा ह्येते नामतोऽभिहिता मया ।
यथालक्षणमेतेषां कर्माणि च निबोधत ॥ १७ ॥

पदच्छेदः - चतुरश्रौ तथा उद्धृत्तौ तथा तलमुखौ स्मृतौ ।
स्वस्तिकौ विप्रकीर्णौ च अपि अरालखटकामुखौ ॥ ११ ॥
आविद्धवक्रौ सूच्यास्यौ रेचितौ अर्धरेचितौ ।
उत्तानवञ्चितौ चैव पल्लवौ च तथा करौ ॥ १२ ॥
नितम्बौ अपि विज्ञेयौ केशबन्धौ तथैव च ।
लता-आख्यौ च तथा प्रोक्तौ करिहस्तौ तथैव च ॥ १३ ॥
पक्ष-वञ्चितकौ चैव, पक्ष-प्रद्योतकौ तथा ।
ज्ञेयौ गरुडपक्षौ च दण्डपक्षौ अतः परम् ॥ १४ ॥
ऊर्ध्वमण्डलिनौ चैव, पार्श्वमण्डलिनौ तथा ।
उरोमण्डलिनौ चैव उरःपार्श्वार्ध-मण्डलौ ॥ १५ ॥
मुष्टिकस्वस्तिकौ च अपि नलिनीपद्म-कोशकौ ।
अलपल्लवोल्बणौ च ललितौ वलितौ तथा ॥ १६ ॥
चतुःषष्टिकराः हि एते नामतः अभिहिताः मया ।
यथालक्षणम् एतेषां कर्माणि च निबोधत ॥ १७ ॥

अन्वय: - चतुरश्रौ, उद्वृत्तौ, तलमुखौ, स्वस्तिकौ, विप्रकीर्णौ, अरालखटकामुखौ, आविद्धवक्रौ, सूच्यास्यौ, रेचितौ, अर्धरेचितौ, उत्तानौ, अवञ्चितौ, पल्लवौ, नितम्बौ, केशबन्धौ, लताख्यौ, कारिहस्तौ, पक्षवञ्चितकौ, पक्षप्रद्योतकौ, गरूडपक्षौ, दण्डपक्षौ, ऊर्ध्व मण्डलिनौ, पार्श्वमण्डलिनौ, उरोमण्डलिनौ, उर:पाश्वार्धमण्डलौ, मुष्टिकस्वस्तिकौ, नलिनीपद्मकोशकौ, अलपल्लवौ, उल्बणौ, ललितौ, तथा वलितौ हस्तौ (एते त्रिंशत् हस्ता:)|

एते सप्तषष्टिकरा: मया नामत: अभिहिता:| एतेषां कर्माणि च यथालक्षणं निबोधत|

अर्थ - आता तीस प्रकारचे नृत्तहस्त सांगत आहे. १. चतुरश्र, २. उद्वृत्त, ३. तलमुख, ४. स्वस्तिक, ५. विप्रकीर्ण, ६. अरालकटकामुख, ७. आविद्धवक्र, ८. सूच्यास्य, ९. रेचित , १०. अर्धरेचित, ११. उत्तानवंचित, १२. पल्लव, १३.नितंब, १४. केशबंध, १५. लता, १६. करिहस्त, १७.पक्षवंचितक, १८. पक्षप्रद्योतक, १९. गरुडपक्ष, २०. दंडपक्ष, २१. ऊर्ध्वमंडलिन, २२. पार्श्वमंडलिन, २३.उरोमंडली, २४. उर:पार्श्वमंडली, २५. मुष्टिकस्वस्तिक, २६.नलिनीपद्मकोष, २७. अलपल्लव, २८. उल्बण, २९.ललित तसेच ३०. वलित.

याप्रमाणे सदुसष्ट हस्त संज्ञा सांगितल्या.आता मी त्यांची लक्षणे आणि विनियोग सांगतो.

### ❖ असंयुतहस्ताची लक्षणे आणि विनियोग ❖

### ❖ पताकहस्ताचे लक्षण ❖

प्रसारिता: समा: सर्वा: यस्याङ्गुल्यो भवन्ति हि|
कुञ्चितश्च तथाङ्गुष्ठ: स पताक इति स्मृत: || १८ ||

पदच्छेद: - प्रसारिता: समा: सर्वा: यस्य अङ्गुल्य: भवन्ति हि|
कुञ्चित: च तथा अङ्गुष्ठ: स: पताक: इति स्मृत: || १८ ||

अन्वय: - यस्य सर्वा: अङ्गुल्य: समा: प्रसारिता: भवन्ति तथ अंगुष्ठ: कुञ्चित: च (भवति) स: पताक: इति स्मृत:|

अर्थ - सर्व बोटे प्रसारित करून अंगठा वाकवून तर्जनीच्या मुळाशी ठेवल्यास 'पताकहस्त' होतो .

❖ पताकहस्ताचे विनियोग ❖

एष प्रहारपाते प्रतापने नोदने प्रहर्षे च |
गर्वेऽप्यहमिति तज्ज्ञैर्ललाटदेशोत्थित: कार्य: || १९ ||

पदच्छेद: - एष: प्रहारपाते प्रतापने नोदने प्रहर्षे च |
गर्वे अपि अहम् इति तज्ज्ञै: ललाटदेश-उत्थित: कार्य: || १९ ||

अन्वय: - तज्ज्ञै: प्रहारपाते, प्रतापने, नोदने, प्रहर्षे, अहम् इति गर्वे अपि एष: ललाटदेशोत्थित: कार्य: |

अर्थ - पताकहस्ताचा विनियोग =
प्रहार करणे, थंडी घालविण्यासाठी शेकोटी करणे, प्रेरणा देणे, हर्ष आणि 'मी' असा गर्व दाखविणे यांसाठी पताक हस्ताचा वापर कपाळापर्यंत नेऊन करावा .

एषोऽग्निवर्षधारानिरूपणे पुष्पवृष्टिपतने च |
संयुतकरण: कार्य: प्रविरलचलिताङ्गुलिर्हस्त: || २० ||

पदच्छेद: - एष: अग्निवर्षधारा-निरूपणे पुष्पवृष्टि-पतने च |
संयुतकरण: कार्य: प्रविरल-चलित-अङ्गुलि: हस्त: || २० ||

अन्वय: - अग्निवर्षधारा-निरूपणे पुष्पवृष्टि-पतने च एष: संयुतकरण: प्रविरल-चलिताङ्गुलि: हस्त: कार्य: |

अर्थ - दोन्ही पताक हस्तांची बोटे किंचित विभक्त ठेवून आणि कंपित करून पाऊस, पुष्पवृष्टी, अग्निच्या ज्वाळा इ . चा अभिनय करावा .

स्वस्तिकविच्युतिकरणात्पल्वलपुष्पोपहारशष्पाणि |
विरचितमुर्वीसंस्थं यद्द्रव्यं तच्च निर्देश्यम् || २१ ||

पदच्छेद : - स्वस्तिक-विच्युति-करणात् पल्वल-पुष्प-उपहार-शष्पाणि |
विरचितम् ऊर्वीसंस्थं यत् द्रव्यं तत् च निर्देश्यम् || २१ ||

अन्वय : - स्वस्तिक-विच्युति-करणात् पल्वल-पुष्पोपहार-शष्पाणि, ऊर्वीसंस्थं यत् विरचितं द्रव्यं तत् च निर्देश्यम् |

अर्थ - दोन्ही पताक हस्त स्वस्तिक (जोडून) करून त्यांना पूर्ववत वेगळे केल्यास त्याद्वारे फुले व पाने अर्पण करणे, हलणारे गवत आणि जमिनीवरील वस्तू इ. दाखवावे.

स्वस्तिकविच्युतिकरणात्पुनरेवाधोमुखेन कर्तव्यम् |
संवृतविवृतं पाल्यं छन्नं निबिडं च गोप्यं च || २२ ||

पदच्छेद : - स्वस्तिक-विच्युति-करणात् पुन : एव अधोमुखेन कर्तव्यम् |
संवृतविवृतं पाल्यं छन्नं निबिडं च गोप्यं च || २२ ||

अन्वय : - स्वस्तिक-विच्युति-करणात् पुन : संवृतविवृतं, पाल्यं, छन्नं, निबिडं, गोप्यं च अधोमुखेन कर्तव्यम् |

अर्थ - दोन्ही स्वस्तिक हातांना एकमेकांपासून दूर करून अधोमुख करावे. त्याद्वारे वस्तूंची उघड-झाप करणे, रक्षा करणे, झाकणे, वस्तू घट्ट करणे किंवा लपविणे असा भाव प्रदर्शित होतो.

अस्यैव चाङ्गुलीभिस्त्वधोमुखप्रस्थितोत्थितचलाभि: |
वायूर्मिवेगवेलाक्षोभश्चौघश्च कर्तव्य: || २३ ||

पदच्छेद : - अस्य एव च अङ्गुलीभि : तु अधोमुख-प्रस्थित-उत्थित-चलाभि : |
वायु-ऊर्मि-वेग-वेला-क्षोभ : च ओघ : च कर्तव्य : || २३ ||

अन्वय : - अस्य (हस्तस्य) एव अधोमुख-प्रस्थितोत्थित-चलाभि: अङ्गुलीभि: वायु-ऊर्मि वेग-वेला-क्षोभ : च ओघ : च कर्तव्य : |

अर्थ - जर ह्याच हातांना खाली नेऊन वर उचलले आणि त्याचवेळी बोटे हलविल्यास वाऱ्याची गती, लाटांचा वेग, समुद्राची वेळ (भरती-आहोटी), क्षोभ आणि महापुराचा प्रवाह दाखविता येतो.

उत्साहनं बहु तथा महाजनप्रांशुपुष्करप्रहतम् |
पक्षोत्क्षेपाभिनयं रेचककरणेन कुर्वीत || २४ ||

पदच्छेद: - उत्साहनं बहु तथा महाजन-प्रांशु-पुष्कर-प्रहतम् |
पक्ष-उत्क्षेप-अभिनयं रेचक-करणेन कुर्वीत || २४ ||

अन्वय: - रेचक-करणेन उत्साहनं, बहु महाजन-प्रांशु-पुष्कर-प्रहतं तथा पक्ष-उत्क्षेप-अभिनयं प्रयुञ्जीत |

अर्थ - या हातांनी रेचक करणाद्वारे इतरांना प्रोत्साहन देणे , खूप माणसांचा गोंगाट दाखवणे उंची दाखवणे, चर्मवाद्य वाजविणे तसेच पक्ष्यांचे फडफडणे इ . चा अभिनय करावा .

परिघृष्टतलस्थेन तु धौतं मृदितं प्रमृष्टपिष्टे च |
पुनरेव शैलधारणमुद्धाटनमेव चाभिनयेत् || २५ ||

पदच्छेद: - परिघृष्ट-तलस्थेन तु धौतं मृदितं प्रमृष्टपिष्टे च |
पुनरेव शैलधारणम् उद्घाटनम् एव च अभिनयेत् || २५ ||

अन्वय: - प्रमृष्टपिष्टे धौतं मुदितं शैलधारणम् उद्घाटनं च परिघृष्ट-तलस्थेन च अभिनयेत् |

अर्थ - दोन्ही हाताचे तळवे एकमेकांवर घासून त्याद्वारे धुणे, चोळणे, घासणे, गुंफणे, वाटणे (चुरा करणे) पर्वताला उचलणे किंवा उपटणे इ . भाव दाखवता येतात .

[दशाख्याश्च शताख्याश्च सहस्राख्यास्तथैव च |
पताकाभ्यां तु हस्ताभ्यामभिनेया: प्रयोक्तृभि:]|| २६ ||
एवमेष प्रयोक्तव्य: स्त्रीपुंसाभिनये कर: |
अत: परं प्रवक्ष्यामि त्रिपताकस्य लक्षणम् || २७ ||

पदच्छेद: - [दशाख्या: च शताख्या: च सहस्राख्या: तथा एव च |
पताकाभ्यां तु हस्ताभ्याम् अभिनेय: प्रयोक्तृभि:]|| २६ ||
एवम् एष: प्रयोक्तव्य: स्त्रीपुंसाभिनये कर: |
अत: परं प्रवक्ष्यामि त्रिपताकस्य लक्षणम् || २७ ||

अन्वय : - प्रयोक्तृभि : पताकाभ्यां हस्ताभ्यां दशाख्या : शताख्या : तथैव सहस्राख्या : च अभिनेया : |
एवं स्त्रीपुंसाभिनये एष : कर : प्रयोक्तव्य : | अत : परं त्रिपताकस्य लक्षणं प्रवक्ष्यामि |

अर्थ - प्रयोग करणाऱ्यांनी या पताकहस्ताद्वारे दहा, शंभर किंवा हजारो प्रकारचे अभिनय दाखवावे .

अशा प्रकारे स्त्री आणि पुरुषांनी अभिनयामध्ये पताकहस्ताचा प्रयोग करावा . यापुढे मी 'त्रिपताक हस्ताचे' लक्षण सांगत आहे .

### ❖ त्रिपताकहस्ताचे लक्षण ❖

पताके तु यदा वक्रानामिका त्वङ्गुलिर्भवेत् |
त्रिपताक: स विज्ञेय: कर्म चास्य निबोधत || २८ ||

### ❖ त्रिपताकहस्ताचे विनियोग ❖

आवाहनमवतरणं विसर्जनं वारणं प्रवेशश्च |
उन्नमनं प्रणामो निदर्शनं विविधवचनं च || २९ ||
मङ्गल्यद्रव्याणां स्पर्श: शिरसोऽथ सन्निवेशश्च |
उष्णीषमकुटधारणनासास्यश्रोत्रसंवरणम् || ३० ||

पदच्छेद : - पताके तु यदा वक्रा अनामिका तु अङ्गुलि : भवेत् |
त्रिपताक : स विज्ञेय : कर्म च अस्य निबोधत || २८ ||
आवाहनम् अवतरणं विसर्जनं वारणं प्रवेश : च |
उन्नमनं प्रणाम : निदर्शनं विविधवचनं च || २९ ||
मङ्गल्य-द्रव्याणां स्पर्श : शिरस : अथ सन्निवेश : च |
उष्णीष-मकुट-धारण-नासा-आस्य-श्रोत्र-संवरणम् || ३० ||

अन्वय : - यदा पताके अनामिका अङ्गुलि : वक्रा भवेत् , स : त्रिपताक : विज्ञेय : | अस्य कर्म च निबोधत | आवाहनम्, अवतरणं, विसर्जनं, वारणं, प्रवेश :, उन्नमनं, प्रणाम :, निदर्शनं, विविधवचनं, मङ्गल्य-द्रव्याणां स्पर्श :, शिरस : सन्निवेश : उष्णीष-मुकुट-धारणं, नासा-आस्य-श्रोत्र-संवरणं च |

अर्थ - जेव्हा पताक हस्तामध्ये अनामिका बोट वाकविले जाते तेव्हा त्यास 'त्रिपताक' हस्त असे म्हणतात. आता पुढे या हातांद्वारे होणारे कार्य मी सांगतो. आवाहन करणे, खाली उतरणे, विसर्जित करणे, दूर करणे , प्रवेश करणे, वर चढणे, प्रणाम करणे , तुलना करणे, निदर्शन करणे, अनेक प्रकारे बोलणे, मंगल वस्तूंना स्पर्श करणे तसेच डोक्यावर पगडी किंवा मुकुट धारण करणे आणि नाक, तोंड, कान झाकणे इत्यादींसाठी त्रिपताक हस्त वापरला जातो .

अस्यैव चाङ्गुलीभ्यामधोमुखप्रस्थितोत्थितचलाभ्याम् |
लघुखगपतनस्रोतोभुजगभ्रमरादिकान्कुर्यात् ‖ ३१ ‖

पदच्छेद: - अस्य एव च अङ्गुलीभ्याम् अधोमुख-प्रस्थित-उत्थित-चलाभ्याम् |
लघुखग-पतनस्रोतो- भुजग-भ्रमर-आदिकान् कुर्यात् ‖ ३१ ‖

अन्वय: - अस्य (हस्तस्य) एव अधोमुख-प्रस्थित-उत्थित-चलाभ्याम् अङ्गुलीभ्यां लघुखगपतन-स्रोतो-भुजग-भ्रमरादिकान् कुर्यात् |

अर्थ - जेव्हा दोन्ही त्रिपताक हस्त खालच्या बाजूला नेऊन बोटे वर ठेवून ती कंपित केली जातात, तेव्हा त्याद्वारे छोट्या पक्ष्यांचे पडणे, झरा, साप आणि भुंगा इ. दाखवता येते .

अश्रुप्रमार्जनं तिलकविरचनं रोचनालभनकं च |
त्रिपताकानामिकयो: स्पर्शनमलकस्य कर्तव्यम् ‖ ३२ ‖

पदच्छेद: - अश्रुप्रमार्जनं तिलक-विरचनं रोचना-आलभनकं च |
त्रिपताका-अनामिकयो: स्पर्शनम् अलकस्य कर्तव्यम् ‖ ३२ ‖

अन्वय: - त्रिपताका-अनामिकयो: अश्रुप्रमार्जनं तिलक-विरचनं रोचना-आलभनकं अलकस्य स्पर्शनं च कर्तव्यम् |

अर्थ - त्रिपताक हस्ताच्या कोणत्याही अनामिकेद्वारे अश्रू पुसणे, टिळा लावणे, गोरोचनाचा टिळा लावणे आणि केसांचा स्पर्श इ. दाखविले जाते .

स्वस्तिकौ त्रिपताकौ तु गुरूणां पादवन्दने |
परस्पराग्रसंश्लिष्टौ कार्यावुद्वाहदर्शने ‖ ३३ ‖

पदच्छेद :- स्वस्तिकौ त्रिपताकौ तु गुरूणां पादवन्दने |
परस्पर-अग्र-संश्लिष्टौ कार्यौ उद्वाहदर्शने ॥ ३३ ॥

अन्वय : - गुरूणां पादवन्दने त्रिपताकौ स्वस्तिकौ (कार्यौ)| उद्वाहदर्शने परस्पर-अग्र-संश्लिष्टौ कार्यौ |

अर्थ - गुरूजनांचे चरणस्पर्श दाखवण्यासाठी त्रिपताक हस्त स्वस्तिक करावेत. लग्न दाखविण्यासाठी दोन्ही त्रिपताक हस्ताचे अग्रभाग एकत्र आणले जातात .

विच्युतौ चलितावस्थौ कर्तव्यौ नृपदर्शने |
तिर्यक्स्वस्तिकसंबद्धौ स्यातां तौ ग्रहदर्शने ॥ ३४ ॥

पदच्छेद :- विच्युतौ चलित-अवस्थौ कर्तव्यौ नृपदर्शने |
तिर्यक्-स्वस्तिक-संबद्धौ स्यातां तौ ग्रहदर्शने ॥ ३४ ॥

अन्वय : - नृपदर्शने विच्युतौ चलितावस्थौ कर्तव्यौ | ग्रहदर्शने तौ तिर्यक्-स्वस्तिक-सम्बद्धौ स्याताम् |

अर्थ - राजाच्या दर्शनासाठी (पूर्वी जोडलेले) त्रिपताक हस्त वेगळे करून कंपित करावे .
ग्रहांच्या दर्शनासाठी दोन्ही त्रिपताक हस्त 'तिर्यक्स्वस्तिक' करावे .

तपस्विदर्शने कार्यावूर्ध्वौ चापि पराङ्मुखौ |
परस्पराभिमुखौ च कर्तव्यौ द्वारदर्शने ॥ ३५ ॥

पदच्छेद :- तपस्विदर्शने कार्यौ ऊर्ध्वौ च अपि पराङ्मुखौ |
परस्पर-अभिमुखौ च कर्तव्यौ द्वारदर्शने ॥ ३५ ॥

अन्वय : - तपस्विदर्शने ऊर्ध्वौ पराङ्मुखौ कार्यौ | द्वारदर्शने परस्पराभिमुखौ कर्तव्यौ |

अर्थ - तपस्वींच्या दर्शनासाठी त्रिपताक हस्त वर उचलून पराङ्मुख करावे. द्वारदर्शनामध्ये दोन्ही त्रिपताक हस्त एकमेकांच्या समोर ठेवावे .

उत्तानाधोमुखौ कार्यावग्रे वक्त्रस्य संस्थितौ |
वडवानलसङ्ग्रामे मकराणां च दर्शने ॥ ३६ ॥

पदच्छेद : - उत्तानाधोमुखौ कार्यौ अग्रे वक्त्रस्य संस्थितौ |
वडवानल-सङ्ग्रामे मकराणां च दर्शने || ३६ ||

अन्वय : - वडवानल-सङ्ग्रामे मकराणां दर्शने च वक्त्रस्य अग्रे उत्तानाधोमुखौ संस्थितौ कार्यौ |

अर्थ - जेव्हा दोन्ही तळहात मुखासमोर आणून बोटे खालच्या बाजूला कंपित करून एकत्रित आणली जातात तेव्हा त्याद्वारे जंगलातील वणवा, युद्ध आणि मगर यांची अभिव्यक्ती होते .

अभिनेयास्त्वनेनैव वानरप्लवनोर्मय: |
पवनश्च स्त्रियश्चैव नाट्ये नाट्यविचक्षणै: || ३७ ||

पदच्छेद : - अभिनेया : तु अनेन एव वानर-प्लवन-ऊर्मय : |
पवन : च स्त्रिय : च एव नाट्ये नाट्यविचक्षणै : || ३७ ||

अन्वय : - नाट्यविचक्षणै : नाट्ये तेन एव वानर-प्लवन-उर्मय :, पवन :, स्त्रिय : च अभिनेया : |

अर्थ - नाट्यातील विद्वानांनी याच हस्ताद्वारे माकडउड्या, तरंग, वारा तसेच स्त्रीचा अभिनय करावा .

संमुखप्रसृताङ्गुष्ठ: कार्यो बालेन्दुदर्शने |
पराङ्मुखस्तु कर्तव्यो याने नृणां प्रयोक्तृभि: || ] ३८ ||

पदच्छेद : - संमुख-प्रसृत-अङ्गुष्ठ : कार्य : बाल-इन्दु-दर्शने |
पराङ्मुख : तु कर्तव्य : याने नृणां प्रयोक्तृभि : || ३८ ||

अन्वय : - प्रयोक्तृभि: बालेन्दुदर्शने संमुख-प्रसृत-अङ्गुष्ठ: कार्य: | नृणां याने पराङ्मुख: कर्तव्य : |

अर्थ - बालचंद्र दाखवण्यासाठी त्रिपताक हस्त सन्मुख ठेवून अंगठा वर पसरवावा आणि माणसांचे गमन (यात्रा) दाखवण्यासाठी तोच हस्त 'पराङ्मुख' करावा .

❖ कर्त्तरीमुखहस्ताचे लक्षण ❖

त्रिपताके यदा हस्ते भवेत्पृष्ठावलोकिनी |
तर्जनी मध्यमायाश्च तदासौ कर्तरीमुख: || ३९ ||

पदच्छेद :- त्रिपताके यदा हस्ते भवेत् पृष्ठ-अवलोकिनी |
तर्जनी मध्यमाया : च तदा असौ कर्तरीमुख : || ३९ ||

अन्वय : - यदा त्रिपताके हस्ते तर्जनी मध्यमाया : पृष्ठ-अवलोकिनी भवेत्, तत् असौ कर्तरीमुख : |

अर्थ - त्रिपताक हस्तामध्ये तर्जनी मध्यमेच्या मागे नेऊन कात्रीप्रमाणे ठेवावी तेव्हा तो 'कर्तरीमुख हस्त' होतो .

## ❖ कर्त्तरीमुखहस्ताचे विनियोग ❖

पथि चरणरचनरञ्जनरङ्गणकरणान्यधोमुखेनैव |
ऊर्ध्वमुखेन तु कुर्याद्दष्टं शृङ्गं च लेख्यं च || ४० ||

पदच्छेद :- पथि चरण-रचन-रञ्जन-रङ्गण-करणानि अधोमुखेन एव |
ऊर्ध्वमुखेन तु कुर्यात् दष्टं शृङ्गं च लेख्यं च || ४० ||

अन्वय : - अधोमुखेन (कर्तरिमुखेन हस्तेन) पथि चरण-रचन-रञ्जन-रङ्गण-करणानि (द्रष्टव्यानि) | ऊर्ध्वमुखेन (कर्तरिमुखेन हस्तेन) तु दष्टं शृङ्गं लेख्यं च कुर्यात् |

अर्थ - कर्तरीमुख हस्त अधोमुख करून त्याद्वारे मार्ग दाखविणे, पाय ठेवणे, पायांना अलंकृत करणे, पायाला रंग लावणे, कपाळ ठिपक्यांनी इ. दाखवता येते. ऊर्ध्वमुख कर्तरिहस्ताने दंश करणे, शिंग (शिखर) दाखवणे तसेच चित्र काढणे इ. अभिनय करावेत.

पतनमरणव्यतिक्रमपरिवृत्तवितर्कितं तथा न्यस्तम् |
भिन्नवलितेन कुर्यात्कर्तर्यास्याङ्गुलिमुखेन || ४१ ||

पदच्छेद :- पतन-मरण-व्यतिक्रम-परिवृत्त-वितर्कितं तथा न्यस्तम् |
भिन्नवलितेन कुर्यात् कर्तरि-आस्य-अङ्गुलिमुखेन || ४१ ||

अन्वय : - कर्तर्यास्य-अङ्गुलिमुखेन भिन्नवलितेन पतन-मरण-व्यतिक्रम-परिवृत्त-वितर्कितं तथा न्यस्तं कुर्यात् |

अर्थ - कर्तरिमुख हस्त दोन्ही वेगळे करून विपरीत दिशेत गोल फिरवून त्याद्वारे पडणे, मरण , अपराध , गोल फिरणे, तर्क करणे, वडिलोपार्जित ठेव सांभाळणे इ . दाखवता येते .

[संयुतकरणो वा स्यादसंयुतो वा प्रयुज्यते तज्ज्ञैः |
रुरुचमरमहिषसुरगजवृषगोपुरशैलशिखरेषु ||] ४२ ||

पदच्छेदः - [संयुतकरणः वा स्यात् असंयुतः वा प्रयुज्यते तज्ज्ञैः |
रुरु-चमर-महिष-सुरगज-वृष-गोपुर-शैलशिखरेषु ||] ४२ ||

अन्वयः - संयुतकरणः असंयुतः वा स्यात्, तज्ज्ञैः (एषः हस्तः) रुरु-चमर-महिष-सुरगज-वृष-गोपुर-शैलशिखरेषु प्रयुज्यते |

अर्थ - संयुत करण असो वा असंयुत असो, कर्तरीमुख हाताचा उपयोग करून रुरु (हरिण), चमरीगाय, रेडा, ऐरावत हत्ती, बैल, देवालयाचा कळस, शिखराचे टोक इ.भाव प्रदर्शित केले जातात .

❖ अर्धचंद्रहस्ताचे लक्षण ❖

यस्याङ्गुल्यस्तु विनताः सहाङ्गुष्ठेन चापवत् |
सोऽर्धचन्द्र इति ख्यातः करः कर्मास्य वक्ष्यते || ४३ ||

पदच्छेदः - यस्य अङ्गुल्यः तु विनताः सह अङ्गुष्ठेन चापवत् |
सः अर्धचन्द्रः इति ख्यातः करः कर्म अस्य वक्ष्यते || ४३ ||

अन्वयः - यस्य अङ्गुल्यः अङ्गुष्ठेन सह चापवत् विनताः सः अर्धचन्द्रः करः विज्ञेयः | अस्य कर्म वक्ष्यते |

अर्थ - ज्या हाताची अंगठ्यासह सर्व बोटे धनुष्याप्रमाणे वाकविली जातात, त्याला 'अर्धचन्द्र हस्त' असे म्हटले जाते . आता त्यांची कर्मे मी तुम्हांला सांगतो .

❖ अर्धचंद्रहस्ताचे विनियोग ❖

एतेन बालतरवः शशिलेखा कम्बुकलशवलयानि |
निर्घाटनमायस्तं मध्यौपम्यं च पीनं च || ४४ ||

पदच्छेद : - एतेन बालतरव : शशिलेखा कम्बु-कलश-वलयानि |
निर्घाटनम् आयस्तं मध्यौपम्यं च पीनं च || ४४ ||

अन्वय : - एतेन बालतरव :, शशिलेखा-कम्बु-कलश-वलयानि, निर्घाटनम् ,आयस्तं, मध्यौपम्यं, पीनं च |

अर्थ - अर्धचंद्र हस्ताद्वारे छोटा वृक्ष, चंद्रकोर, शंख, कळस, कंकणे, बाहेर काढणे, खेद, शरीराच्या मध्यभागाची कृशता आणि स्थूलपणा दाखविला जातो .

रशनाजघनकटीनामाननतलपत्रकुण्डलादीनाम् |
कर्तव्यो नारीणामभिनययोगोऽर्धचन्द्रेण || ४५ ||

पदच्छेद : - रशना-जघन-कटीनाम् आनन-तलपत्र-कुण्डल-आदीनाम् |
कर्तव्य : नारीणाम् अभिनययोग : अर्धचन्द्रेण || ४५ ||

अन्वय : - अर्धचन्द्रेण नारीणां रशना-जघन-कटीनाम् आनन-तलपत्र-कुण्डलादीनाम् अभिनययोग : कर्तव्य : |

अर्थ - अर्धचंद्र हस्ताद्वारे स्त्रियांची मेखला, जंघा, कटी, चेहरा, तलपत्र, कुंडले इ . चा अभिनय करावा .

## ❖ अरालहस्ताचे लक्षण ❖

आद्या धनुर्नता कार्या कुञ्चितोऽङ्गुष्ठकस्तथा |
शेषा भिन्नोर्ध्ववलिता ह्यरालेऽङ्गुलय : करे || ४६ ||

पदच्छेद : - आद्या धनुर्नता कार्या कुञ्चित : अङ्गुष्ठक : तथा |
शेषा : भिन्न-ऊर्ध्ववलिता : हि अराले अङ्गुलय : करे || ४६ ||

अन्वय : - अराले करे आद्या धनुर्नता कार्या तथा अङ्गुष्ठक : कुञ्चित : (कार्य :) |
शेषा : अङ्गुलय : भिन्न-ऊर्ध्ववलिता : |

अर्थ - अराल हस्तामध्ये (तर्जनी बोट) धनुष्याप्रमाणे वाकवावे . तसेच अंगठा कुंचित करावा . उरलेली बोटे वेगवेगळी ठेवून वरच्या बाजूस वाकवावी .

❖ अरालहस्ताचे विनियोग ❖

एतेन सत्त्वशौण्डीर्यवीर्यकान्तिधृतिदिव्यगाम्भीर्यम् |
आशीर्वादाश्च तथा भावा हितसंज्ञका: कार्या: || ४७ ||

पदच्छेद: - एतेन सत्त्व-शौण्डीर्य-वीर्य-कान्ति-धृति-दिव्य-गाम्भीर्यम् |
आशीर्वादा: च तथा भावा: हितसंज्ञका: कार्या: || ४७ ||

अन्वय: - एतेन सत्त्व-शौण्डीर्य-वीर्य-धृति-कान्ति-दिव्य-गाम्भीर्यम् ,आशीर्वादा: तथा च हितसंज्ञका: भावा: कार्या: |

अर्थ - सत्त्व, गर्व, उत्साह, धृती, कांती, दिव्यवस्तू, गांभीर्य, आशीर्वाद देणे आणि इतर सुखद भाव दाखविण्यासाठी या हस्ताचा वापर करावा .

एतेन पुन: स्त्रीणां केशानां सङ्ग्रहस्तथोत्कर्ष: |
सर्वाङ्गिकं तथैव च निर्वर्णनमात्मन: कार्यम् || ४८ ||
कौतुकविवाहयोग: प्रदक्षिणेनैव सम्प्रयोगं च |
अङ्गुल्यग्रस्वस्तिकयोगात्परिमण्डलेनैव || ४९ ||
प्रादक्षिण्यं परिमण्डलं च कुर्यान्महाजनं चैव |
यच्च महीतलरचितं द्रव्यं तच्चाभिनेयं स्यात् || ५० ||

पदच्छेद: - एतेन पुन: स्त्रीणां केशानां सङ्ग्रह: तथा उत्कर्ष: |
सर्वाङ्गिकं तथा एव च निर्वर्णनम् आत्मन: कार्यम् || ४८ ||
कौतुक-विवाहयोग: प्रदक्षिणेन एव सम्प्रयोगं च |
अङ्गुली-अग्र-स्वस्तिक-योगात् परिमण्डलेन एव || ४९ ||
प्रादक्षिण्यं परिमण्डलं च कुर्यात् महाजनं च एव |
यत् च महीतल-रचितं द्रव्यं तत् च अभिनेयं स्यात् || ५० ||

अन्वय: - पुन: एतेन स्त्रीणां केशानां संग्रह: तथा उत्कर्ष:, आत्मन: सर्वाङ्गिकं निर्वर्णनं च कार्यम् | प्रदक्षिणेन संप्रयोगम् अङ्गुली-अग्र-स्वस्तिक-योगात् परिमण्डलेन च कौतुक-विवाहयोगं कुर्यात् | यत् च प्रादक्षिण्यं, परिमण्डलं, महाजनं, महीतलरचितं द्रव्यं तत् अभिनेयं स्यात् |

अर्थ - अराल हस्ताद्वारे स्त्रियांचे केस बांधणे व सोडणे, तसेच स्वत:च्या संपूर्ण शरीराकडे पाहणे इ. चा अभिनय करावा. प्रदक्षिणाक्रमाने हात फिरवून तसेच हाताची बोटे एकत्र आणून स्वस्तिक करून गोलाकार फिरवून कौतुक आणि विवाहाचा अभिनय करावा.
प्रदक्षिणा, परिमंडल, जनसमूह आणि पुष्पसमूह यांचा अभिनय अरालहस्ताद्वारे करावा.

आह्वानं च निवारणनिर्माणे चाप्यनेकवच: |
स्वेदस्य चापनयने गन्धाघ्राणे शुभ: शुभे चैष: ॥ ५१ ॥

पदच्छेद: - आह्वानं च निवारण-निर्माणे च अपि अनेकवच: |
स्वेदस्य च अपनयने गन्धाघ्राणे शुभ: शुभे च एष: ॥ ५१ ॥

अन्वय: - आह्वानं, निवारण-निर्माणे, अनेकवच:, स्वेदस्य अपनयने, गन्धाघ्राणे शुभे च एष: शुभ: (हस्त: विनियोज्य:) |

अर्थ - एखाद्या व्यक्तीला बोलावून घेणे, बाहेर काढणे, निर्मिती करणे, अनेक गोष्टी सांगणे, घाम पुसणे, चांगला वास घेणे आणि शुभ कार्यासाठी हा शुभ 'अराल हस्त' वापरावा.

त्रिपताकहस्तजानि तु पूर्वं यान्यभिहितानि कर्माणि |
तानि त्वरालयोगात्स्त्रीभि: सम्यक्प्रयोज्यानि ॥ ५२ ॥

पदच्छेद: - त्रिपताक-हस्तजानि तु पूर्वं यानि अभिहितानि कर्माणि |
तानि तु अरालयोगात् स्त्रीभि: सम्यक् प्रयोज्यानि ॥ ५२ ॥

अन्वय: - पूर्वं यानि त्रिपताक-हस्तजानि कर्माणि अभिहितानि, तानि स्त्रीभि: अरालयोगात् सम्यक् प्रयोज्यानि |

अर्थ - पूर्वी जी कार्ये त्रिपताक हस्ताद्वारे सांगितली गेली आहेत, ती सर्व स्त्रियांद्वारे अराल हस्ताने देखील प्रदर्शित केली जाऊ शकतात.

### ❖ शुकतुंडहस्ताचे लक्षण ❖

अरालस्य यदा वक्रानामिका त्वङ्गुलिर्भवेत् |
शुकतुण्डस्तु स कर: कर्म चास्य निबोधत ॥ ५३ ॥

पदच्छेद : - अरालस्य यदा वक्रा अनामिका तु अङ्गुलि : भवेत् |
शुकतुण्ड : तु स : कर : कर्म च अस्य निबोधत || ५३ ||

अन्वय : - यदा अरालस्य अनामिका अङ्गुलि: वक्रा भवेत् , स: शुकतुण्डस्तु कर: | अस्य कर्म निबोधत |

अर्थ - जेव्हा अराल हस्तामध्ये अनामिका वाकविली जाते तेव्हा त्यास 'शुकतुंड हस्त' म्हटले जाते . याचा विनियोग जाणून घ्या .

❖ शुकतुंडहस्ताचे विनियोग ❖

एतेन त्वभिनेयं नाहं न त्वं न कृत्यमिति चार्थे |
आवाहने विसर्गे धिगिति वचने च सावज्ञम् || ५४ ||

पदच्छेद : - एतेन तु अभिनेयं न अहं न त्वं न कृत्यम् इति च अर्थे |
आवाहने विसर्गे धिक् इति वचने च सावज्ञम् || ५४ ||

अन्वय : - एतेन "नाहं", "न त्वं", "न कृत्यम्" इति, अर्थे, आवाहने, विसर्गे, "धिक्" इति सावज्ञं वचने च अभिनेयम् |

अर्थ - या हस्ताद्वारे "मी नाही"... "तू नाही"... आणि "तुझ्याशी माझे काहीही काम नाही"... हा अर्थ व्यक्त करण्यासाठी तसेच आवाहन, पाठवणी तसेच अपमानासह धिक्कार करणे (निंदा करणे) इ. दाखविण्यासाठी या हस्ताचा वापर केला जातो .

❖ मुष्टिहस्ताचे लक्षण ❖

अङ्गुल्यो यस्य हस्तस्य तलमध्येऽग्रसंस्थिता: |
तासामुपरि चाङ्गुष्ठ: स मुष्टिरिति संज्ञित: || ५५ ||

पदच्छेद : - अङ्गुल्य : यस्य हस्तस्य तलमध्ये अग्रसंस्थिता : |
तासाम् उपरि च अङ्गुष्ठ : स : मुष्टि : इति संज्ञित : || ५५ ||

अन्वयः - यस्य हस्तस्य तलमध्ये अग्रसंस्थिताः अङ्गुल्यः, तासाम् उपरि अङ्गुष्ठः च सः मुष्टिः इति संज्ञितः|

अर्थ - ज्या हाताची सगळी बोटं तळहातामध्ये वाकविली जातात आणि त्यावर अंगठा ठेवला जातो तेव्हा त्यास 'मुष्टिहस्त' असे म्हणतात .

### ❖ मुष्टिहस्ताचे विनियोग ❖

एष प्रहारे व्यायामे निर्गमे पीडने तथा |
संवाहनेऽसियष्टीनां दण्डकुन्तग्रहे तथा || ५६ ||

पदच्छेदः- एषः प्रहारे व्यायामे निर्गमे पीडने तथा|
संवाहने असि-यष्टीनां दण्ड-कुन्त-ग्रहे तथा || ५६ ||

अन्वयः - प्रहारे, व्यायामे, निर्गमे, पीडने, संवाहने, तथा असियष्टीनां दण्डकुन्तग्रहे एषः (हस्तः विनियोज्यः)|

अर्थ - प्रहार करणे, व्यायाम करणे, बाहेर काढणे, पीडन (मर्दन करणे) पाय चेपणे , तलवार, काठी दांडा, भाला इ . धरण्यासाठी या मुष्टिहस्ताचा वापर केला जातो .

### ❖ शिखरहस्ताचे लक्षण ❖

अस्यैव तु यदा मुष्टेरूर्ध्वोऽङ्गुष्ठः प्रयुज्यते|
हस्तः स शिखरो नाम तदा ज्ञेयः प्रयोक्तृभिः || ५७ ||

पदच्छेदः- अस्य एव तु यदा मुष्टेः ऊर्ध्वः अङ्गुष्ठः प्रयुज्यते|
हस्तः सः शिखरः नाम तदा ज्ञेयः प्रयोक्तृभिः || ५७ ||

अन्वयः - यदा अस्य एव मुष्टेः ऊर्ध्वोङ्गुष्ठः प्रयुज्यते, सः प्रयोक्तृभिः तदा शिखरः नाम हस्तः ज्ञेयः|

अर्थ - जेव्हा याच मुष्टिहस्तामध्ये अंगठा वर उचलून सरळ केल्यास प्रयोगकर्त्यांनी त्यास 'शिखरहस्त' असे म्हटले आहे .

### ❖ शिखरहस्ताचे विनियोग ❖

रश्मिकुशाङ्कुशधनुषां तोमरशक्तिप्रमोक्षणे चैव |
अधरोष्ठपादरञ्जनमलकस्योत्क्षेपणं चैव || ५८ ||

पदच्छेद :- रश्मि-कुश-अङ्कुश-धनुषां तोमर-शक्ति-प्रमोक्षणे च एव |
अधरोष्ठ-पाद-रञ्जनम् अलकस्य उत्क्षेपणं च एव || ५८ ||

अन्वय : - (एष: हस्त:) रश्मि-कुश-अङ्कुश-धनुषां तोमर-शक्ति-प्रमोक्षणे अधरोष्ठ-पाद-रञ्जनम्, अलकस्य उत्क्षेपणं (एतेषु अर्थेषु विनियोज्य:) |

अर्थ - लगाम धरण्यासाठी, कुश घेण्यासाठी, अंकुश आणि धनुष्य धारण करण्यासाठी, तोमर आणि शक्ती या अस्त्रांना फेकण्यासाठी, अधरोष्ठ आणि पाय रंगविण्यासाठी, केस विंचरण्यासाठी या शिखर हस्ताचा प्रयोग करावा .

### ❖ कपित्थहस्ताचे लक्षण ❖

अस्यैव शिखराख्यस्य ह्यङ्गुष्ठकनिपीडिता |
यदा प्रदेशिनी वक्रा स कपित्थस्तदा स्मृत: || ५९ ||

पदच्छेद :- अस्य एव शिखर-आख्यस्य हि अङ्गुष्ठक-निपीडिता |
यदा प्रदेशिनी वक्रा स कपित्थ: तदा स्मृत: || ५९ ||

अन्वय : - यदा अस्य शिखराख्यस्य हि अङ्गुष्ठक-निपीडिता प्रदेशिनी वक्रा, तदा स: कपित्थ: (इति) स्मृत: |

अर्थ - जेव्हा शिखरहस्तामधील तर्जनी बोट अंगठ्यावर दाबून वाकवला जातो तेव्हा त्यास 'कपित्थहस्त' असे म्हणतात .

### ❖ कपित्थहस्ताचे विनियोग ❖

असिचापचक्रतोमरकुन्तगदाशक्तिवज्रबाणानि |
शस्त्राण्यभिनेयानि तु कार्यं पथ्यं च सत्यं च || ६० ||

पदच्छेद :- असि-चाप-चक्र-तोमर-कुन्त-गदा-शक्ति-वज्र-बाणानि |
शस्त्राणि अभिनेयानि तु कार्यं पथ्यं च सत्यं च ‖ ६० ‖

अन्वय : - (एतेन) असि-चाप-चक्र-तोमर-कुन्त-गदा-शक्ति-वज्र-बाणानि शस्त्राणि अभिनेयानि | सत्यं, पथ्यं च कार्यम् |

अर्थ - या हस्ताद्वारे तलवार, धनुष्य, चक्र, तोमर, भाला, गदा, शक्ति, वज्र, बाण इ. शस्त्रांच्या प्रयोगाचा अभिनय करावा. तसेच सत्य आणि हितकारी भाव दाखविण्यासाठी कपित्थहस्ताचा वापर केला जातो.

## ❖ खटकामुखहस्ताचे लक्षण ❖

उत्क्षिप्तवक्रा तु यदानामिका सकनीयसी |
अस्यैव तु कपित्थस्य तदासौ खटकामुख: ‖ ६१ ‖

पदच्छेद :- उत्क्षिप्तवक्रा तु यदा अनामिका सकनीयसी |
अस्य एव तु कपित्थस्य तदा असौ खटकामुख : ‖ ६१ ‖

अन्वय : - यदा अस्य एव कपित्थस्य सकनीयसी अनामिका उतक्षिप्तवक्रा ,तदा असौ खटकामुख : |

अर्थ - जेव्हा याच कपित्थहस्ताची कनिष्ठिका आणि अनामिका यांना वर उचलून वाकविले जाते तेव्हा त्या हस्ताला 'खटकामुखहस्त' असे म्हणतात.

## ❖ खटकामुखहस्ताचे विनियोग ❖

होत्रं हव्यं छत्रं प्रग्रहपरिकर्षणं व्यजनकं च |
आदर्शधारणं खण्डनं तथा पेषणं चैव ‖ ६२ ‖
आयतदण्डग्रहणं मुक्ताप्रालम्बसङ्ग्रहं चैव |
स्रग्दामपुष्पमालावस्त्रान्तालम्बनं चैव ‖ ६३ ‖
मन्थनशरावकर्षणपुष्पावचयप्रतोदकार्याणि |
अङ्कुशरज्ज्वाकर्षस्त्रीदर्शनमेव कार्यं च ‖ ६४ ‖

पदच्छेद :- होत्रं हव्यं छत्रं प्रग्रह-परिकर्षणं व्यजनकं च |
आदर्श-धारणं खण्डनं तथा पेषणं च एव ‖ ६२ ‖

आयतदण्ड-ग्रहणं मुक्ताप्रालम्ब-सङ्ग्रहं च एव |
स्रग्दामपुष्पमाला-वस्त्रान्त-आलम्बनं च एव || ६३ ||
मन्थनशर-अवकर्षण-पुष्पावचय-प्रतोदकार्याणि |
अङ्कुश-रज्जु-आकर्षण-स्त्रीदर्शनम् एव कार्यं च || ६४ ||

अन्वय : - होत्रं, हव्यं, छत्रं, प्रग्रह-परिकर्षणं, व्यजनकं तथा आदर्शधारणं, खण्डनं, पेषणं, आयतदण्ड-ग्रहणं, मुक्ताप्रालम्ब-संग्रहं, स्रग्दामपुष्पमाला चैव वस्त्रान्तालम्बनं, मन्थन-शरावकर्षण- पुष्पावचय-प्रतोदकार्याणि अङ्कुश-रज्जु-आकर्षण-स्त्रीदर्शनं च कार्यम् |

अर्थ - होम, हवन सामग्री, छत्र, लगाम खेचणे, पंखा चालवणे, आरसा धरणे, तोडणे, कुटणे, लांब दंडुका हाती धरणे, मोत्यांची माळ परिधान करणे, पुष्पहार किंवा दुसऱ्या माळा धारण करणे, पदर (वस्त्राचे टोक) घेणे, रवीने घुसळणे आणि बाण खेचणे, फुले वेचणे, चाबकाने फटकारणे, अंकुश लावणे, दोरी खेचणे, स्त्रीसहज लीलांचे दर्शन या खटकामुख हस्ताद्वारे सूचित केले जाते .

### ❖ सूचीमुखहस्ताचे लक्षण ❖

खटकाख्ये यदा हस्ते तर्जनी संप्रसारिता |
हस्तस्सूचीमुखो नाम तदा ज्ञेय : प्रयोक्तृभि : || ६५ ||

पदच्छेद : - खटकाख्ये यदा हस्ते तर्जनी संप्रसारिता |
हस्त : सूचीमुख : नाम तदा ज्ञेय : प्रयोक्तृभि : || ६५ ||

अन्वय : - यदा खटकाख्ये हस्ते तर्जनी संप्रसारिता, तदा प्रयोक्तृभि : सूचीमुख : नाम हस्त : ज्ञेय : |

अर्थ - जेव्हा खटकामुख हस्तामध्ये तर्जनी उचलून सरळ केली जाते तेव्हा प्रयोग करणाऱ्यांनी त्यास 'सूचीमुखहस्त' असे जाणावे .

### ❖ सूचीमुखहस्ताचे विनियोग ❖

अस्य विविधान्प्रयोगान्वक्ष्यामि समासत : प्रदेशिन्या : |
ऊर्ध्वनतलोलकम्पितविजृम्भितोद्वाहितचलाया : || ६६ ||

पदच्छेद: - अस्य विविधान् प्रयोगान् वक्ष्यामि समासत: प्रदेशिन्या: |
ऊर्ध्व-नत-लोल-कम्पित-विजृम्भित-उद्वाहित-चलाया: || ६६ ||

अन्वय: - अस्य प्रदेशिन्या: ऊर्ध्व-नत-लोल-कम्पित-विजृम्भित-उद्वाहित-चलाया: विविधान् योगान् समासत: वक्ष्यामि |

अर्थ - सूचीमुखहस्ताच्या तर्जनीच्या पुढील स्थितींवरून आता मी थोडक्यात सूचीमुख हस्ताचे विविध प्रयोग सांगतो . तर्जनीच्या विविध स्थिती -
ऊर्ध्व तर्जनी (तर्जनी वर उचलणे), नत तर्जनी (वाकविणे), लोल तर्जनी (आजूबाजूला हलविणे), कंपित तर्जनी (कंपित करणे), विजृंभित तर्जनी (तिरकी करणे), उद्वाहित तर्जनी (वर जाणे) आणि चला तर्जनी (अभिनयानुसार करणे) .

चक्रं तडित्पताकामञ्जर्य: कर्णचूलिकाश्चैव |
कुटिलगतयश्च सर्वे निर्देश्यास्साधुवादाश्च || ६७ ||
बालोरगपल्लवधूपदीपवल्लीलताशिखण्डाश्च |
परिपतनवक्रमण्डलमभिनेयान्यूर्ध्वलोलितया || ६८ ||

पदच्छेद: - चक्रं तडित्पताका-मञ्जर्य: कर्णचूलिका: च एव |
कुटिलगतय: च सर्वे निर्देश्या: साधुवादा: च || ६७ ||
बालोरग-पल्लव-धूप-दीप-वल्ली-लता-शिखण्डा: च |
परिपतन-वक्र-मण्डलम् अभिनेयानि ऊर्ध्वलोलितया || ६८ ||

अन्वय: - चक्र-तडित्-पताका-मञ्जर्य:, कर्णचूलिका:, सर्वे कुटिलगतय:,साधुवादा: निर्देश्या: | ऊर्ध्वलोलितया बालोरग-पल्लव-धूप-दीप-वल्ली-लता-शिखण्डा: परिपतन-वक्र-मण्डलं च अभिनेयानि |

अर्थ - सूचीमुखहस्तामध्ये तर्जनी वर उचलून चक्र, वीज, झेंडा, पुष्पमंजरी, कर्णफुलं तसेच सर्व प्रकारच्या कुटिल गती, वाहवा चा नाद इ . दर्शवावे . तर्जनी 'ऊर्ध्वलोलित' करून छोटा साप, लतांकुर, पाने (पल्लव),धूप, दीप, वेल, कावळा, खाली पडणे व वक्रवर्तुळ दाखविले जाते .

भूयश्चोर्ध्वविरचिता तारा घोणैकदण्डयष्टिषु च |
विनता च तथा कार्या दंष्ट्रिषु च तथास्ययोगेन || ६९ ||
पुनरपि मण्डलगतया सर्वग्रहणं तथैव लोकस्य |
प्रणतोन्नते च कार्ये ह्याद्ये दीर्घे च दिवसे च || ७० ||

पदच्छेद :- भूय: च ऊर्ध्व-विरचिता तारा घोण-एक-दण्ड-यष्टिषु च |
विनता च तथा कार्या दंष्ट्रिषु च तथा आस्य-योगेन || ६९ ||
पुन: अपि मण्डल-गतया सर्वग्रहणं तथैव लोकस्य |
प्रणत-उन्नते च कार्ये हि आद्ये दीर्घे च दिवसे च || ७० ||

अन्वय: - भूय: तारा घोण-एक-दण्ड-यष्टिषु च ऊर्ध्वविरचिता कार्या | तथा पुन: आस्ययोगेन दंष्ट्रिषु विनता कार्या च | पुन: मण्डलगतया लोकस्य सर्वग्रहणं (कार्यम्)| आद्ये प्रणतोन्नते दीर्घे दिवसे च कार्ये |

अर्थ - ह्याच हातामध्ये तर्जनीला वर करून तारे, नाक, एक ही संख्या, दंड, काठी हातात धरणे असा अर्थ सूचित होतो आणि जर हेच बोट मुखाजवळ आणले तर सुळे असणाऱ्या प्राण्यांचा अभिनय करता येतो . तर्जनी गोल फिरवून विश्वातील सर्व वस्तूंचे ग्रहण केल्याचा अर्थ व्यक्त होतो . प्रथम तर्जनी वर करून मोठा दिवस (आणि नंतर तर्जनी वाकवून छोटा दिवस अशा प्रकारे सूर्याचा उदय आणि अस्त देखील याद्वारे दाखवता येतो) .

वचनाभ्यासे कुञ्चितविजृम्भिता वाक्यरूपणे कार्या |
[श्रवणाभ्यासे वक्राविजृम्भणे वाक्यरूपणावसरे||]
मेति वदेति च योज्या प्रसारितोत्कम्पितोत्ताना || ७१ ||
कार्या प्रकम्पिता रोषदर्शने स्वेदरूपणे चैव || ७२ ||

पदच्छेद :- वचन-अभ्यासे कुञ्चित-विजृम्भिता वाक्य-रूपणे कार्या |
[श्रवण-अभ्यासे वक्रा विजृम्भणे वाक्यरूपण-अवसरे||]

मा इति वद इति च योज्या प्रसारिता उत्कम्पिता उत्ताना ‖ ७१ ‖
कार्या प्रकम्पिता रोषदर्शने स्वेदरूपणे च एव ‖ ७२ ‖

अन्वय : - वाक्यरूपणे वचनाभ्यासे कुञ्चित-विजृम्भिता कार्या | श्रवणाभ्यासे वक्रा विजृम्भणे वाक्यरूपण-अवसरे | "मा" इति, "वद" इति (अर्थे) च प्रसारिता उत्कम्पिता उत्ताना (च कर्तव्या) | रोषदर्शने स्वेदरूपणे प्रकम्पिता कार्या |

अर्थ - वाक्याचा अर्थ सांगण्याच्या वेळी आणि बोलण्यासाठी ( मुखाजवळ) प्रथम तर्जनी कुंचित करावी आणि त्यानंतर विजृंभित करावी. वाक्याचा अर्थ ऐकतेवेळी (कानांजवळ) प्रथम तर्जनी वक्र करावी आणि त्यानंतर विजृंभित करावी. "नको" असा निषेध दाखविण्यासाठी तर्जनी प्रसारिता करावी आणि 'बोला सांगा' या अर्थाने तर्जनी उत्कंपिता आणि उत्ताना (प्रसारिता) करावी. क्रोध दाखविण्यासाठी आणि घाम पुसण्यासाठी प्रकंपिता तर्जनीचा प्रयोग करावा.

कुन्तलककुण्डलाङ्गदगण्डाश्रयसंश्रयेऽभिनये |
गर्वेऽहमिति ललाटे रिपुनिर्देशे तथैव च क्रोधे ‖ ७३ ‖

पदच्छेद : - कुन्तलक-कुण्डल-अङ्गद-गण्डाश्रय-संश्रये अभिनये |
गर्वे अहम् इति ललाटे रिपुनिर्देशे तथैव च क्रोधे | ‖ ७३ ‖

अन्वय : - कुन्तलक-कुण्डल-अङ्गद-गण्डाश्रय-संश्रये अभिनये च अपि योज्या | "अहम्" इति गर्वे, रिपुनिर्देशे तथा क्रोधे च ललाटे (योज्या) |

अर्थ - केस, कुंडल, बाजूबंद तसेच गालावर सुंदर नक्षी काढणे इ. च्या अभिनयात आणि मी... माझा...असा अहंकार बाळगणे, शत्रू दाखविणे आणि क्रोध दर्शविणे इ. साठी सूचीमुख हस्ताची तर्जनी मस्तकाजवळ आणावी.

कोऽसाविति निर्देशे च कर्णकण्डूयने चैव |
संयुक्ता संयोगे कार्या विश्लेषिता वियोगे च ‖ ७४ ‖
कलहे स्वस्तिकयुक्ता परस्परोत्पीडिता बन्धे |
द्वाभ्यां तु वामपार्श्वे दक्षिणतो दिननिशावसानानि ‖ ७५ ‖

अभिमुखपराङ्मुखीभ्यां विश्लिष्टाभ्यां प्रयुञ्जीत |
[द्वाभ्यां प्रदर्शयेन्नित्यं सम्पूर्णं चन्द्रमण्डलम् || ७६ ||
श्लिष्टा ललाटे शक्रस्य कार्या ह्युत्तानसंश्रया | ]
परिमण्डलं भ्रमितया मण्डलमादर्शयेच्च चन्द्रस्य || ७७ ||
हरनयने च ललाटे शक्रस्य च तिर्यगुत्ताना |

पदच्छेद: - क: असौ इति निर्देशे अथ कर्णकण्डूयने च एव |
संयुक्ता संयोगे कार्या विश्लेषिता वियोगे च || ७४ ||
कलहे स्वस्तिक-युक्ता परस्पर-उत्पीडिता बन्धे |
द्वाभ्यां तु वामपार्श्वे दक्षिणत: दिन-निशा-अवसानानि || ७५ ||
अभिमुख-पराङ्मुखीभ्यां विश्लिष्टाभ्यां प्रयुञ्जीत |
[द्वाभ्यां प्रदर्शयेत् नित्यं सम्पूर्णं चन्द्रमण्डलम् | || ७६ |
श्लिष्टा ललाटे शक्रस्य कार्या हि उत्तानसंश्रया | ]
परिमण्डलं भ्रमितया मण्डलम् आदर्शयेत् च चन्द्रस्य || ७७ ||
हरनयने च ललाटे शक्रस्य च तिर्यक् उत्ताना |

अन्वय: - "क: असौ?" इति निर्देशे, कर्णकण्डूयने च (ललाटे योज्या)| संयोगे संयुक्ता, वियोगे विश्लेषिता च कार्या | कलहे बन्धे स्वस्तिकयुक्ता, परस्परोत्पीडिता (च कार्या) | द्वाभ्यां नित्यं सम्पूर्णं चन्द्रमण्डलं प्रदर्शयेत् | शक्रस्य उत्तानसंश्रया ललाटे श्लिष्टा कार्या | भ्रमितया परिमण्डलं, चन्द्रस्य मण्डलं च दर्शयेत् | हरनयने च शक्रस्य तिर्यक् उत्ताना ललाटे (दर्शयेत्) |

अर्थ - कोण आहे? असा प्रश्न करणे, तसेच कान खाजविणे असे दाखवायचे असेल तर कपाळाजवळ तर्जनी ठेवावी . दोन्ही सूचीमुखहस्ताच्या तर्जनी एकमेकांना जुळविल्यास संयोगाचा तसेच वेगळे केल्यास वियोगाचा अभिनय केला जातो .

जर दोन्ही हात स्वस्तिक केल्यास एकमेकांशी भांडण दाखवता येते आणि बंधनाचा अभिनय करताना तर्जनीला उत्पीडित अवस्थेत ठेवावे . दोन्ही हातांची तर्जनी तालमात्र अंतरावर अभिमुख ठेवून नंतर त्यास विरूद्ध दिशेस नेऊन बोटांना वामपार्श्वाजवळ

आणल्यास दिवसाचा अंत आणि उजव्या बाजूस आणल्यास रात्रीच्या समाप्तीचा अभिनय दाखविता येतो.

जेव्हा दोन्ही तर्जनींद्वारे पूर्णचंद्र दाखवावा व इंद्र दाखवताना दोन्ही तर्जनी कपाळासमोर एकत्र उत्तान ठेवाव्यात.

बोटे गोलाकार फिरवून चंद्राचे मंडल दाखवावे आणि शिवाचा तिसरा डोळा दाखविण्यासाठी इंद्राच्या अभिनयासाठी सांगितलेली तिरकी उत्तान बोटे मस्तकाजवळ ठेवावीत.

[पुनरपि च भ्रमिताग्ररूपा शिलावर्तयन्त्रशैलेषु ॥ ७८ ॥
परिवेषणे तथैव हि कार्या चाधोमुखी नित्यम् | ]

पदच्छेद :- [पुन: अपि च भ्रमिताग्ररूपा शिला-आवर्त-यन्त्र-शैलेषु ॥ ७८ ॥
परिवेषणे तथा एव हि कार्या च अधोमुखी नित्यम् | ]

अन्वय : - पुन: शिला-आवर्त-यन्त्र-शैलेषु च भ्रमिताग्रारूपा (कार्या) तथा परिवेषणे नित्यम् अधोमुखी कार्या |

अर्थ - शिळा, भुंगा, यंत्र, शील यांचा अभिनय करताना बोटे गोल फिरवावी आणि जेवण वाढताना बोटे नेहमी अधोमुखी असावीत.

शिलष्टा ललाटपट्टेष्वधोमुखी शम्भुरूपणे कार्या ॥ ७९ ॥
शक्रस्याप्युत्ताना तज्ज्ञैस्तिर्यक्स्थिता कार्या |

पदच्छेद :- शिलष्टा ललाटपट्टेषु अधोमुखी शम्भुरूपणे कार्या ॥ ७९ ॥
शक्रस्य अपि उत्ताना तज्ज्ञै: तिर्यक् स्थिता कार्या |

अन्वय : - तज्ज्ञै: शम्भुरूपणे ललाटपट्टेषु अधोमुखी शिलष्टा कार्या | शक्रस्य तिर्यक् स्थिता उत्ताना कार्या |

अर्थ - तज्ज्ञ लोकांनी शिवाच्या अभिनयामध्ये सूचीमुख हस्ताची बोटे एकत्र आणून कपाळाजवळ अधोमुख करावीत. इंद्राचा अभिनय करताना बोटे तिरकी आणि उन्नत ठेवावीत.

### ❖ पद्मकोशहस्ताचे लक्षण ❖

यस्याङ्गुल्यस्तु विरला: सहाङ्गुष्ठेन कुञ्चिता: ॥ ८० ॥
ऊर्ध्वा ह्यसङ्गताग्राश्च स भवेत्पद्मकोशक: ।

पदच्छेद: - यस्य अङ्गुल्य: तु विरला: सह अङ्गुष्ठेन कुञ्चिता: ॥ ८० ॥
ऊर्ध्वा: हि असङ्गत-अग्रा: च स: भवेत् पद्मकोशक: ।

अन्वय: - यस्य अङ्गुल्य: अङ्गुष्ठेन सह ऊर्ध्वा: विरला: कुञ्चिता:, स: पद्मकोशक: भवेत् । (तदा अङ्गुल्य:) असङ्गताग्रा: (भवेयु:) ।

अर्थ - जेव्हा हाताची बोटे अंगठ्यासह वरच्या बाजूस वेगवेगळी ठेवून जराशी वाकविली जातात तेव्हा त्यास 'पद्मकोश हस्त' म्हणतात. यामध्ये अग्रभाग जुळलेला नसावा.

### ❖ पद्मकोशहस्ताचे विनियोग ❖

बिल्वकपित्थफलानां ग्रहणं कुचदर्शनं च नारीणाम् ॥ ८१ ॥
ग्रहणे ह्यामिषलाभे भवन्ति ता: कुञ्चिताग्रास्तु ।
[बहुजातिबीजपूरकमामिषखण्डं च निर्देश्यम् ॥ ८२

पदच्छेद: - बिल्व-कपित्थ-फलानां ग्रहणं कुच-दर्शनं च नारीणाम् ॥ ८१ ॥
ग्रहणे हि आमिष-लाभे भवन्ति ता: कुञ्चिताग्रा: तु ।
[बहुजाति-बीजपूरकम् आमिषखण्डं च निर्देश्यम् ॥ ८२

अन्वय: - (एतेन)बिल्व-कपित्थफलानां ग्रहणं, नारीणां कुचदर्शनं च (कार्यम्) । ग्रहणे आमिषलाभे ता: तु कुञ्चिताग्रा: भवन्ति । बहुजाति-बीजपूरकम् आमिषखण्डं च निर्देश्यम् ।

अर्थ - बिल्व किंवा कपित्थ फळ धरण्यासाठी व स्त्रियांचे वक्ष:स्थल दाखण्यासाठी या हस्ताचा वापर होतो. काही वस्तूंच्या प्राप्तीसाठी या हस्तातील बोटांचा अग्रभाग कुंचित करावा. पद्मकोष हस्ताद्वारे विविध प्रकारच्या बिजोरा लिंबूचा निर्देश तसेच मांसाचा तुकडा इ. दाखविता येते.

देवार्चनबलिहरणे समुद्गके साग्रपिण्डदाने च |
कार्य: पुष्पप्रकरश्च पद्मकोशेन हस्तेन || ८३ ||

पदच्छेद: - देव-अर्चन-बलि-हरणे समुद्गके साग्र-पिण्ड-दाने च |
कार्य: पुष्प-प्रकर: च पद्मकोशेन हस्तेन || ८३ ||

अन्वय: - पद्मकोशेन हस्तेन देवार्चन-बलिहरणे, समुद्गके, साग्रपिण्डदाने च पुष्पप्रकर: कार्य: |

अर्थ - देवांचे पूजन करण्यासाठी, आहुती अर्पण करण्यासाठी, पेटी दाखविण्यासाठी, अग्रपिंडदानासाठी, पुष्पवृष्टीच्या अभिनयासाठी पद्मकोष हस्ताचा वापर करावा .

मणिबन्धनविश्लिष्टप्रविरलचलिताङ्गुलिकराभ्याम् |
कार्यो विवर्तिताभ्यां विकसितकमलोत्पलाभिनय : || ८४ ||

पदच्छेद: - मणिबन्धन-विश्लिष्ट-प्रविरल-चलित-अङ्गुलिकराभ्याम् |
कार्य: विवर्तिताभ्यां विकसित-कमल-उत्पल-अभिनय: || ८४ ||

अन्वय: - विवर्तिताभ्यां मणिबन्धन-विश्लिष्ट-प्रविरल-चलित-अङ्गुलिकराभ्यां विकसित-कमल-उत्पल-अभिनय: कार्य: |

अर्थ - (जेव्हा पद्मकोश हस्ताची) दोन्ही मनगटे एकमेकांशी जुळवून मागच्या बाजूला नेऊन तसेच बोटे कंपित केल्यास विकसित कमल व कुमुदिनी यांचा अभिनय करावा .

❖ सर्पशीर्षहस्ताचे लक्षण ❖

अङ्गुल्य: संहतास्सर्वा: सहाङ्गुष्ठेन यस्य च |
तथा निम्नतलश्चैव स तु सर्पशिरा: कर: || ८५ ||

पदच्छेद: - अङ्गुल्य: संहता: सर्वा: सह अङ्गुष्ठेन यस्य च |
तथा निम्नतल: च एव स तु सर्पशिरा: कर: || ८५ ||

अन्वय: - यस्य अङ्गुष्ठेन सह सर्वा: अङ्गुल्य: निम्नतल: संहता:, स: सर्पशिरा: कर: |

अर्थ - जेव्हा अंगठ्यासह सर्व बोटे एकमेकांस जुळलेली असतात व तळहात जरासा खोलगट असतो (त्या सापाच्या फण्यासारखा दिसणाऱ्या हस्ताला) 'सर्पशीर्ष हस्त' असे म्हणतात .

### ❖ सर्पशीर्षहस्ताचे विनियोग ❖

एष सलिलप्रदाने भुजगगतौ तोयसेचने चैव |
आस्फोटने च योज्य: करिकुम्भास्फालनाद्येषु || ८६ ||

पदच्छेद: - एष: सलिलप्रदाने भुजगगतौ तोयसेचने च एव |
आस्फोटने च योज्य: करिकुम्भ-आस्फालन-आद्येषु || ८६ ||

अन्वय: - सलिलप्रदाने, भुजगगतौ, तोयसेचने, आस्फोटने, करिकुम्भ-आस्फालन-आद्येषु च एष: योज्य: |

अर्थ - देवतांना पाणी देणे आणि दान करणे, सापाची गती, पाणी शिंपडणे , मल्लयुद्धामध्ये जांघांवर व बाहूंवर हातांनी प्रहार करणे व हत्तीच्या कुंभस्थळांना थपथपविणे यासाठी सर्पशीर्षाचा वापर करावा .

### ❖ मृगशीर्षकहस्ताचे लक्षण ❖

अधोमुखीनां सर्वासामङ्गुलीनां समागम: |
कनिष्ठाङ्गुष्ठकावूर्ध्वौ स भवेन्मृगशीर्षक: || ८७ ||

पदच्छेद: - अधोमुखीनां सर्वासाम् अङ्गुलीनां समागम: |
कनिष्ठ-अङ्गुष्ठकौ ऊर्ध्वौ स: भवेत् मृगशीर्षक: || ८७ ||

अन्वय: - सर्वसाम् अधोमुखीनाम् अङ्गुलीनां समागम: कनिष्ठ-अङ्गुष्ठकौ (च) ऊर्ध्वौ (तदा) स: मृगशीर्षक: भवेत् |

अर्थ - सर्व बोटे अधोमुख करून एकत्र ठेवली आणि कनिष्ठिका आणि अंगठा ऊर्ध्वमुख केला असता तो 'मृगशीर्ष हस्त' होतो .

### ❖ मृगशीर्षकहस्ताचे विनियोग ❖

इह साम्प्रतमस्त्यद्य शक्तेश्चोल्लासनेऽक्षपाते च |
स्वेदापमार्जनेषु च कुट्टमिते प्रचलितस्तु भवेत् || ८८ ||

पदच्छेद : - इह साम्प्रतम् अस्ति अद्य शक्ते : च उल्लासने अक्षपाते च |
स्वेदापमार्जनेषु च कुट्टमिते प्रचलित : तु भवेत् || ८८ ||

अन्वय : - "इह", "साम्प्रतम्", "अस्ति", "अद्य" च (इत्यर्थे), शक्ते : उल्लासने, अक्षपाते भवेत् | स्वेद-अपमार्जनेषु, कुट्टमिते च प्रचलित : (भवेत्) |

अर्थ - याचा विनियोग "इथे", "आता", "हे आहे", "आज" इ. अर्थ अभिव्यक्त करण्यासाठी, आयुध उचलणे आणि पासे फेकणे यांसाठी या हस्ताचा उपयोग करावा. घाम पुसणे, स्त्रियांचा कुट्टमित भाव दाखविण्यासाठी हा हस्त थोडा हलवावा.

## ❖ कांगुलहस्ताचे लक्षण ❖

त्रेताग्निसंस्थिता मध्यातर्जन्यङ्गुष्ठका यदा |
काङ्गुलेऽनामिका वक्रा तथा चोर्ध्वा कनीयसी || ८९ ||

पदच्छेद : - त्रेताग्नि-संस्थिता मध्या तर्जनी अङ्गुष्ठका यदा |
काङ्गुले अनामिका वक्रा तथा च ऊर्ध्वा कनीयसी || ८९ ||

अन्वय : - काङ्गुले (हस्ते) मध्या तर्जनी अङ्गुष्ठका त्रेताग्निसंस्थिता, अनामिका वक्रा तथा च कनीयसी ऊर्ध्वा (भवेत्) |

अर्थ - 'काङ्गुल' हस्तामध्ये मध्यमा, तर्जनी आणि अंगठा वेगवेगळे ठेवून अनामिका वाकडी करून कनिष्ठिका सरळ करावी.

## ❖ कांगुलहस्ताचे विनियोग ❖

एतेन तरुणफलरूपणानि नानाविधानि च लघूनि |
कार्याणि रोषजानि स्त्रीवचनान्यङ्गुलिक्षेपै : || ९० ||

पदच्छेद : - एतेन तरुणफल-रूपणानि नाना-विधानि च लघूनि |
कार्याणि रोषजानि स्त्रीवचनानि अङ्गुलि-क्षेपै : || ९० ||

अन्वय : - एतेन नानाविधानि लघूनि तरुणफलानि, अङ्गुलिक्षेपै : रोषजानि स्त्रीवचनानि च कार्याणि |

अर्थ - याच्याद्वारे विविध छोटी छोटी फळे, (सुपारी, बोरं इत्यादि फळे ) दाखवावीत आणि स्त्रियांचे रोषपूर्ण वचन हे बोटांच्या हलविण्याने दर्शवावे .

[मरकतवैडूर्यादेः प्रदर्शनं सुमनसां च कर्तव्यम् |
ग्राह्यं बिडालपदमिति तज्ज्ञैरेवं प्रयोगेषु || ९१ ||]

पदच्छेदः - [मरकत-वैडूर्य-आदेः प्रदर्शनं सुमनसां च कर्तव्यम् |
ग्राह्यं बिडालपदम् इति तज्ज्ञैः एवं प्रयोगेषु || ९१ ||]

अन्वयः - एवं तज्ज्ञैः प्रयोगेषु मरकत-वैडूर्य-आदेः प्रदर्शनं, सुमनसां ग्राह्यं, बिडालपदं च कर्तव्यम् |

अर्थ - अशा प्रकारे (या हस्ताद्वारे) तज्ज्ञ मंडळींनी प्रयोगांमध्ये मरकत, वैदूर्य, इ . मणी, फुले धरणे, मांजराची पावले इ . चा अभिनय दाखवावा .

## ❖ अलपल्लवहस्ताचे लक्षण ❖

आवर्तिताः करतले यस्याङ्गुल्यो भवन्ति हि |
पार्श्वागतविकीर्णाश्च स भवेदलपल्लवः || ९२ ||

पदच्छेदः - आवर्तिताः करतले यस्य अङ्गुल्यः भवन्ति हि |
पार्श्व-आगत-विकीर्णाः च सः भवेत् अलपल्लवः || ९२ ||

अन्वयः - यस्य अङ्गुल्यः करतले आवर्तिताः, पार्श्व-आगत-विकीर्णाः च भवन्ति, सः अलपल्लवः भवेत् |

अर्थ - सर्व बोटे तळहातामध्ये गोलाकार आणून वाकविली आणि बाजूला नेऊन पसरविली असता त्यास 'अलपल्लव हस्त' म्हणतात .

## ❖ अलपल्लवहस्ताचे विनियोग ❖

प्रतिषेधकृते योज्यः कस्यत्वन्नास्ति शून्यवचनेषु |
पुनरात्मोपन्यासः स्त्रीणामेतेन कर्तव्यः || ९३ ||

पदच्छेद :- प्रतिषेधकृते योज्य : कस्यत्वत् न अस्ति शून्यवचनेषु |
पुन : आत्मोपन्यास : स्त्रीणाम् एतेन कर्तव्य : || ९३ ||

अन्वय : - "कस्यत्वत्?", "नास्ति" (इति) प्रतिषेधकृते, शून्यवचनेषु च योज्य: | पुन: एतेन स्त्रीणाम् आत्मोपन्यास : च कर्तव्य : |

अर्थ - "कोणाचा तू ?"असा प्रश्न विचारण्यासाठी, "नाही" असा निषेध करण्यासाठी, खोट्या आरोपांमुळे गप्प राहण्याचा अभिनय करण्यासाठी या हस्ताचा उपयोग करावा . तसेच स्त्रियांचा अहंकार किंवा विस्मय प्रदर्शित करण्यासाठी या हस्ताचा वापर करावा .

### ❖ चतुरहस्ताचे लक्षण ❖

तिस्र: प्रसारिता यत्र तथा चोर्ध्वा कनीयसी |
तासां मध्ये स्थितोऽङ्गुष्ठ: स करश्चतुर: स्मृत: || ९४ ||

पदच्छेद :- तिस्र : प्रसारिता : यत्र तथा च ऊर्ध्वा कनीयसी |
तासां मध्ये स्थित : अङ्गुष्ठ : स : कर : चतुर : स्मृत : || ९४ ||

अन्वय : - यत्र तिस्त्र : प्रसारिता :, तथा कनीयसी ऊर्ध्वा, तासां मध्ये अङ्गुष्ठ : स्थित : च, स : चतुर : कर : स्मृत : |

अर्थ - जेव्हा तीन बोटांना एकत्र समोर आणले जाते तसेच कनिष्ठिकेला वर उचलले असता आणि त्यांच्या मुळाशी अंगठ्याला ठेवले असता तो 'चतुरहस्त' होतो .

### ❖ चतुरहस्ताचे विनियोग ❖

नयविनयनियमसुनिपुणबालातुरसत्त्वकैतवार्थेषु |
वाक्ये युक्ते पथ्ये सत्ये प्रशमे च विनियोज्य: || ९५ ||

पदच्छेद :- नय-विनय-नियम-सुनिपुण-बाला-आतुर-सत्त्व-कैतवार्थेषु |
वाक्ये युक्ते पथ्ये सत्ये प्रशमे च विनियोज्य : || ९५ ||

अन्वय : - नय-विनय-नियम-सुनिपुण-बाला-आतुर-सत्त्व-कैतव-अर्थेषु, वाक्ये, युक्ते, पथ्ये, सत्ये, प्रशमे च विनियोज्य : |

अर्थ - नीती, विनय, नियम, चातुर्य, बालिका, आतुर, सत्त्व, खोटे बोलणे, इ. अर्थ व्यक्त करताना तसेच वाक्य, योग्य, पथ्य, सत्य आणि शम इ. अर्थाचा अभिनय करताना या हस्ताचा उपयोग करावा.

एकेन द्वाभ्यां वा किञ्चिन्मण्डलकृतेन हस्तेन |
विवृतविचारितचरितं वितर्कित लज्जितं चैव || ९६ ||

पदच्छेद:- एकेन द्वाभ्यां वा किञ्चित् मण्डलकृतेन हस्तेन |
विवृत-विचारित-चरितं वितर्कितं लज्जितं च एव || ९६ ||

अन्वय: - किञ्चित् मण्डलकृतेन एकेन हस्तेन, द्वाभ्यां वा विवृत-विचारित-चरितं, वितर्कितं, लज्जितं च (विनियोज्यम्)|

अर्थ - एक किंवा दोन चतुर हस्त जरासे गोलाकार फिरवून विवृत, विचारित, चरित, वितर्कित आणि लज्जित या भावांचा अभिनय करावा.

नयनौपम्यं पद्मदलरूपणं हरिणकर्णनिर्देश: |
संयुतकरणेनैव तु चतुरेणैतानि कुर्वीत || ९७ ||

पदच्छेद:- नयन-औपम्यं पद्मदल-रूपणं हरिण-कर्ण-निर्देश: |
संयुतकरणेन एव तु चतुरेण एतानि कुर्वीत || ९७ ||

अन्वय: - चतुरेण संयुतकरणेन नयन-औपम्यं, पद्मदल-रूपणं, हरिण-कर्ण-निर्देश: एतानि कुर्वीत |

अर्थ - दोन चतुरहस्त एकत्र आणून कमळाची उपमा डोळ्याला देणे (कमलनयन दाखवणे) तसेच हरणांचे कान दाखविणे इ. चा अभिनय करावा.

लीलारती रुचिं च स्मृतिबुद्धिविभावना: क्षमां पुष्टिम् |
संज्ञामात्रां प्रणयं विचारणं सङ्गतं शौचम् || ९८ ||
चातुर्य माधुर्य दाक्षिण्यं मार्दवं सुखं शीलम् |
प्रश्नं वार्तायुक्तिं वेषं मृदु शाद्वलं स्तोकम् || ९९ ||

विभवाविभवौ सुरतं गुणागुणौ यौवनं गृहं दारान् |
नानावर्णांश्च तथा चतुरेणैवं प्रयुञ्जीत ||१०० ||

पदच्छेद : - लीला-रती : रुचिं च स्मृति-बुद्धि-विभावना : क्षमां पुष्टिम् |
संज्ञामात्रां प्रणयं विचारणं सङ्गतं शौचम् || ९८ ||
चातुर्यं माधुर्यं दाक्षिण्यं मार्दवं सुखं शीलम् |
प्रश्नं वार्तायुक्तिं वेषं मृदु शाद्वलं स्तोकम् || ९९ ||
विभव-अविभवौ सुरतं गुण-अगुणौ यौवनं गृहं दारान् |
नानावर्णान् च तथा चतुरेण एवं प्रयुञ्जीत || १०० ||

अन्वय : - एवं चतुरेण लीला-रती :, रुचिं, स्मृति-बुद्धि-विभावना :, क्षमां, पुष्टिं, संज्ञामात्रां, प्रणयं, विचारणं, सङ्गतं, शौचं, चातुर्यं, माधुर्यं, दाक्षिण्यं, मार्दवं, सुखं, शीलं, प्रश्नं, वार्ता युक्तिं, वेषं, मृदु शाद्वलं, स्तोकं, विभव-अविभवौ, सुरतं, गुण-अगुणौ, यौवनं, गृहं दारान् , तथा च नानावर्णान् प्रयुञ्जीत |

अर्थ - याशिवाय चतुरहस्ताद्वारे लीला, रती, रुची (प्रभा), स्मृती, बुद्धी, तर्क, क्षमा, पुष्टी, संकेत, प्रणय ,विचार, मीलन, पवित्रता, चतुरता, मधुरता, दाक्षिण्य, मार्दव, सुख, शील, प्रश्न, कथा, युक्ती, वेष, कोवळे गवत, छोटेसं माप, वैभव, वैभवहीनता, सुरतकर्म, गुण आणि अवगुण, तारुण्य, घर, पत्नी तसेच विविध रंग पण दाखवावे .

[सितमूर्ध्वेन तु कुर्याद्रक्तं पीतं च मण्डलकृतेन |
परिमृदितेन तु नीलं वर्णांश्चतुरेण हस्तेन || १०१ ||]

पदच्छेद : - [सितम् ऊर्ध्वेन तु कुर्यात् रक्तं पीतं च मण्डलकृतेन |
परिमृदितेन तु नीलं वर्णान् चतुरेण हस्तेन || १०१ ||]

अन्वय : - चतुरेण हस्तेन वर्णान् (दर्शयितुम्) ऊर्ध्वेन सितं, मण्डलकृतेन रक्तं पीतं च, परिमृदितेन तु नीलं कुर्यात् |

अर्थ - चतुरहस्त वरच्या बाजूस नेल्यास सफेद रंग, गोल फिरवून लाल आणि पिवळा रंग, एका हाताने दुसरा हात दाबल्यास निळा रंग दाखवता येतो .

### ❖ भ्रमरहस्ताचे लक्षण ❖

मध्यमाङ्गुष्ठसन्दंशो वक्रा चैव प्रदेशिनी |
ऊर्ध्वमन्ये प्रकीर्णे च द्व्यङ्गुल्यौ भ्रमरे करे || १०२ ||

पदच्छेद : - मध्यमा-अङ्गुष्ठ-सन्दंश : वक्रा च एव प्रदेशिनी |
ऊर्ध्वम् अन्ये प्रकीर्णे च द्वि-अङ्गुल्यौ भ्रमरे करे || १०२ ||

अन्वय : - भ्रमरे करे मध्यमा-अङ्गुष्ठ-सन्दंश : प्रदेशिनी वक्रा च (कृत्वा) अन्ये द्वि-अङ्गुल्यौ च ऊर्ध्वं प्रकीर्णे (कार्ये) |

अर्थ - मध्यमा व अंगठा एकत्र जुळवून तर्जनी वाकवावी आणि मग उरलेली दोन बोटे वरच्या बाजूला वेगवेगळी ठेवावी यास 'भ्रमरहस्त' असे म्हणतात .

### ❖ भ्रमरहस्ताचे विनियोग ❖

पद्मोत्पलकुमुदानामन्येषां चैव दीर्घवृन्तानाम् |
पुष्पाणां ग्रहणविधि: कर्तव्य: कर्णपूरश्च || १०३ ||

पदच्छेद : - पद्म-उत्पल-कुमुदानाम् अन्येषां च एव दीर्घ-वृन्तानाम् |
पुष्पाणां ग्रहणविधि : कर्तव्य : कर्णपूर : च || १०३ ||

अन्वय : - (एतेन हस्तेन) अन्येषां च दीर्घवृन्तानां पद्म-उत्पल-कुमुदानां पुष्पाणां ग्रहणविधि : कर्ण पूर : च कर्तव्य : |

अर्थ - या हस्ताद्वारे कमळ ,कुमुदिनी व लांब देठ असलेली दुसरी फुले घेणे आणि कर्णकुंडले दाखवता येतात .

[विच्युतश्च सशब्दश्च कार्यो निर्भर्त्सनादिषु |
बालालापे च शीघ्रे च ताले विश्वासने तथा || १०४ ||]

पदच्छेद : - [विच्युत : च सशब्द : च कार्य : निर्भर्त्सन-आदिषु |
बाल-आलापे च शीघ्रे च ताले विश्वासने तथा || १०४ ||]

अन्वय : - [ निर्भर्त्सनादिषु बालालापे शीघ्रे ताले तथा विश्वासने विच्युत : (एष : हस्त :) सशब्द : च कार्य : | ]

अर्थ - निर्भर्त्सना करताना, लहान बाळाशी बोलताना, घाईत असताना, ताल देताना आणि विश्वास प्रकट करताना शब्दांसह हा भ्रमर हस्त वेगळा करावा .

❖ हंसवक्त्रहस्ताचे लक्षण ❖

तर्जनीमध्यमाङ्गुष्ठास्त्रेताग्निस्था निरन्तरा : |
भवेयुर्हंसवक्त्रस्य शेषे द्वे सम्प्रसारिते || १०५ ||

पदच्छेद : - तर्जनी-मध्यमा-अङ्गुष्ठा : त्रेताग्निस्था : निरन्तरा : |
भवेयु : हंसवक्त्रस्य शेषे द्वे सम्प्रसारिते || १०५ ||

अन्वय : - तर्जनी-मध्यमा-अङ्गुष्ठा: त्रेताग्निस्था: निरन्तरा: भवेयु:, हंसवक्त्रस्य शेषे द्वे सम्प्रसारिते |

अर्थ - तर्जनी, मध्यमा आणि अंगठा तीन यांना त्रेताग्निंप्रमाणे एकत्र आणावे . उरलेली दोन बोटे वर उचलून पसरवावीत . तेव्हा तो 'हंसास्य हस्त' होतो .

❖ हंसवक्त्रहस्ताचे विनियोग ❖

श्लक्ष्णाल्पशिथिललाघवनिस्सारार्थे मृदुत्वयोगे च |
कार्योऽभिनयविशेष : किञ्चित्प्रस्पन्दिताग्रेण || १०६ ||

पदच्छेद : - श्लक्ष्ण-अल्प-शिथिल-लाघव-निस्सारार्थे मृदुत्वयोगे च |
कार्य : अभिनयविशेष : किञ्चित् प्रस्पन्दित अग्रेण || १०६ ||

अन्वय : - श्लक्ष्ण-अल्प-शिथिल-लाघव-निस्सारार्थे मृदुत्वयोगे च किञ्चित् प्रस्पन्दित अग्रेण अभिनयविशेष : कार्य : |

अर्थ - स्निग्ध, अल्प, शिथील, लघु (लहान), असार तसेच मृदुता इ . अर्थ प्रगट करण्यासाठी या हस्ताच्या अग्रभागाला कंपित करून विशेष अभिनय करावा .

### ❖ हंसपक्षहस्ताचे लक्षण ❖

समा: प्रसारितास्तिस्रस्तथा चोर्ध्वा कनीयसी |
अङ्गुष्ठ: कुञ्चितश्चैव हंसपक्ष इति स्मृत: ‖ १०७ ‖

पदच्छेद: - समा: प्रसारिता: तिस्र: तथा च ऊर्ध्वा कनीयसी |
अङ्गुष्ठ: कुञ्चित: च एव हंसपक्ष: इति स्मृत: ‖ १०७ ‖

अन्वय: - तिस्र: समा: प्रसारिता: तथा च कनीयसी ऊर्ध्वा अङ्गुष्ठ: कुञ्चित: च हंसपक्ष: इति स्मृत: |

अर्थ - तीन बोटे (तर्जनी, मध्यमा, अनामिका यांना) एकत्रित करून, कनिष्ठिका वर उचलून पसरवावी व अंगठा वाकवावा तेव्हा तो 'हंसपक्ष हस्त' होतो .

### ❖ हंसपक्षहस्ताचे विनियोग ❖

एष च निवापसलिले दातव्ये गण्डसंश्रये चैव |
कार्य: प्रतिग्रहाचमनभोजनार्थेषु विप्राणाम् ‖ १०८ ‖
आलिङ्गने महास्तम्भदर्शने रोमहर्षणे चैव |
स्पर्शेऽनुलेपनार्थे योज्य: संवाहने चैव ‖ १०९ ‖
पुनरेव च नारीणां स्तनान्तरस्थेन विभ्रमविशेषा: |
कार्या यथारसं स्युर्दु:खे हनुधारणे चैव ‖ ११० ‖

पदच्छेद: - एष: च निवाप-सलिले दातव्ये गण्डसंश्रये च एव |
कार्य: प्रतिग्रह-आचमन-भोजनार्थेषु विप्राणाम् ‖ १०८ ‖
आलिङ्गने महास्तम्भ-दर्शने रोमहर्षणे च एव |
स्पर्शे अनुलेपनार्थे योज्य: संवाहने च एव ‖ १०९ ‖
पुन: एव च नारीणां स्तनान्तरस्थेन विभ्रमविशेषा: |
कार्या: यथारसं स्यु: दु:खे हनुधारणे च एव ‖ ११० ‖

अन्वय: - एष: (हस्त:) निवाप-सलिले दातव्ये गण्डसंश्रये विप्राणां प्रतिग्रह-आचमन-भोजनार्थेषु कार्य: |
आलिङ्गने महास्तम्भदर्शने रोमहर्षणे च स्पर्शे अनुलेपनार्थे संवाहने च योज्य: | पुन: एव च नारीणां स्तनान्तरस्थेन विभ्रमविशेषा: | दु:खे हनुधारणे च यथारसं कार्या: स्यु: |

अर्थ - हा हस्त पितरांना पाणी देणे (तर्पण करणे), गालांना स्पर्श करणे, ब्राह्मणांद्वारे आचमन आणि भोजन ग्रहण करण्यासाठी, आलिंगन देणे, मोठा खांब पाहणे, रोमांचित होणे, स्पर्श करणे, चंदनाचा लेप लावणे, संवाहन करणे (पाय किंवा शरीर दाबणे) यांसाठी योजावा. नारीच्या स्तनांच्या मध्यभागी हंसपक्षहस्त ठेवून विशेष प्रकारच्या क्रियांनी विभ्रम, विलास, दु:ख आणि हनुवटी धरणे इ. साठी विविध रसांप्रमाणे या हस्ताचा प्रयोग करावा.

### ❖ संदंशहस्ताचे लक्षण ❖

तर्जन्यङ्गुष्ठसन्दंशस्त्वरालस्य यदा भवेत् |
आभुग्नतलमध्यस्थ: स सन्दंश इति स्मृत: || १११ ||

पदच्छेद: - तर्जनी-अङ्गुष्ठ-सन्दंश: तु अरालस्य यदा भवेत् |
आभुग्नतल-मध्यस्थ: स: सन्दंश: इति स्मृत: || १११ ||

अन्वय: - यदा अरालस्य तर्जनी-अङ्गुष्ठ-सन्दंश: आभुग्नतल-मध्यस्थ: भवेत् | स: सन्दंश: इति स्मृत: |

अर्थ - अराल हस्तामध्ये तर्जनी आणि अंगठ्याचा अग्रभाग मिळून तळहात जरासा झुकवल्यास 'संदंश हस्त' होतो.

### ❖ संदंशहस्ताचे विनियोग ❖

सन्दंशस्त्रिविधो ज्ञेयस्त्वग्रजो मुखजस्तथा |
तथा पार्श्वगतश्चैव रसभावोपबृंहित: || ११२ ||

पदच्छेद: - सन्दंश: त्रिविध: ज्ञेय: तु अग्रज: मुखज: तथा |
तथा पार्श्वगत: च एव रसभाव-उपबृंहित: || ११२ ||

अन्वय: - रसभाव-उपबृंहित: सन्दंश: त्रिविध: ज्ञेय: अग्रज: मुखज: तथा पार्श्वगत: च एव |

अर्थ - रस आणि भावांच्या आधारे विस्तार प्राप्त करणाऱ्या संदंश हस्ताचे तीन प्रकार आहेत . 'अग्रज' (समोरच्या बाजूस राहणारा), 'मुखज' (तोंडाच्या बाजूस राहणारा), 'पार्श्वगत' (मागच्या बाजूस राहणारा) .

पुष्पावचयग्रथने ग्रहणे तृणपर्णकेशसूत्राणाम् |
शल्यावयवग्रहणं प्रकर्षणे चाग्रसन्दंश: || ११३ ||

पदच्छेद: - पुष्प-अवचय-ग्रथने ग्रहणे तृण-पर्ण-केश-सूत्राणाम् |
शल्य-अवयव-ग्रहणं प्रकर्षणे च अग्रसन्दंश: || ११३ ||

अन्वय: - पुष्प-अवचय-ग्रथने तृण-पर्ण-केश-सूत्राणां ग्रहणे शल्य-अवयव-ग्रहणं प्रकर्षणे च अग्रसन्दंश: (प्रयोक्तव्य:) |

अर्थ - फुलं गोळा करणे, माळा गुंफणे, गवत, पान, केस तसेच दोरा धरणे, काट्याचे टोक धरणे, बाण खेचणे यांचा अभिनय करण्यासाठी अग्रज सन्दंश हस्ताचा उपयोग करावा .

वृन्तात्पुष्पोद्धरणं वर्तिशलाकादिपूरणं चैव |
धिगिति च वचनं रोषे मुखसन्दंशस्य कर्माणि || ११४ ||

पदच्छेद: - वृन्तात् पुष्प-उद्धरणं वर्तिशलाका-आदिपूरणं च एव |
धिक् इति च वचनं रोषे मुखसन्दंशस्य कर्माणि || ११४ ||

अन्वय: - वृन्तात् पुष्पोद्धरणं वर्तिशलाकादिपूरणं धिक् इति वचनं रोषे च मुखसन्दंशस्य कर्माणि (सन्ति) |

अर्थ - देठापासून फूल तोडणे, दिव्यामध्ये वात ठेवणे किंवा वातीला काडीने सरळ करणे, सुईत दोरा ओवणे, धिक्कारात्मक शब्द उच्चारणे तसेच क्रोधित होणे इ . चा अभिनय मुखज संदंश हस्ताद्वारे करावा .

यज्ञोपवीतधारणवेधनगुणसूक्ष्मबाणलक्ष्येषु |
योगे ध्याने स्तोके संयुक्तकरणस्तु कर्तव्य: || ११५ ||

पदच्छेद :- यज्ञोपवीतधारण-वेधनगुण-सूक्ष्मबाणलक्ष्येषु |
योगे ध्याने स्तोके संयुक्तकरण : तु कर्तव्य : || ११५ ||

अन्वय : - यज्ञोपवीतधारण-वेधनगुण-सूक्ष्मबाणलक्ष्येषु योगे ध्याने स्तोके संयुक्तकरण: तु कर्तव्य : |

अर्थ - (दोन्ही मुखजसंदंश हस्त एकमेकांसमोर ठेवून) जानवे धरणे, रत्नातील छिद्रात दोरा घालणे, धनुष्यबाणाने लक्ष्यावर नेम धरणे, योग, ध्यान, आणि छोटी वस्तू दाखवणे इ . चा अभिनय करावा .

पेशलकुत्सासूयादोषवचने च वामहस्तेन |
किञ्चिद्विवर्तिताग्र : प्रयुज्यते पार्श्वसंन्दश : || ११६ ||

पदच्छेद :- पेशल-कुत्स-असूया-दोषवचने च वामहस्तेन |
किञ्चित् विवर्तित-अग्र : प्रयुज्यते पार्श्वसंन्दश : || ११६ ||

अन्वय : - वामहस्तेन किञ्चित् विवर्तिताग्र : पार्श्वसंन्दश : (हस्त :) पेशल-कुत्स-असूया-दोषवचने च प्रयुज्यते |

अर्थ - पार्श्वसंदंश हस्त डावीकडे नेला असता आणि याचा अग्रभाग विवर्तित केल्यास या पार्श्वसन्दंश हस्ताने कोमलता, निंदा, असूया आणि दोषपूर्ण शब्दांची अभिव्यक्ती होते .

आलेख्यनेत्ररञ्जनवितर्कवृन्तप्रवालरचनं च |
निष्पीडनं तथालक्तकस्य कार्यं च नारीभि : || ११७ ||

पदच्छेद :- आलेख्य-नेत्ररञ्जन-वितर्क-वृन्त-प्रवालरचनं च |
निष्पीडनं तथा अलक्तकस्य कार्यं च नारीभि : || ११७ ||

अन्वय : - नारीभि : (एतेन हस्तेन) आलेख्य-नेत्ररञ्जन-वितर्क-वृन्त-प्रवालरचनं च |
निष्पीडनं तथा अलक्तकस्य कार्यं च |

अर्थ - स्त्रियांद्वारे या हस्ताने चित्र काढणे, डोळ्यांत अंजन घालणे, वितर्क, शंका, निसर्गरम्य चित्र रेखाटणे (शरीरावर काढली जाणारी नक्षीदार चित्रे) तसेच पायाला अल्ता लावणे इ . दाखविले जाते .

### ❖ मुकुलहस्ताचे लक्षण ❖

समागताग्राससहिता यस्याङ्गुल्यो भवन्ति हि |
ऊर्ध्वा हंसमुखस्यैव स भवेन्मुकुल: कर: || ११८ ||

पदच्छेद: - समागताग्रा: सहिता: यस्य अङ्गुल्य: भवन्ति हि |
ऊर्ध्वा: हंसमुखस्य एव स: भवेत् मुकुल: कर: || ११८ ||

अन्वय: - यस्य हंसमुखस्य ऊर्ध्वा: अङ्गुल्य: समागताग्रा: सहिता: भवन्ति स: मुकुल: कर: भवेत् |

अर्थ - हंसास्य हस्तामधील वर असलेली सर्व बोटे एकमेकांशी समानरीत्या जुळवून अग्रभाग एकत्रित केल्यास त्याला 'मुकुल हस्त' असे म्हणतात .

### ❖ मुकुलहस्ताचे विनियोग ❖

देवार्चनबलिकरणे पद्मोत्पलमुकुलरूपणे चैव |
विटचुम्बने च कार्यो विकुत्सिते विप्रकीर्णश्च || ११९ ||
भोजनहिरण्यगणनामुखसङ्कोचप्रदानशीघ्रेषु |
मुकुलितकुसुमेषु च तथा तज्ज्ञैरेष प्रयोक्तव्य: || १२० ||

पदच्छेद: - देवार्चन-बलिकरणे पद्म-उत्पल-मुकुल-रूपणे च एव |
विट-चुम्बने च कार्य: विकुत्सिते विप्रकीर्ण: च || ११९ ||
भोजन-हिरण्यगणना-मुखसङ्कोच-प्रदान-शीघ्रेषु |
मुकुलित-कुसुमेषु च तथा तज्ज्ञै: एष: प्रयोक्तव्य: || १२० ||

अन्वय: - देवार्चन-बलिकरणे पद्म-उत्पल-मुकुल-रूपणे विट-चुम्बने विकुत्सिते च विप्रकीर्ण: कार्य: |
भोजन-हिरण्यगणना-मुखसङ्कोच-प्रदान-शीघ्रेषु मुकुलितकुसुमेषु च तज्ज्ञै: एष: प्रयोक्तव्य: |

अर्थ - यांच्याद्वारे देवपूजन, आहुती अर्पण करणे, कमळ, नीलकमळ आणि कुमुद यांचा अभिनय करण्यासाठी, विटचुंबनामध्ये आणि निंदित कार्यासाठी या मुकुल हस्ताचा वापर विप्रकीर्ण करून करावा .

जेवण, सुवर्णमुद्रा मोजणे, मुख संकोचित करणे, वस्तू देणे, जलदगती तसेच फुलांची कळी दाखवणे इ. चा अभिनय करताना तज्ज्ञांनी या हस्ताचा उपयोग करावा.

टीप - प्रियेच्या जवळ जाऊन स्वत:चा अभिप्राय प्रकट करण्यासाठी विट स्वत:च्याच मुकुलहस्ताचे चुंबन घेतो, त्यास विटचुंबन असे म्हणतात.

### ❖ ऊर्णनाभहस्ताचे लक्षण ❖

पद्मकोशस्य हस्तस्य ह्यङ्गुल्य: कुञ्चिता यदा |
ऊर्णनाभ: स विज्ञेय: केशचौर्यग्रहादिषु || १२१ ||

पदच्छेद: - पद्मकोशस्य हस्तस्य हि अङ्गुल्य: कुञ्चिता: यदा |
ऊर्णनाभ: स: विज्ञेय: केश-चौर्य-ग्रह-आदिषु || १२१ ||

अन्वय: - पद्मकोशस्य हस्तस्य अङ्गुल्य: यदा कुञ्चिता: स: ऊर्णनाभ: विज्ञेय: | केश-चौर्य-ग्रह-आदिषु (स: प्रयोक्तव्य:) |

अर्थ - पद्मकोश हस्ताची सर्व बोटे अधिक निमुळती केल्यास त्यास 'ऊर्णनाभ हस्त' असे म्हणतात. केस ओढणे, चोरलेल्या वस्तू घेणे इ. साठी या हस्ताचा उपयोग करावा.

### ❖ ऊर्णनाभहस्ताचे विनियोग ❖

शिर: कण्डूयने चैव कुष्ठव्याधिनिरूपणे |
सिंहव्याघ्रेष्वभिनय: प्रस्तरग्रहणे तथा || १२२ ||

पदच्छेद: - शिर:कण्डूयने च एव कुष्ठव्याधि-निरूपणे |
सिंह-व्याघ्रेषु अभिनय: प्रस्तरग्रहणे तथा || १२२ ||

अन्वय: - शिर:कण्डूयने कुष्ठव्याधिनिरूपणे सिंहव्याघ्रेषु तथा प्रस्तरग्रहणे (एष: हस्त:) अभिनय: |

अर्थ - डोके खाजविणे, कुष्ठरोग दाखविणे, सिंह, वाघ इ. अन्य हिंस्त्र प्राणी दाखविणे, चोरलेली वस्तू उचलणे वगैरे अर्थाचा अभिनय करण्यासाठी या हस्ताचा वापर केला जातो.

### ❖ ताम्रचूडहस्ताचे लक्षण ❖

मध्यमाङ्गुष्ठसन्दंशो वक्रा चैव प्रदेशिनी |
शेषे तलस्थे कर्तव्ये ताम्रचूडकरेऽङ्गुली || १२३ ||

पदच्छेद : - मध्यमा-अङ्गुष्ठ-सन्दंश : वक्रा च एव प्रदेशिनी |
शेषे तलस्थे कर्तव्ये ताम्रचूडकरे अङ्गुली || १२३ ||

अन्वय : - ताम्रचूडकरे मध्यमा-अङ्गुष्ठ-सन्दंश : प्रदेशिनी वक्रा शेषे अङ्गुली च तलस्थे कर्तव्ये |

अर्थ - मध्यमा आणि अंगठा एकत्र करावा. तर्जनीला जराशी वाकवावी आणि उरलेली दोन बोटे तळहाताशी जुळविल्यास त्यास 'ताम्रचूड हस्त' असे म्हणतात.

### ❖ ताम्रचूडहस्ताचे विनियोग ❖

विच्युतश्च सशब्दश्च कार्यो निर्भर्त्सनादिषु |
ताले विश्वासने चैव शीघ्रार्थे संज्ञितेषु च || १२४ ||

पदच्छेद : - विच्युत : च सशब्द : च कार्य : निर्भर्त्सनादिषु |
ताले विश्वासने च एव शीघ्रार्थे संज्ञितेषु च || १२४ ||

अन्वय : - निर्भर्त्सनादिषु ताले विश्वासने शीघ्रार्थे संज्ञितेषु च (ताम्रचूडहस्त :) सशब्द : विच्युत : च कार्य : |

अर्थ - निर्भत्सना करणे (ओरडणे), ताल हे प्रमाण दाखविण्यासाठी, विश्वास दर्शविण्यासाठी, जलदगती आणि लहान मुलांना बोलावण्यासाठी ताम्रचूडहस्त आवाज करून वापरावा.

[तथा कलासु काष्ठासु निमेषे तु क्षणे तथा |
एष एव कर : कार्यो बालालापनिमन्त्रणे || १२५ ||]

पदच्छेद : - [तथा कलासु काष्ठासु निमेषे तु क्षणे तथा |
एष : एव कर : कार्य : बाला-आलाप-निमन्त्रणे || १२५ ||]

अन्वय : - तथा कलासु काष्ठासु निमेषे क्षणे तथा बाला-आलाप-निमन्त्रणे एष : एव कर : कार्य : |]

अर्थ - तसेच कालगणनांचे विविध भाग उदाहरणार्थ कला, काष्ठ, निमेष, क्षण दाखविण्यासाठी, युवती व बालिकांशी संभाषण तसेच त्यांना आमंत्रण देण्यासाठी या हस्ताचा वापर होतो .

❖ अन्यमतानुसार ताम्रचूडहस्ताचे लक्षण आणि विनियोग ❖

अथवा

अङ्गुल्यस्संयुता वक्रा उपर्युङ्गुष्ठपीडिता: |
प्रसारिता कनिष्ठा च ताम्रचूड: कर:स्मृत: || १२६ ||

पदच्छेद:- अङ्गुल्य: संयुता: वक्रा: उपरि अङ्गुष्ठपीडिता: |
प्रसारिता कनिष्ठा च ताम्रचूड: कर:स्मृत: || १२६ ||

अन्वय: - अङ्गुल्य: संयुता: वक्रा: उपरि अङ्गुष्ठपीडिता: (कर्तव्या:) अपि च प्रसारिता कनिष्ठा च ताम्रचूड: कर:स्मृत: |

अर्थ - हाताची बोटे एकमेकांशी जुळवून वाकवून त्याच्यावर अंगठ्याने दाबून कनिष्ठिका वर केल्यास त्यास 'ताम्रचूड हस्त' असे म्हणतात .

शतं सहस्रं लक्षं च कनकं चापि दर्शयेत् |
क्षिप्रमुक्ताङ्गुलीभिस्तु स्फुलिङ्गान्विप्रुषस्तथा || इति ||१२७

पदच्छेद:- शतं सहस्रं लक्षं च कनकं च अपि दर्शयेत् |
क्षिप्रमुक्त-अङ्गुलीभि: तु स्फुलिङ्गान् विप्रुष: तथा || इति १२७||

अन्वय: - (एतेन हस्तेन)शतं सहस्रं लक्षं कनकं च दर्शयेत् | क्षिप्रमुक्त-अङ्गुलीभि: स्फुलिङ्गान् विप्रुष: तथा || इति ||

अर्थ - यांच्याद्वारे शंभर, हजार, लाख अशी संख्या तसेच सुवर्णमुद्रा दाखविली जाते . याच हस्तांमध्ये बोटे जलदगतीने मोकळी केल्यास आगीच्या ज्वाळा आणि थेंब किंवा तुषार दाखवता येतात .

### ❖ संयुतहस्ताची लक्षणे ❖

असंयुता: करा ह्येते मया प्रोक्ता द्विजोत्तमा: |
अतश्च संयुतान्हस्तान् गदतो मे निबोधत || १२८ ||

पदच्छेद: - असंयुता: करा: हि एते मया प्रोक्ता: द्विजोत्तमा: |
अत: च संयुतान् हस्तान् गदत: मे निबोधत || १२८ ||

अन्वय: - द्विजोत्तमा:, एते असंयुता: करा: मया प्रोक्ता: |
अत: च संयुतान् हस्तान् गदत: मे निबोधत |

अर्थ - हे मुनीजनांनो ! याप्रकारे मी तुम्हाला 'असंयुत हस्त' सांगितले . आता मी तुम्हांला 'संयुत हस्त' सांगणार आहे . ते तुम्ही जाणून घ्या .

### ❖ अंजलिहस्ताचे लक्षण आणि विनियोग ❖

पताकाभ्यां तु हस्ताभ्यां संश्लेषादञ्जलि: स्मृत: |
देवतानां गुरूणां च मित्राणां चाभिवादने || १२९ ||

पदच्छेद: - पताकाभ्यां तु हस्ताभ्यां संश्लेषात् अञ्जलि: स्मृत: |
देवतानां गुरूणां च मित्राणां च अभिवादने || १२९ ||

अन्वय: - पताकाभ्यां तु हस्ताभ्यां संश्लेषात् अञ्जलि: स्मृत: |
देवतानां गुरूणां च मित्राणां च अभिवादने |

अर्थ - दोन्ही पताका हस्त एकमेकांना जुळविल्यास 'अंजली हस्त' होतो . देवता, गुरुजन आणि मित्रांना अभिवादन करण्यासाठी याचा वापर होतो .

[स्थानान्यस्य पुनस्त्रीणि वक्षो वक्त्रं शिरस्तथा ||
देवतानां शिरस्स्थस्तु गुरूणामास्यसंस्थित: || १३० ||
वक्ष:स्थश्चैव मित्राणां स्त्रीणामनियतो भवेत् |

पदच्छेद: - [स्थानानि अस्य पुन: त्रीणि वक्ष: वक्त्रं शिर: तथा ||]

देवतानां शिर :स्थ : तु गुरूणाम् आस्यसंस्थित : ॥ १३० ॥
वक्ष :स्थ : च एव मित्राणां स्त्रीणाम् अनियत : भवेत् ।

अन्वय : - अस्य (अभिवादनस्य) त्रीणि स्थानानि वक्ष : वक्त्रं तथा शिर : । देवतानां शिर :स्थ : गुरूणाम् आस्यसंस्थित : मित्राणां वक्ष :स्थ : च एव । स्त्रीणाम् अनियत : भवेत् ।

अर्थ - अभिवादनाची तीन स्थाने आहेत. छाती, मुख आणि डोके. देवतांना डोक्यावर अंजली हस्त ठेवून नमस्कार करावा. गुरुजनांना मुखासमोर अंजली हस्त ठेवून नमस्कार करावा. मित्रांना छातीजवळ अंजली हस्त ठेवून नमस्कार करावा. स्त्रियांना अभिवादनासाठी स्थान निश्चित केलेले नाही.

### ❖ कपोतहस्ताचे लक्षण ❖

उभ्याभ्यामपि हस्ताभ्यामन्योन्यं पार्श्वसङ्ग्रहात् ॥ १३१ ॥
हस्त : कपोतको नाम कर्म चास्य निबोधत ।

पदच्छेद : - उभ्याभ्याम् अपि हस्ताभ्याम् अन्योन्यं पार्श्वसङ्ग्रहात् ॥ १३१ ॥
हस्त : कपोतक : नाम कर्म च अस्य निबोधत ।

अन्वय : - उभ्याभ्यां हस्ताभ्याम् अन्योन्यं पार्श्वसङ्ग्रहात् कपोतक : नाम हस्त : भवति अस्य कर्म च निबोधत ।

अर्थ - दोन्ही तळहाताच्या बाजू एकमेकांना जुळविल्यास 'कपोत हस्त' होतो. आता याचा विनियोग तुम्हांला सांगतो.

### ❖ कपोतहस्ताचे विनियोग ❖

एष विनयाभ्युपगमे प्रणामकरणे गुरोश्च संभाषे ॥ १३२ ॥
शीते भये च कार्यो वक्षस्स्थ : कम्पित : स्त्रीभि : ।

पदच्छेद : - एष : विनय-अभ्युपगमे प्रणाम-करणे गुरो : च संभाषे ॥ १३२ ॥
शीते भये च कार्य : वक्ष :स्थ : कम्पित : स्त्रीभि : ।

अन्वय : - विनय-अभ्युपगमे प्रणामकरणे गुरो : च संभाषे एष : (हस्त : कर्तव्य :) । स्त्रीभि : शीते भये च वक्ष :स्थ : कम्पित : कार्य : ।

अर्थ - विनम्रता आणि सौजन्यपूर्ण भाव प्रदर्शित करणे, आदरणीय गुरूजनांना प्रणाम करणे, त्यांच्याशी वार्तालाप करणे इ.च्या अभिनयासाठी कपोत हस्त वापरला जातो. स्त्रियांद्वारे थंडी व भीती दाखविण्यासाठी हा हस्त छातीजवळ कंपित ठेवावा.

अयमेवाङ्गुलिपरिघृष्यमाणमुक्तस्तु खेदवाक्येषु ॥ १३३ ॥
एतावदिति च कार्यो नेदानीं कृत्यमिति चार्थे ।

पदच्छेद:- अयम् एव अङ्गुलि-परिघृष्यमाण-मुक्त: तु खेदवाक्येषु ॥ १३३ ॥
एतावत् इति च कार्य: न इदानीं कृत्यम् इति च अर्थे ।

अन्वय: - अङ्गुलि-परिघृष्यमाण-मुक्त: अयम् एव खेदवाक्येषु "एतावत् च कार्य:" "न इदानीं कृत्यम्" इति अर्थे ।

अर्थ - याच दोन्ही हातांची बोटे एकमेकांस जुळवून मग सुटी केल्यास खिन्न वचन, 'एवढे कर' आणि 'हे आता करू नकोस' या अर्थाची अभिव्यक्ती करता येते.

### ❖ कर्कटहस्ताचे लक्षण ❖

अङ्गुल्यो यस्य हस्तस्य ह्यन्योन्यान्तरनिस्सृता: ।
स कर्कट इति ज्ञेय: कर: कर्म च वक्ष्यते ॥ १३४ ॥

पदच्छेद:- अङ्गुल्य: यस्य हस्तस्य हि अन्योन्यान्तरनि:सृता: ।
स: कर्कट: इति ज्ञेय: कर: कर्म च वक्ष्यते ॥ १३४ ॥

अन्वय: - यस्य हस्तस्य अङ्गुल्य: अन्योन्यान्तरनि:सृता: स: कर्कट: कर: इति ज्ञेय: । कर्म च वक्ष्यते ।

अर्थ - दोन्ही हाताची बोटे एकमेकांमध्ये जुळविल्यास त्यास 'कर्कट हस्त' असे म्हणतात. आता याचा वापर सांगतो.

### ❖ कर्कटहस्ताचे विनियोग ❖

एष मदनाङ्गमर्दे सुप्तोत्थितविजृम्भणे बृहद्देहे ।
हनुधारणे च योज्य: शङ्खग्रहणेऽर्थतत्त्वज्ञै: ॥ १३५ - अ ॥

पदच्छेद :- एष : मदन-अङ्गमर्दे सुप्त-उत्थित-विजृम्भणे बृहद्देहे |
हनु-धारणे च योज्य : शङ्ख-ग्रहणे अर्थतत्त्वज्ञै : || १३५-अ ||

अन्वय : - मदनाङ्गमर्दे सुप्तोत्थितविजृम्भणे बृहद्देहे हनुधारणे शङ्खग्रहणे च अर्थतत्त्वज्ञैः एष: योज्य : |

अर्थ - याच्याद्वारे कामवासनेने अंग मोडणे, झोपून उठल्यावर जांभई देणे, शरीर पसरविणे , हनुवटीचा आधार घेणे तसेच शंख धरणे इ . चा अभिनय करण्यासाठी (कथावस्तूचा) अर्थ जाणणाऱ्यांनी कर्कट हस्ताचा विनियोग करावा .

### ❖ स्वस्तिकहस्ताचे लक्षण ❖

मणिबन्धनविन्यस्तावरालौ स्त्रीप्रयोजितौ |
उत्तानौ वामपार्श्वस्थौ स्वस्तिक: परिकीर्तित: || १३५-ब ||

पदच्छेद :- मणिबन्धन-विन्यस्तौ अरालौ स्त्रीप्रयोजितौ |
उत्तानौ वामपार्श्वस्थौ स्वस्तिक : परिकीर्तित : || १३५-ब ||

अन्वय : - अरालौ उत्तानौ मणिबन्धनविन्यस्तौ वामपार्श्वस्थौ (करणीयौ | एष:) स्वस्तिक: परिकीर्तित : | (एतौ) स्त्रीप्रयोजितौ |

अर्थ - दोन्ही अराल हस्त उत्तान करून मनगटे स्वस्तिक करून डावीकडे नेल्यास त्याला 'स्वस्तिक हस्त' असे म्हणतात . याचा वापर स्त्रियांद्वारे केला जातो .

### ❖ स्वस्तिकहस्ताचे विनियोग ❖

स्वस्तिकविच्युतिकरणाद्दिशो घना : खं वनं समुद्राश्च |
ऋतवो मही तथौघं विस्तीर्णं वाभिनेयं स्यात् || १३६ ||

पदच्छेद :- स्वस्तिक-विच्युति-करणात् दिश : घना : खं वनं समुद्रा : च |
ऋतव : मही तथा ओघं विस्तीर्णं वा अभिनेयं स्यात् || १३६||

अन्वय : - स्वस्तिक-विच्युति-करणात् दिश : घना : खं वनं समुद्रा : ऋतव : मही तथा ओघं विस्तीर्णं वा अभिनेयं स्यात् |

अर्थ - स्वस्तिक हस्त करून दोन्ही हात एकमेकांपासून दूर केल्यास दिशा, आकाश, जंगल, समुद्र, ऋतू, पृथ्वी, वेग इत्यादी विविध विस्तारित प्रदेशांचा निर्देश होतो .

### ❖ खटकावर्धमानकाचे लक्षण आणि विनियोग ❖

खतकः खटके न्यस्तः खटकावर्धमानकः ।
शृङ्गारार्थेषु योक्तव्यः प्रणामकरणे तथा ॥ १३७ ॥
[अन्ये - कुमुदोत्पलवृन्तेषु कर्तव्यश्छत्रधारणे । इति ॥ १३८ ॥]

पदच्छेदः - खटकः खटके न्यस्तः खटकावर्धमानकः ।
शृङ्गार-अर्थेषु योक्तव्यः प्रणामकरणे तथा ॥ १३७ ॥
[अन्ये कुमुद-उत्पलवृन्तेषु कर्तव्यः छत्रधारणे । इति ॥ १३८ ॥]

अन्वयः - खटकः खटके न्यस्तः खटकावर्धमानकः । शृङ्गार-अर्थेषु तथा प्रणामकरणे योक्तव्यः । अन्ये कुमुद-उत्पलवृन्तेषु छत्रधारणे कर्तव्यः ।

अर्थ - जेव्हा एक खटकामुख हस्त दुसऱ्या खटकामुख हस्तावर ठेवला जातो (स्वस्तिक ), तेव्हा त्यास 'कटका - (खतका) वर्धमानक हस्त' असे म्हणतात . याचा वापर शृंगारभाव दर्शविण्यासाठी व प्रणाम करण्यासाठी होतो . अन्य मतानुसार, कळी, कमळाचा देठ दाखविणे व छत्र हातात धरण्यासाठी याचा वापर करावा .

### ❖ उत्संगहस्ताचे लक्षण ❖

अरालौ तु विपर्यस्तावुत्तानौ वर्धमानकौ ।
उत्सङ्ग इति विज्ञेयः स्पर्शस्य ग्रहणे करः ॥ १३९ ॥

पदच्छेदः - अरालौ तु विपर्यस्तौ उत्तानौ वर्धमानकौ ।
उत्सङ्गः इति विज्ञेयः स्पर्शस्य ग्रहणे करः ॥ १३९ ॥

अन्वयः - अरालौ विपर्यस्तौ उत्तानौ वर्धमानकौ (तदा सः हस्तः) उत्सङ्गः करः इति विज्ञेयः । (एषः) स्पर्शस्य ग्रहणे (प्रयुज्यते) ।

अर्थ - दोन्ही उत्तान अराल हस्त विपर्यस्त (वर्धमानक-स्वस्तिक) करून खांद्यावर ठेवल्यास तो उत्संग हस्त होतो .

### ❖ उत्संगहस्ताचे विनियोग ❖

सनिष्पेषकृते चैव रोषामर्षकृतेऽपि च |
निष्पीडित: पुनश्चैव स्त्रीणामीर्ष्याकृते भवेत् || १४० ||

पदच्छेद:- सनिष्पेषकृते च एव रोषामर्षकृते अपि च |
निष्पीडित: पुन: च एव स्त्रीणाम् ईर्ष्याकृते भवेत् || १४० ||

अन्वय: - सनिष्पेषकृते रोषामर्षकृते निष्पीडित: पुन: च एव स्त्रीणाम् ईर्ष्याकृते (एष: हस्त:) भवेत् |

अर्थ - प्रयत्नपूर्वक होणारी कार्ये, क्रोध, अमर्ष, पीडा तसेच स्त्रियांची ईर्ष्या इत्यादी दाखविण्यासाठी उत्संग हस्ताचा वापर होतो .

### ❖ निषधहस्ताचे लक्षण ❖

मुकुलं तु यदा हस्तं कपित्थ: परिवेष्टयेत् |
स मन्तव्यस्तदा हस्तो निषधो नाम नामत: || १४१ ||

पदच्छेद:- मुकुलं तु यदा हस्तं कपित्थ: परिवेष्टयेत् |
स: मन्तव्य: तदा हस्त: निषध: नाम नामत: || १४१ ||

अन्वय: - यदा मुकुलं हस्तं कपित्थ: परिवेष्टयेत् तदा स: हस्त: निषध: नाम नामत: मन्तव्य: |

अर्थ - जेव्हा मुकुल हस्ताला कपित्थ हस्ताद्वारे आच्छादित (वेष्टित, समुच्चित) केले जाते, तेव्हा त्या हस्ताला 'निषध हस्त' म्हणतात .

### ❖ निषधहस्ताचे विनियोग ❖

संग्रहपरिग्रहौ धारणं च समयश्च सत्यवचनं च |
सङ्क्षेप: सङ्क्षिप्तं निपीडितेनाभिनेतव्यम् || १४२ ||

पदच्छेद : - संग्रहपरिग्रहौ धारणं च समय : च सत्यवचनं च |
सङ्क्षेप : सङ्क्षिप्तं निपीडितेन अभिनेतव्यम् || १४२ ||

अन्वय : - संग्रहपरिग्रहौ धारणं समय : सत्यवचनं च |
सङ्क्षेप : सङ्क्षिप्तं निपीडितेन अभिनेतव्यम् |

अर्थ - संग्रह करणे, स्वीकार करणे, धारण करणे, वेळ, सत्यवचन, सारांश, संक्षेप, दु :ख इ. भाव दाखविण्यासाठी या हस्ताचा अभिनय करावा .

[शिखरस्तु यदा हस्तो मृगशीर्षेण पीडित : |
निषधो नाम विज्ञेय : स भयार्ते विधीयते || १४३ ||

पदच्छेद : - [शिखर : तु यदा हस्त : मृगशीर्षेण पीडित : |
निषध : नाम विज्ञेय : स : भयार्ते विधीयते || १४३ ||

अन्वय : - यदा शिखर : हस्त : मृगशीर्षेण पीडित : निषध : नाम विज्ञेय : | स : भयार्ते विधीयते |

अर्थ - शिखर हस्त जेव्हा मृगशीर्ष हस्ताद्वारे आच्छादिला जातो तेव्हा तो 'निषध हस्त' जाणावा . भयाने त्रस्त अवस्था दर्शविण्यासाठी या हस्ताचा वापर करावा .

गृहीत्वा वामहस्तेन कूर्पराभ्यन्तरे भुजम् |
दक्षिणं चापि वामस्य कूर्पराभ्यन्तरे न्यसेत् || १४४ ||
स चापि दक्षिणो हस्त : सम्यङ्मुष्टिकृतो भवेत् |
इत्येष निषधो हस्त : कर्म चास्य निबोधत || १४५ |

पदच्छेद : - गृहीत्वा वामहस्तेन कूर्पर-अभ्यन्तरे भुजम् |
दक्षिणं चापि वामस्य कूर्पर-अभ्यन्तरे न्यसेत् || १४४ ||
स : च अपि दक्षिण : हस्त : सम्यक् मुष्टिकृत : भवेत् |
इति एष : निषध : हस्त : कर्म च अस्य निबोधत || १४५ |

अन्वय : - वामहस्तेन कूर्पर-अभ्यन्तरे भुजं गृहीत्वा दक्षिणं च वामस्य कूर्पर-अभ्यन्तरे न्यसेत् | स : च अपि दक्षिण : हस्त : सम्यक् मुष्टिकृत : भवेत् | एष : निषध : हस्त : कर्म च अस्य निबोधत |

अर्थ - जेव्हा डावा हात उजव्या कोपऱ्यावर आणि उजवा हात डाव्या कोपऱ्यावर ठेवला जातो आणि उजवा हात मुष्टिहस्तात असतो तेव्हा तो 'निषध हस्त' होतो. त्याच्या विनियोगाविषयी जाणावे.

एतेन धैर्यमदगर्वसौष्ठवौत्सुक्यविक्रमाटोपा: |
अभिमानावष्टम्भस्तम्भस्थैर्यादय: कार्या: || १४६ ||

पदच्छेद:- एतेन धैर्य-मद-गर्व-सौष्ठव-औत्सुक्य-विक्रम-आटोपा: |
अभिमान-अवष्टम्भ-स्तम्भ-स्थैर्य-आदय: कार्या: || १४६ ||

अन्वय: - एतेन धैर्य-मद-गर्व-सौष्ठव-औत्सुक्य-विक्रम-आटोपा: अभिमान-अवष्टम्भ-स्तम्भ-स्थैर्य-आदय: कार्या: |

अर्थ - या हस्ताद्वारे धैर्य, मद, गर्व, सौष्ठव, औत्सुक्य, पराक्रम, उन्नती, स्वाभिमान, आधार, स्तंभ तसेच स्थैर्य इ. भाव दाखवू शकतो.

अथवा

ज्ञेयो वै निषधो नाम हंसपक्षौ पराङ्मुखौ |
जालवातायनादीनां प्रयोक्तव्योऽभिघट्टने || १४७ ||]

पदच्छेद:- अथवा
ज्ञेय: वै निषध: नाम हंसपक्षौ पराङ्मुखौ |
जालवातायन-आदीनां प्रयोक्तव्य: अभिघट्टने || १४७ ||]

अन्वय: - अथवा
(यदि) हंसपक्षौ पराङ्मुखौ (तदा) निषध: नाम ज्ञेय: | जालवातायन-आदीनां अभिघट्टने (एष: हस्त:) प्रयोक्तव्य: |

अर्थ - निषध हस्ताचे तिसरे लक्षण - जेव्हा दोन वेगवेगळ्या दिशांमध्ये दोन्ही हंसपक्ष हस्त ठेवले जातात त्यास 'निषध हस्त' म्हणतात. याचा वापर कवडसा, खिडकी इ. उघडण्यासाठी केला जातो.

### ❖ दोलाहस्ताचे लक्षण ❖

अंसौ प्रशिथिलौ मुक्तौ पताकौ तु प्रलम्बितौ |
यदा भवेतां करणे स दोल इति संज्ञित: || १४८ ||

पदच्छेद: - अंसौ प्रशिथिलौ मुक्तौ पताकौ तु प्रलम्बितौ |
यदा भवेतां करणे स: दोल: इति संज्ञित: || १४८ ||

अन्वय: - यदा अंसौ प्रशिथिलौ मुक्तौ पताकौ प्रलम्बितौ करणे भवेतां स: दोल: इति संज्ञित: |

अर्थ - जेव्हा दोन्ही खांदे सैल ठेवून दोन्ही पताक हस्त मुक्तपणे डोलावल्यास करणांमध्ये वापरला जाणारा हा हस्त 'दोला हस्त' म्हणून ओळखला जातो .

### ❖ दोलाहस्ताचे विनियोग ❖

सम्भ्रमविषादमूर्च्छितमदाभिघाते तथैव चावेगे |
व्याधिप्लुते च शस्त्रक्षते च कार्योऽभिनययोग: || १४९ ||

पदच्छेद: - सम्भ्रम-विषाद-मूर्च्छित-मद-अभिघाते तथा एव च आवेगे |
व्याधिप्लुते च शस्त्रक्षते च कार्य: अभिनययोग: || १४९ ||

अन्वय: - सम्भ्रम-विषाद-मूर्च्छित-मद-अभिघाते आवेगे व्याधिप्लुते शस्त्रक्षते च अभिनययोग: कार्य: |

अर्थ - संभ्रम, विषाद, मूर्च्छा, नशेची धुंदी, आवेग, व्याधिग्रस्त तसेच शस्त्राचा वार झाल्यावर घायाळ होणे इ . अर्थ सूचित करण्यासाठी याचा वापर होतो .

### ❖ पुष्पपुटहस्ताचे लक्षण ❖

यस्तु सर्पशिरा: प्रोक्तस्तस्याङ्गुलिनिरन्तर: |
द्वितीय: पार्श्वसंश्लिष्ट: स तु पुष्पपुट: स्मृत:|| १५० ||

पदच्छेद: - य: तु सर्पशिरा: प्रोक्त: तस्य अङ्गुलिनिरन्तर: |
द्वितीय: पार्श्वसंश्लिष्ट: स: तु पुष्पपुट: स्मृत: || १५० ||

अन्वय: - य: सर्पशिरा: (हस्त:) प्रोक्त: तस्य अङ्गुलिनिरन्तर: द्वितीय: पार्श्वसंश्लिष्ट: स: तु पुष्पपुट: स्मृत:|

अर्थ - दोन्ही सर्पशीर्ष हस्ताची बोटे नेहमी एकत्रित आहेत असा त्याच्या दोन्ही बाजू जोडलेल्या असतील तर त्यास 'पुष्पपुट हस्त' असे म्हणतात .

## ❖ पुष्पपुटहस्ताचे विनियोग ❖

धान्यफलपुष्पसदृशान्यनेन नानाविधानि युक्तानि |
ग्राह्याण्युपनेयानि च तोयानयनापनयने च || १५१ ||

पदच्छेद: - धान्य-फल-पुष्प-सदृशानि अनेन नानाविधानि युक्तानि |
ग्राह्याणि उपनेयानि च तोय-आनयन-अपनयने च || १५१ ||

अन्वय: - अनेन धान्य-फल-पुष्प-सदृशानि नानाविधानि युक्तानि | ग्राह्याणि उपनेयानि च | तोय-आनयन-अपनयने च (एष: हस्त: प्रयोक्तव्य:)|

अर्थ - धान्य, फळे, फुले तसेच तत्सम वस्तू ग्रहण करणे आणि अर्पण करणे, तसेच पाणी आणणे व पाणी घेऊन जाणे यासाठी हा हस्त योजावा .

## ❖ मकरहस्ताचे लक्षण ❖

पताकौ तु यदा हस्तावूर्ध्वाङ्गुष्ठावधोमुखौ |
उपर्युपरि विन्यस्तौ तदासौ मकर: स्मृत:|| १५२ ||

पदच्छेद: - पताकौ तु यदा हस्तौ ऊर्ध्व-अङ्गुष्ठौ अधोमुखौ |
उपरि उपरि विन्यस्तौ तदा असौ मकर: स्मृत: || १५२ ||

अन्वय: - यदा अधोमुखौ पताकौ हस्तौ ऊर्ध्व-अङ्गुष्ठौ (कृत्वा) उपरि उपरि विन्यस्तौ तदा असौ मकर: स्मृत:|

अर्थ - जेव्हा अधोमुख केलेले दोन पताक हस्तांचे अंगठे वरच्या दिशेला पसरवून दोन्ही हात एकमेकांच्या वर ठेवले जातात त्यास 'मकरहस्त' असे म्हणतात .

### ❖ मकरहस्ताचे विनियोग ❖

सिंहव्यालद्वीपिप्रदर्शनं नक्रमकरमत्स्यानाम् ।
ये चान्ये क्रव्यादा अभिनेयास्तेऽर्थयोगेन ॥ १५३ ॥

पदच्छेद : - सिंह-व्याल-द्वीपि-प्रदर्शनं नक्र-मकर-मत्स्यानाम् ।
ये च अन्ये क्रव्यादा : अभिनेया : ते अर्थयोगेन ॥ १५३ ॥

अन्वय : - सिंह-व्याल-द्वीपि-प्रदर्शनं नक्र-मकर-मत्स्यानां च अन्ये ये च क्रव्यादा : ते अर्थयोगेन अभिनेया : ।

अर्थ - या हस्ताद्वारे सिंह, वाघ, हत्ती, गेंडा, घडियाल, मगर, मासे तसेच विविध हिंस्र प्राणी आहेत त्यांचा अर्थानुसार प्रयोग करावा .

### ❖ गजदंतहस्ताचे लक्षण ❖

कूर्परांसोचितौ हस्तौ यदास्तां सर्पशीर्षकौ ।
गजदन्त : स तु कर : कर्म चास्य निबोधत ॥ १५४ ॥

पदच्छेद : - कूर्पर-अंस-उचितौ हस्तौ यदा आस्तां सर्पशीर्षकौ ।
गजदन्त : स : तु कर : कर्म च अस्य निबोधत ॥ १५४ ॥

अन्वय : - यदा सर्पशीर्षकौ हस्तौ कूर्पर-अंस-उचितौ आस्तां स : कर : गजदन्त : (इत्युच्यते) । अस्य कर्म च निबोधत ।

अर्थ - जेव्हा दोन्ही सर्पशीर्ष हस्त स्वस्तिक करून खांद्यावर किंवा कोपऱ्यावर ठेवले जातात, त्यास 'गजदंत हस्त' असे म्हणतात . याचा विनियोग जाणून घ्यावा .

### ❖ गजदंतहस्ताचे विनियोग ❖

एष च वधूवराणामुद्वाहे चातिभारयोगे च ।
स्तम्भग्रहणे च तथा शैलशिलोत्पाटने चैव ॥ १५५ ॥

पदच्छेद :- एष : च वधूवराणाम् उद्वाहे च अतिभारयोगे च |
स्तम्भग्रहणे च तथा शैलशिला-उत्पाटने च एव || १५५ ||

अन्वय : - वधूवराणाम् उद्वाहे अतिभारयोगे स्तम्भग्रहणे च तथा शैलशिला-उत्पाटने एव एष: (हस्त : प्रयोक्तव्य : |)|

अर्थ - वरवधूंचे पाणिग्रहण , अवजड ओझे म्हणजे भार वाहून नेणे, खांब धरणे, शिळा किंवा दगड (पाषाण) उचलणे इ. भाव गजदंत हस्ताद्वारे प्रदर्शित करावे .

### ❖ अवहित्थहस्ताचे लक्षण ❖

शुकतुण्डौ करौ कृत्वा वक्षस्याभिमुखाञ्चितौ |
शनैरधोमुखाविद्धौ सोऽवहित्थ इति स्मृत: || १५६ ||

पदच्छेद :- शुकतुण्डौ करौ कृत्वा वक्षस्य अभिमुख-अञ्चितौ |
शनै : अधोमुख-आविद्धौ स : अवहित्थ : इति स्मृत : || १५६ ||

अन्वय : - शुकतुण्डौ करौ वक्षस्य अभिमुख-अञ्चितौ कृत्वा शनै: अधोमुख-आविद्धौ, स: अवहित्थ : इति स्मृत : |

अर्थ - दोन शुकतुंड हस्त छातीजवळ तिरके करून हळूहळू अधोमुख ठेवल्यास त्यास 'अवहित्थ हस्त' असे म्हणतात .

### ❖ अवहित्थहस्ताचे विनियोग ❖

दौर्बल्ये नि:श्वसिते गात्राणां दर्शने तनुत्वे च |
उत्कण्ठिते च तज्ज्ञैरभिनययोगस्तु कर्तव्य: || १५७ ||

पदच्छेद :- दौर्बल्ये नि :श्वसिते गात्राणां दर्शने तनुत्वे च |
उत्कण्ठिते च तज्ज्ञै : अभिनययोग : तु कर्तव्य : || १५७ ||

अन्वय : - दौर्बल्ये नि :श्वसिते गात्राणां दर्शने तनुत्वे उत्कण्ठिते च तज्ज्ञै : अभिनययोग : तु कर्तव्य : |

अर्थ - दुबळेपणा, नि:श्वास, शरीर दाखविणे, क्षीण शरीर तसेच उत्कंठा इ.चा अवहित्थ हस्ताद्वारे अभिनय करावा .

### ❖ वर्धमानहस्ताचे लक्षण ❖

टीप - वर्धमान हस्ताची जी लक्षणे आणि विनियोग पुढील तीन श्लोकांमध्ये सांगितलेली आहेत ती सर्व निषध हस्ताशी तंतोतंत जुळतात. श्लोक १४२, १४३ आणि १४८ यांमध्ये निषध हस्ताची लक्षणे आणि विनियोग दिलेले आहेत.

ज्ञेयो वै वर्धमानस्तु हंसपक्षौ पराङ्मुखौ |
जालवातायनादीनां प्रयोक्तव्यो विघाटने || १५८ ||

पदच्छेद: - ज्ञेय: वै वर्धमान: तु हंसपक्षौ पराङ्मुखौ |
जाल-वातायन-आदीनां प्रयोक्तव्य: विघाटने || १५८ ||

अन्वय: - हंसपक्षौ पराङ्मुखौ (चेत् स: हस्त:) वर्धमान: (इति) ज्ञेय: | जाल-वातायन-आदीनां विघाटने (एष: हस्त:) प्रयोक्तव्य: |

अर्थ - जेव्हा दोन वेगवेगळया दिशांमध्ये दोन्ही हंसपक्ष हस्त पराङ्मुख ठेवले जातात तेव्हा त्यास 'वर्धमान हस्त' म्हणतात. याचा वापर कवडसा, खिडकी इ. उघडण्यासाठी केला जातो.

### ❖ वर्धमानहस्ताचे अन्य लक्षण ❖

मुकुलस्तु यदा हस्त: कपित्थपरिवेष्टित: |
वर्धमान: स विज्ञेय: कर्म चास्य निबोधत ||

पदच्छेद: - मुकुल: तु यदा हस्त: कपित्थ-परिवेष्टित: |
वर्धमान: स: विज्ञेय: कर्म च अस्य निबोधत |

अन्वय: - यदा मुकुल: हस्त: कपित्थ-परिवेष्टित: (तदा) स: वर्धमान: (इति) विज्ञेय: कर्म च अस्य निबोधत |

अर्थ - जेव्हा मुकुल हस्ताला कपित्थ हस्ताद्वारे आच्छादित (वेष्टित, समुच्चित) केले जाते त्यास 'वर्धमान हस्त' म्हणतात. याच्या विनियोगाविषयी जाणून घ्या.

## ❖ वर्धमानहस्ताचे विनियोग ❖

[संग्रहपरिग्रहोद्धारणं च समयं च सत्यवचनं च |
सङ्क्षेप: सङ्क्षिप्तं निपीडितेनाभिनेतव्यम् || १५९ ||]

पदच्छेद :- [संग्रहपरिग्रहौ धारणं च समय : च सत्यवचनं च |
सङ्क्षेपत : तु सङ्क्षिप्तं निपीडितेन अभिनेतव्यम् || १५९ ||]

अन्वय : - संग्रहपरिग्रहौ धारणं समय : सत्यवचनं च |
सङ्क्षेपत : सङ्क्षिप्तं निपीडितेन अभिनेतव्यम् || १५९ ||]

अर्थ - संग्रह करणे, स्वीकार करणे, धारण करणे, वेळ, सत्यवचन, सारांश, संक्षेप इ. भाव आणि दु :ख दाखविण्यासाठी या हस्ताचा अभिनय करावा .

## ❖ उपसंहार ❖

उक्ता ह्येते द्विविधास्त्वसंयुता: संयुताश्च सङ्क्षेपात् |
अभिनयकरास्तु ये त्विह तेऽन्यत्राप्यर्थत: साध्या: || १६० ||

पदच्छेद :- उक्ता : हि एते द्विविधा : हि असंयुता : संयुता : च सङ्क्षेपात् |
अभिनयकरा : तु ये तु इह ते अन्यत्र अपि अर्थत : साध्या : || १६० ||

अन्वय : - सङ्क्षेपात् एते (हस्ता :) द्विविधा : उक्ता : हि असंयुता : संयुता : च | ये इह अभिनयकरा : ते अर्थत : अन्यत्र अपि साध्या : |

अर्थ - याप्रकारे थोडक्यात मी असंयुत आणि संयुत असे दोन्ही प्रकारचे हस्त सांगितले . ह्यांचा जो अभिनय सांगितला गेला आहे त्याचा वापर इतरत्र देखील अर्थानुसार करावा .

## ❖ हस्ताभिनयाविषयी थोडेसे ❖

[अन्यैरप्युक्तम् -
आकृत्या चेष्टया चिह्नैर्जात्या विज्ञाय वस्तुत: |
स्वयं वितर्क्य कर्तव्यं हस्ताभिनयनं बुधै: || इति १६१ ||]

पदच्छेद : - [अन्यै : अपि उक्तम्
आकृत्या चेष्टया चिह्नै : जात्या विज्ञाय वस्तुत : |
स्वयं वितर्क्य कर्तव्यं हस्त-अभिनयनं बुधै : || इति १६१ ||]

अन्वय : - [अन्यै : अपि उक्तम्
वस्तुत : आकृत्या चेष्टया चिह्नै : जात्या विज्ञाय स्वयं वितर्क्य बुधै : हस्त-अभिनयनं कर्तव्यम् ||]

अर्थ - [इतरांनीही म्हटले आहे - कथावस्तूनुसार आकृती, क्रिया, चिह्न, जाती जाणून स्वत : तर्कवितर्क करून विद्वानांनी हस्ताचे विविध अभिनय करावेत .]

नास्ति कश्चिदहस्तस्तु नाट्येऽर्थोऽभिनयं प्रति |
यस्य यद्दृश्यते रूपं बहुशस्तन्मयोदितम् || १६२ ||

पदच्छेद : - न अस्ति कश्चित् अहस्त : तु नाट्ये अर्थ : अभिनयं प्रति |
यस्य यत् दृश्यते रूपं बहुश : तत् मया उदितम् || १६२ ||

अन्वय : - नाट्ये अर्थ : अभिनयं प्रति कश्चित् अहस्त : न अस्ति | यस्य यत् रूपं दृश्यते तत् बहुश : मया उदितम् |

अर्थ - असा कोणताही अर्थ नाही जो हस्ताद्वारे प्रकट होऊ शकत नाही . ज्या कथावस्तूचे जसे रूप आहे त्याप्रमाणे बरेच प्रकार मी तुम्हांला सांगितले आहेत .

अन्ये चाप्यर्थसंयुक्ता लौकिका ये करास्त्विह |
छन्दतस्ते प्रयोक्तव्या रसभावविचेष्टितै : || १६३ ||

पदच्छेद : - अन्ये च अपि अर्थसंयुक्ता : लौकिका : ये करा : तु इह |
छन्दत : ते प्रयोक्तव्या : रसभावविचेष्टितै : || १६३ ||

अन्वय : - इह अन्ये च अर्थसंयुक्ता : ये लौकिका : करा : रसभावविचेष्टितै : ते छन्दत : प्रयोक्तव्या : |

अर्थ - याच्या व्यतिरिक्त अन्य अर्थाशी संबंधित असे लोकप्रसिद्ध जे सामान्य हस्त असतील ते पण रस आणि भाव दर्शविणाऱ्या हालचालींद्वारे स्वेच्छेनुसार (बुद्धिनुसार) वापरले पाहिजेत .

देशं कालं प्रयोगं चाप्यर्थयुक्तिमवेक्ष्य च |
हस्ता ह्येते प्रयोक्तव्या: नृणां स्त्रीणां विशेषत: || १६४ ||

पदच्छेद: - देशं कालं प्रयोगं च अपि अर्थयुक्तिम् अवेक्ष्य च |
हस्ता: हि एते प्रयोक्तव्या: नृणां स्त्रीणां विशेषत: || १६४ ||

अन्वय: - देशं कालं प्रयोगम् अर्थयुक्तिं च अवेक्ष्य एते हस्ता: नृणां विशेषत: स्त्रीणां प्रयोक्तव्या: |

अर्थ - देश, काल, प्रयोग आणि कथावस्तूच्या अर्थाची उपपत्ती इ. गोष्टींचा विचार करून पुरुषांनी आणि विशेष करून स्त्रियांनी या हस्तांचा वापर करावा.

### ❖ हस्तांच्या विविध क्रिया ❖

सर्वेषामेव हस्तानां यानि कर्माणि सन्ति वै |
तान्यहं संप्रवक्ष्यामि रसभावकृतानि तु || १६५ ||
उत्कर्षणं विकर्षणं तथा व्याकर्षणं पुन: |
परिग्रहो निग्रहश्चाह्वानं तोदनमेव च || १६६ ||
संश्लेषश्च वियोगश्च रक्षणं मोक्षणं तथा |
विक्षेपधूनने चैव विसर्गस्तर्जनं तथा || १६७ ||
छेदनं भेदनं चैव स्फोटनं मोटनं तथा |
ताडनं चेति विज्ञेयं तज्ज्ञै: कर्म करान्प्रति || १६८ ||

पदच्छेद: - सर्वेषाम् एव हस्तानां यानि कर्माणि सन्ति वै |
तानि अहं संप्रवक्ष्यामि रसभावकृतानि तु || १६५ ||
उत्कर्षणं विकर्षणं तथा व्याकर्षणं पुन: |
परिग्रह: निग्रह: च आह्वानं तोदनम् एव च || १६६ ||
संश्लेष: च वियोग: च रक्षणं मोक्षणं तथा |
विक्षेपधूनने च एव विसर्ग: तर्जनं तथा || १६७ ||
छेदनं भेदनं च एव स्फोटनं मोटन तथा |
ताडनं च इति विज्ञेयं तज्ज्ञै: कर्म करान् प्रति || १६८ ||

अन्वय : - सर्वेषाम् एव हस्तानां यानि रसभावकृतानि कर्माणि सन्ति तानि अहं संप्रवक्ष्यामि | उत्कर्षणं विकर्षणं व्याकर्षणं संश्लेष : वियोग : रक्षणं मोक्षणं विक्षेपधूनने विसर्ग : तर्जनं छेदनं भेदनं स्फोटनं मोटनं तथा ताडनं च इति तज्ज्ञै : करान् प्रति कर्म विज्ञेयम् |

अर्थ - रस आणि भाव यांनी युक्त असणाऱ्या या सर्व हस्तक्रियांचे वर्णन आता मी करीन . या क्रिया म्हणजे उत्कर्षण (वरच्या बाजूला नेणे), विकर्षण (खेचणे), व्याकर्षण (किंवा अपकर्षण म्हणजे दूर नेणे), परिग्रह (ग्रहण करणे),निग्रह (विनाश करणे), आह्वान (बोलाविणे किंवा संकेत करणे), तोदन (मारणे), संश्लेष (मिळणे किंवा मिळविणे), वियोग (बाजूला होणे किंवा बाजूला करणे), रक्षण (रक्षा करणे), मोक्षण (फेकणे), विक्षेप (त्याग करणे), धुनन (हलविणे), विसर्ग (सन्मान अर्पण किंवा त्याग करणे), तर्जन (फटकारणे), छेदन (तोडणे), भेदन (कापणे), स्फोटन (विकसित करणे), मोटन (संकुचित करणे) आणि ताडन (मारझोड करणे) इ .

❖ हस्तप्रचार ❖

[उत्तान : पार्श्वगश्चैव तथाधोमुख एव च |
हस्तप्रचारस्त्रिविधो नाट्यतत्त्वसमाश्रय : || १६९ ||]

पदच्छेद : - [उत्तान : पार्श्वग : च एव तथा अधोमुख : एव च |
हस्तप्रचार : त्रिविध : नाट्यतत्त्वसमाश्रय : || १६९ ||]

अन्वय : - [उत्तान : पार्श्वग : तथा अधोमुख : इति त्रिविध : हस्तप्रचार : नाट्यतत्त्वसमाश्रय : अस्ति ||]

अर्थ - नाट्यतत्त्वाच्या सिद्धांतानुसार हस्तप्रचार तीन प्रकारचे आहेत .
१. उत्तान म्हणजे तळहात वर करणे .
२. पार्श्वग म्हणजे उजवी किंवा डावीकडे हात करणे आणि,
३. अधोमुख म्हणजे खालच्या बाजूला हाताची बोटं नेणे .

सर्वे हस्तप्रचाराश्च प्रयोगेषु यथाविधि |
नेत्रभ्रूमुखरागाद्यै : कर्तव्या व्यञ्जिता बुधै : || १७० ||

पदच्छेद :- सर्वे हस्तप्रचारा : च प्रयोगेषु यथाविधि |
नेत्र-भ्रू-मुखराग-आद्यै : कर्तव्या व्यञ्जिता बुधै : || १७० ||

अन्वय : - प्रयोगेषु यथाविधि नेत्र-भ्रू-मुखराग-आद्यै: सर्वे हस्तप्रचारा: च बुधै: व्यञ्जिता: कर्तव्या : |

अर्थ - प्रयोगाच्या वेळी शास्त्राने निर्देशित केलेल्या विधीनुसार नेत्र, भुवया, मुखराग इ . सह बुद्धिमान लोकांनी या हस्तप्रचारांचा वापर करावा .

❖ हस्तांची कार्यस्थाने ❖

करणं कर्म स्थानं प्रचारयुक्तिं क्रियां च समवेक्ष्य |
हस्ताभिनय : कार्यस्तज्ज्ञैर्लोकोपचारेण || १७१ ||

पदच्छेद :- करणं कर्म स्थानं प्रचारयुक्तिं क्रियां च समवेक्ष्य |
हस्ताभिनय : कार्य : तज्ज्ञै : लोकोपचारेण || १७१ ||

अन्वय : - तज्ज्ञै: लोकोपचारेण करणं कर्म स्थानं प्रचारयुक्तिं क्रियां च समवेक्ष्य हस्ताभिनय: कार्य : |

अर्थ - बुद्धिमान लोकांनी या हस्ताभिनयाचा लोकव्यवहारांनुसार वापर करावा तसेच त्यांचे करण (हस्तकरण), कर्म (कर्तव्य), स्थान (ललाट इ . प्रदेश), प्रचार (अल्प, मध्यम इ . ), युक्ति (मुख्य किंवा गौण) आणि क्रिया बघून विनियोग सुनिश्चित करावा .

❖ हस्ताभिनयाचे विधी ❖

उत्तमानां करा : कार्या : ललाटक्षेत्रचारिण : |
वक्षस्स्थाश्चैव मध्यानामधमानामधोगता : || १७२ ||

पदच्छेद :- उत्तमानां करा : कार्या : ललाटक्षेत्रचारिण : |
वक्षस्स्था : च एव मध्यानाम् अधमानाम् अधोगता : || १७२ ||

अन्वय : - उत्तमानां करा : ललाटक्षेत्रचारिण : मध्यानां वक्षस्स्था : अधमानां च अधोगता : कार्या : |

अर्थ - उत्तम पात्रांचे हात कपाळाजवळ, मध्यम पात्रांचे छातीजवळ तसेच अधम पात्रांचे हस्त शरीराच्या जवळ खालच्या बाजूला गतिशील ठेवले पाहिजेत.

ज्येष्ठे स्वल्पप्रचाराः स्युर्मध्ये कुर्वीत मध्यमैः ।
अधमेषु प्रकीर्णाश्च हस्ताः कार्याः प्रयोक्तृभिः ॥ १७३ ॥

पदच्छेदः - ज्येष्ठे स्वल्पप्रचाराः स्युः मध्ये कुर्वीत मध्यमैः ।
अधमेषु प्रकीर्णाः च हस्ताः कार्याः प्रयोक्तृभिः ॥ १७४ ॥

अन्वयः - ज्येष्ठे स्वल्पप्रचाराः स्युः मध्ये मध्यमैः कुर्वीत ।अधमेषु च प्रकीर्णाः हस्ताः प्रयोक्तृभिः कार्याः ।

अर्थ - ज्येष्ठ अभिनयामध्ये या हस्तांचा प्रचार अल्प असला पाहिजे. मध्यम अभिनयामध्ये मध्यम प्रचार आणि अधम अभिनयामध्ये विपुल प्रमाणात हस्तप्रचार केला पाहिजे.

लक्षणव्यञ्जिता हस्ताः कार्यास्तूत्तममध्यमैः ।
लोकक्रियास्वभावेन नीचैरप्यर्थसंश्रयाः ॥ १७४ ॥

पदच्छेदः - लक्षणव्यञ्जिताः हस्ताः कार्याः तु उत्तममध्यमैः ।
लोकक्रियास्वभावेन नीचैः अपि अर्थसंश्रयाः ॥ १७४ ॥

अन्वयः - उत्तममध्यमैः लक्षणव्यञ्जिताः हस्ताः कार्याः । नीचैः अपि लोकक्रियास्वभावेन अर्थ संश्रयाः (हस्ताः कार्याः) ।

अर्थ - उत्तम आणि मध्यम पात्रांद्वारे हस्तांचा वापर करून शास्त्रीय लक्षणाप्रमाणे अर्थाभिव्यक्ती झाली पाहिजे. परंतु अधम पात्रांद्वारे लोकस्वभावानुसार हस्ताला आश्रित असा हस्ताभिनय करावा.

अथवान्यादृशं प्राप्य प्रयोगं कालमेव च ।
विपरीताश्रया हस्ताः प्रयोक्तव्या बुधैर्न वा ॥ १७५ ॥

पदच्छेदः - अथवा अन्यादृशं प्राप्य प्रयोगं कालम् एव च ।
विपरीत-आश्रयाः हस्ताः प्रयोक्तव्याः बुधैः न वा ॥ १७५ ॥

अन्वय: - अथवा (यदा) अन्यादृशं प्रयोगं (अस्ति तदा) कालम् एव प्राप्य बुधै: विपरीताश्रया: हस्ता:प्रयोक्तव्या: वा न|

अर्थ - परंतु जेव्हा वेगळ्या प्रकारचा प्रयोग असेल तेव्हा त्या प्रयोगाचा काळ इ. समजून घेऊन बुद्धिमान लोकांनी या हस्तांचा वापर वेगळ्या पद्धतीने करावा किंवा करू नये.

विषण्णे मूर्च्छिते ह्रीते जुगुप्साशोकपीडिते |
ग्लाने स्वप्ने विहस्ते च निश्चेष्टे तन्द्रिते जडे || १७६ ||
व्याधिग्रस्ते जरार्ते च भयार्ते शीतविप्लुते |
मत्ते प्रमत्ते चोन्मत्ते चिन्तायां तपसि स्थिते || १७७ ||
हिमवर्षहते बद्धे वारिणाप्लवसंश्रिते |
स्वप्नायिते च सम्भ्रान्ते नतसंस्फोटने तथा || १७८ ||
न हस्ताभिनय: कार्य: कार्य: सत्त्वसमाश्रय: |
[तथा काकुविशेषश्च नानार्थरसभावक: || १७९ ||]

पदच्छेद: - विषण्णे मूर्च्छिते ह्रीते जुगुप्सा-शोकपीडिते |
ग्लाने स्वप्ने विहस्ते च निश्चेष्टे तन्द्रिते जडे || १७६ ||
व्याधिग्रस्ते जरार्ते च भयार्ते शीतविप्लुते |
मत्ते प्रमत्ते च उन्मत्ते चिन्तायां तपसि स्थिते || १७७ ||
हिमवर्षहते बद्धे वारिणाप्लव-संश्रिते |
स्वप्नायिते च सभ्रान्ते नतसंस्फोटने तथा || १७८ ||
न हस्तअभिनय: कार्य: कार्य: सत्त्वसमाश्रय: |
[तथा काकुविशेष: च नाना-अर्थ-रसभावक:|| १७९ ||]

अन्वय: - विषण्णे मूर्च्छिते ह्रीते जुगुप्साशोकपीडिते ग्लाने स्वप्ने विहस्ते निश्चेष्टे च तन्द्रिते जडे व्याधिग्रस्ते जरार्ते च भयार्ते शीतविप्लुते मत्ते प्रमत्ते च उन्मत्ते चिन्तायां तपसि स्थिते हिमवर्षहते बद्धे वारिणाप्लवसंश्रिते स्वप्नायिते च सभ्रान्ते तथा नतसंस्फोटने हस्ताभिनय: न कार्य: सत्त्वसमाश्रय: कार्य: | तथा काकुविशेष: नाना-अर्थ-रसभावक: च (कार्य:) |

अर्थ - जेव्हा कलावंत खिन्न झालेला, मूर्च्छित झालेला, लज्जित झालेला, घृणा किंवा शोकाने पीडित, मलीन, ग्लानीमध्ये, झोपलेला, लुळा-पांगळा, तंद्रीत, जड, आजारी, म्हातारपणाने जर्जर झालेला, भयभीत झालेला, थंडीने कुडकुडलेला, मदमस्त, वेडा, चिंताग्रस्त, तप करणारा, बर्फ किंवा पावसाने त्रासलेला, कैद, पाण्यात संचार करणारा, स्वप्नात बडबडणारा, संभ्रमित असणारा, नखांनी ओरबडणारा किंवा नखं मारणारा अशा अवस्थांमध्ये नट असेल, तर हस्ताभिनय करू नये . परंतु, त्याने सत्त्वाचा संचय करून विविध प्रकारचे अर्थ, रस आणि भावांना अभिव्यक्त करणारे काकुविशेष समजून घ्यावेत आणि अभिनय करावा .

यत्र व्यग्रावुभौ हस्तौ तत्तद्दृष्टिविलौकनै: |
वाचिकाभिनयं कुर्याद्विरामैरर्थदर्शकै: || १८० ||

पदच्छेद : - यत्र व्यग्रौ उभौ हस्तौ तत् दृष्टि-विलौकनै : |
वाचिक-अभिनयं कुर्यात् विरामै : अर्थदर्शकै : || १८० ||

अन्वय : - यत्र दृष्टिविलौकनै : उभौ हस्तौ व्यग्रौ (भवत : तत्र) अर्थदर्शकै : विरामै : तत् वाचिक-अभिनयं कुर्यात् |

अर्थ - (पूर्वी सांगितलेल्या) त्या त्या दृष्टींचा अभिनय करताना जर दोन्ही हात व्यस्त असतील तेव्हा अर्थ सूचित करणाऱ्या विरामचिह्नांद्वारे वाचिक अभिनय करावा .

उत्तान: पार्श्वगश्चैव तथाधोमुख एव च |
प्रचारस्त्रिविधोऽङ्गानां नाट्यनृत्तसमाश्रय: || १८१ ||

पदच्छेद : - उत्तान : पार्श्वग : च एव तथा अधोमुख : एव च |
प्रचार : त्रिविध : अङ्गानां नाट्य-नृत्त-समाश्रय : || १८१ ||

अन्वय : - उत्तान: पार्श्वग: तथैव च अधोमुख: अङ्गानां त्रिविध: प्रचार: (य:) नाट्यनृत्त -समाश्रय: (अस्ति) |

अर्थ - नाट्य आणि नृत्तामध्ये वापरण्यात येणारे हस्तप्रचार तीन प्रकारचे आहेत .
१. उत्तान २. पार्श्वग ३. अधोमुख .

## ❖ नृत्तहस्ताची लक्षणे आणि विनियोग ❖

अन्ये तु
उत्तानो वर्तुलस्त्र्यश्र: स्थितोऽधोमुख एव च |
पञ्च प्रचारा हस्तस्य नाट्यनृत्तसमाश्रया: || १८२ || इति

पदच्छेद:- उत्तान: वर्तुल: त्र्यश्र: स्थित: अधोमुख: एव च |
पञ्च प्रचारा: हस्तस्य नाट्य-नृत्त-समाश्रया: || १८२ || इति

अन्वय: - उत्तान: वर्तुल: त्र्यश्र: स्थित: अधोमुख: च (एते) हस्तस्य पञ्च प्रचारा: नाट्यनृत्त - समाश्रया: (सन्ति) | इति

अर्थ - इतरांच्या मतानुसार नाट्य आणि नृत्तामध्ये हस्तप्रचार पाच प्रकारचे आहेत . १ . उत्तान (तळहात वर) २ . वर्तुल (गोल फिरविणे) ३ . त्र्यस्त्र (तिरका) ४ . स्थित (स्थिर) ५ . अधोमुख (खालच्या बाजूला) .

एवं ज्ञेया: करा ह्येते नानाभिनयसंश्रया: |
अत ऊर्ध्वं प्रवक्ष्यामि करान्नृत्तसमाश्रयान् || १८३ ||

पदच्छेद:- एवं ज्ञेया: करा: हि एते नाना-अभिनय-संश्रया: |
अत: ऊर्ध्वं प्रवक्ष्यामि करान् नृत्तसमाश्रयान् || १८३ ||

अन्वय: - एवं एते नाना-अभिनय-संश्रया: करा: ज्ञेया: | अत: ऊर्ध्वं नृत्तसमाश्रयान् करान् प्रवक्ष्यामि |

अर्थ - याप्रमाणे मी विविध रस आणि भावाशी संबंधित अनेक हस्त सांगितले .आता मी नृत्तामध्ये असलेले हस्त सांगतो .

## ❖ चतुरश्र नृत्तहस्ताचे लक्षण ❖

वक्षसोऽष्टाङ्गुलस्थौ तु प्राङ्मुखौ खटकामुखौ |
समानकूर्परांसौ तु चतुरश्रौ प्रकीर्तितौ || १८४ ||

पदच्छेद :- वक्षस : अष्ट-अङ्गुलिकास्थौ तु प्राङ्मुखौ खटकामुखौ |
समानकूर्पर-अंसौ तु चतुरश्रौ प्रकीर्तितौ || १८४ ||

अन्वय : - वक्षस : अष्ट-अङ्गुलिकास्थौ तु प्राङ्मुखौ खटकामुखौ समानकूर्पर-अंसौ तु चतुरश्रौ प्रकीर्तितौ |

अर्थ - दोन्ही हात छातीच्या समोर आठ बोटांच्या अंतरावर समोरच्या बाजूस खटकामुख ठेवून दोन्ही खांदे आणि कोपर एका ओळीत ठेवल्यास त्यास 'चतुरश्र हस्त' असे म्हणतात .

### ❖ उद्‌वृत्त नृत्तहस्ताचे लक्षण ❖

हंसपक्षकृतौ हस्तौ व्यावृतौ तालवृन्तवत् |
उद्वृत्ताविति विज्ञेयावथवा तालवृन्तकौ || १८५ ||

पदच्छेद :- हंसपक्षकृतौ हस्तौ व्यावृतौ तालवृन्तवत् |
उद्वृत्तौ इति विज्ञेयौ अथवा तालवृन्तकौ || १८५ ||

अन्वय : - हंसपक्षकृतौ हस्तौ व्यावृतौ तालवृन्तवत् उद्वृत्तौ अथवा तालवृन्तकौ विज्ञेयौ |

अर्थ - दोन हंसपक्ष हस्तांना पंख्याप्रमाणे हलविले तर त्यास 'उद्वृत्त हस्त' असे म्हणतात . याचेच दुसरे नाव 'तालवृंतक' आहे .

### ❖ तलमुख नृत्तहस्ताचे लक्षण ❖

चतुरश्रस्थितौ हस्तौ हंसपक्षकृतौ तथा |
तिर्यकस्थितौ चाभिमुखौ ज्ञेयौ तलमुखाविति || १८६ ||

पदच्छेद :- चतुरश्रस्थितौ हस्तौ हंसपक्षकृतौ तथा |
तिर्यक् स्थितौ च अभिमुखौ ज्ञेयौ तलमुखौ इति || १८६ ||

अन्वय : - चतुरश्रस्थितौ हंसपक्षकृतौ हस्तौ तथा अभिमुखौ तिर्यक् स्थितौ च (तौ) तलमुखौ इति ज्ञेयौ |

अर्थ - चतुरश्र अवस्थेमध्ये हंसपक्ष हस्तांना तिरके एकमेकांच्या समोर स्थिर ठेवल्यास त्यास 'तलमुख हस्त' असे म्हणतात .

### ❖ स्वस्तिक आणि विप्रकीर्ण नृत्तहस्ताचे लक्षण ❖

तावेव मणिबन्धान्ते स्वस्तिकाकृतिसंस्थितौ |
स्वस्तिकाविति विख्यातौ विच्युतौ विप्रकीर्णकौ || १८७ ||

पदच्छेद :- तौ एव मणिबन्ध-अन्ते स्वस्तिक-आकृति-संस्थितौ |
स्वस्तिकौ इति विख्यातौ विच्युतौ विप्रकीर्णकौ || १८७ ||

अन्वय : - तौ एव मणिबन्ध-अन्ते स्वस्तिक-आकृति-संस्थितौ स्वस्तिकौ इति विख्यातौ, विच्युतौ (चेत्) विप्रकीर्णकौ (हस्तौ इति ज्ञेयौ)|

अर्थ - तलमुख नृत्तहस्ताची मनगटे एकमेकांशी गुणाकाराप्रमाणे तिरकी ठेवल्यास त्यास 'स्वस्तिक हस्त' असे म्हणतात आणि स्वस्तिक हस्त एकमेकांपासून दूर केल्यास 'विप्रकीर्ण हस्त' असे म्हणतात .

### ❖ अरालखटकामुखचे लक्षण ❖

अलपल्लवसंस्थानावूर्ध्वास्यौ पद्मकोशकौ |
अरालखटकाख्यौ चाप्यरालखटकामुखौ || १८८ ||

पदच्छेद :- अलपल्लवसंस्थानौ ऊर्ध्वास्यौ पद्मकोशकौ |
अरालखटकाख्यौ च अपि अरालखटकामुखौ | || १८८ ||

अन्वय : - अरालपल्लवसंस्थौ ऊर्ध्वास्यौ पद्मकोशकौ (क्रियेते चेत् तौ हस्तौ) अरालखटकाख्यौ अरालखटकामुखौ च अपि (ज्ञेयौ)|

अर्थ - जेव्हा दोन्ही अलपल्लवहस्ताचे मुख वरच्या बाजूला पद्मकोष हस्तामध्ये परिवर्तित केले तर त्या हस्तास अरालखटक किंवा अरालखटकामुख असे म्हणतात .

### ❖ अन्यमतानुसार अरालखटकामुखाचे लक्षण ❖

अन्ये तु
तथैव मणिबन्धान्ते ह्यरालौ विच्युतावुभौ |
ज्ञेयौ प्रयोक्तृभिर्नित्यमरालखटकाविति || इति १८९ ||

पदच्छेद : - अन्ये तु -
तथा एव मणिबन्धान्ते हि अरालौ विच्युतौ उभौ |
ज्ञेयौ प्रयोक्तृभि : नित्यम् अरालखटकौ इति | || १८९ ||

अन्वय : - अन्ये तु -
उभौ अरालौ मणिबन्धान्ते विच्युतौ (चेत्) प्रयोक्तृभि : नित्यम् अरालखटकौ इति ज्ञेयौ |

अर्थ - अन्य मतानुसार -
दोन्ही अरालहस्ताची मनगटे एकमेकांशी गुणाकाराप्रमाणे तिरकी ठेवल्यास म्हणजे स्वस्तिक करून नंतर एकमेकांपासून दूर नेल्यास त्यास 'अराल खटकामुख हस्त' असे म्हणतात .

❖ आविद्धवक्र नृत्तहस्ताचे लक्षण ❖

भुजांसकूर्पराग्रैस्तु कुटिलावर्तितौ करौ |
पराङ्मुखतलाविद्धौ ज्ञेयावाविद्धवक्रकौ || १९० ||

पदच्छेद : - भुजान् सकूर्पर-अग्रै : तु कुटिल-आवर्तितौ करौ |
पराङ्मुख-तलाविद्धौ ज्ञेयौ आविद्ध-वक्रकौ || १९० ||

अन्वय : - भुजान् सकूर्पर-अग्रै : कुटिल-आवर्तितौ करौ (वर्तेते तदा) पराङ्मुख-तलाविद्धौ (एतौ) आविद्धवक्रकौ ज्ञेयौ |

अर्थ - दोन्ही हातांनी बाहू, खांदा, कोपर यास कुटिल गतीने गोल फिरवले जाते आणि दोन्ही तळहात पराङ्मुख ठेवून आविद्ध केले जातात, तेव्हा त्यास 'आविद्धवक्र हस्त' असे म्हणतात .

❖ सूचीमुख नृत्तहस्ताचे लक्षण ❖

हस्तौ तु सर्पशिरसौ मध्यमाङ्गुष्ठकौ यदा |
तिर्यक्प्रसारितास्यौ च तदा सूचीमुखौ स्मृतौ || १९१ ||

पदच्छेद : - हस्तौ तु सर्पशिरसौ मध्यमा-अङ्गुष्ठकौ यदा |
तिर्यक् प्रसारितास्यौ च तदा सूचीमुखौ स्मृतौ || १९१ ||

अन्वय : - यदा सर्पशिरसौ हस्तौ मध्यमा-अङ्गुष्ठकौ |
तिर्यक् प्रसारितास्यौ च तदा सूचीमुखौ स्मृतौ ‖ १९१ ‖

अर्थ - दोन्ही सर्पशीर्ष हस्ताचे अंगठे मध्यम बोटाजवळ नेऊन हाताचा पृष्ठभाग तिरका प्रसारित करावा त्यास 'सूचीमुख हस्त' असे म्हणतात .

## ❖ अन्यमतानुसार सूचीमुखाचे लक्षण ❖

सर्पशीर्षौ यदा हस्तौ भवेतां स्वस्तिकास्थितौ |
मध्यमप्रसारिताङ्गुष्ठौ ज्ञेयौ सूचीमुखौ तदा ‖ १९२ ‖

पदच्छेद : - सर्पशीर्षौ यदा हस्तौ भवेतां स्वस्तिक-आस्थितौ |
मध्यम-प्रसारित-अङ्गुष्ठौ ज्ञेयौ सूचीमुखौ तदा ‖ १९२ ‖

अन्वय : - यदा सर्पशीर्षौ हस्तौ स्वस्तिकास्थितौ मध्यमप्रसारिताङ्गुष्ठौ भवेतां तदा सूचीमुखौ ज्ञेयौ |

अर्थ - अन्य मतानुसार -
दोन्ही सर्पशीर्ष हस्त स्वस्तिक करून अंगठा मध्यम बोटाजवळ न्यावा त्यास 'सूचीमुख हस्त' असे म्हणतात . (तर्जनीला तिरकी बाहेर पसरवावी म्हणजे हस्त सूचीप्रमाणे दिसतो . )

## ❖ रेचित नृत्तहस्ताचे लक्षण ❖

रेचितौ चापि विज्ञेयौ हंसपक्षौ द्रुतभ्रमौ |
प्रसारितोत्तानतलौ रेचिताविति संज्ञितौ ‖ १९३ ‖

पदच्छेद : - रेचितौ च अपि विज्ञेयौ हंसपक्षौ द्रुतभ्रमौ |
प्रसारित-उत्तानतलौ रेचितौ इति संज्ञितौ ‖ १९३ ‖

अन्वय : - रेचितौ च अपि विज्ञेयौ | हंसपक्षौ द्रुतभ्रमौ प्रसारित-उत्तानतलौ रेचितौ इति संज्ञितौ |

अर्थ - रेचित हस्ताविषयीदेखील जाणून घ्या .
दोन्ही हंसपक्ष हस्तांना जलदगतीने फिरवून दोन्ही तळहात वरच्या बाजूला प्रसारित केल्यास त्यास 'रेचित हस्त' असे म्हणतात .

### ❖ अर्धरेचित हस्ताचे लक्षण ❖

चतुरश्रो भवेद्वामः सव्यहस्तश्च रेचितः |
विज्ञेयौ नृत्ततत्त्वज्ञैरर्धरेचितसंज्ञितौ || १९४ ||

पदच्छेदः- चतुरश्रः भवेत् वामः सव्यहस्तः च रेचितः |
विज्ञेयौ नृत्ततत्त्वज्ञैः अर्धरेचित-संज्ञकौ || १९४ ||

अन्वयः - वामः चतुरश्रः सव्यहस्तः च रेचितः भवेत् (तदा) नृत्ततत्त्वज्ञैः अर्धरेचितसंज्ञकौ विज्ञेयौ |

अर्थ - डाव्या हाताने चतुरश्र आणि उजवा हात रेचित केल्यास नृत्तविद्वानांच्या मते त्यास 'अर्धरेचित हस्त' असे म्हणतात .

### ❖ उत्तानवंचित नृत्तहस्ताचे लक्षण ❖

अञ्चितौ कूर्परांसौ तु त्रिपताकौ करौ कृतौ |
किञ्चित्तिर्यग्गतावेतौ स्मृतावुत्तानवञ्चितौ || १९५ ||

पदच्छेदः- अञ्चितौ कूर्परांसौ तु त्रिपताकौ करौ कृतौ |
किञ्चित् तिर्यक् गतौ एतौ स्मृतौ उत्तानवञ्चितौ || १९५ ||

अन्वयः - त्रिपताकौ करौ किञ्चित् तिर्यक् गतौ कूर्परांसौ तु अञ्चितौ कृतौ, एतौ उत्तानवञ्चितौ स्मृतौ |

अर्थ - दोन्ही त्रिपताक हस्त जरासे वाकवून थोडेसे तिरके ठेवावेत . कोपर आणि खांदे देखील वाकवावेत . असे केल्यास त्यास 'उत्तानवंचित हस्त' असे म्हणतात .

### ❖ पल्लव आणि नितंब नृत्तहस्ताचे लक्षण ❖

मणिबन्धनमुक्तौ तु पताकौ पल्लवौ स्मृतौ |
बाहुशीर्षाद्विनिष्क्रान्तौ नितम्बाविति कीर्तितौ || १९६ ||

पदच्छेदः- मणिबन्धनमुक्तौ तु पताकौ पल्लवौ स्मृतौ |
बाहुशीर्षात् विनिष्क्रान्तौ नितम्बौ इति कीर्तितौ || १९६ ||

अन्वय : - मणिबन्धनमुक्तौ पताकौ पल्लवौ स्मृतौ | बाहुशीर्षात् विनिष्क्रान्तौ नितम्बौ इति कीर्तितौ |

अर्थ - मनगटापासून दोन्ही पताकहस्त एकमेकांस जुळविल्यास त्यास 'पल्लव हस्त' असे म्हणतात . जेव्हा दोन्ही पताकहस्त खांद्यावरून बाहेरच्या बाजूला नेल्यास त्यास 'नितंब हस्त' असे म्हणतात .

### ❖ केशबंध नृत्तहस्ताचे लक्षण ❖

केशदेशाद्विनिष्क्रान्तौ परिपार्श्वोत्थितौ तथा |
विज्ञेयौ केशबन्धौ तु करावाचार्यसंमतौ || १९७ ||

पदच्छेद : - केशदेशात् विनिष्क्रान्तौ परिपार्श्व-उत्थितौ तथा |
विज्ञेयौ केशबन्धौ तु करौ आचार्य-संमतौ || १९७ ||

अन्वय : - केशदेशात् विनिष्क्रान्तौ तथा परिपार्श्वोत्थितौ (चेत् एतौ) करौ केशबन्धौ विज्ञेयौ (यौ) आचार्यसंमतौ |

अर्थ - दोन्ही पताकहस्तांना केसावरून किंवा डोक्यावरून फिरवून दोन्ही बाजूला सरळ ठेवल्यास त्यास 'केशबंध हस्त' असे म्हणतात . हा हस्त आचार्यांना मान्य आहे .

### ❖ लताहस्ताचे लक्षण ❖

तिर्यक्प्रसारितौ चैव पार्श्वसंस्थौ तथैव च |
लताख्यौ च करौ ज्ञेयौ नृत्ताभिनयनं प्रति || १९८ ||

पदच्छेद : - तिर्यक् प्रसारितौ च एव पार्श्वसंस्थौ तथा एव च |
लता-आख्यौ च करौ ज्ञेयौ नृत्त-अभिनयनं प्रति || १९८ ||

अन्वय : - तिर्यक् प्रसारितौ तथैव पार्श्वसंस्थौ च (तौ) लता-आख्यौ च करौ ज्ञेयौ | नृत्त-अभिनयनं प्रति (एष : प्रयोक्तव्य :) |

अर्थ - दोन्ही हातांना तिरके करून प्रसारित करून बाजूला ठेवल्यास त्यास 'लताख्य हस्त' असे म्हणतात . नृत्त आणि अभिनयामध्ये या हस्ताचा वापर करावा .

### ❖ करिहस्ताचे लक्षण ❖

समुन्नतो लताहस्त: पार्श्वात्पार्श्वं विलोलित: |
त्रिपताकोऽपर: कर्णे करिहस्त: प्रकीर्तित: || १९९ ||

पदच्छेद: - समुन्नत: लताहस्त: पार्श्वात् पार्श्वं विलोलित: |
त्रिपताक: अपर: कर्णे करिहस्त: प्रकीर्तित: || १९९ ||

अन्वय: - लताहस्त: समुन्नत: पार्श्वात् पार्श्वं विलोलित: | अपर: त्रिपताक: कर्णे (च स्थापित: तदा स:) करिहस्त: प्रकीर्तित: |

अर्थ - एक लताहस्त उन्नत करून एका बाजूकडून दुसऱ्या बाजूकडे लोलित करावे. त्यानंतर त्रिपताका हस्त कानाजवळ ठेवावा. त्यास 'करिहस्त' असे म्हणतात.

### ❖ पक्षवंचितकहस्ताचे लक्षण ❖

कटिशीर्षनिविष्ठौ द्वौ त्रिपताकौ यदा करौ |
पक्षवञ्चितकौ हस्तौ तदा ज्ञेयौ प्रयोक्तृभि: || २०० ||

पदच्छेद: - कटिशीर्ष-निविष्ठौ द्वौ त्रिपताकौ यदा करौ |
पक्षवञ्चितकौ हस्तौ तदा ज्ञेयौ प्रयोक्तृभि: || २०० ||

अन्वय: - यदा द्वौ त्रिपताकौ करौ कटिशीर्षनिविष्ठौ तदा प्रयोक्तृभि: पक्षवञ्चितकौ हस्तौ ज्ञेयौ |

अर्थ - एक त्रिपताक हस्त क्रमश: कमरेवर आणि डोक्यावर ठेवल्यास त्यास 'पक्षवंचितक हस्त' असे म्हणतात.

### ❖ पक्षप्रद्योतक आणि गरुडपक्षकहस्ताचे लक्षण ❖

तावेव तु परावृत्तौ पक्षप्रद्योतकौ स्मृतौ |
अधोमुखतलाविद्धौ ज्ञेयौ गरुडपक्षकौ || २०१ ||

पदच्छेद: - तौ एव तु परावृत्तौ पक्षप्रद्योतकौ स्मृतौ |
अधोमुखतल-आविद्धौ ज्ञेयौ गरुडपक्षकौ || २०१ ||

अन्वय: - तौ एव परावृत्तौ पक्षप्रद्योतकौ स्मृतौ | अधोमुखतल-आविद्धौ गरुडपक्षकौ ज्ञेयौ |

अर्थ - पक्षवंचितक हस्त उलट केल्यास त्यास 'पक्षप्रद्योतक हस्त' असे म्हणतात. जेव्हा तळहात अधोमुख करून आविद्ध केला जातो तेव्हा त्यास 'गरुडपक्षक हस्त' असे म्हणतात.

❖ दंडपक्षहस्ताचे लक्षण ❖

हंसपक्षकृतौ हस्तौ व्यावृत्तपरिवर्तितौ |
तथा प्रसारितभुजौ दण्डपक्षाविति स्मृतौ || २०२ ||

पदच्छेद: - हंसपक्षकृतौ हस्तौ व्यावृत्त-परिवर्तितौ |
तथा प्रसारितभुजौ दण्डपक्षौ इति स्मृतौ || २०२ ||

अन्वय: - हंसपक्षकृतौ हस्तौ व्यावृत्तपरिवर्तितौ तथा प्रसारितभुजौ (चेत् तौ हस्तौ) दण्डपक्षौ इति स्मृतौ |

अर्थ - दोन्ही हंसपक्ष हस्तांना क्रमश: व्यावर्तित आणि परिवर्तित केल्यास व त्यानंतर दोन्ही हात (खांद्याच्या ओळीत) सरळ प्रसारित केल्यास त्या हस्ताला 'दंडपक्षहस्त' असे म्हणतात.

❖ ऊर्ध्वमंडली आणि पार्श्वमंडलीहस्ताचे लक्षण ❖

ऊर्ध्वमण्डलिनौ हस्तावूर्ध्वदेशविवर्तनात् |
तावेव पार्श्वविन्यस्तौ पार्श्वमण्डलिनौ स्मृतौ || २०३ ||

पदच्छेद: - ऊर्ध्वमण्डलिनौ हस्तौ ऊर्ध्वदेश-विवर्तनात् |
तौ एव पार्श्व-विन्यस्तौ पार्श्व-मण्डलिनौ स्मृतौ || २०३ ||

अन्वय: - ऊर्ध्वदेशविवर्तनात् हस्तौ ऊर्ध्वमण्डलिनौ | तौ एव पार्श्वविन्यस्तौ (चेत्) पार्श्वमण्डलिनौ स्मृतौ |

अर्थ - दंडपक्ष हस्ताला वरच्या बाजूस गोल फिरवल्यास 'ऊर्ध्वमंडली हस्त' असे म्हणतात व तोच हात एका बाजूला फिरविल्यास त्यास 'पार्श्वमंडली हस्त' असे म्हणतात.

❖ उरोमंडलिहस्ताचे लक्षण ❖

उद्वेष्टितो भवेदेको द्वितीयश्चापवेष्टित: |
भ्रमितावुरस: स्थाने ह्युरोमण्डलिनौ स्मृतौ || २०४ ||

पदच्छेद: - उद्वेष्टित: भवेत् एक: द्वितीय: च अपवेष्टित: |
भ्रमितौ उरस: स्थाने हि उरोमण्डलिनौ स्मृतौ || २०४ ||

अन्वय: - एक: उद्वेष्टित: द्वितीय: च अपवेष्टित: भवेत् | उरस: स्थाने भ्रमितौ हि उरोमण्डलिनौ स्मृतौ |

अर्थ - एक उद्वेष्टित हस्त आणि दुसरा अपवेष्टित हस्त छातीच्या समोर फिरवल्यास त्यास 'उरोमंडली हस्त' असे म्हणतात .

❖ उर:पार्श्वार्धमंडलहस्ताचे लक्षण ❖

अलपल्लवकारालावुरोऽर्धभ्रमणक्रमात् |
पार्श्वावर्तश्च विज्ञेयावुर: पार्श्वार्धमण्डलौ || २०५ ||

पदच्छेद: - अलपल्लवक-अरालौ उर: अर्धभ्रमणक्रमात् |
पार्श्वावर्त: च विज्ञेयौ उर: पार्श्वार्धमण्डलौ || २०५ ||

अन्वय: - अलपल्लवक-अरालौ उरोऽर्धभ्रमणक्रमात् पार्श्वावर्त: च (करणीय: स:) उर:पार्श्वार्ध मण्डलौ विज्ञेयौ |

अर्थ - अलपल्लव आणि अराल हस्त छातीजवळ अर्धगोलाकार फिरवून बाजूला आवर्तित करावे यास 'उर:पार्श्वार्ध हस्त' असे म्हणतात .

❖ मुष्टिकस्वस्तिकहस्ताचे लक्षण ❖

हस्तौ तु मणिबन्धान्ते कुञ्चितावञ्चितौ यदा |
खटकाख्यौ कृतौ स्यातां मुष्टिकस्वस्तिकौ तदा || २०६ ||

पदच्छेद: - हस्तौ तु मणिबन्धान्ते कुञ्चितौ अञ्चितौ यदा |
खटकाख्यौ कृतौ स्यातां मुष्टिकस्वस्तिकौ तदा || २०६ ||

अन्वय : - यदा खटकाख्यौ हस्तौ मणिबन्धान्ते कुञ्चितौ अञ्चितौ कृतौ तदा मुष्टिकस्वस्तिकौ स्याताम् |

अर्थ - दोन्ही खटकामुख हस्त मणिबंधाजवळ कुंचित आणि अंचित केल्यास त्यास 'मुष्टिकस्वस्तिक हस्त' असे म्हणतात .

### ❖ नलिनीपद्मकोशहस्ताचे लक्षण ❖

पद्मकोशौ यदा हस्तौ व्यावृत्तपरिवर्तितौ |
नलिनीपद्मकोशौ तु तदा ज्ञेयौ प्रयोक्तृभि: || २०७ ||

पदच्छेद : - पद्मकोशौ यदा हस्तौ व्यावृत्तपरिवर्तितौ |
नलिनीपद्मकोशौ तु तदा ज्ञेयौ प्रयोक्तृभि : || २०७ ||

अन्वय : - यदा पद्मकोशौ हस्तौ व्यावृत्तपरिवर्तितौ तदा प्रयोक्तृभि: (तौ) नलिनीपद्मकोशौ ज्ञेयौ |

अर्थ - पद्मकोष हस्त व्यावर्तित आणि परिवर्तित केल्यास त्यास 'नलिनीपद्मकोश हस्त' असे म्हणतात .

### ❖ उल्बणहस्ताचे लक्षण ❖

करावुद्वेष्टिताग्रौ च प्रविधायालपल्लवौ |
ऊर्ध्वप्रसारिताविद्धौ कर्तव्यावुल्बणाविति || २०८ ||

पदच्छेद : - करौ उद्वेष्टित-अग्रौ च प्रविधाय अलपल्लवौ |
ऊर्ध्वप्रसारित-आविद्धौ कर्तव्यौ उल्बणौ इति || २०८ ||

अन्वय : - उद्वेष्टिताग्रौ करौ अलपल्लवौ प्रविधाय ऊर्ध्वप्रसारित-आविद्धौ कर्तव्यौ (तौ) उल्बणौ इति |

अर्थ - दोन्ही हातांच्या अग्रभागांनी उद्वेष्टित करून अलपल्लव करावे आणि त्यास वरच्या बाजूस प्रसारित करून आविद्ध केल्यास तो 'उल्बणहस्त' होतो .

### ❖ ललित आणि वलितहस्ताचे लक्षण ❖

पल्लवौ च शिरोदेशं संप्राप्तौ ललितौ स्मृतौ |
कूर्परस्वस्तिकगतौ लताख्यौ वलिताविति || २०९ ||

पदच्छेद: - पल्लवौ च शिरोदेशं संप्राप्तौ ललितौ स्मृतौ |
कूर्परस्वस्तिकगतौ लताख्यौ वलितौ इति || २०९ ||

अन्वय: - पल्लवौ च शिरोदेशं संप्राप्तौ (चेत् तौ) ललितौ स्मृतौ | लताख्यौ कूर्परस्वस्तिकगतौ (चेत् तौ) वलितौ इति |

अर्थ - दोन्ही पल्लव हस्तांना शिरप्रदेशाजवळ (डोक्याजवळ )आणल्यास त्यास 'ललित हस्त' असे म्हणतात . दोन्ही लताख्य हस्त गुणाकाराप्रमाणे स्वस्तिक केल्यास त्याला 'वलित हस्त' असे म्हणतात .

### ❖ नृत्तहस्तांचे विनियोग ❖

[करणे तु प्रयोक्तव्या नृत्तहस्ता विशेषत: |
तथार्थाभिनये चैव पताकाद्या: प्रयोक्तृभि: || २१० ||

पदच्छेद: - [करणे तु प्रयोक्तव्या: नृत्तहस्ता: विशेषत: |
तथा अर्थ-अभिनये च एव पताकाद्या:प्रयोक्तृभि: || २१० ||

अन्वय: - [ प्रयोक्तृभि: नृत्तहस्ता: विशेषत: करणे प्रयोक्तव्या: | तथा पताकाद्या: अर्थाभिनये च |

अर्थ - नाट्यप्रयोग करणाऱ्यांनी नृत्तहस्तांचा उपयोग विशेषत: करणांसाठी केला पाहिजे . पताकहस्त इ . चा प्रयोग कथावस्तूच्या अर्थाभिनयासाठी करावा .

सङ्करोऽपि भवेत्तेषां प्रयोगोऽर्थवशात्पुन: |
प्राधान्येन पुनस्संज्ञा नाट्ये नृत्ते करेष्विह || २११ ||
वियुतास्संयुताश्चैव नृत्तहस्ता: प्रकीर्तिता: ||
अत: परं प्रवक्ष्यामि करान् करणसंश्रयान् || २१२ ||

पदच्छेद : - सङ्कर : अपि भवेत् तेषां प्रयोग : अर्थवशात् पुन : |
प्राधान्येन पुन : संज्ञा नाट्ये नृत्ते करेषु इह || २११ ||
वियुता : संयुता : च एव नृत्तहस्ता : प्रकीर्तिता : ||
अत : परं प्रवक्ष्यामि करान् करणसंश्रयान् || २१२ ||

अन्वय : - तेषां सङ्कर : अपि भवेत् प्रयोग : पुन : अर्थवशात् (भवेत्) | नाट्ये नृत्ते पुन : प्राधान्येन इह करेषु संज्ञा | वियुता : संयुता : च नृत्तहस्ता : प्रकीर्तिता : || अत : परं करणसंश्रयान् करान् प्रवक्ष्यामि |

अर्थ - या नृत्तहस्तांचा आणि अर्थाभिनय व्यक्त करणाऱ्या हस्तांचा मिश्रित प्रयोग सुद्धा होऊ शकतो. परंतु नाट्य आणि नृत्तामध्ये या हस्तांचा उपयोग प्रामुख्याने त्यांच्या नामसंज्ञेनुसारच होत असतो. संयुत आणि असंयुत असे नृत्तहस्त मी सांगितले. आता यापुढे मी हस्तांच्या करणांविषयी सांगणार आहे.

❖ हस्तकरणांचे प्रकार ❖

सर्वेषामेव हस्तानां नाट्यहस्तनिदेशिभि : |
विज्ञातव्यं प्रयत्नेन करणं तु चतुर्विधम् || २१३ ||
अथावेष्टितमेकं स्यादुद्वेष्टितमथापरम् |
व्यावर्तितं तृतीयं तु चतुर्थं परिवर्तितम् || २१४ ||

पदच्छेद : - सर्वेषाम् एव हस्तानां नाट्यहस्त-निदेशिभि : |
विज्ञातव्यं प्रयत्नेन करणं तु चतुर्विधम् || २१३ ||
अथ आवेष्टितम् एकं स्यात् उद्वेष्टितम् अथ अपरम् |
व्यावर्तितं तृतीयं तु चतुर्थं परिवर्तितम् || २१४ ||

अन्वय : - नाट्यहस्तनिदेशिभि : सर्वेषाम् एव हस्तानां चतुर्विधं करणं प्रयत्नेन विज्ञातव्यम् | अथ एकम् आवेष्टितं स्यात् अथ अपरम् उद्वेष्टितम् | तृतीयं व्यावर्तितं चतुर्थं तु परिवर्तितम् |

अर्थ - नाट्य तसेच हस्ताभिनयातील विद्वानांनी हस्तकरणांचे चार प्रकार सांगितले आहेत. ते चांगल्या रीतीने समजून घेतले पाहिजेत. चार करणाचे विभाग याप्रकारे आहेत.
१. आवेष्टित २. उद्वेष्टित ३. व्यावर्तित ४. परिवर्तित

### ❖ आवेष्टित हस्तकरणाचे लक्षण ❖

आवेष्ट्यन्ते यदाङ्गुल्यस्तर्जन्याद्या यथाक्रमम् |
अभ्यन्तरेण करणं तदावेष्टितमुच्यते || २१५ ||

पदच्छेद: - आवेष्ट्यन्ते यदा अङ्गुल्य: तर्जनी-आद्या: यथाक्रमम् |
अभ्यन्तरेण करणं तदा आवेष्टितम् उच्यते || २१५ ||

अन्वय: - यदा तर्जन्याद्या: अङ्गुल्य: यथाक्रमम् अभ्यन्तरेण आवेष्ट्यन्ते | तदा (तत्) आवेष्टितं करणम् (इति) उच्यते |

अर्थ - तर्जनी बोटापासून सुरू करून सर्व बोटं आतल्याबाजूला क्रमाने वाकविल्यास हस्ताच्या या क्रियेला 'आवेष्टित करण' असे म्हणतात .

### ❖ उद्वेष्टित हस्तकरणाचे लक्षण ❖

उद्वेष्ट्यन्ते यदाङ्गुल्य: तर्जन्याद्या बहिर्मुखम् |
क्रमश: करणं विप्रास्तदुद्वेष्टितमुच्यते || २१६ ||

पदच्छेद: - उद्वेष्ट्यन्ते यदा अङ्गुल्य: तर्जनी-आद्या: बहिर्मुखम् |
क्रमश: करणं विप्रा: तत् उद्वेष्टितम् उच्यते || २१६ ||

अन्वय: - विप्रा:, यदा तर्जन्याद्या: अङ्गुल्य: क्रमश: बहिर्मुखम् उद्वेष्ट्यन्ते तत् करणम् उद्वेष्टितम् (इति) उच्यते |

अर्थ - हे विद्वज्जनांनो, तर्जनी बोटापासून सुरू करून सर्व बोटे बाहेरच्या बाजूला क्रमाने बाहेर नेल्यास हस्ताच्या या क्रियेला 'उद्वेष्टित करण'असे म्हणतात .

### ❖ व्यावर्तित हस्तकरणाचे लक्षण ❖

आवर्त्यन्ते कनिष्ठाद्या अङ्गुल्योऽभ्यन्तरेण तु |
यथा क्रमेण करणं तद्व्यावर्तितमुच्यते || २१७ ||

पदच्छेद: - आवर्त्यन्ते कनिष्ठा-आद्या: अङ्गुल्य: अभ्यन्तरेण तु |
यथा क्रमेण करणं तत् व्यावर्तितम् उच्यते || २१७ ||

अन्वयः - कनिष्ठा-आद्याः अङ्गुल्यः अभ्यन्तरेण यथा क्रमेण आवर्त्यन्ते | तत् करणं व्यावर्तितम् (इति) उच्यते |

अर्थ - कनिष्ठिका बोटापासून सुरू करून सर्व बोटं आतल्याबाजूला क्रमाने वाकविल्यास या हस्ताच्या या क्रियेला 'व्यावर्तित करण' असे म्हणतात .

### ❖ परिवर्तित हस्तकरणाचे लक्षण ❖

उद्वर्त्यन्ते कनिष्ठाद्या बाह्यतः क्रमशो यदा |
अङ्गुल्यः करणं विप्रास्तदुक्तं परिवर्तितम् || २१८ ||

पदच्छेदः - उद्वर्त्यन्ते कनिष्ठा-आद्याः बाह्यतः क्रमशः यदा |
अङ्गुल्यः करणं विप्राः तत् उक्तं परिवर्तितम् || २१८ ||

अन्वयः - विप्राः, यदा कनिष्ठाद्याः अङ्गुल्यः बाह्यतः क्रमशः उद्वर्त्यन्ते तत् करणं परिवर्तितम् (इति) उक्तम् |

अर्थ - हे विद्वानांनो, कनिष्ठिका बोटापासून सुरू करून सर्व बोटं बाहेरच्या बाजूला क्रमाने नेल्यास या हस्ताच्या या क्रियेला 'परिवर्तित करण म्हणतात .

### ❖ हस्तकरणांचे विनियोग ❖

नृत्तेऽभिनययोगे च पाणिभिर्वर्तनाश्रये |
मुखभ्रूनेत्रयुक्तानि करणानि प्रयोजयेत् || २१९ ||

पदच्छेदः - नृत्ते अभिनययोगे वा पाणिभिः वर्तन-आश्रये |
मुख-भ्रू-नेत्र-युक्तानि करणानि प्रयोजयेत् || २१९ ||

अन्वयः - नृत्ते अभिनययोगे वा वर्तनाश्रये पाणिभिः मुखभ्रूनेत्रयुक्तानि करणानि प्रयोजयेत् |

अर्थ - नृत्य आणि अभिनय करताना गोलाकार क्रियेच्या आश्रयी असलेल्या मुख, भुवया व नेत्र यांनी युक्त असलेल्या करणांचा प्रयोग हस्तांद्वारे करावा .

### ❖ बाहुंचे प्रकार ❖

तिर्यक्तथोर्ध्वसंस्थो ह्यधोमुखश्चाञ्चितोऽपविद्धस्तु |
मण्डलगतिस्तथा स्वस्तिकश्च पृष्ठानुसारी च || २२० ||
उद्वेष्टितः प्रसारित इत्येते वै स्मृताः प्रकारास्तु |
बाह्वोरिति करणगता विज्ञेया नर्तकैर्नित्यम् || २२१ ||

पदच्छेदः - तिर्यक् तथा ऊर्ध्वसंस्थः हि अधोमुखः च अञ्चितः अपविद्धः तु |
मण्डलगतिः तथा स्वस्तिकः च पृष्ठानुसारी च || २२० ||
उद्वेष्टितः प्रसारितः इति एते वै स्मृताः प्रकाराः तु |
बाह्वोः इति करणगताः विज्ञेयाः नर्तकैः नित्यं || २२१ ||

अन्वयः - तिर्यक् ऊर्ध्वसंस्थः अधोमुखः अञ्चितः अपविद्धः मण्डलगतिः स्वस्तिकः पृष्ठानुसारी उद्वेष्टितः प्रसारितः इति एते करणगताः बाह्वोः प्रकाराः स्मृताः (ये) नर्तकैः नित्यं विज्ञेयाः |

अर्थ - विशेषतः नर्तकांना हस्तकरणावर आधारित बाहूच्या या दहा प्रकारांविषयीचे ज्ञान असणे अत्यंत आवश्यक आहे. १. तिर्यक्, २. ऊर्ध्वसंस्थ, ३. अधोमुख, ४. अंचित, ५. अपविद्ध, ६. मंडलगती, ७. स्वस्तिक, ८. पृष्ठानुसारी ९. उद्वेष्टित तसेच १०. प्रसारित.

### ❖ छाती, पोट आणि पार्श्व यांचे प्रकार आणि विनियोग ❖

हस्तानां करणविधिर्मया समासेन निगदितो विप्राः |
अत ऊर्ध्वं व्याख्यास्ये हृदयोदरपार्श्वकर्माणि || २२२ ||

पदच्छेदः - हस्तानां करणविधिः मया समासेन निगदितः विप्राः |
अतः ऊर्ध्वं व्याख्यास्ये हृदय-उदर-पार्श्वकर्माणि || २२२ ||

अन्वयः - विप्राः, हस्तानां करणविधिः मया समासेन निगदितः | अतः ऊर्ध्वं हृदयोदरपार्श्वकर्माणि व्याख्यास्ये |

अर्थ - हे ऋषींनो, याप्रकारे थोडक्यात मी हस्ताभिनयातील करणविधी सांगितला . आता मी हृदय-छाती, पोट, पार्श्वभुजांचे प्रकार आणि त्यांचे विनियोग सांगतो .

❖ वक्ष:स्थलाचे पाच प्रकार ❖

आभुग्नमथ निर्भुग्नं तथा चैव प्रकम्पितम् |
उद्वाहितं समं चैव ह्युर: पञ्चविधं स्मृतम् ॥ २२३ ॥

पदच्छेद: - आभुग्नम् अथ निर्भुग्नं तथा च एव प्रकम्पितम् |
उद्वाहितं समं च एव हि उर: पञ्चविधं स्मृतम् |

अन्वय: - उर: पञ्चविधं स्मृतम् - अथ आभुग्नं निर्भुग्नं प्रकम्पितम् उद्वाहितं समं च |

अर्थ - वक्षस्थलाचे पाच प्रकार आहेत . १ . आभुग्न २ . निर्भुग्न ३ . प्रकंपित ४ . उद्वाहित आणि ५ . सम .

❖ आभुग्न वक्षाचे लक्षण आणि विनियोग ❖

निम्नमुन्नतपृष्ठं च व्याभुग्नांसं श्लथं क्वचित् |
आभुग्नं तदुरो ज्ञेयं कर्म चास्य निबोधत ॥ २२४ ॥
संभ्रमविषादमूर्च्छाशोकभयव्याधिहृदयशल्येषु |
कार्यं शीतस्पर्शे वर्षे लज्जान्वितेऽर्थवशात् ॥ २२५ ॥

पदच्छेद: - निम्नम् उन्नतपृष्ठं च व्याभुग्न-अंसं श्लथं क्वचित् |
आभुग्नं तत् उर: ज्ञेयं कर्म च अस्य निबोधत ॥ २२४ ॥
संभ्रम-विषाद-मूर्च्छा-शोक-भय-व्याधि-हृदय-शल्येषु |
कार्यं शीतस्पर्शे वर्षे लज्जा-अन्विते अर्थवशात् ॥ २२५ ॥

अन्वय: - निम्नम् उन्नतपृष्ठं च व्याभुग्नांसं क्वचित् श्लथं तत् आभुग्नम् उर: ज्ञेयम् अस्य कर्म च निबोधत | संभ्रम-विषाद-मूर्च्छा-शोक-भय-व्याधि-हृदय-शल्येषु शीतस्पर्शे वर्षे अर्थवशात् लज्जान्विते कार्यम् |

अर्थ - (संकोचाने) झुकलेले असल्यास, पाठ उन्नत, खांदे झुकलेले आणि शिथिल असतील तर त्यास 'आभुग्न वक्षस्थल' म्हणतात. याचा वापर संभ्रम, विषाद, मूर्च्छा, शोक, भीती, व्याधी, हृदयपीडा, थंडीचा गारठा, पाऊस तसेच लज्जेमध्ये केला जातो.

❖ निर्भुग्न वक्षाचे लक्षण आणि विनियोग ❖

स्तब्धं च निम्नपृष्ठं च निर्भुग्नांसं समुन्नतम् |
उरो निर्भुग्नमेतद्धि कर्म चास्य निबोधत || २२६ ||
स्तम्भे मानग्रहणे विस्मयदृष्टे च सत्यवचने च |
अहमिति च दर्पवचने गर्वोत्सेके तु कर्तव्यम् || २२७ ||

पदच्छेद :- स्तब्धं च निम्नपृष्ठं च निर्भुग्न-अंसं समुन्नतम् |
उर: निर्भुग्नम् एतत् हि कर्म च अस्य निबोधत || २२६ ||
स्तम्भे मानग्रहणे विस्मयदृष्टे च सत्यवचने च |
अहम् इति च दर्पवचने गर्व-उत्सेके तु कर्तव्यम् || २२७ ||

अन्वय : - स्तब्धं निम्नपृष्ठं निर्भुग्नांसं समुन्नतम् एतत् निर्भुग्नम् उर: अस्य कर्म च निबोधत | स्तम्भे मानग्रहणे विस्मयदृष्टे सत्यवचने 'अहम् इति' दर्पवचने गर्वोत्सेके (एतत्) कर्तव्यम् |

अर्थ - जेव्हा वक्षस्थल दृढ, पाठ न वाकलेली आणि खांदे न झुकलेले व उंचावलेले असतील तर त्याला 'निर्भुग्न वक्षस्थल' असे म्हणतात. स्तंभ, मान, आश्चर्याने पाहणे, सत्यवचन, गर्वाने बोलणे तसेच गर्वाचा अतिरेक दाखविण्यासाठी याचा वापर केला जातो.

[अत्र केचित् क्षेपकोऽयम्
[दीर्घनि:श्वसिते चैव जृम्भणे मोटने तथा |
बिब्बोके च पुन: स्त्रीणां तद्विज्ञेयं प्रयोक्तृभि:] || २२८ ||

पदच्छेद :- [अत्र केचित् क्षेपक: अयम्
[दीर्घ-नि:श्वसिते च एव जृम्भणे मोटने तथा |
बिब्वोके च पुन: स्त्रीणां तत् विज्ञेयं प्रयोक्तृभि:] || २२८ ||

अन्वय : - अत्र केचित् क्षेपक: अयम् दीर्घनि:श्वसिते जृम्भणे मोटने तथा स्त्रीणां बिब्बोके च प्रयोक्तृभि: तत् विज्ञेयम्|

अर्थ - अन्य मतानुसार, दीर्घ नि:श्वास, जांभई देणे, आळस देणे आणि स्त्रियांच्या बिब्बोक अवस्थेमध्ये देखील निर्भुग्न वक्षाचा वापर होतो असे प्रयोगकर्त्यांनी जाणावे .

❖ प्रकंपित वक्षाचे लक्षण आणि विनियोग ❖

ऊर्ध्वोत्क्षेपैरुरो यत्र निरन्तरकृतै: कृतम् |
प्रकम्पितं तु तज्ज्ञेयमुरो नाट्यप्रयोक्तृभि: || २२९ ||

पदच्छेद : - ऊर्ध्व-उत्क्षेपै: उर: यत्र निरन्तरकृतै: कृतम्|
प्रकम्पितं तु तत् ज्ञेयम् उर: नाट्यप्रयोक्तृभि: || २२९ ||

अन्वय : - यत्र निरन्तरकृतै: ऊर्ध्व-उत्क्षेपै: उर: कृतं तत् नाट्यप्रयोक्तृभि: प्रकम्पितम् उर: (इति) ज्ञेयम्|

अर्थ - छाती एकसारखी वर-खाली केली असता त्याला 'प्रकंपित वक्ष' म्हणतात .

हसितरुदितादिसंभ्रमभयश्रमव्याधिपीडितार्थेषु |
नानाभावोपगतं कार्यमुरो नाट्ययोगेषु ||

पदच्छेद : - हसित-रुदित आदि-संभ्रम-भय-श्रम-व्याधि-पीडित अर्थेषु|
नाना-भाव-उपगतं कार्यम् उर: नाट्ययोगेषु ||

अन्वय : - हसित-रुदितादि-संभ्रम-भय-श्रम-व्याधि-पीडितार्थेषु नानाभावोपगतम् उर: नाट्य-योगेषु कार्यम्|

अर्थ - हसणे, रडणे, संभ्रम, भय, परिश्रम, आजारपणाने त्रस्त अशा विविध भावांच्या अर्थांच्या अभिव्यक्तीसाठी नाट्यविद्वानांनी प्रकंपित वक्षाचा वापर करावा .

हसितरुदितेषु कार्यं श्रमे भये श्वासकासयोश्चैव |
हिक्के दु:खे च तथा नाट्यज्ञैरर्थयोगेन || २३० ||

पदच्छेद :- हसित-रुदितेषु कार्यं श्रमे भये श्वास-कासयो : च एव |
हिक्के दु :खे च तथा नाट्यज्ञै : अर्थयोगेन || २३० ||

अन्वय : - हसितरुदितेषु कार्यं श्रमे भये श्वासकासयो : च एव |
हिक्के दु :खे च तथा नाट्यज्ञै : अर्थयोगेन |

अर्थ - हसणे, रडणे, परिश्रम, भय, श्वासोच्छ्वास, खोकला, उचकी येणे तसेच दु :ख दाखविण्यासाठीदेखील प्रकंपित वक्षाचा वापर करावा .

### ❖ उद्वाहित वक्षाचे लक्षण आणि विनियोग ❖

उद्वाहितं तूर्ध्वकृतमुरो ज्ञेयं प्रयोक्तृभि : |
दीर्घोच्छ्वासोन्नतालोके जृम्भणादिषु चेष्यते || २३१ ||

पदच्छेद :- उद्वाहितं तु ऊर्ध्वकृतम् उर : ज्ञेयं प्रयोक्तृभि : |
दीर्घ-उच्छ्वास-उन्नत-आलोके जृम्भणादिषु च इष्यते || २३१ ||

अन्वय : - ऊर्ध्वकृतम् उर : उद्वाहितम् (इति) प्रयोक्तृभि : ज्ञेयम् | (एतत्) दीर्घोच्छ्वासोन्नतालोके जृम्भणादिषु च इष्यते |

अर्थ - जेव्हा वक्ष :स्थल वरच्या बाजूला उचललेले असेल तेव्हा त्यास 'उद्वाहित' असे म्हणतात . दीर्घ श्वास घेणे, उंचावरील वस्तू पाहणे, जांभई देणे यामध्ये याचा वापर करावा .

### ❖ सम वक्षाचे लक्षण आणि विनियोग ❖

सर्वैरेवाङ्गविन्यासैश्चतुरश्रकृतै : कृतम् |
उर : समं तु विज्ञेयं स्वस्थं सौष्ठवसंयुतम् || २३२ ||

पदच्छेद :- सर्वै : एव अङ्ग-विन्यासै : चतुरश्र-कृतै : कृतम् |
उर : समं तु विज्ञेयं स्वस्थं सौष्ठव-संयुतम् || २३२ ||

अन्वय : - चतुरश्रकृतै : सर्वै : एव अङ्गविन्यासै : सौष्ठवसंयुतं कृतम् (तत्) उर : समं विज्ञेयं, स्वस्थं (च अस्य कर्म)|

अर्थ - जेव्हा सर्वांग समान असतील, चतुरश्र अवस्थेमध्ये सौष्ठवयुक्त असतील तेव्हा त्या

वक्ष:स्थलाला 'सम' (स्वाभाविक)वक्ष म्हणतात. याचा वापर स्वाभाविक अभिनयासाठी करावा.

## ❖ पार्श्वाची लक्षणे आणि प्रकार ❖

एतदुक्तं मया सम्यगुरसस्तु विकल्पनम् |
अत: परं प्रवक्ष्यामि पार्श्वयोरिह लक्षणम् ‖ २३३ ‖
नतं समुन्नतं चैव प्रसारितविवर्तिते
तथापसृतमेवं तु पार्श्वयो: कर्म पञ्चधा ‖ २३४ ‖

पदच्छेद: - एतत् उक्तं मया सम्यक् उरस: तु विकल्पनम् |
अत: परं प्रवक्ष्यामि पार्श्वयो: इह लक्षणम् ‖ २३३ ‖
नतं समुन्नतं च एव प्रसारितविवर्तिते |
तथा अपसृतम् एवं तु पार्श्वयो: कर्म पञ्चधा ‖ २३४ ‖

अन्वय: - एतत् मया उरस: विकल्पनं सम्यक् उक्तम् | अत: परम् इह पार्श्वयो: लक्षणं प्रवक्ष्यामि | नतं समुन्नतं प्रसारितविवर्तिते तथा अपसृतम् एवं पार्श्वयो: कर्म पञ्चधा |

अर्थ - अशाप्रकारे मी तुम्हांस वक्ष:स्थलाचे विविध भेद सांगितले. आता मी तुम्हाला पार्श्व म्हणजेच बाजूंची लक्षणे सांगणार आहे. नत, समुन्नत, प्रसारित, विवर्तित आणि अपसृत हे पार्श्वाचे पाच भेद आहेत.

## ❖ नत पार्श्वाचे लक्षण ❖

कटी भवेत्तु व्याभुग्ना पार्श्वमाभुग्नमेव च |
तथैवापसृतांसं च किञ्चित्पार्श्वं नतं स्मृतम् ‖ २३५ ‖

पदच्छेद: - कटी भवेत् तु व्याभुग्ना पार्श्वम् आभुग्नम् एव च |
तथा एव अपसृत-अंसं च किञ्चित् पार्श्वं नतं स्मृतम् ‖ २३५ ‖

अन्वय: - कटी व्याभुग्ना भवेत् पार्श्वम् आभुग्नं च | तथैव किञ्चित् अपसृतांसं च (तत्) पार्श्वं नतं (इति) स्मृतम् |

अर्थ - जेव्हा कटी व्याभुग्न (वाकलेली) असते आणि पार्श्व वाकलेले असेल तसेच खांदा अपसृत झालेला असेल तेव्हा त्यास 'नत पार्श्व' असे म्हणतात .

### ❖ समुन्नत पार्श्वाचे लक्षण ❖

नतस्यैवापरं पार्श्वं विपरीतं तु युक्तित: |
कटीपार्श्वभुजांसैश्चाभ्युन्नतैरुन्नतं भवेत् || २३६ ||

पदच्छेद: - नतस्य एव अपरं पार्श्वं विपरीतं तु युक्तित: |
कटी-पार्श्व-भुज-अंसै: च अभ्युन्नतै: उन्नतं भवेत् || २३६ ||

अन्वय: - नतस्य एव विपरीतम् अपरं पार्श्वं युक्तित: कटीपार्श्वभुजांसै: च अभ्युन्नतै: उन्नतं भवेत् (तत् समुन्नतं पार्श्वम्) |

अर्थ - नतपार्श्वाच्या विरुद्ध पार्श्व करून स्वविवेकाने कंबर, बाजू, भुजा आणि खांदा वर उचलावा त्यास 'समन्नुत पार्श्व' असे म्हणतात .

### ❖ प्रसारित आणि विवर्तित पार्श्वाचे लक्षण ❖

प्रसारितं पार्श्वम् विवर्तितं पार्श्वम् च |
आयामनादुभयत: पार्श्वयो: स्यात्प्रसारितम् |
परिवर्तात्त्रिकस्यापि विवर्तिमिहेष्यते || २३७ ||

पदच्छेद: - आयामनात् उभयत: पार्श्वयो: स्यात् प्रसारितम् |
परिवर्तात् त्रिकस्य अपि विवर्तितम् इह इष्यते || २३७ ||

अन्वय: - उभयत: पार्श्वयो: आयामनात् प्रसारितं स्यात् | त्रिकस्य परिवर्तात् अपि इह विवर्तितम् इष्यते |

अर्थ - दोन्ही पार्श्व दोन्ही बाजूला पसरविल्यास त्यास 'प्रसारित पार्श्व' असे म्हणतात .
त्रिक परिवर्तित केल्यास त्यास 'विवर्तित पार्श्व' असे म्हणतात .

## ❖ अपसृत पार्श्वाचे लक्षण ❖

विवर्तितापनयनाद्भवेदपसृतं पुन: |
पार्श्वलक्षणमित्युक्तं विनियोगं निबोधत || २३८ ||

पदच्छेद : - विवर्तित-अपनयनात् भवेत् अपसृतं पुन: |
पार्श्वलक्षणम् इति उक्तं विनियोगं निबोधत || २३८ ||

अन्वय : - विवर्तित-अपनयनात् पुन: अपसृतं भवेत् | पार्श्वलक्षणम् इति उक्तम् (अधुना) विनियोगं निबोधत |

अर्थ - विवर्तित पार्श्व पुन: स्वत:च्या मूळस्थितीमध्ये आणल्यास त्याला 'अपसृत पार्श्व'असे म्हणतात. याप्रमाणे मी पार्श्वाची लक्षणे सांगितली. आता त्यांचा वापर ऐका.

## ❖ नत इ. पार्श्वांचे विनियोग ❖

उपसर्पे नतं कार्यमुन्नतं चापसर्पणे |
प्रसारितं प्रहर्षादौ परिवृत्ते विवर्तितम् || २३९ ||
विनिवृत्ते त्वपसृतं पार्श्वमर्थवशाद्भवेत् |
एतानि पार्श्वकर्माणि जठरस्य निबोधत || २४० ||

पदच्छेद : - उपसर्पे नतं कार्यम् उन्नतं च अपसर्पणे |
प्रसारितं प्रहर्ष-आदौ परिवृत्ते विवर्तितम् || २३९ ||
विनिवृत्ते तु अपसृतं पार्श्वम् अर्थवशात् भवेत् |
एतानि पार्श्वकर्माणि जठरस्य निबोधत || २४० ||

अन्वय : - उपसर्पे नतं कार्यम् अपसर्पणे उन्नतं प्रहर्षादौ प्रसारितं परिवृत्ते विवर्तितं विनिवृत्ते अपसृतम् (एवम्) अर्थवशात् पार्श्वं भवेत् | एतानि पार्श्वकर्माणि (सन्ति अधुना) जठरस्य निबोधत |

अर्थ - कोणी मनुष्य जवळ आल्यास नत, मागे सरकल्यास समुन्नत, अत्यानंदामध्ये प्रसारित, मागे वळण्यासाठी विवर्तित, परत येण्यासाठी अपसृताचा वापर करावा. याप्रमाणे पार्श्वाचे हे भेद आणि विनियोग सांगितले आहेत. आता मी पोटाचे भेद सांगतो.

### ❖ उदराचे प्रकार आणि लक्षणे ❖

क्षामं खल्वं च पूर्णं च संप्रोक्तमुदरं त्रिधा |
तनु क्षामं नतं खल्वं पूर्णमाध्मातमुच्यते || २४१ ||

पदच्छेद :- क्षामं खल्वं च पूर्णं च संप्रोक्तम् उदरं त्रिधा |
तनु क्षामं नतं खल्वं पूर्णम् आध्मातम् उच्यते || २४१ ||

अन्वय :- क्षामं खल्वं च पूर्णं च (इति) उदरं त्रिधा संप्रोक्तम् | तनु क्षामं, नतं खल्वं, पूर्णम् आध्मातम् (इति) उच्यते |

अर्थ - उदराचे तीन प्रकार १ . क्षाम २ . खल्व ३ . पूर्ण . यातील दुबळा आणि आत गेलेले पोट म्हणजे 'क्षाम', झुकलेले पोट म्हणजे 'खल्व' आणि भरलेले पोट म्हणजे 'पूर्ण' असे म्हटले आहे .

### ❖ उदराचे विनियोग ❖

क्षामं हास्येऽथ रुदिते नि:श्वासे जृम्भणे भवेत् |
व्याधिते तपसि श्रान्ते क्षुधार्ते खल्वमिष्यते || २४२ ||
पूर्णमुच्छ्वसिते स्थूले व्याधितात्यशनादिषु |
अन्ये तु
क्षामं खल्वं समं पूर्णमुदरं स्याच्चतुर्विधम् |
इत्येतदुदरस्योक्तं कर्म कट्या निबोधत || २४३ ||

पदच्छेद :- क्षामं हास्ये अथ रुदिते नि:श्वासे जृम्भणे भवेत् |
व्याधिते तपसि श्रान्ते क्षुधार्ते खल्वम् इष्यते || २४२ ||
पूर्णम् उच्छ्वसिते स्थूले व्याधित-अत्यशनादिषु |
अन्ये तु
क्षामं खल्वं समं पूर्णम् उदरं स्यात् चतुर्विधम् |
इति एतत् उदरस्य उक्तं कर्म कट्या निबोधत || २४३ ||

अन्वय: - अथ हास्ये रुदिते नि:श्वासे जृम्भणे क्षामं भवेत्| व्याधिते तपसि श्रान्ते क्षुधार्ते खल्वम् इष्यते| उच्छ्वसिते स्थूले व्याधित-अत्यशनादिषु पूर्णम्|
अन्ये तु क्षामं खल्वं समं पूर्णम् (एवम्) उदरं चतुर्विधं स्यात्| इति एतत् उदरस्य कर्म उक्तम् (अधुना) कट्या निबोधत|

अर्थ - हसणे, रडणे, नि:श्वास टाकणे, जांभई देणे यांमध्ये 'क्षाम' उदराचा वापर होतो. आजारपण, तपस्या, थकवा आणि भुकेसाठी 'खल्व' उदराचा वापर होतो. तसेच उच्छ्वास , स्थूलपणा, व्याधी आणि अतिशय जेवणासाठी 'पूर्ण' उदराचा वापर होतो. अन्य मतानुसार, क्षाम, खल्व , सम आणि पूर्ण असे उदराचे चार प्रकार आहेत. अशा रीतीने, मी उदराचे भेद आणि विनियोग सांगितले . आता मी कंबरेची (कटीची) कर्मे (विनियोग)सांगतो.

### ❖ कटीचे प्रकार आणि लक्षणे ❖

छिन्ना चैव निवृत्ता च रेचिता कम्पिता तथा|
उद्वाहिता चैव कटी नाट्ये नृत्ते च पञ्चधा || २४४ ||

पदच्छेद: - छिन्ना च एव निवृत्ता च रेचिता कम्पिता तथा|
उद्वाहिता च एव कटी नाट्ये नृत्ते च पञ्चधा || २४४ ||

अन्वय: - नाट्ये नृत्ते च कटी पञ्चधा - छिन्ना निवृत्ता रेचिता कम्पिता तथा उद्वाहिता च|

अर्थ - नाट्य आणि नृत्यामध्ये उपयोगी असे कटीचे पाच प्रकार आहेत.
१. छिन्ना, २. निवृत्ता, ३.रेचिता, ४. कंपिता, ५. उद्वाहिता.

कटी मध्यस्य वलनाच्छिन्ना संपरिकीर्तिता || २४५ ||
पराङ्मुखस्याभिमुखी निवृत्ता स्यान्निवर्तिता|
सर्वतो भ्रमणाच्चापि विज्ञेया रेचिता कटी || २४६ ||
तिर्यग्गतागता क्षिप्रं कटी ज्ञेया प्रकम्पिता|
नितम्बपार्श्वोद्वहनाच्छनैरुद्वाहिता कटी || २४७ ||

पदच्छेद : - कटी मध्यस्य वलनात् छिन्ना संपरिकीर्तिता ॥ २४५ ॥
पराङ्मुखस्य अभिमुखी निवृत्ता स्यात् निवर्तिता ।
सर्वत: भ्रमणात् च अपि विज्ञेया रेचिता कटी ॥ २४६ ॥
तिर्यक् गत-आगता क्षिप्रं कटी ज्ञेया प्रकम्पिता ।
नितम्ब-पार्श्व-उद्वहनात् शनै : उद्वाहिता कटी ॥ २४७ ॥

अन्वय : - कटी मध्यस्य वलनात् 'छिन्ना' संपरिकीर्तिता । पराङ्मुखस्य अभिमुखी निवर्तिता 'निवृत्ता' स्यात् । सर्वत : भ्रमणात् च 'रेचिता' कटी विज्ञेया । क्षिप्रं तिर्यक् गतागता कटी प्रकम्पिता ज्ञेया । शनै : नितम्बपार्श्वोद्वहनात् उद्वाहिता कटी (स्यात्) ।

अर्थ - मध्यभागातून मुरडलेली कंबर म्हणजे 'छिन्ना'होय . समोरच्या बाजूला जाऊन परत येणारी 'निवृत्ता' कटी होय . चारही बाजूंना गोल फिरणारी ती 'रेचिता' कटी असते . तिरकी जाणारी कटी 'प्रकंपिता' होय . पार्श्व आणि नितंबापासून हळूहळू वर गेलेली कंबर 'उद्वाहिता' होय .

## ❖ कटीचे विनियोग ❖

कटीकर्म मया प्रोक्तं विनियोगं निबोधत ॥ २४८ ॥
छिन्ना व्यायामसंभ्रान्तव्यावृत्तप्रेक्षणादिषु ।
निवृत्ता वर्तने चैव रेचिता भ्रमणादिषु ॥ २४९ ॥
कुब्जवामननीचानां गतौ कार्या प्रकम्पिता ।
स्थूलेषूद्वाहिता योज्या स्त्रीणां लीलागतेषु च ॥ २५० ॥

पदच्छेद : - कटीकर्म मया प्रोक्तं विनियोगं निबोधत ॥ २४८ ॥
छिन्ना व्यायाम-संभ्रान्त-व्यावृत्त-प्रेक्षण-आदिषु ।
निवृत्ता वर्तने च एव रेचिता भ्रमणादिषु ॥ २४९ ॥
कुब्ज-वामन-नीचानां गतौ कार्या प्रकम्पिता ।
स्थूलेषु उद्वाहिता योज्या स्त्रीणां लीलागतेषु च ॥ २५० ॥

अन्वय : - कटीकर्म मया प्रोक्तं (अधुना) विनियोगं निबोधत |
व्यायामसंभ्रान्तव्यावृत्तप्रेक्षणादिषु छिन्ना |
निवृत्ता वर्तने भ्रमणादिषु च रेचिता |
कुब्जवामननीचानां गतौ कार्या प्रकम्पिता |
स्थूलेषु स्त्रीणां लीलागतेषु च उद्वाहिता योज्या |

अर्थ - याप्रकारे मी कटिलक्षणे सांगितली . आता मी त्याचा वापर सांगतो .
व्यायामासाठी , भ्रांती आणि मागे वळून बघण्यासाठी छिन्ना कटीचा वापर होतो .
गोल फिरण्यासाठी 'निवृत्ता' कटी वापरली जाते .
भ्रमण इ . सामान्य क्रियांसाठी 'रेचिता' कटीचा वापर होतो .
पोंग आलेला, बुटका आणि नीच प्रकृतीच्या पुरुषांच्या गती दाखविण्यासाठी 'प्रकंपिता' कटी वापरली जाते आणि,
स्थूल पुरुष आणि स्त्रियांच्या ललित गतीमध्ये 'उद्वाहिता' कटीचा वापर होतो .

## ❖ ऊरूचे प्रकार आणि लक्षणे ❖

कम्पनं वलनं चैव स्तम्भनोद्वर्तने तथा || २५१ ||
विवर्तनं च पञ्चैतान्यूरुकर्माणि कारयेत् |

पदच्छेद : - कम्पनं वलनं च एव स्तम्भन-उद्वर्तने तथा || २५१ ||
विवर्तनं च पञ्च एतानि ऊरुकर्माणि कारयेत् |

अन्वय : - कम्पनं वलनं स्तम्भनोद्वर्तने तथा विवर्तनं च पञ्च एतानि ऊरुकर्माणि कारयेत् |

अर्थ - ऊरूंचे पाच भेद आहेत . १. कंपन २. वलन ३.स्तंभन ४. उद्वर्तन ५. विवर्तन .

नमनोन्नमनात्पार्ष्णेर्मुहु: स्यादूरुकम्पनम् |
गच्छेदभ्यन्तरं जानु यत्तु तद्वलनं स्मृतम् || २५२ ||
स्तम्भनं चात्र विज्ञेयमपविद्धक्रियात्मकम् |
वलिताविद्धकरणादुद्वर्तनमीतीरितम् || २५३ ||
पार्ष्णिरभ्यन्तरं गच्छेद्यत्र तत्तु निवर्तनम् |

पदच्छेद : - नमन-उन्नमनात् पार्ष्णे : मुहु : स्यात् ऊरुकम्पनम् |
गच्छेत् अभ्यन्तरं जानु यत् तु तत् वलनं स्मृतम् || २५२ ||
स्तम्भनं च अत्र विज्ञेयम् अपविद्ध-क्रियात्मकम् |
वलित-आविद्ध-करणात् उद्वर्तनम् इति ईरितम् || २५३ ||
पार्ष्णि : अभ्यन्तरं गच्छेत् यत्र तत् तु निवर्तनम् |

अन्वय : - पार्ष्णे : मुहु : नमन-उन्नमनात् ऊरुकम्पनम् स्यात् |
यत् जानु अभ्यन्तरं गच्छेत् तत् वलनं स्मृतम् |
अत्र अपविद्धक्रियात्मकं स्तम्भनं च विज्ञेयम् |
वलित-आविद्धकरणात् उद्वर्तनम् इति ईरितम् |
यत्र पार्ष्णि : अभ्यन्तरं गच्छेत् तत् निवर्तनम् |

अर्थ - वारंवार पायाची टाच वर आणि खाली घेऊन जाण्यास 'कंपन' असे म्हणतात .
गुडघा आतल्या बाजूला ठेवण्यास 'वलन',
अपविद्ध क्रिया केल्यास (गतीविषयी निष्क्रिय असताना) 'स्तंभन',
मांडी वलित आणि आविद्ध केल्यास 'उद्वर्तन' ऊरू होतो आणि
पायाची टाच आतल्या बाजूला आणून संकुचित केल्यास त्या ऊरूस 'विवर्तन' असे म्हणतात .

## ❖ ऊरूचे विनियोग ❖

गतिष्वधमपात्राणां भये चापि हि कम्पनम् || २५४ ||
वलनं चैव कर्तव्यं स्त्रीणां स्वैरपरिक्रमे |
साध्वसे च विषादे च स्तम्भनं तु प्रयोजयेत् || २५५ ||
व्यायामे ताण्डवे चैव कार्यमुद्वर्तनं बुधै : |
विवर्तनं तु कर्तव्यं संभ्रमादिपरिक्रमे || २५६ ||

पदच्छेद : - गतिषु अधमपात्राणां भये च अपि हि कम्पनम् || २५४ ||
वलनं च एव कर्तव्यं स्त्रीणां स्वैरपरिक्रमे |

साध्वसे च विषादे च स्तम्भनं तु प्रयोजयेत् ॥ २५५ ॥
व्यायामे ताण्डवे च एव कार्यम् उद्वर्तनं बुधै : ।
विवर्तनं तु कर्तव्यं संभ्रमादिपरिक्रमे ॥ २५६ ॥

अन्वय : - अधमपात्राणां गतिषु भये च कम्पनं (कर्तव्यम्) ।
स्त्रीणां स्वैरपरिक्रमे वलनं च कर्तव्यम् ।
साध्वसे विषादे च स्तम्भनं प्रयोजयेत् ।
व्यायामे ताण्डवे च बुधै : उद्वर्तनं कार्यम् ।
संभ्रमादिपरिक्रमे विवर्तनं कर्तव्यम् ।

अर्थ - अधम पात्रांच्या गतीसाठी तसेच भयामध्ये 'कंपन' ऊरूचा वापर करावा .
स्त्रियांच्या स्वच्छंदगतीमध्ये 'वलन' ऊरू वापरावी .
भय आणि विषाद अवस्थेत' 'स्तंभन' ऊरूचा वापर करावा .
व्यायाम आणि तांडवनृत्यामध्ये 'उद्वर्तन' ऊरू वापरावी आणि
संभ्रांत इ . मुळे फिरण्यासाठी 'निवर्तन' ऊरूचा वापर करावा .

यथादर्शनमन्यच्च लोकाद्ग्राह्यं प्रयोक्तृभि : ।
इत्यूर्वोर्लक्षणं प्रोक्तं जङ्घयोस्तु निबोधत ॥ २५७ ॥

पदच्छेद : - यथादर्शनम् अन्यत् च लोकात् ग्राह्यं प्रयोक्तृभि : ।
इति ऊर्वो : लक्षणं प्रोक्तं जङ्घयो : तु निबोधत ॥ २५७ ॥

अन्वय : - प्रयोक्तृभि : लोकात् यथादर्शनम् अन्यत् च ग्राह्यम् । इति ऊर्वो : लक्षणं प्रोक्तम् (अधुना) जङ्घयो : निबोधत ।

अर्थ - या व्यतिरिक्त मांडीच्या अन्य विविध क्रिया आणि अवस्था विद्वज्जनांनी जशा दृष्टीस येतील त्यानुसार जगाकडून ग्रहण कराव्या . अशाप्रकारे मांड्यांचे प्रकार सांगितले . आता मी जंघांचे म्हणजेच पोटऱ्यांचे प्रकार सांगतो .

## ❖ जंघाचे / पोटऱ्यांचे प्रकार ❖

आवर्तितं नतं क्षिप्तमुद्वाहितमथापि वा ।

परिवृत्तं तथा चैव जङ्घाकर्माणि पञ्चधा ॥ २५८ ॥
वामो दक्षिणपार्श्वेन दक्षिणाच्चापि वामतः ।
पादो यत्र व्रजेद्विप्रास्तदावर्तितमुच्यते ॥ २५९ ॥
[जङ्घास्वस्तिकयोगेन क्रमादावर्तितं नयेत् ।]
जानुनः कुञ्चनाच्चैव नतं ज्ञेयं प्रयोक्तृभिः
विक्षेपाच्चापि जङ्घायाः क्षिप्तमित्यभिधीयते ॥ २६० ॥
[नतं स्याज्जानुनमनात् क्षिप्तं विक्षेपणाद्बहिः।]
उद्वाहितं च विज्ञेयमूर्ध्वमुद्वाहनादिह ।
प्रतीपनयनं यत्तु परिवृत्तं तदुच्यते ॥ २६१ ॥

पदच्छेदः - आवर्तितं नतं क्षिप्तम् उद्वाहितम् अथ अपि वा ।
परिवृत्तं तथा च एव जङ्घाकर्माणि पञ्चधा ॥ २५८ ॥
वामः दक्षिणपार्श्वेन दक्षिणात् च अपि वामतः ।
पादो यत्र व्रजेत् विप्राः तत् आवर्तितम् उच्यते ॥ २५९ ॥
[जङ्घा-स्वस्तिक-योगेन क्रमात् आवर्तितं नयेत् ।]
जानुनः कुञ्चनात् च एव नतं ज्ञेयं प्रयोक्तृभिः
विक्षेपात् च अपि जङ्घायाः क्षिप्तम् इति अभिधीयते ॥ २६० ॥
[नतं स्यात् जानु-नमनात् क्षिप्तं विक्षेपणात् बहिः।]
उद्वाहितं च विज्ञेयम् ऊर्ध्वम् उद्वाहनात् इह ।
प्रतीपनयनं यत् तु परिवृत्तं तत् उच्यते ॥ २६१ ॥

अन्वयः - आवर्तितं नतं क्षिप्तम् उद्वाहितं परिवृत्तं च पञ्चधा जङ्घाकर्माणि । विप्राः, वामः दक्षिणपार्श्वेन दक्षिणात् च वामतः पादो यत्र व्रजेत् तत् आवर्तितम् उच्यते ।
[जङ्घास्वस्तिकयोगेन क्रमात् आवर्तितं नयेत् ।]
जानुनः कुञ्चनात् एव प्रयोक्तृभिः नतं ज्ञेयम् ।
जङ्घायाः विक्षेपात् क्षिप्तम् इति अभिधीयते ।
[ जानुनमनात् नतं स्यात् बहिः विक्षेपणात् क्षिप्तम्।]

ऊर्ध्वम् उद्वाहनात् इह उद्वाहितं च विज्ञेयम् |
यत् प्रतीपनयनं तत् परिवृत्तम् उच्यते |

अर्थ - पोटऱ्यांचे पाच भेद आहेत . १.आवर्तित २.नत ३.क्षिप्त, ४.उद्वाहित ५. परिवृत्त . हे ऋषींनो, जर डावा पाय उजवीकडे व उजवा पाय डावीकडे फिरवला तर त्यास 'आवर्तित' असे म्हणतात . (पोटऱ्या क्रमाने स्वस्तिक केल्यास त्याला आवर्तित असे म्हणतात . )

पोटऱ्या संकुचित केल्यास त्यास 'नत' असे म्हणतात .

पोटऱ्या बाहेरच्या बाजूला फेकल्यास 'क्षिप्त' असे म्हणतात . (गुडघे वाकविल्यास ती नत आणि बाहेरच्या बाजूला फेकल्यास ती 'क्षिप्त' पोटरी होय . )

पोटऱ्यांना वरच्या बाजूला उचलल्यास 'उद्वाहित' असे म्हणतात आणि मागच्या बाजूस नेल्यास 'परिवृत्त' होते .

❖ जंघाचे / पोटऱ्यांचे विनियोग ❖

आवर्तितं प्रयोक्तव्यं विदूषकपरिक्रमे |
नतं चापि हि कर्तव्यं स्थानासनगतादिषु || २६२ ||
क्षिप्तं व्यायामयोगेषु ताण्डवे च प्रयुज्यते |
तथा चोद्वाहितं कार्यमाविद्धगमनादिषु || २६३ ||
ताण्डवादौ प्रयोक्तव्यं परिवृत्तं प्रयोक्तृभि: |
इत्येवं जङ्घयो: कर्म पादयोस्तु निबोधत || २६४ ||

पदच्छेद: - आवर्तितं प्रयोक्तव्यं विदूषक-परिक्रमे |
नतं च अपि हि कर्तव्यं स्थान-आसन-गतादिषु || २६२ ||
क्षिप्तं व्यायाम-योगेषु ताण्डवे च प्रयुज्यते |
तथा च उद्वाहितं कार्यम् आविद्ध-गमनादिषु || २६३ ||
ताण्डव-आदौ प्रयोक्तव्यं परिवृत्तं प्रयोक्तृभि: |
इति एवं जङ्घयो: कर्म पादयो: तु निबोधत || २६४ ||

अन्वय : - विदूषकपरिक्रमे आवर्तितं प्रयोक्तव्यम् | स्थानासनगतादिषु नतं च कर्तव्यम् | व्यायामयोगेषु ताण्डवे च क्षिप्तं प्रयुज्यते | तथा च आविद्धगमनादिषु उद्वाहितं कार्यम् | प्रयोक्तृभि: ताण्डवादौ परिवृत्तं प्रयोक्तव्यम् | इति एवं जङ्घयो: कर्म (अधुना) पादयो: निबोधत |

अर्थ - विदूषकाने गोल फिरताना 'आवर्तित' पोटरीचा प्रयोग करावा .
स्थान , आसन आणि गमन दर्शण्यासाठी 'नत' पोटरीचा प्रयोग करावा .
व्यायाम योग आणि तांडवनृत्यामध्ये 'क्षिप्त' पोटरी वापरावी .
आविद्ध गमनामध्ये 'उद्वाहित' पोटरीचा वापर करावा .
तांडव प्रस्तुत करण्यासाठी 'परिवृत्त' पोटरी वापरावी .
मी तुम्हांला पोटरींचा विनियोग सांगितला . आता मी पायाचे भेद सांगतो .

### ❖ पादप्रचार (पायाचे प्रकार) ❖

उद्घट्टित: समश्चैव तथाग्रतलसञ्चर: |
अञ्चित: कुञ्चितश्चैव पाद: पञ्चविध: स्मृत: || २६५ ||

पदच्छेद : - उद्घट्टित : सम : च एव तथा अग्रतलसञ्चर : |
अञ्चित : कुञ्चित : च एव पाद : पञ्चविध : स्मृत : || २६५ ||

अन्वय : - उद्घट्टित : सम : अग्रतलसञ्चर : अञ्चित : कुञ्चित : च पाद : पञ्चविध : स्मृत : |

अर्थ - पादप्रचाराचे पाच भेद आहेत . १. उद्घट्टित , २. सम, ३. अग्रतलसंचर, ४. अंचित आणि ५. कुंचित .

### ❖ उद्घट्टित पादाचे लक्षण आणि विनियोग ❖

स्थित्वा पादतलाग्रेण पार्ष्णिर्भूमौ निपात्यते |
यस्य पादस्य करणे भवेदुद्घट्टितस्तु स: || २६६ ||
अयमुद्वेष्टितकरणेष्वनुकरणार्थं प्रयोगमासाद्य |
द्रुतमध्यमप्रचार: सकृदसकृद्वा प्रयोक्तव्य: || २६७ ||

पदच्छेद : - स्थित्वा पादतल-अग्रेण पार्ष्णि : भूमौ निपात्यते |
यस्य पादस्य करणे भवेत् उद्‌घट्टित : तु स : || २६६ ||
अयम् उद्वेष्टित-करणेषु अनुकरणार्थं प्रयोगम् आसाद्य |
द्रुत-मध्यम-प्रचार : सकृत् असकृत् वा प्रयोक्तव्य : || २६७ ||

अन्वय : - यस्य पादस्य करणे पादतलाग्रेण स्थित्वा पार्ष्णि : भूमौ निपात्यते स :उद्‌घट्टित : भवेत् | उद्वेष्टितकरणेषु प्रयोगम् आसाद्य अनुकरणार्थं द्रुतमध्यमप्रचार : अयम् सकृत् असकृत् वा प्रयोक्तव्य : |

अर्थ - पायाच्या पंज्यावर उभे राहून टाचांनी भूमीवर स्पर्श करत राहणे यास 'उद्‌घट्टित पाद' म्हणतात . याचा उपयोग उद्वेष्टित करणामध्ये प्रयोगानुसार अनुकरण करण्यासाठी होतो . तसेच एक किंवा अनेक वेळा द्रुत आणि मध्य गतीमध्ये याचा वापर करावा .

❖ समपादाचे लक्षण आणि विनियोग ❖

स्वभावरेचितो भूमौ समस्थाने च यो भवेत् |
समपाद : स विज्ञेय : स्वभावाभिनयाश्रय : || २६८ ||
स्थिर : स्वभावाभिनये नानाकरणसंश्रये |
चलितश्च पुन : कार्यो विधिज्ञै : पादरेचिते || २६९ ||

पदच्छेद : - स्वभावरेचित : भूमौ समस्थाने च य : भवेत् |
समपाद : स : विज्ञेय : स्वभाव-अभिनय-आश्रय : || २६८ ||
स्थिर : स्वभाव-अभिनये नाना-करण-संश्रये |
चलित : च पुन : कार्य : विधिज्ञै : पादरेचिते || २६९ ||

अन्वय : - य : स्वभावरेचित : (पाद :) भूमौ समस्थाने च भवेत् स : स्वभावाभिनयाश्रय : समपाद : विज्ञेय : | स्थिर : स्वभावाभिनये नानाकरणसंश्रये (विनियोज्य :)| विधिज्ञै : पादरेचिते चलित : च पुन : कार्य : |

अर्थ - स्वाभाविकरीत्या तळवे सम ठेवून भूमीवर दोन्ही पाय समान स्थितीत ठेवल्यास त्यास 'समपाद' असे म्हणतात . याचा वापर स्वाभाविक अभिनयासाठी केला जातो . विविध

करणांनी युक्त स्वाभाविक स्थिती प्रदर्शित करण्यासाठी ,स्थिरत्व दाखविण्यासाठी समपाद ठेवले पाहिजेत आणि रेचक अवस्थेला प्रदर्शित करण्यासाठी चलित अवस्थेत ठेवले पाहिजेत .

❖ त्र्यश्रपादाचे लक्षण आणि विनियोग ❖

समस्यैव यदा पार्ष्णि: पादस्याभ्यन्तरे भवेत् |
बहि: पार्श्वस्थितोऽङ्गुष्ठस्त्र्यश्रपादस्तु स स्मृत: || २७० ||
त्यक्त्वा (कृत्वा?) समपदं स्थानमश्वक्रान्ते तथैव च |
स्याद्विक्लवादिष्वर्थेषु त्र्यश्र: पादो यथाविधि || २७१ ||

पदच्छेद: - समस्य एव यदा पार्ष्णि: पादस्य अभ्यन्तरे भवेत् |
बहि: पार्श्वस्थित: अङ्गुष्ठ: त्र्यश्रपाद: तु स: स्मृत: || २७० ||
कृत्वा समपदं स्थानम् अश्वक्रान्ते तथा एव च |
स्यात् विक्लव-आदिषु अर्थेषु त्र्यश्र: पाद: यथाविधि || २७१ ||

अन्वय: - यदा समस्य पादस्य एव पार्ष्णि: अभ्यन्तरे भवेत् बहि: पार्श्वस्थित: अङ्गुष्ठ: स: त्र्यश्रपाद: स्मृत: | अश्वक्रान्ते समपदं स्थानं कृत्वा विक्लवादिषु अर्थेषु त्र्यश्र: पाद: यथाविधि स्यात् |

अर्थ - समपादामध्येच टाच पायाच्या आत नेली जाते आणि अंगठा (बोटे) बाहेरच्या बाजूला नेल्यास त्याला 'त्र्यश्रपाद' म्हटले जाते . अश्वक्रांतस्थान करण्यासाठी समपाद करून विक्लव (गोंधळणे) इ . भावांच्या अभिव्यक्तीसाठी 'त्र्यश्रपादा' चा विधिवत प्रयोग करावा .

❖ त्र्यश्रपादाचे अन्य लक्षण आणि विनियोग ❖

अस्यैव समपादस्य पार्ष्णिरभ्यन्तरे भवेत् |
त्र्यश्रपाद: स विज्ञेय: स्थानकादिषु संश्रय: || २७२ ||

पदच्छेद: - अस्य एव समपादस्य पार्ष्णि: अभ्यन्तरे भवेत् |
त्र्यश्रपाद: स: विज्ञेय: स्थानक-आदिषु संश्रय: || २७२ ||

अन्वय: - अस्य एव समपादस्य पार्ष्णि: अभ्यन्तरे भवेत् | स्थानकादिषु संश्रय: स: त्र्यश्रपाद: विज्ञेय:|

अर्थ - समपादामध्ये पायाची टाच आतल्या बाजूला आणि पंजा बाहेर नेल्यास त्याला 'त्र्यश्रपाद' असे म्हणतात . याचा वापर स्थानक इत्यादींसाठी केला गेला पाहिजे .

## ❖ अग्रतलसंचर पादाचे लक्षण आणि विनियोग ❖

उत्क्षिप्ता तु भवेत्पार्ष्णि: प्रसृतोऽङ्गुष्ठकस्तथा |
अङ्गुल्यश्चाञ्चिता: सर्वा: पादेऽग्रतलसञ्चर: || २७३ ||

पदच्छेद: - उत्क्षिप्ता तु भवेत् पार्ष्णि: प्रसृत: अङ्गुष्ठक: तथा|
अङ्गुल्य :च अञ्चिता: सर्वा: पादे अग्रतलसञ्चर: || २७३ ||

अन्वय: - (यदा) पार्ष्णि: उत्क्षिप्ता भवेत् तथा अङ्गुष्ठक: प्रसृत: सर्वा: अङ्गुल्य: च अञ्चिता: पादे अग्रतलसञ्चर:|

अर्थ - जेव्हा टाच उचललेली असते, अंगठा जरासा प्रसारित केलेला असतो आणि पायाची बोटे जमिनीवर वाकविलेली असतात तेव्हा त्यास 'अग्रतलसंचर' पाद असे म्हणतात .

तोदननिकुट्टने स्थितनिशुम्भने भूमिताडने भ्रमणे |
विक्षेपविविधरेचकपार्ष्णिकृतागमनमेतेन || २७४ ||

पदच्छेद: - तोदन-निकुट्टने स्थित-निशुम्भने भूमि-ताडने भ्रमणे|
विक्षेप-विविध-रेचक-पार्ष्णि-कृत-आगमनम् एतेन || २७४ ||

अन्वय: - तोदननिकुट्टने स्थितनिशुम्भने भूमिताडने भ्रमणे विक्षेपविविधरेचक-पार्ष्णिकृतागमनम् (एतेन पादेन कर्तव्यम् )|

अर्थ - प्रेरणा, कुटणे, स्थित राहणे,ठोकर लागणे, भूमीवर आपटणे,भ्रमण करणे, काहीतरी वस्तू फेकणे , विविध रेचक करणे, गतीमध्ये टाचेवर जोर देणे यासाठी अग्रतलसंचर पादाचा वापर करावा .

### ❖ अंचितपादाचे लक्षण आणि विनियोग ❖

पार्ष्णिर्यस्य स्थिता भूमौ पादमग्रतलं तथा |
अङ्गुल्यश्चाञ्चिताः सर्वाः स पादोऽञ्चित उच्यते || २७५ ||

पदच्छेदः - पार्ष्णिः यस्य स्थिता भूमौ पादम् अग्रतलं तथा |
अङ्गुल्यः च अञ्चिताः सर्वाः सः पादः अञ्चितः उच्यते || २७५ ||

अन्वयः - यस्य पार्ष्णिः भूमौ स्थिता तथा पादम् अग्रतलं सर्वाः अङ्गुल्यः च अञ्चिताः सः पादः अञ्चितः उच्यते |

अर्थ - टाच जमिनीवर ठेवून पायाची बोटे वरच्या बाजूला नेऊन कुंचित (आखुडती)केल्यास 'अंचित पाद' असे म्हणतात .

पादाग्रतस्थितसञ्चारे वर्तितोद्वर्तिते तथा |
एष पादाहते कार्यो नानाभ्रमरकेषु च || २७६ ||

पदच्छेदः - पाद-अग्रत-स्थित-सञ्चारे वर्तित-उद्वर्तिते तथा |
एषः पाद-आहते कार्यः नाना-भ्रमरकेषु च || २७६ ||

अन्वयः - पादाग्रतस्थित-सञ्चारे वर्तितोद्वर्तिते तथा पादाहते नानाभ्रमरकेषु च एषः कार्यः |

अर्थ - पायाच्या टाचेवर उभे राहून चालण्यासाठी, कुठल्यातरी बाजूला फिरण्यासाठी आणि परत येण्यासाठी, पाय आपटण्यासाठी तसेच विविध प्रकारच्या भ्रमरीचारी प्रदर्शित करण्यासाठी 'अंचित पाद' वापरावा .

### ❖ कुंचितपादाचे लक्षण आणि विनियोग ❖

उत्क्षिप्ता यस्य पार्ष्णिः स्यादङ्गुल्यः कुञ्चितास्तथा |
तथाकुञ्चितमध्यश्च स पादः कुञ्चितः स्मृतः || २७७ ||
उदात्तगमने चैव वर्तितोद्वर्तिते तथा |
अतिक्रान्तक्रमे चैव पादमेतं प्रयोजयेत् |

पदच्छेद : - उत्क्षिप्ता यस्य पार्ष्णि : स्यात् अङ्गुल्य : कुञ्चिता : तथा |
तथा आकुञ्चित-मध्य : च स : पाद : कुञ्चित : स्मृत : || २७७ ||
उदात्तगमने च एव वर्तित-उद्वर्तिते तथा |
अतिक्रान्त-क्रमे च एव पादम् एतं प्रयोजयेत् |

अन्वय : - यस्य पार्ष्णि : उत्क्षिप्ता स्यात् अङ्गुल्य : कुञ्चिता : | तथा च आकुञ्चितमध्य : स : पाद : कुञ्चित : स्मृत : | उदात्तगमने वर्तितोद्वर्तिते तथा अतिक्रान्तक्रमे एतं पादं प्रयोजयेत् |

अर्थ - टाच वरच्या बाजूला उचललेली आणि बोटे आखुडलेली आणि पायाचा मधला भाग वाकविलेला असेल त्यास 'कुंचितपाद ' म्हणतात . उदात्त लोकांचे चालणे (शिष्टजन), सरळ चालणे आणि गोल फिरणे, परत येणे आणि अतिक्रांतचारीमध्ये कुंचितपादाचा वापर करावा .

## ❖ सूचीपादाचे लक्षण आणि विनियोग ❖

उत्क्षिप्ता तु भवेत्पार्ष्णिरङ्गुष्ठाग्रेण संस्थित: || २७८ ||
वामश्चैव स्वभावस्थ: सूचीपाद: प्रकीर्तित: |
नृत्ते नूपुरकरणे प्रयोगस्तस्य कीर्तित: || २७९ ||

पदच्छेद : - उत्क्षिप्ता तु भवेत् पार्ष्णि : अङ्गुष्ठाग्रेण संस्थित : || २७८ ||
वाम : च एव स्वभावस्थ : सूचीपाद : प्रकीर्तित : |
नृत्ते नूपुरकरणे प्रयोग : तस्य कीर्तित : || २७९ ||

अन्वय : - पार्ष्णि: उत्क्षिप्ता भवेत् अङ्गुष्ठाग्रेण संस्थित: | वाम: च स्वभावस्थ: सूचीपाद: प्रकीर्तित : |
नृत्ते नूपुरकरणे तस्य प्रयोग : कीर्तित : |

अर्थ - जेव्हा उजव्या पायाची टाच उचललेली असते, पायाची बोटे अंगठ्यावर टेकवलेली असतात, डावा पाय स्वाभाविक अवस्थेत मध्ये सरळ उभा ठेवलेला असतो त्यास 'सूचीपाद' असे म्हणतात . नृत्तामध्ये आणि घुंगरू धारण करण्यासाठी तसेच अतिक्रांता चारीमध्ये या पादाचा वापर करावा .

## ❖ पाय, पोटऱ्या आणि मांड्या यांचा प्रयोग आणि पादचारी ❖

पादजङ्घोरुकरणं समं कार्यं प्रयोक्तृभिः ॥ २८० ॥
पादस्य करणे सर्वं जङ्घोरुकृतमिष्यते ।
यथा पादः प्रवर्तेत तथैवोरुः प्रवर्तते ॥ २८१ ॥
तयोः समानकरणात् पादचारी प्रयोजयेत् ।
इत्येतदङ्गजं प्रोक्तं लक्षणं चैव कर्म हि ॥ २८२ ॥
अतः परं प्रवक्ष्यामि चारीव्यायामलक्षणम् ॥ २८३ ॥

पदच्छेदः - पाद-जङ्घा-ऊरु-करणं समं कार्यं प्रयोक्तृभिः ॥ २८० ॥
पादस्य करणे सर्वं जङ्घा-ऊरु-कृतम् इष्यते ।
यथा पादः प्रवर्तेत तथा एव ऊरुः प्रवर्तते ॥ २८१ ॥
तयोः समान-करणात् पादचारी प्रयोजयेत् ।
इति एतत् अङ्गजं प्रोक्तं लक्षणं च एव कर्म हि ॥ २८२ ॥
अतः परं प्रवक्ष्यामि चारी-व्यायाम-लक्षणम् ॥ २८३ ॥


अन्वयः - प्रयोक्तृभिः पादजङ्घोरुकरणं समं कार्यम् । पादस्य करणे सर्वं जङ्घोरुकृतम् इष्यते । यथा पादः प्रवर्तेत तथा एव ऊरुः प्रवर्तते । तयोः समानकरणात् पादचारी प्रयोजयेत् । इति एतत् अङ्गजं लक्षणं कर्म च प्रोक्तम् । अतः परं चारीव्यायामलक्षणं प्रवक्ष्यामि ।

अर्थ - नाट्यप्रयोग करणाऱ्यांनी पाय, पोटऱ्या, मांड्या यांच्या क्रिया एकत्रितपणेच कराव्यात. कारण पायांच्या क्रियेमध्ये पोटऱ्या आणि मांड्या समाविष्टच आहे. कारण पाय जिकडे फिरणार तिकडेच मांडी फिरणार. त्यामुळे या दोहोंच्या समान गतीनेच पादचारींची निर्मिती होते. येथे मी विविध अंगांची लक्षणे व विनियोग सांगितले आहेत. आता मी चारींचे भेद व त्यांची लक्षणे सांगणार आहे.

|| इति भारतीये नाट्यशास्त्रे अङ्गाभिनयः नाम नवमः अध्यायः ||

|| अशा प्रकारे भरतमुनिविरचित नाट्यशास्त्रातील 'अंगाभिनय' नावाचा नववा अध्याय समाप्त ||

# दहावा अध्याय
# चारीविधान



# दहावा अध्याय

## चारीविधान

### ❖ 'चारी'चे लक्षण ❖

[एवं पादस्य जङ्घाया ऊरो: कट्यास्तथैव च |
समानकरणे चेष्टा चारीति परिकीर्तिता ||] १ ||

पदच्छेद: - [एवं पादस्य जङ्घाया: ऊरो: कट्या: तथा एव च |
समानकरणे चेष्टा चारी इति परिकीर्तिता ||] १ ||

अन्वय: - एवं पादस्य जङ्घाया: ऊरो: तथैव कट्या: च समानकरणे (या) चेष्टा सा चारी इति परिकीर्तिता |

अर्थ - अशा प्रकारे पाय, पोटऱ्या, मांडी आणि कंबर इत्यादी अंगांच्या एकत्रित हालचालींना 'चारी' असे म्हणतात.

### ❖ व्यायाम ❖

विधानोपगताश्चार्यो व्यायच्छन्ते परस्परम् |
यस्मादङ्गसमायुक्तास्तस्माद्व्यायाम उच्यते || २ ||

पदच्छेद: - विधान-उपगता: चार्य: व्यायच्छन्ते परस्परम् |
यस्मात् अङ्ग-समायुक्ता: तस्मात् व्यायाम: उच्यते || २ ||

अन्वय: - यस्मात् विधानोपगता: अङ्गसमायुक्ता: चार्य: परस्परं व्यायच्छन्ते तस्मात् 'व्यायाम:' (इति) उच्यते |

अर्थ - या 'चारी' पूर्वी निर्दिष्ट केलेल्या असून त्या (हात, पाय, कंबर इ.)विविध अंगांनी युक्त असतात. त्या परस्परांशी निगडीत असतात म्हणून चारींना 'व्यायाम' देखील म्हणतात.

### ❖ चारी-करण-खंड-मंडल यांची लक्षणे ❖

एकपादप्रचारो यः सा चारीत्यभिसंज्ञिता |
द्विपादक्रमणं यत्तु करणं नाम तद्भवेत् || ३ ||
करणानां समायोगः खण्ड इत्यभिधीयते |
खण्डैस्त्रिभिश्चतुर्भिर्वा संयुक्तैर्मण्डलं भवेत् || ४ ||

पदच्छेदः - एकपाद-प्रचारः यः सा चारी इति अभिसंज्ञिता |
द्विपाद-क्रमणं यत् तु करणं नाम तत् भवेत् || ३ ||
करणानां समायोगः खण्डः इति अभिधीयते |
खण्डैः त्रिभिः चतुर्भिः वा संयुक्तैः मण्डलं भवेत् || ४ ||

अन्वयः - यः एकपादप्रचारः सा 'चारी' इति अभिसंज्ञिता | यत् द्विपादक्रमणं तत् नाम 'करणं' भवेत् | करणानां समायोगः 'खण्डः' इति अभिधीयते | त्रिभिः चतुर्भिः वा खण्डैः संयुक्तैः 'मण्डलं' भवेत् |

अर्थ - एका पायाने केल्या जाणाऱ्या प्रकारास 'चारी' असे म्हणतात .
दोन पायांनी केल्या जाणाऱ्या गतीस 'करण' असे म्हणतात .
करणांच्या योगाने मिळून एक 'खंड' होतो आणि
तीन किंवा चार खंड एकत्रित केल्याने 'मंडल' होतो .

### ❖ चारींचे महत्त्व आणि उपयुक्तता ❖

चारीभिः प्रसृतं नृत्तं चारीभिश्चेष्टितं तथा |
चारीभिः शस्त्रमोक्षश्च चार्यो युद्धे च कीर्तिताः || ५ ||

पदच्छेदः - चारीभिः प्रसृतं नृत्तं चारीभिः चेष्टितं तथा |
चारीभिः शस्त्रमोक्षः च चार्यः युद्धे च कीर्तिताः || ५ ||

अन्वयः - नृत्तं चारीभिः प्रसृतं तथा चारीभिः चेष्टितम् | चारीभिः शस्त्रमोक्षः चार्यः युद्धे कीर्तिताः च |

अर्थ - नृत्त हे चारींनी व्याप्त आहे . चारींद्वारेच हालचाली, गती इ . केल्या जातात . तसेच शस्त्र उगारणे आणि युद्ध करण्यासाठी सुद्धा चारींचा वापर होतो .

यदेतत्प्रस्तुतं नाट्यं तच्चारीष्वेव संस्थितम् |
न हि चार्या विना किंचिन्नाट्येऽङ्गं संप्रवर्तते || ६ ||

पदच्छेद : - यत् एतत् प्रस्तुतं नाट्यं तत् चारीषु एव संस्थितम् |
न हि चार्या विना किंचित् नाट्ये अङ्गं संप्रवर्तते || ६ ||

अन्वय : - यत् एतत् नाट्यं प्रस्तुतं तत् चारीषु एव संस्थितम् | नाट्ये चार्या विना किञ्चित् अङ्गं न हि संप्रवर्तते |

अर्थ - नाट्यस्वरूपामध्ये जे काही वर्णन केले, ते सर्व चारींमध्येच समाविष्ट आहे . कारण नाट्याचा कुठलाही विभाग चारींशिवाय होणे शक्य नाही .

तस्माच्चारीविधानस्य संप्रवक्ष्यामि लक्षणम् |
या यस्मिंस्तु यथा योज्या नृत्ते युद्धे गतौ तथा || ७ ||

पदच्छेद : - तस्मात् चारी-विधानस्य संप्रवक्ष्यामि लक्षणम् |
या यस्मिन् तु यथा योज्या नृत्ते युद्धे गतौ तथा || ७ ||

अन्वय : - तस्मात् चारीविधानस्य लक्षणं संप्रवक्ष्यामि | या यस्मिन् नृत्ते युद्धे गतौ यथा योज्या तथा |

अर्थ - आता मी त्या सर्व चारींची लक्षणे सांगणार आहे . ज्याचा वापर नृत्य, गती तसेच युद्धामध्ये केला जातो .

समपादा स्थितावर्ता शकटास्या तथैव च |
अध्यर्धिका चाषगतिर्विच्यवा च तथापरा || ८ ||
एडकाक्रीडिता बद्धा ऊरूद्वृत्ता तथाड्डिता |
उत्स्पन्दिताथ जनिता स्यन्दिता चापस्यन्दिता || ९ ||

समोत्सारितमत्तल्ली मत्तल्ली चेति षोडश |
एता भौम्य: स्मृताश्चार्य: शृणुताकाशिकी: पुन: || १० ||

पदच्छेद: - समपादा स्थितावर्ता शकटास्या तथा एव च |
अध्यर्धिका चाषगति: विच्यवा च तथा अपरा || ८ ||
एडकाक्रीडिता बद्धा ऊरूद्वृत्ता तथा अड्डिता |
उत्स्पन्दिता अथ जनिता स्यन्दिता च अपस्यन्दिता || ९ ||
समोत्सारित-मत्तल्ली मत्तल्ली च इति षोडश |
एता: भौम्य: स्मृता: चार्य: शृणुत आकाशिकी: पुन:|| १० ||

अन्वय: - समपादा, स्थितावर्ता, शकटास्या,अध्यर्धिका, चाषगति:, विच्यवा, एडकाक्रीडिता, बद्धा, ऊरूद्वृत्ता, अड्डिता, उत्स्पन्दिता, जनिता, स्यन्दिता, अपस्यन्दिता, समोत्सारितमत्तल्ली, मत्तल्ली च इति एता: षोडश भौम्य: चार्य: स्मृता: | पुन: आकाशिकी: शृणुत |

अर्थ - भौमी चारीचे सोळा प्रकार आहेत. १. समपादा, २. स्थितावर्ता, ३. शकटास्या, ४.अध्यर्धिका, ५. चाषगति, ६. विच्यवा (विच्युता), ७. एडकाक्रीडिता, ८. बद्धा, ९.ऊरूद्वृत्ता, १०. अड्डिता (अंगिता), ११. उत्स्पंदिता (उत्स्यंदिता), १२. जनिता, १३. स्पंदिता, १४. अपस्पंदिता, १५. समोत्सारितामत्तली तसेच, १६. मत्तली यापुढे आकाशिकी चारींविषयी ऐकावे.

### ❖ आकाशिकी चारी ❖

अतिक्रान्ता ह्यपक्रान्ता पार्श्वक्रान्ता तथैव च |
ऊर्ध्वजानुश्च सूची च तथा नूपुरपादिका || ११ ||
डोलपादा तथाक्षिप्ता आविद्धोद्वृत्तसंज्ञिते |
विद्युद्भ्रान्ता ह्यलाता च भुजङ्गत्रासिता तथा || १२ ||
मृगप्लुता च दण्डा च भ्रमरी चेति षोडश |
आकाशिक्य: स्मृता ह्येता लक्षणं च निबोधत || १३ ||

पदच्छेद : - अतिक्रान्ता हि अपक्रान्ता पार्श्वक्रान्ता तथा एव च |
ऊर्ध्वजानु : च सूची च तथा नूपुरपादिका || ११ ||
डोलपादा तथा आक्षिप्ता आविद्धा उद्वृत्तसंज्ञिते |
विद्युद्भ्रान्ता हि अलाता च भुजङ्गत्रासिता तथा || १२ ||
मृगप्लुता च दण्डा च भ्रमरी च इति षोडश |
आकाशिक्य : स्मृता हि एता : लक्षणं च निबोधत || १३ ||

अन्वय : - अतिक्रान्ता, अपक्रान्ता, पार्श्वक्रान्ता, ऊर्ध्वजानु, सूची, नूपुरपादिका, डोलपादा, आक्षिप्ता, आविद्धा, उद्वृत्ता, विद्युद्भ्रान्ता, अलाता, भुजङ्गत्रासिता, मृगप्लुता, दण्डा, भ्रमरी च इति एता : षोडश आकाशिक्य : स्मृता : | लक्षणं निबोधत च |

अर्थ - आकाशिकी चारींचे सोळा प्रकार आहेत . १.अतिक्रांता २.अपक्रांता, ३.पार्श्वक्रांता, ४. ऊर्ध्वजानू, ५.सूची, ६.नूपुरपादिका, ७.डोलपादा, ८. आक्षिप्ता, ९. आविद्धा, १०.उद्वृत्ता, ११.विद्युद्भ्रांता, (विद्युत्क्रांता), १२.अलाता, १३. भुजंगत्रासिता, १४. हरिणप्लुता (मृगप्लुता), १५. दंडा (दंडपादा) आणि १६.भ्रमरी .
आता क्रमाने मी त्यांची लक्षणे सांगत आहे .

❖ भौमी चारींची लक्षण ❖

❖ समपादाचारी ❖

पदैर्निरन्तरकृतैस्तथा समनखैरपि |
समपादा तु सा चारी विज्ञेया स्थानसंश्रया || १४ ||

पदच्छेद : - पदै : निरन्तरकृतै : तथा समनखै : अपि |
समपादा तु सा चारी विज्ञेया स्थानसंश्रया || १४ ||

अन्वय : - निरन्तरकृतै : पदै : तथा समनखै : स्थानसंश्रया अपि सा समपादा चारी विज्ञेया |

अर्थ - निरंतर एकानंतर एक दोन्ही पाय जवळ ठेवून अंगठ्याची नखे एकमेकांना जुळवलेली असतील तर तिला 'समपादा चारी' असे म्हणतात .

### ❖ स्थितावर्ताचारी ❖

भूमिघृष्टेन पादेन कृत्वाभ्यन्तरमण्डलम् |
पुनरुत्सादयेदन्यं स्थितावर्ता तु सा स्मृता || १५ ||

पदच्छेद: - भूमिघृष्टेन पादेन कृत्वा आभ्यन्तर-मण्डलम् |
पुन: उत्सादयेत् अन्यं स्थितावर्ता तु सा स्मृता || १५ ||

अन्वय: - भूमिघृष्टेन पादेन आभ्यन्तरमण्डलं कृत्वा पुन: अन्यम् उत्सादयेत् | सा तु स्थितावर्ता स्मृता |

अर्थ - जेव्हा एक अग्रतल संचरपाय भूमीवर घासून आतल्या बाजूला गोलाकार फिरवला जातो आणि तो स्वस्तिक स्थितीत ठेवला जातो . नंतर दुसरा पाय दूर नेला जातो तेव्हा या चारीला 'स्थितावर्ता चारी' असे म्हणतात .

### ❖ शकटास्याचारी ❖

निषण्णाङ्गस्तु चरणं प्रसार्य तलसञ्चरम् |
उद्वाहितमुर: कृत्वा शकटास्यां प्रयोजयेत् || १६ ||

पदच्छेद: - निषण्ण-अङ्ग: तु चरणं प्रसार्य तलसञ्चरम् |
उद्वाहितम् उर: कृत्वा शकटास्यां प्रयोजयेत् || १६ ||

अन्वय: - निषण्णाङ्ग: तलसञ्चरं चरणं प्रसार्य उर: उद्वाहितं कृत्वा शकटास्यां प्रयोजयेत् |

अर्थ - शरीराचा वरचा भाग म्हणजे पूर्वभाग प्रयत्नपूर्वक धरून ठेवला व एक अग्रतल संचर पाद प्रसारित केला आणि छाती उद्वाहित स्थितीत ठेवली तर या चारीला 'शकटास्या चारी' असे म्हणतात .

### ❖ अध्यर्धिकाचारी ❖

सव्यस्य पृष्ठतो वामश्चरणस्तु यदा भवेत् |
तस्यापसर्पणं चैव ज्ञेया साध्यर्धिका बुधै: || १७ ||

पदच्छेद: - सव्यस्य पृष्ठत: वाम: चरण: तु यदा भवेत् |
तस्य अपसर्पणं च एव ज्ञेया सा अध्यर्धिका बुधै: || १७ ||

अन्वयः - यदा सव्यस्य पृष्ठतः वामः चरणः (भवेत्) तस्य अपसर्पणं भवेत् च (तदा)सा बुधैः अध्यर्धिका ज्ञेया|

अर्थ - उजव्या पायाच्या टाचेवर डावा पाय ठेवून मग उजवा पाय अपसर्पित केला जातो . अशा वेळी दोन्ही पायांमध्ये दीड ताल अंतर असले पाहिजे . या चारीस 'अध्यर्धिका चारी' असे म्हणतात .

## ❖ चाषगतिचारी ❖

पादः प्रसारितः सव्यः पुनश्चैवापसर्पितः|
वामः सव्यापसर्पी वा चाषगत्यां विधीयते ‖ १८ ‖

पदच्छेदः - पादःप्रसारितःसव्यःपुनःच एव अपसर्पितः|
वामःसव्य-अपसर्पी वा चाषगत्यां विधीयते ‖ १८ ‖

अन्वयः - सव्यःपादः प्रसारितःपुनःच अपसर्पितः (भवेत्), वामःसव्यापसर्पी वा (भवेत्) तत् चाषगत्यां विधीयते|

अर्थ - उजवा पाय प्रसारित करून मग अपसर्पण करावा आणि त्याच वेळी डावा पाय मागून परत पुढे आणावा . या चारीस 'चाषगतिचारी' म्हणतात .

## ❖ विच्यवाचारी ❖

विच्यवात्समपादाया विच्यवां सप्रयोजयेत्|
निकुट्टयंस्तलाग्रेण पादस्य धरणीतलम् ‖ १९ ‖

पदच्छेदः - विच्यवात् समपादायाः विच्यवां संप्रयोजयेत्|
निकुट्टयन् तलाग्रेण पादस्य धरणीतलम् ‖ १९ ‖

अन्वयः - समपादायाः विच्यवात् पादस्य तलाग्रेण धरणीतलं निकुट्टयन् विच्यवां सम्प्रयोजयेत्|

अर्थ - समपादा चारीमधील दोन्ही पाय वेगवेगळे करून पायाच्या अग्रभागाने जमिनीवर कुट्टन केल्यास त्यास 'विच्यवा चारी' असे म्हणतात .

### ❖ एडकाक्रीडिताचारी ❖

तलसञ्चरपादाभ्यामुत्प्लुत्य पतनं तु यत् |
पर्यायशश्च क्रियते एडकाक्रीडिता तु सा || २० ||

पदच्छेद :- तलसञ्चर-पादाभ्याम् उत्प्लुत्य पतनं तु यत् |
पर्यायश : च क्रियते एडकाक्रीडिता तु सा || २० ||

अन्वय : - तलसञ्चरपादाभ्याम् पर्यायश : उत्प्लुत्य यत् पतनं क्रियते सा तु एडकाक्रीडिता |

अर्थ - दोन्ही पाय अग्रतल ठेवून क्रमाक्रमाने वर उडवून जमिनीवर आपटल्यास त्यास 'एडकाक्रीडिता चारी' असे म्हणतात .

### ❖ बद्धाचारी ❖

अन्योन्यजङ्घासंवेधात्कृत्वा तु स्वस्तिकं तत: |
ऊरुभ्यां वलनं यस्मात्सा बद्धा चार्युदाहृता || २१ ||

पदच्छेद :- अन्योन्यजङ्घा-संवेधात् कृत्वा तु स्वस्तिकं तत : |
ऊरुभ्यां वलनं यस्मात् सा बद्धा चारी उदाहृता || २१ ||

अन्वय : - यस्मात् अन्योन्यजङ्घासंवेधात् स्वस्तिकं कृत्वा तत: ऊरुभ्यां वलनं (भवेत्) सा बद्धा चारी उदाहृता |

अर्थ - दोन्ही पायांच्या पोटऱ्या एकमेकांशी 'संवेध' (स्वस्तिक) करून ऊरूंचे वलन केल्यास त्यास 'बद्धा चारी' असे म्हणतात .

### ❖ ऊरूद्वृत्ताचारी ❖

तलसञ्चरपादस्य पार्ष्णिर्बाह्योन्मुखी यदा |
जङ्घाञ्चिता तथोद्वृत्ता ऊरूद्वृत्तेति सा स्मृता || २२ ||

पदच्छेद :- तलसञ्चर-पादस्य पार्ष्णि : बाह्योन्मुखी यदा |
जङ्घा अञ्चिता तथा उद्वृत्ता ऊरूद्वृत्ता इति सा स्मृता || २२ ||

अन्वय : - यदा तलसञ्चरपादस्य पार्ष्णि : बाह्योन्मुखी तथा उद्वृत्ता (भवेत्) सा ऊरूद्वृत्ता इति स्मृता|

अर्थ - अग्रतल पायाची टाच बाहेरच्या बाजूला उन्मुख ठेवून आणि पोटऱ्या वाकवून उद्वृत्त केल्यास त्यास 'ऊरूद्वृत्ता चारी' असे म्हणतात .

❖ अड्डिताचारी ❖

अग्रत: पृष्ठतो वापि पादोऽग्रतलसञ्चर: |
द्वितीयपादनिर्घृष्टो यस्यां स्यादड्डिता तु सा || २३ ||

पदच्छेद : - अग्रत : पृष्ठत : वा अपि पाद : अग्रतलसञ्चर : |
द्वितीयपादनिर्घृष्ट: यस्यां स्यात् अड्डिता तु सा || २३ ||

अन्वय : - यस्याम् अग्रतलसञ्चर: पाद: अग्रत: पृष्ठत: वा (भवेत्) द्वितीयपादनिर्घृष्ट: च (भवेत्) सा तु अड्डिता स्यात्|

अर्थ - अग्रतल संचर पाय पुढे किंवा मागे ठेवून संचार केल्यास व दुसऱ्या पायाला जमिनीवर घर्षण करीत ठेवल्यास त्यास 'अड्डिता (अंगिता )चारी' असे म्हणतात .

❖ उत्स्पंदिताचारी ❖

शनै: पादो निवर्तेत बाह्येनाभ्यन्तरेण च |
यद्रेचकानुसारेण सा चार्युत्स्पन्दिता स्मृता || २४ ||

पदच्छेद : - शनै : पाद : निवर्तेत बाह्येन अभ्यन्तरेण च |
यत् रेचक-अनुसारेण सा चारी उत्स्पन्दिता स्मृता || २४ ||

अन्वय : - यत् रेचकानुसारेण पाद : शनै : बाह्येन अभ्यन्तरेण निवर्तेत, सा उत्स्यन्दिता चारी स्मृता |

अर्थ - जेव्हा रेचकानुसार दोन्ही पायांना हळूहळू क्रमाने आत बाहेर आणले केले जाते . अर्थात दोन्ही पायांचे हळूहळू आत-बाहेर येणे-जाणे होते, त्यास 'उत्स्पंदिता चारी' असे म्हणतात .

❖ जनिताचारी ❖

मुष्टिहस्तश्च वक्षस्थ: करोऽन्यश्च प्रवर्तित: |
तलसञ्चरपादश्च जनिता चार्युदाहृता || २५ ||

पदच्छेद : - मुष्टिहस्त : च वक्षस्थ : कर : अन्य : च प्रवर्तित : |
तलसञ्चरपाद : च जनिता चारी उदाहृता || २५ ||

अन्वय : - मुष्टिहस्त: वक्षस्थ:, अन्य: कर: प्रवर्तित:, तलसञ्चरपाद: च सा जनिता चारी उदाहृता |

अर्थ - एक मुष्टिहस्त वक्ष:स्थलावर असतो आणि दुसरा हात प्रवर्तित (पसरवलेला) असतो तसेच एक पाय अग्रतल संचर स्थितीत असतो, तेव्हा त्यास 'जनिता चारी' असे म्हणतात .

❖ स्यंदिता आणि अपस्यंदिता चारींची लक्षणे ❖

पञ्चतालान्तरं पादं प्रसार्य स्पन्दितां न्यसेत् |
द्वितीयेन तु पादेन तथापस्यन्दितामपि || २६ ||

पदच्छेद : - पञ्च-ताल-अन्तरं पादं प्रसार्य स्यन्दितां न्यसेत् |
द्वितीयेन तु पादेन तथा अपस्यन्दिताम् अपि || २६ ||

अन्वय : - पञ्चतालान्तरं पादं प्रसार्य स्यन्दितां न्यसेत् | तथा द्वितीयेन पादेन अपि (पञ्चतालान्तरं प्रसार्य) अपस्यन्दिता (न्यसेत् ) |

अर्थ - एका पायाला दुसऱ्या पायापासून पाच ताल इतक्या अंतरावर ठेवले तर 'स्यंदिता चारी' होते . जर स्यंदिताचारीच्या उलट दुसऱ्या पायाने तशीच क्रिया केली तर 'अपस्यंदिता चारी' होते .

❖ समोत्सारितमत्तल्लीचारी ❖

तलसञ्चरपादाभ्यां घूर्णमानोपसर्पणै : |
समोत्सरितमत्तल्ली व्यायामे समुदाहृता || २७ ||

पदच्छेद : - तलसञ्चर-पादाभ्यां घूर्णमाना उपसर्पणै : |
समोत्सारितमत्तल्ली व्यायामे समुदाहृता || २७ ||

अन्वय : - तलसञ्चरपादाभ्यां घूर्णमानोपसर्पणै : व्यायामे समोत्सरितमत्तल्ली समुदाहृता |

अर्थ - जर अग्रतलसंचर पायांनी फिरताना उपसर्पण केले तर चारी व्यायामात त्यास 'समोत्सारितमत्तली चारी' असे म्हटले जाते .

### ❖ मत्तल्लीचारी ❖

उभाभ्यामपि पादाभ्यां घूर्णमानोपसर्पणै: |
उद्वेष्टितापविद्धैश्च हस्तैर्मत्तल्ल्युदाहृता || २८ ||

पदच्छेद: - उभाभ्याम् अपि पादाभ्यां घूर्णमाना उपसर्पणै: |
उद्वेष्टिता अपविद्धै: च हस्तै: मत्तल्ली उदाहृता || २८ ||

अन्वय: - उभाभ्यामपि पादाभ्यां घूर्णमानोपसर्पणै: उद्वेष्टितापविद्धै: हस्तै: 'मत्तल्ली' उदाहृता |

अर्थ - जिथे दोन्ही पायांनी फिरताना अपसर्पण होते आणि उद्वेष्टित व अपविष्ट हातांनी अभिनय केला जातो त्या चारीला 'मत्तल्ली चारी' म्हणतात .

### ❖ आकाशिकी चारींची लक्षणे ❖

एता भौम्य: स्मृताश्चार्यो नियुद्धकरणाश्रया: |
आकाशिकीनां चारीणां संप्रवक्ष्यामि लक्षणम् || २९ ||

पदच्छेद: - एता: भौम्य: स्मृता: चार्य: नियुद्धकरणाश्रया: |
आकाशिकीनां चारीणां संप्रवक्ष्यामि लक्षणम् || २९ ||

अन्वय: - एता: नियुद्धकरणाश्रया: भौम्य: चार्य: स्मृता: | आकाशिकीनां चारीणां लक्षणं संप्रवक्ष्यामि |

अर्थ - नियुदध (बाहुयुदध) तसेच करणांच्या आश्रयभूत या सोळा भौमी चारी सांगितल्या आहेत . आता मी आकाशिकी चारींची लक्षणे सांगतो .

### ❖ अतिक्रांताचारी ❖

कुञ्चितं पादमुत्क्षिप्य पुरत: संप्रसारयेत् |
उत्क्षिप्य पातयेच्चैनमतिक्रान्ता तु सा स्मृता || ३० ||

पदच्छेद : - कुञ्चितं पादम् उत्क्षिप्य पुरत: संप्रसारयेत् |
उत्क्षिप्य पातयेत् च एनम् अतिक्रान्ता तु सा स्मृता || ३० ||

अन्वय : - कुञ्चितं पादम् उत्क्षिप्य पुरत: संप्रसारयेत् | उत्क्षिप्य पातयेत् च | एनम् सा अतिक्रान्ता इति स्मृता |

अर्थ - जर कुंचितपाय वर उचलून पुढच्या बाजूस पसरवला आणि नंतर त्याला वर उचलून खाली ठेवले तर ती अतिक्रांताचारी होते .

### ❖ अपक्रांताचारी ❖

ऊरुभ्यां वलनं कृत्वा कुञ्चितं पादमुद्धरेत् |
पार्श्वे विनिक्षिपेच्चैनमपक्रान्ता तु सा स्मृता || ३१ ||

पदच्छेद : - ऊरुभ्यां वलनं कृत्वा कुञ्चितं पादम् उद्धरेत् |
पार्श्वे विनिक्षिपेत् च एनम् अपक्रान्ता तु सा स्मृता || ३१ ||

अन्वय : - ऊरूभ्यां वलनं कृत्वा कुञ्चितं पादम् उद्धरेत् , एनं (पादं) पार्श्वे विनिक्षिपेत् च | सा तु अपक्रान्ता स्मृता |

अर्थ - दोन्ही मांड्यांचे वलन करून कुंचित पायांना वर उचलावे आणि नंतर बाजूला ठेवावे तेव्हा 'अपक्रांताचारी' होते .

### ❖ पार्श्वक्रांताचारी ❖

कुञ्चितं पादमुत्क्षिप्य पार्श्वेनोत्पतनं न्यसेत् |
उदघट्टितेन पादेन पार्श्वक्रान्ता विधीयते || ३२ ||

पदच्छेद : - कुञ्चितं पादम् उत्क्षिप्य पार्श्वेन उत्पतनं न्यसेत् |
उदघट्टितेन पादेन पार्श्वक्रान्ता विधीयते || ३२ ||

अन्वय : - कुञ्चितं पादं पार्श्वेन उत्क्षिप्य उदघट्टितेन पादेन उत्पतनं न्यसेत् (तदेव) पार्श्वक्रान्ता विधीयते |

अर्थ - कुंचित पाय एका बाजूने उचलून नंतर उदघट्टित पाद करून जमिनीवर ठेवले तर 'पार्श्वक्रांताचारी' होते .

### ❖ ऊर्ध्वजानुचारी ❖

कुञ्चितं पादमुत्क्षिप्य जानुस्तनसमं न्यसेत् |
द्वितीयं च क्रमस्तब्धमूर्ध्वजानु: प्रकीर्तिता || ३३ ||

पदच्छेद : - कुञ्चितं पादम् उत्क्षिप्य जानुस्तनसमं न्यसेत् |
द्वितीयं च क्रमस्तब्धम् ऊर्ध्वजानु : प्रकीर्तिता || ३३ ||

अन्वय : - कुञ्चितं पादम् उत्क्षिप्य जानु स्तनसमं न्यसेत् | क्रमस्तब्धं द्वितीयं च ऊर्ध्वजानु: प्रकीर्तिता |

अर्थ - जर कुंचित पाय वर उचलून, गुडघ्याला छातीच्या समकक्ष आणून, दुसरा पाय स्थिर ठेवला तर 'ऊर्ध्वजानुचारी' होते .

### ❖ सूचीचारी ❖

कुञ्चितं पादमुत्क्षिप्य जानूर्ध्वं सम्प्रसारयेत् |
पातयेच्चाग्रयोगेन सा सूची परिकीर्तिता || ३४ ||

पदच्छेद : - कुञ्चितं पादम् उत्क्षिप्य जानु ऊर्ध्वं संप्रसारयेत् |
पातयेत् च अग्रयोगेन सा सूची परिकीर्तिता || ३४ ||

अन्वय : - कुञ्चितं पादम् उत्क्षिप्य जानु ऊर्ध्वं सम्प्रसारयेत् अग्रयोगेन पातयेत् च | सा सूची (इति) परिकीर्तिता |

अर्थ - कुंचित पायाला वरच्या बाजूला उचलून गुडघ्याच्या वर उचलावे आणि पसरावे . नंतर पायाचा अग्रभाग खाली ठेवावा . त्या चारीला 'सूची' चारी म्हटले जाते .

### ❖ नूपुरपादिकाचारी ❖

पृष्ठतो ह्यञ्चितं कृत्वा पादमग्रतलेन तु |
द्रुतं निपातयेदभूमौ चारी नूपुरपादिका || ३५ ||

पदच्छेद : - पृष्ठत : हि अञ्चितं कृत्वा पादम् अग्रतलेन तु |
द्रुतं निपातयेत् भूमौ चारी नूपुरपादिका || ३५ ||

अन्वय : - पादं पृष्ठत : अञ्चितं कृत्वा अग्रतलेन द्रुतं भूमौ निपातयेत्  सा नूपुरपादिका चारी |

अर्थ - (कुंचित) पायाला पाठीमागून वाकवून 'अग्रतलपाद' लगेच जमिनीवर ठेवला तर तिला 'नूपुरपादिका' चारी म्हणतात .

## ❖ दोलपादाचारी ❖

कुञ्चितं पादमुक्षित्य पार्श्वात्पार्श्वं तु दोलयेत् |
पातयेदञ्चितं चैव दोलपादा तु सा प्रकीर्तिता || ३६ ||

पदच्छेद : - कुञ्चितं पादम् उक्षित्य्य पार्श्वात् पार्श्वं तु दोलयेत् |
पातयेत् अञ्चितं च एव दोलपादा प्रकीर्तिता || ३६ ||

अन्वय : - कुञ्चितं पादम् उक्षिप्य पार्श्वात् पार्श्वं दोलयेत्, अञ्चितं पातयेत् च | सा तु दोलपादा प्रकीर्तिता |

अर्थ - कुंचित पाय वर उचलून, एका बाजूकडून दुसऱ्या बाजूपर्यंत डोलावून, अंचित करून, जमिनीवर ठेवल्यास 'दोलपादा' चारी होते .

## ❖ आक्षिप्ताचारी ❖

कुञ्चितं पादमुत्क्षिप्य आक्षिप्य त्वञ्चितं न्यसेत् |
जङ्घास्वस्तिकसंयुक्ता चाक्षिप्ता नाम सा स्मृता || ३७ ||

पदच्छेद : - कुञ्चितं पादम् उत्क्षिप्य आक्षिप्य तु अञ्चितं न्यसेत् |
जङ्घा-स्वस्तिक-संयुक्ता च आक्षिप्ता नाम सा स्मृता || ३७ ||

अन्वय : - कुञ्चितं पादम् उत्क्षिप्य, आक्षिप्य च अञ्चितं न्यसेत् | जङ्घास्वस्तिकसंयुक्ता च सा नाम आक्षिप्ता स्मृता |

अर्थ - कुंचित पायाला वरच्या बाजूस उचलून मग वाकवून जमिनीवर ठेवले आणि पोटऱ्यांना स्वस्तिक स्थितीत ठेवले तर 'आक्षिप्ता चारी' होते .

## ❖ आविद्धाचारी ❖

स्वस्तिकस्याग्रत : पाद : कुञ्चितश्च प्रसारित : |
निपतेदञ्चिताविद्धमाविद्धा नाम सा स्मृता || ३८ ||

पदच्छेद : - स्वस्तिकस्य अग्रत : पाद : कुञ्चित : च प्रसारित : |
निपतेत् अञ्चित-आविद्धम् आविद्धा नाम सा स्मृता || ३८ ||

अन्वय : - स्वस्तिकस्य अग्रत : कुञ्चित : पाद : प्रसारित : | अञ्चिताविद्धं निपतेत् | सा नाम आविद्धा स्मृता |

अर्थ - स्वस्तिक पायाच्या समोर कुंचित पाय पसरवून तो पाय अंचित करून जमिनीवर जोडून ठेवला असता 'आविद्धाचारी' होते .

## ❖ उद्वृत्ताचारी ❖

पादमाविद्धमावेष्ट्य समुत्प्लुत्य निपातयेत् |
परिवृत्य द्वितीयं च सोद्वृत्ता चार्युदाहृता || ३९ ||

पदच्छेद : - पादम् आविद्धम् आवेष्ट्य समुत्प्लुत्य निपातयेत् |
परिवृत्य द्वितीयं च सा उद्वृत्ता चारी उदाहृता || ३९ ||

अन्वय : - आविद्धं पादम् आवेष्ट्य, समुत्क्षिप्य च निपातयेत् द्वितीयं परिवृत्य च सा उद्वृत्ता चारी उदाहृता |

अर्थ - आविद्ध पायाला आवेष्टित करून मग उचलून ठेवले आणि नंतर दुसऱ्या पायाला परिवर्तित करून ठेवले असता 'उद्वृत्ता चारी' होते .

## ❖ विद्युद्भ्रांताचारी ❖

पृष्ठतो वलितं पादं शिरोघृष्टं प्रसारयेत् |
सर्वतो मण्डलाविद्धं विद्युद्भ्रान्ता तु सा स्मृता || ४० ||

पदच्छेद : - पृष्ठत : वलितं पादं शिर :घृष्टं प्रसारयेत् |
सर्वत : मण्डलाविद्धं विद्युद्भ्रान्ता तु सा स्मृता || ४० ||

अन्वय : - पृष्ठत : वलितं पादं शिरोघृष्टं सर्वत : मण्डलाविद्धं प्रसारयेत् | सा तु विद्युद्भ्रान्ता स्मृता |

अर्थ - मागच्या बाजूला वलित केलेल्या पायाने डोक्याला स्पर्श करून चारही बाजूस गोलाकार फिरवून पसरवला तर 'विद्युद्भ्रांता चारी' होते .

❖ अलाताचारी ❖

पृष्ठप्रसारित: पादो वलितोऽभ्यन्तरीकृत: |
पार्ष्णिप्रपतितश्चैव ह्यलाता सम्प्रकीर्तिता || ४१ ||

पदच्छेद: - पृष्ठप्रसारित: पाद: वलित: अभ्यन्तरीकृत: |
पार्ष्णिप्रपतित: च एव हि अलाता संप्रकीर्तिता || ४१ ||

अन्वय: - पृष्ठप्रसारित: पाद: वलित:, (तत:) अभ्यन्तरीकृत: पार्ष्णिप्रपतित: च (भवेत्), (सा) अलाता (इति) सम्प्रकीर्तिता |

अर्थ - एक पाय मागच्या बाजूस पसरवून नंतर वलित करून आतल्या बाजूने फिरवून टाचेजवळ ठेवला तर 'अलाताचारी' होते .

❖ भुजंगत्रासिताचारी ❖

कुञ्चितं पादमुत्क्षिप्य त्र्यश्रमूरुं विवर्तयेत् |
कटिजानुविवर्ताच्च भुजङ्गत्रासिता भवेत् || ४२ ||

पदच्छेद: - कुञ्चितं पादम् उत्क्षिप्य त्र्यश्रम् ऊरुं विवर्तयेत् |
कटि-जानु-विवर्तात् च भुजङ्ग-त्रासिता भवेत् || ४२ ||

अन्वय: - कुञ्चितं पादम् उत्क्षिप्य त्र्यश्रम् ऊरुं विवर्तयेत् | कटिजानुविवर्तात् च भुजङ्गत्रासिता भवेत् |

अर्थ - कुंचित पायाला वरच्या बाजूस उचलून ऊरूला तिरके वळवावे . कंबर आणि पोटऱ्यांना गोल फिरवावे, म्हणजे 'भुजंगत्रासिता' चारी होते .

❖ हरिणप्लुताचारी ❖

अतिक्रान्तक्रमं कृत्वा चोत्प्लुत्य विनिपातयेत् |
जङ्घाञ्चिता परिक्षिप्ता सा ज्ञेया हरिणप्लुता || ४३ ||

पदच्छेद: - अतिक्रान्तक्रमं कृत्वा च उत्प्लुत्य विनिपातयेत् |
जङ्घा अञ्चिता परिक्षिप्ता सा ज्ञेया हरिणप्लुता || ४३ ||

अन्वय : - अतिक्रान्तक्रमं कृत्वा (पादं) समुत्प्लुत्य निपातयेत्। जङ्घा अञ्चिता परिक्षिप्ता (भवेत्) च। सा हरिणप्लुता ज्ञेया।

अर्थ - अतिक्रांता चारीमध्ये सांगितलेल्या कुंचित पायाला वर उचलून उडी मारून खाली आणावे आणि पोटरी वाकवून वरच्या बाजूस उचलले असता 'हरिणप्लुता' चारी होते .

❖ दंडपादाचारी ❖

नूपूरं चरणं कृत्वा पुरतः सम्प्रसारयेत्।
क्षिप्रमाविद्धकरणं दण्डपादा तु सा स्मृता ॥ ४४ ॥

पदच्छेद : - नूपूरं चरणं कृत्वा पुरतः सम्प्रसारयेत्।
क्षिप्रम् आविद्धकरणं दण्डपादा तु सा स्मृता ॥ ४४ ॥

अन्वय : - नूपूरं चरणं कृत्वा पुरतः सम्प्रसारयेत् , क्षिप्रम् आविद्धकरणं (भवेत्) च। सा तु दण्डपादा स्मृता।

अर्थ - नूपुरपादिका चारीसारखे पाय करून त्यांना पुढच्या बाजूस पसरवावे . नंतर लगेचच आविद्ध केले तर 'दंडपादाचारी' होते .

❖ भ्रमरीचारी ❖

अतिक्रान्तक्रमं कृत्वा त्रिकं तु परिवर्तयेत्।
द्वितीयपादभ्रमणात्तलेन भ्रमरी स्मृता ॥ ४५ ॥

पदच्छेद : - अतिक्रान्तक्रमं कृत्वा त्रिकं तु परिवर्तयेत्।
द्वितीय-पाद-भ्रमणात् तलेन भ्रमरी स्मृता ॥ ४५ ॥

अन्वय : - अतिक्रान्तक्रमं कृत्वा त्रिकं परिवर्तयेत्। तलेन द्वितीयपादभ्रमणात् (च) भ्रमरी स्मृता।

अर्थ - अतिक्रांताचारीचे प्रदर्शन करून 'त्रिक' फिरवावे . नंतर दुसऱ्या पायाच्या तळव्याने शरीराला फिरवावे . अशाप्रकारच्या भ्रमणास 'भ्रमरी चारी' असे म्हणतात .

❖ चारीविधान ❖

आकाशिक्यः स्मृता ह्येता ललिताङ्गक्रियात्मिकाः।
धनुर्वज्रासिशस्त्राणां प्रयोक्तव्या विमोक्षणे ॥ ४६ ॥

पदच्छेद : - आकाशिक्य : स्मृता : हि एता : ललिताङ्गक्रियात्मिका : |
धनु :वज्र-असि-शस्त्राणां प्रयोक्तव्या विमोक्षणे || ४६ ||

अन्वय : - एता : ललिताङ्गक्रियात्मिका : आकाशिक्य : स्मृता : | प्रयोक्तृभि : धनु :वज्र-असि-शस्त्राणां विमोक्षणे (प्रयोक्तव्या :) |

अर्थ - अंगाच्या ललित क्रियांद्वारे या 'आकाशिकी चारी' सांगितल्या आहेत . नाट्याचा प्रयोग करणाऱ्यांनी धनुष्य, वज्र इ . शस्त्रांचा प्रयोग करताना या चारींचा वापर करावा .

अग्रगौ पृष्ठगौ वापि ह्युनगौ वापि योगत : |
पादयोस्तु द्विजा हस्तौ कर्तव्यौ नाट्ययोक्तृभि : || ४७ ||

पदच्छेद : - अग्रगौ पृष्ठगौ वा अपि हि अनुगौ वा अपि योगत : |
पादयो : तु द्विजा : हस्तौ कर्तव्यौ नाट्ययोक्तृभि : || ४७ ||

अन्वय : - (हे) द्विजा :! नाट्ययोक्तृभि : पादयो : योगत : हस्तौ अग्रगौ पृष्ठगौ अनुगौ वा कर्तव्यौ |

अर्थ - हे द्विजांनो, नाट्याचा प्रयोग करणाऱ्यांनी पायांच्या गतीनुसार हातांना पायांच्या अग्रगामी, पृष्ठगामी किंवा अनुगामी करावे . (म्हणजेच हस्ताचे प्राधान्य असेल तर हस्तप्रचार आधी करून त्यानंतर पायांची गती करावी . जिथे गतीचे प्राधान्य आहे तिथे पादविक्षेपाानंतर हस्तप्रचार करावा . तसेच जसा विनियोग असेल त्यानुसार हातापायांची एकत्र क्रिया करावी . )

यत : पादस्ततो हस्तो यतो हस्तस्ततस्त्रिकम् |
पादस्य निर्गमं कृत्वा तथोपाङ्गानि योजयेत् || ४८ ||

पदच्छेद : - यत : पाद : तत : हस्त : यत : हस्त : तत : त्रिकम् |
पादस्य निर्गमं कृत्वा तथा उपाङ्गानि योजयेत् || ४८ ||

अन्वय : - यत : पाद :, तत : हस्त :; यत : हस्त :, तत : त्रिकम् | पादस्य निर्गमं कृत्वा तथा उपाङ्गानि योजयेत् |

अर्थ - जिथे पाय तिथे हात करावा आणि जिथे हात तिथे त्रिक करावे आणि पायाची गती जाणून त्यानुसार उपांगांची योजना करावी .

पादचार्या यथा पादो धरणीमेव गच्छति |
एवं हस्तश्चरित्वा तु कटिदेशं समाश्रयेत् || ४९ ||

पदच्छेद : - पादचार्या यथा पाद : धरणीम् एव गच्छति |
एवं हस्त : चरित्वा तु कटीदेशं समाश्रयेत् || ४९ ||

अन्वय : - यथा पादचार्या पाद : धरणीम् एव गच्छति | एवं हस्त : चरित्वा तु कटिदेशं समाश्रयेत् |

अर्थ - पादचारी केल्यानंतर जेव्हा पाय जमिनीवर ठेवला जातो तेव्हा हात सुद्धा तसेच फिरवून कमरेवर ठेवावेत .

एताश्चार्यो मया प्रोक्ता ललिताङ्गक्रियात्मिका : |
स्थानन्यासां प्रवक्ष्यामि सर्वशस्त्रविमोक्षणे || ५० ||

पदच्छेद : - एता : चार्य : मया प्रोक्ता : ललिताङ्गक्रियात्मिका : |
स्थानन्यासां प्रवक्ष्यामि सर्वशस्त्रविमोक्षणे || ५० ||

अन्वय : - एता : ललित-अङ्ग-क्रियात्मिका : चार्य : मया प्रोक्ता : | सर्वशस्त्र-विमोक्षणे आसां स्थानानि प्रवक्ष्यामि |

अर्थ - अंगाच्या ललित क्रियांनी युक्त अशा चारी मी सांगितल्या . आता शस्त्रफेक करण्यासाठी त्या सर्वांची स्थाने सांगतो .

## ❖ स्थानांचे प्रकार ❖

वैष्णवं समपादं च वैशाखं मण्डलं तथा |
प्रत्यालीढं तथालीढं स्थानान्येतानि षण्णृणाम् || ५१ ||

पदच्छेद : - वैष्णवं समपादं च वैशाखं मण्डलं तथा |
प्रत्यालीढं तथा आलीढं स्थानानि एतानि षट् नृणाम् || ५१ ||

अन्वय : - नृणां वैष्णवं, समपादं, वैशाखं, मण्डलं, प्रत्यालीढं, तथा आलीढं च एतानि षट् स्थानानि |

अर्थ - वैष्णव, समपाद, वैशाख, मंडल, आलीढ आणि प्रत्यालीढ अशी पुरुषांची सहा स्थानके सांगितली आहेत .

### ❖ वैष्णव स्थानाचे लक्षण आणि विनियोग ❖

द्वौ तालावर्धतालश्च पादयोरन्तरं भवेत् |
तयोस्समुत्थितस्त्वेकस्त्र्यश्र: पक्षस्थितोऽपर: || ५२ ||
किञ्चिदञ्चितजङ्घं च सौष्ठवाङ्गपुरस्कृतम् |
वैष्णवं स्थानमेतद्धि विष्णुरत्राधिदैवतम् || ५३ ||

पदच्छेद: - द्वौ तालौ अर्धताल: च पादयो: अन्तरं भवेत् |
तयो: समुत्थित: तु एक: त्र्यश्र: पक्षस्थित: अपर: || ५२ ||
किञ्चित् अञ्चितजङ्घं च सौष्ठव-अङ्ग-पुरस्कृतम् |
वैष्णवं स्थानम् एतत् हि विष्णु: अत्र अधिदैवतम् || ५३ ||

अन्वय: - पादयो: द्वौ तालौ अर्धताल: च अन्तरं भवेत् , तयो: एक: समस्थित: (तथा) अपर: त्र्यश्र: पक्षस्थित: (भवेत्), किञ्चित् अञ्चितजङ्घं सौष्ठवाङ्गपुरस्कृतं च (भवेत्) | एतत् हि वैष्णवं स्थानम् | अत्र विष्णु: अधिदैवतम् |

अर्थ - जर दोन्ही पायांमध्ये अडीच ताल अंतर ठेवले . त्यात एक पाय सम आणि दुसरा पाय त्र्यश्र किंवा पक्षस्थ स्थितीत ठेवला आणि पोटरी थोडी वाकवली व अंग सौष्ठवयुक्त केले की त्यास 'वैष्णवस्थान' असे म्हटले जाते . ह्या स्थानाची देवता विष्णू आहे .

स्थानेनानेन कर्तव्य: संलापस्तु स्वभावज: |
नानाकार्यान्तरापेतैर्नृभिरुत्तममध्यमै: || ५४ ||

पदच्छेद: - स्थानेन अनेन कर्तव्य: संलाप: तु स्वभावज: |
नाना-कार्यान्तर-उपेतै: नृभि: उत्तममध्यमै: || ५४ ||

अन्वय: - अनेन स्थानेन नानाकार्यान्तरोपेतै: उत्तममध्यमै: नृभि: स्वभावज: संलाप: कर्तव्य: |

अर्थ - विविध प्रकारच्या कामांमध्ये उत्तम व मध्यम प्रकृतीच्या पुरुषांनी स्वाभाविक संलाप करण्यासाठी या स्थानाचा वापर करावा .

[चक्रस्य मोक्षणे चैव धारणे धनुषस्तथा |
धैर्योदात्ताङ्गलीलासु तथा क्रोधे प्रयोजयेत् || ५५ ||

पदच्छेद : - [चक्रस्य मोक्षणे च एव धारणे धनुष : तथा |
धैर्य-उदात्त-अङ्ग-लीलासु तथा क्रोधे प्रयोजयेत् || ५५ ||

अन्वय : - चक्रस्य मोक्षणे, धनुष : धारणे, धैर्योदात्ताङ्गलीलासु तथा क्रोधे प्रयोजयेत् |

अर्थ - चक्र सोडताना, धनुष्य धारण करताना, धैर्य, दान, शारीरिक लीला तसेच क्रोध इ . मध्ये या स्थानाचा वापर करावा .

इदमेव विपर्यस्तं प्रणयक्रोध इष्यते |
उपालम्भकृते चैव प्रणयोद्वेगयोस्तथा || ५६ ||
शङ्कासूयोग्रताचिन्तामतिस्मृतिषु चैव हि |
दैन्ये चपलतायां च गर्वाभीष्टेषु शक्तिषु || ५७ ||
शृङ्गाराद्भुतबीभत्सवीरप्राधान्ययोजितम् ||

पदच्छेद : - इदम् एव विपर्यस्तं प्रणयक्रोध : इष्यते |
उपालम्भकृते च एव प्रणय-उद्वेगयो : तथा || ५६ ||
शङ्का-असूया-उग्रता-चिन्ता-मति-स्मृतिषु च एव हि |
दैन्ये चपलतायां च गर्व-अभीष्टेषु शक्तिषु || ५७ ||
शृङ्गार-अद्भुत-बीभत्स-वीर-प्राधान्य-योजितम् ||

अन्वय : - (तस्य) विपर्य : प्रणयक्रोधे, उपालम्भकृते, प्रणयोद्वेगयो : शङ्का-असूया-उग्रता-चिन्ता-मति-स्मृतिषु, दैन्ये, चपलतायोगे, गर्व-अभीष्टेषु तथा शक्तिषु इष्यते | इदम् एव तं शृङ्गार-अद्भुत-बीभत्स-वीर-प्राधान्ययोजितम् |

अर्थ - हे स्थान उलट केल्यास प्रणयकोप, उपालंभ, प्रणयोद्वेग, शंका, असूया, उग्रता, चिंता, मती, स्मृती, दैन्य, चपलता, गर्व आणि अभीष्ट शक्तींचा योग इ . तसेच शृंगार, वीर, अद्भुत, बीभत्स रसांचे प्रामुख्य दर्शविले जाते .

### ❖ समपाद स्थानाचे लक्षण आणि विनियोग ❖

समपादे समौ पादौ तालमात्रान्तरस्थितौ || ५८ ||
स्वभावसौष्ठवोपेतौ ब्रह्मा चात्राधिदैवतम् |

पदच्छेद: - समपादे समौ पादौ तालमात्र-अन्तरस्थितौ ॥ ५८ ॥
स्वभाव-सौष्ठव-उपेतौ ब्रह्मा च अत्र अधिदैवतम् ।

अन्वय: - समपादे तालमात्रान्तरस्थितौ स्वभावसौष्ठवोपेतौ समौ पादौ (भवेताम्) ।अत्र ब्रह्मा अधिदैवतं च ।

अर्थ - एक ताल एवढे अंतर ठेवून दोन्ही समपाद ठेवून स्वाभाविक सौष्ठवयुक्त उभे राहिले तर त्यास समपादस्थान असे म्हणतात . या स्थानाची देवता ब्रह्मा आहे .

अनेन कार्यं स्थानेन विप्रमङ्गलधारणम् ॥ ५९ ॥
रूपणं पक्षिणां चैव वरं कौतुकमेव च ।
स्वस्थानां स्यन्दनस्थानां विमानस्थायिनामपि ॥ ६० ॥
लिङ्गस्थानां व्रतस्थानां स्थानमेतत्तु कारयेत् ।

पदच्छेद: - अनेन कार्यं स्थानेन विप्रमङ्गलधारणम् ॥ ५९ ॥
रूपणं पक्षिणां च एव वरं कौतुकम् एव च ।
स्वस्थानां स्यन्दनस्थानां विमानस्थायिनाम् अपि ॥ ६० ॥
लिङ्गस्थानां व्रतस्थानां स्थानम् एतत् तु कारयेत् ।

अन्वय: - अनेन स्थानेन विप्रमङ्गलधारणं कार्यम् । पक्षिणां रूपणे, वरं कौतुकं, स्वस्थानां, स्यन्दनस्थानां, विमानस्थायिनां, लिङ्गस्थानां, व्रतस्थानाम् अपि एतत् स्थानं कारयेत् ।

अर्थ - या स्थानामध्ये ब्राह्मणांकडून आशीर्वाद घ्यावा . पक्षी पाहताना आणि वराचे कौतुक करताना, आकाशातील दिव्य पुरुष पाहताना, रथावर बसलेले असताना आणि विमानातून जाण्याचा अभिनय करताना, त्याचप्रमाणे शैव संन्यासी व व्रतस्थ योगींचा अभिनय करताना या स्थानाचा प्रयोग करावा .

### ❖ वैशाख स्थानाचे लक्षण आणि विनियोग ❖

तालास्त्रयोऽर्धतालश्च पादयोन्तरं भवेत् ॥ ६१ ॥
तालांस्त्रीनर्धतालांश्च निषण्णोरुं प्रकल्पयेत् ।

त्र्यश्रौ पक्षस्थितौ चैव तत्र पादौ प्रयोजयेत् ॥ ६२ ॥
वैशाखस्थानमेतद्धि स्कन्दश्चात्राधिदैवतम् ।

पदच्छेद : - ताला : त्रय : अर्धताल : च पादयो : अन्तरं भवेत् ॥ ६१ ॥
तालान् त्रीन् अर्धतालान् च निषण्णोरुं प्रकल्पयेत् ।
त्र्यश्रौ पक्षस्थितौ च एव तत्र पादौ प्रयोजयेत् ॥ ६२ ॥
वैशाखस्थानम् एतत् हि स्कन्द : च अत्र अधिदैवतम् ।

अन्वय : - पादयो : त्रय : ताला :, अर्धताल : च अन्तरं भवेत् । निष्षणोरुं त्रीन् तालान्, अर्धतालान् च प्रकल्पयेत् । तत्र त्र्यश्रौ पक्षस्थितौ पादौ प्रयोजयेत् । एतत् हि वैशाखस्थानम् । अत्र स्कन्द : अधिदैवतं च ।

अर्थ - जर दोन्ही पायांमध्ये साडेतीन ताल एवढे अंतर असेल आणि साडेतीन तालाच्या अंतरावर ऊरू सूची चारीच्या अपेक्षेने विश्रांत असेल आणि दोन्ही पाय त्र्यश्र अर्थात तिरके ठेवल्यास त्यास 'वैशाखस्थान' म्हणतात. या स्थानाची अधिदेवता स्कंद (कार्तिकेय) आहे .

स्थानेनानेन कर्तव्यमश्वानां वाहनं बुधै : ॥ ६३ ॥
व्यायामो निर्गमश्चैव स्थूलपक्षिनिरूपणम् ।
शरासनसमुत्कर्षे व्यायामकृतमेव च ॥ ६४ ॥
रेचकेषु च कर्तव्यमिदमेव प्रयोक्तृभि : ।

पदच्छेद : - स्थानेन अनेन कर्तव्यम् अश्वानां वाहनं बुधै : ॥ ६३ ॥
व्यायाम : निर्गम : च एव स्थूलपक्षिनिरूपणम् ।
शरासनसमुत्कर्षे व्यायामकृतम् एव च ॥ ६४ ॥
रेचकेषु च कर्तव्यम् इदम् एव प्रयोक्तृभि : ।

अन्वय : - बुधै : अनेन स्थानेन अश्वानां वाहनं कर्तव्यम् । व्यायाम : , निर्गम : , स्थूलपक्षिनिरूपणम् शरासनसमुत्कर्षे , तथा व्यायामकृतं, रेचकेषु च इदं प्रयोक्तृभि : कर्तव्यम् ।

अर्थ - विद्वानांनी या स्थानाद्वारे घोड्यांवर बसण्याचा अभिनय करावा . तसेच व्यायाम, युद्ध इ . वेगाने करावे . स्थूलपक्ष्यांना पाहणे, बाण फेकणे तसेच व्यायाम करण्यासाठी आणि रेचकाच्या अभिनयामध्ये विद्वानांनी या स्थानाचा प्रयोग करावा .

❖ मंडल स्थानाचे लक्षण आणि विनियोग ❖

ऐन्द्रे तु मण्डले पादौ चतुस्तालान्तरस्थितौ ॥ ६५ ॥
त्र्यश्रौ पक्षस्थितौ चैव कटिजानू समौ तथा ।
धनुर्वज्राणि शस्त्राणि मण्डलेन प्रयोजयेत् ॥ ६६ ॥
वाहनं कुञ्जराणां तु स्थूलपक्षिनिरूपणम् ।

पदच्छेद : - ऐन्द्रे तु मण्डले पादौ चतु :तालअन्तरस्थितौ ॥ ६५ ॥
त्र्यश्रौ पक्षस्थितौ च एव कटिजानू समौ तथा ।
धनु : वज्राणि शस्त्राणि मण्डलेन प्रयोजयेत् ॥ ६६ ॥
वाहनं कुञ्जराणां तु स्थूलपक्षिनिरूपणम् ।

अन्वय : - ऐन्द्रे मण्डले चतुस्तालान्तरस्थितौ त्र्यश्रौ पक्ष :स्थितौ पादौ तथा कटिजानू समौ । मण्डलेन धनुर्वज्राणि शस्त्राणि, कुञ्जराणां वाहनं, स्थूलपक्षिनिरूपणं च प्रयोजयेत् ।

अर्थ - ऐंद्र मंडलात चार तालाच्या अंतरावर स्थित दोन्ही पाय त्र्यश्र व पक्षस्थ असतात आणि कंबर आणि गुडघा सम अवस्थेत ठेवले जातात . धनुष्य, वज्र, तलवार इत्यादी शस्त्र चालवताना, हत्तीवर बसताना तसेच स्थूल पक्षी पाहताना या मंडलस्थानाचा प्रयोग करावा .

❖ आलीढ स्थानाचे लक्षण आणि विनियोग ❖

अस्यैव दक्षिणं पादं पञ्चतालान् प्रसार्य तु ॥ ६७ ॥
आलीढं स्थानकं कुर्याद्रुद्रश्चास्याधिदैवतम् ।

पदच्छेद : - अस्य एव दक्षिणं पादं पञ्चतालान् प्रसार्य तु ॥ ६७ ॥
आलीढं स्थानकं कुर्यात् रुद्र : च अस्य अधिदैवतम् ।

अन्वयः - अस्य एव दक्षिणं पादं पञ्चतालान् प्रसार्य आलीढं स्थानकं कुर्यात्। अस्य रूद्रः अधिदैवतं च।

अर्थ - याच मंडलस्थानाच्या उजव्या पायाला पाच तालाच्या अंतरावर पसरवल्यास ते 'आलीढस्थान' होते . या स्थानाची देवता रूद्र आहे .

अनेन कार्यं स्थानेन वीररौद्रकृतं तु यत् ॥ ६८ ॥
उत्तरोतरसंजल्पो रोषामर्षकृतश्च यः।
मल्लानां चैव संफेटः शत्रूणां च निरूपणम् ॥ ६९ ॥
तथाभिद्रवणं चैव शस्त्राणां चैव मोक्षणम्।

पदच्छेदः - अनेन कार्यं स्थानेन वीररौद्रकृतं तु यत् ॥ ६८ ॥
उत्तरोत्तरसंजल्पः - रोष-अमर्षकृतः च यः।
मल्लानां च एव संफेटः शत्रूणां च निरूपणम् ॥ ६९ ॥
तथा अभिद्रवणं च एव शस्त्राणां च एव मोक्षणम्।

अन्वयः - अनेन स्थानेन यत् वीररौद्रकृतं, यः रोषामर्षकृतः उत्तरोतरसंजल्पः, मल्लानां संफेटः, शत्रूणां निरूपणं, अभिद्रवणं, तथा शस्त्राणां मोक्षणं च कार्यम्।

अर्थ - या आलीढस्थानाद्वारे वीर आणि रौद्र रसयुक्त सर्व कार्य आणि रोष अमर्षाने केले गेलेले उत्तरोत्तर कथनोपकथन, तसेच मल्ल आणि प्रतिमल्ल यांचा संघर्ष, शत्रूंना पाहणे, पलायन आणि शस्त्रमोक्षण इ . करावे .

### ❖ प्रत्यालीढ स्थानाचे लक्षण आणि विनियोग ❖

कुञ्चितं दक्षिणं कृत्वा वामपादं प्रसार्य च ॥ ७० ॥
आलीढपरिवर्तस्तु प्रत्यालीढमिति स्मृतम्।

पदच्छेदः - कुञ्चितं दक्षिणं कृत्वा वामपादं प्रसार्य च ॥ ७० ॥
आलीढपरिवर्तः तु प्रत्यालीढम् इति स्मृतम्।

अन्वयः - दक्षिणकुञ्चितं कृत्वा वामपादं प्रसार्य च (यः) आलीढपरिवर्तः प्रत्यालीढम् इति स्मृतम्।

अर्थ - उजवा पाय कुंचित करून डावा पाय पसरवला आणि आलीढस्थानाच्या उलट क्रिया केल्यास 'प्रत्यालीढ स्थान' होते.

आलीढसंहितं शस्त्रं प्रत्यालीढेन मोक्षयेत् ॥ ७१ ॥
नानाशस्त्रविमोक्षो हि कार्योऽनेन प्रयोक्तृभिः ।

पदच्छेद :- आलीढ-संहितं शस्त्रं प्रत्यालीढेन मोक्षयेत् ॥ ७१ ॥
नानाशस्त्रविमोक्षः हि कार्यः अनेन प्रयोक्तृभिः ।

अन्वय :- आलीढसंहितं शस्त्रं प्रत्यालीढेन मोक्षयेत् । प्रयोक्तृभिः अनेन नानाशस्त्रविमोक्षः हि कार्यः ।

अर्थ - आलीढस्थानामध्ये शस्त्रांचे संधान केले जाते आणि प्रत्यालीढस्थानाद्वारे त्यांचे मोक्षण केले जाते. नाट्याचा प्रयोग करणाऱ्यांनी या स्थानाद्वारे अनेक शस्त्रांचे मोक्षण सांगितले आहे.

❖ न्यायाचे प्रकार ❖

न्यायाश्चैवात्र विज्ञेयाश्चत्वार शस्त्रमोक्षणे ॥ ७२ ॥
भारतः सात्वतश्चैव वार्षगण्योऽथ कैशिकः ।

पदच्छेद :- न्यायाः च एव अत्र विज्ञेयाः चत्वारः शस्त्रमोक्षणे ॥ ७२ ॥
भारतः सात्वतः च एव वार्षगण्यः अथ कैशिकः ।

अन्वय :- शस्त्रमोक्षणे चत्वारः न्यायाः विज्ञेयाः - भारतः, सात्वतः, वार्षगण्यः, कैशिकः च ।

अर्थ - अनेक प्रकारच्या शस्त्रांचे मोक्षण करताना चार प्रकारचे न्याय सांगितले गेले आहेत - भारत, सात्वत, वार्षगण्य आणि कैशिक.

भारते तु कटीच्छेद्यं पादच्छेद्यं तु सात्वते ॥ ७३ ॥
वक्षसो वार्षगण्ये तु शिरच्छेद्यं तु कैशिके ।

पदच्छेद : - भारते तु कटिच्छेद्यं पादच्छेद्यं तु सात्वते ॥ ७३ ॥
वक्षस : वार्षगण्ये तु शिरच्छेद्यं तु कैशिके ।

अन्वय : - भारते तु कटि : छेद्यं, सात्वते तु पादच्छेद्यं, वार्षगण्ये वक्षस : (छेद्यं), कैशिके शिरच्छेद्य ।

अर्थ - भारतामध्ये कमरेवर, सात्वतामध्ये पायावर, वार्षगण्यामध्ये छातीवर आणि कैशिकामध्ये डोक्यावर अस्त्रप्रहार सांगितला गेला आहे .

एभि : प्रयोक्तृभिन्यायैर्नानाचारीसमुत्थितै : ॥ ७४ ॥
प्रविचारा : प्रयोक्तव्या नानाशस्त्रविमोक्षणे ।

पदच्छेद : - एभि : प्रयोक्तृभि : न्यायै : नानाचारीसमुत्थितै : ॥ ७४ ॥
प्रविचारा : प्रयोक्तव्या : नानाशस्त्रविमोक्षणे ।

अन्वय : - प्रयोक्तृभि : नानाशस्त्रविमोक्षणे नानाचारीसमुत्थितै : एभि : न्यायै : प्रविचारा : प्रयोक्तव्या : ।

अर्थ - नाट्यप्रवक्त्यांनी विविधप्रकारच्या चारींपासून निर्माण झालेल्या या न्यायांद्वारे विविध शस्त्रफेक करण्यासाठी विशिष्ट गतीने चालावे . (विशिष्ट पादप्रचार करावा . )

### ❖ 'न्याय' शब्दाची व्याख्या ❖

न्यायाश्रितैरङ्गहारैर्न्यायाच्चैव समुत्थितै : ॥ ७५ ॥
यस्माद्युद्धानि वर्तन्ते तस्मान्याया : प्रकीर्तिता : ।

पदच्छेद : - न्यायाश्रितै : अङ्गहारै : न्यायात् च एव समुत्थितै : ॥ ७५ ॥
यस्मात् युद्धानि वर्तन्ते तस्मात् न्याया : प्रवर्तिता : ।

अन्वय : - न्यायात् समुत्थितै : न्यायाश्रितै : अङ्गहार : यस्मात् युद्धानि वर्तन्ते तस्मात् न्याया : प्रकीर्तिता : ।

अर्थ - अंगहार हे न्यायावर आधारित असतात आणि न्यायातूनच उत्पन्न होतात . त्यांच्याद्वारेच युद्धाचे दर्शन घडते . म्हणून यांना 'न्याय' असे म्हटले आहे .

❖ भारतन्याय ❖

वामहस्ते विनिक्षिप्य खेटकं दक्षिणेन च ॥ ७६ ॥
शस्त्रमादाय हस्तेन प्रविचारमथाचरेत् ।
प्रसार्य च करौ सम्यक् पुनराक्षिप्य चैव हि ॥ ७७ ॥
खेटकं भ्रामयेत्पश्चात्पार्श्वात्पार्श्वमथापि च ।
शिर: परिगमश्चापि कार्य: शस्त्रेण योक्तृभि: ॥ ७८ ॥
कपोलस्यान्तरे वापि शस्त्रस्योद्घट्टनं तथा ।
पुनश्च खड्गहस्तेन ललितोद्वेष्टितेन च ॥ ७९ ॥
खेटकेन च कर्तव्य: शिर:परिगमो बुधै: ।
एवं विचार: कर्तव्यो भारते शस्त्रमोक्षणे ॥ ८० ॥

पदच्छेद: - वामहस्ते विनिक्षिप्य खेटकं दक्षिणेन च ॥ ७६ ॥
शस्त्रम् आदाय हस्तेन प्रविचारम् अथ आचरेत् ।
प्रसार्य च करौ सम्यक् पुन: आक्षिप्य च एव हि ॥ ७७ ॥
खेटकं भ्रामयेत् पश्चात् पार्श्वात् पार्श्वम् अथा अपि च ।
शिर:परिगम: च अपि कार्य: शस्त्रेण योक्तृभि: ॥ ७८ ॥
कपोलस्य अन्तरे वा अपि शस्त्रस्य उदघट्टनं तथा ।
पुन: च खड्गहस्तेन ललितउद्वेष्टितेन च ॥ ७९ ॥
खेटकेन च कर्तव्य: शिर: परिगमो बुधै: ।
एवं विचार: कर्तव्य: भारते शस्त्रमोक्षणे ॥ ८० ॥

अन्वय: - अथ वामहस्ते खेटकं विनिक्षिप्य दक्षिणेन हस्तेन शस्त्रम् आदाय च प्रविचारम् आचरेत्| पुन: करौ सम्यक् प्रसार्य खेटकम् आक्षिप्य च पश्चात् , पार्श्वात् पार्श्वम् अपि भ्रामयेत्| योक्तृभि: शस्त्रेण शिर: परिगम: कार्य: | तथा कपोलस्य अन्तरे शस्त्रस्य उद्वेष्टनं (कार्यम्)| पुन: खड्गहस्तेन खेटकेन ललित-उद्वेष्टितेन च बुधै: शिर :परिगम: कर्तव्य: |एवं भारते शस्त्रमोक्षणे प्रचार: कर्तव्य:|

अर्थ - डाव्या हातात ढाल आणि उजव्या हातात शस्त्र घेऊन रंगमंचावर भ्रमण करावे. मग दोन्ही हातांना नीट पसरवून नंतर ढाल 'आक्षिप्त' करावी. त्यानंतर, एका बाजूने दूसऱ्या बाजूला ढाल फिरवावी. मग नाट्यप्रयोक्त्याने शस्त्राला डोक्याच्या चारही बाजूस फिरवावे. नंतर गालाजवळ शस्त्राचे उद्वेष्टन करावे. मग हातात तलवार घेऊन व डाव्या हातात ढाल घेऊन ललित उद्वेष्टन प्रक्रियेने डोक्याच्या चारही बाजूस फिरवावे. अशाप्रकारे भारत न्यायामध्ये शस्त्रमोक्षणाच्या प्रसंगी विद्वानांनी रंगमंचावर विशिष्ट गतीने चालावे.

## ❖ सात्त्वतन्याय ❖

सात्वते च प्रवक्ष्यामि प्रविचारं यथाविधि |
स एवं प्रविचारस्तु शस्त्रखेटकयो: स्मृत: || ८१ ||
केवलं पृष्ठत: शस्त्रं कर्तव्यं खलु सात्वते |

पदच्छेद: - सात्वते च प्रवक्ष्यामि प्रविचारं यथाविधि |
स: एवं प्रविचार: तु शस्त्रखेटकयो: स्मृत: || ८१ ||
केवलं पृष्ठत: शस्त्रं कर्तव्यं खलु सात्वते |

अन्वय: - सात्वते प्रविचारं यथाविधि प्रवक्ष्यामि | स: एव प्रविचार: तु खड्गखेटकयो: स्मृत:| खलु सात्वते केवलं पृष्ठत: शस्त्रं कर्तव्यम्|

अर्थ - आता मी यथाविधी 'सात्वत' न्यायात होणारी गती सांगेन. शस्त्र आणि ढाल या

विषयीदेखील हीच विशिष्ट गती सांगितली आहे, जी भारत न्यायात सांगितली गेली आहे . सात्वतामध्ये फक्त पाठीमागून शस्त्रांना फिरवले जाते .

### ❖ वार्षगण्यन्याय ❖

गतिश्च वार्षगण्येऽपि सात्वतेन क्रमेण तु ॥ ८२ ॥
शस्त्रखेटकयोश्चापि भ्रमणं संविधीयते ।
शिर: परिगमस्तद्वच्छस्त्रस्येह भवेत्तथा ॥ ८३ ॥
उरस्युद्वेष्टनं कार्यं शस्त्रस्यांसेऽथवा पुन: ।

पदच्छेद: - गति: च वार्षगण्ये अपि सात्वतेन क्रमेण तु ॥ ८२ ॥
शस्त्र-खेटकयो: च अपि भ्रमणं संविधीयते ।
शिर :परिगम: तद्वत् शस्त्रस्य इह भवेत् तथा ॥ ८३ ॥
उरसि उद्वेष्टनं कार्यं शस्त्रस्य अंसे अथवा पुन: ।

अन्वय: - वार्षगण्ये अपि सात्वतेन क्रमेण गति: (भवेत्)। शस्त्रखेटकयो: च अपि भ्रमणं संविधीयते तथा तद्वत् इह शस्त्रस्य शिर: परिगम: भवेत्। पुन: शस्त्रस्य उरसि अथवा अंसे उद्वेष्टनं कार्यम्।

अर्थ - वार्षगण्य न्यायामध्ये देखील सात्वताच्या क्रमानेच गती करावी. यामध्ये शस्त्र (तलवार) व ढाल एकत्र फिरविली जातात आणि शस्त्र डोक्यावर फिरवले जाते . नंतर त्या शस्त्राचे छातीवर किंवा खांद्यावर उद्वेष्टन करावे .

### ❖ कैशिकन्यायानुसार शस्त्रमोक्षणाचा विधी ❖

भारते प्रविचारो य: कर्तव्यस्स तु कैशिके ॥ ८४ ॥
विभ्रमय्य तथा शस्त्रं केवलं मूर्ध्नि पातयेत् ।

प्रविचाराः प्रयोक्तव्या ह्येवमेतेऽङ्गलीलया ॥ ८५ ॥
धनुर्वज्रासिशस्त्राणां प्रयोक्तव्या विमोक्षणे ।

पदच्छेदः - भारते प्रविचारः यः कर्तव्यः स तु कैशिके ॥ ८४ ॥
विभ्रमय्य तथा शस्त्रं केवलं मूर्ध्नि पातयेत् ।
प्रविचाराः प्रयोक्तव्याः हि एवम् एते अङ्गलीलया ॥ ८५ ॥
धनुःवज्र-असि-शस्त्राणां प्रयोक्तव्याः विमोक्षणे ।

अन्वयः - भारते अयं प्रविचारः, सः तु कैशिके कर्तव्यः । तथा शस्त्रं मूर्ध्नि विभ्रमय्य केवलं पातयेत् ।
एवं कैशिके अङ्गलीलया प्रविचाराः प्रयोक्तव्याः कर्तव्यः । धनुर्वज्रासिशस्त्राणां विमोक्षणे प्रयोक्तव्या ।

अर्थ - भारत न्यायामध्ये ज्या विशिष्ट गती केल्या जातात त्याच कैशिक न्यायात देखील कराव्यात. यात शेवटी शस्त्राला डोक्यावर फिरवून पाडले जाते. अशाप्रकारे शरीराच्या लीलांनी विशिष्ट गतींचा प्रयोग करावा. धनुष्य, वज्र, तलवार इत्यादी शस्त्रांच्या मोक्षणासाठी याचा वापर केला जातो.

❖ युद्धामध्ये वर्जित कार्य ❖

न भेद्यं नापि च च्छेद्यं न चापि रुधिरस्रुतिः ॥ ८६ ॥
रङ्गे प्रहरणे कार्यो न चापि व्यक्तघातनम् ।
संज्ञामात्रेण कर्तव्यं शस्त्राणां मोक्षणं बुधैः ॥ ८७ ॥
अथवाभिनयोपेतं कुर्याच्छेद्यं विधानतः ।

पदच्छेदः - न भेद्यं न अपि च छेद्यं न च अपि रुधिरस्रुतिः ॥ ८६ ॥
रङ्गे प्रहरणे कार्यः न च अपि व्यक्तघातनम् ।

संज्ञामात्रेण कर्तव्यं शस्त्राणां मोक्षणं बुधै: ॥ ८७ ॥
अथवा अभिनय-उपेतं कुर्यात् छेद्यं विधानत: ।

अन्वय: - रङ्गे न भेद्यं, न च छेद्यं, न चापि रूधिरस्रुति:, प्रहरणे व्यक्तघातनम् अपि न कार्यम् । बुधै: शस्त्राणां मोक्षणं संज्ञामात्रेण कर्तव्यम् । अथवा विधानत: अभिनयोपेतं छेद्यं कुर्यात् ।

अर्थ - अशाप्रकारे रंगमंचावर युद्ध दाखविताना भेदन नसावे. छेदन नसावे. रक्तपात नसावा आणि शस्त्रांद्वारे स्पष्ट आघात नको. विद्वानांनी केवळ खुणांनीच शस्त्रफेक करावी अथवा अभिनययुक्त असे छेदन नाट्यविधानानुसार करावे.

### ❖ सौष्ठवाचे महत्त्व आणि लक्षण ❖

अङ्गसौष्ठवसंयुक्तैरङ्गहारैर्विभूषितम् ॥ ८८ ॥
व्यायामं कारयेत्सम्यग्लयतालसमन्वितम् ।
सौष्ठवे हि प्रयत्नस्तु कार्यो व्यायामवेदिभि: ॥ ८९ ॥

पदच्छेद: - अङ्गसौष्ठवसंयुक्तै: अङ्गहारै: विभूषितम् ॥ ८८ ॥
व्यायामं कारयेत् सम्यक् लयतालसमन्वितम् ।
सौष्ठवे हि प्रयत्न: तु कार्य: व्यायामवेदिभि: ॥ ८९ ॥

अन्वय: - अङ्गसौष्ठवसंयुक्तै: अङ्गाहारै: विभूषितं सम्यक् लयतालसमन्वितं व्यायामं कारयेत् । व्यायामवेदिभि: सौष्ठवे प्रयत्न: कार्य: ।

अर्थ - सौष्ठवयुक्त अंगानी अंगहाराद्वारे विभूषित ताल आणि लय यांनी समन्वित व्यायाम म्हणजेच चारींचा प्रयोग करावा. तसेच चारींचा अभ्यास करणाऱ्यांनी सौष्ठवासाठी प्रयत्नपूर्वक शरीरामध्ये सौष्ठव आणावे.

सौष्ठवं लक्षणं प्रोक्तं वर्तनाक्रमयोजितम् ।
शोभा सर्वैव नित्यं हि सौष्ठवं समुपाश्रिता ॥ ९० ॥
न हि सौष्ठवहीनाङ्ग: शोभते नाट्यनृत्तयो: ।

पदच्छेद :- सौष्ठवं लक्षणं प्रोक्तं वर्तनाक्रमयोजितम् |
शोभा सर्वा एव नित्यं हि सौष्ठवं समुपाश्रिता || ९० ||
न हि सौष्ठवहीनाङ्ग : शोभते नाट्यनृत्तयो : |

अन्वय : - वर्तनाक्रमयोजितं सौष्ठवं लक्षणं प्रोक्तम् | सौष्ठवे सर्वा एव शोभा नित्यं समुपाश्रिता | नाट्यनृत्तयो : सौष्ठवहीनाङ्ग : न हि शोभते |

अर्थ - अशाप्रकारे क्रमानुसार सांगितलेल्या वर्तनाच्या (करवर्तन इ. च्या) योगाने सौष्ठवाचे लक्षण सांगितले आहे. कारण नाट्याची सारी शोभा सौष्ठवावरच आधारित आहे. नाट्य आणि नृत्तामध्ये सौष्ठवहीन शरीर कधीच शोभून दिसत नाही.

अचञ्चलमकुब्जं च सन्नगात्रं तथैव च |
नात्युच्चं चलपादं च सौष्ठवाङ्गं प्रयोजयेत् || ९१ ||

पदच्छेद :- अचञ्चलम् अकुब्जं च सन्नगात्रं तथैव च |
न अत्युच्चं चलपादं च सौष्ठवाङ्गं प्रयोजयेत् || ९१ ||

अन्वय : - अचञ्चलम्, अकुब्जं, सन्नगात्रं, न अत्युच्चं चलपादं च सौष्ठवाङ्गं प्रयोजयेत् |

अर्थ - ज्यात शरीर चंचल नाही, कुबडे नाही आणि स्तब्धदेखील नाही तसेच ज्यात पाय अधिक उंचही नाहीत आणि अधिक वाकलेले देखील नाहीत, अशा सौष्ठवपूर्ण अंगाचा प्रयोग करावा.

कटी कर्णसमा यत्र कूर्परांसशिरस्तथा |
समुन्नतमुरश्चैव सौष्ठवं नाम तद्भवेत् || ९२ ||

पदच्छेद :- कटी कर्णसमा यत्र कूर्पर-अंस-शिर : तथा |
समुन्नतम् उर : च एव सौष्ठवं नाम तत् भवेत् || ९२ ||

अन्वय : - यत्र कटी कर्णसमा तथा कूर्परांसशिर : अपि, समुन्नतम् उर : च तद् नाम सौष्ठवं भवेत् |

अर्थ - ज्यात कंबर व कान समान रेषेत असतात आणि कोपर, खांदे आणि डोके देखील तसेच असतात आणि वक्ष:स्थल वर उचललेले असते त्यास 'सौष्ठव' असे म्हणतात .

अत्र नृत्यं प्रयत्नो हि विधेयो मध्यमोत्तमैः ॥ ९३ ॥
नाट्यं नृत्तं च सर्वं हि सौष्ठवे संप्रतिष्ठितम् ।

पदच्छेद : - अत्र नित्यं प्रयत्नः हि विधेयः मध्यम-उत्तमैः ॥ ९३ ॥
नाट्यं नृत्तं च सर्वं हि सौष्ठवे संप्रतिष्ठितम् ।

अन्वय : - अत्र मध्यमोत्तमैः नित्यं प्रयत्नः विधेयः । सौष्ठवे सर्वं नाट्यं नृत्तं च संप्रतिष्ठितम् ।

अर्थ - याठिकाणी सौष्ठवयुक्त शरीरासाठी उत्तम आणि मध्यम पुरुषांनी नेहमी प्रयत्न केला पाहिजे . कारण नाट्य आणि नृत्त सर्वच सौष्ठवामध्येच प्रतिष्ठित आहेत .

### ❖ चतुरश्राचे लक्षण ❖

कटीनाभिचरौ हस्तौ वक्षश्चैव समुन्नतम् ॥ ९४ ॥
वैष्णवं स्थानमित्यङ्गं चतुरश्रमुदाहृतम् ।

पदच्छेद : - कटीनाभिचरौ हस्तौ वक्षः च एव समुन्नतम् ॥ ९४ ॥
वैष्णवं स्थानम् इति अङ्गं चतुरश्रम् उदाहृतम् ।

अन्वय : - कटीनाभिचरौ हस्तौ, समुन्नतं वक्षः, वैष्णवं स्थानं च (तत्)अङ्गं चतुरश्रम् (इति) उदाहृतम् ।

अर्थ - वैष्णवस्थानात जेव्हा कंबर आणि नाभीवर दोन्ही हात संचार करणारे असतात आणि वक्ष:स्थल समुन्नत असते तसेच वैष्णव नावाचे स्थानक असते त्या अंगास 'चतुरश्र' अंग असे म्हटले जाते .

### ❖ धनुष्यासंबंधीची चार करणे ❖

परिमार्जनमादानं सन्धानं मोक्षणं तथा ॥ ९५ ॥
धनुषस्तु प्रयोक्तव्यं करणं तु चतुर्विधम् ।

पदच्छेद : - परिमार्जनम् आदानं सन्धानं मोक्षणं तथा ॥ ९५ ॥
धनुष : तु प्रयोक्तव्यं करणं तु चतुर्विधम् ।

अन्वय : - धनुष : करणं चतुर्विधं प्रयोक्तव्यं - परिमार्जनम् , आदानं, सन्धानं तथा मोक्षणं च ।

अर्थ - परिमार्जन, आदान, संधान आणि मोक्षण ही चार प्रकारची कर्मे धनुष्याच्या प्रसंगी वापरावी .

प्रमार्जनं परामर्श आदानं ग्रहणक्रिया ॥ ९६ ॥
सन्धानं शरविन्यासो विक्षेपो मोक्षणं भवेत् ।

पदच्छेद : - प्रमार्जनं परामर्श : आदानं ग्रहणक्रिया ॥ ९६ ॥
सन्धानं शरविन्यास : विक्षेप : मोक्षणं भवेत् ।

अन्वय : - प्रमार्जनं परामर्श :, आदानं ग्रहणक्रिया, सन्धानं शरविन्यास : , मोक्षणं विक्षेप : च भवेत् ।

अर्थ - यात 'परिमार्जन' याचा अर्थ आहे परामर्श करणे अर्थात धनुष्य स्वच्छ करणे .
धनुष्य ग्रहण करणे म्हणजे 'आदान' होय .
बाण धनुष्यावर चढविणे म्हणजे 'संधान' आणि
बाण सोडणे म्हणजे 'मोक्षण' होय .

## ❖ व्यायामविधान ❖

तैलाभ्यक्तेन गात्रेण यवागूमृदितेन च ॥ ९७ ॥
व्यायामं कारयेद्धीमान् भित्तावाकाशिके तथा ।

पदच्छेद : - तैलाभ्यक्तेन गात्रेण यवागू-मृदितेन च ॥ ९७ ॥
व्यायामं कारयेत् धीमान् भित्तौ आकाशिके तथा ।

अन्वय : - धीमान् तैलाभ्यक्तेन गात्रेण यवागूमृदितेन च भित्तौ तथा आकाशिके व्यायामं कारयेत् ।

अर्थ - अभिनेत्याने शरीराला मालिश करून आणि ज्वारीच्या पिठाचे उटणे लावून जमिनीवर किंवा मोकळ्या हवेत व्यायाम केला पाहिजे .

योग्यायां मातृका भित्तिस्तस्माद्भित्तिं समाश्रयेत् ॥ ९८ ॥
भित्तौ प्रसारिताङ्गं तु व्यायामं कारयेन्नरम् ।

पदच्छेद :- योग्यायां मातृका भित्ति : तस्मात् भित्तिं समाश्रयेत् ॥ ९८ ॥
भित्तौ प्रसारिताङ्गं तु व्यायामं कारयेत् नरम् ।

अन्वय : - योग्यायां मातृका भित्ति : तस्मात् भित्तिं समाश्रयेत् । भित्तौ प्रसारिताङ्गं नरं व्यायामं कारयेत् ।

अर्थ - व्यायामासाठी जमीन विशेष उपयोगी असते . त्यामुळे व्यायाम जमिनीवर करावा . तसेच जमिनीवर शरीर पसरवून माणसाने व्यायाम करावा .

## ❖ नस्य आणि बस्ती ❖

बलार्थं च निषेवेत नस्यं बस्तिविधिं तथा ॥ ९९ ॥
स्निग्धान्यन्नानि च तथा रसकं पानकं तथा ।

पदच्छेद :- बलार्थं च निषेवेत नस्यं बस्तिविधिं तथा ॥ ९९ ॥
स्निग्धानि अन्नानि च तथा रसकं पानकं तथा ।

अन्वय : - बलार्थं नस्यं तथा च बस्तिविधिं निषेवेत । अन्यानि स्निग्धानि तथा च रसकं तथा पानकं (निषेवेत) ।

अर्थ - बलसंग्रहाकरीता 'नस्य' आणि 'बस्ति' या विधी कराव्यात . इतर स्निग्ध अन्न, रसाळ पदार्थ आणि फळांचा रस इत्यादींचे सेवन करावे .

## ❖ आहार ❖

आहाराधिष्ठिता : प्राणा : प्राणे योग्या : प्रतिष्ठिता : ॥ १०० ॥
तस्माद्योग्याप्रसिध्यर्थमाहारे यत्नवान् भवेत् ।

पदच्छेद :- आहार-अधिष्ठिता : प्राणा : प्राणे योग्या : प्रतिष्ठिता : ‖ १०० ‖
तस्मात् योग्याप्रसिद्ध्यर्थम् आहारे यत्नवान् भवेत् |

अन्वय : - आहाराधिष्ठिता : प्राणा : | प्राणे योग्या : प्रतिष्ठिता : | तस्मात् योग्याप्रसिध्यर्थम् आहारे यत्नवान् भवेत् |

अर्थ - प्राण आहाराश्रित आहे आणि प्राणांवरच अभ्यास अवलंबून आहे . त्यामुळे (युद्धाच्या आणि व्यायामाच्या) अभ्यासाच्या सिद्धीसाठी आहाराविषयी पूर्ण काळजी घेतली पाहिजे .

❖ व्यायामाचे नियम ❖

अशुद्धकायं प्रक्लान्तमतीव क्षुत्पिपासितम् ‖ १०१ ‖
अतिपीतं तथा भुक्तं व्यायामं नैव कारयेत् |

पदच्छेद :- अशुद्धकायं प्रक्लान्तम् अतीव क्षुत्पिपासितम् ‖ १०१ ‖
अतिपीतं तथा भुक्तं व्यायामं नैव कारयेत् |

अन्वय : - अशुद्धकार्य, प्रक्लान्तम्, अतीव क्षुत्पिपासितम्, अतिपीतं तथा भुक्तं च व्यायामं नैव कारयेत् |

अर्थ - ज्याचे शरीर स्वच्छ नाही, जो थकलेला आहे असा व्यक्तीने, भूक व तहानेने व्याकूळ झालेल्या, अधिक खाल्लेल्या किंवा अधिक पाणी प्यायलेल्या व्यक्तीने व्यायाम करू नये .

अचलैर्मधुरैर्गात्रैश्चतुरश्रेण वक्षसा ‖ १०२ ‖
व्यायामं कारयेद्धीमान्नरमङ्गक्रियार्थिनम् |

पदच्छेद :- अचलै : मधुरै : गात्रै : चतुरश्रेण वक्षसा ‖ १०२ ‖
व्यायामं कारयेत् धीमान् नरम् अङ्गक्रियार्थिनम् |

अन्वय: - धीमान् अङ्गक्रियार्थिनं नरम् अचलै: मधुरै: गात्रै:, चतुरश्रेण वक्षसा च व्यायामं कारयेत्|

अर्थ - बुद्धिमान मनुष्याने अंगसिद्धीची इच्छा असणाऱ्या, अचल तसेच मधुर शरीर असणाऱ्या आणि वक्ष:स्थल चतुरश्र असणाऱ्या माणसाकडून व्यायाम करवून घ्यावा .

एवं व्यायामसंयोगे कार्यश्चारीकृतो विधि: || १०३ ||
अत ऊर्ध्वं प्रवक्ष्यामि मण्डलानां विकल्पनम् |


पदच्छेद: - एवं व्यायामसंयोगे कार्य: चारीकृत: विधि: || १०३ ||
अत: ऊर्ध्वं प्रवक्ष्यामि मण्डलानां विकल्पनम् |

अन्वय: - एवं व्यायामसंयोगे चारीकृत: विधि: कार्य: | अत: ऊर्ध्वं मण्डलानां विकल्पनं प्रवक्ष्यामि |

अर्थ - अशा प्रकारे व्यायामाच्या योगाने चारी कराव्यात . आता, यानंतर मंडलप्रकारांचे वर्णन करीन .

|| इति भारतीये नाट्यशास्त्रे चारीविधानो नाम दशमोऽध्याय: ||
|| अशा प्रकारे भारतीय नाट्यशास्त्रातील 'चारीविधान' नावाचा दहावा अध्याय समाप्त ||

# अकरावा अध्याय
# मंडलविधान



# अकरावा अध्याय

## मंडलविधान

एताश्चार्यो मया प्रोक्ता यथावच्छस्त्रमोक्षणे |
चारीसंयोगजानीह मण्डलानि निबोधत || १ ||

पदच्छेद: - एता: चार्य: मया प्रोक्ता: यथावत् शस्त्रमोक्षणे |
चारीसंयोगजानि इह मण्डलानि निबोधत || १ ||

अन्वय: - मया शस्त्रमोक्षणे एता: चार्य: यथावत् प्रोक्ता: | इह चारीसंयोगजानि मण्डलानि निबोधत |

अर्थ - मी शस्त्रमोक्षणाप्रसंगी या चारींचे विधानानुसार वर्णन केले आहे . आता या अध्यायात याच चारींपासून बनणाऱ्या मंडलांना समजून घ्या .

❖ आकाशगामी मंडल ❖

अतिक्रान्तं विचित्रं च तथा ललितसञ्चरम् |
सूचीविद्धं दण्डपादं विहृतालातके तथा || २ ||
वामबन्धं सललितं क्रान्तं चाकाशगानि च |
मण्डलानि द्विजश्रेष्ठा:! भूमिगानि निबोधत || ३ ||

पदच्छेद: - अतिक्रान्तं विचित्रं च तथा ललितसञ्चरम् |
सूचीविद्धं दण्डपादं विहृत-अलातके तथा || २ ||
वामबन्धं सललितं क्रान्तं च आकाशगानि च |
मण्डलानि द्विजश्रेष्ठा: ! भूमिगानि निबोधत || ३ ||

अन्वय: - अतिक्रान्तं विचित्रं ललितसञ्चरं सूचीविद्धं दण्डपादं विहृतालातके वामबन्धं सलिलतं क्रान्तं आकाशगानि (मण्डलानि) | द्विजश्रेष्ठा: ! भूमिगानि मण्डलानि निबोधत |

अर्थ - अतिक्रांत, विचित्र, ललित, संचर, सूचीविद्ध, दंडपाद, विहृत, अलातक, वामबंध ललित तसेच क्रांत अशी दहा आकाशगामी मंडले आहेत . हे द्विजश्रेष्ठांनो, आता भूमिगत मंडलांना समजून घ्या .

### ❖ भौममंडल ❖

भ्रमरास्कन्दिते स्यातामावर्तं च ततः परम् |
समोत्सारितमप्याहुरेडकाक्रीडितं तथा || ४ ||
अडिड्तं शकटास्यं च तथाऽध्यर्धकमेव च |
पिष्टकुट्टं च विज्ञेयं तथा चाषगतं पुनः || ५ ||
एतान्यपि दशोक्तानि भूमिगानीह नामतः |
अतः परं प्रवक्ष्यामि लक्षणानि यथाक्रमम् || ६ ||

पदच्छेदः - भ्रमर-आस्कन्दिते स्याताम् आवर्तं च ततः परम् |
समोत्सारितम् अपि आहुः एडकाक्रीडितं तथा || ४ ||
अडिड्तं शकटास्यं च तथा अध्यर्धकम् एव च |
पिष्टकुट्टं च विज्ञेयं तथा चाषगतं पुनः || ५ ||
एतानि अपि दश उक्तानि भूमिगानि इह नामतः |
अतः परं प्रवक्ष्यामि लक्षणानि यथाक्रमम् || ६ ||

अन्वयः - भ्रमरास्कन्दिते आवर्तं समोत्सारितम् एडकाक्रीडितम् अडिड्तं शकटास्यम् अध्यर्धकं पिष्टकुट्टं विज्ञेयं चाषगतं च विज्ञेयम् | इह एतानि दश भूमिगानि नामतः उक्तानि | अतः परं यथाक्रमं लक्षणानि प्रवक्ष्यामि |

अर्थ - भ्रमर, आस्कंदित, आवर्त, समोत्सारित, एडकाक्रीडित, अडि्डत, शकटास्य, अध्यर्धक, पिष्टकुट्ट आणि चाषगत ही दहा भूमिगत मंडलांची नावे आहेत. यानंतर मी क्रमाने यांची लक्षणे सांगतो.

### ❖ अतिक्रांतमंडल ❖

आद्यं पादं च जनितं कृत्वोद्वाहितमाचरेत्
अलातं वामकं चैव पार्श्वक्रान्तं च दक्षिणम् || ७ ||

[सूचीवामं पुनश्चैव पार्श्वक्रान्तं च दक्षिणम् |
सूचीं वामक्रमं दद्यादपक्रान्तं च दक्षिणम् || ८ ||]
सूचीं वामं पुनश्चैव त्रिकं च परिवर्तयेत् |
तथा दक्षिणमुद्वृत्तमलातञ्चैव वामकम् || ९ ||
परिच्छिन्नं तु कर्तव्यं बाह्यभ्रमरकेण हि |
अतिक्रान्तं पुनर्वामं दण्डपादं च दक्षिणम् || १० ||
विज्ञेयमेतद्व्यायामे त्वतिक्रान्तं तु मण्डलम् |

पदच्छेद: - आद्यं पादं च जनितं कृत्वा उद्वाहितम् आचरेत् |
अलातं वामकं च एव पार्श्वक्रान्तं च दक्षिणम् || ७ ||
सूचीवामं पुन: च एव पार्श्वक्रान्तं च दक्षिणम् |
सूचीं वामक्रमं दद्यात् अपक्रान्तं च दक्षिणम् || ८ ||]
सूचीं वामं पुन: च एव त्रिकं च परिवर्तयेत् |
तथा दक्षिणम् उद्वृत्तम् अलातं च एव वामकम् || ९ ||
परिच्छिन्नं तु कर्तव्यं बाह्यभ्रमरकेण हि |
अतिक्रान्तं पुन: वामं दण्डपादं च दक्षिणम् || १० ||
विज्ञेयम् एतत् व्यायामे तु अतिक्रान्तं तु मण्डलम् |

अन्वय: - आद्यं दक्षिणं पादं च जनितं कृत्वा उद्वाहितम् आचरेत् | वामकम् अलातं दक्षिणं पार्श्वक्रान्तम् (आचरेत्) च ||[ पुन: सूचीवामं (कृत्वा) दक्षिणं पार्श्वक्रान्तं (दद्यात्) च| वामक्रमं सूचीं दद्यात् अपक्रान्तं दक्षिणं (दद्यात्) च | पुन: वामं सूचीं (कृत्वा) त्रिकं परिवर्तयेत् | तथा दक्षिणम् उद्वृत्तं ( कृत्वा ) वामकम् अलातं (दद्यात्)| बाह्यभ्रमरकेण परिच्छिन्नं कर्तव्यम् | पुन: वामम् अतिक्रान्तं ( कृत्वा ) दक्षिणं दण्डपादं (दद्यात्) च | व्यायामे एतद् अतिक्रान्तं मण्डलं विज्ञेयम् |

अर्थ - प्रथम उजव्या पायाने जनिता चारी करून उद्वाहित करावे. नंतर डाव्या पायाने अलात चारी आणि उजव्या पायाने पार्श्वक्रांता चारी करावी. मग डाव्या पायाने सूची चारी आणि उजव्या पायाने पार्श्वक्रांता चारी करावी. मग डाव्या पायाने सूची चारी करून उजव्या पायाने अपक्रांता चारी करावी. पुन्हा डाव्या पायाने सूची चारी करून त्रिकाचे परिवर्तन करावे. त्यानंतर उजव्या पायास उद्वृत्त करून डाव्या पायाने अलाता चारीचा प्रयोग करावा. नंतर बाह्यभ्रमराद्वारे परिच्छिन्न (परिवर्तन) करावे. यानंतर डाव्या पायाला अतिक्रांता चारीमध्ये ठेवून उजव्या पायाने दंडपादा चारी करावी. अशाप्रकारे, चारींद्वारे हे अतिक्रांत मंडल समजून घ्यावे.

## ❖ विचित्रमंडल ❖

आद्यं तु जनितं कृत्वा तेनैव च निकुट्टकम् ॥ ११ ॥
आस्पन्दितं तु वामेन पार्श्वक्रान्तं च दक्षिणम् ।
वामं सूचीपदं दद्यादपक्रान्तं च दक्षिणम् ॥ १२ ॥
भुजङ्गत्रासितं वाममतिक्रान्तं च दक्षिणम् ।
उद्वृत्तं दक्षिणं चैव ह्यलातं चैव वामकम् ॥ १३ ॥
पार्श्वक्रान्तं पुनः सव्यं सूचीवामक्रमं तथा ।
विक्षेपो दक्षिणस्य स्यादपक्रान्तश्च वामकः ॥ १४ ॥
[बाह्यभ्रमरकं चैव विक्षेपं चैव योजयेत् ।]
विज्ञयमेतद्व्यायामे विचित्रं नाम मण्डलम् ॥ १५ ॥

पदच्छेदः - आद्यं तु जनितं कृत्वा तेन एव च निकुट्टकम् ॥ ११ ॥
आस्पन्दितं तु वामेन पार्श्वक्रान्तं च दक्षिणम् ।
वामं सूचीपदं दद्यात् अपक्रान्तं दक्षिणम् ॥ १२ ॥
भुजङ्गत्रासितं वामम् अतिक्रान्तं च दक्षिणम् ।

उद्‌वृत्तं दक्षिणं च एव हि अलातं च एव वामकम् ॥ १३ ॥
पार्श्वक्रान्तं पुनः सव्यं सूचीवामक्रमं तथा ।
विक्षेपः दक्षिणस्य स्यात् अपक्रान्तः च वामकः ॥ १४ ॥
[बाह्यभ्रमरकं च एव विक्षेपं च एव योजयेत् ।]
विज्ञेयम् एतत् व्यायामे विचित्रं नाम मण्डलम् ॥ १५ ॥

अन्वयः - आद्यं दक्षिणं जनितं कृत्वा तेन एव निकुट्टकं (दद्यात्)। वामेन आस्पन्दितं (कृत्वा) दक्षिणं पार्श्वक्रान्तं (दद्यात्) च । वामं सूचीपदं दद्यात् दक्षिणम् अपक्रान्तं (दद्यात्) च । वामं भुजङ्गत्रासितं (कृत्वा) दक्षिणम् अतिक्रान्तं (दद्यात्) च । दक्षिणम् उद्वृत्तं वामकम् अलातं (दद्यात्) च । पुनः सव्यं पार्श्वक्रान्तं (कृत्वा) वामक्रमं सूचीं (दद्यात्) च । दक्षिणस्य विक्षेपः स्यात् वामकम् अपक्रान्तं (स्यात्) च । बाह्यभ्रमरकं विक्षेपं च योजयेत् । व्यायामे एतत् अतिक्रान्तं मण्डलं विज्ञेयम् ।

अर्थ - प्रथम उजव्या पायाला जनिताचारीमध्ये ठेवून नंतर त्यानेच निकुट्टक करावे. त्यानंतर डाव्या पायाने स्पंदिताचारी करून उजव्या पायाने पार्श्वक्रांताचारीचा प्रयोग करावा. मग डाव्या पायाला सूचीचारीमध्ये ठेवून उजव्या पायाने अपक्रांताचारी करावी. मग डाव्या पायाला भुजंगत्रासिता चारीमध्ये ठेवून उजव्या पायाने अतिक्रांताचारी करावी. नंतर उजव्या पायाने उद्वृत्ता चारी आणि डाव्या पायाने अलाता चारी करावी. त्यानंतर उजव्या पायाने पार्श्वक्रांताचारी तसेच त्याच क्रमाने डाव्या पायाने सूचीचारी करावी. मग उजव्या पायाने विक्षेप करून डाव्या पायाला अपक्रांताचारीमध्ये ठेवावे. नंतर बाह्यभ्रमरक व विक्षेप यांची योजना करावी. अशा प्रकारे वरील चारींद्वारे विचित्रमंडल समजून घ्यावे.

### ❖ ललितसंचरमंडल ❖

कृत्वोर्ध्वजानु चरणमाद्यं सूचीं प्रयोजयेत् ।
अपक्रान्तं पुनर्वाम आद्यः पार्श्वगतो भवेत् ॥ १६ ॥

वामं सूचीं पुनर्दद्यात्त्रिकञ्च परिवर्तयेत् |
पार्श्वक्रान्तं पुनश्चाद्यमतिक्रान्तं च वामकम् || १७ ||
सूचीमाद्यक्रमं कृत्वा ह्यपक्रान्तं च वामकम् |
पार्श्वक्रान्तं पुनश्चाद्यमतिक्रान्तं च वामकम् || १८ ||
परिच्छिन्नं च कर्तव्यं बाह्यभ्रमरकेण च |
एष चारीप्रयोगस्तु कार्यो ललितसञ्चरे || १९ ||

पदच्छेद : - कृत्वा ऊर्ध्वजानु चरणम् आद्यं सूचीं प्रयोजयेत् |
अपक्रान्तं पुन : वाम : आद्य : पार्श्वगत : भवेत् || १६ ||
वामं सूची पुन : दद्यात् त्रिकं च परिवर्तयेत् |
पार्श्वक्रान्तं पुन : च आद्यम् अतिक्रान्तं च वामकम् || १७ ||
सूचीम् आद्यक्रमं कृत्वा हि अपक्रान्तं च वामकम् |
पार्श्वक्रान्तं पुन : च आद्यम् अतिक्रान्तं च वामकम् || १८ ||
परिच्छिन्नं च कर्तव्यं बाह्यभ्रमरकेण च |
एष चारीप्रयोग : तु कार्य : ललितसञ्चरे || १९ ||

अन्वय : - आद्यं दक्षिणं चरणम् ऊर्ध्वजानु (कृत्वा) सूचीं प्रयोजयेत् | पुन : वाम : अपक्रान्तं (कृत्वा) आद्य: पार्श्वगत: भवेत् | पुन: वामं सूचीं दद्यात् त्रिकं परिवर्तयेत् च | पुन: आद्यं पार्श्वक्रान्तं (कृत्वा) वामकम् अतिक्रान्तं दद्यात् च | आद्यक्रमं सूचीं कृत्वा वामकम् अपक्रान्तं दद्यात् | पुन: आद्यं पार्श्वक्रान्तं (कृत्वा) वामकम् अतिक्रान्तं दद्यात् च | बाह्यभ्रमणकेन परिच्छिन्नं कर्तव्यम् | ललितसञ्चरे एष : चारीप्रयोग : कार्य : |

अर्थ - प्रथम उजवा पाय ऊर्ध्वजानु करून सूचीचारीमध्ये ठेवावा. यानंतर डाव्या पायाने अपक्रांताचारी करून उजवा पाय पार्श्वक्रांताचारीमध्ये ठेवावा. मग डाव्या पायाला सूची चारीमध्ये ठेवून त्रिकाचे परिवर्तन करावे. मग उजव्या पायाने पार्श्वक्रांता चारी करून डाव्या पायाने अतिक्रांता चारीचा प्रयोग करावा. मग उजव्या पायाने सूचीचारी करून

डाव्या पायाला अपक्रांताचारीमध्ये ठेवावे. मग उजव्या पायाला पार्श्वक्रांताचारीमध्ये ठेवून डाव्या पायाने अतिक्रांताचारी करावी. मग बाह्यभ्रमरकांद्वारे परिवर्तन करावे. अशाप्रकारे ललितसंचर मंडलाद्वारे विविध चारींचा प्रयोग करावा.

### ❖ सूचीविद्धमंडल ❖

सूचीं वामपदं दद्यात्त्रिकञ्च परिवर्तयेत् |
पार्श्वक्रान्तः पुनश्चाद्यो वामोऽतिक्रान्त एव च || २० ||
सूचीमाद्यं पुनर्दद्यादपक्रान्तञ्च वामकम् |
पार्श्वक्रान्तं पुनश्चाद्यं सूचीविद्धे तु मण्डले || २१ ||

पदच्छेद :- सूचीं वामपदं दद्यात् त्रिकं च परिवर्तयेत् |
पार्श्वक्रान्तः पुनः च आद्यः वामः अतिक्रान्तः एव च || २० ||
सूचीम् आद्यं पुनः दद्यात् अपक्रान्तं च वामकम् |
पार्श्वक्रान्तं पुनः च आद्यं सूचीविद्धे तु मण्डले || २१ ||

अन्वय : - सूचीवामपदं दद्यात् त्रिकं परिवर्तयेत् च | पुनः आद्यः पार्श्वक्रान्तः वामः अतिक्रान्तः एव च | पुनः आद्यं सूचीं (कृत्वा) वामकम् अतिक्रान्तं दद्यात् च | आद्यं पार्श्वक्रान्तं सूचीविद्धे मण्डले (भवति) |

अर्थ - डाव्या पायाला सूची चारीत ठेवून त्रिक परिवर्तन करावे. नंतर उजव्या पायाने पार्श्वक्रांताचारी करून डावा पाय अतिक्रांताचारीत ठेवावा. नंतर उजव्या पायाने सूचीचारीचा वापर करून डाव्या पायाने अपक्रांताचारी करावी. त्यानंतर उजव्या पायाने पार्श्वक्रांता चारी केली की, सूचीविद्ध नावाचे मंडल होते.

### ❖ दंडपादमंडल ❖

आद्यस्तु जनितो भूत्वा स च दण्डक्रमो भवेत् |
वामसूचीं पुनर्दद्यात्त्रिकञ्च परिवर्तयेत् || २२ ||

उद्वृत्तो दक्षिणश्च स्यादलातश्चैव वामकः |
पार्श्वक्रान्तः पुनश्चाद्यो भुजङ्गत्रासितस्तथा || २३ ||
अतिक्रान्तः पुनर्वामो दण्डपादस्तु दक्षिणः |
वामः सूचीत्रिकावर्तो दण्डपादे तु मण्डले || २४ ||

पदच्छेदः - आद्यः तु जनितः भूत्वा स च दण्डक्रमः भवेत् |
वामसूचीं पुनः दद्यात् त्रिकं च परिवर्तयेत् || २२ ||
उद्वृत्तः दक्षिणः च स्यात् अलातः चैव वामकः |
पार्श्वक्रान्तः पुनः च आद्यः भुजङ्गत्रासितः तथा || २३ ||
अतिक्रान्तः पुनः वामः दण्डपादः तु दक्षिणः |
वामः सूचीत्रिकावर्तः दण्डपादे तु मण्डले || २४ ||

अन्वयः - सूचिविद्धे मण्डले पुनः आद्यं पार्श्वक्रान्तं (दद्यात्)| आद्यः जनितः भूत्वा दण्डक्रमः भवेत् च | पुनः वामसूचिं दद्यात् | त्रिकं परिवर्तयेत् च | दक्षिणः उद्धृतः स्यात् | वामकः अलातः च | पुनः आद्यः पार्श्वक्रान्तः तथा भुजङ्गत्रासितः (कार्यः)| पुनः वामः अतिक्रान्तः, दक्षिणः दण्डपादः च (कार्यः)| वामः सूचीत्रिकावर्तः च दण्डपादे मण्डले (कर्तव्यः) |

अर्थ - प्रथम उजव्या पायाने जनिताचारीचा प्रयोग करून मग दंडपादा चारी करावी . मग डाव्या पायाने सूचीचारीचा प्रयोग करून त्रिक परिवर्तन करावे . मग उजव्या पायाने उद्वृत्ताचारी करून डाव्या पायाने अलाताचारीचा प्रयोग करावा . मग उजवा पाय पार्श्वक्रांता चारीत ठेवून भुजंगत्रासिता चारीचा प्रयोग करावा . मग डाव्या पायाने अतिक्रांताचारी करून उजवा पाय दंडपादाचारीमध्ये ठेवावा . मग डाव्या पायाने सूचीचारी करून त्रिकपरिवर्तन केल्यास 'दंडपाद' मंडल होते .

## ❖ विहृतमंडल ❖

आद्यं तु जनितं कृत्वा तेनैव च निकुट्टकम् |
आस्पन्दितं च वामेन ह्युद्वृत्तं दक्षिणेन च || २५ ||

अलातं वामकं पादं सूचीं दद्यात्तु दक्षिणम् |
पार्श्वक्रान्तः पुनर्वाम आक्षिप्तो दक्षिणस्तथा || २६ ||
समावर्त्य त्रिकं चैव दण्डपादं प्रसारयेत् |
सूचीं वामपदं दद्यात्त्रिकं तु परिवर्तयेत् || २७ ||
भुजङ्गत्रासितश्चाद्यो वामोऽतिक्रान्त एव च |
एष चारीप्रयोगस्तु विहृते मण्डले भवेत् || २८ ||

पदच्छेद : - आद्यं तु जनितं कृत्वा तेन एव च निकुट्टकम् |
आस्पन्दितं च वामेन हि उद्वृत्तं दक्षिणेन च || २५ ||
अलातं वामकं पादं सूचीं दद्यात् तु दक्षिणम् |
पार्श्वक्रान्त : पुन : वाम आक्षिप्त : दक्षिण : तथा || २६ ||
समावर्त्य त्रिकं च एव दण्डपादं प्रसारयेत् |
सूचीं वामपदं दद्यात् त्रिकं तु परिवर्तयेत् || २७ ||
भुजङ्गत्रासित : च आद्य : वाम : अतिक्रान्त : एव च |
एष : चारीप्रयोग : तु विहृते मण्डले भवेत् || २८ ||

अन्वय : - आद्यं (दक्षिणं) जनितं कृत्वा तेन एव निकुट्टकं (कुर्यात्) | वामेन आस्पन्दितं (कृत्वा) दक्षिणेन उद्वृत्तं (दद्यात्)| वामकम् अलातं पादं दक्षिणं सूचीं दद्यात् | पुनः वामः पार्श्वक्रान्तः (कार्यः)| तथा दक्षिणः आक्षिप्तः कार्यः | त्रिकं समावर्त्य दण्डपादं प्रसारयेत् | वामपादं सूचीं (दद्यात्), त्रिकं परिवर्तयेत् च | आद्य : भुजङ्गत्रासित :, वाम : अतिक्रान्त : एव च | एष : चारीप्रयोग : तु विहृते मण्डले भवेत् |

अर्थ - प्रथम उजव्या पायाने जनिता चारी करावी व त्याच पायाने नंतर निकुट्टक म्हणजेच तलसंचरपाद करावा . नंतर डाव्या पायाने स्पंदिताचारी करून उजव्या पायाने उद्वृत्ता चारी करावी . त्यानंतर डाव्या पायाने अलाताचारी आणि उजव्या पायाने सूचीचारी करावी . पुन्हा डाव्या पायाने पार्श्वक्रांताचारी करून उजव्या पायाने आक्षिप्ता चारी

करावी. मग त्रिक परिवर्तन करून दंडपादा चारी करावी. यानंतर पुन्हा डाव्या पायाला सूचीचारीमध्ये ठेवून त्रिक परिवर्तन करावे. मग उजवा पाय भुजंगत्रासिता चारीयुक्त करून डाव्या पायाला अतिक्रांताचारीमध्ये ठेवावे. अशाप्रकारे विहृत मंडलात चारींचा प्रयोग करावा.

### ❖ अलातकमंडल ❖

सूचीमाद्यक्रमं दद्यादपक्रान्तं च वामकम् |
पार्श्वक्रान्तः पुनश्चाद्यो ह्यलातश्चैव वामकः || २९ ||
[भ्रान्त्वा चारीभिरेताभिः पर्यायेणाथ मण्डलम् |
षट्संख्यं सप्तसख्यं वा ललितैः पादविक्रमैः || ३० ||
[आद्यं कुर्यादपक्रान्तमतिक्रान्तं च वामकम् ]
अपक्रान्तः पुनश्चाद्यो वामोऽतिक्रान्त एव च || ३१ ||
पादभ्रमरकश्च स्यादलाते खलु मण्डले |

पदच्छेदः - सूचीम् आद्यक्रमं दद्यात् अपक्रान्तं च वामकम् |
पार्श्वक्रान्तः पुनः च आद्यः हि अलातः च एव वामकः || २९ ||
[भ्रान्त्वा चारीभिः एताभिः पर्यायेण अथ मण्डलम् |
षट्संख्यं सप्तसख्यं वा ललितैः पादविक्रमैः || ३० ||
[आद्यं कुर्यात् अपक्रान्तम् अतिक्रान्तं च वामकम् ]
अपक्रान्तः पुनःच आद्यः वामः अतिक्रान्तः एव च || ३१ ||
पादभ्रमरकः च स्यात् अलाते खलु मण्डले |

अन्वयः - आद्यक्रमं सूचीं दद्यात् | वामकम् अपक्रान्तं दद्यात् | पुनः आद्यः पार्श्वक्रान्तः, वामकः अलातः च | एताभिः चारिभिः पर्यायेण ललितः पादविक्रमैः षट्संख्यं सप्तसंख्यं भ्रान्त्वा मण्डलं कार्यम् | आद्यम् अपक्रान्तं कुर्यात् | वामकम् अतिक्रान्तं च | पुनः आद्यः अपक्रान्तः, वामः अतिक्रान्तः एव च | अलाते मण्डले पादभ्रमरकः स्यात् च |

अर्थ - 'अलात' नावाच्या मंडलामध्ये प्रथम उजव्या पायाने सूची चारी करून डाव्या पायाने अपक्रांताचारी करावी. त्यानंतर उजव्या पायाला पार्श्वक्रांताचारी मध्ये ठेवून डावा पाय अलाताचारीमध्ये ठेवावा. मग ह्या चारींद्वारे क्रमशः ललितपादविक्षेपांनी सहा-सात वेळा फिरून मंडलाची रचना करावी. नंतर उजव्या पायाने अपक्रांताचारी करून डाव्या पायाने अतिक्रांताचारी करावी. त्यानंतर उजव्या पायाने अपक्रांताचारी करून डाव्या पायाला अतिक्रांताचारीमध्ये ठेवावे. नंतर भ्रमरक नावाच्या चारीचा प्रयोग करावा. अशाप्रकारे, अलातक मंडलामध्ये चारींचा प्रयोग होतो.

❖ वामविद्धमंडल ❖

सूचीमाद्यक्रमं कृत्वा ह्यपक्रान्तं च वामकम् ‖ ३२ ‖
आद्यो दण्डक्रमश्चैव सूचीकार्यस्तु वामकः |
कार्यस्त्रिकविवर्तश्च पार्श्वक्रान्तश्च दक्षिणः ‖ ३३ ‖
आक्षिप्तं वामकं कुर्याद्दण्डपादं तु दक्षिणम् |
ऊरूद्वृत्तं च तेनैव कर्तव्यं दक्षिणेन तु ‖ ३४ ‖
सूचीवामक्रमं कृत्वा त्रिकं च परिवर्तयेत् |
अलातश्च भवेद्वामः पार्श्वक्रान्तश्च दक्षिणः ‖ ३५ ‖
अतिक्रातः पुनर्वामो वामबन्धे [विद्धे] तु मण्डले |

पदच्छेदः - सूचीम् आद्यक्रमं कृत्वा हि अपक्रान्तं च वामकम् ‖ ३२ ‖
आद्यः दण्डक्रमः च एव सूचीपादः तु वामकः |
कार्यः त्रिकविवर्तः च पार्श्वक्रान्तः च दक्षिणः ‖ ३३ ‖
आक्षिप्तं वामकं कुर्यात् दण्डपादं तु दक्षिणम् |
ऊरूद्वृत्तं च तेन एव कर्तव्यं दक्षिणेन तु ‖ ३४ ‖
सूचीवामक्रमं कृत्वा त्रिकं च परिवर्तयेत् |

अलात: च भवेत् वाम: पार्श्वक्रान्त: च दक्षिण: || ३५ ||
अतिक्रान्त: पुन: वाम: वामबन्धे [विद्धे] तु मण्डले |

अन्वय: - आद्य: दण्डक्रम:, वामक: सूचीपाद: च (कार्य:)| त्रिकविवर्त: च (कृत्वा) दक्षिण: पार्श्वक्रान्त: कार्य:| वामकम् आक्षिप्तं दक्षिणं दण्डपादं कुर्यात् च | तेन दक्षिणेन एव उरूद्वृत्तं कर्तव्यम् | सूचीवामक्रमं कृत्वा त्रिकं परिवर्तयेत् | वाम: अलात: भवेत् | दक्षिण: पार्श्वक्रान्त: भवेत् च | वामबन्धे मण्डले पुन: वाम: अतिक्रान्त: |

अर्थ - वामबन्ध (वामविद्ध) नामक मंडलामध्ये प्रथम उजव्या पायाने सूचीचारी करून डाव्या पायाने अपक्रांताचारी करावी . त्यानंतर उजव्या पायाला दंडपादाचारीमध्ये ठेवून डाव्या पायाने सूचीचारी करावी . मग त्रिक परिवर्तन करून म्हणजेच भ्रमरीचारीचा प्रयोग करून उजव्या पायाला पार्श्वक्रांता चारीमध्ये ठेवावे . नंतर डाव्या पायाला आक्षिप्ताचारीमध्ये ठेवून उजव्या पायाने दंडपादाचारीचे प्रदर्शन करावे . मग उजव्या पायाने ऊरूद्वृत्ताचारीचा प्रयोग करून डाव्या पायाला सूचीचारीमध्ये ठेवून त्रिक परिवर्तन करावे . नंतर डाव्या पायाला अलाताचारीमध्ये ठेवून उजव्या पायाला पार्श्वक्रांताचारीमध्ये ठेवावे . नंतर डाव्या पायाला अतिक्रांताचारीमध्ये ठेवावे . अशाप्रकारे 'वामविद्ध' मंडल होते .

## ❖ ललितमंडल ❖

सूचीमाद्यक्रमं दद्यादपक्रान्तं च वामकम् || ३६ ||
पार्श्वक्रान्त: पुनश्चाद्यो भुजङ्गत्रासित: स च |
अतिक्रान्त: पुनर्वाम आक्षिप्तो दक्षिणस्तथा || ३७ ||
अतिक्रान्त: पुनर्वाम ऊरूद्वृत्तस्तथैव च |
अलातश्च पुनर्वाम: पार्श्वक्रान्तश्च दक्षिण: || ३८ ||
सूचीवामं पुनर्दद्यादपक्रान्तश्च दक्षिण: |

अतिक्रान्त: पुनर्वाम: कार्यो ललितसंचर: ॥ ३९ ॥
एष पादप्रसारस्तु ललिते मण्डले भवेत् ।

पदच्छेद: - सूचीम् आद्यक्रमं दद्यात् अपक्रान्तं च वामकम् ॥ ३६ ॥
पार्श्वक्रान्त: पुन: च आद्य: भुजङ्गत्रासित: स च ।
अतिक्रान्त: पुन: वाम: आक्षिप्त: दक्षिण: तथा ॥ ३७ ॥
अतिक्रान्त: पुन: वाम: ऊरूद्वृत्त: तथा एव च ।
अलात: च पुन: वाम: पार्श्वक्रान्त: च दक्षिण: ॥ ३८ ॥
सूचीवामं पुन: दद्यात् अपक्रान्त: च दक्षिण: ।
अतिक्रान्त: पुन: वाम: कार्य: ललितसंचर: ॥ ३९ ॥
एष: पादप्रसार: तु ललिते मण्डले भवेत् ।

अन्वय: - आद्यक्रमं सूचीं दद्यात्, वामकं अपक्रान्तं च । पुन: आद्य: पार्श्वक्रान्त: भुजङ्गत्रासित: च कार्य: । पुन: वाम: अतिक्रान्त:, दक्षिण: आक्षिप्त: च । पुन: सूचीवामं दद्यात् । दक्षिण: अपक्रान्त: च कार्य: । पुन: वाम: अतिक्रान्त:, ललितसंचर: कार्य: । एष: पादप्रसार: ललिते मण्डले भवेत् ।

अर्थ - प्रथम उजव्या पायाला सूचीचारीमध्ये ठेवून डाव्या पायाला अपक्रांताचारीमध्ये ठेवावे. नंतर उजव्या पायाला पार्श्वक्रांता चारीमध्ये ठेवून भुजंगत्रासिता चारीचा प्रयोग करावा. मग डाव्या पायाने अतिक्रांता चारी करावी आणि उजव्या पायाने आक्षिप्ता चारी करावी. नंतर डाव्या पायाला अतिक्रांताचारी मध्ये ठेवून त्याचप्रकारे उरूद्वृत्ताचारीचा प्रयोग करावा. मग डाव्या पायाने अलाता चारी आणि उजव्या पायाने पार्श्वक्रांता चारीचा प्रयोग करावा. मग डाव्या पायाला अतिक्रान्ता चारीमध्ये ठेवून ललितसंचर चारीचा प्रयोग करावा. अशाप्रकारे हा पादप्रसार 'ललित' नामक मंडल म्हणून ओळखला जातो.

### ❖ क्रांतमंडल ❖

सूचीमाद्यक्रमं कृत्वा ह्यपक्रान्तं च वामकम् ‖ ४० ‖
पार्श्वक्रान्तं पुनश्चाद्यं वामं पार्श्वक्रमं तथा |
भ्रान्त्वा चारीभिरेताभि: पर्यायेणाथ मण्डलम् ‖ ४१ ‖
वामं सूचीं ततो दद्यादपक्रान्तं च दक्षिणम् |
स्वभावगमने ह्येतन्मण्डलं संविधीयते ‖ ४२ ‖
क्रान्तमेतत्तु विज्ञेयं नामतो नाट्ययोक्तृभि: |

पदच्छेद: - सूचीम् आद्यक्रमं कृत्वा हि अपक्रान्तं च वामकम् ‖ ४० ‖
पार्श्वक्रान्तं पुन: च आद्यं वामं पार्श्वक्रमं तथा |
भ्रान्त्वा चारीभि: एताभि: पर्यायेण अथ मण्डलम् ‖ ४१ ‖
वाम सूची तत: दद्यात् अपक्रान्तं च दक्षिणम् |
स्वभावगमने हि एतत् मण्डलं संविधीयते ‖ ४२ ‖
क्रान्तम् एतत् तु विज्ञेयं नामत: नाट्ययोक्तृभि: |

अन्वय: - आद्यक्रमं सूचीं कृत्वा वामकम् अपक्रान्तं च कार्यम् | पुन: आद्यं पार्श्वक्रान्तं तथा वामपार्श्वक्रमं (कार्यम्)| एताभि: चारीभि: पर्यायेण भ्रान्त्वा मण्डलं (कार्यम्)| तत: वामं सूचीं दद्यात् | दक्षिणम् अपक्रान्तं च | स्वभावगमने एतत् मण्डलं संविधीयते | नाट्ययोक्तृभि: एतत् क्रान्तं विज्ञेयम्|

अर्थ - उजव्या पायाला सूचीचारी मध्ये ठेवून डाव्या पायाला अपक्रांत करावे. नंतर उजव्या पायाला पार्श्वक्रांताचारीमध्ये ठेवून डाव्या पायानेही पार्श्वक्रांता करावे. मग ह्या चारींद्वारे क्रमाने चारही बाजूस गोल फिरून डाव्या पायाने सूचीचारी आणि उजव्या पायाने अपक्रांताचारी करावी. स्वाभाविकगतीच्या अभिनयात या मंडलाचा वापर केला जातो. नाट्यप्रवक्त्यांनी यांस 'क्रांत' मंडल असे म्हटले आहे.

एतान्याकाशगामीनि ज्ञेयान्येवं दशैव तु ॥ ४३ ॥
अत: परं प्रवक्ष्यामि भौमानामपि लक्षणम् ।

पदच्छेद: - एतानि आकाशगामीनि ज्ञेयानि एवं दश एव तु ॥ ४३ ॥
अत: परं प्रवक्ष्यामि भौमानाम् अपि लक्षणम् ।

अन्वय: - एवम् एतानि दश आकाशगानि ज्ञेयानि । अत: परं भौमानाम् अपि लक्षणं प्रवक्ष्यामि ।

अर्थ - अशाप्रकारे ही दहा आकाशगामी मंडले सांगितली . आता यानंतर भूमिगत मंडलांची लक्षणे सांगतो .

❖ भ्रमरमंडल ❖

आद्यस्तु जनित: कार्यो वामश्चास्पन्दितो भवेत् ॥ ४४ ॥
शकटास्य: पुनश्चाद्यो वामश्चापि प्रसारित: ।
आद्यो भ्रमरक: कार्यस्त्रिकञ्च परिवर्तयेत् ॥ ४५ ॥
आस्पन्दित: पुनर्वाम: शकटास्यश्च दक्षिण: ।
वाम: पृष्ठापसर्पी च दद्यादभ्रमरकं तथा ॥ ४६ ॥
स एवास्पन्दित: कार्यस्त्वेतदभ्रमरमण्डलम् ।

पदच्छेद: - आद्य: तु जनित: कार्य: वाम: च आस्पन्दित: भवेत् ॥ ४४ ॥
शकटास्य: पुन: च आद्य: वाम: च अपि प्रसारित: ।
आद्य: भ्रमरक: कार्य: त्रिकं च परिवर्तयेत् ॥ ४५ ॥
आस्कन्दित: पुन: वाम: शकटास्य: च दक्षिण: ।
वाम: पृष्ठापसर्पी च दद्यात् भ्रमरकं तथा ॥ ४६ ॥
स: एव आस्पन्दित: कार्य: तु एतत् भ्रमरमण्डलम् ।

अन्वय: - आद्य: तु जनित: कार्य: । वाम: च आस्पन्दित: भवेत् । पुन: आद्य: शकटास्य:, वाम: प्रसारित: भवेत् च । आद्य: भ्रमरक: कार्य: त्रिकं परिवर्तयेत् च । पुन: वाम: आस्पन्दित:,

दक्षिण: शकटास्य: च | वाम: पृष्ठापसर्पी (कृत्वा) भ्रमरकं दद्यात् | स: एव आस्पन्दित: कार्य: | एतत् भ्रमरमण्डलम् |

अर्थ - उजव्या पायाला जनिताचारीमध्ये ठेवून डावा पाय आस्यंदिताचारीमध्ये ठेवावा. मग उजवा पाय शकटास्याचारीमध्ये ठेवून डावा पाय पसरवावा. मग उजव्या पायाने भ्रमरीचारीचा प्रयोग करून त्रिकपरिवर्तन करावे. नंतर डाव्या पायाने आस्यंदिताचारी करून उजव्या पायाला शकटास्याचारीमध्ये ठेवावे. मग डाव्या पायाने पृष्ठापसर्पी करून भ्रमरीचारी करावी. त्यानंतर त्याच पायाने आस्यंदिताचारीचा प्रयोग करावा. अशाप्रकारे भ्रमरमंडल सांगितले आहे.

❖ आस्पंदितमंडल ❖

आद्यो भ्रमरक: कार्यो वामश्चैवाड्डिते भवेत् || ४७ ||
[कार्यस्त्रिकविवर्तश्च शकटास्यश्च दक्षिण: |
ऊरूद्वृत्त: स एव स्याद्वामश्चैवापसर्पित: || ४८ ||
कार्यस्त्रिकविवर्तश्च दक्षिण: स्पन्दितो भवेत् |
शकटास्यो भवेद्वामस्तदेवास्फोटनं भवेत् ]|| ४९ ||
एतदास्पन्दितं नाम व्यायामे युद्धमण्डलम् |

पदच्छेद: - आद्य: भ्रमरक: कार्य: वाम: च एव अड्डित: भवेत् || ४७ ||
[कार्य: त्रिकविवर्त: च शकटास्य: च दक्षिण: |
ऊरूद्वृत्त: स: एव स्यात् वाम: च एव अपसर्पित: || ४८ ||
कार्य: त्रिकविवर्त: च दक्षिण: स्पन्दित: भवेत् |
शकटास्य: भवेत् वाम: तदेव आस्फोटनं भवेत् ]|| ४९ ||
एतत् आस्पन्दितं नाम व्यायामे युद्धमण्डलम् |

अन्वय: - आद्य: भ्रमरक: कार्य: | वाम: अड्डित: भवेत् च | त्रिकविवर्त: दक्षिण: शकटास्य:

कार्य: | स: एव ऊरूद्‌वृत्त: स्यात् | वाम: अपसर्पित: च | दक्षिण: त्रिकविवर्त: कार्य: | स्पन्दित: भवेत् | वाम: शकटास्य: भवेत् | तत् एव स्फोटनं भवेत् | व्यायामे एतत् आस्पन्दितं नाम युद्धमण्डलम् |

अर्थ - उजव्या पायाला भ्रमरीचारीमध्ये ठेवून डाव्या पायाला अड्डिताचारीमध्ये ठेवावे. नंतर त्रिकाचे विवर्तन करून उजव्या पायाला शकटास्या चारीमध्ये ठेवावे. मग उजव्या पायाला ऊरूद्वृत्ताचारीमध्ये ठेवून डाव्या पायाने अपसर्पण करावे. नंतर त्रिक परिवर्तित करून उजव्या पायाने स्यंदिताचारी करावी. मग डाव्या पायाला शकटास्याचारीमध्ये ठेवून त्याचेच स्फोटन करावे. या आस्पंदित नावाच्या मंडलाचा उपयोग युद्ध तसेच व्यायामात करावा.

## ❖ आवर्तमंडल ❖

आद्यस्तु जनितं कृत्वा वामश्चैव निकुट्टकम् ‖ ५० ‖
शकटास्य: पुनश्चाद्य ऊरूद्‌वृत्त: स एव तु |
पृष्ठापसर्पी वामश्च स च चाषगतिर्भवेत् ‖ ५१ ‖
आस्पन्दित: पुन: सव्य: शकटास्यश्च वामक: |
आद्यो भ्रमरकश्चैव त्रिकं तु परिवर्तयेत् ‖ ५२ ‖
पृष्ठापसर्पी वामश्चेत्यावर्ते मण्डले भवेत् |

पदच्छेद: - आद्य: तु जनितं कृत्वा वाम: च एव निकुट्टकम् ‖ ५० ‖
शकटास्य: पुन: च आद्य: ऊरूद्‌वृत्त: स: एव तु |
पृष्ठापसर्पी वाम: च स: च चाषगति: भवेत् ‖ ५१ ‖
आस्पन्दित: पुन: दक्ष: शकटास्य: च वामक: |
आद्य: भ्रमरक: च एव त्रिकं तु परिवर्तयेत् ‖ ५२ ‖
पृष्ठापसर्पी वाम: च इति आवर्ते मण्डले भवेत् |

अन्वय : - आद्य : जनितं कृत्वा वाम : निकुट्टकं भवेत् | पुन : च आद्य : शकटास्य : | स : एव उरूद्वृत्त : (कार्य :)| वाम : पृष्ठापसर्पी चाषगति :, भवेत् च | पुन : सव्य : आस्पन्दित :, वामक : शकटास्य : भवेत् च | आद्य : भ्रमरक : त्रिकं परिवर्तयेत् | आवर्ते मण्डले वाम : पृष्ठापसर्पी भवेत् |

अर्थ - प्रथम उजव्या पायाने जनिताचारीचा प्रयोग करून डाव्या पायाने निकुट्टक करावे . मग उजव्या पायाला शकटास्या चारीमध्ये ठेवून त्याच पायाने उरूद्वृत्ता चारीचा प्रयोग करावा . नंतर डाव्या पायाने पृष्ठापसर्पण (अतिक्रांताचारी) करून चाषगतीचारीचा प्रयोग करावा . त्यानंतर उजव्या पायाने आस्यंदिताचारी करून डाव्या पायाने शकटास्या चारी करावी . मग उजव्या पायाला भ्रमरीचारीत ठेवून त्रिकपरिवर्तन करावे . त्यानंतर डाव्या पायाने पृष्ठापसर्पी अर्थात अतिक्रांता चारीचे प्रदर्शन करावे असे केल्यास (आवर्त) नावाचे मंडल होते .

### ❖ समोत्सारितमंडल ❖

कृत्वादौ समपादं तु स्थानं हस्तौ प्रसारयेत् || ५३ ||
निरन्तरावूर्ध्वतलावावेष्ट्योद्वेष्ट्य चैव हि |
कटीतटे विनिक्षिप्य चाद्यमावर्तयेत्क्रमात् || ५४ ||
यथाक्रमं पुनर्वाममावर्तेन प्रसारयेत् |
चार्यानया च भ्रान्त्वा तु पर्यायेणाथ मण्डलम् || ५५ ||
समोत्सारितमेतच्च ज्ञेयं व्यायाममण्डलम् |

पदच्छेद : - कृत्व आदौ समपादं तु स्थानं हस्तौ प्रसारयेत् || ५३ ||
निरन्तरौ ऊर्ध्वतलौ आवेष्ट्य उद्वेष्ट्य च एव हि |
कटीतटे विनिक्षिप्य च आद्यम् आवर्तयेत् क्रमात् || ५४ ||
यथाक्रमं पुन : वामम् आवर्तेन प्रसारयेत् |

चार्या अनया च भ्रान्त्वा तु पर्यायेण अथ मण्डलम् ‖ ५५ ‖
समोत्सारितम् एतत् च ज्ञेयं व्यायाममण्डलम् ।

अन्वय : - आदौ समपादं स्थानं कृत्वा हस्तौ प्रसारयैत् । निरन्तरौ ऊर्ध्वतलौ आवेष्ट्य, उद्वेष्ट्य च कटीतटे विनिक्षिप्य च आद्य: क्रमात् आवर्तयेत् । पुन: यथाक्रमं वामम् आवर्तिनं प्रसारयेत् । अनया चार्या पर्यायेण भ्रान्त्वा मण्डलं कार्यम् । एतत् व्यायाममण्डलं समोत्सारितं ज्ञेयम् ।

अर्थ - सर्वप्रथम समपादस्थान करून दोन्ही हात पसरवावे. नंतर नेहमी वरच्या बाजूस तोंड असलेल्या हातांना आवेष्टित तसेच उद्वेष्टित करून कमरेवर ठेवून उजव्या हाताला आवर्तित करावे. त्यानंतर क्रमाने डाव्या हाताला आवर्तित करून पसरवावे. त्यानंतर ह्या चारींद्वारे क्रमश: गोल फिरून मंडलरचना करावी. अशाप्रकारच्या मंडलाला 'समोत्सारित' व्यायाममंडल असे म्हणतात.

### ❖ एडकाक्रीडितमंडल ❖

पादैस्तु भूमिसंयुक्तै: सूचीविद्धैस्तथैव च ‖ ५६ ‖
एडकाक्रीडितैश्चैव चूर्णैस्त्रिकविवर्तनै: ।
सूचीविद्धापविद्धैश्च क्रमेणावृत्य मण्डलम् ‖ ५७ ‖
एडकाक्रीडितं विद्यात्खण्डमण्डलसंज्ञितम् ।

पदच्छेद : - पादै : तु भूमिसंयुक्तै : सूचीविद्धै : तथैव च ‖ ५६ ‖
एडकाक्रीडितै : च एव चूर्णै : त्रिकविवर्तनै : ।
सूचीविद्ध-अपविद्धै : च क्रमेण आवृत्य मण्डलम् ‖ ५७ ‖
एडकाक्रीडितं विद्यात् खण्डमण्डलसंज्ञितम् ।

अन्वय : - भूमिसंयुक्तै : पादै : सूचीविद्धै : एडकाक्रीडितै : चूर्णै : त्रिकविवर्तनै : सूचीविद्ध-अपविद्धै : च क्रमेण आवृत्य खण्डमण्डलसंज्ञितं मण्डलम् एडकाक्रीडितं स्यात् ।

अर्थ - जमिनीवर असलेल्या पायांनी सूचीचारी करून एडकाक्रीडिता चारी केल्यास तसेच लगेच त्रिक परिवर्तनाबरोबर क्रमाने सूचीविद्धा आणि अपविद्धाचारीने गोल फिरले असता त्यास 'खंडमंडल' नावाचे ' एडकाक्रीडित' मंडल समजावे .

❖ अड्डितमंडल ❖

सव्यमुद्धट्टितं कृत्वा तेनैवावर्तमाचरेत् ‖ ५८ ‖
तेनैवास्कन्दित: कार्य: शकटास्यश्च वामक: |
आद्य: पृष्ठापसर्पी च स च चाषगतिर्भवेत् ‖ ५९ ‖
[अडिड्तश्च पुनर्वाम आद्यश्चैवापसर्पित: |
वामो भ्रमरक: कार्य आद्य आस्कन्दितो भवेत् ‖ ६० ‖
तेनैवास्फोटनं कुर्यादितदडिड्तमण्डलम् |

पदच्छेद: - सव्यम् उद्घट्टितं कृत्वा तेन एव आवर्तम् आचरेत् ‖ ५८ ‖
तेन एव आस्कन्दित: कार्य: शकटास्य: च वामक: |
आद्य: पृष्ठापसर्पी च स च चाषगति: भवेत् ‖ ५९ ‖
[अडिड्त: च पुन: वाम: आद्य: च एव अपसर्पित: |
वाम: भ्रमरक: कार्य: आद्य: आस्कन्दित: भवेत् ‖ ६० ‖
तेन एव आस्फोटनं कुर्यात् एतत् अडिड्तमण्डलम् |

अन्वय: - सव्यम् उद्घाटितं कृत्वा तेन एव आवर्तम् आचरेत् | तेन एव आस्कन्दित: कार्य:, वामका: शकाटास्य: च (कार्य:)| स: आद्य: पृष्ठापसर्पी, चाषगति: च भवेत् | पुन: वाम: अड्डित:, आद्य: अपसर्पित: च | वाम: भ्रमरक: कार्य: | आद्य: आस्कन्दित: भवेत् | तेन एव आस्फोटनं कुर्यात् | एतत् अड्डितमण्डलम् |

अर्थ - उजव्या पायाला चांगल्या प्रकारे उद्घट्टित करून नंतर त्याचेच आवर्तन करावे . त्यानेच आस्यंदिताचारी करून डाव्या पायाने शकटास्याचारी करावी . मग उजव्या पायाला

पृष्ठापसर्पी (अपक्रांताचारी) करून चाषगतीचारीचा प्रयोग करावा आणि डाव्या पायाने अड्डिताचारीचा प्रयोग करून उजव्या पायाने अपसर्पण करावे. मग डाव्या पायाला भ्रमरीचारीमध्ये ठेवून उजव्या पायाने आस्यंदिता चारी करावी. त्यानेच आस्फोटन करावे. असे केल्यास 'अड्डित' नामक मंडल होते.

### ❖ शकटास्यमंडल ❖

आद्यं तु जनितं कृत्वा तेनैव च निकुट्टकम् ‖ ६१ ‖
स एव शकटास्यश्च वामश्चास्कन्दितो भवेत् |
पादैश्च शकटास्यस्थैः पर्यायेणाथ मण्डलम् ‖ ६२ ‖
विज्ञेयं शकटास्यं तु व्यायामे युद्धमण्डलम् |

पदच्छेदः - आद्यं तु जनितं कृत्वा तेन एव च निकुट्टकम् ‖ ६१ ‖
स: एव शकटास्य: च वाम: च आस्कन्दित: भवेत् |
पादै: च शकटास्यस्थै: पर्यायेण अथ मण्डलम् ‖ ६२ ‖
विज्ञेयं शकटास्यं तु व्यायामे युद्धमण्डलम् |

अन्वयः - आद्यं जनितं कृत्वा तेन निकुट्टमं (कार्यम्) | स: एव शकटास्य:, वाम: आस्कन्दित: भवेत् च | अथ शकटास्यस्थै: पादै: पर्यायेण मण्डलं (कार्यम्) | व्यायामे शकटास्यं युद्धमण्डलं विज्ञेयम् |

अर्थ - प्रथम उजव्या पायाने जनिताचारी करून त्यानेच निकुट्टक करावे. नंतर त्याच पायाने शकटास्याचारी करून डाव्या पायाने आस्यंदिताचारी करावी. मग शकटास्याचारीमध्ये उभे राहून पायांनी मंडलाची रचना करावी. अशाप्रकारे शकाटास्य मंडल बनते. युद्ध, व्यायाम इ. मध्ये शकटास्य मंडलाचा उपयोग करावा.

### ❖ अध्यर्धमंडल ❖

आद्यस्तु जनितो भूत्वा स एवास्कन्दितो भवेत् ‖ ६३ ‖
अपसर्पी पुनर्वाम: शकटास्यश्च दक्षिण: |

भ्रान्त्वा चारीभिरेताभिः पर्यायेणाथ मण्डलम् ॥ ६४ ॥
अध्यर्धमेतद्विज्ञेयं नियुद्धे चापि मण्डलम् ।

पदच्छेदः - आद्यः तु जनितः भूत्वा सः एव आस्कन्दितः भवेत् ॥ ६३ ॥
अपसर्पी पुनः वामः शकटास्यः च दक्षिणः ।
भ्रान्त्वा चारीभिः एताभिः पर्यायेण अथ मण्डलम् ॥ ६४ ॥
अध्यर्धम् एतत् विज्ञेयं नियुद्धे च अपि मण्डलम् ।

अन्वयः - आद्यः जनितः भूत्वा सः एव आस्कन्दितः भवेत् । पुनः वामः अपसर्पी; दाक्षिणः शकाटास्यः च । अथ एताभिः चारीभिः पर्यायेण भ्रान्त्वा मण्डलं (कार्यम्)। नियुद्धे एतत् मण्डलम् अपि अध्यर्धम् इति विज्ञेयम् ।

अर्थ - प्रथम उजव्या पायाला जनिताचारीमध्ये ठेवून त्याच पायाने आस्यंदिता चारी करावी . नंतर डाव्या पायाने अपक्रांताचारी (अपसर्पित) करून उजव्या पायाने शकटास्याचारी करावी . मग ह्या चारींद्वारे क्रमाने गोल फिरावे . अशाप्रकारे जे मंडल बनते त्यास 'अध्यर्ध' मंडल म्हणतात . नियुद्ध म्हणजेच बाहुयुद्धात हे मंडल उपयोगी आहे .

### ❖ पिष्टकुट्टमंडल ❖

सूचीमाद्यक्रमं कृत्वा ह्यपक्रान्तं च वामकम् ॥ ६५ ॥
भुजङ्गत्रासितश्चाद्य एवमेव च वामकः ।
भुजङ्गत्रासितैर्भ्रान्त्वा पादैरपि च मण्डलम् ॥ ६६ ॥
पिष्टकुट्टं च विज्ञेयं चारीभिर्मण्डलं बुधैः ।

पदच्छेदः - सूचीम् आद्यक्रमं कृत्वा हि अपक्रान्तं च वामकम् ॥ ६५ ॥
भुजङ्गत्रासितः च अद्य एवम् एव तु वामकः ।
भुजङ्गत्रासितैः भ्रान्त्वा पादैः अपि च मण्डलम् ॥ ६६ ॥
पिष्टकुट्टं च विज्ञेयं चारीभिः मण्डलं बुधैः ।

अन्वयः - आद्यक्रमं सूचीं कृत्वा वामकम् अपक्रान्तं (कुर्यात्)। आद्यः भुजङ्गत्रासितः, वामकः

एवम् एव च (कार्य:)| भुजङ्गत्रासितै: पादै: अपि भ्रान्त्वा मण्डलं (कार्यम्)| बुधै: चारीभि: पिष्टकुट्टं मण्डलं च विज्ञेयम्|

अर्थ - प्रथम उजव्या पायाला सूचीचारीमध्ये ठेवून डाव्या पायाने अपक्रांताचारी करावी. मग उजव्या पायाने भुजंगत्रासिताचारी करून डाव्या पायाने देखील हीच चारी करावी. नंतर भुजंगत्रासिताचारी करत पायांना गोल फिरवावे. या चारींद्वारे 'पिष्टकुट्ट' मंडल विद्वानांनी जाणून घ्यावे.

❖ चाषगतमंडल ❖

सर्वैश्चाषगतै: पादै: परिक्रम्य च मण्डलम्‌ || ६७ ||
एतच्चाषगतं विद्यान्नियुद्धे चापि मण्डलम्‌ |

पदच्छेद:- सर्वै: चाषगतै: पादै: परिक्रम्य च मण्डलम्|| ६७ ||
एतत् चाषगतं विद्यात् नियुद्धे च अपि मण्डलम्|

अन्वय: - बुधै: सर्वै: चारीभि: चाषगतै: पादै: च मण्डलं परिक्रम्य पिष्टकुट्टं मण्डलं विज्ञेयम्| नियुद्धे एतत् चाषगतं मण्डलम् अपि विद्यात्|

अर्थ - चाषगतीमध्ये डाव्या आणि उजव्या दोन्ही पायांनी मंडलाकार गोल फिरून जे मंडल बनते त्यास चाषगत मंडल समजले पाहिजे. नियुद्धामध्ये (बाहुयुद्धात) ह्या चारीचा वापर करावा.

नानाचारीसमुत्थानि मण्डलानि समासत: || ६८ ||
उक्तान्यत: परं चैव समचारीं नियोजयेत् |

❖ सममंडल ❖

समचारीप्रयोगो यस्तत्समं नाम मण्डलम्‌ || ६९ ||
आचार्यबुद्ध्या तानीह कर्तव्यानि प्रयोक्तृभि: |

## ❖ मंडलप्रयोगविधी ❖

एतानि खण्डानि समण्डलानि युद्धे नियुद्धे च परिक्रमे च |
लीलाङ्गमाधुर्यपुरस्कृतानि कार्याणि वाद्यानुगतानि तज्ज्ञैः || ७० ||

पदच्छेदः - नानाचारी-समुत्थानि मण्डलानि समासतः || ६८ ||
उक्तानि अतः परं च एव समचारीं नियोजयेत् |
समचारी-प्रयोगः यः तत्समं नाम मण्डलम् || ६९ ||
आचार्य-बुद्ध्या तानि इह कर्तव्यानि प्रयोक्तृभिः |
एतानि खण्डानि समण्डलानि युद्धे नियुद्धे च परिक्रमे च |
लीलाङ्ग-माधुर्य-पुरस्कृतानि कार्याणि वाद्य-अनुगतानि तज्ज्ञैः || ७० ||


अन्वयः - नानाचारीसमुत्थानानि मण्डलानि समासताः उक्तानि | अतः परं समचारीं नियोजयेत् | यः समचारीप्रयोगः तत् समं नाम मण्डलम् | प्रयोक्तृभिः तानि आचार्यबुद्ध्या कर्तव्यानि | युद्धे, नियुद्धे, परिक्रमे च एतानि लीलाङ्गमाधुर्यपुरस्कृतानि वाद्यानुगतानि खण्डानि समण्डलानि तज्ज्ञैः कार्याणि |

अर्थ - अशाप्रकारे मी थोडक्यात अनेक चारींपासून उत्पन्न होणाऱ्या मंडलाबद्दल सांगितले आहे. ह्यानंतर समचारी मंडलाचा वापर करावा. समचारींनी जो प्रयोग केला जातो त्यास 'सममंडल' असे म्हणतात. म्हणजेच भौमी आणि आकाशिकीचारींचा समानरीत्या यथायोग्यपणे वापर करणे म्हणजेच समचारीप्रयोग होय.

नाट्यप्रयोग करणाऱ्या आचार्यांनी स्वतःच्या बुद्धीने समजून त्यांचा प्रयोग करावा. अशाप्रकारे, ह्या खंडप्रधान मंडलांचा युद्ध, नियुद्ध तसेच परिक्रमांमध्ये (फिरण्यासाठी) वापर करावा. नाट्यविद्वानांनी अंगाच्या मधुर लीलांनी तसेच वाद्यांसह ह्या मंडलांचा उपयोग करावा.

|| इति भारतीये नाट्यशास्त्रे मण्डलविधानं नाम एकादशोऽध्याय समाप्तः ||
|| भरताच्या नाट्यशास्त्रातील 'मंडलविधान' नावाचा अकरावा अध्याय समाप्त ||

# बारावा अध्याय
# गतिप्रचार



# बारावा अध्याय

## गतिप्रचार

### ❖ पात्रांचा प्रवेश ❖

एवं व्यायामसंयोगे कार्यं मण्डलकल्पनम् |
अत: परं प्रवक्ष्यामि गतीस्तु प्रकृतिस्थिता: || १ ||

पदच्छेद: - एवं व्यायाम-संयोगे कार्यं मण्डल-कल्पनम् |
अत: परं प्रवक्ष्यामि गती: तु प्रकृतिस्थिता: || १ ||

अन्वय: - एवं व्यायामसंयोगे मण्डलकल्पनं कार्यम् | अत: परं प्रकृतिस्थिता: गती: प्रवक्ष्यामि |

अर्थ - अशाप्रकारे, पूर्वी सांगितल्याप्रमाणे विधिपूर्वक व्यायाम, म्हणजेच विविध चारी युक्त मंडलांची रचना केली पाहिजे. यानंतर प्रकृती म्हणजेच पात्रांच्या गतीचे वर्णन करीत आहे.

तत्रोपवहनं कृत्वा भाण्डवाद्यपुरस्कृतम् |
यथामार्गसोपेतं प्रकृतीनां प्रवेशने || २ ||
ध्रुवायां संप्रवृत्तायां पटे चैवापकर्षिते |
कार्य: प्रवेश: पात्राणां नानार्थरससंभव: || ३ ||

पदच्छेद: - तत्र उपवहनं कृत्वा भाण्डवाद्य-पुरस्कृतम् |
यथामार्ग-सोपेतं प्रकृतीनां प्रवेशने || २ ||
ध्रुवायां संप्रवृत्तायां पटे च एव अपकर्षिते |
कार्य: प्रवेश: पात्राणां नाना-अर्थ-रस-संभव: || ३ ||

अन्वय: - तत्र प्रकृतीनां प्रवेशने भाण्डवाद्यपुरस्कृतं यथामार्गसोपेतम् उपवहनं कृत्वा ध्रुवायां संप्रवृत्तायां पटे अपकर्षिते च पात्राणां नानार्थरससंभव: प्रवेश: कार्य: |

अर्थ - रंगमंचावर पात्रप्रवेशाच्या वेळी भाण्डवाद्य पुरस्कृत 'मार्ग' म्हणजेच देश, काळ आणि रसांनी युक्त उपवहन क्रिया करून ध्रुवागानाचा योग्य प्रयोग झाल्यावर पडदा दूर करून नंतर विविध रसांना निर्माण करणाऱ्या पात्रांचा प्रवेश झाला पाहिजे.

स्थानं तु वैष्णवं कृत्वा ह्युत्तमे मध्यमे तथा |
समुन्नतं समं चैव चतुरश्रमुरस्तथा || ४ ||
बाहुशीर्षे प्रसन्ने च नात्युक्षिप्ते च कारयेत् |
ग्रीवाप्रदेशः कर्तव्यो मयूराञ्चितमस्तकः || ५ ||

पदच्छेदः - स्थानं तु वैष्णवं कृत्वा हि उत्तमे मध्यमे तथा |
समुन्नतं समं च एव चतुरश्रम् उरः तथा || ४ ||
बाहुशीर्षे प्रसन्ने च न अति-उत्क्षिप्ते च कारयेत् |
ग्रीवाप्रदेशः कर्तव्यः मयूर-अञ्चित-मस्तकः || ५ ||

अन्वयः - उत्तमे तथा मध्यमे स्थानं वैष्णवं कृत्वा उरः समुन्नतं समं चतुरश्रं च (कर्तव्यम्) | बाहुशीर्षे प्रसन्ने च अत्युक्षिप्ते च न कारयेत् | ग्रीवाप्रदेशः मयूर-अञ्चित-मस्तकः कर्तव्यः |

अर्थ - रंगमंचावर प्रवेश करतेवेळी, उत्तम आणि मध्यम पात्रांनी वैष्णव स्थान करावे. नंतर छाती समुन्नत, सम आणि चतुरश्र ठेवावी. बाहू आणि शीर्ष स्थिर व प्रसन्न ठेवावे. ते खूप उत्क्षिप्त (उंच) नसावे. मान मोराप्रमाणे सुंदर असावी.

कर्णादष्टाङ्गुलस्थे च बाहुशीर्षे प्रयोजयेत् |
उरसश्चापि चिबुकं चतुरङ्गुलसंस्थितम् || ६ ||
हस्तौ तथैव कर्तव्यौ कटीनाभितटस्थितौ |
दक्षिणो नाभिसंस्थस्तु वामः कटितटे स्थितः || ७ ||

पदच्छेदः - कर्णात् अष्ट-अङ्गुलस्थे च बाहुशीर्षे प्रयोजयेत् |
उरसः च अपि चिबुकं चतुर्-अङ्गुलसंस्थितम् || ६ ||
हस्तौ तथा एव कर्तव्यौ कटीं नाभि-तट-स्थितौ |
दक्षिणः नाभिसंस्थः तु वामः कटि-तटे स्थितः || ७ ||

अन्वयः - कर्णात् अष्टाङ्गुलस्थे बाहुशीर्षे प्रयोजयेत् | उरसः चतुरङ्गुलसंस्थितं चिबुकं च (स्थाप्यम्) | तथैव हस्तौ कटीं नाभितटस्थितौ कर्तव्यौ | दक्षिणः नाभिसंस्थः वामः तु कटितटे स्थितः |

अर्थ - कानापासून आठ बोटांच्या अंतरावर खांदा स्थिर ठेवावा आणि छातीपासून चार बोटांच्या अंतरावर हनुवटी ठेवावी. त्याच प्रमाणे दोन्ही हात कमरेवर किंवा नाभीवर स्थिर ठेवावे. त्यातील उजवा हात नाभीवर आणि डावा हात कमरेवर स्थिर ठेवावा.

❖ पाय ठेवण्याचे नियम ❖

पादयोन्तरं कार्यं द्वौ तालावर्धमेव च |
पादोत्क्षेपस्तु कर्तव्यः स्वप्रमाणविनिर्मितः || ८ ||

पदच्छेदः - पादयोः अन्तरं कार्यं द्वौ तालौ अर्धम् एव च |
पाद-उत्क्षेपः तु कर्तव्यः स्वप्रमाण-विनिर्मितः || ८ ||

अन्वयः - पादयोः द्वौ तालौ अर्धम् एव अन्तरं कार्यम् | स्वप्रमाणविनिर्मितः पादोत्क्षेपः कर्तव्यः |

अर्थ - नटाने दोन पायांच्या मध्ये अडीच ताल अंतर ठेवून उभे रहावे. त्यानंतर हातांच्या प्रादेश इ. मापांप्रमाणे पाय उचलावा.

चतुस्तालो द्वितालश्चाप्येकतालस्तथैव च |
चतुस्तालस्तु देवानां पार्थिवानां तथैव च || ९ ||
द्वितालश्चैव मध्यानां तालः स्त्रीनीचलिङ्गिनाम् |
चतुष्कलोऽथ द्विकलस्तथा ह्येककलः पुनः || १० ||

पदच्छेदः - चतुस्तालः द्वितालः च अपि एकतालः तथा एव च |
चतुस्तालः तु देवानां पार्थिवानां तथा एव च || ९ ||
द्वितालः च एव मध्यानां तालः स्त्रीनीचलिङ्गिनाम् |
चतुष्कलः अथ द्विकलः तथा हि एककलः पुनः || १० ||

अन्वयः - चतुस्तालः द्वितालः तथैव एकतालः च (पादोत्क्षेपः भवेत्) | देवानां तथैव पार्थिवानां च चतुस्तालः, मध्यानां द्वितालः, स्त्रीनीचलिङ्गिनां तालः च (भवेत्) | चतुष्कलः द्विकलः तथा हि पुनः एककलः (पादोत्क्षेपः कर्तव्यः |)

अर्थ - चार ताल, दोन ताल व एकताल या प्रमाणानुसार पाय उचलावा. त्यातील चारताल

देवता व राजांसाठी, दोन ताल मध्यम पात्रांसाठी व एकताल हे स्त्रीपात्र व नीच पात्रांसाठी आहे . (तालप्राण असणाऱ्या) कालाच्या मापाप्रमाणे पाय चतुष्कल, द्विकल व एक कल याप्रमाणात उचलावा .

चतुष्कलो ह्युत्तमानां मध्यानां द्विकलो भवेत् |
तथा चैककलः पादो नीचानां संप्रकीर्तितः || ११ ||

पदच्छेदः - चतुष्कलः हि उत्तमानां मध्यानां द्विकलः भवेत् |
तथा च एककलः पादः नीचानां संप्रकीर्तितः || ११ ||

अन्वयः - उत्तमानां चतुष्कलः मध्यानां द्विकलः भवेत् | तथा च नीचानां एककलः पादः संप्रकीर्तितः |

अर्थ - उत्तम पात्र, देवता व राजांसाठी चतुष्कल, मध्यम पात्रांसाठी द्विकल आणि स्त्री व नीच पात्रांसाठी एककल सांगितला आहे .

## ❖ लयानुसार गती ❖

स्थितं मध्यं द्रुतं चैव समवेक्ष्य लयत्रयम् |
यथाप्रकृति नाट्यज्ञो गतिमेवं प्रयोजयेत् || १२ ||

पदच्छेदः - स्थितं मध्यं द्रुतं च एव समवेक्ष्य लयं बुधः |
यथाप्रकृति नाट्यज्ञः गतिम् एवं प्रयोजयेत् || १२ ||

अन्वयः - नाट्यज्ञः बुधः स्थितं मध्यं द्रुतं च लयं समवेक्ष्य यथाप्रकृति गतिम् एवं प्रयोजयेत् |

अर्थ - नाट्य जाणणाऱ्या विद्वानांनी याप्रमाणे (विलंबित) स्थित, मध्य व द्रुत लय चांगल्या रीतीने समजून घेऊन पात्रांप्रमाणे गतीचा वापर करावा .

## ❖ उत्तम नटांची स्वाभाविक गती ❖

धैर्योपपन्ना गतिरुत्तमानां मध्या गतिर्मध्यमसम्मतानाम् |
द्रुता गतिश्च प्रचुराधमानां लयत्रयं सत्त्ववशेन योज्यम् || १३ ||

पदच्छेद :- धैर्य-उपपन्ना गति : उत्तमानां मध्या गति : मध्यम-संमतानाम् |
द्रुता गति : च प्रचुरा अधमानां लयत्रयं सत्त्व-वशेन योज्यम् || १३ ||

अन्वय : - उत्तमानां धैर्योपपन्ना गति: मध्यमसंमतानां मध्या गति: अधमानां द्रुता प्रचुरा गति: च (एवं) लयत्रयं सत्त्ववशेन योज्यम् |

अर्थ - उत्तम पात्रांची गती धैर्ययुक्त स्थित लयीत म्हणजे विलंबित लयीत असते. मध्यम पात्रांची गती मध्य लयीत व अधम पात्रांची गती द्रुत लयीत असते. याप्रमाणे सत्त्वाला अनुसरून तीनही लयींचा वापर करावा.

एष एव तु विज्ञेय: कलाताललये विधि: |
पुनर्गतिप्रचारस्य प्रयोगं शृणतानघा: || १४ ||

पदच्छेद :- एष : एव तु विज्ञेय : कला-ताल-लये विधि : |
पुन : गति-प्रचारस्य प्रयोगं शृणुत अनघा : || १४ ||

अन्वय : - अनघा :, एष : एव कलाताललये विधि : विज्ञेय : | पुन : गतिप्रचारस्य प्रयोगं शृणुत |

अर्थ - हे निष्पाप मुनींनो, काल, ताल व लयीविषयीचा हा विधी समजून घ्यावा. आता गतिप्रचारांविषयी ऐकावे.

स्वभावे तूत्तमगतौ कार्यं जानु कटीसमम् |
युद्धचारीप्रयोगेषु जानुस्तनसमं न्यसेत् || १५ ||

पदच्छेद :- स्वभावे तु उत्तमगतौ कार्यं जानु कटीसमम् |
युद्धचारी-प्रयोगेषु पुन : स्तनसमं न्यसेत् || १५ ||

अन्वय : - उत्तमगतौ स्वभावे जानु कटीसमं कार्यम् | युद्धचारीप्रयोगेषु (तत्) पुन : स्तनसमं न्यसेत् |

अर्थ - उत्तम पात्रांच्या स्वाभाविक गतीमध्ये गुडघा आणि कंबर सरळ असावे आणि युद्धचारीच्या वेळी गुडघा स्तनांपर्यंत वर उचलावा.

पार्श्वक्रान्तै : सललितै : पादैर्वाद्यान्वितैरथ |
रङ्गकोणोन्मुखं गच्छेत् सम्यक् पञ्चपदानि तु || १६ ||

पदच्छेद : - पार्श्वक्रान्तै : सललितै : पादै : वाद्य-अन्वितै : अथ |
रङ्गकोण-उन्मुखं गच्छेत् सम्यक् पञ्चपदानि तु || १६ ||

अन्वय : - वाद्यान्वितै : पार्श्वक्रान्तै : सललितै : पादै : रङ्गकोण-उन्मुखं सम्यक् पञ्चपदानि गच्छेत् |

अर्थ - ह्यानंतर वाद्यध्वनीने युक्त अशा पार्श्वक्रांता चारीद्वारे सुंदर ललित पायांनी रंगमंचाच्या पूर्वोत्तर कोपऱ्यासमोर उभे राहून पाच पावले चालावे .

वामवेधं ततः कुर्याद्विक्षेपं दक्षिणेन तु |
परिवृत्य द्वितीयं तु गच्छेत्कोणं ततः परम् || १७ ||

पदच्छेद : - वामवेधं तत : कुर्यात् विक्षेपं दक्षिणेन तु |
परिवृत्य द्वितीयं तु गच्छेत् कोणं तत : परम् || १७ ||

अन्वय : - तत : वामवेधं कुर्यात् दक्षिणेन तु विक्षेपं (च) | द्वितीयं परिवृत्य तत : परं कोणं गच्छेत् |

अर्थ - यानंतर वाम पायाने वेध करून (आपटून) उजव्या पायाने विक्षेप करावा (पसरवावा) . त्यानंतर दुसरा पाय परिवर्तित करून अन्य कोपऱ्यात चालावे .

तत्रापि वामवेधस्तु विक्षेपो दक्षिणेन च |
ततो भाण्डोन्मुखो गच्छेत्तान्येव तु पदानि च || १८ ||

पदच्छेद : - तत्र अपि वामवेध : तु विक्षेप : दक्षिणेन च |
तत : भाण्ड-उन्मुख : गच्छेत् तानि एव तु पदानि च || १८ ||

अन्वय : - तत्र अपि वामवेध : दक्षिणेन विक्षेप : च | तत : भाण्डोन्मुख : तानि एव पदानि गच्छेत् च |

अर्थ - इथे देखील डाव्या पायाने वेध करून उजवा पाय विक्षेप करावा . त्यानंतर भांडवाद्यांकडे तोंड करून तेवढेच (म्हणजे पाच) पाय चालावे .

एवं गतागतैर्गत्वा पदानामेकविंशतिम् |
वामवेधं ततः कुर्याद्विक्षेपं दक्षिणस्य च || १९ ||

पदच्छेद : - एवं गतागतै : गत्वा पदानाम् एकविंशतिम् |
वामवेधं तत : कुर्यात् विक्षेपं दक्षिणस्य च || १९ ||

अन्वय: - एवं गतागतै: पदानाम् एकविंशतिं गत्वा तत: वामवेधं दक्षिणस्य च विक्षेपं कुर्यात्।

अर्थ - याप्रमाणे येऊन-जाऊन पायांची वीस संख्या पूर्ण करून नंतर डाव्या पायाने वेध करून उजवा पाय विक्षेप करावा.

रङ्गे विकृष्टे भरतेन कार्यो गतागतै: पादगतिप्रचार:।
त्र्यश्रस्त्रिकोणे चतुरश्ररङ्गे गतिप्रचारश्चतुरश्र एव ॥ २० ॥

पदच्छेद: - रङ्गे विकृष्टे भरतेन कार्य: गतागत: पादगतिप्रचार:।
त्र्यश्र: त्रिकोणे चतुरश्ररङ्गे गतिप्रचार: चतुरश्र: एव ॥ २० ॥

अन्वय: - विकृष्टे रङ्गे भरतेन गतागत: पादगतिप्रचार: कार्य:। त्रिकोणे त्र्यश्र: चतुरश्ररङ्गे चतुरश्र: गतिप्रचार: एव (करणीय:)।

अर्थ - विकृष्ट रंगमंचावर पात्रांना येण्या-जाण्यासाठी ह्या गतिप्रचाराचा वापर करावा. त्रिकोणी रंगमंचावर त्र्यश्रगतीचा आणि चतुरश्र रंगमंचावर चतुरश्र गतीचा वापर करावा.

य: समै: सहितो गच्छेत्तत्र कार्यो लयाश्रय:।
चतुष्कलोऽथ द्विकलस्तथैवैककल: पुन: ॥ २१ ॥

पदच्छेद: - य: समै: सहित: गच्छेत् तत्र कार्य: लय-आश्रय:।
चतुष्कल: अथ द्विकल: तथा एव एककल: पुन: ॥ २१ ॥

अन्वय: - य: समै: सहित: गच्छेत् तत्र लयाश्रय: चतुष्कल: द्विकल: तथा एककल: कार्य:।

अर्थ - समान प्रकृती असलेल्या पात्रांनी समगतीमध्ये चालावे. त्यावेळी त्यांची गती लयीवर आधारित म्हणजेच चतुष्कल, द्विकल आणि एककल असावी.

❖ मध्यम आणि अधम नटांची गती ❖

अथ मध्यमनीचैस्तु गच्छेद्य: परिवारित:।
चतुष्कलमथार्धं च तथा चैककलं पुन: ॥ २२ ॥

पदच्छेद : - अथ मध्यमनीचै : तु गच्छेत् य : परिवारित : |
चतुष्कलम् अथ अर्ध च तथा च एककलं पुन : || २२ ||

अन्वय : - अथ य : मध्यमनीचै : परिवारित : गच्छेत् (स :) चतुष्कलम् (तस्य) अर्ध तथा एककलं च पुन : (गच्छेत्) |

अर्थ - जेव्हा कोणी एक अभिनेता मध्यम किंवा अधम प्रकृतीच्या पात्रांबरोबर चालेल तेव्हा त्याने चतुष्कल, द्विकल आणि एककल प्रमाणे चालले पाहिजे .

❖ देव, दानव, पन्नग यांची गती ❖

दैत्यदानवयक्षाणां नृपन्नगरक्षसाम् |
चतुस्तालप्रमाणेन कर्तव्याथ गतिर्बुधै : || २३ ||

पदच्छेद : - दैत्य-दानव-यक्षाणां नृप-पन्नग-रक्षसाम् |
चतुस्ताल-प्रमाणेन कर्तव्या अथ गति : बुधै : || २३ ||

अन्वय : - दैत्यदानवयक्षाणां नृपपन्नगरक्षसां गति : बुधै : चतुस्तालप्रमाणेन कर्तव्या |

अर्थ - देव, दानव, यक्ष, राक्षस, पन्नग (सर्प) आणि राजा वगैरे पात्रांची गती विद्वानांच्या मते चतुस्ताल प्रमाण इतकी असली पाहिजे .

❖ आकाशात राहणाऱ्यांची गती ❖

दिवौकसां तु सर्वेषां मध्यमा गतिरिष्यते |
तत्रापि चोद्धता ये तु तेषां देवै : समा गति : || २४ ||

पदच्छेद : - दिवौकसां तु सर्वेषां मध्यमा गति : इष्यते |
तत्र अपि च उद्धता : ये तु तेषां देवै : समा गति : || २४ ||

अन्वय : - सर्वेषां दिवौकसां मध्यमा गति : इष्यते | तत्र अपि च ये उद्धता : तेषां देवै : समा गति : (भवेत्) |

अर्थ - आकाशात राहणाऱ्या सर्व देवतांसाठी मध्यम गती योग्य आहे, आणि त्यातही उद्धत प्रकृतीचे जे पात्र आहेत त्यांची गती देवतांप्रमाणेच असावी .

## ❖ ऋषींचे प्रश्न आणि भरताचे उत्तर ❖

ऋषय ऊचु: |
यदा मनुष्या राजानस्तेषां देवगति: कथम् |
अत्रोच्यते कथं नैषा गती राज्ञां भविष्यति || २५ ||

पदच्छेद: - ऋषय: ऊचु:
यदा मनुष्या: राजान: तेषां देवगति: कथम् |
अत्र उच्यते कथं न एषा गति: राज्ञां भविष्यति || २५ ||

अन्वय: - ऋषय: ऊचु:
"यदा मनुष्या: राजान: (तर्हि) तेषां देवगति: कथम्?" अत्र उच्यते, "कथं एषा गति: राज्ञां न भविष्यति?"

अर्थ - ऋषींनी म्हटले, "जर राजा हा मनुष्य असतो तर त्याची गती देवतांसारखी कशी?" त्यावर भरतमुनी म्हणाले की, "राजांची गती देवतांसारखी का असू नये ?"

अथ दिव्या: प्रकृतयो दिव्यमानुष्य एव च |
मानुष्य इति विज्ञेया नाट्यनृत्तक्रियां प्रति || २६ ||

पदच्छेद: - अथ दिव्या: प्रकृतय: दिव्यमानुष्य: एव च |
मानुष्य: इति विज्ञेया: नाट्यनृत्तक्रियां प्रति || २६ ||

अन्वय: - अथ नाट्यनृत्तक्रियां प्रति दिव्या: दिव्यमानुष्य: मानुष्य: च (एते त्रय:) प्रकृतय: एव विज्ञेया: |

अर्थ - कारण येथे नाटकात व नृत्यक्रियेमध्ये प्रकृती म्हणजेच पात्र हे तीन प्रकारचे असतात . दिव्य, दिव्यमनुष्य आणि मनुष्य .

देवानां प्रकृतिर्दिव्या राज्ञां वै दिव्यमानुषी |
या त्वन्या लोकविदिता मानुषी सा प्रकीर्तिता || २७ ||

पदच्छेद: - देवानां प्रकृति: दिव्या: राज्ञां वै दिव्यमानुषी |
या तु अन्या लोकविदिता मानुषी सा प्रकीर्तिता || २७ ||

अन्वय: - देवानां प्रकृति: दिव्या: राज्ञां दिव्यमानुषी (भवेत्)| या अन्या लोकविदिता सा मानुषी प्रकीर्तिता|

अर्थ - ह्यात देवतांची प्रकृती 'दिव्य' असते, राजांची दिव्यमानुष व दुसरी जी प्रसिद्ध प्रकृती आहे ती म्हणजे मानुषी होय .

देवांशजास्तु राजानो वेदाध्यात्मसु कीर्तिता:|
एवं देवानुकरणे दोषो ह्यत्र न विद्यते || २८ ||

पदच्छेद:- देवांशजा: तु राजान: वेद-अध्यात्मसु कीर्तिता:|
एवं देवानुकरणे दोष: हि अत्र न विद्यते || २८ ||

अन्वय: - राजान: देवांशजा: (इति) वेदाध्यात्मसु कीर्तिता:| एवं देवानुकरणे न हि अत्र दोष: विद्यते|

अर्थ - राजेलोक देवतांचे अंश आहेत असे वेद आणि अध्यात्मात सांगितले आहे . म्हणून येथे देवतांचे अनुकरण करण्यास काही अयोग्य नाही .

अयं विधिस्तु कर्तव्य: स्वच्छन्दगमनं प्रति|
संभ्रमोत्पातरोषेषु प्रमाणं न विधीयते || २९ ||

पदच्छेद:- अयं विधि: तु कर्तव्य: स्वच्छन्द-गमनं प्रति|
संभ्रम-उत्पात-रोषेषु प्रमाणं न विधीयते || २९ ||

अन्वय: - अयं विधि: तु स्वच्छन्दगमनं प्रति कर्तव्य:| संभ्रम-उत्पातरोषेषु प्रमाणं न विधीयते|

अर्थ - हे स्पष्टीकरण स्वच्छंद गमनाविषयी आहे . परंतु संभ्रम (आवेग), उत्पत्ती आणि क्रोधासाठी कुठलेही नियम सांगितलेले नाहीत .

### ❖ जड व्यक्तींची गती ❖

सर्वासां प्रकृतीनां तु अवस्थान्तरसंश्रया|
उत्तमाधममध्यानां गति: कार्या प्रयोक्तृभि: || ३० ||

पदच्छेद :- सर्वासां प्रकृतीनां तु अवस्था-अन्तर-संश्रया |
उत्तम-अधम-मध्यानां गति : कार्या प्रयोक्तृभि : || ३० ||

अन्वय : - प्रयोक्तृभि : सर्वासाम् उत्तमाधममध्यानाम् अवस्थान्तरसंश्रया प्रकृतीनां गति : कार्या |

अर्थ - नाटकाच्या प्रयोगकर्त्यांनी उत्तम, मध्यम व अधम वगैरे सर्व प्रकारच्या पात्रांच्या गतीचा वापर त्यांच्या अवस्थेनुसार करावा .

चतुरर्धकलं वा स्यात्तदर्धकलमेव च |
अवस्थान्तरमासाद्य कुर्याद्गतिविचेष्टितम् || ३१ ||

पदच्छेद :- चतुर्-अर्धकलं वा स्यात् तत् अर्धकलम् एव च |
अवस्थान्तरम् आसाद्य कुर्यात् गति-विचेष्टितम् || ३१ ||

अन्वय : - चतुरर्धकलं वा तत् अर्धकलम् एव च स्यात् | अवस्थान्तरम् आसाद्य गतिविचेष्टितं कुर्यात् |

अर्थ - उत्तम पात्रांच्या गतीमध्ये चाराच्या अर्धी म्हणजे दोन कलांएवढा आणि मध्यम पात्रांच्या गतीमध्ये एका कलेएवढा आणि अधम पात्रांच्या गतीमध्ये अर्ध्याकलेएवढा वेळ लागतो . अशा प्रकारे वेगवेगळ्या अवस्थांप्रमाणे गती कराव्या .

ज्येष्ठे चतुष्कलं ह्यत्र मध्यमे द्विकलं भवेत् |
द्विकला चोत्तमे यत्र मध्ये त्वेककला भवेत् || ३२ ||

पदच्छेद :- ज्येष्ठे चतुष्कलं हि अत्र मध्यमे द्विकलं भवेत् |
द्विकला च उत्तमे यत्र मध्ये तु एककला भवेत् || ३२ ||

अन्वय : - अत्र ज्येष्ठे चतुष्कलं मध्यमे द्विकलं भवेत् | यत्र च उत्तमे द्विकला (तत्र) मध्ये एककला भवेत् |

अर्थ - ज्येष्ठ म्हणजेच उत्तम पात्रांच्या गतीमध्ये चार कला, मध्यम पात्रांच्या गतीमध्ये दोन कलेएवढा वेळ लागतो आणि जेथे उत्तम पात्राच्या गतीला दोन कलेएवढा वेळ लागतो . तिथे मध्यम पात्राच्या गतीमध्ये एका कलेएवढा वेळ लागतो .

कलिकं मध्यमे यत्र नीचेष्वर्धकलं भवेत् |
एवमर्धार्धहीनं तु जडानां संप्रयोजयेत् || ३३ ||

पदच्छेद : - कलिकं मध्यमे यत्र नीचेषु अर्धकलं भवेत् |
एवम् अर्ध-अर्ध-हीनं तु जडानां संप्रयोजयेत् || ३३ ||

अन्वय : - यत्र मध्यमे कलिकं नीचेषु अर्धकलं भवेत् | एवम् अर्धार्धहीनं जडानां (कृते) संप्रयोजयेत् |

अर्थ - जेथे मध्यम पात्राच्या गतीला एका कलेएवढा वेळ लागेल तेथे अधम पात्राच्या गतीला अर्ध्या कलेएवढा वेळ लागतो . याप्रमाणे जडव्यक्तींसाठी अर्धी अर्धी कला कमी करून त्याचा प्रयोग केला पाहिजे .

## ❖ रोगी, तप:श्रांत इ . ची गती ❖

ज्वरार्ते च क्षुधार्ते च तप:श्रान्ते भयान्विते |
विस्मिते चावहित्थे च तथौत्सुक्यसमन्विते || ३४ ||
शृङ्गारे चैव शोके च स्वच्छन्दमने तथा |
गति: स्थितलया कार्याधिकलान्तरपातिता || ३५ ||

पदच्छेद : - ज्वर-आर्ते च क्षुधा-आर्ते च तप:-श्रान्ते भय-अन्विते |
विस्मिते च अवहित्थे च तथा औत्सुक्य-समन्विते || ३४ ||
शृङ्गारे च एव शोके च स्वच्छन्द-गमने तथा |
गति : स्थित-लया कार्या अधि-कलान्तर-पातिता || ३५ ||

अन्वय : - ज्वरार्ते क्षुधार्ते तप:श्रान्ते भयान्विते विस्मिते अवहित्थे तथा औत्सुक्यसमन्विते शृङ्गारे शोके स्वच्छन्दगमने च स्थितलया अधिकलान्तरपातिता गति : कार्या |

अर्थ - तापामध्ये फणफणणे, भुकेने कळवळणे, तपाने थकणे, भयान्वित होणे, विस्मयाने आश्चर्यचकित होणे, भाव लपविणे, औत्सुक्याने युक्त असताना, शृंगार व शोकामध्ये, स्वच्छंद गमनामध्ये चार कलाप्रमाणांपेक्षाही अधिक विलंबित लयीमध्ये गतिप्रचार केला पाहिजे . (येथे भावार्थ असा आहे की, चार कलांच्या गतीपेक्षाही जास्त कलांचा वापर स्थिर विलंबित लयीमध्ये केला पाहिजे . )

## ❖ विविध भावांमधील गती ❖

पुनश्चिन्तान्विते चैव गतिः कार्या चतुष्कला ||
अस्वस्थकामिते चैव भये वित्रासिते तथा || ३६ ||
आवेगे चैव हर्षे च कार्ये यच्च त्वरान्वितम् |
अनिष्टश्रवणे चैव क्षेपे चाद्भुतदर्शने || ३७ ||
अपि चात्ययिके कार्ये दुःखिते शत्रुमार्गणे |
अपराद्धानुसरणे श्वापदानुगतौ तथा || ३८ ||
एतेष्वेवं गतिं प्राज्ञो विकलां संप्रयोजयेत् |

पदच्छेद :- पुनः चिन्ता-अन्विते च एव गतिः कार्या चतुष्कला |
अस्वस्थ-कामिते च एव भये वित्रासिते तथा || ३६ ||
आवेगे च एव हर्षे च कार्ये यत् च त्वरा-अन्वितम् |
अनिष्ट-श्रवणे च एव क्षेपे च अद्भुत-दर्शने || ३७ ||
अपि च अत्ययिके कार्ये दुःखिते शत्रु-मार्गणे |
अपराद्ध-अनुसरणे श्वापद-अनुगतौ तथा || ३८ ||
एतेषु एवं गतिं प्राज्ञः विकलां संप्रयोजयेत् |

अन्वय: - पुनः चिन्तान्विते चतुष्कला गतिः कार्या | अस्वस्थकामिते, भये, वित्रासिते, आवेगे, हर्षे, कार्ये यत् च त्वरान्वितम्, अनिष्टश्रवणे, क्षेपे, अद्भुतदर्शने, अत्ययिके कार्ये, दुःखिते, शत्रुमार्गणे, अपराद्धानुसरणे तथा श्वापदानुगतौ एतेषु एवं प्राज्ञः विकलां गतिं संप्रयोजयेत् |

अर्थ - त्यानंतर चिंतेमध्ये चतुष्कल गती म्हणजे चार कला प्रमाण असणारी गती वापरावी. कामातुर अस्वस्थेत, भयामध्ये, अचानक आलेल्या त्रासामध्ये, आवेगामध्ये, हर्षामध्ये, लवकर करायच्या कार्यामध्ये, अनिष्ट गोष्टींमध्ये, निंदेमध्ये, अद्भुत गोष्टी पाहताना, कठीण कार्य करताना, दुःखामध्ये, शत्रूला शोधताना, अपराधी माणसाला पकडताना, श्वापद म्हणजेच वाघ इ. हिंस्र पशूंचे अनुकरण करताना विद्वानांनी कलारहित विकल गतीचा वापर करावा.

### ❖ गतींचे नियम ❖

उत्तमानां गतिर्या तु न तां मध्येषु योजयेत् ‖ ३९ ‖
या गतिर्मध्यमानां तु न तां नीचेषु योजयेत् |

पदच्छेद : - उत्तमानां गति : या तु न तां मध्येषु योजयेत् ‖ ३९ ‖
या गति : मध्यमानां तु न तां नीचेषु योजयेत् |

अन्वय : - उत्तमानां या गति : तां मध्येषु न योजयेत् | या मध्यमानां गति : तां नीचेषु न योजयेत् |

अर्थ - उत्तम पुरुषांसाठी जी गती सांगितली आहे, तिचा वापर मध्यम पात्रांसाठी करू नये आणि मध्यम पात्रांसाठी ठरवलेली जी गती आहे, तिचा वापर नीच पात्रांसाठी करू नये .

### ❖ शृंगाररसातील गती ❖

गति : शृङ्गारिणी कार्या स्वस्थकामितसम्भवा ‖ ४० ‖
दूतीदर्शनमार्गस्तु प्रविशेद्रङ्गमण्डलम् |
सूचया चाप्यभिनयं कुर्यादर्थसमाश्रयम् ‖ ४१ ‖

पदच्छेद : - गति : शृङ्गारिणी कार्या स्वस्थ-कामित-सम्भवा ‖ ४० ‖
दूती-दर्शन-मार्ग : तु प्रविशेत् रङ्गमण्डलम् |
सूचया च अपि अभिनयं कुर्यात् अर्थ-समाश्रयम् ‖ ४१ ‖

अन्वय : - स्वस्थकामितसम्भवा शृङ्गारिणी गति : कार्या | दूतीदर्शनमार्ग : रङ्गमण्डलं प्रविशेत् | सूचया च अर्थसमाश्रयम् अभिनयं कुर्यात् |

अर्थ - धैर्य आणि कामेच्छेने उत्पन्न होणारी ती शृंगारिणी गती असते . शृंगारयुक्त अभिनेत्यांनी दूतीद्वारे दाखविलेल्या मार्गावरून रंगमंचावर प्रवेश करावा . त्यांनी कुठल्यातरी अर्थविशेषाचा आधार घेऊन सूचीचारीद्वारे अभिनय करावा .

हृद्यैर्वस्त्रैस्तथा गन्धैर्धूपैश्चूर्णैश्च भूषित : |
नानापुष्पसुगन्धाभिर्मालाभि : समलंकृत : ‖ ४२ ‖
गच्छेत्सललितै : पादैरतिक्रान्तस्थितैस्तथा |
तथा सौष्ठवसंयुक्तैर्लयतालवशानुगै : ‖ ४३ ‖

पदच्छेद :- हृद्यै : वस्त्रै : तथा गन्धै : धूपै : चूर्णै : च भूषित : |
नाना-पुष्प-सुगन्धाभि : मालाभि : समलंकृत : || ४२ ||
गच्छेत् सललितै : पादै : अतिक्रान्त-स्थितै : तथा |
तथा सौष्ठव-संयुक्तै : लय-ताल-वश-अनुगै : || ४३ ||

अन्वय : - हृद्यै : वस्त्रै : तथा गन्धै : धूपै : चूर्णै : च भूषित : नानापुष्पसुगन्धाभि : मालाभि : समलंकृत : (च नट :) सौष्ठवसंयुक्तै : सललितै : तथा लयतालवशानुगै : अतिक्रान्तस्थितै : पादै : गच्छेत् |

अर्थ - आकर्षक वस्त्रे, सुगंधित धूप किंवा अत्तर लावून, सुगंधित पावडर लावून, (अलंकारांनी सुशोभित होऊन), विविध सुगंधी फुले असणाऱ्या माळा परिधान करून नटाने सौष्ठवाने युक्त होऊन ताल, लय, कलेनुसार ललित अतिक्रांतचारीत चालावे .

पादयोरनुगौ चापि हस्तौ कार्यौ प्रयोक्तृभि : |
[उत्क्षिप्य हस्तं पातेन पादयोश्च विपर्ययात् ] || ४४ ||

पदच्छेद :- पादयो : अनुगौ च अपि हस्तौ कार्यौ प्रयोक्तृभि : |
उत्क्षिप्य हस्तं पातेन पादयो : च विपर्ययात् || ४४ ||

अन्वय : - प्रयोक्तृभि : पादयो : अनुगौ हस्तौ कार्यौ | हस्तम् उत्क्षिप्य पादयो : पातेन च विपर्ययात् (भाव्यम्) |

अर्थ - नाट्याचा प्रयोग करणाऱ्यांनी पायांच्या भेदांप्रमाणे हातांचा वापर करावा आणि एक हात वर उचलून पायाच्या पातांसह तो हात पसरवावा .

### ❖ कामी जनांची गती ❖

प्रच्छन्नकामिते चैव गतिं भूयो निबोधत |
विसर्जितजन : स्त्रस्तस्तथा दूतीसहायवान् || ४५ ||
निर्वाणदीपो नात्यर्थं भूषणैश्च विभूषित : |
वेलासदृशवस्त्रैश्च सह दूत्या शनैस्तथा || ४६ ||
वज्रेत् प्रच्छन्नकामस्तु पादैर्निश्शब्दमन्दगै : |

शब्दशङ्क्युत्सुकश्च स्यादवलोकनतत्पर: ॥ ४७ ॥
वेपमानशरीरश्च शङ्कित: प्रस्खलन्मुहु: ।

पदच्छेद: - प्रच्छन्न-कामिते च एव गतिं भूय: निबोधत ।
विसर्जित-जन: स्रस्त: तथा दूती-सहायवान् ॥ ४५ ॥
निर्वाणदीप: न अत्यर्थं भूषणै: च विभूषित: ।
वेला-सदृश-वस्त्रै: च सह दूत्या शनै: तथा ॥ ४६ ॥
वज्रेत् प्रच्छन्न-काम: तु पादै: नि:शब्द-मन्दगै: ।
शब्द-शङ्का-उत्सुक: च स्यात् अवलोकन-तत्पर: ॥ ४७ ॥
वेपमान-शरीर: च शङ्कित: प्रस्खलन् मुहु: ।

अन्वय: - प्रच्छन्नकामिते च गतिं भूय: निबोधत । विसर्जितजन: स्रस्त: दूतीसहायवान् निर्वाणदीप: अत्यर्थं भूषणै: च विभूषित: न (भवेत्) । वेलासदृशवस्त्रै: च प्रच्छन्नकाम: दूत्या सह नि:शब्दमन्दगै: पादै: शनै: व्रजेत् । शब्दशङ्कोत्सुक: च (स:)अवलोकनतत्पर: स्यात् । वेपमानशरीर: च शङ्कित: प्रस्खलन् (स:) मुहु: (गच्छेत्) ।

अर्थ - आता प्रसन्न कामुकगती पुन्हा समजून घ्यावी. प्रसन्न कामी (नटाने) स्वत:च्या सहकाऱ्यांना पाठवून देऊन दूतीबरोबर चालावे. त्याने दिवा विजवावा आणि शरीरावर जास्त आभूषणे घालू नयेत. वेळेप्रमाणे वस्त्र धारण करून प्रसन्न कामुक (नटाने) दूतीबरोबर आवाज न करता शंकेने व उत्सुकतेने (चोहीकडे) इथे तिथे पाहत थरथरत्या शरीराने शंकित होऊन अडखळत्या पायांनी मंदगतीने चालावे.

## ❖ रौद्र रसातील गती ❖

रसे रौद्रे तु वक्ष्यामि दैत्यरक्षोगणान् प्रति ॥ ४८ ॥
एक एव रसस्तेषां स्थायी रौद्रो द्विजोत्तमा: ।
नेपथ्यरौद्रो विज्ञेयस्त्वङ्गरौद्रस्तथैव च ॥ ४९ ॥
तथा स्वभावजश्चैव त्रिधा रौद्र: प्रकल्पित: ।

पदच्छेद :- रसे रौद्रे तु वक्ष्यामि दैत्य-रक्षो-गणान् प्रति ‖ ४८ ‖
एक : एव रस : तेषां स्थायी रौद्र : द्विज-उत्तमा : |
नेपथ्य-रौद्र : विज्ञेय : तु अङ्ग-रौद्र : तथा एव च ‖ ४९ ‖
तथा स्वभावज : च एव त्रिधा रौद्र : प्रकल्पित : |

अन्वय : - (अधुना अहं) रौद्रे रसे दैत्यरक्षोगणान् प्रति वक्ष्यामि | द्विजोत्तमा :, तेषां एक : एव रस : स्थायी रौद्र : (रस : अस्ति) | नेपथ्यरौद्र : अङ्गरौद्र : स्वभावज : च विज्ञेय : (एवं) त्रिधा रौद्र : प्रकल्पित : |

अर्थ - आता मी रौद्र रसातील दैत्य, दानव व राक्षसांच्या गतीविषयी सांगीन . हे ब्राह्मणांनो, त्यांच्याकडे एकमेव स्थायी असा 'रौद्र' रस असतो . रौद्र रस तीन प्रकारचा असतो . प्रथम 'नेपथ रौद्र रस', दुसरा 'अंग रौद्र' आणि तिसरा म्हणजे 'स्वभावज रौद्र' .

रुधिरक्लिन्नदेहो यो रुधिरार्द्रमुखस्तथा ‖ ५० ‖
तथा पिशितहस्तश्च रौद्रो नेपथ्यजस्तु स : |

पदच्छेद :- रुधिर-क्लिन्न-देह : य : रुधिर-आर्द्रमुख : तथा ‖ ५० ‖
तथा पिशित-हस्त : च रौद्र : नेपथ्यज : तु स : |

अन्वय : - य : रुधिरक्लिन्नदेह : रुधिरार्द्रमुख : तथा पिशितहस्त : च स : तु नेपथ्यज : रौद्र : |

अर्थ - रक्ताने माखलेले शरीर आणि आर्द्र चेहरा तसेच हातात मांसाचा तुकडा असेल तर त्यास 'नेपथ्य रौद्र रस' म्हणतात .

बहुबाहुर्बहुमुखो नानाप्रहरणाकुल : ‖ ५१ ‖
स्थूलकायस्तथा प्रांशुरङ्गरौद्र : प्रकीर्तित : |

पदच्छेद :- बहु-बाहु : बहु-मुख : नाना-प्रहरण-आकुल : ‖ ५१ ‖
स्थूल-काय : तथा प्रांशु : अङ्ग-रौद्र : प्रकीर्तित : |

अन्वय : - बहुबाहु : बहुमुख : नानाप्रहरणाकुल : स्थूलकाय : तथा प्रांशु : (स :) अङ्गरौद्र : प्रकीर्तित : |

अर्थ - ज्याचे खूप हात आणि खूप चेहरे आहेत, ज्याने खूप आयुधे हातात ग्रहण केली आहेत . स्थूल शरीर असलेला आणि जो उंच आहे तो 'अंग रौद्र' होय .

रक्ताक्ष: पिङ्गकेशश्च असितो विकृतस्वर: ‖ ५२ ‖
रुक्षो निर्भत्सनपरो रौद्र: सोऽयं स्वभावज: |

पदच्छेद: - रक्त-अक्ष: पिङ्ग-केश: च असित: विकृत-स्वर: ‖ ५२ ‖
रुक्ष: निर्भर्त्सन-पर: रौद्र: स: अथ स्वभावज: |

अन्वय: - रक्ताक्ष: पिङ्गकेश: असित: विकृतस्वर: रुक्ष: निर्भर्त्सनपर: स: स्वभावज: रौद्र: |

अर्थ - लाल डोळे, पिवळे केस, काळा रंग, विकृत स्वर, कठोर स्वभावाचा, नेहमी निंदा करण्यास उत्सुक राहणारा 'स्वभावज रौद्र' आहे .

चतुस्तालान्तरोक्षिप्तै: पादैस्त्वन्तरपातितै: ‖ ५३ ‖
गतिरेवं प्रकर्तव्या तेषां ये चापि तद्विधा: ‖ ५४ ‖

पदच्छेद: - चतुस्ताल-अन्तर-उक्षिप्तै: पादै: तु अन्तर-पातितै: ‖ ५३ ‖
गति: एवं प्रकर्तव्या तेषां ये च अपि तत्-विधा: ‖ ५४ ‖

अन्वय: - चतुस्ताल-अन्तर-उक्षिप्तै: पादै: अन्तरपातितै: (कार्यम्) | एवं गति: प्रकर्तव्या | ये तेषां (समं ते अपि) तद्विधा: (भवेयु:) |

अर्थ - चार ताल अंतरावर पाय वर उचलून नंतर त्याहून कमी अंतरावर तो खाली ठेवावा . या प्रकारची गती रौद्र रसामध्ये करावी आणि जे त्यांच्यासारखे आहेत त्यांनी पण ही गती करावी .

## ❖ बीभत्स रसातील गती ❖

अहृद्या तु मही यत्र श्मशानरणकश्मला |
गतिं तत्र प्रयुञ्जीत बीभत्साभिनयं प्रति ‖ ५५ ‖

पदच्छेद: - अहृद्या तु मही यत्र श्मशान-रण-कश्मला |
गतिं तत्र प्रयुञ्जीत बीभत्स-अभिनयं प्रति ‖ ५५ ‖

अन्वय: - यत्र श्मशानरणकश्मला मही तु अहृद्या तत्र बीभत्स-अभिनयं प्रति गतिं प्रयुञ्जीत |

अर्थ - जेथे श्मशान आणि युद्धभूमी असेल, व भूमी घृणास्पद आणि नावडती झाली असेल तेव्हा बीभत्स रसाच्या अभिनयामध्ये यथायोग्य गती करावी .

क्वचिदासन्नपतितैर्विकृष्टपतितैः क्वचित् ||
एलकाक्रीडितैः पादैरुपर्युपरिपातितैः || ५६ ||
तेषामेवानुगैर्हस्तैर्बीभत्से गतिरिष्यते |

पदच्छेद: - क्वचित् आसन्न-पतितैः विकृष्ट-पतितैः क्वचित् |
एलकाक्रीडितैः पादैः उपरि उपरि पातितैः || ५६ ||
तेषाम् एव अनुगैः हस्तैः बीभत्से गतिः उच्यते |

अन्वय: - क्वचित् आसन्नपतितैः, क्वचित् विकृष्टपतितैः, उपरि उपरि पातितैः एलकाक्रीडितैः पादैः तेषाम् एव अनुगैः हस्तैः बीभत्से गतिः उच्यते ||

अर्थ - कधीतरी आसन्नपतित (म्हणजे जमिनीवर पडून, बसून) आणि कधी दूरपतित (म्हणजे दूरपर्यंत उड्या मारत), वरच्या बाजूस उड्या मारत, एडकाक्रीडित पादांनी आणि त्यांच्या प्रमाणेच हस्तप्रचार करीत वर सांगितलेली गती बीभत्स रसामध्ये करावी .

❖ वीररसातील गती ❖

अथ वीरे च कर्तव्या पादविक्षेपसंयुता || ५७ ||
द्रुतप्रचाराधिष्ठाना नानाचारीसमाकुला |

पदच्छेद: - अथ वीरे च कर्तव्या पादविक्षेपसंयुता || ५७ ||
द्रुतप्रचार-अधिष्ठाना नानाचारीसमाकुला |

अन्वय: - अथ वीरे द्रुतप्रचाराधिष्ठाना नानाचारीसमाकुला पादविक्षेपसंयुता कर्तव्या |

अर्थ - वीर रसाच्या गतीच्या अभिनयामध्ये, पायांचा विक्षेप द्रुत प्रचारांनी युक्त आणि विविध प्रकारांच्या चारींसह करावा .

पार्श्वक्रान्तैर्द्रुताविद्धैः सूचीविद्धैस्तथैव च ॥ ५८ ॥
कलाकालगतैः पादैरावेगे योजयेद्गतिम् ।

पदच्छेद :- पार्श्वक्रान्तैः द्रुताविद्धैः सूचीविद्धैः तथा एव च ॥ ५८ ॥
कला-काल-गतैः पादैः आवेगे योजयेत् गतिम् ।

अन्वय : - पार्श्वक्रान्तैः द्रुताविद्धैः तथैव सूचीविद्धैः च कलाकालगतैः पादैः आवेगे गतिं योजयेत् ।

अर्थ - पार्श्वक्रांता, द्रुताविद्ध आणि सूचीविद्ध चारींद्वारे कला प्रमाण असलेल्या काळानुसार पायांच्या आवेगासह योग्य गतीचा वापर करावा .

उत्तमानामयं प्रायः प्रोक्तो गतिपरिक्रमः ॥ ५९ ॥
मध्यानामधमानां च गतिं वक्ष्याम्यहं पुनः ।

पदच्छेद :- उत्तमानाम् अयं प्रायः प्रोक्तः गतिपरिक्रमः ॥ ५९ ॥
मध्यानाम् अधमानां च गतिं वक्ष्यामि अहं पुनः ।

अन्वय : - प्रायः उत्तमानाम् अयं गतिपरिक्रमः प्रोक्तः । मध्यानाम् अधमानां च गतिम् अहं पुनः वक्ष्यामि ।

अर्थ - मी प्रथम उत्तम पात्रांच्या ह्या गतीचा क्रम सांगितला आहे . मध्यम व अधम पात्रांच्या गती मी पुन्हा नंतर सांगेन .

### ❖ अद्भुत रसातील गती ❖

विस्मये चैव हर्षे च विक्षिप्तपदविक्रमा ॥ ६० ॥
आसाद्य तु रसं हास्यमेतच्चान्यं च योजयेत् ।

पदच्छेद :- विस्मये च एव हर्षे च विक्षिप्त-पद-विक्रमा ॥ ६० ॥
आसाद्य तु रसं हास्यम् एतत् च अन्यं च योजयेत् ।

अन्वय : - विस्मये हर्षे च विक्षिप्तपदविक्रमा (गतिः कार्या) । हास्यं रसम् आसाद्य एतत् च अन्यं योजयेत् ।

अर्थ - विस्मय आणि हर्षामध्ये पायाची गती विक्षिप्त असली पाहिजे . म्हणजेच पायाची गती

इकडेतिकडे अडखळणारी असावी. हास्यरसाच्या अभिनयामध्ये अशाच प्रकारच्या वेगळ्या उचित गतीचा वापर करावा.

❖ करुण रसातील गती ❖

पुनश्च करुणे कार्या गति: स्थितपदैरथ ॥ ६१ ॥
बाष्पाम्बुरुद्धनयन: सन्नगात्रस्तथैव च ।
उत्क्षिप्तपातितकरस्तथा सस्वनरोदन: ॥ ६२ ॥
गच्छेत्तथाध्यर्धिकया प्रत्यग्राप्रियसंश्रये ।
एषा स्त्रीणां प्रयोक्तव्या नीचसत्त्वे तथैव च ॥ ६३ ॥

पदच्छेद: - पुन: च करुणे कार्या गति: स्थितपदै: अथ ॥ ६१ ॥
बाष्प-अम्बु-रुद्ध-नयन: सन्नगात्र: तथैव च ।
उत्क्षिप्त-पातित-कर: तथा सस्वन-रोदन: ॥ ६२ ॥
गच्छेत् तथा अध्यर्धिकया प्रत्यग्र-अप्रिय-संश्रये ।
एषा स्त्रीणां प्रयोक्तव्या नीच-सत्त्वे तथैव च ॥ ६३ ॥

अन्वय: - पुन: च करुणे स्थितपदै: गति: कार्या । बाष्पाम्बुरुद्धनयन: सन्नगात्र: उत्क्षिप्तपातितकर: तथा सस्वनरोदन: (नट:) प्रत्यग्र अप्रियसंश्रये अध्यर्धिकया गच्छेत् । एषा (गति:) स्त्रीणां तथैव नीचसत्त्वे च प्रयोक्तव्या ।

अर्थ - करुण रसामध्ये स्थिरपद म्हणजेच विलंबित गतीमध्ये पाऊल ठेवावे. अश्रूंनी दाटून आलेले डोळे, शरीर सुन्न होणे, हाताला उचलून खाली आपटणे, ओरडून रडणे इ. असा नवीन अप्रिय घटनेचा अभिनय अध्यर्धिका चारीद्वारे करावा. ह्या गतीचा उपयोग स्त्रिया व नीच पात्रांसाठी करावा.

उत्तमानां तु कर्तव्या सधैर्या बाष्पसंगता ।
नि:श्वासैरायतोत्सृष्टैस्तथैवोर्ध्वनिरीक्षितै: ॥ ६४ ॥
न तत्र सौष्ठवं कार्य न प्रमाणं तथाविधम् ।

पदच्छेद: - उत्तमानां तु कर्तव्या सधैर्या बाष्पसंगता ।

नि:श्वासै: आयत-उत्सृष्टै: तथा एव ऊर्ध्व-निरीक्षितै: ‖ ६४ ‖
न तत्र सौष्ठवं कार्य न प्रमाणं तथाविधम् |

अन्वय: - उत्तमानां नि:श्वासै: आयतोत्सृष्टै: तथैव ऊर्ध्वनिरीक्षितै: सधैर्या बाष्पसंगता (गति:) कर्तव्या | तत्र सौष्ठवं न कार्य न तथाविधं प्रमाणं (दत्तम्) |

अर्थ - उत्तम पात्रांनी ह्या गतीचा अभिनय धैर्याने करावा व डोळ्यात अश्रू आणून व दीर्घ नि:श्वास सोडून आणि वर बघून करावा. या गतीमध्ये कुठेही सौष्ठवाविषयीचे आणि गतीचे कोणतेही मोजमाप दिलेले नाही. (अनियंत्रित पादपात हेच त्याचे प्रमाण होय.)

मध्यानामपि सत्त्वज्ञा गतिर्योज्या विधानत: ‖ ६५ ‖
उर:पातहतोत्साह: शोकव्यामूढचेतन: |
नात्युत्क्षिप्तै: पदैर्गच्छेदिष्टबन्धुनिपातने ‖ ६६ ‖

पदच्छेद: - मध्यानाम् अपि सत्त्वज्ञा: गति: योज्या विधानत: ‖ ६५ ‖
उर:-पात-हत-उत्साह: शोक-व्यामूढ-चेतन: |
न अति उत्क्षिप्तै: पदै: गच्छेत् इष्ट-बन्धु-निपातने ‖ ६६ ‖

अन्वय: - मध्यानाम् अपि सत्त्वज्ञा: विधानत: गति: योज्या | इष्टबन्धुनिपातने उर:पातहतोत्साह: शोकव्यामूढचेतन: (नट:) अतिउत्क्षिप्तै: पदै: न गच्छेत् |

अर्थ - सत्त्व जाणणाऱ्यांनी मध्यम पात्रांची गती नियमानुसार करावी. प्रियजनांचा विनाश किंवा मृत्यू झाल्यास छाती पीटणे, उत्साहहीन होणे तसेच शोकाने चित्त व्याकुळ होणे असा अभिनय करावा आणि अशा अवस्थेत नटाने पाय जास्त वर उचलून चालू नये.

गाढप्रहारे कार्या च शिथिलाङ्गभुजाश्रया |
विघूर्णितशरीरा च गतिश्चूर्णपदैरथ ‖ ६७ ‖

पदच्छेद: - गाढ-प्रहारे कार्या च शिथिल-अङ्ग-भुज-आश्रया |
विघूर्णित-शरीरा च गति: चूर्णपदै: अथ ‖ ६७ ‖

अन्वय: - अथ गाढप्रहारे चूर्णपदै: शिथिल-अङ्गभुजाश्रया विघूर्णितशरीरा गति: कार्या |

अर्थ - मार पडल्यावर अंगांना सैल सोडून हाताचा आधार घेऊन व शरीराला गोल फिरवून

पायांना चूर्णपद स्थितीमध्ये ठेवावे . (पायाला थोडेसे वर उचलून जोराने जमिनीवर आपटले तर त्यास चूर्णपद असे म्हणतात . )

### ❖ थंडी आणि वर्षा ऋतूतील गती ❖

शीतेन चाभिभूतस्य वर्षेणाभिद्रुतस्य च |
गति: प्रयोक्तृभि: कार्या स्त्रीनीचप्रकृतावथ || ६८ ||

पदच्छेद: - शीतेन च अभिभूतस्य वर्षेण अभिद्रुतस्य च |
गति: प्रयोक्तृभि: कार्या स्त्री-नीच-प्रकृतौ अथ || ६८ ||

अन्वय: - शीतेन अभिभूतस्य वर्षेण अभिद्रुतस्य च गति: प्रयोक्तृभि: स्त्रीनीचप्रकृतौ कार्या |

अर्थ - थंडीने थरथरणे व पावसामुळे धावणे या गतीचा अभिनय नाट्यविद्वानांनी स्त्री किंवा अधम पात्रांच्या गतीसारखाच करावा .

पिण्डीकृत्य तु गात्राणि तेषां चैव प्रकम्पनम् |
करौ वक्षसि निक्षिप्य कुब्जीभूतस्तथैव च || ६९ ||
दन्तोष्ठस्फुरणं चैव चिबुकस्य प्रकम्पनम् |
कार्य शनैश्च कर्तव्यं शीताभिनयने गतौ || ७० ||

पदच्छेद: - पिण्डीकृत्य तु गात्राणि तेषां च एव प्रकम्पनम् |
करौ वक्षसि निक्षिप्य कुब्जीभूत: तथैव च || ६९ ||
दन्त-ओष्ठ-स्फुरणं च एव चिबुकस्य प्रकम्पनम् |
कार्यं शनै: च कर्तव्यं शीत-अभिनयने गतौ || ७० ||

अन्वय: - शीत-अभिनयने गतौ गात्राणि पिण्डीकृत्य तेषाम् एव च प्रकम्पनम्, करौ वक्षसि निक्षिप्य कुब्जीभूत:, दन्तोष्ठस्फुरणं, चिबुकस्य प्रकम्पनम्, शनै: कार्यं च (एतत्) कर्तव्यम् |

अर्थ - थंडी दर्शविणाऱ्या अभिनयामध्ये, अंग आखडून धरणे, अंगामध्ये कंपन आणणे, हातांना छातीवर ठेवून पोंग काढून वाकणे, दात व ओठ स्फुरण पावणे, हनुवटी कंपित करणे, हळूहळू कामे करणे इ . कार्ये करावीत .

## ❖ भयानक रसातील गती ❖

तथा भयानके चैव गति: कार्या विचक्षणै: |
स्त्रीणां कापुरुषाणां च ये चान्ये सत्त्ववर्जिता: || ७१ ||
विस्फारिते चले नेत्रे विद्युतं च शिरस्तथा |
भयसंयुक्तया दृष्ट्या पार्श्वयोश्च विलोकितै: || ७२ ||
द्रुतैश्चूर्णपदैश्चैव बद्ध्वा हस्तं कपोतकम् |
प्रवेपितशरीरश्च शुष्कोष्ठ: स्खलितं वज्रेत् || ७३ ||

पदच्छेद: - तथा भयानके च एव गति: कार्या विचक्षणै: || ७० ||
स्त्रीणां कापुरुषाणां च ये च अन्ये सत्त्व-वर्जिता: || ७१ ||
विस्फारिते चले नेत्रे विद्युतं च शिर: तथा |
भय-संयुक्तया दृष्ट्या पार्श्वयो: च विलोकनै: || ७२ ||
द्रुतै: चूर्णपदै: च एव बद्ध्वा हस्तं कपोतकम् |
प्रवेपित-शरीर: च शुष्क-ओष्ठ: स्खलितं वज्रेत् || ७३ ||

अन्वय: - तथा भयानके स्त्रीणां कापुरुषाणां ये च अन्ये सत्त्ववर्जिता: (तेषां) गति: विचक्षणै: कार्या | विस्फारिते चले नेत्रे, तथा विद्युतं च शिर:, भयसंयुक्तया दृष्ट्या पार्श्वयो: च विलोकनै:, द्रुतै: चूर्णपदै: च कपोतकं हस्तं बद्ध्वा प्रवेपितशरीर: शुष्क-ओष्ठ: च स्खलितं व्रजेत् |

अर्थ - भयानकरसाच्या अभिनयामध्ये विद्वानांनी स्त्री, नपुंसक आणि इतर जे सत्त्वहीन (बलहीन) व्यक्ती असतात त्यांच्या गतीप्रमाणे अभिनय करावा. भयानक रसाच्या अभिनयामध्ये, नेत्र मोठे आणि चंचल करावेत. शिर कंपित करावे. भयभीत दृष्टीने दोन्ही बाजूस पाहावे. चूर्णपदांनी द्रुत गती करावी. यामध्ये दोन्ही हातांनी कपोत हस्त करावा. अंग कंपित करावे आणि सुकलेल्या ओठांनी मंद अडखळत्या गतीने चालावे.

एषानुकरणे कार्या तर्जने त्रासने तथा |
सत्त्वं च विकृतं दृष्ट्वा श्रुत्वा च विकृतं रवम् || ७४ ||

एषा स्त्रीणां प्रयोक्तव्या नृणामाक्षिप्तविक्रमा |
क्वचिदासन्नपतितैर्विकृष्टपतितैः क्वचित् || ७५ ||
एलकाक्रीडितैः पादैरुपर्युपरि पातितैः |
एषामेवानुगैर्हस्तैर्गतिं भीतेषु योजयेत् || ७६ ||

पदच्छेदः - एषा अनुकरणे कार्या तर्जने त्रासने तथा |
सत्वं च विकृतं दृष्ट्वा श्रुत्वा च विकृतं रवम् || ७४ ||
एषा स्त्रीणां प्रकर्तव्या नृणाम् आक्षिप्त-विक्रमा |
क्वचित् आसन्न-पतितैः विकृष्ट-पतितैः क्वचित् || ७५ ||
एलकाक्रीडितैः पादैः उपरि उपरि पातितैः |
एषाम् एव अनुगैः हस्तैः गतिं भीतेषु योजयेत् || ७६ ||

अन्वयः - अनुकरणे तर्जने त्रासने तथा एषा (गतिः) कार्या | सत्त्वं च विकृतं दृष्ट्वा विकृतं रवं श्रुत्वा स्त्रीणां नृणाम् एषा आक्षिप्तविक्रमा (गतिः) प्रकर्तव्या | क्वचित् आसन्नपतितैः क्वचित् विकृष्टपतितैः उपरि उपरि पातितैः एलकाक्रीडितैः पादैः एषाम् एव अनुगैः हस्तैः भीतेषु गतिं योजयेत् |

अर्थ - पाठलाग करीत असताना, फटकारण्यासाठी किंवा घाबरविण्यासाठी या गतीचा वापर करावा. विकृत प्राण्यांना बघून व विकृत स्वर ऐकून स्त्री व पुरुषांनी आक्षिप्त पायांनी (हळूच दबक्या पायांद्वारे) या गतीचा वापर करावा.

कधीतरी आसन्नपतित म्हणजेच हलक्या पावलांनी चालावे. तर कधी तरी विकृष्ट पतित म्हणजे पाय एकमेकांपासून दूर ठेवून वजनदार पाऊल टाकावे. कधीतरी एडकाक्रीडित चारीमध्ये एक पाय आपटून दुसरा उचलावा आणि पायानुसार उपयुक्त हस्त करावा. अशा रीतीने, भयावस्थेत ह्या गतीचा प्रयोग करावा.

### ❖ व्यापारी आणि सचिव यांची गती ❖

वणिजां सचिवानां च गतिः कार्या स्वभावजा |
[कृत्वा नाभितटे हस्तमुत्तानं खटकामुखम् || ७७ ||

आद्यं चारालमुत्तानं कुर्यात्पार्श्वं स्तनान्तरे |
न निषण्णं न च स्तब्धं न चापि परिवाहितम् || ७८ ||
कृत्वा गात्रं तथा गच्छेत्तेन चैव क्रमेण तु ] |

पदच्छेद : - वणिजां सचिवानां च गति : कार्या स्वभावजा |
[कृत्वा नाभितटे हस्तम् उत्तानं खटकामुखम् || ७७ ||
आद्यं च अरालम् उत्तानं कुर्यात् पार्श्वं स्तनान्तरे |
न निषण्णं न च स्तब्धं न च अपि परिवाहितम् || ७८ ||
कृत्वा गात्रं तथा गच्छेत् तेन च एव क्रमेण तु] |

अन्वय : - वणिजां सचिवानां च स्वभावजा गति : कार्या | [उत्तानं खटकामुखं हस्तं नाभितटे कृत्वा आद्यम् उत्तानम् अरालं स्तनान्तरे पार्श्वं कुर्यात् | न निषण्णं न स्तब्धं न परिवाहितं गात्रं च कृत्वा तेन एव क्रमेण गच्छेत् ] |

अर्थ - व्यापारी व सचिवांची गती स्वाभाविक असते . ह्या गतीमध्ये एका हाताने उत्तान कटकामुख हस्त करून नाभिजवळ ठेवावा व दुसरा उत्तान अराल हस्त दोन्ही स्तनांच्या मध्ये थोडा बाजूला ठेवावा . या गतीत बसून राहू नये, शरीर स्तब्ध स्थितीत ठेवू नये आणि शरीराची हालचाल न करता क्रमानुसार चालावे .

### ❖ संन्यासी इ . ची गती ❖

अतिक्रान्तै : पदैर्विप्रा द्वितालान्तरगामिभि : || ७९ ||
यतीनां श्रमणानां च ये चान्ये तपसि स्थिता : |
तेषां कार्या गतिर्ये तु नैष्ठिकं व्रतमास्थिता : || ८० ||
अलोलचक्षुश्च भवेद्युगमात्रनिरीक्षण : |
उपस्थितस्मृतिश्चैव गात्रं सर्वं विधाय च || ८१ ||
अचञ्चलमनाश्चैव यथावल्लिङ्गमाश्रित : |
विनीतवेषश्च भवेत्कषायवसनस्तथा || ८२ ||

पदच्छेद : - अतिक्रान्तै : पदै : विप्रा : द्विताल-अन्तरगामिभि : |
यतीनां श्रमणानां च ये च अन्ये तपसि स्थिता : || ७९ ||
तेषां कार्या गति : ये तु नैष्ठिकं व्रतम् आस्थिता : |
अलोल-चक्षु : च भवेत् युगमात्र-निरीक्षण : || ८० ||
उपस्थित-स्मृति : च एव गात्रं सर्वं विधाय च |
अचञ्चल-मना : च एव यथावत् लिङ्गम् आश्रित : || ८१ ||
विनीतवेष : च भवेत् कषाय-वसन : तथा |

अन्वय : - विप्रा :, द्वितालान्तरगामिभि : अतिक्रान्तै : पदै : यतीनां, श्रमणानां, ये च अन्ये तपसि स्थिता :, ये नैष्ठिकं व्रतम् आस्थिता :, तेषां गति : कार्या | (स :) अलोलचक्षु :, युगमात्रनिरीक्षण : भवेत् | उपस्थितस्मृति :, सर्वं गात्रं विधाय च अचञ्चलमना : यथावत् लिङ्गम् आश्रित : विनीतवेष : तथा च कषायवसन : भवेत् |

अर्थ - हे ब्राह्मणांनो, दोन ताल अंतर ठेवून अतिक्रांत पादाने यती, श्रमण व अन्य तपस्या करणारे आणि नैष्ठिक ब्रह्मचर्य व्रतामध्ये रत असणाऱ्यांनी ह्या गतीचा वापर करून अभिनय करावा . अचंचल दृष्टीने चार हात लांब जमिनीवर दृष्टी ठेवून, कथावस्तूचे स्मरण करत संपूर्ण शरीराला संन्नध करून, स्थिर चित्त होऊन स्वत:चे चिह्न धारण करून, विनीत वेष व कषाय (भगवे)वस्त्र धारण करावे .

प्रथमं समपादेन स्थित्वा स्थानेन वै बुध : |
हस्तं च चतुरं कृत्वा तथा चैकं प्रसारयेत् || ८३ ||
प्रसन्नं वदनं कृत्वा प्रयोगस्य वशानुगम् |
अनिषण्णेन गात्रेण गतिं गच्छेद्व्यतिक्रमात् || ८४ ||
उत्तमानां भवेदेषा लिङ्गिनां ये महाव्रता : |
एभिरेव विपर्यस्तैर्गुणैरन्येषु योजयेत् || ८५ ||

पदच्छेद : - प्रथमं समपादेन स्थित्वा स्थानेन वै बुध : || ८२ ||
हस्तं च चतुरं कृत्वा तथा च एकं प्रसारयेत् |

प्रसन्नं वदनं कृत्वा प्रयोगस्य वशानुगम् || ८३ ||
अनिषण्णेन गात्रेण गतिं गच्छेत् व्यतिक्रमात् |
उत्तमानां भवेत् एषा लिङ्गिनां ये महाव्रता: || ८४ ||
एभि: एव विपर्यस्तै: गुणै: अन्येषु योजयेत् |

अन्वय: - बुध: प्रथमं समपादेन स्थानेन स्थित्वा चतुरं हस्तं च कृत्वा तथा एकं च प्रसारयेत् | प्रसन्नं वदनं कृत्वा प्रयोगस्य वशानुगम् अनिषण्णेन गात्रेण व्यतिक्रमात् गतिं गच्छेत् | उत्तमानां लिङ्गिनां ये महाव्रता: तेषां एषा गति: भवेत् | अन्येषु एभि: एव विपर्यस्तै: गुणै: योजयेत् |

अर्थ - विद्वान नटांनी प्रथमत: समपाद स्थानामध्ये स्थिर उभे राहून एका हाताने चतुर हस्त करावा व दुसरा हात पुढे पसरवावा . प्रसन्नमुख करून प्रयोगाला उचित असे नियंत्रित होऊन अस्थिर शरीराने (अतिशय ताठ नाही असे) व्यतिक्रम गतीने चालावे . उत्तम यती व दुसरे महान व्रतधारी संन्यासी यांची ही गती असते . ह्या गुणांच्या अगदी उलट अशा गुणांनी दुसऱ्या बाकीच्या व्यक्तींची गती असावी .

तथा व्रतानुगावस्था ह्यन्येषां लिङ्गिनामपि |
विभ्रान्ता चाप्युदात्ता वा विभ्रान्ता निभृतापि वा || ८६ ||
शकटास्यस्थितै: पादैरतिक्रान्तैस्तथैव च |

पदच्छेद: - तथा व्रत-अनुगा अवस्था हि अन्येषां लिङ्गिनां गति: |
विभ्रान्ता वा अपि उदात्ता वा विभ्रान्ता निभृता अपि वा || ८६ ||
शकटास्य-स्थितै: पादै: अतिक्रान्तै: तथैव च |

अन्वय: - तथा अन्येषां लिङ्गिनां व्रतानुगा अवस्था विभ्रान्ता उदात्ता वा विभ्रान्ता निभृता (करणीया) | शकटास्यस्थितै: अतिक्रान्तै: पादै: गति: (अभिनेया:) |

अर्थ - याच्या व्यतिरिक्त, अन्य संन्याशांच्या व्रताच्या अवस्थेप्रमाणे, जो विभ्रांत होऊन उदात्त किंवा शांत आहे, त्याच्या गतीचा अभिनय शकटास्याचारी आणि अतिक्रांताचारीने करावा .

### ❖ अंधारातून जाणारे आणि आंधळे यांची गती ❖

कार्या पाशुपतानां च गतिरुद्धतगामिनी ॥ ८७ ॥
अन्धकारेऽथ याने च गतिः कार्या प्रयोक्तृभिः ।
भूमौ विसर्पितैः पादैर्हस्तैर्मार्गप्रदर्शिभिः ॥ ८८॥

पदच्छेदः - कार्या पाशुपतानां च गतिः उद्धत-गामिनी ॥ ८७ ॥
अन्धकारे अथ याने च गतिः कार्या प्रयोक्तृभिः ।
भूमौ विसर्पितैः पादैः हस्तैः मार्ग-प्रदर्शिभिः ॥ ८८ ॥

अन्वयः - पाशुपतानां च उद्धतगामिनी गतिः कार्या । प्रयोक्तृभिः अन्धकारे याने च गतिः कार्या । भूमौ विसर्पितैः पादैः मार्गप्रदर्शिभिः हस्तैः (गतिः कार्या) ।

अर्थ - याचप्रमाणे पाशुपत संप्रदायातील शैव संन्यासी लोकांनी उत्क्रांतगामिनी गतीचा अभिनयपण वरील सांगितलेल्या चारी वापरून करावा. नाट्याचा प्रयोग करणाऱ्यांनी अंधारात किंवा अंध पात्राच्या गमनाच्या वेळी जमिनीवर पाय सरकवून चालावे व मार्ग किंवा रस्ता चाचपडणाऱ्या हाताद्वारे या गतींचा अभिनय करावा.

### ❖ रथावर असलेल्याची गती ❖

रथस्थस्यापि कर्तव्या गतिश्चूर्णपदैरथ ।
समपादं तथा स्थानं कृत्वा रथगतिं व्रजेत् ॥ ८९ ॥
धनुर्गृहीत्वा चैकेन तथा चैकेन कूबरम् ।
सूतश्चास्य भवेदेवं प्रतोदप्रग्रहाकुलः ॥ ९० ॥
वाहनानि विचित्राणि कर्तव्यानि विभागशः ।
द्रुतैश्चूर्णपदैश्चैव गन्तव्यं रङ्गमण्डले ॥ ९१ ॥

पदच्छेदः - रथस्थस्य अपि कर्तव्या गतिः चूर्णपदैः अथ ।
समपादं तथा स्थानं कृत्वा रथगतिं व्रजेत् ॥ ८९ ॥
धनुः गृहीत्वा च एकेन तथा च एकेन कूबरम् ।
सूतः च अस्य भवेत् एवं प्रतोद-प्रग्रह-आकुलः ॥ ९० ॥

वाहनानि विचित्राणि कर्तव्यानि विभागशः|
द्रुतैः चूर्णपदैः च एव गन्तव्यं रङ्ग-मण्डले || ९१ ||

अन्वयः - अथ रथस्थस्य अपि गतिः चूर्णपदैः कर्तव्या | तथा समपादं स्थानं कृत्वा रथगतिं व्रजेत् |
एकेन धनुः तथा च एकेन कूबरं गृहीत्वा अस्य सूतः च एवं प्रतोदप्रग्रहाकुलः भवेत् |
विभागशः विचित्राणि वाहनानि कर्तव्यानि | द्रुतैः चूर्णपदैः च एव रङ्गमण्डले गन्तव्यम् |

अर्थ - रथावर बसलेल्या पात्रांची गती चूर्णपदांद्वारे दाखविली पाहिजे . रथावर आरूढ झालेल्या पात्रांनी समपाद स्थानामध्ये उभे राहून एका हातात धनुष्य व दुसऱ्या हातांनी रथावरील लाकडी खांबास पकडून रथाच्या गतीचा अभिनय करावा आणि त्याच्या सारथीने चाबुक व लगाम सांभाळावे . वेगवेगळ्या प्रकृती आणि त्यांच्या विभागांप्रमाणे विविध वाहनांचा अभिनय करावा व द्रुतलयीत चूर्णपदाने रंगमंचावर प्रवेश करावा .

## ❖ विमानामध्ये असलेल्याची गती ❖

विमानस्थस्य कर्तव्या ह्येषैव स्यन्दिनी गतिः|
आरोढुमुद्वहेद्गात्रं किञ्चित्स्यादुन्मुखस्थितम् || ९२ ||
अस्यैव वैपरीत्येन कुर्याच्चाप्यवरोहणम् |

पदच्छेदः - विमानस्थस्य कर्तव्या हि एषा एव स्यन्दनी गतिः|
आरोढुम् उद्वहेत् गात्रं किञ्चित् स्यात् उन्मुख-स्थितम् || ९२ ||
अस्य एव वैपरीत्येन कुर्यात् च अपि अवरोहणम् |

अन्वयः - विमानस्थस्य एषा एव स्यन्दनी गतिः कर्तव्या | आरोढुम् गात्रं किञ्चित् उन्मुखस्थितम् उद्वहेत् स्यात् | अस्य एव वैपरीत्येन अपि अवरोहणं कुर्यात् च |

अर्थ - विमानावर चढण्यासाठी स्यंदिनी गतीचा वापर करावा . विमानावर आरोहण करण्यासाठी शरीर वर करून किंचित उन्नत करावे आणि तसेच उलट पद्धतीने म्हणजे अवनत शरीर ठेवून उतरावे .

## ❖ आकाशगती ❖

अधोऽवलोकनैश्चैव मण्डलावर्तनेन च || ९३ ||
आकाशगमने चैव कर्तव्या नाट्ययोक्तृभिः |

स्थानेन समपादेन तथा चूर्णपदैरपि ॥ ९४ ॥
व्योम्नश्चावतरेद्यस्तु तस्यैतां कारयेद्‌गतिम् ।
ऋज्वायतोन्नतनतैः कुटिलावर्तितैरथ ॥ ९५ ॥
भ्रश्यतश्च तथाकाशादपविद्धभुजा गतिः ।
विकीर्णवसना चैव तथा भूगतलोचना ॥ ९६ ॥

पदच्छेद: अधः अवलोकनैः च एव मण्डल-आवर्तनेन च ॥ ९३ ॥
आकाश-गमने च एव कर्तव्या नाट्ययोक्तृभिः ।
स्थानेन समपादेन तथा चूर्णपदैः अपि ॥ ९४ ॥
व्योम्नः च अवतरेत् यः तु तस्य एतां कारयेत् गतिम् ।
ऋजु-आयत-उन्नत-नतैः कुटिल-आवर्तितैः अथ ॥ ९५ ॥
भ्रश्यतः च तथा आकाशात् अपविद्धभुजा गतिः ।
विकीर्ण-वसना च एव तथा भूगत-लोचना ॥ ९६ ॥

अन्वय: नाट्ययोक्तृभिः आकाशगमने अधः अवलोकनैः मण्डल-आवर्तनेन च समपादेन स्थानेन तथा चूर्णपदैः अपि (गतिः) कर्तव्या ।
यः व्योम्नः अवतरेत् तस्य ऋजु-आयत-उन्नत-नतैः कुटिलावर्तितैः एतां गतिं कारयेत् ।
आकाशात् भ्रश्यतः अपविद्धभुजा गतिः विकीर्णवसना तथा च भूगतलोचना (भवेत्) ।

अर्थ - नाट्यविद्वानांनी आकाशगमनासाठी खालच्या बाजूस अवलोकन करावे व मंडलाकार आवर्तनाबरोबर समपाद स्थानाद्वारे चूर्णपदाने गती करावी आणि जे आकाशातून अवतरण करीत आहेत त्यांनी सरळ, लांब, खालच्या बाजूस, उंच, वाकडी आणि गोल फिरत अशी गती करावी व आकाशातून पडताना दाखविण्यासाठी अपविद्ध भुजा म्हणजे दोलाप्रमाणे झुलणारे हात हलवित वस्त्र इकडे तिकडे अस्ताव्यस्त झालेले दाखवावेत आणि दृष्टी जमिनीवर ठेवावी .

❖ महाल इ . मध्ये आरोहण, अवरोहण करतानाची गती ❖

प्रासादद्रुमशैलेषु नदीनिम्नोन्नतेषु च ।
आरोहणावतरणं कार्यमर्थवशात्तथा ॥ ९७ ॥

पदच्छेद :- प्रासाद-द्रुम-शैलेषु नदी-निम्न-उन्नतेषु च |
आरोहण-अवतरणं कार्यम् अर्थवशात् तथा || ९७ ||

अन्वय : - प्रासादद्रुमशैलेषु नदीनिम्नोन्नतेषु च अर्थवशात् आरोहण-अवतरणं कार्यम् |

अर्थ - महाल, वृक्ष आणि पर्वतावर तसेच नदी आणि वर-खाली असलेल्या जागांवर कथावस्तूच्या अर्थानुसार आरोहण व अवरोहण केले पाहिजे .

प्रासादारोहणं कार्यमतिक्रान्तैः पदैरथ |
उद्वाह्य गात्रं पादं च न्यसेत्सोपानपङ्क्तिषु || ९८ ||
तथावरणं चैव गात्रमस्यैव कारयेत् |
प्रासादे यन्मया प्रोक्तः प्रतारः केवलो भवेत् || ९९ ||

पदच्छेद :- प्रासाद-आरोहणं कार्यम् अतिक्रान्तैः पदैः अथ |
उद्वाह्य गात्रं पादं च न्यसेत् सोपान-पङ्क्तिषु || ९८ ||
तथा अवतरणं च एव गात्रम् अस्य एव कारयेत् |
प्रासादे यत् मया प्रोक्तः प्रतारः केवलः भवेत् || ९९ ||

अन्वय : - अथ अतिक्रान्तैः पदैः प्रासादारोहणं कार्यम् | सोपानपङ्क्तिषु उद्वाह्य गात्रं पादं च न्यसेत् | तथा अवतरणं (चेत्) अस्य एव गात्रं कारयेत् | मया यत् प्रासादे प्रोक्तः (तदनुसारं) केवलः प्रतारः भवेत् |

अर्थ - महालावर चढण्यासाठी अतिक्रांत चारीमध्ये पाय उचलून पायऱ्यांवर ठेवावे आणि महालातून उतरताना अंग थोडेसे वाकवून रेचित ठेवावे . महाल चढण्यासाठी जी गती सांगितली आहे, त्याच गतीचा वापर ओलांडून जाताना देखील करावा .

❖ पाण्यातील गती ❖

जलप्रमाणापेक्षा तु जलमध्ये गतिर्भवेत् |
तोयेल्पे वसनोत्कर्षः प्राज्ये पाणिविकर्षणैः || १०० ||
किंचिन्नताग्रकाया तु प्रतारे गतिरिष्यते |
प्रसार्य बाहुमेकैकं मुहुर्वारिविकर्षणैः || १०१ ||
तिर्यक्प्रसारिता चैव ह्रियमाणा च वारिणा |
अशेषाङ्गाकुलाधूतवदना गतिरिष्यते || १०२ ||

पदच्छेद : - जल-प्रमाण-अपेक्षा तु जलमध्ये गति : भवेत् |
तोये अल्पे वसन-उत्कर्ष : प्राज्ये पाणि-विकर्षणै : ॥ १०० ॥
किंचित् नताग्रकाया तु प्रतारे गति : इष्यते |
प्रसार्य बाहुम् एकैकं मुहु : वारि-विकर्षणै : ॥ १०१ ॥
तिर्यक् प्रसारिता च एव ह्रियमाणा च वारिणा |
अशेष-अङ्ग-आकुल-आधूत-वदना गति : इष्यते ॥ १०२ ॥

अन्वय : - जलप्रमाण-अपेक्षा तु जलमध्ये गति: भवेत् | तोये अल्पे वसनोत्कर्ष: प्राज्ये पाणिविकर्षणै: किंचित् नताग्रकाया प्रतारे गति: इष्यते | एकैकं बाहुं प्रसार्य मुहु: वारिविकर्षणै: (गच्छेत्) | तिर्यक् प्रसारिता वारिणा ह्रियमाणा अशेषाङ्गाकुलाधूतवदना च (एषा) गति : इष्यते |

अर्थ - पाण्यामधून जाताना जेवढे पाणी असेल त्यानुसार गती करावी . थोडेसे पाणी असल्यास कपडे जरासे वर उचलून चालावे आणि पाणी जास्त असल्यास हातांनी विकर्षण क्रिया करत अंग पुढच्या बाजूस वाकवून प्रतार गती म्हणजे पाणी दूर करण्याचा अभिनय करावा . एकेक बाहू वारंवार पसरवित पाण्यातून जावे . तिरके हात पसरवून पाणी दूर करावे व संपूर्ण शरीर व्याकुळ आणि चेहरा कंपित करत ह्या गतीचा अभिनय करावा .

### ❖ बोटीमध्ये असलेल्याची गती ❖

नौस्थस्यापि प्रयोक्तव्या द्रुतैश्चूर्णपदैर्गति : |
अतिक्रान्तेन पादेन द्वितीयेनाञ्चितेन च ॥ १०३ ॥

पदच्छेद : - नौस्थस्य अपि प्रयोक्तव्या द्रुतै : चूर्णपदै : गति : |
अतिक्रान्तेन पादेन द्वितीयेन अञ्चितेन च ॥ १०३ ॥

अन्वय : - द्रुतै: चूर्णपदै: अतिक्रान्तेन पादेन द्वितीयेन अञ्चितेन च नौस्थस्य अपि गति: प्रयोक्तव्या |

अर्थ - जलद चूर्णपदांनी युक्त एक पायाने अतिक्रांता चारी आणि दुसरा पाय अंचित स्थितीत ठेवून बोटीत असलेल्या पात्राच्या गतीचा अभिनय करावा .

### ❖ पर्वत चढणाऱ्यांची गती ❖

प्रासादारोहणे यत्तु तदेवाद्रिषु कारयेत् ।
केवलमूर्ध्वनिक्षेपमद्रिष्वङ्गे भवेदथ ॥ १०४ ॥

पदच्छेद :- प्रासाद-आरोहणे यत् तु तत् एव अद्रिषु कारयेत् ।
केवलम् ऊर्ध्वनिक्षेपम् अद्रिषु अङ्गे भवेत् अथ ॥ १०४ ॥

अन्वय : - यत् प्रासादारोहणे तत् एव अद्रिषु कारयेत् । केवलम् अद्रिषु अङ्गे ऊर्ध्वनिक्षेपं भवेत् ।

अर्थ - महाल चढण्यासाठी जी गती सांगितली आहे त्याच गतीचा वापर पर्वत चढताना देखील करावा . पर्वतारोहणामध्ये संपूर्ण शरीराला वरच्या बाजूस न्यावे .

### ❖ वृक्षावर चढणाऱ्यांची गती ❖

द्रुमे चारोहणं कार्यमतिक्रान्तैः स्थितैः पदैः ।
सूचीविद्धैरपक्रान्तैः पार्श्वक्रान्तैस्तथैव च ॥ १०५ ॥

पदच्छेद :- द्रुमे च आरोहणं कार्यम् अतिक्रान्तैः स्थितैः पदैः ।
सूचीविद्धैः अपक्रान्तैः पार्श्वक्रान्तैः तथैव च ॥ १०५ ॥

अन्वय : - अतिक्रान्तैः सूचीविद्धैः अपक्रान्तैः पार्श्वक्रान्तैः स्थितैः पदैः द्रुमे आरोहणं कार्यम् ।

अर्थ - अतिक्रांत, सूचीविद्ध, अपक्रांत आणि पार्श्वक्रांत चारींमध्ये पाय उचलून वृक्षावरील आरोहण दाखवावे .

### ❖ नदीत उतरतानाची गती ❖

एतदेवावतरणं सरित्स्वपि नियोजयेत् ।
अनेनैव विधानेन कर्तव्यं गतिचेष्टितम् ॥ १०६ ॥

पदच्छेद :- एतत् एव अवतरणं सरित्सु अपि नियोजयेत् ।
अनेन एव विधानेन कर्तव्यं गतिचेष्टितम् ॥ १०६ ॥

अन्वय : - एतत् एव सरित्सु अवतरणम् अपि नियोजयेत् । अनेन एव विधानेन गतिचेष्टितं कर्तव्यम् ।

अर्थ - अशाच प्रकारे, नदीमध्ये देखील उतरावे व याचप्रमाणे विधियुक्त गतिप्रचार करावा .

## ❖ प्रतिकात्मक अभिनय ❖

संज्ञामात्रेण कर्तव्यान्येतानि विधिपूर्वकम्
कस्मान्मृत इति प्रोक्ते किं मर्तव्यं प्रयोक्तृभि: || १०७ ||
अङ्कुशग्रहणान्नागं खलीनग्रहणाद्धयम् |
प्रग्रहग्रहणाद्यानमेवमेवापरेष्वपि || १०८ ||

पदच्छेद :- संज्ञामात्रेण कर्तव्यानि एतानि विधि-पूर्वकम् |
कस्मात् मृत: इति प्रोक्ते किं मर्तव्यं प्रयोक्तृभि: || १०७ ||
अङ्कुश-ग्रहणात् नागं खलीन-ग्रहणात् हयम् |
प्रग्रह-ग्रहणात् यानम् एवम् एव अपरेषु अपि || १०८ ||

अन्वय: - संज्ञामात्रेण विधिपूर्वकं एतानि कर्तव्यानि | कस्मात् ? मृत: इति प्रोक्ते, किं प्रयोक्तृभि: मर्तव्यम्? अङ्कुशग्रहणात् नागं खलीनग्रहणात् हयं प्रग्रहग्रहणात् यानम् एवम् एव अपरेषु अपि (अभिनेतव्यम्)|

अर्थ - या सर्व क्रिया केवळ इशाऱ्यांनीच करून दाखवाव्यात .
प्रश्न - कसे बरे ?
उत्तर - प्रयोग करीत असताना "हा मेला ." असे म्हटल्यावर नटांनी खरंच मरायचे असते का? तर नाही . तो मरणाचा अभिनय करतो . ज्याप्रमाणे अंकुश हातात धरल्याने हत्ती, लगाम खेचल्याने घोडा आणि दोरी धरल्याने यान इत्यादींची प्रतिकात्मक अभिव्यक्ती होते, त्याचप्रमाणे इतरांच्या बाबतीत पण तसाच अभिनय करावा .

## ❖ घोडेस्वाराची गती ❖

अश्वयाने गति: कार्या वैशाखस्थानकेन तु |
तथा चूर्णपदैश्चित्रैरुपर्युपरि पातितै: || १०९ ||

पदच्छेद :- अश्व-याने गति: कार्या वैशाख-स्थानकेन तु |
तथा चूर्णपदै: चित्रै: उपरि उपरि पातितै: || १०९ ||

अन्वय: - वैशाखस्थानकेन तथा उपरि उपरि पातितै: चित्रै: चूर्णपदै: अश्वयाने गति: कार्या|

अर्थ - वैशाखस्थानाद्वारे आणि वर उचललेल्या विविध चूर्णपदांद्वारे घोड्यावर स्वार असणाऱ्या वाहकाची गती दाखवावी.

## ❖ सापाची गती ❖

पन्नगानां गति: कार्या पादै: स्वस्तिकसंयुतै: |
पार्श्वक्रान्तपदं कृत्वा स्वस्तिकं रेचयेदिह || ११० ||

पदच्छेद: - पन्नगानां गति: कार्या पादै: स्वस्तिक-संयुतै: |
पार्श्वक्रान्तपदं कृत्वा स्वस्तिकं रेचयेत् इह || ११० ||

अन्वय: - स्वस्तिकसंयुतै: पादै: पन्नगानां गति: कार्या | इह पार्श्वक्रान्तपदं कृत्वा स्वस्तिकं रेचयेत्|

अर्थ - स्वस्तिक पायांनी सर्पगती करावी. ह्यात पहिली पार्श्वक्रांताचारी करावी. मग स्वस्तिकपाद रेचित करावा.

## ❖ वीटाची गती ❖

विटस्यापि तु कर्तव्या गतिर्ललितविभ्रमा |
पादैराकुञ्चित: किञ्चित्तालाभ्यन्तरपातितै: ||१११ ||
स्वसौष्ठवसमायुक्तौ तथा हस्तौ पदानुगौ |
खटकावर्धमानौ तु कृत्वा विटगतिं व्रजेत् || ११२ ||

पदच्छेद: - विटस्य अपि तु कर्तव्या गति: ललित-विभ्रमा |
पादै: आकुञ्चित: किञ्चित् ताल-अभ्यन्तर-पातितै: || १११ ||
स्वसौष्ठव-समायुक्तौ तथा हस्तौ पद-अनुगौ |
खटकावर्धमानौ तु कृत्वा विटगतिं व्रजेत् || ११२ ||

अन्वय: - विटस्य अपि ललितविभ्रमा गति: कर्तव्या | तालाभ्यन्तरपातितै: पादै: किञ्चित् आकुञ्चित: | स्वसौष्ठवसमायुक्तौ तथा पदानुगौ हस्तौ खटकावर्धमानौ कृत्वा विटगतिं व्रजेत्|

अर्थ - विटाची गती ललितविभ्रम असावी . आकुंचित पायांना एकताल अंतरावर ठेवून सौष्ठव युक्त चालावे आणि पायानुसार दोन्ही हात खटकावर्धमान स्थितीत ठेवून विटाच्या गतीचा अभिनय करता येतो .

❖ कंचुकीची गती ❖

कञ्चुकीयस्य कर्तव्या वयोऽवस्थाविशेषत: |
अवृद्धस्य प्रयोगज्ञो गतिमेवं प्रयोजयेत् || ११३ ||
अर्धतालोत्थितै: पादैर्विष्कम्भैर्ऋजुभिस्तथा |
समुद्वहन्निवाङ्गानि पङ्कलग्न इव व्रजेत् || ११४ ||

पदच्छेद : - कञ्चुकीयस्य कर्तव्या वय:-अवस्था-विशेषत: |
अवृद्धस्य प्रयोगज्ञ: गतिम् एवं प्रयोजयेत् || ११३ ||
अर्धताल-उत्थितै: पादै: विष्कम्भै: ऋजुभि: तथा |
समुद्वहन् इव अङ्गानि पङ्क-लग्न: इव व्रजेत् || ११४ ||

अन्वय : - कञ्चुकीयस्य वयोऽवस्थाविशेषत: (गति:) कर्तव्या | प्रयोगज्ञ: एवं अवृद्धस्य गतिम् प्रयोजयेत् |
अर्धताल-उत्थितै: पादै: तथा ऋजुभि: विष्कम्भै: समुद्वहन् इव अङ्गानि पङ्कलग्न: इव व्रजेत् |

अर्थ - कंचुकीची गती त्याच्या वयाप्रमाणे आणि अवस्थेप्रमाणे असली पाहिजे . नाट्यप्रयोग जाणणाऱ्याने तरुण कंचुकीची गती पुढीलप्रमाणे सांगितली आहे . अर्धा ताल वर उचललेला पाय सरळ व लांब टाकत चिखलामध्ये फसलेल्या व्यक्तीप्रमाणे स्वत:चे शरीर सांभाळत ही गती करावी .

अथ वृद्धस्य कर्तव्या गति: कम्पितदेहिका |
विष्कम्भनकृतप्राणा मन्दोत्क्षिप्तपदक्रमा || ११५ ||

पदच्छेद : - अथ वृद्धस्य कर्तव्या गति: कम्पित-देहिका |
विष्कम्भन-कृत-प्राणा मन्द-उत्क्षिप्त-पद-क्रमा || ११५ ||

अन्वय: - अथ कम्पितदेहिका विष्कम्भनकृतप्राणा मन्दोत्क्षिप्तपदक्रमा वृद्धस्य गति: कर्तव्या |

अर्थ - शरीरामध्ये कंप करत, हळूहळू काठीचा आधार घेत, प्राण सांभाळत (दीर्घ नि:श्वास टाकत) मंदगतीने चालत वृद्ध कंचुकीच्या गतीचा अभिनय करावा .

## ❖ दुबळ्या आणि रोगी व्यक्तीची गती ❖

कृशस्यापि हि कर्तव्या गतिर्मन्दपरिक्रमा |
व्याधिग्रस्ते ज्वरार्ते च तप:श्रान्ते क्षुधान्विते ||११६ ||
विष्कम्भनकृतप्राण: कृश: क्षामोदरस्तथा |
क्षामस्वरकपोलश्च दीननेत्रस्तथैव च || ११७ ||
शनैरुत्क्षेपणं चैव कर्तव्यं हस्तपादयो: |
कम्पनं चैव गात्राणां क्लेशनं च तथैव हि || ११८ ||

पदच्छेद: - कृशस्य अपि हि कर्तव्या गति: मन्द-परिक्रमा |
व्याधि-ग्रस्ते ज्वरार्ते च तप:-श्रान्ते क्षुधा-अन्विते ||११६ ||
विष्कम्भन-कृत-प्राण: कृश: क्षाम-उदर: तथा |
क्षाम-स्वर-कपोल: च दीन-नेत्र: तथा एव च || ११७ ||
शनै: उत्क्षेपणं च एव कर्तव्यं हस्त-पादयो: |
कम्पनं च एव गात्राणां क्लेशनं च तथा एव हि || ११८ ||

अन्वय: - मन्दपरिक्रमा गति: कृशस्य हि कर्तव्या | व्याधिग्रस्ते ज्वरार्ते तप:श्रान्ते क्षुधान्विते विष्कम्भनकृतप्राण: कृश: क्षामोदर: क्षामस्वरकपोल: तथैव दीननेत्र: च शनै: हस्तपादयो: उत्क्षेपणं कर्तव्यम् | तथैव गात्राणां कम्पनं क्लेशनं च (कर्तव्यम्) |

अर्थ - मंद पायांनी चालून दुबळ्या व्यक्तीच्या गतीचा अभिनय करावा आणि व्याधिग्रस्त, तापाने फणफणलेल्या, तापामुळे थकलेल्या, तसेच भुखेने त्रस्त, काठीलाच ज्याने स्वत:च्या प्राणांचा आधार बनविला आहे अशा कृश, पोट आत गेलेल्या, मंद आवाज असणाऱ्या आणि गाल आत गेलेल्या तसेच दीन नेत्र असणाऱ्या व्यक्तींचा अभिनय करताना दोन्ही हातापायांचे उत्क्षेपण हळूहळू करावे . शरीर कंपित व शिथिल करावे .

### ❖ लांबचा प्रवास करून येणाऱ्याची गती ❖

दूराध्वानं गतस्यापि गतिर्मन्दपदक्रमा |
विकूणनं च गात्रस्य जानुनोश्च विमर्दनम् || ११९ ||

पदच्छेद : - दूर-अध्वानं गतस्य अपि गति: मन्द-पद-क्रमा |
विकूणनं च गात्रस्य जानुनो: च विमर्दनम् || ११९ ||

अन्वय : - दूराध्वानं गतस्य अपि मन्दपदक्रमा गति: (कर्तव्या)| गात्रस्य विकूणनं जानुनो: च विमर्दनम् (कर्तव्यम्)|

अर्थ - दूर लांबचा प्रवास करून येणाऱ्या व्यक्तीची गती मंद (हळूवार) असली पाहिजे . ह्यात शरीराचे संकोचन व गुडघ्यांचे दुखणे इ . चा अभिनय करावा .

### ❖ स्थूल माणसाची गती ❖

स्थूलस्यापि हि कर्तव्या गतिर्देहानुकर्षिणी |
समुद्वहनभूयिष्ठा मन्दोत्क्षिप्तपदक्रमा || १२० ||
विष्कम्भगामी च भवेन्निश्वासबहुलस्तथा |
श्रमस्वेदाभिभूतश्च व्रजेच्चूर्णपदैस्तथा || १२१ ||

पदच्छेद : - स्थूलस्य अपि हि कर्तव्या गति: देह-अनुकर्षिणी |
समुद्वहन-भूयिष्ठा मन्द-उत्क्षिप्त-पदक्रमा || १२० ||
विष्कम्भगामी च भवेत् निश्वास-बहुल: तथा |
श्रम-स्वेद-अभिभूत: च व्रजेत् चूर्णपदै: तथा || १२१ ||

अन्वय : - स्थूलस्य देहानुकर्षिणी गति: कर्तव्या | (सा गति:) समुद्वहनभूयिष्ठा मन्दोत्क्षिप्तपदक्रमा (भवेत् तदा नट:) विष्कम्भगामी तथा निश्वासबहुल: च भवेत् | श्रमस्वेदाभिभूत: (स:) च चूर्णपदै: व्रजेत् |

अर्थ - स्थूल माणसाची गती ही त्याच्या शरीरानुसार असावी . जसे खूप ओझे घेऊन चालणाऱ्या व्यक्तीची गती असते, तशा मंद गतीने हळूहळू पाय उचलून चालावे . स्थूल व्यक्तीच्या

चालीमध्ये त्याने कोणाचा तरी आधार घेऊन चालावे. लांब नि:श्वास टाकावे (धापा टाकाव्यात). श्रमाने उत्पन्न झालेला घाम पुसत, चूर्णपदांनी गमन करावे.

### ❖ मदमस्त पुरुषाची गती ❖

मत्तानां तु गति: कार्या मदे तरुणमध्यमे |
वामदक्षिणपादाभ्यां घूर्णमानाऽपसर्पणै: || १२२ ||
अवकृष्टे पदे चैव ह्यनवस्थितपादिका |
विघूर्णितशरीरा च करै: प्रस्खलितैस्तथा || १२३ ||

पदच्छेद: - मत्तानां तु गति: कार्या मदे तरुण-मध्यमे |
वाम-दक्षिण-पादाभ्यां घूर्णमाना अपसर्पणै: || १२२ ||
अवकृष्टे पदे च एव हि अनवस्थित-पादिका |
विघूर्णित-शरीरा च करै: प्रस्खलितै: तथा || १२३ ||

अन्वय: - मत्तानां गति: तरुणमध्यमे मदे वामदक्षिणपादाभ्यां घूर्णमाना अपसर्पणै: कार्या | अधमे मदे अवकृष्टे पदे च अनवस्थितपादिका तथा विघूर्णितशरीरा प्रस्खलितै: करै: च (कार्या) |

अर्थ - मदमस्त पुरुषांची गती तरुण आणि मध्यम मदामध्ये डाव्या व उजव्या पायाने अडखळत तसेच अपसर्पण करीत दाखवावे. आणि अधम मदामध्ये पायांना अनियमितरीत्या ठेवून अंगाला झुलवत तसेच हातांना इकडे तिकडे फिरवित त्याचा अभिनय करावा.

### ❖ उन्मत्त पात्राची गती ❖

उन्मत्तस्यापि कर्तव्या गतिस्त्वनियतक्रमा |
बहुचारीसमायुक्ता लोकानुकरणाश्रया || १२४ ||
रूक्षस्फुटितकेशश्च रजोध्वस्ततनुस्तथा |
अनिमित्तप्रकथनो बहुभाषी विकारवान् || १२५ ||
गायत्यकस्माद्धसति सङ्गे चापि न सज्जते |
नृत्यत्यपि च संहृष्टो वादयत्यपि वा पुन: || १२६ ||

कदाचिद्धावति जवात्कदाचिदवतिष्ठते |
कदाचिदुपविष्टस्तु शयानः स्यात्कदाचन || १२७ ||
नानाचीरधरश्चैव रथ्यास्वनियतालयः |
उन्मत्तो भवति ह्येवं तस्यैतां कारयेद्गतिम् || १२८ ||

पदच्छेदः - उन्मत्तस्य अपि कर्तव्या गतिः तु अनियत-क्रमा |
बहुचारी-समायुक्ता लोक-अनुकरण-आश्रया || १२४ ||
रूक्ष-स्फुटिर-केशः च रजः-ध्वस्त-तनुः तथा |
अनिमित्त-प्रकथनः बहुभाषी विकारवान् || १२५ ||
गायति अकस्मात् हसति सङ्गे च अपि न सज्जते |
नृत्यति अपि च संहृष्टः वादयति अपि वा पुनः || १२६ ||
कदाचित् धावति जवात् कदाचित् अवतिष्ठते |
कदाचित् उपविष्टः तु शयानः स्यात् कदाचन || १२७ ||
नाना-चीर-धरः च एव रथ्यासु अनियत-आलयः |
उन्मत्तः भवति हि एवं तस्य एतां कारयेत् गतिम् || १२८ ||

अन्वयः - उन्मत्तस्य अनियतक्रमा बहुचारीसमायुक्ता लोकानुकरणाश्रया गतिः कर्तव्या | (सः) रूक्षस्फुटिरकेशः रजोध्वस्ततनुः अनिमित्तप्रकथनः बहुभाषी विकारवान् (अस्ति) | (सः) अकस्मात् गायति हसति | सङ्गे न सज्जते | संहृष्टः (सः) नृत्यति वादयति अपि | कदाचित् जवात् धावति | कदाचित् अवतिष्ठते | कदाचित् उपविष्टः कदाचन शयानः स्यात् | नानाचीरधरः (सः) रथ्यासु अनियतालयः (भवति) | एवं हि उन्मत्तः भवति, तस्य एतां गतिं कारयेत् |

अर्थ - उन्मत्त पात्राची गती अनियंत्रित पादविक्षेपांनी युक्त, विविध प्रकारच्या चारींनी युक्त, लोकानुकरणावर आधारित असावी. (सर्वसाधारणपणे) त्याचे केस रुक्ष व विस्कटलेले असावे आणि शरीर धुळीने माखलेले असावे. तो अकारण बडबडणारा व खूप बोलणारा तसेच विकारयुक्त असतो. तो अचानक गातो व अचानक हसतो. त्याचे कोणाशीही पटत नाही. तो केव्हाही आनंदाने नाचू लागतो, वाद्य वाजवतो.

कधीतरी जोरात धावायला लागतो . कधी उभा राहतो . तर कधी बसतो तर कधी झोपून जातो . तो वेगवेगळ्या प्रकारचे जुने कपडे घालून गल्लीत इकडे तिकडे पडून राहतो . अशा प्रकारचे उन्मत्त पात्र असते . या उन्मत पात्राची गती खालीलप्रमाणे करावी .

स्थित्वा नूपुरपादेन दण्डपादं प्रसारयेत् |
बद्धां चारीं तथा चैवं कृत्वा स्वस्तिकमेव च || १२९ ||
अनेन चारीयोगेन परिभ्राम्य तु मण्डलम्|
बाह्यभ्रमरकं चैव रङ्गकोणे प्रसारयेत् || १३० ||
त्रिकं सुवलितं कृत्वा लताख्यं हस्तमेव च |
विपर्ययगतैर्हस्तैः पद्भ्यां सह गतिर्भवेत् || १३१ ||

पदच्छेदः - स्थित्वा नूपुरपादेन दण्डपादं प्रसारयेत् |
बद्धां चारीं तथा च एव कृत्वा स्वस्तिकम् एव च || १२९ ||
अनेन चारीयोगेन परिभ्राम्य तु मण्डलम् |
बाह्यभ्रमरकं च एव रङ्गकोणे प्रसारयेत् || १३० ||
त्रिकं सुवलितं कृत्वा लता-आख्यं हस्तम् एव च |
विपर्यय-गतैः हस्तैः पद्भ्यां सह गतिः भवेत् || १३१ ||

अन्वयः - नूपुरपादेन स्थित्वा दण्डपादं प्रसारयेत् | बद्धां चारीं कृत्वा स्वस्तिकं (कुर्यात्) | अनेन चारीयोगेन मण्डलं परिभ्राम्य रङ्गकोणे बाह्यभ्रमरकं च एव प्रसारयेत् | त्रिकं सुवलितं कृत्वा लताख्यं हस्तं (कुर्यात्) | विपर्ययगतैः हस्तैः पद्भ्यां सह गतिः भवेत् |

अर्थ - उन्मत्त पात्राच्या गतीच्या अभिनयामध्ये नूपुरपादचारीमध्ये उभे राहून दंडपादचारीमध्ये पाय पसरवावा . त्यानंतर बद्धचारी करून स्वस्तिक करावे . याप्रमाणे चारीच्या संयोगाने मंडलाकार फिरून रंगमंचाच्या कोपऱ्याजवळ बाह्यभ्रमरक पाद प्रसारित करावा . त्यानंतर 'त्रिक' वलित करून लताहस्त करावा . त्यानंतर पायासह विपरीत हाताची क्रिया करत ही गती करावी .

## ❖ अपंग पात्रांची गती ❖

त्रिविधा तु गति: कार्या खञ्जपङ्गुकवामनै: |
विकलाङ्गप्रयोगेण कुहकाभिनयं प्रति || १३२ ||

पदच्छेद: - त्रिविधा तु गति: कार्या खञ्ज-पङ्गुक-वामनै: |
विकल-अङ्ग-प्रयोगेण कुहक-अभिनयं प्रति || १३२ ||

अन्वय: - कुहक-अभिनयं प्रति विकलाङ्गप्रयोगेण खञ्जपङ्गुकवामनै: त्रिविधा गति: कार्या |

अर्थ - हास्याच्या अभिनयासाठी अपंगांच्या प्रयोगाद्वारे हाताने अधू, लंगडा व ठेंगणा या पात्रांची गती तीन प्रकारे करावी .

एक: खञ्जगतौ नित्यं स्तब्धो वै चरणो भवेत् |
तथा द्वितीय: कार्यस्तु पादोऽग्रतलसंचर: || १३३ ||
स्तब्धेनोत्थापनं कार्यमङ्गस्य चरणेन तु |
गमनेन निषण्ण: स्यादन्येन चरणेन तु || १३४ ||
इतरेण निषीदेच्च क्रमेणानेन वै व्रजेत्|
एषा खञ्जगति: कार्या तलशल्यक्षतेषु च || १३५ ||

पदच्छेद: - एक: खञ्जगतौ नित्यं स्तब्ध: वै चरण: भवेत् |
तथा द्वितीय: कार्य: तु पाद: अग्रतलसंचर: || १३३ ||
स्तब्धेन उत्थापनं कार्यम् अङ्गस्य चरणेन तु |
गमनेन निषण्ण: स्यात् अन्येन चरणेन तु || १३४ ||
इतरेण निषीदेत् च क्रमेण अनेन वै व्रजेत् |
एषा खञ्जगति: कार्या तल-शल्य-क्षतेषु च || १३५ ||

अन्वय: - खञ्जगतौ एक: चरण: नित्यं स्तब्ध: भवेत् | तथा द्वितीय: अग्रतलसंचर: पाद: कार्य: | स्तब्धेन चरणेन अङ्गस्य उत्थापनं कार्यम् | अन्येन चरणेन गमनेन निषण्ण: स्यात् | अनेन क्रमेण इतरेण निषीदेत् व्रजेत् च | तलशल्यक्षतेषु एषा खञ्जगति: कार्या |

अर्थ - लंगड्या पुरुषाच्या गतीमध्ये एक पाय निश्चल (स्तब्ध) असावा आणि दुसरा पाय अग्रतलसंचर स्थितीत ठेवावा. स्तब्ध पायाने अंग उचलावे. दुसऱ्या पायाने पुढे जाऊन बसावे किंवा स्थिर व्हावे. त्याच क्रमाने एका पायाने थांबावे आणि दुसऱ्या पायाने चालावे. पायात काटा रुतला असेल तर खंजगतीचा वापर करावा.

पादेनाग्रतलस्थेन गतिः कार्याञ्चितेन तु |
निषण्णदेहा पङ्गोस्तु नतजङ्घा तथैव च || १३६ ||

पदच्छेदः - पदेन अग्रतलस्थेन गतिः कार्या अञ्चितेन तु |
निषण्ण-देहा पङ्गोः तु नतजङ्घा तथा एव च || १३६ ||

अन्वयः - अग्रतलस्थेन पदेन अञ्चितेन निषण्णदेहा नतजङ्घा पङ्गोः गतिः कार्या |

अर्थ - अग्रतलपादांनी आणि अंचित पादांनी निषण्ण (स्तब्ध) अंगाने तसेच नत पोटऱ्यांद्वारे ह्या पंगु पात्रांच्या गतीचा अभिनय करावा.

सर्वसंकुचिताङ्गा च वामने गतिरिष्यते |
न तस्य विक्रमः कार्यो विक्षेपश्चरणस्य च || १३७ ||

पदच्छेदः - सर्वसंकुचिताङ्गा च वामने गतिः इष्यते |
न तस्य विक्रमः कार्यः विक्षेपः चरणस्य च || १३७ ||

अन्वयः - वामने सर्वसंकुचिताङ्गा गतिः इष्यते | तस्य विक्रमः चरणस्य विक्षेपः च न कार्यः |

अर्थ - ठेंगण्याच्या गतीमध्ये, अभिनेत्यांनी संपूर्ण अंग संकुचित करून गती करावी. ठेंगण्याच्या गतीमध्ये पाय अधिक उचलू नयेत किंवा पायांचे विक्षेप दाखवू नयेत.

## ❖ विदूषकाची गती ❖

सोद्वाहिता चूर्णपदे सा कार्या कुहकात्मिका |
विदूषकस्यापि गतिर्हास्यत्रयविभूषिता || १३८ ||
अङ्गवाक्यकृतं हास्यं हास्यं नेपथ्यजं स्मृतम् |

पदच्छेद :- सोद्वाहिता चूर्णपदे सा कार्या कुहकात्मिका |
विदूषकस्य अपि गति : हास्य-त्रय-विभूषिता || १३८ ||
अङ्ग-वाक्य-कृतं हास्यं हास्यं नेपथ्यजं स्मृतम् |

अन्वय : - सा सोद्वाहिता कुहकात्मिका चूर्णपदे कार्या | विदूषकस्य अपि हास्यत्रयविभूषिता गति : (स्यात्) |
अङ्गवाक्यकृतं हास्यं नेपथ्यजं हास्यं स्मृतम् |

अर्थ - उद्वाहनाने युक्त हास्यात्मक गतीचा अभिनय चूर्णपदांनी करावा . विदूषकाच्या हास्याचे तीन प्रकार सांगितले आहेत .
१. अंगाच्या विकारांनी उत्पन्न झालेले हास्य (अंगकृत)
२. वाणीच्या विकारांद्वारे उत्पन्न झालेले हास्य (वाक्यकृत) व
३. वेशभूषेतून निर्माण झालेले हास्य (नेपथ्यजनित हास्य) . असे तीन प्रकारचे हास्य आहेत .

दन्तुर : खलित : कुब्ज : खञ्जश्च विकृतानन : || १३९ ||
यदीदृश : प्रवेश : स्यादङ्गहास्यं तु तद्भवेत् |

पदच्छेद :- दन्तुर : खलति : कुब्ज : खञ्ज : च विकृत-आनन : ||
यदि ईदृश : प्रवेश : स्यात् अङ्गहास्यं तु तत् भवेत् |

अन्वय : - दन्तुर : खलति : कुब्ज : खञ्ज : विकृतानन : च (एतेषां) यदि ईदृश : प्रवेश : स्यात् तत् तु अङ्गहास्यं भवेत् |

अर्थ - दन्तुर (मोठे व लांब दात असलेला), खल्वाट (टकलू), कुबडा, लंगडा व विकृत चेहरा असलेल्या पात्रांच्या प्रवेशाला 'अंगहास्य' म्हणतात .

यदा तु बकवद्गच्छेदुल्लोकितविलोकितै : || १४० ||
अत्यायतपदत्वाच्च अङ्गहास्यो भवेत्तु स : |

पदच्छेद :- यदा तु बकवत् गच्छेत् उल्लोकित-विलोकितै : || १४० ||
अति-आयत-पदत्वात् च अङ्गहास्य : भवेत् तु स : |

अन्वय: - यदा (नट:) उल्लोकितविलोकितै: अत्यायतपदत्वात् बकवत् गच्छेत् स: अङ्गहास्य: भवेत्|

अर्थ - जेव्हा नट बगळ्यासारखे वर-खाली, इकडे तिकडे बघत लांब लांब पाय टाकत चालतो, तेव्हा त्यास 'अंगहास्य' म्हटले जाते .

वाक्यहास्यं तु विज्ञेयमसंबद्धप्रभाषणै: || १४१ ||
अनर्थकैर्विकारैश्च तथा चाश्लीलभाषणै: |

पदच्छेद: - वाक्यहास्यं तु विज्ञेयम् असंबद्ध-प्रभाषणै: || १४१ ||
अनर्थकै: विकारै: च तथा च अश्लील-भाषणै: |

अन्वय: - असंबद्धप्रभाषणै: अनर्थकै: विकारै: तथा च अश्लीलभाषणै: वाक्यहास्यं विज्ञेयम्|

अर्थ - असंबद्ध प्रलाप, निरर्थक व विकार युक्त आणि अश्लील भाषण किंवा गोष्टीतून उत्पन्न झालेल्या हास्याला 'वाक्यहास्य' म्हणतात .

चीरचर्ममषीभस्मगैरिकाद्यैस्तु मण्डित: || १४२ ||
यस्तादृशो भवेद्विप्रा हास्यो नेपथ्यजस्तु स: |

पदच्छेद: - चीर-चर्म-मषी-भस्म-गैरिक-आद्यै: तु मण्डित: || १४२ ||
य: तादृश: भवेत् विप्रा: हास्य: नेपथ्यज: तु स: |

अन्वय: - विप्रा:, चीरचर्ममषीभस्मगैरिकाद्यै: मण्डित: य: तादृश: हास्य: भवेत् स: तु नेपथ्यज: |

अर्थ - हे ब्राह्मणांनो, जुन्या चिंध्या, चामडे, शाई, भस्म, गेरू वगैरेंनी माखलेली विकृत वेशभूषा पाहून उत्पन्न होणाऱ्या हास्यास 'नेपथ्यज हास्य' म्हटले जाते .

तस्मात्तु प्रकृतिं ज्ञात्वा भावं कार्यं च तत्त्वत: || १४३ ||
गतिप्रचारं विभजेन्नानावस्थान्तरात्मकम् |

पदच्छेद: - तस्मात् तु प्रकृतिं ज्ञात्वा भावं कार्यं च तत्त्वत: || १४३ ||
गतिप्रचारं विभजेत् नाना-अवस्था-अन्तरात्मकम् |

अन्वय : - तस्मात् तु प्रकृतिं भावं कार्यं च तत्त्वत: ज्ञात्वा नानावस्थान्तरात्मकं गतिप्रचारं विभजेत् |

अर्थ - आणि म्हणूनच प्रकृती, भाव (चित्तवृत्ती) आणि कार्याला तत्त्वत: जाणून विविध प्रकारच्या अवस्थांप्रमाणे गतिप्रचार करावे .

स्वभावजायां विन्यस्य कुटिलं वामके करे || १४४ ||
तथा दक्षिणहस्ते च कुर्याच्चतुरकं पुन: |
पार्श्वमेकं शिरश्चैव हस्तोऽथ चरणस्तथा || १४५ ||
पर्यायश: संनमयेल्लयतालवशानुग: |
स्वभावजा तु तस्यैषा गतिरन्या विकारजा || १४६ ||
अलाभलाभाद्भुक्तस्य स्तब्धा तस्य गतिर्भवेत् |

पदच्छेद : - स्वभावजायां विन्यस्य कुटिलं वामके करे || १४४ ||
तथा दक्षिणहस्ते च कुर्यात् चतुरकं पुन : |
पार्श्वम् एकं शिर : च एव हस्त : अथ चरण : तथा || १४५ ||
पर्यायश : संनमयेत् लय-ताल-वश-अनुग : |
स्वभावजा तु तस्य एषा गति : अन्या विकारजा || १४६ ||
अलाभ-लाभात् भुक्तस्य स्तब्धा तस्य गति : भवेत् |

अन्वय : - स्वभावजायां वामके करे कुटिलं विन्यस्य दक्षिणहस्ते चतुरकं कुर्यात् | एकं पार्श्वं शिर : हस्त : तथा चरण : पर्यायश : लयतालवशानुग : संनमयेत् | तस्य एषा स्वभावजा गति : अन्या विकारजा (गति : भवेत् )| अलाभलाभात् भुक्तस्य स्तब्धा तस्य गति : भवेत् |

अर्थ - स्वाभाविक गतीमध्ये, विदूषकाने डाव्या हातात वाकडा दंड घेऊन उजवा हाताने चतुर हस्त करावा . नंतर एक बाजू, मान, हात आणि पाय क्रमानुसार ताल आणि लयानुसार वाकवावेत . ही स्वाभाविक गती आहे .

ह्याच्याहून विपरीत अशा गती 'विकारज गती' म्हणून ओळखल्या जातात . या गतीमध्ये अलभ्य भोजन किंवा अलभ्य वस्त्र इत्यादी वस्तू प्राप्त होण्याचे दाखवावे . ही अस्वाभाविक गती आहे .

### ❖ चेट आणि शकाराची गती ❖

कार्या चैव हि नीचानां चेटादीनां परिक्रमात् ॥ १४७ ॥
अधमा इति ये ख्याता नानाशीलाश्च ते पुन: ।
पार्श्वमेकं शिरश्चैव कर: सचरणस्तथा ॥ १४८ ॥
गतौ नमेत चेटानां दृष्टिश्चार्धनिमेषिणी ।
शकारस्यापि कर्तव्या गतिश्चञ्चलदेहिका ॥ १४९ ॥
वस्त्राभरणसंस्पर्शैर्मुहुर्मुहुरवेक्षितै: ।
गात्रैर्विकारविक्षिप्तैर्लम्बवस्त्रस्रजा तथा ॥ १५० ॥
सगर्विता चूर्णपदा शकारस्य गतिर्भवेत् ।

पदच्छेद: - कार्या च एव हि नीचानां चेट-आदीनां परिक्रमात् ॥ १४७ ॥
अधमा: इति ये ख्याता: नाना-शीला: च ते पुन: ।
पार्श्वम् एकं शिर: च एव कर: सचरण: तथा ॥ १४८ ॥
गतौ नमेत चेटानां दृष्टि: च अर्धनिमेषिणी ।
शकारस्य अपि कर्तव्या गति: चञ्चल-देहिका ॥ १४९ ॥
वस्त्र-आभरण-संस्पर्शै: मुहु: मुहु: अवेक्षितै: ।
गात्रै: विकार-विक्षिप्तै: लम्ब-वस्त्र-स्रजा तथा ॥ १५० ॥
सगर्विता चूर्णपदा शकारस्य गति: भवेत् ।

अन्वय: - ये नानाशीला: ते अधमा: इति ख्याता: (तेषां) नीचानां चेटादीनाम् एकं पार्श्वं शिर: कर: सचरण: परिक्रमात् कार्या च । चेटानां गतौ अर्धनिमेषिणी दृष्टि: च नमेत । शकारस्य चञ्चलदेहिका गति: कर्तव्या । वस्त्राभरणसंस्पर्शै: मुहुर्मुहु: अवेक्षितै: गात्रै: विकारविक्षिप्तै: लम्बवस्त्रस्रजा तथा सगर्विता चूर्णपदा शकारस्य गति: भवेत् ।

अर्थ - जो `अधम' आहे नीच, चेट वगैरे जे चारित्र्यहीन आहेत त्यांच्या गतीमध्ये एक बाजू, डोके, हात व पाय वाकवावा. चेटांच्या गतीमध्ये दृष्टी अर्धनिमेष इतकी झुकवावी. शकाराच्या गतीचा अभिनय चंचल शरीराने दाखवावा. त्यावेळी वस्त्र तसेच अलंकारांना स्पर्श करावा. वारंवार इकडे तिकडे बघावे व विक्षिप्त अंगाद्वारे आणि लांब

वस्त्र व माळा धारण करून ही गती करावी. अशा प्रकारे गर्वयुक्त आणि चूर्णपदासह शकाराची गती असते.

❖ म्लेंच्छ इ. व्यक्तींची गती ❖

जात्या नीचेषु योक्तव्या विलोकनपरा गतिः ॥ १५१ ॥
असंस्पर्शाच्च लोकस्य स्वाङ्गानि विनिगूह्य च ।

पदच्छेद :- जात्या नीचेषु योक्तव्या विलोकन-परा गतिः ॥ १५१ ॥
असंस्पर्शात् च लोकस्य स्व-अङ्गानि विनिगूह्य च ।

अन्वय : - नीचेषु लोकस्य असंस्पर्शात् स्वाङ्गानि विनिगूह्य च जात्या विलोकनपरा गतिः योक्तव्या ।

अर्थ - नीच जातींच्या पात्रांच्या गतीचा अभिनय, इथे तिथे पाहून लोकांना स्पर्श न होईल अशा प्रकारे स्वतःचे अंग संकुचित करून करावा.

म्लेच्छानां जातयो यास्तु पुलिन्दशबरादयः ॥ १५२ ॥
तेषां देशानुसारेण कार्यं गतिविचेष्टितम् ।

पदच्छेद :- म्लेच्छानां जातयः याः तु पुलिन्द-शबर-आदयः ॥ १५२ ॥
तेषां देश-अनुरूपेण कार्यं गति-विचेष्टितम् ।

अन्वय : - म्लेच्छानां याः पुलिन्दशबरादयः जातयः तेषां देशानुरूपेण गतिविचेष्टितं कार्यम् ।

अर्थ - पुलिंद, शबर इत्यादी ज्या म्लेंच्छ जाती आहेत त्यांच्या गती आणि क्रिया ह्या देश व काळानुसार असाव्यात.

❖ पशुपक्षी इ. ची गती ❖

पक्षिणां श्वापदानां च पशूनां च द्विजोत्तमाः ॥ १५३ ॥
स्वस्वजातिसमुत्थेन स्वभावेन गतिर्भवेत् ।

पदच्छेद :- पक्षिणां श्वापदानां च पशूनां च द्विज-उत्तमाः ॥ १५३ ॥
स्व-स्व-जाति-समुत्थेन स्वभावेन गतिः भवेत् ।

अन्वयः - हे द्विजोत्तमाः, पक्षिणां श्वापदानां पशूनां च स्वस्वजातिसमुत्थेन स्वभावेन गतिः भवेत्।

अर्थ - हे ब्राह्मणांनो, पक्षी, हिंस्त्र प्राणी व पशू यांची गती स्वतःच्या जातीप्रमाणे आणि स्वभावानुसार दाखविली पाहिजे.

सिंहर्क्षवानराणां च गतिः कार्या प्रयोक्तृभिः ॥ १५४ ॥
या कृता नरसिंहेन विष्णुना प्रभविष्णुना ।
आलीढं स्थानकं कृत्वा गात्रं तस्यैव चानुगम् ॥ १५५ ॥
जानूपरि करं ह्येकमपरं वक्षसि स्थितम् ।
अवलोक्य दिशः सर्वाश्चिबुकं बाहुमस्तके ॥ १५६ ॥
गन्तव्यं विक्रमैर्विप्राः पञ्चतालान्तरोत्थितैः ।

पदच्छेदः - सिंह-ऋक्ष-वानराणां च गतिः कार्या प्रयोक्तृभिः ॥ १५४ ॥
या कृता नरसिंहेन विष्णुना प्रभविष्णुना ।
आलीढं स्थानकं कृत्वा गात्रं तस्य एव च अनुगम् ॥ १५५ ॥
जानु-उपरि करं हि एकम् अपरं वक्षसि स्थितम् ।
अवलोक्य दिशः सर्वाः चिबुकं बाहुमस्तके ॥ १५६ ॥
गन्तव्यं विक्रमैः विप्राः पञ्चताल-अन्तर-उत्थितैः ।

अन्वयः - प्रयोक्तृभिः सिंह-ऋक्ष-वानराणां गतिः कार्या । नरसिंहेन विष्णुना प्रभविष्णुना या कृता (तथैव करणीया)। हे विप्राः, आलीढं स्थानकं कृत्वा गात्रं तस्य एव अनुगं (कार्यम्) । जानूपरि एकं करम् अपरं वक्षसि स्थितं (भवेत्)। सर्वाः दिशः अवलोक्य चिबुकं बाहुमस्तके (निधाय)पञ्चताल-अन्तर-उत्थितैः विक्रमैः गन्तव्यम्।

अर्थ - सिंह, अस्वल, माकडाच्या गतीचा अभिनय नाट्यप्रयोग कर्त्यांनी खालीलप्रमाणे करावा. विष्णूने नृसिंह अवतार धारण करून जी गती केली होती तशीच गती करावी. हे ब्राह्मणांनो, प्रथम आलीढ स्थान करून शरीर तसेच झुकवावे. नंतर एक हात गुडघ्यावर व दुसरा हात छाती वर ठेवावा. मग चारही दिशांना बघून, हनुवटी खांद्यावर टेकवून पाच ताल अंतरावर पाय उचलून चालावे.

नियुद्धसमये चैव रङ्गावतरणे तथा || १५७ ||
सिंहादीनां प्रयोक्तव्या गतिरेषा प्रयोक्तृभि: |

पदच्छेद :- नियुद्ध-समये च एव रङ्ग-अवतरणे तथा || १५७ ||
सिंह-आदीनां प्रयोक्तव्या गति: एषा प्रयोक्तृभि: |

अन्वय : - प्रयोक्तृभि: रङ्गावतरणे नियुद्धसमये सिंहादीनां एषा गति: प्रयोक्तव्या |

अर्थ - नाट्यप्रयोगकर्त्यांनी रंगमंचावर नियुद्धाच्या वेळी सिंह इत्यादींच्या गतीचा वापर करावा .

शेषाणामर्थयोगेन गतिं स्थानं च योजयेत् || १५८ ||
वाहनार्थप्रयोगेषु रङ्गावतरणेषु च |

पदच्छेद :- शेषाणाम् अर्थयोगेन गतिं स्थानं च योजयेत् || १५८ ||
वाहनार्थ-प्रयोगेषु रङ्ग-अवतरणेषु च |

अन्वय : - रङ्गावतरणेषु वाहनार्थप्रयोगेषु च शेषाणाम् अर्थयोगेन गतिं स्थानं च योजयेत् |

अर्थ - रंगमंचावर येण्यासाठी आणि वाहनांना जोडण्यासाठी उरलेल्या प्राण्यांच्या गती व स्थानांचा वापर विषयानुसार करावा .

एवमेता: प्रयोक्तव्या नराणां गतयो बुधै: || १५९ ||
नोक्ता या या मया ह्यत्र ग्राह्यास्तास्ताश्च लोकत: |

पदच्छेद :- एवम् एता: प्रयोक्तव्या: नराणां गतय: बुधै: || १५९ ||
न उक्ता या: या: मया हि अत्र ग्राह्या: ता: ता: च लोकत: |

अन्वय : - एवम् बुधै: नराणां एता: गतय: प्रयोक्तव्या: | या: या: मया अत्र न उक्ता ता: ता: च लोकत: ग्राह्या: |

अर्थ - याप्रमाणे विद्वानांनी मनुष्यांच्या या गतीचा अभिनय करावा आणि ज्या प्राण्यांची गती येथे नाही सांगितली त्यांची गती लोकव्यवहाराप्रमाणे करावी .

### ❖ स्त्रियांची स्थाने आणि गती ❖

अत: परं प्रवक्ष्यामि स्त्रीणां गतिविचेष्टितम् || १६० ||

स्त्रीणां स्थानानि कार्याणि गतिष्वाभाषणेषु च |
आयतं चावहित्थं च अश्वक्रान्तमथापि च || १६१ ||

पदच्छेद:- अत: परं प्रवक्ष्यामि स्त्रीणां गति-विचेष्टितम् || १६० ||
स्त्रीणां स्थानानि कार्याणि गतिषु आभाषणेषु च |
आयतं च अवहित्थं च अश्वक्रान्तम् अथ अपि च || १६१ ||

अन्वय: - अत: परं स्त्रीणां गतिविचेष्टितं प्रवक्ष्यामि | स्त्रीणां गतिषु आभाषणेषु च आयतम् अवहित्थम् अश्वक्रान्तं च (एतानि) स्थानानि कार्याणि |

अर्थ - आता यानंतर स्त्रियांच्या गती व क्रियेचे विवरण मी करीन. गती व संभाषणामध्ये स्त्रियांनी पुढील स्थाने करावीत. ती म्हणजे आयत, अवहित्थ आणि अश्वक्रांत. आता मी तुम्हांला त्यांची लक्षणे सांगतो.

## ❖ आयतस्थान आणि विनियोग ❖

[स्थानान्येतानि नारीणामथ लक्षणमुच्यते ||]
वाम: स्वभावतो यत्र पादो विरचित: सम: || १६२ ||
तालमात्रान्तरे न्यस्तस्त्र्यश्र: पक्षस्थितोऽपर: |
प्रसन्नमाननमुर: समं यत्र समुन्नतम् || १६३ ||
लतानितम्बगौ हस्तौ स्थानं ज्ञेयं तदायतम् |

पदच्छेद:- [स्थानानि एतानि नारीणाम् अथ लक्षणम् उच्यते ||]
वाम: स्वभावत: यत्र पाद: विरचित: सम: || १६२ ||
तालमात्रान्तरे न्यस्त: त्र्यश्र: पक्षस्थित: अपर: |
प्रसन्नम् आननम् उर: समं यत्र समुन्नतम् || १६३ ||
लता-नितम्बगौ हस्तौ स्थानं ज्ञेयं तत् आयतम् |

अन्वय: - एतानि नारीणां स्थानानि अथ लक्षणम् उच्यते | यत्र वाम: पाद: स्वभावत: सम: विरचित: | तालमात्रान्तरे अपर: त्र्यश्र: पक्षस्थित: न्यस्त: | प्रसन्नम् आननं यत्र च उर: समं समुन्नतं च | लतानितम्बगौ हस्तौ तत् स्थानं आयतम् (इति) ज्ञेयम् |

अर्थ - स्त्रियांची स्थाने आणि त्यांची लक्षणे पुढीलप्रमाणे -
डावा पाय स्वाभाविकरीत्या सम असेल आणि एक ताल अंतरावर दुसरा पाय त्र्यश्र स्थितीत ठेवला असेल तसेच आनंदित चेहरा, छाती सम व उन्नत असेल, लताहस्त नितंबावर ठेवला असेल, तर त्या स्थानास 'आयत स्थान' समजावे .

[दक्षिणस्तु समः पादस्त्र्यश्रः पक्षस्थितोऽपरः || १६४ ||
वामः समुन्नतकटिश्चायते स्थानके भवेत् |

पदच्छेदः - [दक्षिणः तु समः पादः त्र्यश्रः पक्षस्थितः अपरः || १६४ ||
वामः समुन्नतकटिः च आयते स्थानके भवेत् |

अन्वयः - आयते स्थानके दक्षिणः पादः समः अपरः त्र्यश्रः पक्षस्थितः वामः च समुन्नतकटिः भवेत् |

अर्थ - अन्य मतानुसार, जेथे उजवा पाय सम आणि डावा पाय त्र्यश्र असेल . तसेच कंबर उन्नत असेल त्यास 'आयत स्थान' म्हणतात .

❖ अवहित्थस्थान आणि विनियोग ❖

आवाहने विसर्गे च तथा निर्वर्णनेषु च || १६५ ||
चिन्तायां चावहित्थे च स्थानमेतत्प्रयोजयेत् ||

पदच्छेदः - आवाहने विसर्गे च तथा निर्वर्णनेषु च || १६५ ||
चिन्तायां च अवहित्थे च स्थानम् एतत् प्रयोजयेत् ||

अन्वयः - आवाहने विसर्गे तथा निर्वर्णनेषु च चिन्तायां अवहित्थे च एतत् स्थानं प्रयोजयेत् |

अर्थ - आवाहन, विसर्जन, पाहताना, चिंता, अवहित्थ (भाव लपविताना) या स्थानाचा वापर करावा .

रङ्गावतरणारम्भः पुष्पाञ्जलिविसर्जनम् || १६६ ||
मन्मथेर्ष्योद्भवं कोपं तर्जन्यङ्गुलिमोटनम् |

निषेधगर्वगाम्भीर्यमौनं मानावलम्बनम् ॥ १६७ ॥
स्थानेऽस्मिन् संविधातव्यं दिगन्तरनिरूपणम् ।

पदच्छेद :- रङ्ग-अवतरण-आरम्भ : पुष्पाञ्जलि-विसर्जनम् ॥ १६६ ॥
मन्मथ-ईर्ष्या-उद्भवं कोपं तर्जनी-अङ्गुलि-मोटनम् ।
निषेध-गर्व-गाम्भीर्य-मौनं मान-अवलम्बनम् ॥ १६७ ॥
स्थाने अस्मिन् संविधातव्यं दिगन्तर-निरूपणम् ।

अन्वय : - रङ्गावतरणारम्भ : पुष्पाञ्जलिविसर्जनं मन्मथ-ईर्ष्या-उद्भवं कोपं तर्जनी-अङ्गुलिमोटनं निषेधगर्वगाम्भीर्यमौनं मानावलम्बनं दिगन्तरनिरूपणम् अस्मिन् स्थाने संविधातव्यम् ।

अर्थ - रंगमंचावर प्रवेश करणे, पुष्पांजली अर्पण करणे, काम आणि ईर्ष्येने उत्पन्न क्रोध दाखविणे, तर्जनी इ. बोटे मोडणे, निषेध, गर्व, गांभीर्य, मौन, अभिमान दाखविणे आणि आकाशात पाहणे यांसाठी आयतस्थानाचा वापर करावा .

[समो यत्र स्थितो वामस्त्र्यश्र: पक्षस्थितोऽपर: ॥ १६८ ॥
समुन्नतकटिर्वामस्त्ववहित्थं तु तद्भवेत् ॥]

पदच्छेद :- [सम : यत्र स्थित : वाम : त्र्यश्र : पक्षस्थित : अपर : ॥ १६८ ॥
समुन्नतकटि : वाम : तु अवहित्थं तु तत् भवेत् ॥]

अन्वय : - यत्र वाम : सम : स्थित : अपर : त्र्यश्र : पक्षस्थित : समुन्नतकटि : वाम : तु अवहित्थं तु तत् भवेत् ॥]

अर्थ - जिथे डावा पाय सम असेल आणि दुसरा उजवा पाय त्र्यश्र असेल आणि डावी कंबर समुन्नत असेल त्यास 'अवहित्थ स्थान' असे म्हणतात .

पुरो विचलितस्त्र्यश्रस्तदन्योपसृत: सम: ॥ १६९ ॥
पादस्तालान्तरन्यस्तस्त्रिकमीषत्समुन्नतम् ।
पाणिर्लताख्यो यत्रैकस्तदन्यस्तु नितम्बग: ॥ १७० ॥
अवहित्थं समाख्यातं स्थानमागमभूषणै: ।

पदच्छेद : - पुर : विचलित : त्र्यश्र : तदन्य : अपसृत : सम : ‖ १६९ ‖
पाद : तालान्तर-न्यस्त : त्रिकम् ईषत् समुन्नतम् |
पाणि : लता-आख्य : यत्र एक : तदन्य : तु नितम्बग : ‖ १७० ‖
अवहित्थं समाख्यातं स्थानम् आगम-भूषणै : |

अन्वय : - त्र्यश्र : पुर : विचलित : तदन्य : अपसृत : सम : (कार्य :) | पाद : तालान्तरन्यस्त : त्रिकम् ईषत् समुन्नतम् पाणि : लताख्य : यत्र एक : तदन्य : तु नितम्बग : (चेत्) आगमभूषणै : (तत्) अवहित्थं स्थानम् समाख्यातम् |

अर्थ - अवहित्थ स्थानाचे दुसरे लक्षण - त्र्यश्रपाद समोरच्या दिशेला विचलित करावा . दुसरा पाय अपसृत होऊन सम करावा आणि तो एक तालाच्या अंतरावर ठेवावा, त्रिक थोडे उन्नत करावे . एका हाताने लताहस्त करून दुसरा नितंबावर ठेवावा . त्या स्थानाला नाट्यशास्त्रातील विद्वान लोक 'अवहित्थ' असे म्हणतात .

विलासलीलाबिब्बोके शृंगारात्मनिरूपणे ‖ १७१ ‖
स्थानमेतत्प्रयोक्तव्यं भर्तृमार्गावलोकने |
[स्त्रीणामेतत्स्मृतं स्थानं संलापे तु स्वभावजे ‖ १७२ ‖
निश्चये परितोषे च वितर्के लज्जिते तथा ||]

पदच्छेद : - विलास-लीला-बिब्बोके शृङ्गार-आत्म-निरूपणे ‖ १७१ ‖
स्थानम् एतत् प्रयोक्तव्यं भर्तृ-मार्ग-अवलोकने |
[स्त्रीणाम् एतत् स्मृतं स्थानं संलापे तु स्वभावजे ‖ १७२ ‖
निश्चये परितोषे च वितर्के लज्जिते तथा ||]

अन्वय : - विलासलीलाबिब्बोके शृङ्गारात्मनिरूपणे भर्तृमार्ग-अवलोकने एतत् स्थानं प्रयोक्तव्यम् | स्त्रीणां स्वभावजे संलापे निश्चये परितोषे वितर्के तथा लज्जिते एतत् स्थानं स्मृतम् |

अर्थ - विलासलीला, बिब्बोक, शृंगार इ . चा अभिनय करण्यासाठी तसेच पती किंवा प्रियकराची वाट पाहण्यासाठी या स्थानाचा वापर केला जातो . स्त्रियांचे स्वाभाविक संभाषण, निश्चय, परितोष, वितर्क आणि लज्जा इ . साठीदेखील हे स्थान सांगितले गेले आहे .

❖ अश्वक्रांतस्थान आणि विनियोग ❖

पाद: समस्थितश्चैक एकश्चाग्रतलाञ्चित: ॥ १७३ ॥
सूचीविद्धमविद्धं वा तदश्वक्रान्तमुच्यते ।

पदच्छेद: - पाद: समस्थित: च एक: एक: च अग्रतल-अञ्चित: ॥ १७३ ॥
सूचीविद्धम् अविद्धं वा तत् अश्वक्रान्तम् उच्यते ।

अन्वय: - एक: पाद: समस्थित: एक: च अग्रतलाञ्चित: सूचीविद्धम् अविद्धं वा तत् अश्वक्रान्तम् उच्यते ।

अर्थ - जिथे एकपाद सम स्थितीत असेल आणि दुसरा अग्रतल करून वाकविलेला असेल आणि जिथे सूचीविद्ध आणि आविद्ध होईल त्यास 'अश्वक्रांत' असे म्हटले आहे .

स्खलितं घूर्णितं चैव गलिताम्बधारणम् ॥ १७४ ॥
कुसुमस्तबकादानं परिरक्षणमेव च ।
वित्रासनं सललितं तरुशाखावलम्बनम् ॥ १७५ ॥
स्थानेऽस्मिन्संविधानीयं स्त्रीणामेतत्प्रयोक्तृभि: ।

पदच्छेद: - स्खलितं घूर्णितं च एव गलित-अम्बर-धारणम् ॥ १७४ ॥
कुसुम-स्तबक-आदानं परिरक्षणम् एव च ।
वित्रासनं सललितं तरु-शाखा-अवलम्बनम् ॥ १७५ ॥
स्थाने अस्मिन् संविधानीयं स्त्रीणाम् एतत् प्रयोक्तृभि: ।

अन्वय: - स्त्रीणाम् स्खलितं घूर्णितं गलित-अम्बरधारणं कुसुमस्तबक-आदानं परिरक्षणं वित्रासनं सललितं तरुशाखावलम्बनं प्रयोक्तृभि: एतत् (सर्वम्) अस्मिन् स्थाने संविधानीयम् ।

अर्थ - स्त्रियांचे नैराश्य, इकडे तिकडे फिरणे, गळलेले वस्त्र धरण्यासाठी (निऱ्या सांभाळताना), पुष्पगुच्छ धरताना, काळजी घेताना, घाबरताना, नाजुक क्रिया करताना, झाडाची फांदी धरताना नाट्यप्रयोग कर्त्यांनी हे स्थान वापरावे .

[शाखावलम्बने कार्य स्तबकग्रहणे तथा ॥ १७६ ॥
विश्रामेष्वथ नीचानां नराणां चार्थयोगत:]

पदच्छेद : - [शाखा-अवलम्बने कार्यं स्तबक-ग्रहणे तथा || १७६ ||
विश्रामेषु अथ नीचानां नराणां च अर्थ-योगत :]

अन्वय : - शाखावलम्बने तथा स्तबकग्रहणे नीचानां नराणां च विश्रामेषु अर्थयोगत: (एतत् स्थानं) कार्यम् |

अर्थ - वृक्षाची फांदी धरताना, फुलांचा गुच्छ धरताना आणि देवतांच्या विश्रांतीसाठी मनुष्यांनी या स्थानाचा वापर करावा .

### ❖ स्थान आणि गती यांचा परस्परसंबंध ❖

स्थानकं तावदेव स्याद्यावच्चेष्टा प्रवर्तते || १७७ ||
भग्नं च स्थानकं नृत्ते चारी चेत्समुपस्थिता |

पदच्छेद : - स्थानकं तावत् एव स्यात् यावत् चेष्टा प्रवर्तते || १७७ ||
भग्नं च स्थानकं नृत्ते चारी चेत् समुपस्थिता |

अन्वय : - तावत् स्थानकं स्यात् यावत् चेष्टा प्रवर्तते | नृत्ते चारी समुपस्थिता चेत् स्थानकं भग्नं (भवति) |

अर्थ - या स्थानांचा वापर तोपर्यंत केला पाहिजे जो पर्यंत पात्र त्याची क्रिया करीत असतो . नृत्तामध्ये जेव्हा चारी इ . वापर सुरू झाला की ते स्थान आपोआप नष्ट होते .

### ❖ स्वभावानुसार स्त्रियांची गती ❖

एवं स्थानविधि: कार्य: स्त्रीणां नृणामथापि च || १७८ ||
पुनश्चासां प्रवक्ष्यामि गतिं प्रकृतिसंस्थिताम् |

पदच्छेद : - एवं स्थान-विधि : कार्य : स्त्रीणां नृणाम् अथ अपि च || १७८ ||
पुन : च आसां प्रवक्ष्यामि गतिं प्रकृति-संस्थिताम् |

अन्वय : - एवं स्त्रीणां नृणां च स्थानविधि : कार्य : | पुन : आसां प्रकृतिसंस्थितां गतिं प्रवक्ष्यामि |

अर्थ - याप्रमाणे स्त्री आणि पुरुषांच्या स्थानांचा हा विषय मांडला आहे . आता स्त्रियांच्या स्वभावाप्रमाणे गती सांगतो .

कृत्वाऽवहित्थं स्थानं तु वामं चाधोमुखं भुजम् ‖ १७९ ‖
नाभिप्रदेशे विन्यस्य सव्यं च खटकामुखम् |
ततः सललितं पादं तालमात्रसमुत्थितम् ‖ १८० ‖
दक्षिणं वामपादस्य बाह्यपार्श्वे विनिक्षिपेत् |
तेनैव समकालं च लताख्यं वामकं भुजम् ‖ १८१ ‖
दक्षिणं विनमेत्पार्श्वं न्यसेन्नाभितटे ततः |
नितम्बे दक्षिणं कृत्वा हस्तं चोद्वेष्ट्य वामकम् ‖ १८२ ‖
ततो वामपदं दद्याल्लताहस्तं च दक्षिणम् |
लीलयोद्वाहितेनाथ शिरसानुगतेन च ‖ १८३ ‖
[किञ्चिन्नतेन गात्रेण गच्छेत्पञ्चपदीं ततः |

पदच्छेदः - कृत्वा अवहित्थं स्थानं तु वामं च अधोमुखं भुजम् ‖ १७९ ‖
नाभि-प्रदेशे विन्यस्य सव्यं च खटकामुखम् |
ततः सललितं पादं तालमात्र-समुत्थितम् ‖ १८० ‖
दक्षिणं वामपादस्य बाह्यपार्श्वे विनिक्षिपेत् |
तेन एव समकालं च लता-आख्यं वामकं भुजम् ‖ १८१ ‖
दक्षिणं विनमेत् पार्श्वं न्यसेत् नाभितटे ततः |
नितम्बे दक्षिणं कृत्वा हस्तं च उद्वेष्ट्य वामकम् ‖ १८२ ‖
ततः वामपदं दद्यात् लताहस्तं च दक्षिणम् |
लीलया उद्वाहितेन अथ शिरसा अनुगतेन च ‖ १८३ ‖
किञ्चित् नतेन गात्रेण गच्छेत् पञ्चपदीं ततः |

अन्वयः - अवहित्थं स्थानं कृत्वा वामं भुजम् अधोमुखं (कुर्यात्) | सव्यं नाभिप्रदेशे विन्यस्य खटकामुखं (कुर्वीत) | ततः सललितं पादं तालमात्रसमुत्थितं (कृत्वा) दक्षिणं वामपादस्य बाह्यपार्श्वे विनिक्षिपेत् |

तेन एव समकालं च वामकं लताख्यं भुजं नाभितटे न्यसेत् ततः दक्षिणं पार्श्वं विनमेत् |

नितम्बे दक्षिणं कृत्वा वामकं हस्तं च उद्वेष्ट्य ततः वामपदं दद्यात् दक्षिणं लताहस्तं च (कुर्वीत)|

अथ लीलया उद्वाहितेन शिरसा अनुगतेन किञ्चित् नतेन गात्रेण पञ्चपदीं गच्छेत्|

अर्थ - प्रथमतः 'अवहित्थ' स्थान करून डावा हात अधोमुख करावा. मग उजवा हात नाभीजवळ खटकामुख ठेवावा. मग ललित मुद्रेमध्ये पाय एकताल अंतरावर उचलावा आणि उजवा पाय डाव्या पायाच्या बाजूला ठेवावा. त्याच वेळी डावा लताहस्त नाभीवर ठेवावा आणि उजव्या बाजूने वाकावे. मग उजवा हात नितंबावर ठेवून डावा हात उद्वेष्टित करावा. मग डावा पाय ठेवून उजवा हाताने 'लताहस्त' करावा. त्यानंतर लीलेने उद्वाहित शिर ठेवून थोडेसे अंग झुकवून पाच पावले चालावे.

योविधिः पुरुषाणां तु रङ्गपीठपरिक्रमे ॥ १८४ ॥
स एव प्रमदानां वै कर्तव्यो नाट्ययोक्तृभिः ॥

पदच्छेदः - यः विधिः पुरुषाणां तु रङ्गपीठ-परिक्रमे ॥ १८४ ॥
स: एव प्रमदानां वै कर्तव्यः नाट्ययोक्तृभिः ॥

अन्वयः - रङ्गपीठपरिक्रमे यः विधिः पुरुषाणां सः एव नाट्ययोक्तृभिः प्रमदानां (कृते) कर्तव्यः|

अर्थ - रंगमंचावर चालण्यासाठी जो विधी पुरुषांसाठी सांगितला आहे. तोच विधी नाट्य जाणणाऱ्यांनी स्त्रियांसाठी देखील तशाच पद्धतीने करावा.

षट्कलं तु न कर्तव्यं तथाष्टकलमेव च ॥ १८५ ॥
पदस्य पतनं तज्ज्ञैः खेदनं तद्भवेत्स्त्रियः|

पदच्छेदः - षट्कलं तु न कर्तव्यं तथा अष्टकलम् एव च ॥ १८५ ॥
पदस्य पतनं तज्ज्ञैः खेदनं तत् भवेत् स्त्रियः|

अन्वयः - तज्ज्ञैः पदस्य षट्कलं तथा अष्टकलं पतनं च न कर्तव्यम्| तत् स्त्रियः खेदनं भवेत्|

अर्थ - नाट्यविद्वानांच्या मते, स्त्रियांनी सहाकला, आठकला मापाने पाय उचलून ठेवू नये, कारण त्यामुळे स्त्रीला थकवा येईल. (आणि ते स्त्रियांना शोभणारही नाही.)

## ❖ प्रौढा स्त्रियांची गती ❖

सयौवनानां नारीणामेवं कार्या गतिर्बुधैः ‖ १८६ ‖
स्थानीया याः स्त्रियस्तासां सम्प्रवक्ष्यामहं गतिम् ।

पदच्छेदः - सयौवनानां नारीणाम् एवं कार्या गतिः बुधैः ‖ १८६ ‖
स्थानीयाः याः स्त्रियः तासां सम्प्रवक्ष्यामि अहं गतिम् ।

अन्वयः - एवं बुधैः सयौवनानां नारीणां गतिः कार्या । स्थानीयाः याः स्त्रियः तासाम् अहं गतिं सम्प्रवक्ष्यामि ।

अर्थ - याप्रमाणे विद्वानांनी तरुण स्त्रियांची गती दाखवावी. आता मी प्रौढा स्त्रियांच्या गतीचे वर्णन करतो.

कृत्वावहित्थं स्थानं तु वामं न्यस्य कटीतटे ‖ १८७ ‖
आद्यं चारालमुत्तानं कुर्यान्नाभिस्तनान्तरे ।
न निषण्णं न च स्तब्धं न चापि परिवाहितम् ‖ १८८ ‖
कृत्वा गात्रं ततो गच्छेत्तेनैवेह क्रमेण तु ।

पदच्छेदः - कृत्वा अवहित्थं स्थानं तु वामं न्यस्य कटीतटे ‖ १८७ ‖
आद्यं च अरालम् उत्तानं कुर्यात् नाभि-स्तनान्तरे ।
न निषण्णं न च स्तब्धं न च अपि परिवाहितम् ‖ १८८ ‖
कृत्वा गात्रं ततः गच्छेत् तेन एव इह क्रमेण तु ।

अन्वयः - अवहित्थं स्थानं कृत्वा वामं कटीतटे न्यस्य आद्यं अरालम् (कृत्वा) नाभिस्तनान्तरे उत्तानं कुर्यात् । गात्रं न निषण्णं न च स्तब्धं न च परिवाहितं कृत्वा ततः तेन एव क्रमेण इह गच्छेत् ।

अर्थ - अवहित्थस्थान करून डावा हात कमरेवर ठेवावा. उजव्या हाताला अराल करून नाभी आणि स्तनांच्यामध्ये उत्तान ठेवावा. मग शरीर जास्त निषण्ण किंवा स्तब्ध किंवा परिवाहित न करता पुन्हा त्याच क्रमाने चालावे.

## ❖ दासींची गती ❖

प्रेष्याणामपि कर्तव्या गतिरुद्भ्रान्तगामिनी || १८९ ||
किंचिदुन्नमितैर्गात्रैराविद्धभुजविक्रमा |
स्थानं कृत्वावहित्थं च वामं चाधोमुखं भुजम् || १९० ||
नाभिप्रदेशे विन्यस्य सव्यं च खटकामुखम् |

पदच्छेद : - प्रेष्याणाम् अपि कर्तव्या गति : उद्भ्रान्त-गामिनी || १८९ ||
किंचित् उन्नमितै : गात्रै : आविद्ध-भुज-विक्रमा |
स्थानं कृत्वा अवहित्थं च वामं च अधोमुखं भुजम् || १९० ||
नाभि-प्रदेशे विन्यस्य सव्यं च खटकामुखम् |

अन्वय : - प्रेष्याणाम् उद्भ्रान्तगामिनी गति : कर्तव्या | किंचित् उन्नमितै : गात्रै : आविद्धभुजविक्रमा (भूत्वा) अवहित्थं स्थानं कृत्वा वामं च भुजम् अधोमुखं (कृत्वा) नाभिप्रदेशे विन्यस्य सव्यं च खटकामुखं (कुर्यात्) |

अर्थ - दासी असलेल्या स्त्रीची गती उद्भ्रांतगामिनी असावी . वर उचललेल्या गात्रांद्वारे आविद्ध हस्त करावा . अवहित्थस्थान करून डावा हात अधोमुख करून नाभिप्रदेशावर ठेवावा आणि उजवा हात खटकामुख करावा .

## ❖ नपुंसकांची गती ❖

अर्धनारीगति: कार्या स्त्रीपुंसाभ्यां विमिश्रिता || १९१ ||
उदात्तललितैर्गात्रैः पादैर्लीलासमन्वितैः |

पदच्छेद : - अर्धनारी-गति : कार्या स्त्री-पुंसाभ्यां विमिश्रिता || १९१ ||
उदात्त-ललितै : गात्रै : पादै : लीला-समन्वितै : |

अन्वय : - उदात्तललितैः गात्रैः पादैः लीलासमन्वितैः स्त्रीपुंसाभ्यां विमिश्रिता अर्धनारीगतिः कार्या |

अर्थ - नपुंसकपात्रांची (अर्धनारी) गतीमध्ये उदात्त आणि ललितगात्रांनी तसेच लीलायुक्त पायांनी स्त्री आणि पुरुष यांच्या मिश्र गतीचा अभिनय करावा .

या पूर्वमेवाभिहिता ह्युत्तमानां गतिर्मया ‖ १९२ ‖
स्त्रीणां कापुरुषाणां च ततोऽर्धार्धं तु योजयेत् |

पदच्छेद : - या पूर्वम् एव अभिहिता हि उत्तमानां गति : मया ‖ १९२ ‖
स्त्रीणां कापुरुषाणां च तत : अर्धार्धं तु योजयेत् |

अन्वय : - मया या पूर्वम् एव उत्तमानां गति: अभिहिता, स्त्रीणां कापुरुषाणां च तत: अर्धार्धं योजयेत् |

अर्थ - मी पूर्वी जी उत्तम पुरुषांची गती सांगितली आहे, त्यामानाने स्त्रियांची गती अर्धी असावी आणि कापुरुष म्हणजे किन्नरांची त्याहून अर्धी गती असावी .

मध्यमोत्तमनीचानां नृणां यद्गतिचेष्टितम् ‖ १९३ ‖
स्त्रीणां तदेव कर्तव्यं ललितै: पदविक्रमै: |

पदच्छेद : - मध्यम-उत्तम-नीचानां नृणां यत् गतिचेष्टितम् ‖ १९३ ‖
स्त्रीणां तत् एव कर्तव्यं ललितै : पदविक्रमै : |

अन्वय : - मध्यम-उत्तम-नीचानां नृणां यत् गतिचेष्टितम् तत् एव स्त्रीणां ललितै: पदविक्रमै: कर्तव्यम् |

अर्थ - मध्यम, उत्तम आणि अधम पुरुषांच्या ज्या गती आणि क्रिया आहेत, स्त्रियांसाठी देखील त्याच गती आणि क्रिया पदलालित्याद्वारे कराव्या .

## ❖ बालकांची गती ❖

बालानामपि कर्तव्या स्वच्छन्दपदविक्रमा ‖ १९४ ‖
न तस्यां सौष्ठवं कार्यं न प्रमाणं प्रयोक्तृभि: |

पदच्छेद : - बालानाम् अपि कर्तव्या स्वच्छन्द-पद-विक्रमा ‖ १९४ ‖
न तस्यां सौष्ठवं कार्यं प्रमाणं न प्रयोक्तृभि : |

अन्वय : - बालानाम् अपि स्वच्छन्दपदविक्रमा कर्तव्या | प्रयोक्तृभि: तस्यां न सौष्ठवं न प्रमाणं कार्यम् |

अर्थ - लहान मुलामुलींच्या गतीमध्ये स्वच्छंद पद विन्यास असतात . नाट्यविद्वानांनी यामध्ये सौष्ठवाचा दुराग्रह ठेवू नये आणि प्रमाणाची अपेक्षाही करू नये .

### ❖ नपुंसकांची गती ❖

तृतीया प्रकृति: कार्या नाम्ना चैव नपुंसका || १९५ ||
नरस्वभावमुत्सुज्य स्त्रीगतिं तत्र योजयेत् ||

पदच्छेद : - [तृतीया प्रकृति : कार्या नाम्ना च एव नपुंसका || १९५ ||
नर-स्वभावम् उत्सृज्य स्त्रीगतिं तत्र योजयेत् ||]

अन्वय : - तृतीया प्रकृति : नाम्ना नपुंसका कार्या | नरस्वभावम् उत्सृज्य स्त्रीगतिं तत्र योजयेत् |

अर्थ - तृतीय प्रकृती म्हणजेच नपुंसक . किन्नरांसाठी पुरुष स्वभाव सोडून स्त्रीपात्रांच्या गतीचा इथे वापर करावा .

### ❖ स्त्रीपुरुषांचा परस्पर अभिनय ❖

विपर्यय: प्रयोक्तव्य: पुरुषस्त्रीनपुंसके || १९६ ||
स्वभावमात्मनस्त्यक्त्वा तद्भावगमनादिह |

पदच्छेद : - विपर्यय : प्रयोक्तव्य : पुरुष-स्त्री-नपुंसके || १९६ ||
स्वभावम् आत्मन : त्यक्त्वा तद्-भाव-गमनात् इह |

अन्वय : - पुरुषस्त्रीनपुंसके आत्मन : स्वभावं त्यक्त्वा तद्भावगमनात् इह विपर्यय : प्रयोक्तव्य : |

अर्थ - स्त्री, पुरुष आणि नपुंसक जेव्हा स्वत:च्या स्वभावाचा त्याग करून ज्या रूपाचा वेष धारण केला असेल त्या भावानुसार त्या पात्राचा अभिनय करावा .

व्याजेन क्रीडया वापि तथा भूयश्च वञ्चनात् || १९७ ||
स्त्री पुंस: प्रकृतिं कुर्यात् स्त्रीभावं पुरुषोऽपि च |

पदच्छेद : - व्याजेन क्रीडया वा अपि तथा भूय: च वञ्चनात् ॥ १९७ ॥
स्त्री पुंस : प्रकृतिं कुर्यात् स्त्रीभावं पुरुष : अपि च ।

अन्वय : - व्याजेन क्रीडया वा तथा भूय : च वञ्चनात् स्त्री पुंस : प्रकृतिं पुरुष : स्त्रीभावं च कुर्यात् ।

अर्थ - छल-कपट, क्रीडा, किंवा वारंवार फसवणूक यांद्वारे स्त्रीने पुरुषांचा व पुरुषाने स्त्रियांच्या भावाचा अभिनय करावा .

धैर्योदार्येण सत्त्वेन बुद्धया तद्वच्च कर्मणा ॥ १९८ ॥
स्त्री पुमांसं त्वभिनयेद्वेषवाक्यविचेष्टितै : ।

पदच्छेद : - धैय-उदार्येण सत्त्वेन बुद्धया तद्वत् च कर्मणा ॥ १९८ ॥
स्त्री पुमांसं तु अभिनयेत् वेष-वाक्य-विचेष्टितै : ।

अन्वय : - धैर्योदार्येण सत्त्वेन बुद्धया तद्वत् च कर्मणा वेषवाक्यविचेष्टितै : स्त्री पुमांसं तु अभिनयेत् ।

अर्थ - धैर्य, उदारता, सत्त्व, बुद्धी इ . कर्मांनी आणि वेशभूषा वाक्य व क्रियांद्वारे स्त्रीने पुरुष पात्राचा अभिनय करावा .

स्त्रीवेषभाषितैर्युक्त : प्रेषिताप्रेषितैस्तथा ॥ १९९ ॥
मृदुसन्नगतिश्चैव पुमान्स्त्रीभावमाचरेत् ।

पदच्छेद : - स्त्री-वेष-भाषितै : युक्त : प्रेक्षिता-प्रेक्षितै : तथा ॥ १९९ ॥
मृदु-सन्नगति : च एव पुमान् स्त्री-भावम् आचरेत् ।

अन्वय : - स्त्रीवेषभाषितै : युक्त : तथा प्रेक्षिताप्रेक्षितै : मृदुसन्नगति : च पुमान् स्त्रीभावम् आचरेत् ।

अर्थ - याप्रमाणे स्त्रीपात्रास उचित अशी वेशभूषा, मृदू संभाषण, तसेच काही वस्तू पाहून न पहाणे, व मृदू आणि मंद गती करून पुरुषांनी स्त्रीभावाचे अनुकरण करून अभिनय करावा .

❖ पुलिंद इ . ची गती ❖

[जातिहीनाश्च या नार्य : पुलिन्दशबराङ्गना : ॥ २०० ॥
याश्चापि तासां कर्तव्या तज्जातिसदृशी गति : ।

पदच्छेद :- [जातिहीना : च या : नार्य : पुलिन्द-शबर-अङ्गना : ॥ २०० ॥
या : च अपि तासां कर्तव्या तत्-जाति-सदृशी गति : ।

अन्वय : - या : जातिहीना : नार्य : या : च पुलिन्दशबराङ्गना : तासां तज्जातिसदृशी गति : कर्तव्या ।

अर्थ - ज्या जातिभ्रष्ट किंवा हीन जातीच्या स्त्रिया आहेत आणि ज्या पुलिन्द शबर इ. स्त्रिया आहेत त्यांनी आपल्या जातीनुसार त्यांच्या गतीचे प्रदर्शन करावे

### ❖ व्रतस्थ इ. लोकांची गती ❖

व्रतस्थानां तप :स्थानां लिङ्गस्थानां तथैव च ॥ २०१ ॥
स्वस्थानां चैव नारीणां समपादं प्रयोजयेत् ।

पदच्छेद :- व्रतस्थानां तप :स्थानां लिङ्गस्थानां तथा पुन : ॥ २०१ ॥
स्वस्थानां च एव नारीणां समपादं प्रयोजयेत् ।

अन्वय : - व्रतस्थानां तप :स्थानां लिङ्गस्थानां स्वस्थानां च नारीणां समपादं प्रयोजयेत् ।

अर्थ - व्रतधारिणी, तपस्विनी, लिङ्गिनी आणि आकाशचारिणी स्त्रियांनी 'समपादाचा' प्रयोग करावा.

### ❖ उद्धत अंगहार, चारी आणि मंडल ❖

उद्धता येऽङ्गहारा स्युर्याश्चार्यो मण्डलानि वा ॥ २०२ ॥
तानि नाट्यप्रयोगज्ञैर्न कर्तव्यानि योषिताम् ।]

पदच्छेद :- उद्धता : ये अङ्गहारा : स्यु : या : चार्य : मण्डलानि वा ॥ २०२ ॥
तानि नाट्यप्रयोगज्ञै : न कर्तव्यानि योषिताम् ।]

अन्वय : - ये उद्धता: अङ्गहारा:, या: चार्य: मण्डलानि वा स्यु: तानि नाट्यप्रयोगज्ञै: योषितां (कृते) न कर्तव्यानि ।

अर्थ - जे उद्धत अंगहार, चारी आणि मंडले आहेत, त्यांचा प्रयोग नाट्यप्रयोक्त्यांनी स्त्रियांच्या गतीमध्ये करू नये.

## ❖ आसनविधी ❖

तथासनविधिः कार्यो स्त्रीणां नृणामथापि च ॥ २०३ ॥
नानाभावसमायुक्तस्तथैव शयनाश्रयः ।

पदच्छेदः - तथा आसनविधिः कार्यः स्त्रीणां नृणाम् अथ अपि च ॥ २०३ ॥
नानाभाव-समायुक्तः तथा एव शयन-आश्रयः ।

अन्वयः - तथा स्त्रीणां नृणां च नानाभावसमायुक्तः आसनविधिः कार्यः । तथा एव शयन-आश्रयः (अपि कार्यः) ।

अर्थ - अशाप्रकारे स्त्री आणि पुरुषांचा आसनविधी विविध प्रकारच्या भावांनी युक्त असावा. त्यांचा शयनविधीदेखील सांगितला आहे.

## ❖ विविध अवस्थेतील आसने ❖

विष्कम्भिताञ्चितौ पादौ किञ्चित्समुन्नतम् ॥ २०४ ॥
हस्तौ कट्यूरुविन्यस्तौ स्वस्थे स्यादुपदेशने ।

पदच्छेदः - विष्कम्भित-अञ्चितौ पादौ त्रिकं किञ्चित् समुन्नतम् ॥ २०४ ॥
हस्तौ कटी-ऊरु-विन्यस्तौ स्वस्थे स्यात् उपवेशने ।

अन्वयः - स्वस्थे उपवेशने विष्कम्भिताञ्चितौ पादौ त्रिकं किञ्चित् समुन्नतं हस्तौ कटी-ऊरु-विन्यस्तौ स्यात् ।

अर्थ - स्वस्थ बसण्यासाठी दोन्ही पाय विष्कंभित आणि अंचित करून त्रिक थोडे समुन्नत करावे. मग दोन्ही हातांना कमरेवर आणि मांड्यांवर ठेवावे.

पादः प्रसारितः किंचिदेकश्चैवासनाश्रयः ॥ २०५ ॥
शिरः पार्श्वानतं चैव सचिन्त उपदेशने ।

पदच्छेदः - पादः प्रसारितः किंचित् एकः च एव आसन-आश्रयः ॥ २०५ ॥
शिरः पार्श्वानतं च एव सचिन्तः उपवेशने ।

अन्वयः - सचिन्तः उपवेशने एकः पादः किंचित् प्रसारितः आसनाश्रयः शिरः पार्श्वानतं च ।

अर्थ - चिंताग्रस्त बसले असताना एक पाय थोडा पसरलेला आणि तोच आसनावर आश्रित (टेकलेला) असावा . तसेच शिर एका बाजूला झुकलेले असावे .

चिबुकोपाश्रितौ हस्तौ बाहुशीर्षश्रितं शिर: ‖ २०६ ‖
सम्प्रणष्टेन्द्रियमना भवेच्छोकोपवेशने |

पदच्छेद :- चिबुक-उपाश्रितौ हस्तौ बाहु-शीर्ष-आश्रितं शिर : ‖ २०६ ‖
संप्रणष्ट-इन्द्रिय-मना : भवेत् शोक-उपवेशने |

अन्वय : - चिबुकोपाश्रितौ हस्तौ बाहुशीर्षाश्रितं शिर : संप्रणष्टेन्द्रियमना : शोकोपवेशने भवेत् |

अर्थ - शोकाकुल अवस्थेत बसताना दोन्ही हात हनुवटीवर वाकवून ठेवावेत आणि डोके हातांच्या आधाराने टेकवावे आणि मन तसेच इंद्रिय व्याकुळ करावे .

प्रसार्य बाहू शिथिलौ तथा चापाश्रयाश्रित: ‖ २०७ ‖
मूर्च्छामदश्रमग्लानिविषादेषूपवेशयेत् |

पदच्छेद :- प्रसार्य बाहू शिथिलौ तथा चाप-आश्रय-आश्रित : ‖ २०७ ‖
मूर्च्छा-मद-श्रम-ग्लानि-विषादेषु उपवेशयेत् |

अन्वय : - मूर्च्छामदश्रमग्लानिविषादेषु बाहू प्रसार्य शिथिलौ तथा चापाश्रयाश्रित : उपवेशयेत् |

अर्थ - मोह, मूर्च्छा, मद, श्रम, ग्लानी तसेच विषाद या अवस्थांमध्ये दोन्ही भुजांना पसरवून शिथिल करावे आणि धनुष्याच्या आधारे आसनस्थ व्हावे .

सर्वपिण्डीकृताङ्गस्तु संयुक्त: पादजानुभि: ‖ २०८ ‖
व्याधिव्रीडितनिद्रासु ध्याने चोपविशेन्नर: |

पदच्छेद :- सर्व-पिण्डीकृत-अङ्ग : तु संयुक्तै : पाद-जानुभि : ‖ २०८ ‖
व्याधि-व्रीडित-निद्रासु ध्याने च उपविशेत् नर : |

अन्वय : - व्याधिव्रीडितनिद्रासु ध्याने च पादजानुभि : संयुक्तै : सर्वपिण्डीकृताङ्ग : नर : उपविशेत् |

अर्थ - व्याधी, लज्जा, झोप आणि ध्यानामध्ये असलेल्या मनुष्याने पाय आणि गुडघा शरीराशी जोडून अंगाला पिंडीसारखे संकुचित करून आसनस्थ व्हावे .

## ❖ उत्कटिकस्थान ❖

तथा चोत्कटिकं स्थानं स्फिक्पार्ष्णीनां समागमः ॥ २०९ ॥
पित्र्ये निवापे जप्ये च सन्ध्यास्वाचमनेऽपि च ।
विष्कम्भितं पुनश्चैव जानु भूमौ निपातयेत् ॥ २१० ॥

पदच्छेदः - तथा च उत्कटिकं स्थानं स्फिक्-पार्ष्णीनां समागमः ॥ २०९ ॥
पित्र्ये निवापे जप्ये च सन्ध्यासु आचमने अपि च ।
विष्कम्भितं पुनः च एव जानु भूमौ निपातयेत् ॥ २१० ॥

अन्वयः - तथा च स्फिक्पार्ष्णीनां समागमः (चेत्) उत्कटिकं स्थानं (भवेत्) । पित्र्ये निवापे जप्ये सन्ध्यासु आचमने जानु विष्कम्भितं (कृत्वा) भूमौ निपातयेत् ।

अर्थ - कुले आणि पायाची टाच जोडून बसल्यास त्या स्थानाला उत्कटिक स्थान असे म्हणतात . पितरांना तर्पण देताना, जप करताना, संध्यावंदना करताना आणि आचमनामध्ये हे स्थान वापरावे व नंतर याच स्थानात जेव्हा गुडघा जमिनीवर ठेवला जातो तेव्हा त्यास विष्कंभित असे म्हणतात .

प्रियाप्रसादने कार्यं होमादिकरणेषु च ।
महीगताभ्यां जानुभ्यामधोमुखमवस्थितम् ॥ २११ ॥
देवाभिगमने कार्यं रुषितानां प्रसादने ।
शोके चाक्रन्दने तीव्रे मृतानां चैव दर्शने ॥ २१२ ॥
त्रासने च कुसत्त्वानां नीचानां चैव याचने ।
होमयज्ञक्रियायां च प्रेष्याणां चैव कारयेत् ॥ २१३ ॥
मुनीनां नियमेष्वेष भवेदासनजो विधिः ।

पदच्छेदः - प्रिया-प्रसादने कार्यं होम-आदि-करणेषु च ।
महीगताभ्यां जानुभ्याम् अधोमुखम् अवस्थितम् ॥ २११ ॥
देव-अभिगमने च एव रुषितानां प्रसादने ।

शोके च आक्रन्दने तीव्रे मृतानां च एव दर्शने ॥ २१२ ॥
त्रासने च कुसत्त्वानां नीचानां च एव याचने ।
होमयज्ञक्रियायां च प्रेष्याणां च एव कारयेत् ॥ २१३ ॥
मुनीनां नियमेषु एवं भवेत् आसनजः विधिः ।

अन्वयः - प्रिया-प्रसादने होम-आदि-करणेषु महीगताभ्यां जानुभ्याम् अधोमुखम् अवस्थितं कार्यम् । देव-अभिगमने च रुषितानां प्रसादने शोके तीव्रे आक्रन्दने मृतानां च दर्शने कुसत्त्वानां त्रासने नीचानां च याचने होम-यज्ञ-क्रियायां प्रेष्याणां च कारयेत् । मुनीनां नियमेषु एवम् आसनजः विधिः भवेत् ।

अर्थ - प्रियेला प्रसन्न करण्यासाठी व होम हवन इ. धार्मिक क्रियांमध्ये गुडघ्यांना जमिनीवर ठेवून अधोमुख करून बसावे. देवादिकांना नमन करण्यासाठी, रूसलेल्या व्यक्तींना मनविण्यासाठी, शोकामध्ये, तीव्र आक्रोश करताना, शव बघताना, जंगली प्राण्यांना घाबरविताना, नीच पुरुषांनी केलेली याचना, होम-यज्ञ वगैरे क्रियांमध्ये, सेवा करताना या आसनाचा वापर करावा आणि ऋषिमुनींच्या व्रत नियमांमध्येदेखील हे आसन वापरावे.

### ❖ बाह्य आणि आभ्यंतर आसनविधी ❖

तथासनविधिः कार्यो विविधो नाटकाश्रयः ॥ २१४ ॥
स्त्रीणां च पुरुषाणां च बाह्यश्चाभ्यन्तरस्तथा ।
[आभ्यन्तरस्तु नृपतेर्बाह्यो बाह्यगतस्य च] ॥ २१५ ॥

पदच्छेदः - तथा आसनविधिः कार्यः विविधः नाटक-आश्रयः ॥ २१४ ॥
स्त्रीणां च पुरुषाणां च बाह्यः च आभ्यन्तरः तथा ।
[आभ्यन्तरः तु नृपतेः बाह्यः बाह्यगतस्य च] ॥ २१५ ॥

अन्वयः - (एवं) विविधः नाटकाश्रयः आसनविधिः कार्यः । स्त्रीणां पुरुषाणां च बाह्यः तथा आभ्यन्तरः (आसनविधिः कार्यः) । आभ्यन्तरः (आसनविधिः) नृपतेः बाह्यः (आसनविधिः) बाह्यगतस्य च ।-

अर्थ - नाट्याच्या प्रयोगामध्ये वेगवेगळया प्रकारच्या आसनाचा वापर केला पाहिजे. स्त्री आणि पुरुषांसाठी बाह्य आणि आभ्यंतर असे दोन प्रकारचे आसनविधी सांगितले आहेत. ह्यातील आभ्यंतर आसनविधी राजांसाठी आहे आणि बाह्य आसनविधी बाह्यगत म्हणजे सामान्य लोकांसाठी आहे.

❖ पुरुषांसाठीची आसने ❖

देवानां नृपतीनां च दद्यात्सिंहासनं द्विजा:|
पुरोधसाममात्यानां भवेद्वेत्रासनं तथा || २१६ ||
मुण्डासनं च दातव्यं सेनानीयुवराजयो:|
काष्ठासनं ब्राह्मण कुमाराणां कुथासनम् || २१७ ||
एवं राजसभां प्राप्य कार्यस्त्वासनजो विधि:|

पदच्छेद:- देवानां नृपतीनां च दद्यात् सिंहासनं द्विजा:|
पुरोधसाम् अमात्यानां भवेत् वेत्र-आसनं तथा || २१६ ||
मुण्ड-आसनं तु दातव्यं सेनानी-युवराजयो:|
काष्ठ-आसनं ब्राह्मणानां कुमाराणां कुथ-आसनम् || २१७ ||
एवं राजसभां प्राप्य कार्य: तु आसनज: विधि:|

अन्वय: - हे द्विजा:, देवानां नृपतीनां च सिंहासनं दद्यात्| पुरोधसां तथा अमात्यानां वेत्रासनं भवेत्| सेनानीयुवराजयो: मुण्डासनं दातव्यम्| ब्राह्मणानां काष्ठासनं कुमाराणां कुथासनं (दातव्यम्)| एवं राजसभां प्राप्य आसनज: विधि: कार्य:|

अर्थ - हे ब्राह्मणांनो! देवता आणि राजांना सिंहासन द्यावे. पुरोहित व अमात्यांना (सचिवांना) वेताचे आसन द्यावे. सेनापती व युवराजांना मुंडासन द्यावे. ब्राह्मणांसाठी लाकडी आसन असावे. लहान मुलांना बसण्यासाठी गालिचा किंवा दरी अंथरावी. याप्रमाणे राजसभेमध्ये येऊन आसनांची व्यवस्था करावी.

## ❖ स्त्रियांची आसने ❖

स्त्रीणां चैवासनविधिं सम्प्रवक्ष्याम्यहं पुन: ॥ २१८ ॥
सिंहासनं तु राज्ञीनां देवीनां मुण्डमासनम् ।
पुरोधोऽमात्यपत्नीनां दद्याद्वेत्रासनं तथा ॥ २१९ ॥

पदच्छेद:- स्त्रीणां च एव आसनविधिं संप्रवक्ष्यामि अहं पुन: ॥ २१८ ॥
सिंहासनं तु राज्ञीनां देवीनां मुण्डम् आसनम् ।
पुरोध: अमात्य-पत्नीनां दद्यात् वेत्रासनं तथा ॥ २१९ ॥

अन्वय: - अहं स्त्रीणां च आसनविधिं संप्रवक्ष्यामि । राज्ञीनां सिंहासनं देवीनां मुण्डम् आसनं पुरोध: तथा अमात्य-पत्नीनां वेत्रासनं दद्यात् ।

अर्थ - यानंतर आता मी स्त्रियांसाठी आसनविधी सांगेन . महाराणीसाठी सिंहासन, देवींसाठी मुंडासन, पुरोहित तसेच अमात्यांच्या पत्नींसाठी वेत्रासन देण्यात यावे .

भोगिनीनां तथा चैव वस्त्रं चर्म कुथापि वा ।
ब्राह्मणीतापसीनां च पट्टासनमथापि च ॥ २२० ॥
वेश्यानामपि कर्तव्यमासनं हि मसूरकम् ।
शेषाणां प्रमदानां च भवेद्भूम्यासनं द्विजा: ॥ २२१ ॥

पदच्छेद:- भोगिनानां तथा च एव वस्त्रं चर्म कुथ: अपि वा ।
ब्राह्मणी-तापसीनां च पट्ट-आसनम् अथ अपि च ॥ २२० ॥
वेश्यानाम् अपि कर्तव्यम् आसनं हि मयूरकम् ।
शेषाणां प्रमदानां च भवेत् भूमि-आसनं द्विजा: ॥ २२१ ॥

अन्वय: - भोगिनानां वस्त्रं चर्म कुथ: च ब्राह्मणीतापसीनां च पट्टासनं वेश्यानाम् अपि मयूरकम् आसनं हि कर्तव्यम् । द्विजा:, शेषाणां प्रमदानां च भूम्यासनं भवेत् ।

अर्थ - भोगिनी स्त्रियांना गालिचा किंवा दरी अथवा वस्त्र किंवा चामड्याचे आसन द्यावे . ब्राह्मणी आणि तपस्विनी यांना पट्टासन (कुशासनसारखे) द्यावे . वेश्यांसाठी मसूरासन असले पाहिजे . हे द्विजांनो, अन्य स्त्रियांना जमिनीवरच बसवावे .

## ❖ सामान्य आसनविधी आणि नियम ❖

एवमाभ्यन्तरो ज्ञेयो बाह्यश्चासनजो विधि:।
तथा स्वगृहवार्तासु च्छन्देनासनमिष्यते ॥ २२२ ॥

पदच्छेद :- एवम् आभ्यन्तर : ज्ञेय : बाह्य : च आसनज : विधि :।
तथा स्वगृह-वार्तासु छन्देन आसनम् इष्यते ॥ २२२ ॥

अन्वय : - एवम् आभ्यन्तर : बाह्य : च आसनज : विधि : ज्ञेय : । तथा स्वगृहवार्तासु आसनं छन्देन इष्यते ।

अर्थ - याप्रमाणे बाह्य व आभ्यन्तर (आंतरिक) आसनविधी जाणून घ्यावा व स्वत: च्या घरात गप्पा गोष्टी करताना स्वत :ला हवे तसे आसन वापरावे .

नियमस्थो मुनीनां च भवेदासनजो विधि:।
लिङ्गिनामासनविधि: कार्यो व्रतसमाश्रय: ॥ २२३ ॥

पदच्छेद :- नियमस्थ : मुनीनां च भवेत् आसनज : विधि :।
लिङ्गिनाम् आसन-विधि : कार्य : व्रत-समाश्रय : ॥ २२३ ॥

अन्वय : - मुनीनां आसनज : नियमस्थ : विधि : भवेत् । लिङ्गिनां व्रतसमाश्रय : आसनविधि : कार्य : ।

अर्थ - मुनींचे आसन स्वतंत्र आणि त्यांच्या नियमांनुसार असावे . लिंगी, संन्यासी लोकांची आसने त्यांच्या व्रताप्रमाणे असावीत .

ब्रुसीमुण्डासनप्रायं वेत्रासनमथापि च ।
होमे यज्ञक्रियां च पित्र्यर्थे च प्रयोजयेत् ॥ २२४ ॥

पदच्छेद :- ब्रुसी-मुण्ड-आसन-प्रायं वेत्र-आसनम् अथ अपि वा ।
होमे यज्ञ-क्रियायां च पित्र्यर्थे च प्रयोजयेत् ॥ २२४ ॥

अन्वय : - होमे यज्ञक्रियायां पित्र्यर्थे ब्रुसीमुण्डासनप्रायं च वेत्रासनं प्रयोजयेत् ।

अर्थ - होम-हवन, यज्ञ, पितरांसाठी केले जाणारे श्राद्ध, इ . मध्ये ब्रुशी किंवा वृषी (कुशासन), मुंडासन (मुंजासन) तसेच वेत्रासनाचा वापर करावा .

स्थानीया ये च पुरुषाः कुलविद्यासमन्विताः |
तेषामासनसत्कारः कर्तव्य इह पार्थिवैः || २२५ ||

पदच्छेदः- स्थानीयाः ये च पुरुषाः कुल-विद्या-समन्विताः |
तेषाम् आसन-सत्कारः कर्तव्यः इह पार्थिवैः || २२५ ||

अन्वयः - ये स्थानीयाः कुलविद्यासमन्विताः पुरुषाः तेषाम् आसनसत्कारः पार्थिवैः कर्तव्यः |

अर्थ - जे स्थानीय, कुलीन व विद्वान पुरुष आहेत त्यांचा सत्कार राजांनी "इह आस्यताम्" म्हणजे "येथे आसन ग्रहण करावे" असे म्हणून करावा.

समे समासनं दद्यात् मध्ये मध्यममासनम् |
अतिरिक्तेऽतिरिक्तं च हीने भूम्यासनं भवेत् || २२६ ||

पदच्छेदः- समे समासनं दद्यात् मध्यमे मध्यमम् आसनम् |
अतिरिक्ते अतिरिक्तं च हीने भूमि-आसनं भवेत् || २२६ ||

अन्वयः - समे समासनं मध्यमे मध्यमम् आसनं दद्यात् | अतिरिक्ते अतिरिक्तं च हीने भूम्यासनं भवेत् |

अर्थ - समान लोकांसाठी सम आसन घ्यावे. मध्यम पात्रांसाठी मध्यम आसन द्यावे. उत्तम पात्रांसाठी उत्तम आसन आणि हीन पात्रांसाठी भूमिरूप आसन असले पाहिजे.

उपाध्यायस्य नृपतेर्गुरूणामग्रतो बुधैः |
भूम्यासनं तथा कार्यमथवा काष्ठमासनम् || २२७ ||

पदच्छेदः- उपाध्यायस्य नृपतेः गुरुणां च अग्रतः बुधैः |
भूम्यासनं तथा कार्यम् अथवा काष्ठम् आसनम् || २२७ ||

अन्वयः - बुधैः उपाध्यायस्य नृपतेः गुरुणां च अग्रतः भूम्यासनं अथवा काष्ठम् आसनं कार्यम् |

अर्थ - विद्वानांनी उपाध्याय, राजा व गुरुजनांसमोर भूमिरूप आसनावर किंवा लाकडी आसनावर बसावे.

नौनागरथयानेषु भूमिकाष्ठासनेषु च |
सहासनं न दुष्येत गुरूपाध्यायपार्थिवै: ‖ २२८ ‖

पदच्छेद: - नौ-नाग-रथ-यानेषु भूमिकाष्ठ-आसनेषु च |
सहासनं न दुष्येत गुरु-उपाध्याय-पार्थिवै : ‖ २२८ ‖

अन्वय: - नौनागरथयानेषु भूमिकाष्ठआसनेषु च गुरु-उपाध्याय-पार्थिवै : सह आसनं न दुष्येत |

अर्थ - होडी, हत्ती आणि रथयानामध्ये भूमी किंवा लाकडी आसनावर गुरू, उपाध्याय आणि राजांनी एकत्र बसल्यास काहीही दोष नाही .

❖ शयनविधी ❖

आकुञ्चितं समञ्चैव प्रसारितविवर्तने |
उद्वाहितं नतञ्चैव शयने कर्म कीर्त्यते ‖ २२९ ‖

पदच्छेद: - आकुञ्चितं समं च एव प्रसारितविवर्तने |
उद्वाहितं नतं च एव शयने कर्म कीर्त्यते ‖ २२९ ‖

अन्वय: - आकुञ्चितं समं प्रसारितविवर्तने उद्वाहितं नतं च शयने कर्म कीर्त्यते |

अर्थ - आकुंचित, सम, प्रसारित, विवर्तित, उद्वाहित आणि नत हे सहा प्रकारचे शयनविधी आहेत .

❖ आकुंचितस्थान ❖

सर्वराकुञ्चितैरङ्गै: शय्याविद्धे तु जानुनी |
स्थानमाकुञ्चितं नाम शीतार्तानां प्रयोजयेत् ‖ २३० ‖

पदच्छेद: - सर्वै : आकुञ्चितै : अङ्गै : अङ्ग शय्याविद्धे तु जानुनी |
स्थानम् आकुञ्चितं नाम शीत-आर्तानां प्रयोजयेत् ‖ २३० ‖

अन्वय: - सर्वै: आकुञ्चितै: अङ्गै: शय्याविद्धे जानुनी आकुञ्चितं नाम स्थानं शीतार्तानां प्रयोजयेत् |

अर्थ - ह्यामध्ये सर्व अंग संकुचित करून दोन्ही गुडघे बिछान्यावर टेकवले तर त्यास 'आकुंचित स्थान' असे म्हणतात. थंडीने थरथरणाऱ्यांसाठी या आसनाचा वापर करावा.

### ❖ समस्थान ❖

उत्तानितमुखं चैव प्रत्यङ्मुक्तकरं तथा |
समं नाम प्रसुप्तस्य स्थानकं संविधीयते || २३१ ||

पदच्छेद :- उत्तानितमुखं च एव प्रत्यङ्मुक्तकरं तथा |
समं नाम प्रसुप्तस्य स्थानकं संविधीयते || २३१ ||

अन्वय : - उत्तानितमुखं तथा प्रत्यङ्मुक्तकरं समं नाम स्थानकं प्रसुप्तस्य संविधीयते |

अर्थ - ह्यामध्ये चेहरा वरच्या बाजूस व दोन्ही हात सैल व मोकळे सोडून (उताणे झोपावे) ह्यास 'समस्थान' असे म्हणतात. झोपेत असलेल्या व्यक्तीचा अभिनय करताना या स्थानाचा वापर करावा.

### ❖ प्रसारितस्थान ❖

एकं भुजमुपाधाय सम्प्रसारितजानुकम् |
स्थानं प्रसारितं नाम सुखसुप्तस्य कारयेत् || २३२ ||

पदच्छेद :- एकं भुजम् उपाधाय संप्रसारितजानुकम् |
स्थानं प्रसारितं नाम सुखसुप्तस्य कारयेत् || २३२ ||

अन्वय : - एकं भुजम् उपाधाय संप्रसारितजानुकं प्रसारितं नाम तत् स्थानं सुखसुप्तस्य कारयेत् |

अर्थ - ज्यामध्ये एका हाताची उशी बनवून, गुडघे पसरवून झोपले जाते, त्यास प्रसारित स्थान असे म्हटले आहे. सुखाने झोपलेल्या व्यक्तीचा अभिनय करताना या स्थानाचा वापर करावा.

### ❖ विवर्तितस्थान ❖

अधोमुखस्थितं चैव विवर्तितमिति स्मृतम् |
शस्त्रक्षतमृतोत्क्षिप्तमत्तोन्मतेषु कारयेत् || २३३ ||

पदच्छेद :- अधोमुखस्थितं च एव विवर्तितम् इति स्मृतम् |
शस्त्र-क्षत-मृत-उत्क्षिप्त-मत्त-उन्मत्तेषु कारयेत् || २३३ ||

अन्वय : - अधोमुखस्थितं (तत्) विवर्तितम् इति स्मृतम् | शस्त्र-क्षत-मृत-उत्क्षिप्त-मत्त-उन्मत्तेषु (एतत्) कारयेत् |

अर्थ - ज्यामध्ये तोंड खाली करून (अधोमुख ठेवून) झोपले जाते त्यास 'विवर्तित' म्हणतात . शस्त्रप्रहार, मृत्यू, उत्क्षिप्त, मत्त तसेच उन्मत्त व्यक्तींसाठी या स्थानाचा वापर करावा .

### ❖ उद्वाहितस्थान ❖

अंसोपरि शिर: कृत्वा कूर्परक्षोभमेव च |
उद्वाहितन्तु विज्ञेयं लीलया वेशने प्रभो: || २३४ ||

पदच्छेद :- अंस-उपरि शिर : कृत्वा कूर्पर-क्षोभम् एव च |
उद्वाहितं तु विज्ञेयं लीलया वेशने प्रभो : || २३४ ||

अन्वय : - अंसोपरि शिर: कृत्वा कूर्परक्षोभं (भवति) तत् उद्वाहितं विज्ञेयम् | प्रभो : लीलया वेशने (एतत् प्रयोक्तव्यम्) |

अर्थ - जेव्हा मान खांद्यावर कलती ठेवून किंवा टेकविली असेल व कोपरे वाकवले जातात त्यास 'उद्वाहित' म्हणतात . प्रियकराद्वारे लीलायुक्त प्रेमाने बोलण्यासाठी या स्थानाचा वापर करावा .

### ❖ नतस्थान ❖

ईषत्प्रसारिते जङ्घे यत्र सृष्टौ करावुभौ |
आलस्यश्रमखेदेषु नतं स्थानं विधीयते] || २३५ ||

पदच्छेद :- ईषत् प्रसारिते जङ्घे यत्र सृष्टौ करौ उभौ |
आलस्यश्रमखेदेषु नतं स्थानं विधीयते] || २३५ ||

अन्वय : - यत्र ईषत् प्रसारिते जङ्घे उभौ करौ स्रस्तौ तत् नतं स्थानं आलस्यश्रमखेदेषु विधीयते] |

अर्थ - ज्यामध्ये दोन्ही पोटऱ्या पसरवून, दोन्ही हात सैल सोडलेले असतात त्यास 'नतस्थान' म्हणतात . आळस, थकवा किंवा खेदामध्ये याचा वापर करावा .

गतिप्रचारस्तु मयोदितोऽयं
नोक्तश्च यः सोऽर्थवशेन साध्यः|
अतः परं रङ्गपरिक्रमस्य
वक्ष्यामि कक्ष्यान्तरसंविधानम् || २३६ ||

पदच्छेदः - गतिप्रचारः तु मया उदितः अयं
न उक्तः च यः सः अर्थवशेन साध्यः|
अतः परं रङ्ग-परिक्रमस्य
वक्ष्यामि कक्ष्यान्तर-संविधानम्|| २३६ ||

अन्वयः - अयं गतिप्रचारः तु मया उदितः | यः न उक्तः सः अर्थवशेन साध्यः | अतः परं रङ्गपरिक्रमस्य कक्ष्यान्तरसंविधानं वक्ष्यामि|

अर्थ - ह्या प्रमाणे मी हे गतिप्रचार सांगितले आहेत व ज्या गोष्टी मी नाही सांगितल्या त्या विषयानुसार कराव्यात . यानंतर रंगपरिक्रमेच्या विभागांनी युक्त कक्ष्याविभागांचे वर्णन करीन .

||इति भारतीये नाट्यशास्त्रे गतिप्रचारो नाम द्वादशोऽध्यायः||
||भरतमुनींच्या नाट्यशास्त्रातील 'गतिप्रचार' नावाचा बारावा अध्याय समाप्त||

साहित्य आणि संस्कृती मंडळ

महाराष्ट्र राज्य